मीमांसा-दर्शनम्

षष्ठाध्यायमारभ्य द्वादशाध्यायपर्यन्तम् ।

जैमिनिविरचितम्

सूत्रम् ।

श्रीशबरस्वामिकृत भाष्यसमेतम् ।

CUCCHBEHAR

वि, ए, उपाधिपरीक्षा

श्रीईश्वरचन्द्र-विद्यासागर-महाशयेन

शोधितं प्रकाशितम् ।

कलिकाता संस्कृत

यन्त्रालयाध्यक्षेण

मुद्रितम् ।

ई० १८७८

मीमांसा-दर्शनस्य उत्तरषट्के

सप्तमस्य अध्यायस्य प्रथमः पादः ।

अथ प्रयाजादि धर्माणामपूर्वप्रयुक्तताधिकरणम् ।

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥ १ ॥ (सि०)

पूर्वेण अध्यायषट्केन प्रत्यक्षविहितधर्माणां कर्मणां दर्शपूर्णमासादीनाम् इतिकर्त्तव्यता चिन्तिता, उत्तरेण इदानीम् अविहितेतिकर्त्तव्यतासु ऐन्द्राग्नादिषु चिन्तयितुमिष्यते । तत्र यदि दर्शपूर्णमासादीनां प्रकरणे ये विहिता धर्माः, ते सर्वकर्मसु विहिता भवन्ति, ततस्तैरेव धर्मैरैन्द्राग्नादयोऽपि धर्मवन्त उक्ताः, तथा कर्त्तव्याश्च इति, न अर्थ उत्तरेण षट्केन । अथ ये यस्य प्रकरणे उच्यन्ते, ते तत्रैव उक्ताः भवन्ति, ततोऽधर्मकाणि ऐन्द्राग्नीदीनि । तेषु चिन्ता भवति, किम् एषां धर्माः सन्ति, उत न ? इति । यदा च सन्ति । तदा के ? कियन्तो वा ? कथं च अनुष्ठातव्याः ? इति, तदर्थम् उत्तरः षट्कः प्रवर्त्तनीयः ।

तत्र सप्तमेन तावत् सन्ति धर्माः इत्युच्यते । अष्टमेन च इमे अस्य इति । इत्थं प्रयोक्तव्याः इति नवमेन । दशमैकादशद्वादशैरेतावन्तः प्रयोक्तव्याः, न अतोऽधिकाः इति ।

तत्र इदं विचार्यते, किं यजिप्रयुक्ता एते धर्माः, कथं यजिर्गुणवान् स्यात्? इत्येवमर्थमाम्नायन्ते, आहोस्वित् अपूर्वप्रयुक्ताः? कथम् अपूर्वं स्यात्? इति। यदि यजिप्रयुक्ताः, ततः सर्वार्थाः। अथ अपूर्वप्रयुक्ताः, ततो यथाप्रकरणं व्यवतिष्ठन्ते। किं पुनरत्र युक्तम्? अपूर्वप्रयुक्ताः इति, अपूर्वं हि फलवत्, अफलो यजिः, फलवति च प्रयासो विधीयमानोऽर्थवान् भवति। तस्मात् अपूर्वप्रयुक्ता धर्माः अतः परमाचार्यस्य सूत्रोपन्यासः, श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् इति, मुख्यानि अपूर्वाणि, तानि हि फलवत्त्वात् प्रधानानि, प्रधाने च मुख्यशब्दः। तेषां भेद उक्तः शब्दान्तरादिभिर्हेतुभिः। तस्मिन् मुख्यभेदे सति यथाधिकारं भावः स्यात् शेषाणां, ये यस्य अपूर्वस्य अधिकारे प्रकरणे श्रियन्ते, ते तस्यैव भवेयुः, श्रुतिप्रमाणत्वात्, अयमस्य अपूर्वस्य शेषः, अयम् अस्य इत्यत्र श्रुतिरेव प्रमाणं क्रमते। न प्रत्यक्षादीनामन्यतमत्। श्रुत्या च ये यस्य प्रकरणे श्रूयन्ते, ते तस्यैव भवितुमर्हन्ति, न चान्यस्योद्देशोऽर्थोऽन्यस्य भवति, न हि यूपेवदत्तस्य पामाच्छादनादिकं, तच्चैत्रदत्तस्य भवति। तस्मात् यथाप्रकरणं व्यवस्था धर्माणाम्।

उत्पत्त्यर्थाविभागाद्वा सत्ववद्वैकधर्म्यं स्यात् ॥ २॥

(पू०)

अथ वा, न एतत् एवं, यथाप्रकरणं धर्माणां व्यवस्था इति। कथं तर्हि? ऐकधर्म्यं स्यात् इति, समानधर्मता,

सर्वे धर्माः सर्वार्थाः। कुतः ? । उत्पत्त्यर्थाविभागात्, उत्पत्तिः इति यजिं ब्रूमः, अपूर्वस्य उत्पादनम्, अर्थः इति अपूर्वं ब्रूमः, यजिप्रयोजनत्वात्, तयोः अविभागः। सर्वाणि अपूर्वाणि यजिमन्ति,यजिसंयोगेन धर्माः शिष्यन्ते, यजेत इत्युक्ता उक्ताः, ते यजौ न सम्भवन्ति, तस्य अफलत्वात् तत्र असम्भवन्तः तत्सम्बद्धेषु अपूर्वेषु विज्ञायन्ते। स च यजिसम्बन्धः सर्वेषाम् अपूर्वाणां तुल्यः। तस्मात् सर्वार्था भवन्ति, सत्वधर्मवत्, यथा सत्वधर्माः, गौर्न पदा प्रष्टव्यः इति गोत्वसम्बन्धेन श्रूयमाणाः तत्र असम्भवन्तः तत्सम्बद्धेषु पिण्डेषु विज्ञायन्ते, तस्य च गोत्वसम्बन्धस्य अविशेषात् सर्वगवीषु शुक्लनील-कपिल-कपोतिकासु भवन्ति। एवम् इहापि।

उच्यते, विषम उपन्यासः, तत्र गोसामान्यसम्बन्धेन धर्मा विधीयन्ते; गौर्न पदा प्रष्टव्यः इति, इह पुनर्यजिविशेषसम्बन्धेन धर्मा विधीयन्ते, दर्शपूर्णमासाभ्यां यजेत इति ज्योतिष्टोमेन यजेत इति, विशिष्टयजिसम्बद्धे एव अपूर्वे भवितुमर्हन्ति न सर्वत्र इति। तत्र ब्रूमः, दर्शपूर्णमासाभ्यां यजेत इत्यत्र न शक्यन्ते यागविशेषे धर्मा विधातुम्। किंकारणम् ?। यदा यजौ धर्मा विधीयन्ते, तदा यजिरनूद्यते, यजेत इत्यम् इति, यदि यजिर्विधीयेत, न धर्मैः सम्बध्येत, न हि इयोर्विधीयमानयोः परस्परेण सम्बन्धो भवति, अनुवादस्य सन् अविशेषात् सर्वयागानुवादः। तस्मात् सर्वार्था धर्माः।

ननु दर्शपूर्णमासशब्दौ विशेषको भविष्यति। न दर्श-

पूर्णमासशब्दः यजेति यागं विधेष्टुम्। अयं हि विधिर्वा स्यात् अनुवादो वा, यदा अनुवादः, तदा धर्मसम्बन्धार्थः, स च धर्मसम्बन्धो यागानुवादेनैव तयोः सिद्धः।

ननु निहुत्तिकरो भविष्यति, दर्शपूर्णमासौ एवं इत्यं कुर्यात् न अन्यात् इति। नैवं शक्यं, यत्कारणं, न तस्य अन्यनिहुत्तिः अर्थः। ननु परिसङ्ख्या करिष्यति। न अत्र परिसङ्ख्या युज्यते, यदि अन्येन वाक्येन यागमात्रे धर्मप्रसङ्गः स्यात्, तत एतत् पुनर्वचनं परिसङ्ख्यां कुर्यात्, अत्र पुनः अमति प्रसङ्गे अनेनैव प्रसङ्गो अनेनैव निहुतिः इत्यतिभारः एकस्यैव वाक्यस्य भवति।

एवं तर्हि, न अत्र यजेत इति शब्दो धर्मविधिभिः सम्बध्यते, यजेत इत्यमिति, केन तर्हि? दर्शपूर्णमासशब्देन, प्रत्यक्षो हि तेन अस्य संयोगः, दर्शपूर्णमासाभ्यां यजेत इति, परोक्षो धर्मविधिभिः। कः तदा वाक्यार्थः?। दर्शपूर्णमासौ कुर्यात् इति। नैवं शक्यम्, एवं सति धर्मा असम्बद्धाः पारिप्लवा भवन्ति। कथं कृत्वा?। येयमाख्यातिकी विभक्तिः यजेत इति, सा दर्शपूर्णमासयोः कर्त्तव्यतां विदधाति, तच्च कथं यागमात्रेण यागविशेषेण वा धर्मसम्बन्धः स्यात्, विधायिका विभक्तिर्नास्ति इत्यसम्बद्धा धर्मा भवन्ति।

नैष दोषः, न वयं वाक्येन धर्माणां सम्बन्धं करिष्यामः, केन तर्हि? प्रकरणेन। कथम्?। कर्त्तव्यतायां चोदितायाम् इतिकर्त्तव्यताकाङ्क्षा भवति, कथं कुर्यात्? इति। प्रकरणेन धर्माः सम्बध्यन्ते इत्थं कुर्यात् इति, नैवं शक्यं,

यदा हि दर्शपूर्णमासौ कर्त्तव्यतया चोद्यते, तदा इतिकर्त्तव्यताकाङ्क्षा एव नास्ति, प्रज्ञातेतिकर्त्तव्यतत्वात् तयोः, असत्याञ्च इतिकर्त्तव्यताकाङ्क्षायां प्रकरणमेव नास्ति, एवं हि उक्तम्, असंयुक्तं प्रकरणात् इतिकर्त्तव्यतार्थित्वात् इति।

एवं तर्हि, नैव अत्र यागे धर्मा विधीयन्ते, नापि दर्शपूर्णमासयोः कर्त्तव्यता उच्यते, किन्तर्हि ? दर्शपूर्णमासाभ्यां यजेत इति पदद्वयेन विशिष्टं यागमनूद्यात्र धर्मा विधीयन्ते, दर्शपूर्णमासाभ्यां यजेत इत्यस्य इति। एवमपि दर्शपूर्णमासाभ्याम् इत्यनुवादो न युज्यते, तृतीयार्थस्य असिद्धत्वात्, पूर्ववान् अनुवादो भवति, अपूर्वञ्च तृतीयार्थः, स अवश्यं विधातव्यः, तस्मिंश्च विधीयमानेऽन्यदेवासम्बद्धमापद्यते, दर्शपूर्णमासौ यजेः करणम् इति। तस्मात् स एव प्रथमः पक्षोऽस्तु, यागानुवादेन धर्माणां विधिः इति।

ननु तत्रापि दर्शपूर्णमासाभ्याम् इत्येतत्र सम्बध्यते। ननु सम्बध्यते, कालवचनः सन् प्रायिको नित्यानुवादो भविष्यति, प्रायेण यागानां दर्शपूर्णमासकालत्वात्। तृतीया च कालस्य अर्थकृतं गुणभावमालोच्य उपपद्यते, तथा चेत् सर्वे धर्माः सर्वार्थाः भवन्ति।

चोदनाशेषभावाद्वा तद्दृष्टावतिष्ठेरन् उत्पत्तेर्गुणभूतत्वात् ॥ ३ ॥ (उ०)

कर्मचोदनायाः शेषभूतो धर्मसमाम्नायः एकदेशभूतः इत्यर्थः, दर्शपूर्णमासाभ्यां यजेत, अनया अग्न्याधानादिकया इतिकर्त्तव्यतया इति। तस्यां चोदनायां यजेर्गुणभावः श्रूयते, दर्शपूर्णमासशब्दो यजिवचनः, करणभावोऽत्र

यजेः श्रूयते, दर्शपूर्णमासाख्येन यागसमुदायेन अन्यत् कुर्यात् इति, यत् तत अन्यत्, तत् कर्त्तव्यतया चोद्यते, न यजिः, अपूर्वं च तत्। ननु फलम् अत्र वाक्ये श्रूयते, स्वर्गकामो यजेत इति, तत् कर्त्तव्यं स्यात्। सत्यं श्रूयते, न तु तत् यजिना क्रियते, विनष्टे यज्ञे तद्भवति, अपूर्वं तुतेन क्रियते। तस्मात् तस्य कर्त्तव्यता उच्यते, यस्य कर्त्तव्यता तत् इतिकर्त्तव्यतया सम्बध्यते। तस्मात् अपूर्वार्था धर्माः, तेषां च अपूर्वाणां भेदः। अतः तद्भेदात् यथाप्रकरणं व्यवतिष्ठन्ते धर्माः इति।

अथैतस्मिन् पक्षे कथं दर्शपूर्णमासशब्देन यागो विधीयते ?। उच्यते, नैव अत्र यागो विधीयते, किन्तर्हि ? अपूर्वभावनैव उभयपदविशिष्टा उच्यते, यथा अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति इति। विषम उपन्यासः, तत्र हि अन्यत् द्रव्यम्, अन्यो गुणः, तेन तत्र उभयविशेषणत्वं युज्यते, इह पुनर्यागः एव तौ दर्शपूर्णमासौ, तेन इह उभयविशेषणत्वं न युज्यते। उच्यते, इहापि यजेत इति सामान्यं, दर्शपूर्णमासौ इति विशेषः, अन्यच्च सामान्यमन्यो विशेषः।

एवमपि श्रुत्या सामान्येन भावना, वाक्यात् विशेषेण, न चैतत् युगपद्भवति इति। एवं तर्हि, नैव अत्र श्रुत्यर्थः परिगृह्यते, किन्तर्हि ? वाक्यार्थः। किंकारणम् ?। श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थको भवति, यजतिश्च अनुवादः, यजत्याख्यकत्वात् दर्शपूर्णमासयोः, यजतिसामान्याधिकरण्याच्च दर्शपूर्णमासशब्दश्च।

सत्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ॥ ४ ॥
(आ० नि०)

यत्तु सत्ववत् इति, अत्र गवाक्षतो धर्माः श्रूयते, आकृतेः पदार्थत्वात्, न च तत्र सम्भवति, अतोऽसौ आकृतिः। सहचारिपिण्ड-लक्षणार्था विज्ञायते, यथा गङ्गायां गावः इति। तच्च साहचर्यं, सर्वपिण्डानामविशिष्टम् इति, सर्वपिण्डेषु विहितं भवति। तस्मात् तत् सार्वत्रिकं प्रतीयेत, इह तु यजेर्गुणभावेन श्रवणात् नैव यजौ धर्माः श्रूयन्ते, किं तर्हि ? अपूर्वः इत्येवम् अपदिष्टो हेतुः। तस्मात् अनुपन्यासः सत्ववत् इति।

अविभागात्तु नैवं स्यात् ॥ ५ ॥ (आ०)

अथ तुशब्दः पक्षव्यावृत्तौ। नैतदेवम्, अपूर्वप्रयुक्ता धर्माः इति, यजिप्रयुक्ता एव। कुतः ?। अविभागात्, यजिना अविभागो धर्माणां, प्रत्यक्षं केचित् द्रव्ये श्रूयन्ते, केचित् देवतायां, केचिन्मन्त्रेषु, एष च यजिः, यत्, द्रव्यं देवताम् उद्दिश्य मन्त्रेण त्यज्यते, स एष प्रत्यक्षो यजिना सम्बन्धो धर्माणाम्, अपूर्वेण त्वानुमानिकः। फलेऽपि यजेः प्रत्यक्षश्रुतो गुणभावः, स्वर्गकामो यजेत इति, आनुमानिकोऽपूर्वेण, अनुमानाच्च प्रत्यक्षं बलीयः। तस्मात् यज्यर्थाः धर्माः। ननु यजिर्भङ्क्तित्वात् कालान्तरे फलं दातुम् असमर्थः, तत्र कृता धर्मा असमर्था एव भवति इत्युक्तम्। अत्र स्थितस्य न्यायस्य आक्षेपेण प्रत्यवस्थानं क्रियते, तैलपानवत् एतद्भविष्यति, यथा तैलपानं घृतपानं वा भङ्क्तित्वेऽपि सति

कालान्तरे मेधाद्यतिबलपुष्ट्यादीनि फलानि करोति एवं यजिरपि करिष्यति, किम् नः अदृष्टायुतेन अपूर्वेण कल्पितेन इति ।

हार्थत्वं च विप्रतिषिद्धम् ॥ ६ ॥ (यु०)

एवं च सति सर्वे धर्माः सर्वार्था भवन्ति, तथा च ऐन्द्राग्नादिषु प्रयाजादयः सन्ति, तत्र सौर्ये कर्मणि प्रयाजानां दर्शनम् उपपद्यते, प्रयाजे प्रयाजे क्रव्यादं जुहोति इति । इतरथा प्रयाजाय विधातव्याः, प्रयाजेषु च क्रव्यादोमः, तथा च हार्थं तत् स्यात्, हार्थत्वं च विप्रतिषिद्धम् । तस्मात् यजिप्रयुक्ता धर्मा इति ।

उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्-तस्य कर्मभेदः स्यात् ॥ ७ ॥ (आ० नि०)

नैतदेवं, यजिप्रयुक्ता धर्माः इति, चोदनायां प्रवृत्तिः स्यात्, चोदनेत्यपूर्वं ब्रूमः, चोदनार्थत्वात् अपूर्वार्थत्वात् अपूर्वप्रयुक्ता धर्माः, फलवत्त्वात् इत्युक्तो हेतुः । यत्तु, प्रयुक्तो यजिसम्बन्धो धर्माणाम् इति, अत्र ब्रूमः, उत्पत्तौ विध्यभावात्, उत्पत्तिः इति यजिं ब्रूमः । उत्पत्तौ यजौ नास्ति विधिः, यज्यर्था धर्माः इति, केवलं यजौ श्रूयन्ते, क्रियन्ते च, नैतावता तदर्था भवन्ति । यथा, वाससि रागः श्रूयते, वासो रञ्जयति इति, वाससि च क्रियते, न चासौ तदर्थः, स्वार्थः पुरुषार्थो वा भवति । एवम् इहापि, यजौ श्रूयमाणाः क्रियमाणाश्च अपूर्वार्था भवेयुः, अर्थवत्त्वाय ।

ततश्च कर्मभेदः स्यात्, यतोऽपूर्वार्थाः इति। यत्तु, यजेः प्रत्यक्षं, फले गुणभावः इति। न कृत्वा अपूर्वं, भवति इति, प्राणालिको विज्ञायते, प्रधाद्यापि च येन क्रियते तत् कारणं भवति, यथा, गोमयैः पचति, तुषपक्वा भवन्ति इति। यत्तु, तैलपानवत् यजितः फलं भवति इति। अत्र ब्रूमः, तैलपानस्यापि न कालान्तरे फलं भवति, धातुसाम्यं तस्य फलं, तच्च तत्कालमेव, यच्च फलं बलपुष्ट्यादि, तत् सम्यगाहारपरिणामाद्भवति। तस्मात् विषमः उपन्यासः।

यदि वाप्यभिधानवत्सामान्यात्सर्वधर्मः स्यात् ॥ ८ ॥ (आ०)

यदि अपि अपूर्वं प्रयोजकं धर्माणां, तथापि सर्वधर्मः स्यात् स स पदार्थः, अभिधानवत् सामान्यात्, अभिधानं तावदेतेषां समानम्, अपूर्वम् इत्यभिधानवत् धर्मेणापि अस्य समानेन भवितव्यं, वाह्नीकवत्। यथा, वाह्नीकोऽतिथिरागतः, यवागूमस्मै प्रक्रियताम् इत्युक्ते, यो यो वाह्नीकस्तस्य तस्य यवागूं क्रियते। यथा वा, अश्वामये सुह्रौदनो भोक्तव्यः, उदरामये पयः पातव्यम् इति, सर्वत्र च हि अश्वामये सुह्रौदनो भुज्यते, उदरामयेऽपि पयः पीयते। एवम् इहापि एकस्य अपूर्वस्य ये धर्माः श्रुतास्ते सर्वापूर्वाणां भवितुमर्हन्ति। अपि च, अरुणपराशरा नाम शारिवनः, तेषां परिचरेषु स्मृतिरूपं ब्राह्मणं भवति, ये दर्शपूर्णमासयोर्धर्माः, ते सर्वेष्टीनामग्नीषोमीयस्य च इत्यारभ्य, यावत्स्वर्गः प्रकृतिविकृतयोऽनुज्ञान्ताः इति। तच्च अनुक्रमणमेत-

भेव न्यायं सूचयति। तस्मात् अपूर्वप्रयुक्तत्वेऽपि सर्वे धर्माः सर्वार्थाः इति।

अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ॥ ९ ॥ (आ० नि०)

उपवर्णनापरिहारस्तावत् उच्यते। यदुक्तं, वाहीकवत् इति, अत्र ब्रूमः, अर्थस्य त्वविभक्तत्वात्, तथा स्यात् अभिधानेषु, अर्थो वाहीकत्वं, तद्देशसम्बन्धः, सोऽविभक्तः, सर्ववाहीकेषु अनुगतः इत्यर्थः। तन्निमित्तश्च प्रीतिविशेषो न पुरुषनिमित्तः। कथं ज्ञायते ? पूर्ववत्त्वात् प्रयोगस्य, पूर्ववान् अत्र प्रयोगः, बहुषु वाहीकेषु अवाहीकेषु भोजिताः, तत्र अन्वयव्यतिरेकाभ्यां ज्ञातमेतत्, देशनिमित्तेयं यवान्नप्रियता, न पुरुषनिमित्ता। तस्मात् तथा स्यात् वाहीकादिषु अभिधानेषु। अथ इह कर्मणः शब्दभाव्यत्वं, न अन्यतः शक्यमेतत् ज्ञातुम्, कस्य अपूर्वस्य धर्माः ? इतिः, शब्देन ह्यभिहिता विज्ञाता धर्माः, अपूर्वाणां च विभागः, अतः शेषाणाम् अन्यत्र विहितानाम् अन्यत्र अप्रवृत्तिः स्यात्।

स्मृतिरिति चेत् ॥ १० ॥ (आ०)

अत्र यदुक्तं, स्मृतिः इति तत्र कः परिहारः ?।

न, पूर्ववत्त्वात् ॥ ११ ॥ (आ० नि०)

पूर्ववती ह्येषा स्मृतिः, चोदकं धर्मग्राहकं वक्ष्यति,

विध्यन्तो वा प्रकृतिवत् इति, तेन प्राप्तिप्राप्तानां धर्माणाम् अयम् अनुवादः, एतन्न्यायपूर्विका, न त्वप्राप्तानां विधायिका, यत्कारणं, व्यवस्था धर्माणामेतेन न्यायेन भवति।

अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्दादेवान्यत्र भावः स्यात् ॥ १२ ॥ (उप०)

इदं निगमनसूत्रम्। निगमनं च प्रतिज्ञाया हेतोश्च पुनर्वचनम्। तदिदम् उच्यते, यस्मात् एवं, तस्मात् अर्थस्य अन्वाधानादेः शब्दभाव्यत्वात्, प्रतिप्रकरणं च निबन्धनात् शब्दात् एव अन्यत्र भावः स्यात्, यथा, गन्धर्वाप्सरसो वा, एतमुन्मादयन्ति, यः उन्मादयतीति वै गन्धर्वाप्सरसो यद्राष्ट्रभृतं, तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति इति अग्निप्रकरणे उत्पन्नानां राष्ट्रभृताम् उदाहृते उपदेशः, एतेषां राष्ट्रभृतो जुहोत्यभ्यातानाम् जुहोति इति। अमत्वेतस्मिन् वचने यथाधिकारं व्यवतिष्ठेरन् धर्माः इति। एवं च सति त्रैधर्मकाणि ऐन्द्राग्नादीनि। तदर्थम् उत्तरोऽध्यायषट्कः प्रारब्धव्यः इति।

तत्र समभेन तावत् ऐन्द्राग्नादीनां कर्मणां धर्माः सन्ति इत्युच्यते, ते चातिदेशेन इति। अतिदेशो नाम ये परत्र विहिता धर्माः, तमतीत्य अन्यत्र तेषां देशः, यथा, देवदत्तस्य भोजनविधिं कृत्वा शालिसूपमांसापूपैर्देवदत्तो भोजयितव्यः इति, तमेव विधिं यज्ञदत्तेऽतिदिशति, देवदत्तवत् यज्ञदत्तो भोजयितव्यः इति। श्लोकमपि उदाहरन्ति,

प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु ।
धर्मप्रदेशोऽयेन स्यात् सोऽतिदेशः इति स्थितिः ॥ इति,
स च नाम्ना वचनेन वा, तत्र नाम त्रिविधम् अतिदेशकं,
कर्मनाम, संस्कारनाम, यौगिकम् इति। वचनं पुनर्द्विविधं,
प्रत्यक्षश्रुतम्, आनुमानिकं च। तयोरानुमानिकम् उपरि-
ष्टात् वक्ष्यते, प्रत्यक्षश्रुतं तु इदानीमेव चिन्त्यते। (७। १
१ अ०)।

अस्ति इषुनामेकाङ्गः, अपरः श्येनः। तौ द्वावप्याभि-
चारिकौ तत्र इषौ कांश्चित् धर्मान् विधाय आह, समान-
मितरच्छ्येनेन इति, एतच्चिन्त्यते, किम् अयम् अनुवादः
विधिः ? इति। यदि विधिः, ततोऽतिदेशः, श्येनधर्मान्
इषौ अतिदिशति। अथ अनुवादः, ततो न इति। तत्र किं
प्राप्तम् ?। तत् सूत्रेणैव उपक्रम्यते,

समानमितरच्छ्येनेनेतिगुत्वा इषौ श्येनीयविशेषधर्मातिदेशाधिकरणम्।

समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् ॥ १२ ॥

(पू०)

समानम् इतरत् श्येनेन इति, अत्र उत्पन्नाधिकारः
स्यात्, अनुवादः इत्यर्थः। कुतः ?। पूर्ववत्त्वात्, अयमिषुः
पूर्ववान्, ज्योतिष्टोमपूर्वकः, ज्योतिष्टोमिकोऽत्र विधीयत
इत्यर्थः। अत्र चोदकेन उत्पन्ना ज्योतिष्टोमिका धर्माः सन्ति,
श्येनोऽपि ज्योतिष्टोमपूर्वकः, तत्रापि ते सन्ति। ये इषौ श्येने
च समाना भवन्ति, तान् अधिकृत्य अयं वादो युज्यते।
तस्मात् उत्पन्नाधिकारत्वात् अनुवादः।

किञ्च इतरत् इति च अभावे न उपपद्यते, इतरशब्दश्च असन्निधितेऽनुपपन्नः, सन्निहित एव भवति, यथा, इतरः आधारो दीयताम्, इतरः कम्बलो दीयताम् इति सन्निहितो दीयते, न प्रावारमात्रं कम्बलमात्रं वा। ज्योतिष्टोमिकाश्च सन्निहिताः। तस्मात् तेषां वादः। तेषां च इदमनुवादः, विहिता हि ते चोदकेन इति।

श्येनस्येति चेत् ॥ १४ ॥ (पू० आ०)

इति चेत् पश्यसि, ज्योतिष्टोमिकानामनुवादः इति, नैवं, श्येनस्य वैश्येविकाषां लोहितोष्णीषादीनां धर्माणां विधिः। कुतः ?। श्येनग्रहणसामर्थ्यात्, एवं श्येनग्रहणम् अर्थवत् भविष्यति, धर्मान् विधेयवत्। इतरथा अनर्थकं स्यात्, सर्वेषां हि एकाहाहीनसत्राणां ते समानाः, तत्र यावत् उक्तं स्यात्, समानम् इतरत् इति तावदेव, समानम् इतरत् श्येनेन इति।

नासन्निधानात् ॥ १५ ॥ (पू० आ० नि०)

न अयं श्येनवैश्येविकाषां वादो युज्यते। कस्मात् ?। असन्निधानात्, अयम् इतरशब्दः सन्निहिते भवति, न च श्येनशब्देन वैश्येविका इमौ सन्निहिताः। यत्तु, श्येनशब्दो वैश्येविको भवति इति, विधिपक्षे अवैश्येविकत्वं दोषः स्यात्, अनुवादपक्षे तु नैव कश्चित् विधीयते, किं विशेषयिष्यति ? ज्योतिष्टोमिकास्तु सर्वसाधारणाः सन्तः श्येन-

स्यापि भवन्ति इत्यनुवादो युज्यते। तस्मात् ज्योति-ष्टोमिकानामेव अनुवादः।

अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्योति-ष्टोमिकादिधेस्तद्वाचकं समानं स्यात् ॥ १६ ॥ (सि०)

अपि वा इति पक्षान्तरपरिग्रहे। विधिरयं श्येनवैश्ये-षिकाणां, ज्योतिष्टोमिकानाम् अनुवादः कुतः ?। अपूर्व-त्वात्, एवम् अपूर्वम् अर्थं विधास्यति, तथा प्रवृत्तिविशेष-करो भविष्यति। अनुवादः सन् अप्रवृत्तिविशेषकरोऽनर्थकः स्यात्। ननु इतरशब्दोऽयं सन्निहिते भवति। उच्यते, इतरदधिकार्थे, समानम् इतरत्, समानमधिकम् इत्यर्थः।

ननु सन्निहितवचनोऽयं न अधिकार्थः इति। उच्यते, न केवलम् अयं सन्निहितवचन एव पूर्वोक्तसदृश्यम् अ-न्निहितमपि ब्रूते, अवशिष्टं च। यदा हि वस्त्राणि अनुक्रम्य इतरशब्दः प्रयुज्यते, देवदत्ताय कम्बलो दीयतां, विष्णु-मित्राय कौशेयं, यज्ञदत्ताय क्षौमम्, इतरस्मै त्वाय इति, तदा वस्त्रमेव प्रदीयते, न हिरण्यं रजतं वा, इह ज्योति-ष्टोमिकेभ्योऽधिकान् धर्मान् अनुक्रम्य इतरशब्दः प्रयुक्तः, तेन अन्याप्यधिकानेव वक्तुमर्हति, तथा अधिकवचनो भवति।

अत्र ज्योतिष्टोमिकान् ब्रूते, तथा सन्निहितवचनः, तत्र अवश्यम् अन्यतरत् हेयम्। यदि अधिकार्थतां हित्वा सन्निहितार्थता आश्रीयते, अनुवादमात्रम् अनर्थकं भवति, [illegible]। अत्र सन्निहितार्थतां हित्वा

अधिकार्थता गम्यते, न कश्चिद्दोषो भवति। तस्मात् सूत्रकार आह, इतरत् अधिकार्थं इति। अतो ज्योतिष्टोमिकादिषु: अधिकाः श्येनवैशेषिका ये, ते इह अतिदिश्यन्ते, तद्वाचकं समानं स्यात्, समानशब्दः स्यात् इत्यर्थः। भवति श्येनशब्दस्य विवक्षितः। (७।१।२ अ०)।

चतुर्मास्यानां वैश्वदेवे आग्नेयादीनि हवींषि सार्थवादवाक्यैर्विहितानि, धर्माश्च तेषाम् उक्ताः, वरुणप्रघासेषु केवलानि हवींषि आम्नाय, यद्वैश्वदेविकानां ब्राह्मणं, तन्नेषाम् अतिदिश्यते, एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानि इतराणि इति। तत्र किम् अर्थवादमात्रस्य अयम् अतिदेशः, उत सार्थवादकस्य सविधिकस्य काण्डस्य? इति। कथं पुनरर्थवादमात्रस्य अतिदेशो भवति?। यथा, पम्याकुलायप्रतिमाय दत्ताः इति। के पुनर्विधयः, के अर्थवादाः?। त्रेधा सवहं बर्हिर्भवति, त्रेधा सवहः इध्मः, नव प्रयाजा नव अनुयाजाः इत्येवमादयो विधयः। वार्त्रघ्नानि वा एतानि हवींषि इत्यर्थवादाः। तत्र इदम् उच्यते,

एतद्ब्राह्मणानीत्यादीना पञ्चहविःषु सार्थवादविध्यतिदेशाधिकरणम्।

पञ्चसञ्चरेष्वर्थवादातिदेशः सन्निधानात् ॥ १७ ॥

(पू०)

पञ्च तानि हवींषि सर्वपर्वसु सञ्चरन्ति इति पञ्चसञ्चराणि इत्युच्यन्ते, तेषु पञ्चसञ्चरेषु अर्थवादमात्रस्य अतिदेशः

इति। कुतः ?। सन्निधानात् इविषां सन्निहिता अर्थवादाः, विधिभिः एकवाक्यसम्बद्धत्वात्, न धर्मविधयः। किम् अतः ?। अत एतद्भवति, यत् पूर्वेषां ब्राह्मणम् इति व्यपदेशो युज्यते, तद्धि तेषां ब्राह्मणं, येन विधीयन्ते, कोऽन्यो इविषां ब्राह्मणस्य च सम्बन्धोऽन्यत्र विधेयविधायकभावात् ? अर्थवादेषु एतानि विधीयन्ते, न धर्मविधिभिः, धर्मविधिभिस्तु यानि विधीयन्ते, न तानि इवींषि। तस्मात् अर्थवादानाम् अतिदेशो न धर्मविधीनाम्। अपि च वरुणप्रघासेषु अपि केचित् वैश्वदेविका धर्मा विधीयन्ते, यथा अग्निं मथ्नन्ति प्रसुवो भवन्ति इति, तेषाम् अतिदेशेन विहितानां पुनराम्नानम्, अनर्थकं स्यात्, यदि विधयोऽतिदिश्येरन्। तस्मात् अर्थवादातिदेशः इति।

सर्वस्य वैकशब्द्यात् ॥ १८ ॥ (सि०)

नैतदेवम्, अर्थवादमात्रस्य अतिदेशः इति, सविधिकस्य सार्थवादकस्य काण्डस्य अतिदेशः, इति। कुतः ?। ऐकशब्द्यात्, समानशब्दत्वात् इत्यर्थः, समानोऽयं ब्राह्मणम् इति शब्दो विधीनाम् अर्थवादानां च, स यथा अर्थवादान् गृह्णाति एवं विधीनपि गृह्णाति चेत्, तानप्यतिदिशति। यस्तु विधीनां इविर्भिः सम्बन्धो नास्ति इति। विधेयविधायकसम्बन्धो नास्ति उपकारलक्षणः सम्बन्धो भविष्यति। कः उपकारः ?। यदेषाम् अङ्गानि विदधाति। अस्ति चेत् सम्बन्धः, ब्राह्मणशब्दयुत्या सर्वातिदेशो न्याय्यः इति।

लिङ्गदर्शनाच्च ॥ १९ ॥ (यु०)

लिङ्गं च विधीनाम् अतिदेश्यं दर्शयति। किं लिङ्गम्? वरुणप्रघासेषु चिंगटाहुतयो वाजिनो यजमाहुतीनां सम्यक्त्वे चिंगत्वाय इति वरुणप्रघासे चिंगतमाहुतीर्दर्शयति, यदि विधयो न अतिदिश्येरन्, ता न स्युः। तस्मात् अतिदिश्यन्ते।

विहितान्नानान्नेति चेत् ॥ २० ॥ (आ०)

विहितान्नानात् इति यदुक्तं, तस्य कः परिहारः? आभाषान्तं सूत्रम्।

नेतरार्थत्वात् ॥ २१ ॥ (आ० नि०)

अत्र उच्यते, विध्यतिदेशेऽपि सति न अग्निमन्थनादीनाम् आत्मानम् अनर्थक्यम्, इतरस्य हविषोऽर्थेन भविष्यति, दक्षिणवैहारिकस्य माकुलाः। तस्मात् नेतत् ज्ञापकं, विधीनाम् अनतिदेशस्य भविष्यति। (७।१।३ अ०)।

एतद्ब्राह्मणं इत्यनेन एककपालेन्द्राग्न्योः मार्थवादविध्यतिदेशाधिकरणम्।

एककपालेन्द्राग्नी च तद्वत् ॥ २२ ॥

वैश्वदेवे एककपाल आम्नातः, द्यावापृथिवी य एक-

कपालः इति, वरुणप्रघासेष्वपि, काय एककपालः इति। तत्र अपरः, ऐन्द्राग्नो द्वादशकपालो मारुत्यामिक्षा इति, तथा साकमेधेष्वपि एककपालैन्द्राग्नो आम्नातो, ऐन्द्राग्न एकादशकपाल इन्द्राय द्रवन्ने चरुः वैश्वकर्मण एककपालः इति। तत्र इदम् आम्नातम्। एतद्ब्राह्मण ऐन्द्राग्नः, एतद्ब्राह्मण एककपालो, यद्ब्राह्मण इतर इतरश्च इति। तत्र इदम् उच्यते, एककपालैन्द्राग्नो च तद्वत्, यद्वत् पञ्च सञ्चराणि अत्रापि सविधिकस्य सार्थवादकस्य काण्डस्य अतिदेशः, तेनैव न्यायेन इति प्राप्तिसूत्रमेतत् उत्तरचिन्तार्थम्। (७।१।५ अ०)।

साकमेधे वारुणप्राघासिकैककपालातिदेशाधिकरणम्।

एककपालानां वैश्वदेविकः प्रकृतिरायत्यां सर्वहोमापरिहानिदर्शनादवभृथे च सकृद्भावदानस्य वचनात्॥ २३॥

साकमेधे श्रूयते, एतद्ब्राह्मण एककपालः इति। तत्र चिन्त्यते, वैश्वदेविकस्य एककपालस्य इदं ग्रहणम्, उत वारुणप्राघासिकस्य? इति। किं प्राप्तम्? वैश्वदेविकस्य इति ब्रूमः। किं कारणम्?। तस्य विहिता धर्माः, अलङ्कृत्य अभिपूर्णे उपांशु यष्टव्यः, आविः पृष्टः कार्यः इत्येवमादयः। वारुणप्राघासिकस्य धर्मकः, यस्य विहिता धर्माः, तत्र एतत्

युज्यते वक्तुम्, तद्वत् इदं कर्त्तव्यम् इति। तस्मात् वैश्वदेविकस्य ग्रहणम्।

ननु ऐन्द्राग्नसमुच्चारणात् एककपालोऽपि वारुणप्राघासिक एव स्यात्। न, अवश्यमेकपर्वणीव समुच्चारणेन भवितव्यं, नानापर्वणीरपि समुच्चारणम् अविरुद्धम्। तस्मात् वैश्वदेविकस्य ग्रहणम्।

इति प्राप्ते उच्यते, वारुणप्राघासिकस्य एककपालस्य ग्रहणम् इति। कुतः?। ततः एककपालानां वैश्वदेविकः प्रकृतिः। कथं ज्ञायते?। आग्नेयणे सर्वहोमापरिवृत्तिदर्शनात्, आग्नेयणे द्यावापृथिवीयस्य एककपालस्य सर्वहोमम् अपर्य्यावृत्तिं च दर्शयति, यत् सर्वहुतं करोति, सा त्वेका परिचर्या, हुतो हुतः पर्य्यावर्त्तते, सा द्वितीया, आज्यस्यैव द्यावापृथिव्यौ यजेत इति, आज्ययागविधिपरे वाक्ये एककपालस्य सर्वहोमम् अपर्य्यावृत्तिं च प्राप्तां दर्शयति, एतस्मात् दर्शनात् अवभृथे च सकृद्दावदानस्य वचनात्, अवभृथे च अवधारणं भवति, इदमेव एककपालस्य द्विरवद्यति इति, तेन ज्ञायते, नूनम् अन्यत्र न द्विरवदानम् इति, तच्चैतत् सर्वं वैश्वदेविके एककपाले विहितम्। तस्मात् एककपालानां वैश्वदेविकः प्रकृतिः। किम् अतः?। साकमेधिकेऽप्येककपाले वैश्वदेविका धर्माः प्राप्ताः, तेषाम् अतिदेशोऽनर्थकः, वारुणप्राघासिकस्य ये धर्माः वैश्वदेविका अप्राप्ताः, तेषाम् अतिदेशोऽर्थवान्। तस्मात् वारुणप्राघासिकस्य एककपालस्य इदं ग्रहणम् इति। उच्यते, सिद्धमेतत्, कुतः प्राप्तिः? इति। प्राप्तिम् उत्तरत्र वक्ष्यामः, स्वरसाभेक-

कपालाभिघं च इत्यत्र । किं पुनः ते धर्माः ? । हिरण्मय्यः स्रुवः अमीमय्यो वा इत्येवमादयः । (७ । १ । ६ अ०) ।

इति श्रीशवरस्वामिनः कृतौ मीमांसाभाष्ये सप्तम्या ध्यायस्य प्रथमः पादः ।

अथ रथन्तरादिशब्दस्य मानविशेषार्थताधिकरणम् ।

सामोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टम् ॥ १ ॥ (१म पृ०)

इदं श्रूयते, रथन्तरम् उत्तरयोर्गायति, बर्हतीषु रथन्तरं गायति इत्येवमादीनि समाम्नायन्ते । तत्र चिन्त्यं, किम् इह अतिदिश्यते ? इति । ननु यत् रथन्तरादिभिः शब्दैरुच्यते, तदतिदिश्यते । बाढं, तदेव तु न ज्ञायते, किम् एभिः शब्दैः उच्यते इति । ननु सिद्धमेतत्, गीतिषु सामाख्या (१।४।२ सू०) इति । तथा ह्युभिक्षस्य धात्वेषः करिष्यते, स एव तु निर्णयो भविष्यति । यदि स एव निर्णयः, किमर्थः धात्वेषः ? । द्रार्ढ्यार्थः, स्थूणानिखननवत् । तत्र किं प्राप्तम् ? तदुच्यते, सप्तोभक्तरकालाभ्यासविकारायां हिङ्कारप्रणव-प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवत्यामृचि गीतौ साम-शब्दोऽभियुक्तैः उपचर्यते, तस्मात् संशयः । उच्यते, ननु गीतौ सत्यां भावात् गानाख्यस्य संस्कारकर्मणो वाचका एते

ग्रह्याः इत्युक्तं, तदेवेदम् उक्तमाचिख्यासते । न इमे संस्कारस्य वाचकाः । किंकारणम् ? । अकर्मकाले प्रयोगात्, अकर्मकाले साम प्रयुज्यते, न च संस्कारकर्माणि प्रोक्षणावघेषणपर्य्यग्निकरणादीनि अकर्मकाले प्रयुज्यन्ते, प्रयोजनाभावात् । अथ तु मन्त्रा एते, ततोऽन्यहं स्वाध्यायोऽध्येतव्यः इति नियमात् अकर्मकाले प्रयोगो युज्यते । तस्मात् ऋचां नामानि ।

किञ्च, संज्ञाभेदात्, संज्ञाभेदश्च भवति, रथन्तरं बृहत् इत्येवमादिः, न एकत्वात् संस्कारकर्मणः, अनर्थकः, एकेनैव हि तदा पर्य्याप्तं, यथा गीतिः इति । अथ ऋचां नामानि, ततः तासां भेदात् संज्ञा पृथक्त्वं युक्तम् ।

अपि च, यदि गानं रथन्तरं गानं च बृहत्, इदं रथन्तरम् इदं बृहदिति पृथक्त्वेन संज्ञानिवेशो नोपपद्यते ऋङ्नामत्वे तूपपद्यते ।

किञ्च, विकारपृथक्त्वात्, प्रतिसाम च विकारपृथक्त्वात्, प्रतिसाम च विकारपृथक्त्वं दृश्यते, तत् एकत्वात् गानस्य, अनुपपन्नम् । संस्कारभेदे हि विकारपृथक्त्वं दृष्टम् । तत् यथा, अवहन्तेः तण्डुलीभावः, पिष्टेषु चूर्णनं, न तु एकस्य तण्डुलीभावश्चूर्णनं च । अथ ऋङ्नामानि एतानि, तत ऋचां भेदादिकारपृथक्त्वं युज्यते । तस्मात् ऋङ्नामानि इति । तत उत्तरं पठति, साम्नोऽभिधानशब्देन प्रवृत्तिः स्याद्यथाग्निष्टम् इति, साम्नोऽभिधानशब्देन यथाग्निष्टं प्रवृत्तिः स्यात्, यच्छिष्टं प्रवक्तृभिः ग्निष्टेभ्यः । किञ्च ग्निष्टम् ? । स्तोभादिविशिष्टा ऋक् साम, सा प्रवर्त्तते । किंकारणम् ? तस्या रथन्तरादि नामधेयम् इति ।

शब्दैस्त्वर्थविधित्वादर्थान्तरेऽप्रवृत्तिः स्यात् पृथग्भावात् क्रियाया ह्यभिसम्बन्धः ॥ २ ॥ (१म पू० नि०)

तुशब्दः पक्षनिवृत्तौ, न तु एवं स्यात्, ऋचः प्रवृत्तिः इति। कथम्?। इह कवतीषु रथन्तरं गायति इति कवतीनां वा कार्ये अभिवत्योऽतिदिश्येरन्, कवतीनां वा उपरि आधार्याधेयभावेन? तत्र कार्ये तावत् अतिदेशो न घटते। कुतः?। शब्देः अर्थविधित्वात्, शब्दानाम् अर्थविधानं कार्यं, न च, कवतीषु रथन्तरं गायति इति कवतीभिर्योऽर्थोऽभिधीयते, तमभिवत्यः शक्नुवन्ति वक्तुम्। तस्मात् न कार्यातिदेशः। आधेयत्वेऽपि न सम्भवति, पृथग्भावात्, न हि शब्दः शब्दे समवैति, पृथगेवावतिष्ठते, अभित्वा, कया नः इति, क्रियाया हि गानक्रियायाः शब्देन अभिसम्बन्धो भवेत्, न शब्दस्य। तस्मात् आधेयत्वेनापि न अतिदेशः, अतो नायमृचः प्रदेशः इति।

स्वार्थे वा स्यात्प्रयोजनं क्रियायास्तदङ्गभावेनोपदिश्येरन् ॥ ३ ॥ (२य पू०)

स्वार्थे वा प्रवर्त्तमाना अभिवत्यः कवतीनामङ्गभावेन उपदिश्येरन्। कथं पुनः कवतीषु गायति इत्यङ्गभावः शक्य उपदेष्टुम्?। शक्यो, यथा, येन कर्मणैतेन च बलवान् जुहुयात् इति। किं पुनः प्रयोजनं कवतीनामभिवत्यो निर्वर्तयन्तीति?। उच्यते, प्रयोजनम् अदृष्टं कल्पम्।

कुतः ?। क्रियायाः, यस्मात् क्रिया श्रूयते, कवतीषु रथन्तरं गायति इति, यथा प्रयाजादीनां प्रयोजनं क्रियायाः।

उच्यते, अयमेव अस्मिन् पक्षे दोषः, यत् प्रयोजनं क्रियायाः कल्पयितव्यम्। तस्मात् अयमपि पक्षो दुःश्लिष्टः।

शब्दमात्रमिति चेत् ॥ ४ ॥ (३य पू०)

इति चेत् पश्यसि, कवत्यङ्गभावेन अभिवतीनाम् उपदेशो दुःश्लिष्टः इति, तेन तर्हि शब्दमात्रं प्रदिश्यतां, रथन्तरशब्दं कवतीषु प्रयुञ्जीत, कवतीः रथन्तरशब्देन अभिलपेत् इति। किंकारणम् ?। शब्दे उच्चरिते, तत्र तावत् मुख्या प्रतिपत्तिः। शब्दे कार्यस्य असम्भवात्, अर्थे कार्यं विज्ञायते, यथा गामानय इति, इह तु शब्दे एव कार्यं सम्भवति, न अर्थे। अतोऽत्र शब्दं विज्ञास्यामः।

नौत्पत्तिकत्वात् ॥ ५ ॥ (३य पू०नि०)

पूर्वस्मात् एष वादः पापीयान्। कस्मात् ?। औत्पत्तिकत्वात्, औत्पत्तिको हि नामिनाम्नोः सम्बन्धः, यः शब्दो यस्मिन् अर्थे औत्पत्तिकेन सम्बन्धेन प्रसिद्धः, न स ततोऽन्यं प्रत्याययितुं शक्नोति, न हि गोशब्देन अश्वोऽभिधातुम् शक्यते।

शास्त्रञ्चैवमनर्थकं स्यात् ॥ ६ ॥ (उ०)

एवं च सति अतिदेशशास्त्रम् अनर्थकं स्यात्, अप्रकार्थत्वात्। तस्मात् न शब्दस्यापि ग्रहणं युक्तः। वृत्तिकारस्तु मेने, गानशास्त्रम् औक्थिकम् अनर्थकं स्यात् इति,

तस्य अभिप्रायः, सत्याकृतौ नैतावान् प्रयासः शिष्टानाम् अफलोऽभ्युपगन्तुम् न्याय्यः इति ।

स्वरस्येति चेत् ॥ ७ ॥ (४थं पू०)

इति चेत् पश्यसि, नाम्नोऽतिदेशोऽयुक्तः इति, तेन तर्हि, स्वरस्य अतिदेशो भवतु, स्वरः सामशब्देन लोकेऽभिधीयते, सुसामा देवदत्तः इति, सुस्वरो देवदत्तः इति । स्वरो घोषो नादः इति समानार्थाः, स सामशब्देन उच्यते, साम च रथन्तरम् । तस्मात् तस्य अतिदेशः ।

नार्थाभावाच्छ्रुतेरसम्बन्धः ॥ ८ ॥ (४थं पू० नि०)

नैतदेवं, स्वरस्यातिदेशः इति । कुतः ? । अर्थाभावात्, अर्थस्य अभावात्, अर्थस्य अभिवतीस्वरस्य कवतीषु अभावात् । ननु असत्येव असौ अतिदेशेन भाव्यते । उच्यते, भावयितुमपि न शक्यते, न हि अभिवत्यक्षराणाम् अभिव्यङ्क्तो नादः कवतीषु भावयितुम् शक्यः यदि भाव्येत, न कवत्यो भवेयुः, न चेत् भाव्यते, न भूतः, कवतीषु रथन्तरं गायति इत्येतस्याः श्रुतेः, पदान्तरेणाभिसम्बन्धो न स्यात् । तस्मात् न स्वरस्यातिदेशः ।

स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभक्तत्वात् ॥ ९ ॥ (५म पू०)

तुशब्दः पक्षान्तरपरिग्रहे । यद्यभिवतीस्वरस्य कवतीषु प्रदेशो नोपपद्यते, अनुवादो भवतु, कवतीषु रथन्तरं

गायति इति। कथम्?। तदुच्यते, इह कवतीषु रथन्तरं गायति इत्यस्य वाक्यस्य हे वचनव्यक्ती भवतः, कवतीषु यत् रथन्तरं, तत् गायति इत्येका, रथन्तरं यत्, तत् कवतीषु गायति इत्यपरा। तयोर्द्वैषा द्वितीया, रथन्तरं यत्तत् कवतीषु गायति इति, सा स्वरस्य सामत्वे न सम्भवति इत्युक्तं, न हि अभिवतीस्वरः कवतीषु समावेशयितुं शक्यः इति, पूर्वा तु सम्भवति, कवतीषु यत् रथन्तरम्, तत् गायति इति।

ननु सापि न सम्भवति, न हि कवतीषु रथन्तरम् अस्ति। अतः परम् उच्यते, स्वरस्तुत्पत्तिषु स्यात्, स्वरस्त्वभिवतीस्वरः, कवतीनाम् उत्पत्तिषु उच्चारणेषु स्यात्। कथम्?। मात्रावर्णाविभक्तत्वात्, बहवो मात्रावर्णाश्चाभिवतीनां कवतीनां च अविभक्ता अभिवतीष्वपि विद्यन्ते, कवतीष्वपि। सोऽसावभिवतीस्वरः कवतीषु साधारणवर्णसमवेतो विद्यते, तस्य अनुवादोऽयं घटते, कवतीषु रथन्तरं गायति इति। तस्मात् स्वरस्य अनुवादः।

लिङ्गदर्शनाच्च ॥ १० ॥ (यु०)

लिङ्गं च दृश्यते, एतस्मिन् अर्थे। अस्ति रथन्तरम् उत्तरयोः इति। किं तल्लिङ्गं भवति?। एवम् आह, रथन्तरम् उत्तरयोः न पश्यामि इति विश्वामित्रः तपस्तेपे, बृहत् उत्तरयोः न पश्यामि इति वसिष्ठः इति। यच्च विद्यमानं न दृश्यते, तद्दर्शनाय यत्नः क्रियते, यथा

घटं न पश्यामि इति प्रदीपं करोति, न शशविषाणं न पश्यामि इति। तस्मात् अस्ति उत्तरयोः रथन्तरं बृहच्च। तयोः अनुवादः इति।

अश्रुतेस्तु विकारस्योत्तरासु, यथाश्रुति ॥ ११ ॥

(५ म पृ० नि०)

तुशब्दः पक्षं व्यावर्तयति, नैतदेवं, स्वरस्य अनुवादः इति। कुतः ?। एवं सति उत्तरासु विकारो न कश्चित् श्रुतो भवति तद्वा उत्तरा यथाश्रुताः प्रयोक्तव्याः, यथा स्वाध्यायकाले श्रुताः। तच्च रथन्तरम् उत्तरयोर्गीयति इत्येतत् अनुवादमात्रम् अप्रवृत्तिविशेषकरम् अनर्थकमेवापद्यत। अतो न स्वरस्य अनुवादो युक्तः।

शब्दानाम्नासामञ्जस्यम् ॥१२॥ (यु० एवं ६ष्ठ पृ०)

रथन्तरादीनां च सामशब्दानाम् असामञ्जस्यं स्यात्, रथन्तरम् उत्तरयोः, बृहत् उत्तरयोः इति। कथम् ?। तदुच्यते, अयं रथन्तरशब्दो बृहच्छब्दो वा स्वरस्य सामशब्दत्वे स्वरसमुदाये आनुपूर्व्या व्यवस्थिते स्वरविशेषे प्रयुक्तः, स एकदेशे भिन्नानुपूर्वे वा असमञ्जसो भवति। तस्मात् नैतत् युक्तं, स्वरस्य सामशब्दः, तस्य चानुवादः इति।

अत्र चाह, एवं भवता सर्वे पक्षा निरस्ताः, ततः किम् अप्रवृत्तिरेव ? इति उच्यते, ऋच एव प्रदेशो भवतु। ननु उक्तं, न शक्या ऋच ऋगन्तरे प्रदेष्टुम् इति। बाढं, देश-

लक्षणा भविष्यति, कवतीषु रथन्तरं गायति इत्युच्यते, न च शक्यते कवतीषु रथन्तरं मातुम्, तत्र देशलक्षणा भवति, कवतीदेशे इति, यथा, अग्नौ तिष्ठति, कूपे तिष्ठति इति। धर्मलक्षणा वा स्यात्, रथन्तरधर्मा वा कवतीषु रथन्तरशब्देन अतिदिश्यन्ते, यथा रथन्तरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेत् इत्येवमादयः, यथा आचार्ये प्रोषिते, आचार्यवानी भवताम् आचार्यः इति, आचार्यशब्दया आचार्यान्याम् अतिदिश्यते।

अपि तु कर्मशब्दः स्याद्भावोऽर्थः प्रसिद्धयङ्गत्वादिकारो ह्यविशिष्टोऽन्यैः ॥ १३ ॥ (सि०)

अपि तु नैवं स्यात्, ऋचः सामशब्दः, तस्माच्च प्रदेशः इति, तथा देशलक्षणा धर्मलक्षणा वा आश्रयणीया, अगतिरेषा यत्नसाध्यपरिग्रहः। किन्तर्हि? कर्मशब्दः स्यात्, रथन्तरादिर्गानाख्यस्य संस्कारकर्मणो वाचकः। कुतः?। उक्तः न्यायो गीतिषु सामाख्या (१।४।३सू०) इत्यत्र, तत्र गीतिविशिष्टायाम् ऋचि एष शब्दो दृष्टः, न च अगृहीतविशेषया विशेषे बुद्धिः उत्पद्यते। तस्मात् विशेषणं तावत् अभिधीयते, विशेषणप्रत्ययाच्च सहचरिते विशिष्टे प्रत्ययः। अतो नास्ति ऋचः शब्देन संस्पर्शः इति, तेनैव न्यायेन गीतिनामधेयम् इति ब्रूमः।

किञ्च, प्रसिद्धयङ्गत्वात्, अयं च गायति इति शब्दो गानक्रियायां प्रसिद्धः। का पुनरसौ?। शब्दस्य उच्चारणविशेषः, गायति गानं करोति इति, तदङ्गत्वच्च रथ-

ऋगादिशब्दः, तद्वचनः इत्यर्थः, तेन समुच्चारणात् द्वितीया-मामर्थ्याच्च। यथा, आसारितकं गायति इति, वर्धमाकं गायति इति।

ननु शब्दवचनेनापि समुच्चारणं भवति, गाथां गायति, ऋचं गायति इति। सत्यं, विपरिणम्य तु शब्दं, गानेन ऋचं संस्करोति इति, यथानियतिभेन अर्थेन न सम्बध्यते यानं करोति ऋचम् इति। तस्मात् गीतिवचनः।

इतश्च गीतिवचनः। कुतः?। विकारो हि अविशिष्टो-ऽन्यैः, विकारश्च अत्र ऋग्द्रव्यस्य दृश्यते, ह्रस्वानामक्षराणां दीर्घता, दीर्घाणां च ह्रस्वत्वं, विहतानां संहतत्वं, संहतानां विहतत्वं, सोऽविशिष्टोऽन्यैः संस्कारकर्मभिः, यथा अवहन्तिना व्रीहीणाम् तण्डुलीभावः, पिष्टिषा तण्डु-लानां पिष्टीभावः। तस्मात् शब्दानां संस्कारो गानाख्यः रथन्तरादिभिः शब्दैः उच्यते, तस्य अयं प्रदेशः, रथन्तरम् उत्तरयोर्गायति इत्येवमादिः।

अद्रव्यञ्चापि दृश्यते ॥ १४ ॥ (यु०)

अपि च अद्रव्यं साम दृश्यते, द्रव्यशब्दस्तोमैः ऋचू आचरितः, अद्रव्यम् अनृचम् इत्यर्थः। अनृचं साम दृश्यते, प्रजापतेर्हृदयम् अनृचं गायति इति, प्रजापतिहृदयं नाम साम, तत् अनृचि उत्पन्नं, यदि ऋचि सामशब्दः, अयं प्रजापतिहृदयम् अनृचं स्यात्। अथ गीतेः साम-शब्दः, ततो विनापि ऋचा गीतिर्भवति। तच्च एतत् उपपद्यते, प्रजापतेर्हृदयम् अनृचं गायति इति। तस्मात्

अपि गीतिः साम। ननु उक्तं, संस्कारकर्मत्वे ऽनर्थकोऽकर्मकाले प्रयोगः इति। तत्र ब्रूमः,

तस्य च क्रिया ग्रहणार्था, नानार्थेषु विरूपित्वादर्थो ह्यामालौकिको विधानात् ॥ १५ ॥

(आ० नि०)

तस्य क्रिया अकर्मकाले ग्रहणार्था शिक्षितुम् अभ्यसितुम् च, नानार्थेषु नानाभूतेषु अर्थेषु भिन्नेषु इत्यर्थः विरूपित्वात्, आश्रयभेदात् विविधरूपं यद्यानं भवति, तत् प्रत्यक्षं शिक्षितव्यम् अभ्यसितव्यं च, प्रयोगप्राशस्त्याय, भूमिरथिकवत्, तत् यथा, भूमिरथिको भूमौ रथमालिख्य योग्यां करोति, सा तस्य योग्या प्रयोगकाले लोकर्थम् उत्पादयति। अर्थो हि आसां रथन्तरादिसंज्ञानां न लौकिके व्यवहारे सिद्धः, यथा अवहन्त्यादीनाम्। कुतः ?। विधानात् विधीयते हि असौ शिक्षोपाध्यायसंबन्धेन, एवंरूपं रथन्तरं भवति इति। न लौकिको विज्ञायते। तस्मात् न परिचोदनेया, अकर्मकाले प्रयोगात् इति।

अथ यदुक्तं, संज्ञापृथक्त्वात् इति। तत्र उच्यते,

तस्मिन् संज्ञाविशेषाः स्युर्विकारपृथक्त्वात् ॥ १६ ॥

(आ० नि० २)

तस्मिन् एकस्मिन् अपि नानाख्ये संस्कारे संज्ञा-

विशेषाः भवेयुः । कुतः ? । विकारपृथक्त्वात् तुल्येऽपि गाने विशेषो भवति, गानविशेषाच्च संज्ञापृथक्त्वम्, यथा, आसारितकं, वर्द्धमानकम् इति, अन्यथालक्षणा आसारितकगीतिः, अन्यथालक्षणा वर्द्धमानकगीतिः, एवम् इहापि अन्यथालक्षणा रथन्तरगीतिः, अन्यथालक्षणा हइहगीतिः । तस्मात् संज्ञापृथक्त्वम् ।

योनिशस्त्वाच्च तुल्यवदितराभिर्विधीयन्ते ॥ १७ ॥

(यु० १)

योनिशासो शस्त्वा च, योनिशस्त्वा, योनिशस्त्वाच्च ऋचः तुल्यवत् इतराभिः अयोनिशस्त्वाभिः विधीयन्ते, याम्याः शंसति, शिपिविष्टवत्तीः शंसति, रथन्तरस्य योनिमनुशंसति, हइहतो योनिमनुशंसति इति । का तत्र तुल्यता ? । शंसतिशब्देनाभिधानम् । इह एतौ स्तौतिशंसतिशब्दौ समानेऽपि स्तुत्यर्थत्वे व्यवस्थितविषयौ । प्रगीतेषु मन्त्रवाक्येषु स्तौतिशब्दः, अप्रगीतेषु शंसतिशब्दः, यथा प्र व ग्नं शंसति, निष्केवल्यं शंसति इति, आग्नेयैः स्तुवते, पृष्ठैः स्तुवते इति । अतः शंसतिशब्देन विधानात् अप्रगीताम् ऋचं रथन्तरस्य योनिं दर्शयति, यदि च गीतिः रथन्तरं, ततः तस्य अप्रगीता ऋग् योनिः अन्यत्वाद्यं व्यपदेशो नोपपद्यते, रथन्तरस्य योनिम् इति । तस्मात् गीतिषु सामाख्या ।

अयोनौ चापि दृश्यते अतथायोनि ॥ १८ ॥

(यु० २)

अथोनौ च साम हूयते, स्वाख्यां सञ्जावधीयते इत्या-हुर्यत् हुवत् गायत्रीषु क्रियतेऽपि चैनां रुजति, न च अस्यां सम्भवति इति, हुवतो हुवती योनिः, तस्य गायत्रीषु प्राप्ति-र्नास्ति, यदि ऋचः सामशब्दः । अथ तु गीतेः, ततः सा हुवद्गीतिर्गायत्रीषु वचनात् प्राप्ता, तस्या अयम् अनुवादो घटते, यत् हुवत् गायत्रीषु क्रियते इति । अतथायोनि च साम दर्शयति, यादृशी यस्य योनिः, ततोऽन्यादृशे, यो वै विच्छन्दसि सामोहति, स ऋचं संमृणाति, साम वा विलि-ग्यति, साम संमृणाति, ऋचं विलिग्यति इति यतरत् वर्षीयः, तस्य विलेशः, यतरत् वर्षीयः, तस्य संशयः, तत्र गीतौ एव साम्नि युज्यते, न ऋचि, ऊहतिशब्दश्च गीतावेव समर्थः, न ऋचि, ऋक् चेत्, सैव यथाख्यायं पठ्यते, तत्र नास्त्यूहप्रसङ्गः । तस्मात् अपि गीतौ सामशब्दः ।

ऐकार्थ्ये नास्ति वैरूप्यमितिचेत् ॥ १६ ॥ (आ०)

यदुक्तम्, तस्य क्रिया यङ्गार्था इति । तत्र परिचोद्यते, ऐकार्थ्ये नास्ति वैरूप्यम् इति, रथन्तरगीतेः हुवद्गीतिः अर्थान्तरं, तेन रथन्तरगीतौ गृहीतायां हुवद्गीतिः अगृ-हीता भवति इति युक्तो रथन्तरे गृहीते हुवतः मिश्रार्थम् अकर्मकाले प्रयोगः, रथन्तरगीतेरूहेक एव अर्थः । तस्य योन्यां प्रयोगे मिश्रिते पुनरुत्तरासु न मिश्रितव्यं, तासु अकर्मकाले प्रयोगः संस्कारकर्मत्वे न युक्तो भवति । तस्मात् न संस्कारस्य सामशब्दः इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ।

स्यादर्थान्तरेष्वनिष्पत्तेर्यथा पाके ॥ २० ॥ (आ० नि०)

स्यात् वैरूप्यम्। कुतः एतत् ?। अर्थान्तरेषु अनिष्पत्तेः, ऋगन्तरेषु आश्रयभेदात्, यथा पाके, यथा एक एव अयमर्थः पाको नाम, तस्य अर्थान्तरे वैरूप्यं भवति, अन्यथालक्षणः ओदनस्य पाकः, अन्यथालक्षणो गुडस्य, येन ओदनपाको गृहीतः, न असौ अग्निश्चित्वा गुडं पक्तुम् जानाति। तस्मात् तस्याप्यकर्मकाले प्रयोग उपपद्यते।

शब्दानाञ्च सामञ्जस्यम् ॥ २१ ॥ (यु०)

एवं च सामशब्दानामृक्शब्दानां च सामञ्जस्यं भवति, कवतीषु रथन्तरं गायति इति कवतीशब्दः ऋच एव वर्त्तते, रथन्तरशब्दश्च साम, इतरथा कवतीशब्दे वा रथन्तरशब्दे वा धर्मलक्षणा स्यात्, रथन्तरशब्दे वा धर्मलक्षणा। तस्मात् गीतौ सामशब्दः इति। (७। २। १ अ०)।

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य द्वितीयः पादः।

सप्तमस्य अध्यायस्य तृतीयः पादः।

अग्निहोत्रादिनाम्नां धर्मातिदेशाधिकरणम्।

उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् ॥ १ ॥ (सि०)

नाम्ना धर्मप्रदेयं वक्ष्यामः इत्यादौ प्रतिज्ञातं सोऽयम् उच्यते। कुक्कुपायिनामयने श्रूयते, मासमग्निहोत्रं जुहुयात् इति। तत्र एतत् समधिगतं, नैयमिकादग्निहोत्रात् कर्मान्तरमेतत् इति। अधुना अग्निहोत्रशब्दश्चिन्त्यते, कथम् अयं प्रयुक्तः? इति, तदर्थमारभ्यते, उक्तं क्रियाभिधानं तच्छुतावन्यच्च विधिप्रदेयः स्यात् इति, उक्तम् आदौ, क्रियाभिधानं, कर्मनामधेयम्, अग्निहोत्रशब्दः इति, तत्पुरुषं च अन्यशास्त्रम् (१।४।४सू०) इत्यत्र। तस्य अन्यत्र श्रुतौ कौक्कुपायिनामयनीये जुहोतौ विधिप्रदेयः स्यात्, धर्मप्रदेयः, नैयमिकस्य अग्निहोत्रस्य ये धर्माः, तेऽस्मिन् अनेन नाम्नाऽतिदिश्येरन् किंकारणम्?। उच्यते, परशब्दोऽयं परत्र हस्तः, परशब्दस्य परत्र हस्तौ तदङ्गावो गम्यते, स यत्र विज्ञातो भवति, तत्रानूद्यते, यथा, सिंहो देवदत्तः इति। यत्र अविज्ञातः तत्र विधीयते, यथा, अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम् इति। इह च अविज्ञातोऽस्य जुहोतेः अग्निहोत्रशब्दावः, तस्मात् स विधीयते, मासमग्निहोत्रं जुहोति इति अग्निहोत्रवत् जुहोति इति। कथं पुनरसति वतिप्रत्यये वत्यर्थः शक्योऽवगन्तुम्? इति। उच्यते, सादृश्यात्, अग्निहोत्रशब्दोऽयं कर्मणा सम्बद्धः, तत्सदृशचरितहोमादिधर्मवत्ता लक्षणया शक्नोति गमयितुम्, शक्नोति वेत् गमयितुम्, प्रदेष्टुम् अपि शक्नोति, एवमन्तरेणापि वतिं, वत्यर्थः शक्योऽवगन्तुम् इति।

अपूर्वं वापि भागित्वात् ॥ २ ॥ (पू०)

वा अपि इति विपर्यासेन प्रयुक्ते, अपि वा इत्यर्थः। अपि वा अपूर्वे एते उभे अपि कर्मणी स्यातां, न कौण्डपायिनामयनीयो जुहोतिर्नैयमिकपूर्वः, साधारणं च नामधेयम् उभयोः। कुतः ?। भागित्वात्, अयमपि जुहोतिर्भागी एतस्य नामधेयस्य, यथैव तत्र अग्निहोत्रं जुहोति इति समुच्चारणम्, एवम् इहापि, तत्र तुल्ये समुच्चारणे तस्यैव एतत् नामधेयं, न अस्य इत्यत्र विशेषहेतुर्नास्ति तस्मात् उभयोः साधारणं नाम इति नास्ति धर्मप्रदेशः।

नैतत् युक्तं कुतः ?

नाम्नस्त्वौत्पत्तिकत्वात् ॥ ३ ॥ (उ०)

औत्पत्तिको हि नामिनाम्नोः सम्बन्धः, यन्नाम यस्मिन् अर्थे औत्पत्तिकेन सम्बन्धेन प्रसिद्धं, तस्मिन् एव तदा विज्ञेयं, न अन्यत्र च, तत्र अव्यवस्थायां शब्दार्थे विवक्षा न स्यात्। उक्तम्, अन्यायश्च अनेकार्थत्वम् इति, यदा च नैमित्तिकं तावत् आह, तस्मादृश्यविधानार्थं च इतरत्रापि प्रयोग उपपद्यते इति नास्ति इतराभिधानत्वे हेतुः। तस्मात् विधिप्रदेशः स्यात्।

अत्र आह, कस्मात् पुनः तत्रानामधेयम् इदम् इह प्रयुक्तम् इत्युच्यते, न पुनः एतन्नामधेयं तत्र इति ?। तत आह,

प्रत्यक्षाङ्गसंयोगात् क्रियाभिधानं स्यात्तद्भावे ऽप्रसिद्धं स्यात् ॥ ४ ॥ (आ० नि०)

नैयमिकेऽग्निहोत्रे प्रत्यक्षो गुणसंयोगः, प्रत्यक्षविहिता धर्म्माः सन्ति, इत्थं दोग्धि इत्थं स्रपयति, चतुरवयति, खादिरी अग्निहोत्रसमिद्भवति, इत्थं जुहोति, एवं प्रत्यक्षाङ्गसंयोगात्, नैयमिकस्य तत् नामधेयम् इह प्रयुज्यमानं, दोहनादि क्रियाभिधानं स्यात्, धर्मप्रदेयत्वम् इत्यर्थः । अस्य पुनः जुहोतेर्न केचित् धर्माः सन्ति, तद्भावे तेषां धर्माणामभावे अप्रसिद्धं स्यात्, न ज्ञायेत, किमर्थम् अयम् अग्निहोत्रशब्दः इह प्रयुक्तः ? इति ।

एवं वा, प्रत्यक्षो गुणसंयोगो, नैयमिकस्य द्रव्यदेवतासंयोगः, दध्ना जुहोति, पयसा जुहोति, अग्नये च प्रजापतये च सायं जुहोति इति । एतस्मात् प्रत्यक्षाङ्गसंयोगात् क्रियाभिधानं स्यात्, कर्मनामधेयं, इत्थंरूपो जुहोतिः अग्नि होत्राख्यः इति । अत्र इतरजुहोतेः रूपं नास्ति, तदभावेऽप्रसिद्धं स्यात्, न ज्ञायेत, कीदृशं तदग्निहोत्रम् ? इति ।

नन् मासोऽस्य रूपं भविष्यति । न मासः कर्म्माङ्गं, कर्म्मधर्मः सः । अपि च, अग्निहोत्रं तु मासे विधीयते, न मासेन अग्निहोत्रं क्रियते । तस्मात् नैयमिकस्य, एतन्नामधेयम्, इतरच्च तदर्थदेयः इति । (७ । ३ । १ अ०) ।

किम् एष एव उत्सर्गः, सर्वकर्मनाम, अन्यच्च श्रूयमाणं धर्माणां ग्राहकम् ? इति । एवं खलु प्राप्तम् । एवं प्राप्ते इदम् आरभ्यते,

---

प्रायणीयेतिनाम्ना धर्म्मातिदेशाधिकरणम् ।

अपि वा सवकर्मणि गुणार्थेषा श्रुतिः स्यात् ॥ ५ ॥ (सू०)

गवामयने श्रूयते, वैश्वानरो ज्योतिष्टोमः प्रायणीयम् अहर्भवति इति । अस्ति तु द्वादशाहे प्रथमम् अहः प्रायणीयं नाम, प्रायणीयोऽतिरात्रे इति । तयोर्नानात्वं तेनैव न्यायेन सिद्धं, प्रकरणान्तरे प्रयोजनान्तरत्वम् (२।३।२४सू०) इति । तत्र यदं प्रायणीयशब्दः परत्रापि श्रूयमाणो न धर्म्माणां वाहकः, किन्तर्हि ? गुणार्थेषा श्रुतिः । कथम् ? । लक्षणया नामधेयं धर्म्माणां वाहकम् उक्तम्, असति च मुख्यार्थे लक्षणार्थो वाक्यः, इह तु मुख्यार्थः एव सम्भवति, गुणार्थः एव शब्दः, गुणेन क्रियासंयोगेन, तस्मिन् कर्मणि मुख्येव प्रयुज्यते, प्रयन्ति अनेन इति प्रायणीयं, प्रवर्त्तते ऽनेन सत्रम् इति । वाक्यशेषश्च अस्य, एतमेवार्थम् आह, ज्योतिरेव पुरस्तात् दधाति इति, येन ज्योतिः प्रायणीयं भवति, तेन ज्योतिः पुरस्तात् क्रियते इत्यर्थो, ज्योतिरेव पुरस्तात् दधाति इति । तस्मात् न अयमतिदेशः । (७ । ३ । २ अ०)

सर्वपृष्ठशब्दे न षट्पृष्ठानामतिदेशाधिकरणम् ।

विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्यौतिष्टोमिकानि पृष्ठानि अस्ति च पृष्ठशब्दः ॥ ६ ॥ (सू०)

विश्वजित् सर्वपृष्ठो भवति इति श्रूयते । तत्र विचा-

र्थ्यते, किम् अयम् अनुवादः, विधिः ? इति। किं प्राप्तम् ? अनुवादः इति। कुतः ?। यो हि असर्वपृष्ठः, तस्य सर्वपृष्ठता विधेया, यस्तु सर्वपृष्ठ एव, तस्य तया किं विहितया ? अयं च सर्वपृष्ठ एव। कथम् ?। तत्पूर्वकत्वात्, ज्योतिष्टोमपूर्वकत्वात्, ज्योतिष्टोमिकाणि स्तोत्राणि अत्र प्राप्यन्ते, तेषु माहेन्द्रस्तोत्रादीनि चत्वारि सन्ति, तानि सर्वाणि अस्य, तैरयं सर्वपृष्ठो भवति। ननु न तानि पृष्ठानि। उच्यते, अस्ति च पृष्ठशब्दः, तेषु अस्ति पृष्ठशब्दः, समदृशानि पृष्ठानि इति तस्मात् अनुवादः।

षड्हाद्वा तत्र हि चोदनाः ॥ ७ ॥ (सि०)

न अयम् अनुवादः। किन्तर्हि ? विधिः। अनुवादोऽप्रवृत्तिविशेषकरोऽर्थकः स्यात्। अपि च ज्योतिष्टोमे न पृष्ठबहुत्वम् अस्ति, यस्य अयम् अनुवादः स्यात्। षड्हे तु तदस्ति, तत्र हि चोदनाः, पृष्ठानां रथन्तरं पृष्ठं भवति इत्येवमाद्याः। तस्मात् षाड्हिकानामतिदेश्यको विधिः इति।

लिङ्गाच्च ॥ ८ ॥ (यु०)

लिङ्गं चैतमर्थं दर्शयति, पवमाने रथन्तरं करोत्यार्भवे बृहत्, मध्ये इतराणि, वैरूपं स्तोतुः साम, वैराजं मैत्रावरुणस्य, रैवतं ब्राह्मणाच्छंसिनः, यज्ञक्रमश्चायमाश्रुत इति विनियोगपरे वाक्ये षाड्हिकानि पृष्ठानि दर्शयति।

उत्पन्नाधिकारो ज्योतिष्टोमः ॥ ९ ॥ (आ० नि०)

अथ यदुक्तम्, अस्ति च पृष्ठशब्दः, इति। तत्र ब्रूमः, न तु एष औत्पत्तिकः पृष्ठशब्दः, उत्पन्नानां स्तोत्राणाम् अयं अधिकारः, यान्येतानि पृष्ठानि इति, ज्ञाते च तेषां पृष्ठत्वे, तत् उपपद्यते, न च, तत्र ज्ञातम्। कथं तर्हि अयम् अनुवादः ?। लिङ्गसमवायात्, एकं तत्र पृष्ठं माहेन्द्रस्तोत्रम् इति, षाड्हिकानां पुनः पृष्ठत्वं ज्ञातम्। कथम् ?। तत्र हि चोदनेत्युक्तं, तेषां वादे, श्रौतः पृष्ठशब्दस्य अर्थः परिगृहीतो भवति, इतरथा लाक्षणिकः। तस्मात् षाड्हिकानां प्रदेयः इति।

द्वयोर्विधिरिति चेत् ॥ १० ॥ (आ०)

इति चेत् पश्यसि, षाड्हिकानां पृष्ठानां विधिः इति, नैतत् युक्तम्। किं कारणम् ?। हिङ्कर एवं सर्वपृष्ठशब्दः अभ्युपगम्यते, पृष्ठानि च विदधाति, तेषां च सर्वत्वम् अस्तु, को दोषः ?। असम्भवः इत्याह, यदि पृष्ठशब्दः पृष्ठानि विदधाति, सर्वशब्देन न शक्यते विशेषयितुम्। अथ अनुवदति, तथा शक्यते। पृष्ठानि त्वविहितानि भवन्ति, तेषु अमत्सु कस्य इदं सर्वत्वं विधीयते, उभयक्रियायाश्च असम्भवः।

अथ अथ, बृहद्रथन्तरयोर्विकल्पेन प्राप्तयोः सामत्वं केवलं विधीयते, सर्वपृष्ठो भवति इति। उभे अपि बृहद्रथन्तरे भवतः, नैकम् इति। ततोऽयं दोषो न भवति। तस्मात् द्वयोरधिकारः।

न व्यर्थत्वात्सर्वशब्दस्य ॥ ११ ॥ (आ० नि०)

नैवमेतत्। कुतः ?। व्यर्थत्वात् सर्वशब्दस्य, एवं सति सर्वशब्दो व्यर्थो भवति अर्थशून्यः, अयं हि बहुविषयो ह्योर्नियुज्यते। षाड्हिकानां तु विधाने न एष दोषः। ननु च तत्रापि हिकरः शब्दो भविष्यति, उच्यते। न भविष्यति, सर्वत्वं केवलं पृष्ठानां विधास्यति, न पृष्ठानि। ननु उक्तं, पृष्ठेषु अमत्सु कस्य इदं सर्वत्वं विधीयते ? इति। उच्यते, पृष्ठानां सर्वत्वं हि विहितं, तत् सम्पादयितव्यं, न च पृष्ठानि अकुर्वता, तत् सम्पादयितुम् शक्यते, तत्र अर्थात् पृष्ठानि करिष्यति, एवं न हार्थः शब्दो भविष्यति, सर्वशब्दस्य समर्थितः तस्मात् षाड्हिकानाम् अतिदेशः इति। (७। ३। ३ अ०)।

अवभृथनाम्नां सौमिकधर्मातिदेशाधिकरणम्।

तथावभृथः सोमात् ॥ १२ ॥ (मि०)

वरुणप्रघासेषु श्रूयते, वारुण्या निष्कासेन तुषेष्यावभृथं यन्ति इति। तत्र सन्देहः, किं दार्शपूर्णमासिके अपां व्युत्क्लेके तुषनिष्कासं विधीयते, उत सौमिकादवभृथात् धर्मातिदेशः ? इति। किं युक्तम् ? दार्शपूर्णमासिके गुणविधिः, एवं सन्निहितप्रत्ययोऽनुगच्छते, सन्निहितो हि अमो चोदकेन प्रापितः। ननु न असौ अवभृथः। उच्यते, अस्ति तव अवभृथशब्दः इति, एष वै दर्शपूर्णमासयोरवभृथः इति

एवं प्राप्ते इदम् आह, तथा अवभृथः सोमात्, यथा षड्-हात् पृष्ठानाम् अतिदेशः, एवं सोमिकात् अवभृथात् इह धर्मातिदेशः। कुतः ?। अभिहितो न्यायः, उक्तं क्रियाभिधानं तच्छुतावन्यत्र विधिप्रदेशः स्यात्। (७। ३। १सू०) इति।

प्रकृतेरिति चेत् ॥ १३ ॥ (आ०)

अथ यदुक्तं, दार्शपौर्णमासिके अवभृथे गुणविधिर्भवतु इति, तस्य कः परिहारः ? इत्याभाषान्तं सूत्रम्।

न भक्तित्वात् ॥ १४ ॥ (आ० नि०)

नैतत् युक्तम्। कुतः ?। यतो नास्ति दर्शपूर्णमासयोः अवभृथः। ननु, एव वै दर्शपूर्णमासयोरवभृथः इति श्रूयते। सत्यं श्रूयते, न तु एवम् अवभृथत्वम् अस्य भवति। कथम् ?। उच्यते, एव वै दर्शपूर्णमासयोरवभृथः इत्येतस्य वाक्यस्य स्थो वचनव्यक्तिः, निर्ज्ञातावभृथत्वस्य पदार्थस्य वा दर्शपूर्णमाससम्बन्धः उच्यते, यथा देवदत्तो यज्ञदत्तस्य पुत्रः इति निर्ज्ञातपुत्रत्वस्य देवदत्तस्य यज्ञदत्तसम्बन्धः उच्यते निर्ज्ञातसम्बन्धस्य वा अनिर्ज्ञातावभृथत्वस्य अवभृथत्वं यथा, अयम् आत्मा यज्ञदत्तस्य पुत्रः इति, निर्ज्ञातयज्ञदत्तसम्बन्धस्य आत्मस्य पुत्रत्वम् उच्यते। तदस्य अपां व्युत्क्रमस्य दर्शपूर्णमाससम्बन्धः प्रकरणात् निर्ज्ञातः, न अवभृथत्वम्। अतोऽस्य अवभृथत्वम् उच्यते, न च अयम् अवभृथः।

ननु अयम् अप्यवभृथो भवतु। नैतत् युक्तम्, अन्यायो

हि अनेकार्थत्वम्। कथं तर्हि शब्दप्रयोगः?। सादृश्यात्। किं सादृश्यम्?। अप्सु मन्त्रवर्णः, स एष भक्त्या प्रशंसावादः अपां श्लोकस्य, अवभृथः इगयम् इति, यथा आग्नेये पुच्छवादः। तस्मात् नास्ति दर्शपूर्णमासयोरवभृथः। अतो नात्र गुणविधिः।

लिङ्ग-दर्शनाच्च ॥ १५ ॥ (यु० २)

लिङ्गं चैतम् अर्थं दर्शयति। किं लिङ्गं भवति?। एवम् आह, नायुर्दीं जुहोति, न साम गायति, न वा गमनमन्त्रं जपति इति, सौमिकावभृथधर्म्माणां प्रतिषेधं ब्रुवन् तद्धर्मप्राप्तिं दर्शयति। तस्मात् सौमिकात् अवभृथात् धर्म्मप्रदेशः इति। (७। ३। ४ अ०)।

वारुणप्राघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वाधिकरणम्।

द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ १६ ॥

वारुणप्राघासिकोऽवभृथः, सौमिकात् अवभृथात् धर्म्माणां ग्राहकः इत्युक्तम्। तत्र इदं चिन्त्यते, किं पुरोडाशद्रव्यकः असौ, उत तुषनिष्कासद्रव्यकः? इति। किं प्राप्तम्?-पुरोडाशद्रव्यकः इति। कुतः?। नात्रा पुरोडाशः प्राप्यते। ननु प्रत्यक्षश्रुतं तुषनिष्कासम्। सत्यं प्रत्यक्षश्रुतं, न तु शक्यते विधातुम्। अवभृथः अत्र विधीयते, अवभृथं

यन्ति इति, यदि तुषनिष्कासमपरं विधीयेत, ततो वाक्यभिद्येत, अवभृथं यन्ति, तच्च तुषनिष्कासेन इति। तुषनिष्कासश्रवणम् इदानीं किमर्थम्?। अनर्थकं, सम्बन्धाभावात्।

एवं प्राप्ते ब्रूमः, द्रव्यादेशे तद्द्रव्यः, द्रव्यादेशः एतस्मिन् तुषनिष्कासेन अवभृथं यन्ति इति, तद्द्रव्यः स्यात्, तुषनिष्कासद्रव्यः। कुतः?। श्रुतिसंयोगात्, तुषनिष्कासं प्रत्यक्षश्रुतं, पुरोडाशस्तु आनुमानिकः, अतिदेशेन प्राप्यते।

ननु पुरोडाशोऽपि प्रत्यक्षश्रुतो नाम्ना। यद्यपि प्रत्यक्षश्रुतः, सामान्येन तु प्राप्यते, तुषनिष्कासं तु विशेषेण। बाध्यते च सामान्यं विशेषेण अपि च लक्षणया पुरोडाशो गम्यते, श्रुत्या तुषनिष्कासं, श्रुतिलक्षणयोश्च श्रुतिर्न्याय्या। तस्मात् तुषनिष्कासद्रव्यकः इति। अथ यदुक्तं, न सम्बध्यतेऽवभृथेन तुषनिष्कासं, वाक्यभेदप्रसङ्गादिति, तत्र ब्रूमः, यद्यवभृथं विहाय तुषनिष्कासं विधीयते, ततो वाक्यभेदः स्यात्। तुषनिष्कासद्रव्यकोऽपूर्वः अवभृथशेषतो, तथा, सगुणकर्मविधानम् अविरुद्धम्, अविधीयमाने च तुषनिष्कासे तद्द्रव्यकम् अनर्थकमेव स्यात्। तस्मात् तुषनिष्कासद्रव्यकः। पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात्, यद्यप्रत्यक्षश्रुतं न द्रव्यं स्यात्, ततः पुरोडाशस्तुषप्रकृतित्वात् स्यात्, अथ तु प्रत्यक्षश्रुतं तुषनिष्कासं, तस्माच्च पुरोडाश (७। ३। ५ अ०)।

वैष्णवस्यादातिथ्ये धर्मानतिदेशाधिकरणम्।

आतिथ्ये श्रूयते, वैष्णवो नवकपालो भवति इति,

तथा राजसूये, पूर्वस्मिंश्चिसंयुक्ते वैष्णवस्त्रिकपालः इति। तत्र विचारः, योऽयं चिसंयुक्ते वैष्णवस्त्रिकपालः इति वैष्णवशब्दः, अयम् आतिथ्यधर्माणां ग्राहकः, न? इति। किं युक्तम्?। ग्राहकः, इति। कुतः?। विहितधर्मके कर्मणि दृष्टः शब्दोऽन्यस्मिन् अविहिते श्रूयमाणो ग्राहकः इत्युक्तम्, उक्ता क्रियाभिधानम् (७।३।१) इति तत्र अयमपि विहितधर्मकः आतिथ्ये दृष्टः, इदानीम्। अविहितधर्मके चिसंयुक्ते दृश्यते। तस्मात् धर्माणां ग्राहकः इति। एवं प्राप्ते ब्रूमः।

गुणविधिस्तु न गृह्णीयात्समत्वात् ॥ १७ ॥

गुणविधिरयम्, आतिथ्यस्य गुणं विष्णुदेवतासंयोगं विदधाति, स एष धर्मान् ग्रहीतुम् न शक्नोति। कुतः?। समत्वात्, समो हि अयम् आतिथ्ये चिसंयुक्ते च, यथा तत्र विष्णु देवतां विदधाति एवम् अत्रापि। श्रुत्यर्थासम्भवाच्च लक्षणया धर्माणां ग्राहकः कल्प्यते, इह च प्रत्यक्षश्रुत्यर्थः एव सम्भवति देवताविधिः। तस्मात् न अयं ग्राहकः इति। (७।३।६ भ०)

निर्मन्थ्यादिशब्दैर्धर्मानतिदेशाधिकरणम्।

निर्मन्थ्यादिषु चैवम् ॥ १८ ॥

पशौ अग्नीषोमीये धर्मवान् निर्मन्थ्योऽग्निः आम्नातः

साध्या वे देवाः इत्यारभ्य अग्नौ जूयते, निर्मन्थ्येनेष्टकाः पचन्ति इति। तथा, दर्शपूर्णमासयोः बर्हिराज्ये धर्मवती, पशौ जूयते, बर्हिषा यूपावटम् अवस्तृणाति इति, आज्येन यूपम् अनक्ति इति। तत्र सन्देहः, किं निर्मन्थ्यादयः शब्दाः धर्माणां ग्राहकाः, न ? इति। तत्र अधिकरणातिदेशः क्रियते, निर्मन्थ्यादिषु चैवम्, यथा वैष्णवशब्दे। अत्रापि अयं यौगिको निर्मन्थ्यशब्दः, सद्योनिर्मथितमग्निम् आह। तथा बर्हिः आज्यम् इति द्रव्यशब्दो। त्रयोऽपि स्वार्थं विधाय कृतार्था भवन्ति, धर्मान् ग्रहीतुम्, न शक्नुवन्ति। तस्मात् न ग्राहकाः। (१। ३। १ अ०)।

दर्शः प्रणयन्ति इत्यनेन सौमिकधर्मातिदेशाधिकरणम्।

चातुर्मास्येषु जूयते, दर्शः प्रणयन्ति, तस्मात् दाभ्यमिति इति। अस्ति तु सोमे प्रणयनं धर्मवत्, तथा दर्शपूर्णमासयोः अधर्मकम्। तत्र सन्देहः, किं सौमिकमेतत् प्रणयनं, उत दार्शपौर्णमासिकम् ? इति। तत्र सूत्रेणैव उपक्रमः।

प्रणयनन्तु सौमिकमवाच्यं हीतरत् ॥ १६ ॥ (पृ०)

सौमिकम् एतत् प्रणयनम्। किंकारणम् ?। अवाच्यं हि इतरत् दार्शपौर्णमासिकं, चोदकेन प्राप्तत्वात्। कथम् पुनरयं प्रणयतिशब्दः, प्रणयनमात्रवचनः सन् सौमिकं प्रणयनविशेषं शक्नोति वक्तुम् ?। लक्षणयेति ब्रूमः, तीर्थशब्द-

वत्, तत् यथा, तीर्थशब्दः, तीर्थमात्रवचनः सन् तीर्थविशेष धर्मसाधनं कदाचित् ब्रूते, तीर्थयाचां गतः इति।

उत्तरवेदिप्रतिषेधश्च तद्वत् ॥ २० ॥ (यु०)

न वैश्वदेवे उत्तरवेदिम् उपवयन्ति न सुनासीरीये इति, प्राग्निपूर्वो हि प्रतिषेधो भवति, सौमिके च प्रणयने उत्तरवेदिर्न दार्शपौर्णमासिके।

प्राकृतं वाऽनामत्वात् ॥ २१ ॥ (सि०)

प्राकृतं वा एतत् प्रणयनं, दार्शपौर्णमासिकम्। कुतः?। अनामत्वात् प्रणयनशब्दः, सौमिकस्य प्रणयनस्य न नामधेयं, नैतत् तस्य वाचकम् इत्यर्थः। यदि अयं तस्य वाचकः स्यात्, ततः तद्धि ब्रूयात्, इदं तु पदार्थनामधेयं, पदार्थस्य प्राङ्नयनस्य वाचकं, तद्धि शक्नोति अग्नेः प्राचीनं नयनं वक्तुम्, तच्च इह अस्त्येव। तस्मात् तस्य वाचकः, एवं सन्निहितप्रत्ययो न बाधितो भवति।

अथ यदुक्तं,तीर्थशब्दवत् भविष्यति इति। अत्र ब्रूमः, तीर्थशब्दोऽपि तीर्थमात्रमेव ब्रूते, तीर्थयाचां गतः इति तु उक्ता कानिचित्तीर्थानि अनुक्रान्तानि, यतोऽसौ तद्विशिष्टार्थो विज्ञायते, यत्र तु केवलः प्रयुज्यते, तत्र तीर्थमात्रमेव ब्रूते, यथा, तीर्थे स्नाति, तीर्थमेव हि समानानां भवति इति। अपि च सम्भवति श्रुत्यर्थे, लक्षणार्थोऽयमारम्भः। सम्भवति च अत्र श्रुत्यर्थः। तस्मात् न लक्षणार्थो यत्नः इति।

परिसङ्ख्यार्थं श्रवणं गुणार्थमर्थवादो वा ॥ २२ ॥ (आ० नि०)

तत्र आह, यदुक्तम् अवाच्यं हि इतरत् इति, तस्य कः परिहारः ? । उच्यते, परिसङ्ख्यार्थं वा स्यात्, द्वयोः प्रणयन्ति, न चतुर्ष्विति, गुणार्थम् अर्थवादार्थं वा तस्मात् द्वाभ्यामेति इति । तत्र परिसङ्ख्यायां तावत् त्रयो दोषाः, गुणोऽपि न कथित् विधीयते, परिग्रहात् अर्थवादार्थम् । ननु अर्थवादोऽपि निष्प्रयोजनः, प्रणयनस्य प्राप्तत्वात् । अर्थवादस्य प्रयोजनम्, उत्तरस्मिन् अधिकरणे वक्ष्यामः, मध्यमयोर्वा गत्यर्थवादात् इति । (७ । ३ । ८ अ०) ।

द्वयोः प्रणयन्ति इत्यनेन मध्यमयोर्द्वयोः प्रणयनाधिकरणम् ।

प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ २३ ॥ (पू०)

द्वयोः प्रणयन्ति इति श्रूयते । तत्र सन्देहः, कतरयोर्द्वयोः ? इति । अनियमे प्राप्ते; उच्यते, प्रथमोत्तमयोः प्रणयनम् । कुतः ? । उत्तरवेदिप्रतिषेधात्, तत्र उत्तरवेदिः प्रतिषिध्यते, न वैश्वदेवे उत्तरवेदिम् उपवयन्ति इति, न सुनासीरीये इति । अस्मिन् प्रणयने उत्तरवेद्याः सन्निधानं विहितम् । अतो यत्र प्रणयन, तत्र उत्तरवेदिप्राप्तिः, प्राप्तौ च सत्यां प्रतिषेधः, प्रथमोत्तरयोश्च असौ । तस्मात् त्रयोः प्रणयनम् इति ।

मध्यमयोर्वा गत्यर्थवादात् ॥ २४ ॥ (सि०)

मध्यमयोर्वा पर्वणोः प्रणयनम्। कुतः ?। गत्यर्थवादात्, गत्यर्थवादेनैतत् इयोः प्रणयनमुच्यते, तस्मात् द्वाभ्यामिति इति। ऊरूसंस्तुते वा एते पर्वणी, ऊरू वा एतौ यज्ञस्य, यत् वरुणप्रघासाश्च साकमेधाश्च इति, ऊरू च गमनसाधने, तत्रेयं स्तुतिसम्बन्धो विज्ञायते, ऊरू यज्ञस्य, वरुणप्रघासाश्च साकमेधाश्चेति, तयोर्द्वयोः प्रणयन्ति। तस्मात् द्वाभ्यां ऊरुभ्यां यज्ञः समाप्तिं याति। प्रणयनेन हि तौ बलवन्तौ भवतः, अङ्गभूयस्त्वात् इति, एतत् तदर्थवादस्य प्रयोजनम्।

अथ यदुक्तं, उत्तरवेदिप्रतिषेधात् इति। तत्र ब्रूमः,

औत्तरवेदिको नारभ्यवादप्रतिषेधः ॥ २५ ॥ (आ० नि०)

अनारभ्य कञ्चित् पर्वविशेषं, चातुर्मास्येषु उत्तरवेदिः आम्नाता, उपाचक्षते इति। तस्य अनारभ्य विधिरयं प्रतिषेधः। ननु वरुणप्राघासानां गुणवाक्यप्राप्तौ एव अयं तेषामेव अत्र इति वादः स्यात्। नैतदेवं, प्रकरणात् चातुर्मास्यानामेव, यदि वरुणप्रघासानां वादः स्यात्, तत्र प्रतिषेधे वीक्षापि पर्वाणि उत्कीर्त्येत्। अथोच्येत, इयोः पर्वणोरेव भवतु इति। अत्र ब्रूमः, न इयोः पर्वणोः प्रकरणं, चातुर्मास्यानां वा प्रकरणं, वरुणप्रघासानां वा। वरुणप्रघासानां इयोः प्रकरणे पर्ववीक्षोत्कीर्त्तनं प्रतिषेधे न स्यात्।

तस्मात् चातुर्मास्यानामेव वादः । ननु एवमपि अर्थवादेनैतत् भ्रांतं, मध्यमयोः प्रथयनम् इति, किमर्थं प्राप्तस्य प्रथयनस्य पुनःश्रवणम् ? इति । अत्र प्रयोजनं नोक्तं, असति प्रयोजनेऽन्यस्मिन्, परिसङ्ख्यार्थमेव भवति, तत्र दोषा उक्ताः । तस्मात् गुणार्थमेवैतच्छ्रवणम् । ननु नास्ति कश्चित् गुणः ? । उच्यते, गुणः श्रूयते, उत्तरवेद्यामग्निनिधानम् । तस्मात् तदर्था पुनःश्रुतिः । (७ । ३ । ८ अ०) ।

स्वरसामादिशब्देन धर्मातिदेशाधिकरणम् ।

स्वरसामैककपालाग्निशब्दस्तु लिङ्गदर्शनात् ॥२६॥

(सि०)

गवामयने श्रूयते, अभितो दिवाकीर्त्यमहस्सु स्वरसामानो भवन्ति इति । तेषां विशेषधर्मा आम्नाताः, यथा, मरुद्वत्या भवन्ति, सन्ततयाऽतिरात्रा गच्छन्ते इत्येवमादयः । पुनः अन्यत्र श्रूयते, पृष्ठ्याः षडहो द्वौ स्वरसामानौ इति । तथा, वैश्वदेवे श्रूयते, द्यावापृथिव्य एककपालः इति । तत्र आम्नाता विशेषधर्माः, सर्वहुतं जुहोत्यपर्यावर्तयन् जुहोति इति । पुनः अपरत्र । काय एककपालः इति । तत्रैव श्रूयते, वैश्वदेव्यामिक्षा इति । तत्रापि विशेषधर्माः केचित् आम्नाताः । पुनः अन्यत्र, मैत्रावरुणी आमिक्षा इति । तत्र सन्देहः, किं स्वरसामशब्दोऽन्यत्र श्रूयमाणो गवामयनिकेभ्यः स्वरसामभ्यो धर्मान्वा गृह्णाति, उत न ? इति । एवम्, एककपालाग्निशब्दावपि ।

तत्र गुणविधिषु न ग्रहीयात्, समत्वादित्यग्रहणे प्राप्ते, इदम् उच्यते, स्वरसामैकरूपाद्यामित्यत्र धर्म्माणां ग्राहकम्। किंकारणम्?। लिङ्गदर्शनात्, लिङ्गं तत्र तादृग्दृश्यते, येन ज्ञायते, सर्वे एते धर्म्माणां ग्राहका इति। स्वरसामसु तावत् पृष्ठयः षड्हो द्वौ स्वरसामानौ इत्युक्ता आह, तत्र यत्तृतीयं समदृग्यमहस्तत् त्रयस्त्रिंशस्य स्थानमभिपर्य्याहरन्ति, स उत्तराणां स्तोमानामव्यवायाय त्रयाणां च समदृशानां अनूचीनतायाः इति, यद्येतौ स्वरसामानौ, गवामायनिकानां धर्म्माणां ग्राहकौ, त्रयेतावपि समदृशौ, तथाऽत्र त्रयः समदृशा अनूचीना भवन्ति, तत्र एतद्वचनं युज्यते, त्रयाणां समदृशानां अनूचीनतायाः इति।

तथा आग्नेयणे, द्यावापृथिव्यमेकरूपं विधाय आह, यत् सर्वहुतं करोति, सा तु एका परिचक्ष्या, इतो हुतः पर्य्यावर्त्तते सा द्वितीया, आज्यस्थेव द्यावापृथिव्यौ व्रजेत इति आज्यविधिपरे वाक्ये सर्वहोमम् अपर्य्यावृत्तिञ्च वैश्वदेविकौ धर्मौ प्राप्तौ दर्शयति।

तथा मैत्रावरुणाम् आमिक्षायां न वाजिनेन प्रचरन्ति इति वाजिनेऽयां वैश्वदेविकं धर्मं प्रतिषेधंस्ततो धर्म्मप्राप्तिं दर्शयति। एतेभ्यो लिङ्गेभ्य एतत् ज्ञायते, यथाक्तं धर्म्माणां ग्राहकाः इति। प्रतिपत्तिर्वक्तव्या वाजिनेऽयां लिष्टलक्षणायां मत्वा एतदुक्तम्। आह, लिङ्गं अपदिष्टं, कुतः प्राप्तिः? इति। उच्यते, लक्षणया प्राप्तिर्लिङ्गानु लक्षणापरिग्रहः।

चोदनासामान्याद्वा ॥ २७ ॥ (हि०)

स्वरसामत्वसामान्यात्, एककपालत्वसामान्यात्, आभिक्षामासामान्याद्वा। यस्य लिङ्गम्, अर्थसंयोगात् इत्यनेन प्राप्तिः इति। (७। ३। १०)।

वासो ददातीत्यादौ वास आदिशब्दानामाकृतिनिमित्ताधिकरणम्।

क्वचित् श्रूयते, वासो ददाति, अनो ददाति इति। तत्र विचार्यते, किं, वासस:, अनसश्च क्रिया प्राप्यते, उत न ? इति। तत्र आह, एवं तावत् नः परीक्ष्यं किं, कर्मनिमित्तावेतौ शब्दौ, उत आकृतिनिमित्तौ ? इति। यदि कर्मनिमित्तौ, ततः प्राप्यते। अथाकृतिनिमित्तौ, ततो न ? इति : किं तावत् प्राप्तम् ? कर्मनिमित्तौ इति। कुतः ?। कर्मागमे तदर्थनात्, यदा तस्मिन् द्रव्ये दारुणि सूत्रे वा दारुकारेण तन्तुवायेन वा कर्म कृतं भवति, तदेतौ शब्दौ प्रवर्त्तेते, न प्राक्, अतो विज्ञायते, कर्मनिमित्तौ इति। यदा कर्मनिमित्तौ, तदेतदारभ्यते,

कर्मजे कर्म यूपवत् ॥ २८ ॥ (पू०)

कर्मजे एतस्मिन् वास आदौ द्रव्ये श्रूयमाणे, कर्म प्राप्यते। कथम् ?। यूपवत्, यथा यूपशब्दो लोषणादिक्रियानिमित्तः, स यत्र श्रूयते, तत्र लोषणाद्याः क्रियाः प्राप्यन्ते, एवम् इहापि इति।

रूपं वाऽशेषभूतत्वात् ॥ २९ ॥ (सि०)

अत्र उच्यते, नैतौ कर्मनिमित्तौ। किंकारणम् ?। ये

नैमित्तिकाः शब्दाः, ते निमित्तमुपलभ्य प्रयुज्यन्ते, यदा दण्डी कुण्डी इति। इमौ तु अनुपलभ्य क्रियाम्, आकृतिमात्रे प्रयुज्येते। तस्मात् न एतौ क्रियानिमित्तौ इति। अत्र उच्यते, आकृत्या क्रियाम् अनुमाय ततः शब्दं प्रयुङ्क्ते इति। अत्र ब्रूमः, प्रत्यक्षाम् निमित्ततां गम्यमानाम् उत्सृज्य, अदृष्टायां क्रियायां निमित्तत्वकल्पनायां हेतुर्नास्ति इति। यत्तूक्तं, क्रियोत्तरकालं प्रवृत्तिदर्शनात् इति। अत्र ब्रूमः, प्राक् क्रियायाः आकृतिरनभिव्यक्ता, सा क्रियया अभिव्यज्यते, यतः क्रियोत्तरकालं शब्दप्रयोगः, तस्मात् आकृतिनिमित्तौ, यदैवं, तदा भिन्न रूपं देयम्। कुतः?। अशेषभूतत्वात्, नात्र क्रिया शेषभूता, क्रियावाचिनः शब्दस्याभावात्, यूपे तु प्रत्यक्षविहिता जोषणाद्याः क्रियाः, यूपवत् इति अतुल्योपन्यासः। (७। ३। ११ अ०)।

गर्गत्रिरात्रे लौकिकेऽग्नौ उपनिधानाधिकरणम्।

विषये लौकिकः स्यात् सर्वार्थत्वात् ॥३०॥ (सि०)

गर्गत्रिरात्रे आज्यदोहानि सामानि प्रकृत्य श्रूयते, अग्निमुपनिधाय स्तुवते-इति। अत्र विषयः, किं, लौकिकोऽग्निः उपनिधेयः, उत वैदिकः? इति। किं प्राप्तम्? वैदिकः इति। कुतः?। सर्वकर्मार्थः उत्पत्तौ, यानि अहं कर्माणि करिष्ये यैर्याज्ञिं यधिक्रतः इति, अतो वैदिक उपनिधेयः इति। एव प्राप्ते उच्यते, विषये लौकिकः स्यात

सर्वार्थत्वात्, एतस्मिन्विषये लौकिकं वैदिकम् ? इति, लौकिकः स्यात्। अथ यदुक्तं, वैदिकं सर्वकर्मार्थमुत्पन्नं, तस्मात् तदुपनिधेयम् इति। अत्र ब्रूमः,

न वैदिकमर्थनिर्देशात् ॥ ३१ ॥ (पू० नि०)

न वैदिकम् अग्निद्रव्यं आग्नेयोत्पादितं, तस्य आग्नेयेन कार्यं निर्दिष्टं, यदाहवनीये जुहोति इत्यारभ्य तस्मिन् सर्वार्थे कल्प्यमाने निर्देशोऽनर्थकः स्यात्। तस्मात् लौकिकोऽग्निः, उपनिधेयः। सर्वार्थत्वञ्चैषां स्वे स्वे कार्ये वर्त्तमानानां भविष्यति। एवमुभयम् अविरुद्धं, सर्वार्थत्वं निर्देशश्च इति। अथ वैष्णवा अन्वयः कस्मात् न उपनिधीयन्ते ?। अत्र उच्यते,

तथोत्पत्तिरितरेषां समत्वात् ॥३२॥ (आ० नि०)

इतरेषाम् अपि अग्नीनां वैष्णवानां तथोत्पत्तिः न सर्वार्थे इत्यर्थः। कुतः ?। समत्वात्, एतेऽपि इतरैरग्निभिः समाः, एतेषामपि निर्दिष्टं कार्यं, प्रागासीनो विष्णवान् आधारयति इति। अतस्ते नोपनिधेयाः इति। (७। ३। १२ अ०)।

उपयमो यूपो भवति इत्यादौ यूपशब्दस्य संस्काराप्रयोजकतानिराकरणम्।

संस्कृतं स्यात् तच्छब्दत्वात् ॥ ३३ ॥ (पू०)

एकादशिन्यां श्रूयते, उपयमो यूपो भवति इति। तत्र

सन्देहः, किम्, एतदुपश्रयद्रव्यं संस्कृतं, जोषणादयः संस्काराः अत्र कर्त्तव्याः, उत न ? इति। किं युक्तम् ? संस्कृतं स्यात्। कर्त्तव्या अत्र जोषणादयः संस्काराः। कुतः ? । तच्छब्दत्वात्, अयं यूपशब्दः संस्कारनिमित्तः, स एषोऽसत्सु संस्कारेषु नोपपद्यते। तस्मात्ते कार्य्याः इति।

भक्त्या वाऽयज्ञशेषत्वाद्गुणानामभिधानत्वात् ॥ ३४ ॥ (सि०)

न वा कर्त्तव्याः। कुतः ? । अयज्ञशेषत्वात्, एते संस्कारा अस्मिन् काष्ठे क्रियन्ते, एतेन हारेण, यजतिना सम्बध्यन्ते, इत्यं संस्कृते काष्ठे नियुक्तेन पशुना यजिः क्रियमाणोऽपूर्वं निर्वर्त्तयति। अस्मिंश्च उपश्रये न पशुर्नियुज्यते, तत्र कृताः संस्कारा अनर्थकाः स्युः। ननु वचनसामर्थ्यात् अदृष्टार्था भविष्यन्ति। उच्यते, न अत्र वचनं, यूपः कर्त्तव्यः इति, वर्त्तमानापदेशोऽयम्। ननु वर्त्तमानापदेशोऽपि न घटते, संस्काराणामभावे। उच्यते, भक्त्या भविष्यति, यथा, यजमानो वै यूपः इति। आह, तत्र सादृश्यात्, इह पुनः कथम् ? इति। उच्यते, गुणानाम् अभिधानत्वात्, यूपगुणानां यूपसंस्काराणाम् अभिधानत्वात् यूपसंस्काराः तत्र केचित् अर्थप्राप्ताः छेदनादयः तूष्णीकृताः सन्ति, तैरयम् अभिधीयते, यूपः इति अयूपः सन्। यथा स्नाता कन्या अनलङ्कृता मालागुणेनापि अलङ्कृता इति, एवम् एकदेशेनापि संस्काराणां, संस्कृतः इति स्तुत्याऽभिधीयते। (७। ३। १३ अ०)।

पृष्ठैरुपतिष्ठन्ते इत्यादौ पृष्ठशब्दस्य कर्मद्रव्यवाचिताधिकरणम्।

अथो श्रूयते, पृष्ठैरुपतिष्ठन्ते इति। तत्र चिन्त्यते, किं पृष्ठधर्म्माः कर्त्तव्याः, उत न ? इति। के पुनस्ते ?। सामान्यधर्म्माः हिङ्कारादयः, विशेषधर्म्माः, रथन्तरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेद् बृहति समुद्रम् इत्येवमादयः। किं तावत् प्राप्तम् ? तत आह, एतत् तावत् नः परीक्ष्यं, किम् अयं पृष्ठशब्दः कर्म्मणो वाचकः, उत द्रव्यस्य ? इति। ननु सिद्धमेतत् कर्म्मनामधेयं पृष्ठशब्दः इति, यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः (१।४।३ सू०) इत्यत्र। ताण्डेव ब्राह्मणेषु एतदुक्तं, समृद्धानि पृष्ठानि, वैरूपं पृष्ठं, वैराजं पृष्ठम् इति। इदानीं, पृष्ठैरुपतिष्ठन्ते इत्यस्यां चिन्त्यते। किं पुनरत्र युक्तम् ? तत आह,

कर्मणः पृष्ठशब्दः स्यात् तथाभूतोपदेशात् ॥३५॥

(पू०)

कर्म्मणः पृष्ठशब्दः स्यात्। कुतः ?। तथाभूतोपदेशात् तथाभूतः सन् उपदेशः, यत्र अयं पृष्ठशब्दः कर्म्मनाम अधिगतः, तथाभूतोऽयमपि। किम् अस्य तथात्वम् ?। पृष्ठशब्दसामान्यम्, पृष्ठशब्दस्तत्र कर्मवचनोऽधिगतः, स एव अयम्। तस्मात् इहापि तद्वचन एव अवगन्तव्यः, विशेषाभावात्। यदि अन्यार्थः कल्प्येत, एकः शब्दोऽनेकार्थः स्यात्। तत्र को दोषः ?। शब्दे उच्चरिते संशयः स्यात्, न अर्थप्रत्ययः, तत्र व्यवहारो न सिद्ध्येत्, व्यवहारार्थश्च शब्दप्रयोगः, कारणान्तरं च प्रकरणाद्यपेक्षम्, एकार्थत्वे तु

निरपेक्षोऽर्थप्रत्ययः१ तस्मात् अनेकार्थत्वम् अध्याय्यं, तस्मात् कर्मनाम पृष्ठशब्दः। यदा कर्मनाम, तदा यदि तावत् तानि कर्माणि इह उपदिश्यन्ते, तत्र उत्पत्तिरेषाम् अनर्थिका। अथ मा भूत् एष दोषः इत्येतत् उपस्थानं तत्र विज्ञायते, तत इदं प्रकरणं बाध्येत। तस्मात् माहश्य-विधिरयम्, पृष्ठैः उपतिष्ठन्ते, पृष्ठसदृशैः कर्मभिः उपतिष्ठन्ते इति, तत्सादृश्यं च धर्मैर्भवति। तस्मात् कर्त्तव्या धर्माः इति।

अभिधानोपदेशाद्वा विप्रतिषेधाद्द्रव्येषु पृष्ठशब्दः स्यात् ॥ ३६ ॥ (सि०)

न चैतदेवं, कर्मणः पृष्ठशब्दः इति, किन्तर्हि? द्रव्येषु पृष्ठशब्दः स्यात्, ऋग्द्रव्येषु अभित्वा शूर नो नुमः इत्येव-मादीनाम् ऋचां वाचकः। कुतः?। अभिधानोपदेशात् अभिधानोपदेशोऽयं पृष्ठैरुपतिष्ठन्ते इति, पृष्ठैः अभिद-धाति इत्यर्थः। कथम् पुनः अयम् उपस्थानवचनोऽभिधा-नार्थः शक्यो विज्ञातुम्?। उच्यते, उपग्रहविशेषात् मन्त्र-करणे उपतिष्ठते आत्मनेपदं भवति, मन्त्रस्तु अभिधानस्य करणं न उपस्थानस्य। उपस्थानं शरीरेण क्रियते, मनसा वा। तस्मात् अभिधानार्थः। स एष विप्रतिषेधः। यदि पृष्ठ-शब्दः कर्मसु कल्प्यते, आत्मनेपदं बाध्यते, न हि तदा मन्त्रः करणं भवति। अथ आत्मनेपदम् अनुरुध्यते, उप-स्थानविप्रतिषेधः, तदा अभिधानार्थता आपद्यते, तत्र आ-त्मनेपदानुरोधो न्याय्यः, पृष्ठशब्दो हि लक्षणया पृष्ठसाधनं

मन्त्रं ब्रुवन् अर्थवान् भवति, आख्यानेष्वं तु मन्त्रकरणेनैव उपपद्यते। अतः पृष्ठसाधनेषु मन्त्रेषु पृष्ठशब्दः।

आह, नैतत् युक्तं, उपस्थानार्थता हि श्रुत्या उपतिष्ठतेः, आख्यानपदाक्षिप्तात् अभिधानार्थता, न च लिङ्गेन श्रुतिर्बाधितव्या। उच्यते, नैव अत्र श्रुतिर्बाध्यते, स्वार्थमेवोपतिष्ठतिराह समीपस्थानं, तत्तु अभिधानाय, अभिधानं निर्वर्त्तयितुम् अग्निसमीपे तिष्ठेत् इति तिष्ठतिराह आख्यानपदात्। ततोऽविरोधः।

आह, एवम् अप्यभिधानस्य मन्त्रः करणं, न उपतिष्ठतेः, तत्र असम्बन्धः एव उपस्थानस्य मन्त्रेण। तथा, पृष्ठैः उपतिष्ठन्ते इतिसमुच्चारणम् अनर्थकं स्यात्। उच्यते अभिधानमभिनिर्वर्त्तयन् मन्त्र उपस्थानस्य करणं भवति, यतोऽस्य प्रयोजनं निर्वर्तयति। न हि निष्प्रयोजनम् अनुष्ठीयते, तस्मात् मन्त्रेषु एव पृष्ठशब्दः, मन्त्रेषु चेत्, बार्हिषधर्माणां प्राप्तिर्न हि मन्त्राणां प्राप्तिर्न हि मन्त्राणां धर्माः, अधर्मशास्त्रे इति। (७।४।१४ प०)।

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य तृतीयः पादः।

सप्तमस्य अध्यायस्य चतुर्थः पादः।

अथ स्रौर्ये चरौ इतिकर्त्तव्यताधिकरणम्

इतिकर्त्तव्यताविधेर्यजतेः पूर्ववत्त्वम् ॥ १ ॥

अनारभ्य किञ्चिच्छ्रूयते, सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति । तत्र एषोऽर्थः समधिगतः, यागोऽयं श्रोष्यते इति, यजतिस्तु द्रव्यफलभोक्तृसंयोगात् एषां कर्मसम्बन्धात् (२ । ३.१४ सू०) इति । तथा इदमपि उक्तं, कर्मफलयोः सम्बन्धे कर्म गुणतः फलं प्रधानतः इति, प्रत्यर्थं चाभिसंयोगात् कर्मता हि अभिसम्बन्धः, तस्मात् कर्मोपदेशः स्यात् (६ । १ । ३सू०) इति । इदमपि चोक्तं, यजिः अपूर्वं साधयति, ततश्च अपूर्वात् कालान्तरे फलं भवति इति, चोदना पुनरारम्भः २ । १ । ५ सू० इत्यत्र, एवमेतस्मिन् सति, सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इत्यत्र सौर्ययागेन अपूर्वं कृत्वा ब्रह्मवर्चसं साधयेत् ब्रह्मवर्चसकामः इत्येवं विज्ञायते ।

आह, यत्र तृतीययुक्तो यजिः, तत्र युक्तो गुणभावाभ्युपगमः, यथा, ज्योतिष्टोमेन स्वर्गकामो यजेत इति । इह तु असत्यां तृतीयायां कथं तृतीयार्थो गम्यते ? इति । उच्यते, किम् अत्र तृतीयानिर्दिष्टेन यजिना कार्यम् ? यदा स्वभावसिद्धः कर्मणां फलं प्रति गुणभावः, यद्यपि असौ श्रुतः तथापि अकिञ्चित्कर एव गतार्थत्वात्, तथा, यद्यपि द्वितीया श्रुतिः, यद्वा अग्निहोत्रं जुहुयात् इति, तत्रापि विभक्तिव्यत्ययो वा ईप्सितत्वस्य वा अविवक्षा कामं वा आनर्थक्यं स्यात् । न तु कथञ्चित् अपि कर्मणः प्रति गुणभावः शक्योऽपह्नोतुम् । तस्मात् यागेन अपूर्वसाधनम् अत्र उच्यते, तत्र यागो विज्ञायते, लौकिकोऽसौ पदार्थः, तेन तु कथम् अपूर्वं साध्यते इत्येतत् न विज्ञायते, इह तु यागेन अपूर्वं

साधयेत् इत्येतावदेवोक्तम्। कथम् साधयेदितीतिकर्त्तव्यता न उक्ता, येषां च अर्थानां ज्ञायत एव इतिकर्त्तव्यता, तेषां कर्त्तव्यत्वमात्रम् उपदिश्यते, यथा ओदनं पचेदिति, येषां तु न ज्ञायते, ते सह इतिकर्त्तव्यतया एव उपदिश्यन्ते, यथा दर्शपूर्णमासौ। एवं चेत् नूनं ज्ञायते, यागेन अपूर्व-निर्वृत्तौ इतिकर्त्तव्यता यस्मात् उक्ता, तस्मात् ज्ञातम् अमावस्ति इति।

आह, यद्यस्ति लोके, ततो ज्ञायेत एव, अथ नास्त्येव, कथं शक्या ज्ञातुम्? इति। उच्यते, बाढमस्ति लौकिकी वैदिकी च, लौकिकी तावत् पार्वणस्थालीपाकादिषु, वैदिकी दर्शपूर्णमासादिषु। यदि तत्पूर्वा एताश्चोदनाः तदपेक्षाः सौर्य्ययागेन अपूर्वं साधयेत् यथाज्ञातया इति कर्त्तव्यतया इति, ततो युक्तः, इतिकर्त्तव्यताया अविधिः। न च विधीयते, अत इतिकर्त्तव्यताया अविधिः यजतेः पूर्व-वत्त्वं, विहितेतिकर्त्तव्यताकत्वम् इति।

अथ ये आहुः, यजेत यागं कुर्य्यात् इति, जुहुयात् होमं कुर्य्यात् इति, तेषां, किं नेव धर्माकाङ्क्षा भवति?। भवति इति ब्रूमः, यद्यपि, प्रज्ञातेतिकर्त्तव्यतो यजिर्द्रव्यं देवतां प्रत्युत्सृज्यते इति, तथापि, यदा फलार्थः क्रियते, तदा धर्मान् आकाङ्क्षति, न हि अधर्मकात् फलं भवति। कथं ज्ञायते?। यो हि अमेध्यं द्रव्यम् उच्छिष्टः शयानो वा प्रोद्यादो वामेन हस्तेन, वा पादेन, यथाकथञ्चित् देवतायै उत्सृजति, तस्य फलं न भवति इति शिष्टाः स्मरन्ति। यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो

दक्षिणेन हस्तेन समाहितमना मन्त्रवत् नियमवच्च देवतायै उत्सृजति, तस्य फलं भवति इति स्मरन्ति । तस्मात् यावान् यजतिः फलायावायते, स सर्वो धर्मान् आकाङ्क्षति, अतः तेषाम् अप्यस्ति धर्माकाङ्क्षा । सत्याम् आकाङ्क्षायां, सन्निहितैर्धर्मैः, अविप्रतिषिद्धः सञ्चयः प्रकृतौ, विकृतौ त्वानुमानिकैः । (७ । ४ । १ अ०) ।

सौम्यं चरौ वैदिकेतिकर्त्तव्यताधिकरणम् ।

स लौकिकः स्यादृष्टप्रवृत्तित्वात् ॥ २ ॥ (पू०)

अधुनैवं चिन्त्यते, किम् अनियमः, लौकिकी वैदिकी वा इतिकर्त्तव्यता, उत लौकिकी एव, आहोस्विद् वैदिकी ? इति । अत्र विशेषाभावात् अनियमे प्राप्ते, उच्यते, स लौकिकः स्यात्, स खलु कर्त्तव्यतोपायः लौकिकः स्यात् । कुतः ? । दृष्टप्रवृत्तित्वात्, दृष्टा हि अस्य, तत्र तत्र प्रवृत्तिः, यथा पार्वणस्थालीपाके अष्टकाचरौ आग्रहायणीयकर्मणि, इत्येवं यत्र यत्र यागेन अपूर्वं साध्यते, तत्र तत्र अस्य प्रवृत्तिर्दृष्टा । अतः अन्वयात् विज्ञायते, यागस्य अपूर्वं साधयतः अयम् उपायः इति, अयञ्चापि यागः । तस्मात् अस्यापि स एव अभ्युपायः ।

वचनात्तुततोऽन्यत्वम् ॥ ३ ॥ (आ० नि०)

आह, किम् एवं एव उच्यते, सर्वत्र लौकिकी इति-

कर्त्तव्यता ? इति। एवं खलु प्राप्तम्। एवं प्राप्ते ब्रूमः; वचनात्तु ततोऽन्यत्वम् इति। यत्र प्रत्यक्षं वचनं वैदिक्याः, तत्र न लौकिकी स्यात् वचनसामर्थ्यात् वैदिकी एव स्यात्, यथा उपसत्सु, गृहमेधीये च।

लिङ्गेन वा निमम्येत लिङ्गस्य तद्गुणत्वात् ॥ ४ ॥ (सि०)

लिङ्गेन वा इतिकर्त्तव्यता नियम्येत। कतरा ?। यस्या लिङ्गं, वैदिक्याश्च लिङ्गं, तस्मात् वैदिकी। किं पुनर्लिङ्गम् ?। सौर्य्येतावश्वरो युयुते, प्रयाजे,ज्ञाणलं जुहोति इति, तथा ऐन्द्रवाईस्यते, अर्द्धं बर्हिषो लुनाति, अर्द्धं न, स्वयंदितम् अर्द्धं वेद्याइरोत्यर्द्धं न इति। तथा पित्रयज्ञेन क्षीतरं हुणीते न आर्षेयम् इति। एतैर्लिङ्गैर्ज्ञायते वैदिकी इतिकर्त्तव्यता इति। कथम् ?। तद्गुणत्वात्, एते हि प्रयाजादयो वैदिकस्य अपूर्वस्य गुणाः, यदि च तदीयेतिकर्त्तव्यता प्रवर्त्तिता, तत एतेषु कर्म्मसु एते सन्ति, तत्र एतानि वचनानि उपपद्यन्ते, प्रयाजे प्रयाजे ज्ञाणलं जुहोति इत्येवमादीनि। तस्मात् वैदिकी इतिकर्त्तव्यता नियम्येत।

अपि वाऽन्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः ॥ ५ ॥ (आ० १)

अपि वा नैवं स्यात्, वैदिकी इतिकर्त्तव्यता इति,

कारत्वम् एतैर्लिङ्गैर्न शक्यते वेदिकी नियन्तुम्। कुतः??। न्यायपूर्वत्वात्, न्यायपूर्वकं हि वचनं तन्नाथकं भवति, न चैतानि न्यायपूर्वाणि। न हि वेदिक्याः प्रवृत्तिर्युक्ता, निवृत्तं हि सा प्रकरणादिभिः कारणैर्दर्शपूर्णमासादिषु। कथं तर्हि एतानि लिङ्गानि?। उच्यते, यत्र नित्यानुवादवचनानि स्युः। इह तावत् बर्हिषो जुनाति बर्हि न इति, बर्हिः यज्ञेन भविष्यति, यत्कारणं, सतो बर्हिष उच्यते, न च इहास्ति बर्हिः। नहोतारं वृणीते न आर्षेयम् इति नित्यानुवादो भविष्यति।

यदु नित्यानुवादः सन् अनर्थको भवति। किं क्रियतां, यस्य अर्थो नास्ति। प्रयाजे प्रयाजे क्षणक्षं जुहोति इतिवचनं प्रयाजानां भविष्यति। कथं पुनरत्र प्रयाजाज्य क्षणजुहोमत्व शक्यो वक्तुम्, भिद्यते हि तद्वा वाक्यम्। एवं तर्हि न प्रयाजान् वक्ष्यति, प्रयाजे क्षणजुहोमं विधास्यति। न च असत्सु प्रयाजेषु क्षणजुहोमः शक्यते कर्तुम्, इत्यर्थात् प्रयाजान् करिष्यति। तस्मात् न लिङ्गेन वेदिक्याः नियमः, यद्यपि न न्यायेन लौकिकी इतिकर्तव्यता इति।

मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥ ६ ॥ (अ० २)

तत्र आह, यत्र क्वचात् लोभे अपि इतिकर्तव्यते सह प्रवर्तेते? इति। किमेवं भविष्यति?! एवं तुल्यापेक्षा कर्मणाम् अन्यतरतो न बाधिता भवति। उच्यते, सह

प्रवृत्तौ, एकया चेत् कर्म्म निरपेक्षं कृतं, द्वितीयस्याः प्रवृत्तिर्विप्रतिषिद्धा, ततो भिन्नः प्रवृत्तेः विप्रतिषेधात् यथार्थकल्पना स्यात्, एकस्याः प्रवृत्तिः स्यात् इत्यर्थः। कथम् एकस्याः प्रवृत्तेर्धर्म्माणां यथार्थकल्पना भवति ?। ये धर्म्माः येषु कार्य्येषु प्रवृत्तौ उत्पन्नाः, ते इहापि तेषु एव भवन्ति, इतरस्या द्वितीयस्या धर्म्माः अयथार्थाः भवेयुः पूर्वैर्धर्म्मैः, तेषां कार्य्याणां निर्वर्त्तितत्वात्, एवम् एकस्याः प्रवृत्तेः यथार्थकल्पना भवति, अतो यथार्थकल्पना स्यात् इत्यनेन एकस्याः प्रवृत्तिः इत्युक्तं भवेत्, एकस्याः प्रवृत्तौ यद्वोक्तेन न्यायेन लौकिक्याः प्रवृत्तिः इति।

भागित्वात्तु नियम्येत गुणानामभिधानत्वात्स्वाद्वभिधानवत् यथा धेनुः किशोरेषु ॥ ७ ॥

(आ० नि०)

तुशब्दः पक्षनिवृत्तौ। न तु एवं स्यात्, लौकिकी इतिकर्त्तव्यता इति। किन्तर्हि वैदिकी नियम्येत। कुतः ?। भागित्वात्, वैदिकी अपि भागिनी प्रवृत्तिः, ताऽपि हि अपूर्वस्य इतिकर्त्तव्यता, समाने च भागित्वे उभयोः, वैदिकी एव स्यात्, गुणानामभिधानत्वात्, गुणा एते प्रवाजादयः सौर्य्यादिषु श्रूयमाना अभिधायका भवन्ति एतस्य अर्थस्य, यत्र वैदिकी तत्र इतिकर्त्तव्यता इति बोधका भवन्ति इत्यर्थः।

कस्मात् ?। स्वम्स्वात्, एते हि तत्र इतिकर्त्तव्यतया

इत्यवदाः अतः साङ्गत्वात् तां गमयन्ति। अभिधानवत्, यथा औच्छपाविनानवने अग्निहोत्रम् इत्यभिधानं कर्मणो वाचकं, तत् कर्म सङ्गचरितान् धर्मान् आनयति, तेषु अङ्गेषु एतदभिधानम् इह न युज्यते इति तेषां धर्माणाम् तत्र भावो विज्ञायते। एवम् इहापि प्रयाजादीनां दर्शनम् असत्यां वैदिक्यां न युज्यते इति, तस्या अपि इह भावो विज्ञास्यते। ननु असति न्याये लिङ्गम् अकारणम्। सत्यमेवम्, उक्तस्तु न्यायो भागित्वात् इति। यत्तु दृष्टप्रवृत्तिर्लौकिकी इति। तत्र ब्रूमः, यद्यपि दृष्टप्रवृत्तिः स्यात्, तथापि वैदिकी एव नियम्येत। कथम्?। यथा धेनुः किशोरेषु, तत् यथा, शुक्लकिशोरा धेनुः इति, यद्यपि धेनुशब्दो गोधेन्वां दृष्टप्रवृत्तिः, तथापि अभिधानसामान्यात् अश्वधेन्वामपि भागी इति किशोरेषु लिङ्गेन अश्वधेन्वां विज्ञायते। एवम् इहापि यद्यपि लौकिकी दृष्टप्रवृत्तिः, तथापि इतिकर्त्तव्यतासामान्येन भागित्वात् लिङ्गेन वैदिकी विज्ञेया।

उत्पत्तीनां समत्वाद्वा यथाधिकारं भावः स्यात् ॥ ८ ॥ (२य आ० १)

अथ वा नैव लिङ्गेन नियमः इति। कुतः?। उत्पत्तीनां समत्वात्, धर्म्याणां प्रयाजादीनाम् उत्पत्तयः समाः, सर्वेषाम् आम्नेयाद्यङ्गभावेन, न परस्पराङ्गत्वेन। किम् पुनः?। यदि प्रयाजादीनामनुयाजादयोऽङ्गानि स्युः,

ततो यत्र प्रधानं, तत्र अङ्गानि इति प्रयाजदर्शनेन अनुयाजादयोऽनुमीयेरन्, यदा तु समप्रधाना एते, तदा प्रयाजदर्शनेन कामं प्रयाजा अनुमीयेरन्, प्रयाजधर्मा वा, न तु अनुयाजादयः। तस्मात् लिङ्गम् अनियामकम्। यत्तु, अभिधानवत् इति। अत्र ब्रूमः, युक्तं तत्र, तत्र हि परशब्दः परत्र प्रयुक्तः सन् धर्मान् अतिदिशति इत्युक्तम्।

अपि च, विधिरसौ, अग्निहोत्रवद्होतव्यम् इति, अयं पुनः अनुवादः। तेन अत्र प्रयाजादीनामेव नास्ति प्राप्तिः, कुतः अनुयाजादीनाम्। तस्मात् विषमः उपन्यासः, अभिधानवत् इति। अतो यथाधिकारं भावः स्यात्, ये धर्मा यस्य अपूर्वस्य अधिकारे आम्नाताः, ते तत्र एव भवेयुः।

एवं तर्हि, सौर्यं चरुम् निर्वपेत् इत्यनेन आख्यातेन प्रधानस्य विधानोत्पत्तिः, शेषाणां च वचनं भवतु। अर्थकल्पा ?। न अनङ्गं प्रधानम् उच्यमानं कस्मैचित् प्रयोजनाय कल्पते इति, तेन च प्रापितानामङ्गानाम् एतेभ्यो लिङ्गेभ्यो विशेषावधारणं भविष्यति। तत्र इदम् उच्यते,

उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ॥ ६ ॥

(आ० २)

एकस्मिन् शब्दे प्रधानस्य उत्पत्तिः, अङ्गानां च वचनं न सम्भवति। किङ्कारणम् ?। उत्पन्नं हि प्रधानमङ्गान् अपेक्षते, अपेक्षया च तानि शक्नुवन्ते। तस्मात् नैतत् अपि युक्तम्। यदि च निर्वपेत् इत्यनेन शब्देनाङ्गान्यपि विधीये-

रत्, ततः तेषाम् अपि फलसम्बन्धः स्यात्, तथा अङ्गत्वमेव आश्रयेत। ततोऽयम् अपि वादो न घटते। तस्मात् यथोक्तो लौकिक एव अभ्युपायः।

विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनम् ॥ १० ॥ (आ० नि०)

विध्यन्तो वा सौर्यादिकायां चोदनायां प्रवर्तेत न धर्मा लौकिकाः। कः पुनरयं विध्यन्तो नाम ?। विधेरन्तो विध्यन्तः। अत्र विधिः कः ?। यत् वाक्यम् उपलभ्य, पुरुषः कस्मिंचित् अर्थे प्रवर्त्तते, कुतश्चित् वा निवर्त्तते स विधिः। विधीयते हि अनेन अर्थः। यथा लोके, देवदत्त गामभ्याज शुक्लाम् इति, तस्य अभ्याजेति आदिः, इतरोऽन्तः। वेदेऽपि दर्शपूर्णमासाभ्यां यजेत इति, विध्यादिः, विध्यन्तोऽपि प्रधानविधिवर्जितं क्रतुत्वं पौरोडाशिकं ब्राह्मणं, तेन समेतोऽयं विध्यादिर्विशिष्टापूर्वनिर्वृत्तिं प्रति पुरुषं प्रवर्त्तयति, तस्मात् सोऽन्तः। तथा, सोमेन यजेत इति विध्यादिः। सौमिकम् अपि ब्राह्मणं विध्यन्तः। एष विध्यन्तो नाम। एतेषु च सौर्यादिषु विध्यादिरस्ति, विध्यन्तो नास्ति, एतेषु अपि स विध्यन्तः कस्मात्। कथं-कृत्वा ?। अपरिपूर्णं यत् वाक्यं, तत् अध्याहारेण वा पूर्यते, अवहितकल्पनया वा, तत्र अध्याहारात् अवहितकल्पना न्यायसी, अध्याहारे हि श्रुतः कल्पेत, इत रत्र श्रुतेन सम्बन्धः। तस्मात् अवहितो ब्राह्मणावयवो-

ऽस्य परिपूरकः कल्पते, यथा, वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कानालभते इति, तेन वैदिकी इतिकर्त्तव्यता प्राप्यते।

यदि तत् ब्राह्मणम् अस्यान्तः कल्पते, तच्च न भवति। तदेतन्मयूरनृत्यमापद्यते। तत् यथा, मयूरस्य नृत्यतोऽन्यदपाक्रियतेऽन्यत् संक्रियते, एवम् इहापि इदं संक्रियते तदपाक्रियते। नैष दोषः, प्रत्यक्षः तस्य तच्च भावः, इह पुनः आनुमानिकः, न च आनुमानिकं प्रत्यक्षं बाधते। इह तर्हि न प्राप्नोति, प्रत्यक्षविरोधात्! स्यात् एवं, यदि विरोधः स्यात्, न तु अस्ति विरोधः, तथापि भविष्यति, इहापि तदेतत् उक्तं, विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तेत इति।

उच्यते, प्रकृतिवत् इति किम् आह, अष्टमे प्रकृतिनियमं करिष्यति, इमनस्य प्रकृतिः इति। तदुक्तं, विध्यन्तो वा प्रकृतेरिव प्रवर्त्तेत, या या तस्य कर्मणः प्रकृतिः इति। यस्य आग्नेयः प्रकृतिः, तस्य आग्नेयादेव, यस्य अग्नीषोमीयः, तस्य अग्नीषोमीयात् इत्येवं सर्वत्र।

अथ कस्मात् न लौकिको विध्यन्तः कल्पते?। उच्यते, लौकिकस्य विधेरभावात्, विध्यन्त एव नास्ति, कुतः तत् कल्पना? इति। आह, लौकिकी इतिकर्त्तव्यता प्राप्यताम्, किं विध्यन्तकल्पनया? इति। उच्यते, वैदिकी हि अत्र इतिकर्त्तव्यता न लौकिकी। कस्मात्?। तथा हि लिङ्दर्शनं प्रयाजादि समर्पितं भवति।

लिङ्गहेतुत्वादलिङ्गं लौकिकं स्यात् ॥ ११ ॥
(३य आ०)

यदि लिङ्गात् वैदिकोऽभ्यूपायो भवति, तेन तर्हि अलिङ्गं लौकिकं स्यात्, यत्र कर्मणि किञ्चिल्लिङ्गं नास्ति, तल्लौकिकं स्यात् विधानं, यथा, ऐन्द्राग्नमेकादशकपालं निर्वपेत्, यस्य सजातावीयुः इति ।

लिङ्गस्य पूर्ववत्त्वाचोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ १२ ॥
(आ० नि०)

अत्र उच्यते, स्यात् एवं, यदि लिङ्गहेतुको वैदिक न्यायः स्यात् । न तु असौ लिङ्गहेतुकः । किं हेतुकस्तु ? । विध्यन्तहेतुकः, विध्यन्तोऽपि न्यायपूर्वः, स च न्यायः तुल्यः सर्वेषां कर्मणां वैकृतानां लिङ्गवतां च । कुतः ? । चोदनाशब्दसामान्यात्, कर्मचोदनायां शब्दः समानः, सर्वत्र विध्यादिरस्ति, न विध्यन्तः, तुल्यस्य अपेक्षया अन्यत्र श्रुतेन विध्यन्तेन सम्बन्धः, तदेतत् न्यायपूर्वकं लिङ्गमेकत्रापि दृश्यमानं, तुल्यन्यायानाम् सर्वेषां धर्मवत्तां प्रापयति । यथा स्थाल्यां तुल्यपाकानां पुलाकानां एकम् उपलभ्य अन्येषाम् अपि सिद्धतां जानाति, तुल्यो हेतुः अस्य च अन्येषां च सिद्धत्वस्य इति । तस्मात् सर्वत्र वैदिकी इतिकर्त्तव्यता ।

अथ यदुक्तं, दृष्टप्रवृत्तिर्लौकिकी इतिकर्त्तव्यता इति ।

धर्मेषु, चाक्रमेषु भवति, इदम् इहापि अधिकानसामान्यात् मौक्षो अधिक्षति, तथा वाक्षिकानां इहानां मावात् एकाक्षो विकल्पित् षड्कः इत्युक्तं, तमेनाहं, षड्कः इत्यापद्यते इति। यदम् इहापि। मौक्षवेत् न प्रापकः। तस्मात् नास्ति नामधेयात् धर्मप्राप्तिः इति।

लिङ्गाच्च ॥ १४ ॥ (शु०)

लिङ्गाच्च एतत् प्राप्यते, यथा दादशाहिकं कर्त्तव्यम् इति। किं लिङ्गं भवति ?। द्राभ्यां लोमावयति द्राभ्यां त्वचं द्राभ्यामसृग् द्राभ्यां मांसम् इति। एवं षड्हिकान् पशुनाप्नाह, यत् दादशोपसदो भवन्ति, आत्मानमेतस्मिन् षड्हते इति दादशाहिकं धर्मं दादशोपसत्वं दर्शयति, तत् उपपद्यते, यदि दादशाहिकं धर्मजातं विरोधि कर्त्तव्यम्, इतरथा च ऐकाहिकं षड्पसत्वं स्यात्। तस्मात् पश्यामः, दादशाहिकं कर्तव्यम् इति। तथा इदम् अपरं लिङ्गं, यच्च अतिरिक्तम् एकादशिन्यामाज्यभेदम् न प्रियं आज्यम् अतिरिच्येत, यच्च यत् हो हो पशू समस्येयुः, अनीय आयुः कुर्वीरन् यद्येते आज्यवन्तः पशव आलभ्यन्ते न अप्रियं आज्यमत्यतिरिच्यते न अनीय आयुः कुर्वीत इति, एकादशिन्यां विहारं दादशाहिकं धर्मं दर्शयति। कथम् ?। विहारे सति अतिरेकः पशूनाम् आपद्यते, अतिरेकभयाच्च दर्शोर्द्वयोः समासः, एकाहधर्मप्राप्तो विहारो न स्यात्, तच्च एतदर्थनं न युज्यते। तस्मात् दादशाहिकं कार्यम्।

न वा क्रत्वभिधानादधिकानामशब्दत्वम् ॥ १५ ॥

(सि०)

न का दादशाहिकं कार्यं, किन्तर्हि ऐकाहिकम्। किंकारणम् ?। षोडशेन दादशाहिकं प्राप्नोति, नामधेयेन ऐकाहिकं, नामधेयं च षोडशात् दुर्बलीयः। कुतः ?। प्रत्यक्षत्वात्, प्रत्यक्षं नामधेयं, षोडशं त्वानुमानिकम्। ननु विध्यन्तोऽपि प्रत्यक्षः। सत्यं प्रकृतौ प्रत्यक्षो विधयः, विकृतौ त्वानुमानिकः, नामधेयं पुनर्विकृतावपि प्रत्यक्षं, प्रत्यक्षं च अनुमानादबलीयः, तस्मात् ऐकाहिकं कार्यम्।

ननु, अधिकार्थं नामधेयम् इत्युक्तम्। अत्र उच्यते, अधिकानाम् अशब्दत्वम्, अधिकानां शब्दो नास्ति। इमे ज्योतिरादयः शब्दाः कर्मनामधेयानि इत्युक्तम्, अपि वा नामधेयं स्यात्, यदुत्पत्तावपूर्वमविधायकत्वात् (१।४।२सू०) इति। यत्तु, अधिकानमात् तदाख्यं स्यात् इति। तत्र ब्रूमः वचनात् अधिकानमो न नामधेयेन। यत्तु तेषु अस्तु शब्दस्य अभावात् इति, नेते अदाविदायुरादिषु न सन्ति, कथम् तेषाम् अभावे शब्दस्य अभावो दृष्टः ?। यत्तु, ज्योतिष्टोमे नास्ति ज्योतिरादिः शब्दः इति, कर्मान्तरत्वात्, ज्योतिष्टोमे आयुरादिः शब्दो नास्ति, न धर्माभावात्। तस्मात् ऐकाहिकं विकृतं धर्मजातं कर्तव्यम् इति, अधिकानमात्रं तदाख्यं स्यात्, एकाहवत् इत्येतत् द्वितीयव्याख्यापरिहारः, गौणः सप्तमुवादनात्रम् अनर्थकं

स्यात्। तस्मात् पूर्वोक्तेन न्यायेन नामधेयं धर्मार्थं प्राप्नुयात् इति।

लिङ्गं सङ्घातधर्मः स्यात्तदर्थापत्तेर्द्रव्यवत् ॥६॥

(पू० लि० नि० पू०)

अथ यल्लिङ्गम् उपदिष्टं, दाक्षायणयज्ञदर्शनं, तस्य परिहारः उच्यते, लिङ्गं सङ्घातधर्मः स्यात्, लिङ्गमेतत् सङ्घातधर्मः स्यात्, दाक्षायणः अङ्गसङ्घातः, स फलाय चोद्यते, दाक्षायणमृद्धिकामा उपेयुः इति, गवामयनमपि अङ्गसङ्घातान्तरं, तस्मिन् एव चार्थे फलसिद्धौ विधीयते, तस्य तत्रार्थापत्त्या दाक्षायणधर्मान् सङ्घाति, न चोदनेन, द्रव्यवत्, यथा द्रव्ये व्रीहौ धर्मः श्रुतास्ते तत्रार्थापत्तेषु, प्रतिनिधिभूतेषु प्राप्यन्ते न चोदनेन, तद्वत्।

न वार्थधर्मत्वात् सङ्घातस्य शुचत्वात् ॥ १७ ॥

(पू० लि० नि० उ० १)

नैतत् युक्तम्। कुतः ?। अर्थधर्मत्वात्, अपूर्वधर्मत्वात्, इत्यर्थः। अपूर्वधर्मो दाक्षायणस्त्रं, न सङ्घातधर्मः। कस्मात् ?। सङ्घातस्य शुचत्वात्, अङ्गानि यत्र प्रधानानि, दाक्षायणेन इति दाक्षायणं तेषां शुचः, विशेषवत् इत्यर्थः। विशिष्टे एव चार्थे प्रतीयते, न विशेषवे, यथा राजपुरुष आनीयताम् इत्युक्ते पुरुष आनीयते, न रत्ना, यथा च, गृष्टं भुङ्क्ते देवदत्तः इत्युक्ते न चार्थे घृतो वा प्रतीयते, यदेव प्रधानं तत् प्रतीयते। किम् यतः ?। यतोऽङ्गानि

फलवन्ति, न सङ्घातः। फलवत्तच्च धर्माः। तस्मात् न दाक्ष्योपसत्त्वं सङ्घातधर्मः। एवं चेत् न सवामयने कार्य्यापत्तितः धर्माः प्राप्यन्ते। अतोऽपरिहारोऽयम्।

अर्थापत्तेर्द्रव्येषु धर्मलाभः स्यात् ॥ १८ ॥

(पू० लि० नि० २)

यत् उक्तम्, द्रव्यवत् इति, युक्तं द्रव्येषु, तत्र हि व्रीहिकार्य्यापन्ना नीवाराः कार्य्यापत्तितः तद्धर्मान् लभन्ते। इह पुनर्दाक्ष्योपसत्त्वं नैव सङ्घातधर्मः इत्यपदिष्टो हेतुः। तस्मात् अदृष्टान्तो द्रव्यवत् इति। आह, कथन्तर्हि इदं लिङ्गदर्शनम् ?। अत्र उच्यते,

प्रकृत्या नियतस्य लिङ्गदर्शनम् ॥ १९ ॥

(पू० लि० नि० १)

सवामयने दाक्ष्यादिकं प्रथमम् अहः प्रायणीयोऽतिरात्रः, तस्य धर्मो दाक्ष्योपसत्त्वं, तदुपादाने मुख्यस्य अनुग्रहः, षडुपसत्त्वोपादाने जघन्यानां ज्योतिराद्दीनां, मुख्यस्य प्राप्तकालम् अनुग्रहम् अतिक्रमितुम्, किञ्चित् कार्यं नास्ति। अतः तदनुग्रहार्थं दाक्ष्योपसत्त्वं भवति, तथा मुख्यया प्रकृत्या नियतस्य एतद्दर्शनं, न चोदकप्राप्ता, यस्मात् चोदको नामधेयादबलः। वक्ष्यति च, विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वम्, मुख्यं वाऽपूर्वचोदनात् लोकवत् इति।

अत्र यत् द्वितीयं खिष्टदर्शनम् उक्तम्, एकादशिन्यां विहारदर्शनम्। तत्र उच्यते,

विहारदर्शनं विशिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् ॥ २० ॥ (पू० लि० नि० २)

अनारभ्य एकादशिन्यां विहारः शिष्टः, तदादिप्रभवाः पशवः स्युः, तथा तानेवानूचीनान् अङ्गरङ्गरालभेरन्, आग्नेयमेव प्रथमेऽह्नि आलभेरन्, सारस्वतीं मेषीं द्वितीये, सौम्यं वब्रुं तृतीये, वाडवमन्ततः, अत्र पुनः पर्य्यावर्त्तेषु आग्नेयमेव प्रथमेऽह्न्यालभेरन्, सारस्वतीं मेषीं द्वितीये, सौम्यं वब्रुं तृतीये, वाडवमन्ततः इति, तत् अनारभ्यवादानां प्रकृत्यर्थत्वात् ज्योतिष्टोमं प्रविष्टं, तत्र अङ्गा बहुत्वस्याभावात् अशक्यत्वात् अपरां प्रकृतिं द्वादशाहमागतं, तत्रापि पुनर्ज्योतिरादीनां पर्य्यावर्त्तेषु इत्येतत् न युज्यते इति तृतीयां प्रकृतिं गवामयने प्रविष्टम्, एवमागतस्य एतद्दर्शनम् इति। (७।४।३ अ०)

इति श्रीमद्वरस्वामिनः कृतौ मीमांसाभाष्ये सप्तमस्याध्यायस्य चतुर्थः पादः। समाप्तोऽयं सप्तमोऽध्यायः।

—

अथ प्रतिग्राधिकरणम् ।

अथ विशेषलक्षणम् ॥ १ ॥

एवं तावत् सप्तमेन अध्यायेन, सामान्यतः अतिदेश-लक्षणम् उक्तम्, अविहितधर्मकेषु ऐन्द्राग्न्यादिषु कर्मसु विहितधर्मकेभ्यो दर्शपूर्णमासादिभ्यो धर्मा अतिदिश्यन्ते इति । तत्र चिन्ता भवति, किम् एकस्मिन् कर्मणि सर्व-कर्मसु धर्मातिदेशः, उत, एकस्मात् ? इति । अविशेषात् सर्वेभ्यः इति प्राप्तम् । एवेन तु निराकाङ्क्षीक्रियते कर्मणि द्वितीयधर्मप्राप्तौ किञ्चित् कारणं नास्ति । सत्यं, तदेव तु न श्रावते, कस्मिन् कस्य ? इति, तदर्थं विशेषलक्षणं वक्तव्यम् अस्मिन् अस्य इति । तदिदम् अध्याहारो प्रति-श्रावते, अथ विशेषलक्षणम् इति । अथ इदानीं हेतुत्वात् सामान्यातिदेशलक्षणात् अनन्तरं, विशेषलक्षणं वक्ष्यामः । तदुच्यमानं यथाकालं बोद्धव्यम् इति । (८।१।१ अ०) ।

विशेषकर्मणी धर्मातिदेशाधिकरणम् ।

तदेतत् संक्षेपेण एव उच्यते,

यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥ २ ॥ (सि०)

यस्य वैदिकस्य विधानस्य लिङ्गं किञ्चित्, यद्गतम्

अर्थगतं वा, वैकृत्यां कर्मचोदनायां, तद्गुणवाक्ये वा दृश्यते, तच्च स विध्यन्तः स्यात्। कुतः ?। अर्थसंयोगात्, तस्य अर्थस्य लिङ्गस्य तेन विध्यन्तविशेषणेन संयोगोऽनुभूतपूर्वः, संयोगिनोश्च अन्यतरोदृश्यमान उत्तरमदृश्यमानमपि अनुमानात् बुद्धौ सन्निधापयति, अभिधानवत्, यथा अग्निहोत्रं जुहोति इत्यभिधानं कौण्डपायिने श्रूयमाणं नैयमिकाग्निहोत्रधर्मान् बुद्धौ सन्निधापयति। किम् अतोऽत्र ?। एतदतो भवति अधूर्वं यत् वाक्यं, तत्पूरणसमर्थेन अवयवेन बुद्धौ सन्निहितेन एकवाक्यतां याति, यथा दर्शपूर्णमासाभ्यां यजेत इति विध्यादिः कथम् ? इति विध्यन्तापेक्षः, अग्न्याधानादिविधानकाण्डेन, पाठात् बुद्धौ सन्निहितेन एकवाक्यतां याति, दर्शपूर्णमासाभ्यां यजेत इत्यम् इति, एवं विध्यन्तापेक्षो यो वैकृतो विध्यादिः, सोऽपि वैदिकेन विध्यन्तेन अनुमानात् बुद्धौ सन्निहितेन एकवाक्यतां यास्यति, यथा सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति। तच्च कथम् ? इतिविध्यन्तापेक्षायाम् अनेकविध्यन्तसन्निपाते असाधारणेन निर्वपति-शब्देन दार्शपौर्णमासिकविध्यन्तसंयोगिना लिङ्गेन तदीयो विध्यन्तः प्रसज्यते। तत्रापि आग्नेयाद्यनेकापूर्वविध्यन्तप्रसङ्गे, एकदेवतात्वेन वा ओषधिना वाऽसाधारणेन लिङ्गेन आग्नेयविध्यन्तो नियम्यते। तदेतदेवं विज्ञायते, सौर्यं चरुं निर्वपेत् आग्नेयवत्, आग्नावैष्णवम् एकादशकपालं निर्वपेत् अग्नीषोमीयवत्, सर्वत्र एवम्। प्रतिपदाख्याने तु गौरवं परिहरद्भिर्व्याख्यातृभिः सर्वसामान्यः शब्दः

परिगृहीतः प्रकृतिवत् इति। एवं यत्र सूक्ष्ममपि किञ्चित् सामान्यं, शब्दो वा अर्थो वा इविर्देवतादि तृङ्गुणा वा रूपादयो उपलभ्येरन्, तत्र तदीयो विध्यन्तः कल्प्यः। तदेतत् संक्षेपेण अत्रैव सर्वम् उक्तं, शिष्टहितार्थमुत्तरः प्रपञ्चः। श्लोकमप्युदाहरन्ति,

वितीर्य हि महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।
इष्टं हि विदुषां लोके समास-व्यासधारणम्।

इति। (८।१।२ अ०)।

सोमे ऐष्टिकधर्मानतिदेशाधिकरणम्।

प्रवृत्तित्वादिष्टेः सोमे प्रवृत्तिः स्यात् ३ ॥ (पू०)

ज्योतिष्टोमेन स्वर्गकामो यजेत इति श्रूयते। तत्र विध्यन्तं प्रति चिन्ता, कुतः अस्मिन् विध्यन्तः स्यात्? इति। तत् उच्यते, प्रवृत्तित्वात् इष्टेः सोमे प्रवृत्तिः स्यात्, दार्शपौर्णमासिको विध्यन्तः सोमे स्यात्। कुतः?। प्रवृत्तित्वात्, दीक्षणीयादिषु इष्टिषु दार्शपौर्णमासिको विध्यन्तः प्रवृत्तः, दीक्षणीयायाम् आतिथ्यायां प्रायणीयायां पशौ च, तदनन्तरं सोमः, तत्रापि स एव प्रवृत्त्या विज्ञायते, यथा, देवदत्तो भोजयितव्यः, विष्णुमित्रो भोजयितव्यः, माठरः कौण्डिन्यो भारद्वाजः इत्युत्तरेष्वपि भोजयितव्यः इति प्रवृत्त्या अनुबध्यते। तस्मात् ऐष्टिकः सोमे विध्यन्तः।

लिङ्गदर्शनाच्च ॥ ४ ॥ (यु० १)

तस्मैकर्षयतं प्रयाजानुयाजाः इति च ऐष्टिका धर्म्माः सोमे दृश्यन्ते । तस्मात् च अस्मिन् ऐष्टिको विध्यन्तः ।

क्रतूक्थविधानाच्चाऽपूर्वत्वम् ॥ ५ ॥ (सि०)

अपूर्वत्वम् एव हि सोमे, स न कृतश्चित् धर्मान् गृह्णाति । कुतः ? । क्रतूक्थविधानात्, इतिकर्त्तव्यताविधेर्यजतेः पूर्ववत्त्वम् (७।४।१ सू०) उक्तं विहितेतिकर्त्तव्यतश्च अयम् । तस्मात् अपूर्वः ।

सुगभिधारणाभावस्य च नित्यानुवादात् ॥६॥ (यु०)

सुगभिधारणस्य च अभावानुवादः सोमे भवति, घृतं वै देवानन्नं कृत्वा सोममन्नन् स्रुचो बाह्र, तस्मात् स्रुचि सोमश्चिर्नीयते, न सोममाज्येनाभिधारयन्ति इति, तत् उपपद्यते, यदि अपूर्वः सोमः, अथ दर्शपूर्णमासप्रकृतिः स्यात्, आद्येनाभिधार्य्य सुगभ्यां क्षुयेत, तत्र एतदर्शनं न उपपद्यते, तस्मात् अपूर्वः ।

विधिरिति चेत् ॥ ७ ॥ (आ०)

इति चेत् पश्यसि, सुगभिधारणाभावानुवाददर्शनात् अपूर्वः सोमः इति । अथ कस्मात् दर्शपूर्णमासप्रकृतित्वे न प्राप्तस्य सुगभिधारणस्य प्रतिषेधकोऽयं विधिः न भवति ? इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोद्यति ।

न वाक्यशेषत्वात् ॥ ८ ॥ (आ० नि०)

न अयं विधिः। कस्मात्?। वाक्यशेषत्वात् अन्योऽत्र विधिराम्नातः। तत् आह, अंशुरंशुस्ते देव सोमाप्यायतां इति, तस्य वाक्यशेषोऽयम्। कथम् ज्ञायते?। तेन आकाङ्क्षितत्वात्, अवधिषुर्वा एतत् सोमं यदभिषुण्वन्ति, यदस्य स्रुचौ बाहू कुर्वन्ति, यज्ञाज्यमन्तिकमकार्षुः, यदाह, अंशुरंशुस्ते देव समाप्यायतां इति, यदेवास्यादातुः क्षुरमक्षुरस्तदाप्याययन्ति इति। यदि अयमपि विधिः स्यात्, वाक्यभिद्येत, तस्मात् न विधिः।

शङ्कते चानुपोषणात् ॥ ९ ॥ (यु०)

सोमे शङ्कते, यदनुपोष्य प्रयायादृषीवदृषमेनं अनुभिन् लोके नेनीयेरन् इति। दार्शपौर्णमासिके विद्यमाने सति, नियतम् उपोषणं स्यात्, तदा अनुपोषणाशङ्का न युज्यते। तस्मात् अपूर्वः।

दर्शनमैष्टिकानां स्यात् ॥१०॥ (आ० नि०)

यच्च प्रयाजानुयाजानां दर्शनं, लिङ्गत्वेन उपदिष्टं, तस्य एकप्रतं प्रयाजानुयाजाः इति, तत् दीक्षणीयादीनां सोमाङ्गभूतानां कर्मणां ये प्रयाजानुयाजाः, तेषां समुच्चयवचनम्। किंकारणम्?। सोमस्य अपूर्वत्वात्, तेषां च तावतां, तत्र भावात्। अङ्गाङ्गमपि च तस्य इति शक्यते वक्तुम्। यथा वाजपेयस्य यूपः इति। तस्मात् अपूर्वः सोमः। (८।१।३ अ०)।

ऐन्द्राग्नाद्दी ऐष्टिकधर्मातिदेशाधिकरणम् ।

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥ ११ ॥

इष्टय उदाहरणम्, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः इत्येवमाद्याः । तत्र सन्देहः, किं दार्शपौर्णमासिको वा सौमिको वा विधन्तः, उत दार्शपौर्णमासिक एव ? इति । किं प्राप्तम् ? अनियमः । दर्शपूर्णमासयोरपि विधन्तोऽस्ति सोमेऽपि । इमाश्च इष्टयो विधन्तापेक्षाः, एकेन च विधन्तेन भवितव्यम् इत्युक्तम्, न च गृह्यतेऽन्यतरनियमे विशेषः । तस्मात् अनियमः ।

एवं प्राप्ते उच्यते, इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः, हेतुर्नोक्तः प्रज्ञातः इति । कः पुनरसौ ? । चोदनायां प्रकृतिलिङ्गसंयोगः । किं पुनः तत् प्रकृतिलिङ्गम् ? । तद्धितेन देवतोपदेशः कपालवत्ता, निर्वपतिशब्दश्च, ऐन्द्राग्नमेकादशकपालं निर्वपेत् इति । इतरत्रापि तथैव ऐन्द्राग्नो द्वादशकपालः इति, निर्वपतिरपि अग्नीषोमीयहविषश्च हवींषि निर्वपति इति, प्रकृतिलिङ्गेन च विधन्तविशेष उक्तः, यस्य लिङ्गमर्थसंयोगात् (८।१।२ सू०) इति । तस्मात् दार्शपौर्णमासिकस्तासु विधन्तः । तत्र दर्शयति प्रयाजे प्रयाजे स्रुक्स्रुवं जुहोति इति । अलिङ्गास्वपि स्थालीपुलाकवत् सिद्धिः । (८।१।४ अ०) ।

पशौ पशुसोमीयपशौ दार्शपौर्णमासिकधर्मातिदेशाधिकरणम् ।

पशौ च लिङ्गदर्शनात् ॥ १२ ॥

पशौ अग्नीषोमीये विचिक्ित्सते, किं दार्शपौर्णमासिको विधत्तः उत, सौमिकः ? इति। किं प्राप्तम् ? तत्रैव पूर्वपक्षः। तत्र उत्तरमभिधीयते, पशौ च लिङ्गदर्शनात्, पशौ च दार्शपौर्णमासिक एव विधत्तः। कुतः ? । लिङ्गदर्शनात्, एकादश प्रयाजान् एकादशानुयाजान् इति, तथा स्रौवमाघार्य जुहूा पशुमनक्ति इति। ननु लिङ्गम् अपदिष्टम्, कुतः प्राप्तिः ? । चोदनासामान्यात्। किं सामान्यम् ? । व्यक्तचोदनत्वम्। का व्यक्तिः ? । द्रव्यदेवतावत्ता, अग्नीषोमीयं पशुम् इति, इतरत् ऐन्द्रं पयः इति। अव्यक्तचोदनस्तु सोमः। (८।१।५ अ०)।

सवनीयादिपशौ अग्नीषोमीयधर्म्यातिदेशाधिकरणम्।

दैक्षस्य चेतरेषु ॥ १३ ॥

इह पशुबन्धा उदाहरणम्, सवनीयो निरूढः पशुः, सौम्यादश्च। तेषु, किं दार्शपौर्णमासिको विधत्ता, उत दैक्षस्य ? इति। दैक्षः इति अग्नीषोमीय उच्यते, दीक्षासम्बन्धात्। किं प्राप्तम् ? यथोक्तेन न्यायेन दार्शपौर्णमासिकः इति। तथा प्राप्ते उच्यते, दैक्षस्य च इतरेषु पशुषु सवनीयादिषु अग्नीषोमीयस्य विधत्तः, आलभतिचोदनासामान्यात्, पशुत्वचोदनासामान्याच्च। तत्र दर्शयति, वपया प्रातःसवने चरन्ति, पुरोडाशेन मध्यन्दिनेऽङ्गैस्तृतीयसवने इति वपापुरोडाशाङ्गप्रचारं दर्शयन्ति।

भेदेन च, तथा क्वचित्, औदुम्बरो यूपो भवति इति यूपं दर्शयति। तस्मात् अग्नीषोमीयः पशूनां प्रकृतिः। (८। १। ६ अ०)।

ऐकादशिनपशौ सवनधर्मातिदेशाधिकरणम्।

ऐकादशिनेषु सौत्यस्य हैरण्यस्य दर्शनात् ॥१४॥

एकादशिनाः पशवः उदाहरणम्, छन्दोगौर्वा आग्नेयः इत्यारभ्य आम्नाताः। अन्येषां च आग्नेयेन यापयति मिथुनं सारस्वत्या करोति, प्रजनयति सौम्येन इति। तेषु सन्देहः, किम् अग्नीषोमीयविधयः, उत सवनीयविधयः? इति। किं प्राप्तम्? पूर्वोक्तेन न्यायेन अग्नीषोमीयस्य।

इति प्राप्ते उच्यते, ऐकादशिनेषु सौत्यस्य, सौत्यः इति सुत्याकालत्वात् सवनीयमाहुः, तदीयो विधयः ऐकादशिनेषु। कुतः?। हैरण्यस्य दर्शनात्, अग्निष्ठां हे हे रशने आदाय द्वाभ्यां रशनाभ्याम् एकैकं यूपं परिव्ययति इति, अग्नीषोमीयप्रकृतित्वे ऐकैकरशन्यं स्यात्।

अथ वचनमिदं कस्मात् न भवति?। अग्निष्ठा हे हे रशने आदायेत्येतत् अत्र विधीयते, यदि रशनादित्वमपि विधीयते, तदा वाक्यभिद्यते, तस्मात् तदनूद्यते। ननु लिङ्गमपदिष्टं, कुतः प्राप्तिः?। उच्यते, समाने पशुत्वे सुत्याकालङ्का वैश्वेषिकं लिङ्गं, ततः प्राप्तिः। (८।१।७ अ०)।

पशुगवेषु ऐकादशिनधर्मातिदेशाधिकरणम्।

तत्प्रवृत्तिर्गवेषु स्यात् प्रतिपशु यूपदर्शनात् ॥१५॥

इह पशुगवा उदाहरणम्, यस्ते अक्षामांक्षीन् हव्यभागानक्षभते, तवा मेवं क्षेत्रमाक्षमेत, वाक्यं क्षत्रं, अपां च ओषधीनां च सम्बो अक्षकामः इति। तत्र विचार्यते, किम् अग्नीषोमीयस्य विध्यन्तः, उत ऐकादशिनानाम्? इति। यज्ञोक्तेन न्यायेन अग्नीषोमीयस्य।

एवं प्राप्ते उच्यते, तत्प्रवृत्तिर्गवेषु स्यात्, तेषाम् ऐकादशिनानां प्रवृत्तिः पशुगवेषु स्यात्। कुतः?। प्रतिपशु यूपदर्शनात्, यत् किंचु यूपेषु आक्षमेत बहिर्हाऽक्षात् इन्द्रीयं वीर्यं दध्यात्, भ्राष्टव्यम् अस्य जनयेदेकयूप आक्षमेत इति यूपबित्वं प्रतिषिध्य, एकं यूपं सौचामखां विदधाति। तदुपपद्यते, यदि ऐकादशिनविध्यन्तः, तत्र हि प्रतिपशु यूपाः। अग्नीषोमीयप्रकृतित्वे एक एव यूपः स्यात्, तत्र एतदुपपद्यते। तस्मात् ऐकादशिनानां विध्यन्तः पशुगवेषु। (८।१।८ अ०)।

अव्यक्रयजसौ सौमिकधर्मातिदेशाधिकरणम्।

अव्यक्तासु तु सोमस्य ॥ १६ ॥

इदं सूयते, अभिजिता यजेत इति एवजातीयका यजतयः, तेषु विध्यन्तचिन्ता, किमेषु सौमिकी विध्यन्तः,

उत दार्शपौर्णमासिकः ? इति । अविशेषात् अनियमे प्राप्ते, उच्यते, अव्यक्तासु तु सोमस्य । का अव्यक्तता ? । द्रव्यदेवतस्य अभावः, द्रव्यदेवतेन हि यागोऽभिधीयते, एतावाद्रव्यदेवताचोदनाः, अभिजिता यजेत इति, एतासु अव्यक्तासु सौमिको विधयः स्यात् । कुतः ? । अव्यक्तसामान्यात्, सोमोऽप्यव्यक्तचोदनः, ज्योतिष्टोमेन यजेत इति । ननु सोमेन यजेत इत्येषा व्यक्तचोदना । तथापि देवताया अभावात् अव्यक्तता, तथा च दर्शेन यजेत इति अव्यक्तचोदिते, दीक्षणीयादीनि सोमाङ्गानि दर्शयति, दीक्षणीयायां हादश्यमानं हिरण्यं दक्षिणा, चतुर्विंशतिमानं प्रायणीयायाम् इति । तस्मात् तासु सौमिको विधयः । (८ । १ । ९ अ०) ।

षडहगणेषु हादशाहिकधर्मातिदेशाधिकरणम् ।

गणेषु हादशाहस्य ॥ १७ ॥

इह षडहगणा उदाहरणम्, हिरात्राद्यः शतरात्रपर्यन्ताः । तेषु सन्देहः, किं ज्योतिष्टोमिको विधयः, उत हादशाहिकः ? इति । पूर्वेण न्यायेन सौमिके प्राप्ते उच्यते, गणेषु हादशाहिको विधयः इति । कुतः ? । चोदनासामान्यात्, हादशाहेन यजेत, हिरात्रेण यजेत इति । अहःशब्दोऽपि अहोरात्रवचनः, रात्रिशब्दोऽपि, एतच्छब्दगतं लिङ्गम् । अर्थगतम् अपि गणत्वं, गणः एव सङ्घातधर्मैर्गम्यम् अनुगृहीतुम् समर्थो न एकाहः । हाभ्यां सोमा-

यन्ति इत्यां मांसम् इति च एतदारभ्य दाक्षायणसत्रं दाक्षायणिकं धर्मं गवामयनेन दर्शयति। तस्मात् अहर्गवामं दाक्षायणः प्रकृतिः। (८।१।११ भ०)।

संवत्सरसत्रेषु गवामयनिकधर्मातिदेशाधिकरणम्।

गव्यस्य च तदादिषु ॥ १८ ॥

इह संवत्सरसत्राणि उदाहरणम्, आदित्यानामयन-प्रभृतीनि। तेषु चिन्ता, किं दाक्षायणिको विधयः उत गवामयनिकः? इति। पूर्वोक्तेन न्यायेन दाक्षायणिके प्राप्तेऽभिधीयते, गव्यस्य च तदादिषु, गव्यम् इति, गवामयनं नाम, गोसत्रत्वात्, गावो वा एतत् सचमानत इति। तस्य विधयः तदादिषु संवत्सरसत्रेषु स्यात्। कुतः?। संवत्सरसामान्यात्, पञ्च उपगायन्ति इति च महाव्रतिकं धर्मं संवत्सरसत्रे दर्शयति। ऋत्विज उपगायन्ति इति च सहस्रसंवत्सरे। (८।१।११ भ०)।

निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशाधिकरणम्।

निकायिनाञ्च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥ १९ ॥

निकायः, इति सङ्घातः औत्तराधर्मैरवच्छिन्न उच्यते, स एषां, ते निकायिनः यथा साहस्राः सात्यवाहाः, तेषां पूर्वस्य केचित् धर्माः आम्नाताः, उत्तरे तु अधर्मकाः।

तत्र चिन्त्यते, किं ज्योतिष्टोमस्य विध्यन्तः, उत प्रथमस्य निकायिनः ? इति । अध्वर्युचोदनत्वात् ज्योतिष्टोमस्य ।

इति प्राप्ते उच्यते, निकायिनां च पूर्वस्य उत्तरेषु प्रवृत्तिः स्यात् । कुतः ?। निकायित्वसामान्यात्,साहस्राणां साहस्रसामान्यात्, साग्नेयस्कार्ष्मसामान्यात्, एवं सर्वत्र पूर्वस्मिन् च साहस्रे सहस्रं दक्षिणाम् आम्नाय उत्तरस्मिन् दर्शयति, यावत् अस्य साहस्रस्य उत्तरा गौः समाप्ता भवति, तावत् अस्मात् लोकात् असौ लोकः इति,तथा पूर्वस्मिन् साग्नेयस्के सांवत्सरिसंवत्सरः सोमक्रयणः स्यादिमानानाम् इत्याम्नाये उत्तरस्मिन् अपि तमेव दर्शयति, स्त्री गौः सोमक्रयणी आहृता हि एषां स्यादिता इति । तस्मात् पूर्वस्य उत्तरेषु धर्म्याः । (८ । १ । १२ अ०) ।

फलादीनामनतिदेशाधिकरणम् ।

कर्मणस्त्वप्रवृत्तित्वात् फल-नियम-कर्तृ-समुदाय-स्यानन्वयस्तद्धर्मत्वात् ॥ २० ॥ (सि०)

इह फल-नियम-कर्तृ-समुदाया उदाहरणम् । फलं स्वर्गः, नियमो यावज्जीविकोऽभ्यासः, कर्ता स्वर्गकामः, समुदायो दर्शपूर्णमासौ इति । तत्र चिन्त्यते, किं फल-नियम-कर्तृ-समुदायानां सौर्य्यादिषु प्रवृत्तिः, न ? इति । किं प्राप्तम् ? इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् (८ । १। ११ सू०) इत्यनेन न्यायेन प्रवृत्तिः इति प्राप्तम् । तत्र प्राप्ते उच्यते, फल नियम कर्तृ समुदायस्य अप्रवृत्तिः ।

कुतः ? । कर्मणः अप्रवृत्तित्वात् तदन्वयत्वात् च फलादीनां कर्म तावत् न प्रवर्त्तते । किद्वारकम् ? । विध्यन्तेन धर्माः प्रवर्त्तन्ते, न च कर्म विध्यन्तविहितं,विध्यादिविहितं तत् । तस्मात् न प्रवर्त्तते, तस्याप्रवृत्तित्वात् फल-नियम-कर्तृ-समुदायस्य अनन्वयः अप्रवृत्तिः इत्यर्थः । कुतः ? । तदन्वयत्वात्, फलं तावत्, दर्शपूर्णमासाभ्यां यजेत इति, दर्श-पूर्णमाससंयुक्तं श्रुतं, तत् यत्र दर्शपूर्णमासौ, तत्र भवितुमर्हति, न च सौर्य्यादिषु तौ स्तः, अतः स्वर्गस्यापि तत्राभावः । एवं नियमोऽपि कर्मबन्धनः, यावज्जीवं दर्शपूर्ण-मासाभ्यां यजेत इति, स दर्शपूर्णमासाभावे कथं स्यात् । तथा कर्त्ता कर्मबन्धनः, दर्शपूर्णमासाभ्यां स्वर्गकामः इति, सोऽपि कथं तयोरसतोः स्यात् । समुदायोऽप्याग्नेयादीनां, तानि सौर्य्यादिषु न सन्तीति तत्समुदायः कथं तत्र भवेत् । तस्मात् तेषाम् अप्रवृत्तिः ।

प्रवृत्तौ चापि तादर्थ्यात् ॥ २१ ॥ (यु०)

अपि च धर्माणां प्रवृत्तिः कर्मार्था, कर्मैव उपकर्तुम्, न च फलादीनि कर्मैव उपकुर्वन्ति, फलं तावत् पुरुषस्य उपकरोति, न कर्मणः, उक्तं हि फलं च पुरुषार्थत्वात् (३।१।५ सू०) इति । नियमोऽपि न कर्मधर्मः, कर्त्तृधर्मोऽमाविलुप्तं, कर्त्तुर्वा श्रुतिसंयोगात् (२।४।२ सू०) इति । तथा कर्त्ता स्वर्गकामो न कर्मार्थः, कर्म स्वर्गकामार्थं, न हि स्वर्गकामः कर्मैव उपदिश्यते, स्वर्गकामो यजेत इति, किन्तर्हि, कर्म स्वर्गकामस्य उपदिश्यते, स्वर्गकामो यजेत,

नान्यत् कुर्यात् इति । तथा समुदायो न कर्मार्थः, फलार्थोऽसौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति । एवम् एतेषां कर्मणोऽनुपकारकत्वात्, प्रवृत्तिः अनर्थिका स्यात् । तस्मात् न प्रवर्त्तेरन् ।

अश्रुतित्वाच्च ॥ २२ ॥ (आ० नि०)

अत्राह, यदि दर्शपूर्णमाससंयोगात् फलादीनाम् अप्रवृत्तिः, प्रयाजादीनामपि तत्सम्बन्धात् अप्रवृत्तिः प्राप्ता, तान्यपि हि तत्संयुक्तानि इति । उच्यते, यद्यपि तानि दर्शपूर्णमासयोः श्रुतानि, विध्यन्तेन तु सौर्य्यादिष्वपि अतिदिष्टानि । फलादीनि तु न विध्यन्तेन अतिदिश्यन्ते, तेषां यदि प्रत्यक्षा प्रवर्त्तिका श्रुतिः स्यात्, ततः प्रवर्त्तेरन्, न च श्रूयन्ते । तस्मात् अश्रुतित्वात् न प्रवर्त्तन्ते । (८।१।१३ अ०) ।

गुणकामानां गोदोहनादीनामनतिदेशाधिकरणम् ।

गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् ॥२३॥ (पू०)

इह गुणकामा उदाहरणम्, गोदोहनेन पशुकामस्य, उषसि गायता नरः इति, ग्रामकामाय प्रतिपदं कुर्यात् इत्येवमादयः । तत्र विचार्य्यते, किं गुणकामानां वैकृतेषु प्रवृत्तिः, उत न ? इति । ततः सूत्रे एव उपक्रमः, गुणकामेषु आश्रितत्वात्, प्रवृत्तिः स्यात्, प्रवृत्तिः गुणकामानाम् । कुतः ? । आश्रितत्वात्, गोदोहनं प्रकरणाश्रितं, गोदोहनेन प्रणयेत् इति । तच्च प्रणयनं प्रवर्त्तते,

आश्रये च प्रवर्त्तमाने तदाश्रितमपि प्रवर्त्तते। यथा पटे आक्षय्यमाणे तदाश्रितं चित्रमप्याक्षय्यते, यथा च चमसः प्रवर्त्तते, यथा च खादिरं वीर्य्यकामाय यूपं कुर्य्यात्, इति एवं गोदहनम् अपि प्रवर्त्तेत। गोदोहने च प्रवर्त्तमाने तदाश्रितः कामोऽपि प्रवर्त्तितुमर्हति। तस्मात् गुणकामानाम् प्रवृत्तिः।

निवृत्तिर्वा कर्मभेदात् ॥ २४ ॥ (सि०)

निवृत्तिर्वा गुणकामानाम् अप्रवृत्तिः। कुतः ?। कर्मभेदात्, कार्य्यभेदात् इत्यर्थः। अन्यत् कार्य्यं गोदोहनस्य, अन्यत् चमसस्य, चमसः क्रत्वर्थो, गोदोहनं तु पुरुषार्थः। तदुक्तम्, यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाऽविभक्तत्वात् (४।१।२ सू०) इत्यत्र। अक्रत्वर्थः, किमर्थं प्रवर्त्तेत ? क्रतूपकाराय हि तस्य प्रवृत्तिः। एवं प्रतिपदः। तस्मात् न प्रवर्त्तेरन् गुणकामाः।

यत्तु उपन्यस्तं, यथा खादिरं वीर्य्यकामाय यूपं कुर्य्यात् इत्यत्र प्रवृत्तिरेवम् अत्रापि इति, तत्र ब्रूमः,

अपि वाऽतद्विकारत्वात् क्रत्वर्थत्वात्प्रवृत्तिः स्यात् ॥ २५ ॥ (पू० यु० नि०)

अपि वा, एवंविधेषु प्रवृत्तिः स्यात्। कुतः ?। अतद्विकारत्वात्, न खादिरः क्रत्वर्थविकारः, अयम् अपि क्रत्वर्थ एव, तदुक्तम्, एकस्य तु उभयत्वे संयोगपृथक्त्वम् (४।३।५ सू०) इति, क्रत्वर्थत्वेत् पलाग्नवत् प्रवर्त्तत, तस्मिंश्च प्रवर्त्तमाने तदाश्रितः कामोऽपि प्रवर्त्तते, खादिरेण हि स

सिध्यति, स च खादिरोऽस्ति, तस्मात् कामं साधयिष्यति। (८।१।१४ सू०)।

सौर्ये चरावभिमर्शनहेयस्य विकल्पाधिकरणम्।

एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥ २६ ॥

सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति श्रूयते। अस्ति तु प्रकृतावभिमर्शनहेयं, चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम् इति, तत् इह चोदकेन प्राप्यते। तत्र संशयः, किं सौर्ये यदा पौर्णमास्यां प्रयुज्यते, तदा चतुर्होत्राऽभिमन्तव्यः। यदाऽमावास्यायां, तदा पञ्चहोत्रा। उत उभयत्र विकल्पः, चतुर्होत्रा वा पञ्चहोत्रा वा? इति। किं प्राप्तम्? व्यवस्था इति। कुतः?। चोदकानुग्रहात् प्रकृतौ व्यवस्था लक्ष्यते, इहापि चोदको व्यवस्थां प्रापयति।

एवं प्राप्ते उच्यते, एकस्मिन् कर्मणि अत्र सौर्ये विकल्पः। कुतः?। अविभागो हि चोदनैकत्वात्, एकैषा चोदना, सौर्यं चरुम् निर्वपेत् ब्रह्मवर्चसकामः इति, तत्र अविभागो भवतु उभावपि अभिमर्शनौ प्राप्नुतः, तयोरेकार्थत्वात् समुच्चयो न संभवति, तस्मात् विकल्पः। यत्तु, प्रकृतौ व्यवस्था इति। न असौ कालकृता, किं तर्हि समुदायकृता, न च, सौर्ये तौ समुदायौ स्तः।

यद्येवम् अभिमर्शनमेव तर्हि न प्राप्नोति, तयोः

समुदाययोरभावात् इति। अत्र उच्यते, न प्राप्नोति, यदि समुदाययोः अभिमर्शनम् उच्येत, तयोरनभिसृष्टत्वात्, समुदायिनां तदुच्यते लक्षणया, समुदायिविकारश्च सौर्य्यः। तस्मात् तत्रापि चोदकः प्रापयति तत्। (८।१।२५ अ०)।

—:०:—

सौर्य्ये चरावाग्नेयधर्मातिदेशाधिकरणम्।

लिङ्गसाधारण्यादिकल्पः स्यात् ॥ २७ ॥ (पू०)

सौर्य्यं कर्मणि दार्शपौर्णमासिको विधयन्तः इत्युक्तम्, दृष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः (८।१।११ सू०) इति, सन्ति तु तत्र कर्माणि आग्नेयादीनि। तत्र विचारः, किं यस्य कस्यचित् दार्शपौर्णमासिकस्य कर्मणः सौर्य्यं विधयन्तः, उत आग्नेयस्य? इति। किं प्राप्तम्? विकल्पः। कुतः?। लिङ्गसाधारण्यात्, सौर्य्यं दार्शपौर्णमासिकविधयन्तप्राप्तौ यल्लिङ्गम् उपदिष्टं, प्रयाजे-प्रयाजे क्रव्णलं जुहोति इति, तत् साधारणं सर्वेषां विधयन्तौ सम्भवति। न च समुच्चयः, तस्मात् विकल्पः।

ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वात् विकारो हि ॥ २८ ॥ (सि०)

आग्नेयस्य विधयन्तो नियम्येत। कुतः?। ऐकार्थ्यात्, एकदेवतत्वात् इत्यर्थः, आग्नेय एकदेवत्यः, सौर्य्योऽपि। तेनैकदेवतत्वेन लिङ्गेन आग्नेयविधयन्तो नियम्येत, पूर्ववत्त्वात्, पूर्ववानयं सौर्य्यः, पूर्वञ्च अभिहितं विधयन्तम् अपेक्षते, विकारो हि, विकृतिः एषा, सर्वाश्च विकृतयः

द्रव्यस्य उत्पत्तेः, स च हविःषु उपाख्यायते, उपलभ्यते इत्यर्थः। हविः त्रुट्यमानं दृश्यते। किमतः ?। अतो हविः कर्मणः प्रत्यासन्नं, प्रत्यासत्तिश्च लिङ्गम्। ननु देवतापि यागेन सम्बद्धा, न तया विना, यागो भवति। उच्यते, सत्यं सम्बद्धा, आरादुपकारिणी तु सा, नासौ त्यज्यते, तस्मात् बहिरङ्गम्। अतो हविःसामान्यं बलीयः।

तेन च कर्मसंयोगात् ॥ ३३ ॥ (यु०)

तेन च हविषा संयुज्य कर्म चोद्यते, ऐन्द्रम्, आग्नेयम् इति हविःप्रधानः शब्दः। किमतः ?। अतो हविरत्र बुद्धौ सन्निहितं, तल्लिङ्गं भवति। यथा धूमो बुद्धिविषयतामापन्नोऽग्नेर्लिङ्गं, न विद्यमानः।

ननु देवताऽपि अत्र श्रूयते, ऐन्द्रम्, आग्नेयम् इति। उच्यते,

गुणत्वेन देवताश्रुतिः ॥ ३४ ॥ (आ० नि०)

विशेषणत्वेन देवता श्रूयते, हविर्विशेष्यत्वेन, विशेष्यं च बुद्धौ सन्निहितं भवति, न विशेषणं, तद्विशेष्यं विशेषं निवर्त्तते। कथं ज्ञायते ?। विशेष्यानुबन्धसंयोगात्, यथा, राजपुरुषः पूज्यः इत्युक्ते पुरुषः पूज्यो गम्यते, न राजा। एवम् इहापि ऐन्द्रं पयः इत्युक्ते हविः बुद्धौ सन्निधीयते, न देवता। यच्च बुद्धौ सन्निहितं, तल्लिङ्गम् इत्युक्तम्। तस्मात् हविःसामान्यं बलीयः। अतः ऐन्द्रे पुरोडाशे आग्नेयस्य विधन्तः, आग्नेये च पयसि सावित्र्यस्य इति।

गुणत्वेन देवताश्रुतिः इत्येतस्य सूत्रस्य अपरा

व्याख्या। इदं पदीत्तरं सूत्रम्। यदुक्तं हविःसामान्यं बलीयः इति, नैतत् युक्तं, देवतासामान्यं बलीयः इति। कुतः ?। सर्वोऽयं प्रयासो देवताराधनार्थं एव, साऽस्य प्रसन्ना फलं ददाति। एवं श्रूयते, तस्य एवैनम् इन्द्रः प्रजया पशुभिस्तर्पयति इति, यश्चेन्द्रस्य प्रसादनोपायः इति ज्ञातः, पुनरपि इन्द्रे प्रसादयितव्ये स एवाखेयो भवति, तस्मात् देवतासामान्यं बलीयः इति।

अत्र ब्रूमः, स्यात् एतदेवं, यदि देवतातः फलं स्यात्, यागात्तु फलं, स्वर्गकामो यजेत इति श्रूयते। यत्तु, तस्य एवैनम् इन्द्रः इति, तत्र इदम् उच्यते, गुणत्वेन देवता-श्रुतिः, यागे गुणभूता देवता, तस्या दाढर्त्यं स्तुत्या उच्यते, यथा, अमात्येन मे ग्रामो दत्तः, सेनापतिना मे ग्रामो दत्तः इति, न च अमात्यः सेनापतिर्वा ग्रामस्य प्रभवति, राजैव प्रभवति, इतरस्मिन् गुणभूते स्तुत्या दार्ढर्त्यवादः। तस्मात् यथोक्तेनैव न्यायेन हविःसामान्यमेव बलीयः इति। (८। १। १७ अ०)।

शतक्रष्णलाख्यहिरण्ये घीषधर्म्मातिदेशाधिकरणम्।

हिरण्यमाज्यधर्मं तेजस्त्वात् ॥ ३५ ॥ (पू०)

प्राजापत्यं घृते चरुम् निर्वपेत्, शतकृष्णलमायुःकामः इति श्रूयते। तत् हिरण्यमाज्यधर्मं स्यात्, उपांशुयाज-विधन्तः तत्र भवेत्। कुतः ?। तेजस्त्वसामान्यात्, तेजस्त्वं सामान्यं, हिरण्यम् अग्नेर्वा तेजः, आज्यमपि गवां सारः

दत्वर्थः। अथ वा हिरण्यमपि तेजस्वित्वात् उज्ज्वलम्, आज्यमपि स्निग्धत्वात् उज्ज्वलमेव। तस्मात् सामान्यात् उपांशुयाजधर्मा अतन्त्रत्वादयः।

धर्मानुग्रहाच्च ॥ ३६ ॥ (यु०)

हिरण्ये च बहवः, आज्यधर्माः अनुगृह्यन्ते अवेक्षणादयः, औषधधर्मास्तु हीयेरन् अवहन्त्यादयः। तस्मात् अपि आज्यधर्माः।

औषधं वा विशदत्वात् ॥ ३७ ॥ (सि०)

अथ वा औषधस्य हिरण्ये विधानतः। कुतः ? । विशदत्वात् हिरण्यमपि विशदम्, औषधमपि विशदम्। कः पुनरनयोः सामान्ययोर्विशेषः ?। न खलु क्वचित्, किन्तु विशदत्वस्य कारणद्वयम् उपोद्बलकं, तेजस्वितायास्तदधर्मानुग्रह एकः।

चरुशब्दाच्च ॥ ३८ ॥ (यु० १)

चरुशब्दस्य अत्र भवति, प्रजापत्यं चरुम् इति। चरुशब्दस्य औषधस्य वक्ता, तत् बलवत् औषधस्य लिङ्गम्।

तस्मिंश्च अपणप्रुते ॥ ३९ ॥ (यु० २)

तस्मिंश्च आज्ये अपणं प्रूयते, घृते अपयति इति। किमतः ? । अत एतद्भवति, औषधविधानेन अपणं प्राप्यते। तत्र केवलम् आज्यं विधायिष्यते, आज्यविधाने तु अपणम् आज्यं च विधीयेयातां, तथा वाक्यशिष्येत।

तस्मिंश्च अपणप्रुतेः इत्येतस्य अपरा व्याख्या। अत्र

आज्यं साचादेवेहाज्यं श्रूयते, तस्मात् तस्य विध्यन्तः इति। ततः उत्तरम् इदं, तस्मिंश्च अपचश्रुतेः, दार्शपौर्णमासिकं अपूर्णं तस्मिंश्च आज्ये श्रूयते, गुणगतं तत्सामान्यं, हविर्गतं तु वैगुण्यं, चरुशब्दश्च। तस्मात् ते बलवती। (८। १। १८ अ०।

मधूदके उपांशुयाजीयाज्यधर्म्मातिदेशाधिकरणम्।

मधूदके द्रवसामान्यात्पयोविकारः स्यात् ॥४०॥ (पू०)

चित्रायाम् इष्टौ श्रूयते, दधि मधु घृतं धाना उदकं तण्डुलाः, तत्संसृष्टं प्राजापत्यं भवति इति। तत्र, मधूदके पयोविकारः स्यात्। कुतः?। द्रवसामान्यात्, द्रवे च मधूदके पयोऽपि द्रवम्।

आज्यं वा वर्णसामान्यात् ॥ ४१ ॥ (सि०)

आज्यं वा इमे विकुर्व्याताम्, उपांशुयाजस्य तयोर्विध्यन्तः स्यात्। कुतः?। वर्णसामान्यात्, समानवर्णं मधूदके आज्येन।

धर्मानुग्रहाच्च ॥ ४२ ॥ (यु०)

आज्यधर्म्माश्च बहवः मधूदकयोः शक्याः कर्त्तुम् इत्यवनादयः, न तु पयोधर्म्मा दोहनादयः।

हविषा वा नियम्येत तद्विकारत्वात् ॥५॥ (सि०)

हविःसामान्येन वा, अत्र दार्शपौर्णमासिको विध्यन्तो नियम्येत। कुतः ?। तद्विकारत्वात्, दार्शपौर्णमासिकस्य हविषो विकारः सुरा वाजिने, औषधविकृतिः सुरा, मात्रार्थ्यविकृतं वाजिनम्।

प्रशंसा सोमशब्दः ॥ ६ ॥ (पू० यु० नि०)

अथ यदुक्तं, ताच्छब्द्यात् इति। तत्र ब्रूमः,प्रशंसार्थोऽयं सोमशब्दः, न विध्यर्थः, विधायकस्य अभावात्, सोमो वै वाजिनं, सुरा सोमः इति प्रकृष्टफलवत्त्वात् सोमस्य, तद्भावेन सुरा-वाजिनयोः प्रशंसा, यथा, सिंहो देवदत्तः इति पुरुषस्य। तस्मात् नायं नाम्ना धर्मातिदेशः।

वचनानीतराणि ॥ ७ ॥ (पू० लि० नि०)

इतराणि तु सोमक्रयादीनि वाचनिकानि, प्राप्तेरभावात्। अगत्या च वाक्यानाम् अनेकार्थता, सगुणकर्मविधानेन।

व्यपदेशश्च तद्वत् ॥ ८ ॥ (यु०)

शब्दैरेव दीक्षणीयामाप्नोति, तोक्मभिः प्रायणीयां, सिंहलोमभिरातिथ्याम् इति, सोमविकारत्वे प्रत्यक्षमेव दीक्षणीयादीनि प्राप्नुयुः। प्राप्तानाम् शब्दादिभिस्तदाम्नानं नोपपद्यते।

पशुपुरोडाशस्य च लिङ्गदर्शनम् ॥ ९ ॥ (लि०)

पशुपुरोडाशता च ग्रहाणां श्रूयते, नैतेषां पशूनां

पुरोडाशा विद्यन्ते, यद्दपुरोडाशा वेति पशवः इति। तत्र तावत् अत्र यद्दाः पुरोडाशाः, यद्दा एव ते, यदि तु पुरोडाशधर्मकाः, तत एतदुपपद्यते। तस्मात् पौरोडाशिकेषु विध्यन्तः। (८।२।१ अ०)।

पशौ सान्नाय्यधर्मातिदेशाधिकरणम्।

पशुः पुरोडाशविकारः स्याद्देवतासामान्यात् ॥ १० ॥ (पू०)

अस्ति ज्योतिष्टोमे पशुः अग्नीषोमीयः, यो दीक्षितो, यत् अग्नीषोमीयं पशुमालभते इति। तत्र सन्देहः, किं पशुः पुरोडाशविकारः, उत सान्नाय्यविकारः? इति। किं प्राप्तम्? पशुः पुरोडाशविकारः स्यात्। कुतः?। देवतासामान्यात्, अग्नीषोमीयः पशुः, पुरोडाशोऽपि तद्देवत्य एव।

प्रोक्षणाच्च ॥ ११ ॥ (है० १)

प्रोक्षणं पुरोडाशधर्मः पशौ दर्शयति, अग्नीषोमीभ्यो जुष्टं प्रोक्षामि इति पशुं प्रोक्षति इति।

पर्य्यग्निकरणाच्च ॥ १२ ॥ (है० २)

पर्य्यग्निकरणम् अपि पुरोडाशधर्मः, तदपि पशौ दृश्यते आहवनीयात् उल्मुकेन पशुं पर्य्यग्निकरोति इति। तस्मात् पुरोडाशविकारः।

सान्नाय्यं वा तत्प्रभवत्वात् ॥ १३ ॥ (सि०)

सान्नाय्यं वा पशुर्विकुर्य्यात्, न पुरोडाशम्। कुतः ?। तत्प्रभवत्वात्, पशुतः सान्नाय्यं प्रभवति, पशव्य। ततु मिथः-प्रत्यासन्नं, प्रत्यासत्तिश्च लिङ्गं, इविःसामान्यं च देवता-सामान्यात् बलीयः इत्युक्तम्। (८। १। १७ अ०)।

तस्य च पात्रदर्शनात् ॥ १४ ॥ (पु०)

तस्य च सान्नाय्यस्य यत् पात्रम् उखा, सा पयसि दृश्यते, यदि पशुरुखायां पचेत् इति। (८। २। २। अ०)।

पशौ पयोधर्म्मातिदेशाधिकरणम्।

दध्नः स्यान्मूर्त्तिसामान्यात् ॥ १५ ॥ (पू०)

सान्नाय्यविकारोऽपि दध्नः विकारः स्यात् पशुः, न पयसः। कुतः ?। मूर्त्तिसामान्यात्, घनत्वं मूर्त्तिः।

पयो वा कालसामान्यात् ॥ १६ ॥ (सि०)

पयो वा पशुर्विकुर्य्यात्, न दधि। सद्यःकालः पशुः, पयोऽपि सद्यःकालम्। दधि तु द्व्यहकालं, पयोऽन्तरितं, तद्व्यहिरङ्गम्।

पश्वानन्तर्य्यात् ॥ १७ ॥ (पु० १)

पयोऽपि पयः अनन्तरं, तत्प्रत्यासन्नं, न दधि।

द्रवत्वं चाविशिष्टम् ॥ १८ ॥ (यु० २)

द्रवत्वं पशुपयसोः समानं, पशुरपि द्रवति, पयोऽपि। तस्मात् पयोविकारः पशुः। (८। २। ३ अ०)।

आमिक्षायां पयोधर्मातिदेशाधिकरणम्।

आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥२९॥ (१म पू०)

वैश्वदेवी आमिक्षा उभयोः दधिपयसोर्विकारः स्यात्, उभयभाव्यत्वात्, उभाभ्यां हि सा भाव्यते, तत्र न युज्यते, विशेषोऽस्येव, न इतरस्य इति। तस्मात् उभयोः।

एकं वा चोदनैकत्वात् ॥ २० ॥ (सि०)

एकं वा विकुर्य्यात् दधि पयो वा, नोभे, चोदनैकत्वात्, एकैषा चोदना, वैश्वदेव्यामिक्षा इति, सा एकेन विध्यन्तेन निराकाङ्क्षीक्रियते। तस्मात् एकं विकुर्य्यात्।

यत्तु, न युज्यते विशेषः इति। तत्र उच्यते,

दधिसङ्घातसामान्यात् ॥ २१ ॥ (२य पू०)

संहतं दधि, आमिक्षाऽपि संहता, पयो द्रवम्। एष विशेषः। तस्मात् दध्नो विकारः इति।

पयो वा तत्प्रधानत्वाल्लोकवत् दध्नस्तदर्थत्वात् ॥२२॥ (सि०)

पयो वा आमिक्षया विक्रियते, न दधि, पयःप्रधान-

त्वात्, अस्य च संसर्गस्य। किं प्राधान्यम् पयसः ?। भूयस्त्वं, प्रभूतं तत्र पयः, अल्पं दधि। दध्नः च तदर्थत्वात्, दधि च तत्र पयो घनीभावयितुम् उपादीयते। लोकवत्, लोकेऽपि-पय एव घनीभावयितुम् दधि उपादीयते। कथम् ?। दध्य-भावे अन्येन अम्लेनापि काञ्जिकादिना क्रियते, तत्रापि च आमिक्षाशब्दो भवति, दधिनियमः अम्ले हि अदृष्टार्थः। तस्मात् पयः एव अम्लसंयोगेन घनीभूतम् आमिक्षा इत्युच्यते। पयसेत् आमिक्षा, पयस एव विकारो न्याय्यः।

धर्मानुग्रहाच्च ॥२३॥ (यु०) ॥

सद्यःकालता धर्मः पयोविकारत्वेन अनुगृह्यते, वैश्वदेवस्य सद्यःकालत्वात्, दधिविकारत्वे बाध्येत। वैश्व-देवोऽपि द्राघकालः क्रियेत। तथा तस्य धर्मो बाध्येत, सद्योभावं च दर्शयति, जुषन्तं युज्यं पयः इति, यदि दध्ना विकारः स्यात्, तथा द्राघकालभावे दातव्यं, न कथञ्चन पयः स्यात्। तत्र एतद्दर्शनं नोपपद्यते। तस्मात् पयोविका-रस्य आमिक्षा, दध्नश्च अधर्मकत्वम्। (८।२।४अ०)।

द्वादशाहे सवाहीनयोर्व्यवस्थया धर्मातिदेशाधिकरणम्।

सत्रमहीनस्य द्वादशाहस्योभयथा प्रवृत्तिरैक-कर्म्यात् ॥ २४ ॥ (पू०) ॥

द्वादशाहोऽहर्गणः, प्रायणीयोऽतिरात्रः, पृष्ठ्यः षड़हः, अयञ्चस्तोमा अविवाक्यम् अहः, उदयनीयोऽतिरात्रः इति, स उभयसंज्ञकः, सत्रमहीनश्च। कथं ज्ञायते ?। अभियुक्ता-

नाम् उपदेशात्, एवं हि उपदिशन्ति, सत्रमहीनश्च द्वादशाहः इति, शब्दार्थाधिगमे च अभियुक्तोपदेशः प्रमाणम्। संज्ञाव्यवस्थया च तस्य धर्माः आम्नाताः, एको•हो बहवोऽपि वा,अहीनेन यजेरन्, तान् दीक्षिता याजयेयुः, गृहपतिसप्तदशाः स्वयमुत्विजो ब्राह्मणाः सत्रम् उपेयुः इत्येवमादयः। धर्मभेदाच्च संज्ञाव्यवस्था, यथा, ब्राह्मणः, परिव्राट्, वानप्रस्थः इति, तत् दशमेऽध्याये (६ पा०) वक्ष्यते द्वादशाहस्य सत्रत्वमामनोपायिचोदने यजमानबहुत्वे सत्रशब्दाभिसंयोगात् (५० ॥) यजतिचोदनात् अहीनत्वं, स्वामिनां च अस्थितपरिमाणत्वात्। (५१ ॥) इति, सहिरावादिषु अहर्गणेषु प्रवर्त्तते इत्युक्तम्,गणेषु द्वादशाहस्य (८।१।१७सू०)इति। तत्र सन्दिह्यते, किम् उभयप्रकारोऽसौ विकृतौ प्रवर्त्तते, उत व्यवस्थया, क्वचित् अहीनभूतः, क्वचित् सत्रभूतः? इति। किं प्राप्तम्? तस्य उभयथा प्रवृत्तिः स्यात्, एककर्म्यात्, उभयविधस्तत्र प्रवर्त्तेत। कुतः?। ऐककर्म्यात्, एकम् इदं कर्म्म उभयविधम् इत्युक्तम्, न तस्य प्रवृत्तौ विशेषो गृह्यते,इह एवंविधः, इह न इति। तस्मात् उभयविधः प्रवर्त्तेत। ननु एका चेद्विधा प्रवृत्ता, द्वितीयया कार्य्यं नास्ति। ऐककर्म्यात् विकल्पो भविष्यति, यथा आग्नेयविकारेष्वभिमर्शनस्य।

अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात्, प्रकृत्या तुल्यशब्दत्वात् ॥ २५ ॥ (मि०) ॥

अपि वा नैतदेवं, सर्वत्र उभयथा प्रवृत्तिः इति, यत्र

यदन्यतरतोऽतिरात्रः, तेन अहीनः इति। तस्मादपि अहीनः इति।

सत्रे वोपायिचोदनात् ॥ ३१ ॥ (सि०)

सत्रे वा एते, न अहीनौ। कुतः ?। उपायिचोदनात्, ये एव भूतिकार्थमिच्छन्तः, ते एनं पञ्चदशरात्रम् उपेयुः, कुण्डपायिनामयनेऽपि, भूतिकामा उपेयुः इति। कः पुनरेतयोर्लिङ्गयोर्विशेषः ?। चोदनागतमेकं, वाक्यान्तरगतम् अन्यच्च। चोदनागतं, यत् तदन्तरङ्गं भवति, बहिरङ्गम् इतरत्। अयम् च अपरो विशेषः, अहीनलिङ्गेन च नित्येन अहीनस्य संस्तुतिर्नोपपद्यते, उपपत्त्या एतत् अहीनत्वम् उच्यते, यत् अन्यतरतोऽतिरात्रः, तेन अहीनः इति। सा यदि तावत् उपपत्तिः साधिका, ततोऽन्तरेणापि वचनं, सिद्धम् अहीनत्वम्। अथ न साधिका, उच्यमानपि न सिध्यति। तस्मात् न एतत् वचनं, किन्तर्हि अनुवादोऽयं स्तुत्यर्थः। स्तुतिश्च, नित्येन अहीनलिङ्गेन अन्यतरतोऽतिरात्रत्वेन अहीनस्य नोपपद्यते, यत्कारणं, सर्व एव अहीनः अन्यतरतोऽतिरात्रः। सत्रस्य तु उपपद्यते येन तावत् अयम् अन्यतरतोऽतिरात्रः, तेन अहीनः, आत्मना च सत्रम्, अत उभयात्मा विशिष्टोऽयम् अन्येभ्यः सत्रेभ्यः इति।

सत्रलिङ्गञ्च दर्शयति ॥ ३२ ॥ (यु०)

सत्रलिङ्गं च कुण्डपायिनामयने दर्शयति, गृहपतिर्गृहपतिः सुब्रह्मण्यः सुब्रह्मण्यः इति, गृहपतिर्हि सत्रे आम्नातः,

गृहपतिसमदग्याः सचम् उपेयुः इति । सचे च तेनार्थः क्रत्वर्थान् याजमानान् कर्तुम्, अन्येषां यजमानानाम् व्याहतत्वात् । तस्मात् सचे एवैते इति । (८ । २ ।६ अ०)।

इति श्रीमदृग्वरस्वामिनः कृतौ मीमांसाभाष्ये अष्टमस्याध्यायस्य द्वितीयः पादः ।

अष्टमस्य अध्यायस्य तृतीयः पादः ।

—:०:—

शुचिर्देवते आग्नेयस्याग्नावैष्णवे च आग्नीषोमीयस्य धर्मातिदेशाधिकरणम् ।

हविर्गणे परमुत्तरस्य देशसामान्यात् ॥१॥ (पू०)

इह हविर्गणो उदाहरणम्, आग्नावैष्णवम् एकादशकपालं निर्वपेत्, सारस्वतं चरुम्, बार्हस्पत्यं चरुम्, अग्नये पावकाय अग्नये शुचये इत्येवमादयः । तत्र चिन्त्यते, किं शुचिर्देवतस्य अग्नीषोमीयविधयन्तः, आग्नावैष्णवस्यापि आग्नेयविधयन्तः, उत विपर्ययः ? इति । किं प्राप्तम् ? हविर्गणे परम् शुचिर्देवतं, उत्तरस्य अग्नीषोमीयस्य विकारः, पूर्वमपि आग्नावैष्णवं, पूर्वस्य आग्नेयस्य विकारः । कुतः ? । देशसामान्यात्, क्रमसामान्यात् इत्यर्थः । इह शुचिर्देवतो द्वितीयः, प्रकृतावपि अग्नीषोमीयो द्वितीयः, इतरत्रापि आग्नावैष्णवः प्रथमः, प्रकृ-

असौ। तस्मात् द्वादशाहिकानाम् षोडकग्रासानाम् अङ्गां चिन्तना विधीयते। एवं नव त्रिंशन्ति अहानि भवन्ति इति। (८।३।२ अ०)।

षटत्रिंशद्रात्रे षड्हधर्मातिदेशाधिकरणम्।

कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥ ६ ॥(पू०)

क्वचित् कर्मविशेषे श्रूयते, षड्हा भवन्ति चत्वारो भवन्ति, पञ्चहा भवन्ति। तत्र सन्देहः, किं द्वादशाहिकानाम् अङ्गां प्रवृत्तिः, उत षड्हस्य ? इति। किं प्राप्तम् ? कालाभ्यासेऽपि बादरिः, षड्हकालाभ्यासेऽप्येतस्मिन् श्रूयमाणे बादरिः आचार्यो द्वादशाहिकानाम् अङ्गां प्रवृत्तिं मन्यते स्म। कुतः ?। कर्मभेदात्, षड्हशब्देन अत्र अहर्मितानि षट्सौत्यानि कर्माणि उच्यन्ते, तेषां च षट्कानां भेदो गम्यते, चत्वारः षड्हाः इति, पृथक्त्वनिवेशात् सङ्ख्यायाः। यदि एकस्येव कर्मषट्कस्य पाष्ठिकस्याभिप्लविकस्य वा अभ्यासः कल्प्येत, ततः, चतुःषड्हाः इति स्यात्। अथ पुनः चत्वारः षड्हाः इत्युक्ते चतुर्विंशत्यहानि प्रतीयन्ते, सा अहःसङ्घातचोदना प्रकृतिलिङ्गत्वात् द्वादशाहिकीम् अहःप्रवृत्तिं रुणद्धि। तस्मात् नानाङ्गां द्वादशाहिकानां प्रवृत्तिः।

तदावृत्तिं तु जैमिनिरङ्गामप्रत्यक्षसङ्ख्यात्वात् ॥ ७ ॥ (सि०)

तदावृत्तिं, पाष्ठिकस्य एव प्रज्ञातस्य षड्हस्य आवृत्तिं

जैमिनिः आचार्यो मेने। कुतः?। अङ्गाम् अप्रत्यक्षसङ्ख्यात्वात्। चतुर्विंशतिः अङ्गाम् अप्रत्यक्षा सङ्ख्या अनुमानात् गम्यते, तस्याश्च षड्हचतुष्टयेनैव अनुमानं, तेन पूर्वं तावत् षड्हचतुष्टयमेव प्रत्येति, तत् समाहृत्य चतुर्विंशतिसङ्ख्यां, यथा, पूर्वं धूमं प्रतिपद्यते, पश्चात् अग्निम्, यश्च धूमप्रत्ययेनैव कृतार्थो भवति न असौ अग्निप्रत्ययमाद्रियते। इहापि षड्हप्रत्ययात् एव तत्प्रवृत्तिः प्रसज्यते, तया च कृतार्थः किं चतुर्विंशतिसङ्ख्यया प्रतीतया करिष्यति?। तस्मात् षड्हाभ्यासः।

अथ यदुक्तं, पृथक्कनिवेशिनी सङ्ख्या आहुत्तौ बाध्येत इति। तत्र ब्रूमः षड्हः इति प्रज्ञातः षड्हः सन्निहितो गृह्यते, तस्य चतुःसङ्ख्यासम्बन्धः साक्षान्नास्ति इत्याहुत्या भविष्यति, यथा, उपसदां प्रयाजानुयाजानां च। यस्यापि चतुर्विंशतिरात्रः चत्वारः षड्हाः इत्येवं चोद्यते, तस्यापि दशरात्रे प्रवर्त्तमाने आहुत्येव सङ्ख्यापूरणं, भिन्नानां षड्हानामभावात्। यश्च उभयोर्दोषो न असौ एकं पक्षं निवर्त्तयति। (८।३।२। अ०)।

संख्यागणेषु द्वादशाहिकधर्मातिदेशाधिकरणम्।

संख्यागणेषु तदभ्यासः प्रतीयेत कृतलक्षणाग्रहणात् ॥ ८ ॥ (पू०)

इह संख्यागणा उदाहरणम्, अग्निष्टोमः पञ्चोक्थ्यः,

शताग्निष्टोमं भवति, शतातिरात्रं भवति इत्येवमादयः। अत्र चिन्त्यते, किं ज्योतिष्टोमस्य अयम् अभ्यासः, उत एवंसङ्ख्यानां संख्याविशिष्टानाम् अङ्गां वादः? इति। किं प्राप्तम्? संख्यागणेषु तदभ्यासः प्रतीयेत, तस्य एव प्राकृतस्य ज्योतिष्टोमस्य अयम् अभ्यासः। कुतः?। कृतलक्षणग्रहणात् तस्य एतत् कृतं लक्षणं, अग्निष्टोमः उक्थ्यः षोड़शी अतिरात्रः इति, तत्संयोगेन एताः संख्याः उत्पन्नाः, स ताभिः शक्यते लक्षयितुम्, तञ्च लक्षयित्वा सङ्गां केवलां विधास्यति, नानाङ्गां तु वादे संख्यां सङ्गा च उभयं विधीयते, उक्थ्या संख्या भवन्ति इति, ते च पञ्च भवन्ति इति, तथा वाक्यभिष्यते। तस्मात् ज्योतिष्टोमाभ्यासः।

अधिकाराद्वा प्रकृतिस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ ६ ॥ (सि०)

नैतदेवं ज्योतिष्टोमाभ्यासः इति, कथं तर्हि? प्रकृतिः तद्विशिष्टा स्यात्, द्वादशाहिकानि अहानि संख्याविशिष्टानि स्युः। कस्मात्?। अधिकारात्, तानि अत्र चोदकेन अधिकृतानि, एवं चोदकानुग्रहो भविष्यति।

नन्वु प्रत्यक्षविहितो ज्योतिष्टोमोऽग्निष्टोमादिभिः शब्दैः। न इत्याह। कथम्?। अभिधानस्य तन्निमित्तत्वात्, अग्निष्टोमाभिधानं संख्यानिमित्तं, न ज्योतिष्टोमाभिधायकं, तत्संख्यं कर्तुम् वदितुम् शक्नोति न ज्योति-

ष्टोममेव। यत्तु, अनेकार्थम् इति। न अनेकार्थं भविष्यति। गणचोदनया प्राप्तानाम् अङ्गां पञ्चानां संख्यामात्रं विधायिष्यते, शतान्निष्टोमम् इत्यपि समासः उभयविशेषणविशिष्टं गणम् आह, स एक एवार्थः, यथा, लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति, पृथक्त्वनिवेशिनी च एवं सङ्ख्या अनुगृहीता भविष्यति। तस्मात् ह्रादग्राहिकानाम् नानाङ्गां वादः। (८।३।४ अ०)।

शतोक्थादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणम्।

गणादुपचयस्तत्प्रकृतित्वात् ॥ १० ॥ (पू०)

शतोक्थं भवति शतातिरात्रं भवति इति श्रूयते। तत्र ह्रादग्राहिकाणि अहानि प्रवर्त्स्यन्ते, तानि च प्रायेणोक्थसंस्थानि, द्वौ अग्निष्टोमौ शतोक्थं भवति इत्युक्तेः अग्निष्टोमयोः उक्थस्तोत्रोपचयः प्राप्तः। शतातिरात्रं भवति इति सर्वेषु रात्रिपर्य्यायोपचयः। तत्र चिन्त्यते, किं ह्रादग्राहादुपचयः कर्त्तव्यः, उत ज्योतिष्टोमात्? इति। किं प्राप्तम्? गणात् उपचयः। कुतः?। तत्प्रकृतित्वात्, ह्रादग्राहप्रकृतयः एते अहर्गणास्तेषु ह्रादग्राहिको विधयः प्राप्यते, यदि ह्रादग्राहात् उपचयः, एवं चोदकानुग्रहो भविष्यति। तस्मात् गणात् उपचयः।

एकाहाद्वा तेषां समत्वात् स्यात् ॥११॥ (सि०)

एकाहाद्वा ज्योतिष्टोमात् उपचयः, न ह्रादग्राहात्।

कस्मात् ?। तेषां समत्वात्, द्वादशाहिकानाम् अङ्गाम् इतरैर्वैकृतैः समत्वं भवति, तान्यपि अन्यतः संख्याम् आकाङ्क्षन्ति, इमान्यपि। न च, भिक्षुका भिक्षुकात् आकाङ्क्षन्ति, सति अन्यस्मिन् प्रसवसमर्थेऽभिक्षुके ?। किम् एतत् उक्तं भवति ?। द्वादशाहे संख्यास्तोत्रादि अनाम्नातानि इत्यतः यत्र आम्नातानि, ततः आकाङ्क्षन्ति। वैकृतेषु अहःसु तानि न आम्नातानि इति, तस्मात् वैकृतान्यपि अहानि, यत्र विहितानि ततः एव आकाङ्क्षितुमर्हन्ति, ज्योतिष्टोमे च तानि आम्नातानि। तस्मात् ज्योतिष्टोमात् उपचयः। (८। ३। ५ अ०)।

गायत्रमेतदहर्भवति इत्यादावुत्पत्तिगायत्रीणामागमाधिकरणम्।

गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्यधिकारात् सङ्ख्यात्वादग्निष्टोमवदव्यतिरेकात्तदाख्यत्वम् ॥ १२ ॥ (पृ०)

उपचयस्त्रिस्तिः, अपचयः इदानीं चिन्त्यते। इदं श्रूयते, वाजपेयेन इष्ट्वा बृहस्पतिसवेन यजेत इति। तत्र इदं समाम्नातं, गायत्रमेतत् अहर्भवति इति। अत्र विचार्यते, किं प्राकृतीनाम् त्रिष्टुब्जगतीनाम् अक्षरावलोपं कृत्वा गायत्रं तदहः कर्त्तव्यम्, उत उत्पत्तिगायत्रीणाम् द्वादशत्रीण्य आगमं कृत्वा ? इति। अत्र सूत्रेणैव उपक्रमः, गायत्रीषु प्राकृतीनाम् अवच्छेदः, गायत्रीषु श्रूय-

माषासु गायत्रमेतत् अहर्भवति इति, प्राकृतीनाम् त्रिष्टुजगतीनाम् अवच्छेदः अक्षरावलोपः कर्त्तव्यः। कुतः ?। प्रकृत्यधिकारात्, चोदकेन अत्र प्राकृत्यः त्रिष्टुजगत्यः प्राप्ताः अधिकृता विद्यन्ते, यदि अन्यासामृचाम् आगमः क्रियेत, प्राकृतः प्रत्ययो बाध्येत।

ननु प्रत्यक्षश्रुताः गायत्र्याः, ताभिश्चोदकप्राप्ता इतरा बाधितव्याः। न इत्याह। कस्मात् ?। सङ्ख्यात्वात्, अयं गायत्रीशब्दः सङ्ख्यावाचकः। कथं ज्ञायते ?। अव्यतिरेकात् चतुर्विंशतिसङ्ख्याम् एष न व्यभिचरति, न क्वचित् चतुर्विंशतिसङ्ख्यया विना दृष्टः, चतुर्विंशतिसङ्ख्याहीनासु त्रिष्टुजगतीषु न कदाचित् भवति। तस्मात् सङ्ख्याशब्दोऽयं, सङ्ख्याशब्दश्चेत् अक्षरावलोपः कर्त्तव्यः। अग्निष्टोमवत्, यथा, शताग्निष्टोमं भवति इत्युक्ते द्वादशाहिकानाम् अङ्गाम् उक्थ्यावलोपः क्रियते, एवम् इहापि।

तन्नित्यवच्च पृथक्सतीषु तद्वचनम् ॥१३॥ (यु०)

तन्नित्यवत् सङ्ख्यामात्रं ब्रुवन्तं गायत्रीशब्दं मत्वा, पृथक्सतीषु पृथग्भूतासु गायत्रीभ्यः जगतीषु अगायत्रीषु तद्वचनम् भवति गायत्रीवचनं भवति, ये हि ते गायत्र्यो, सा एका जगती इति। यदि सङ्ख्यायां गायत्रीशब्दः, ततो जगत्यां ते चतुर्विंशतिसङ्ख्ये इत्येतद्वचनम् उपपद्यते। अथ ऋचः, ततो ते ऋचौ जगत्यां न स्तः इति, एतद्वचनम् अनुपपन्नं स्यात्। तस्मादपि सङ्ख्यायां गायत्रीशब्दः।

तथा, इदम् अपरं च दर्शनं, तिस्रोऽनुष्टुभश्चतस्रो गायत्रीः करोति इति।

न विंशती दशेति चेत् ॥ १४ ॥ (आ०)

अथ कश्चित् ब्रूयात्, न विंशती दशसङ्ख्याऽस्ति, न संख्या सङ्ख्यान्तरे वर्त्तते, गुणो हि सङ्ख्या, न च, गुणा गुणेषु वर्त्तन्ते। एवम् अष्टाचत्वारिंशत्सङ्ख्यायां चतुर्विंशति-सङ्ख्या नास्ति। तस्मात् सङ्ख्यार्थेऽपि गायत्रीशब्दे एका जगती हे गायत्र्यो इत्येतत् अनुपपन्नमेव। यश्च उभयो-र्दोषो न असौ एकस्य वाचः।

ऐकसङ्ख्यमेव स्यात् ॥ १५ ॥ (आ० नि०)

अत्र उच्यते, न ब्रूमः, सङ्ख्यायां सङ्ख्या वर्त्तते इति, किन्तर्हि, अष्टाचत्वारिंशत्सङ्ख्या-परिच्छिन्नेषु अक्षरेषु अवयवभूते हे चतुर्विंशतिसङ्ख्ये, न तु हे ऋचौ इति। न च, सङ्ख्या सङ्ख्यान्तरं निवर्त्तयति, यदि निवर्त्तयेत्, ऐक-सङ्ख्यमेव स्यात्, यस्य दश गावः, तस्य द्वौ पञ्चकौ गवाम् इत्येतद्वचनं न स्यात्। भवति च तत्। तस्मात् न सङ्ख्या सङ्ख्यान्तरं निवर्त्तयति।

एवं वा, न विंशती दशेति चेत् (१४ सू०), यद्यपि सङ्ख्यायां गायत्रीशब्दः, एवमपि न अक्षरावलोपः कर्त्तव्यः। किंकारणम्?। विंशती दश विद्यन्ते। कियतः?। इदं तावदतः, येन विंशतिः उपात्ता, उपात्ताः तेन दश भवन्ति। एवं येन त्रिष्टुभजगत्यः प्रयुक्ताः, प्रयुक्ताः तेन तदन्तर्गता

गायत्रो भवन्ति। तस्मात् अविकारेण प्रयोगः, एवं चोदकानुग्रहश्च भवति, गायत्रं च छन्दः कृतं भवति। ऐकसङ्ख्यमेव स्यात्, अत्र आह, जगत्यां त्रिष्टुभि च उपात्तायां न गायत्र्याः उपात्ताः भवन्ति। कथम्?। साधनं परिच्छिन्दती सङ्ख्या कर्मणि अङ्गीभवति, न जगत्याः त्रिष्टुभो वा अवयवः साधनं, किन्तर्हि त्रिष्टुब्जगत्यः।

अथ उच्येत, गायत्रमेतत् अहर्भवति इतिवचनात् अवयवः एव अत्र साधनम् इति, तथा सति अक्षरावलोपः एव प्राप्नोति, उत्तरस्य अवयवस्य अनङ्गत्वात्, न च, अनङ्गे अनुपादीयमाने चोदको बाध्यते। तस्मात् यद् उक्तं, यद्यपि सङ्ख्यायां गायत्रीशब्दः, एवमपि अविकारेण प्रयोगः इति। एतत् अयुक्तम्। दर्शयति, न च उत्तरस्यां सङ्ख्यायाम् उपात्तायां पूर्वाः सङ्ख्या उपात्ता भवन्ति इति, यद्यम् एका च दश च शतं च सहस्रं च परार्धं च इति सर्वसङ्ख्या अनुक्रामति, यदि च उत्तरस्यां सङ्ख्यायां उपात्तायां पूर्वाः सङ्ख्या उपात्ताः भवन्ति ऐकसङ्ख्यमेव स्यात्, एकैव अपरार्धसङ्ख्या भवेत्, सा हि सर्वाभ्य उत्तरा। यतस्तु एकाद्या अपि अनुक्रान्ताः, अतो विज्ञायते, न उत्तरस्यां सङ्ख्यायां उपात्तायां पूर्वाः सङ्ख्या उपात्ताः भवन्ति इति।

गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात्॥ १६॥

(सि०)

नैतदेवं, सङ्ख्यायां गायत्रीशब्दः इति कथन्तर्हि?

गुणात् द्रव्यशब्दः स्यात्, चतुर्विंशत्यक्षरयुक्तस्य द्रव्यस्य वाचकः। कस्मात्?। असर्वविषयत्वात्, यदि सङ्ख्याशब्दः स्यात्, सर्वस्मिन् चतुर्विंशतिसङ्ख्यासङ्ख्ये ये वर्त्तेत गोयूथादौ। न च वर्त्तते, तस्मात् न सङ्ख्याशब्दः।

गोत्ववच्च समन्वयः ॥ १७ ॥ (यु० १)

यथा, गौः इति सत्यपि गमननिमित्ते सामान्यद्रव्याभिधाने साक्षाद्गित्वेव समन्वयो नान्यत्र इति तद्वचन एव गोशब्दो विज्ञायते, एवम् अयमपि ऋग्वचनः एव विज्ञातुम् न्याय्यः।

सङ्ख्यायास्तु शब्दवत्त्वात् ॥ १८ ॥ (यु० २)

चतुर्विंशतिसङ्ख्यावाचकः शब्दोऽस्ति, चतुर्विंशतिः इति, न, अस्य अपरेण गायत्रीशब्देन अर्थः, संज्ञाया व्यवहारार्थत्वात्, एकेन व्यवहारसिद्धेः।

इतरस्याश्रुतित्वाच्च ॥ १९ ॥ (यु० ३)

इतरस्य ऋग्द्रव्यस्य अश्रुतित्वात् अशब्दत्वात् इत्यर्थः। तस्यापि व्यवहारार्थेन संज्ञाशब्देन प्रयोजनम्। तच्च अयं गायत्रीशब्दोऽर्थवान् भवति, सङ्ख्यायां निष्प्रयोजनः। तस्मात् अपि ऋच्छब्दो न्याय्यः। अतो गायत्रीणाम् ऋचामागमः कर्त्तव्यः इति।

द्रव्यान्तरे निवेशादुक्थ्यलोपैर्विशिष्टं स्यात् ॥२०॥
(पू० यु० नि० १)

यत् उपवर्णितम्, अग्निष्टोमवत् इति। तत्र ब्रूमः, अग्निष्टोमशब्दस्य द्रव्यान्तरे कञ्चित् निवेशो नास्ति, यथा गायत्रीशब्दः ऋग्द्रव्ये, अयं हि केवलाग्निष्टोमान्ततां ब्रूते, न च, उक्थ्यलोपम् अन्तरेण, द्वादशाहिकानाम् अङ्गाम् अग्निष्टोमान्तता भवति इति अवश्यकार्य उक्थ्यलोपः। अयं पुनः गायत्रीशब्दः ऋग्द्रव्यस्य वाचकः इत्युक्तम्। न च, अक्षरावलोपेन तत् ऋग्द्रव्यं प्राप्यते। तस्मात् विषमोऽयम् उपन्यासः इति।

शास्त्रलक्षणत्वाच्च ॥ २१ ॥ (यु०)

अग्नास्त्रलक्षणानि च उक्थस्तोत्राणि शतान्यग्निष्टोमे, तानि शास्त्रलक्षणया अग्निष्टोमान्ततया बाधन्ते। इह पुनर्विपरीतं, शास्त्रलक्षणा गायत्र्याः, आनुमानिक्यः त्रिष्टुब्जगत्यः, ता न शक्नुवन्ति गायत्रीं बाधितुम्।

उत्पत्तिनामधेयत्वात् भक्त्या पृथक्सतीषु स्यात् ॥
२२ ॥ (पू० यु० नि० २)

अथ यदुक्तं, सङ्ख्यायां गायत्रीशब्दो दृष्टः, ये हि हे गायत्र्यौ, सा एका जगती इति, तस्य कः परिहारः? उच्यते, औत्पत्तिकम् एतत् ऋचो नामधेयम् इत्युक्तम्। अतः

उत्पत्तिनामधेयत्वात् योऽयं जगत्यवयवे चतुर्विंशत्यक्षरे पदसञ्चये प्रयोगः, स भक्त्या विज्ञेयः, न हि, एकस्य शब्दस्य अनेकार्थता सत्यां गतौ न्याय्या। कया पुनर्भक्त्या ? परिमाणसामान्यात्, यत् परिमाणं इयोर्गायत्र्योः, तत् एकस्या जगत्याः। अत एतत् उक्तं, ये हि हे गायत्र्यौः, सा एका जगती इति, यथा, यौ द्वौ कौरवौ स एको वाह्लीकः इति। एतच्च गायत्रीहयप्रशंसार्थं वचनम्। कथम् ? इदं श्रूयते, द्वाभ्यां गायत्रीभ्यां वैश्यस्य इति, तदेतत् अयुक्तम् इव उच्यते, जगत्या वैश्यस्य कार्यं, जागतो हि वैश्यः, तदेतत् द्वाभ्यां गायत्रीभ्यां क्रियते, जगत्येव तत् कृतं भवति, ये हि हे गायत्र्यौ सा एका जगती इति। तस्मात् अहेतुरयं सङ्ख्यार्थत्वे गायत्रीशब्दस्य।

वचनमिति चेत् ॥ २३ ॥ (आ०)

शक्यं तावत् तत्र एतत् वक्तुं, यत्र अनुवादो गायत्रीशब्दः। यत्र तु विधिः, तत्र कथम् ? यथा, तिस्रोऽनुष्टुभः, चतस्रो गायत्रीः करोति ? इति। कः पुनर्विधौ विशेषः ? विधौ शब्दार्थेन व्यवहारो भवति, तिस्रोऽनुष्टुभः चतस्रो गायत्र्यो न शक्याः कर्तुम्, शक्यास्तु चतस्रश्चतुर्विंशतयः। तस्मात् तत्र सङ्ख्यायां गायत्रीशब्दः इति।

अत्र ब्रूमः।

यावदुक्तम् ॥ २४ ॥ (आ० नि०)

इहैव एकत्र सङ्ख्यार्थो न अन्यत्र, क्वचित् दर्शनात्।

आह, यद्येवं न सङ्ख्यावचनः, कथम् इह सङ्ख्यार्थो जातः ? इति। उच्यते, लक्षणयाऽपि विधानं भवति, यथा लोके, अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम् इति, वेदेऽपि, पृष्ठैरुपतिष्ठन्ते इति। न च, तत्र सिंहशब्दः प्रतिकृतिवचनो दृष्टः इति, अन्यत्रापि प्रतिकृतिवचनो विज्ञायते, पृष्ठशब्दो वा मन्त्रवचनः, न च, लक्षणया प्रयोगेऽशब्दार्थः परिच्छिद्यते, यत्कारणं, स्वार्थे एव वर्त्तमानः अर्थान्तरं लक्षयति, स्वार्थं जहत् नैव लक्षयेत्। तस्मात् अयमपि अहेतुः।

अपूर्वे च विकल्पः स्याद्यदि सङ्ख्याविधानम् ॥ २५ ॥ (यु०)

अपूर्वे च दर्शपूर्णमासकर्मणि विकल्पः स्यात्, यदि सङ्ख्यायां गायत्रीशब्दः। तत्र हि श्रूयते, गायत्र्या परिदध्यात् इति। एवं श्रुते आजुहोतायावतुर्विंशत्यक्षरस्य पदसञ्चयस्य च विकल्पः स्यात्। विकल्पे पक्षे आजुहोतायाः बाधः, स च अयुक्तः सत्यां गतौ। तस्मादपि नैतत् सङ्ख्याविधानम्।

ऋग्गुणत्वान्नेति चेत् ॥ २६ ॥ (आ०)

अत्र उच्यते, न प्रकृतौ विकल्पो भविष्यति। कुतः ?। ऋग्गुणत्वात्, ऋग्गुणो हि तत्र प्रयोगोऽङ्गीकृतः, ऋचः तस्य सामिधेन्य आख्याताः, यदि अनृचा परिदधीत, ऋग्गुणत्वं बाध्येत। तस्मात् तत्र आजुहोतयैव परिधास्यति, तथा

सति गायत्रया परिहितं भविष्यति। ऋग्गुणत्वं च उपगृहीतम्।

तथा पूर्ववति स्यात् ॥ २७ ॥ (आ० नि०)

पूर्ववति अपि हविस्यतिसवे तथा स्यात्, यथा, अपूर्वे। अत्रापि ऋग्गुणकः प्रयोगः अङ्गीकृतः चोदकेन, तत्रापि ऋक्षु उपादीयमानासु गायत्रं चैव अहः कृतं भवति। ऋग्गुणकत्वं च न बाधितम्। तस्मात् न अक्षरावलोपः।

गुणावेशश्च सर्वत्र ॥ २८ ॥ (यु०)

तुशब्दस्य स्थाने चशब्दः, दृष्टस्य तुशब्दस्य अर्थे चशब्दः, यथा, किं च इह भवति इति। गुणस्य चतुर्विंशतिसङ्ख्यायाः सर्वत्र आवेशः, कृतस्नायाम् आज्यहोतायां, न अवयवे। अतः तस्याम् उपादीयमानायाम् ऋग्गुणत्वं च उपगृहीतं भवति, सङ्ख्या च। हविस्यतिसवे पुनः याः ऋचः चोदकेन अङ्गीकृताः, तासाम् अवयवे चतुर्विंशतिसङ्ख्या निविष्टा, तस्मिन् उपादीयमाने ऋग्गुणत्वम् अनुपात्तं भवति, प्रकृतिगायत्रीषु तु उपात्तं भवति। तस्मात् न सङ्ख्याभिधाने गायत्रीशब्दे प्रकृतिगायत्रीणाम् आगमः प्राप्नोति।

अपर आह, इदं तावदयं सङ्ख्यावादी प्रष्टव्यः, कस्मात् अक्षरगतायामेव सङ्ख्यायां भवानवस्थितः, न पुनः अन्यसङ्ख्येयगतायामपि, ग्रहगतायां चमसगतायां वा? यावताऽविशेषेण श्रुतं, गायत्रमेतत् अहर्भवति इति। एवं सति सर्वत्र गुणावेशः प्राप्नोति।

निष्पन्नग्रहणात् नेति चेत् ॥ २८ ॥ (आ०)

स चेत् ब्रूयात्,यत्र अयं निष्पन्नः, गायत्रीशब्दः प्रसिद्धः इत्यर्थः। तस्य ग्रहणं न्याय्यम्, अयं च अक्षरगतायामेव सङ्ख्यायां प्रसिद्धो न सर्वत्र। तस्मात् न सर्वसङ्ख्येयगतो गृह्यते इति। स वक्तव्यः,

तथेहापि स्यात् ॥ ३० ॥ (आ० नि०)

यथा अक्षरगतायामेव सङ्ख्यायां दृष्टो न अन्यत्र, एवम् ऋक्षु एव दृष्टो न अन्यस्मिन् चतुर्विंशत्यक्षरे गद्ये वा, यथा च अक्षरेषु एव दृष्टः इति न अनक्षरे विज्ञायते। एवम् ऋक्षु दृष्टः इति नानृक्षु विज्ञातुं न्याय्यः।

अत्र आह, यद्यपि, अयम् ऋक्षु गायत्रीशब्दः एवमपि अक्षरावलोपः कार्यः। किङ्कारणम् ?। प्रकृत्युपबन्धनात् चोदकेन अत्र प्राकृत्यः त्रिष्टुब्जगत्यः प्रापिताः, ता इमा नोज्झिता भविष्यन्ति। गायत्रीशब्दस्य सङ्गासामान्यात् प्रकोति तद्वयवान् वक्तुम्, एवम् उभौ विधी अनुगृहीतौ भविष्यतः प्राकृतो वैकृतश्च इति। अत उत्तरं पठति,

यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छन्दोष्वपि प्रसिद्धः स्यात् ॥ ३१ ॥ (आ० नि०)

यदि अविशये अप्रसयेऽपि गायत्रीषु विहितासु प्रकृत्युपबन्धनात् अगायत्र्यां गायत्रीशब्दः कल्प्यते, अन्येष्वपि

शरमयं बर्हिर्भवति इति कुशेषु शरशब्दः कल्पयितव्यः। कौशमेव बर्हिः कार्यम्। वक्तव्यो वा विशेषः।

दृष्टः प्रयोग इति चेत् ॥ ३२ ॥ (आ०)

अयम् विशेषो दृष्टः, चतुर्विंशतिसङ्ख्यायाम् अक्षरगतायां गायत्रीशब्दस्य प्रयोगः, ये द्वे गायत्री सा एका जगती इति, तेन शक्यते कल्पयितुम्।

तथा शरेष्वपि ॥ ३३ ॥ (आ० नि०)

शरशब्दस्यापि कुशेषु प्रयोगो दृश्यते, शरवणमेव इदं कुशवनम् इति।

भक्ता इति चेत् ॥ ३४ ॥ (आ०)

अत्र उच्यते, स तत्र शरशब्दो भाक्तः प्रयुज्यते, दीर्घत्वात् पृथुपत्रत्वात् सादृश्यवादोऽसौ, शरवणमेव इदं कुशवनम् इति स्वार्थे वर्त्तमानः सादृश्यं गमयति, स्वार्थं जहत् कथं गमयेत्, तस्मात् शरेष्वेव तत्र शरशब्दस्य प्रयोगो न कुशेषु इति।

तथेतरस्मिन् ॥ ३५ ॥ (आ० नि०)

तथा इतरस्मिन् अपि ये द्वे गायत्री सा एका जगती इति भाक्त एव गायत्रीशब्दः इत्युक्तं, सोऽपि स्वार्थे एव वर्त्तमानः तत्सादृश्यं गमयति इति ऋक्ष्वेव प्रयुक्तो न सङ्ख्यायां, तस्मात् न सङ्ख्यायां गायत्रीशब्दः। अतो न अक्षरावलोपः कर्त्तव्यः।

अर्थस्य चासमाप्तत्वात् न तासामेकदेशे स्यात् ॥ ३६ ॥ (यु०)

अपि च त्रिष्टुब्जगतीनाम् एकदेशे वाक्यमपरिसमाप्तं भवति, न च, अपरिसमाप्तेन वाक्येन अर्थः कश्चित् अभिधीयते, अर्थाभिधानार्थश्च मन्त्रप्रयोगः, तच्च मन्त्रप्रयोग एव अनर्थकः स्यात्। तस्मात् न तासां त्रिष्टुब्जगतीनाम् एकदेशे गायत्रीशब्दः स्यात्। तस्मात् उत्पत्तिगायत्रीणामेव दाग्नतयीभ्यः आगमः कर्त्तव्यः इति। (८।३। ६ अ०)।

इति श्रीभट्टशवरस्वामिनः कृतौ मीमांसाभाष्ये अष्टमस्य अध्यायस्य तृतीयः पादः समाप्तः।

अष्टमस्य अध्यायस्य चतुर्थः पादः।

दर्विहोमशब्दस्य कर्मनामधेयताधिकरणम्।

दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ १ ॥

यदेकधा जुहुयात्, दर्विहोमं कुर्य्यात् इति श्रूयते। अस्मिन् दर्विहोमशब्दे भवति संशयः, किं गुणविधिः, उत कर्मनामधेयम्? इति। किं प्राप्तम्? दर्विहोमो यज्ञाभिधानं, कर्मनामधेयम् इत्यर्थः। कुतः?। होमसंयोगात्,

होमशब्दः अत्र श्रूयते, तत्प्रधानश्च अयं समासः, दर्विशब्दः उपसर्जनं, होमश्च कर्म। अथवा जुहुयात् इति कर्म उच्यते, तेन समुचितो यदेकया जुहुयात् इति। तस्मात् कर्मनामधेयं स्थितं तावत्। ततः अर्थान्तरं प्रक्रियते। (८। ४। २ अ०)।

दर्विहोमशब्दस्य लौकिकवैदिकीयकर्मनामधेयताधिकरणम्।

स लौकिकानां स्यात् कर्त्तुस्तदाख्यत्वात् ॥ २ ॥

(पू०)

यदा कर्मनामधेयं, तदा चिन्त्यते, किं लौकिकानां स्मार्त्तानां कर्मणाम् अष्टकादीनां नामधेयं दर्विहोमशब्दः, उत सर्वेषाम् एव लौकिकानाम् वैदिकानाञ्च? इति। किं प्राप्तम्? स लौकिकानां स्यात्, स खलु दर्विहोमशब्दः, लौकिकानां कर्मणां नामधेयं स्यात्। कुतः?। कर्त्तुस्तदाख्यत्वात्, तेषां कर्त्ता, तेन दर्विहोमशब्देन समाख्यायते, धिनीनां दार्विहोमिको ब्राह्मणः, अग्निष्ठानां दार्विहोमिको ब्राह्मणः इति। यश्च यत् करोति स तेन आख्यायते, यथा, लावकः, पावकः इति। यदि च अष्टकादीनां नामधेयम् एतत्, ततस्तेषां कर्मणां कर्त्ता दार्विहोमिकस माख्यामर्हति इति। तस्मात् लौकिकानां नामधेयम्।

सर्वेषां वा दर्शनाद्वासुहोमे ॥ ३ ॥ (सि०)

सर्वेषां लौकिकानां वैदिकानाञ्च नामधेयमेतत्, न लौकिकानामेव । कस्मात् ? । दर्शनात् वासुहोमे, वासुहोमे हि वैदिके दर्विहोमत्वं दर्शयति, यदेकया जुहुयात्, दर्विहोमं कुर्य्यात्, पुरोऽनुवाक्याम् अनूच्य याज्यया जुहोति सदेवतत्वाय इति ।

ननु विपरीतम् एतद्दर्शनं, यदेकया जुहुयात् दर्विहोमं कुर्य्यात्, अदर्विहोमं सन्तम् इत्यापद्यते, यदि दर्विहोम एव असौ, ततः एकया द्वाभ्यां च ह्रियमानो दर्विहोमः एव भवति । तत्र एतद्दर्शनं नोपपद्यते, यदेकया जुहुयात् दर्विहोमं कुर्य्यात् इति ।

अत्र उच्यते, यदि लौकिकानाम् एव नामधेयं, न वैदिकानाम् । ततः एकयापि ह्रियमानोऽसौ नैव दर्विहोमो भवति, अलौकिकत्वात्, तत्र एतद्वचनं नोपपद्यते, यदेकया जुहुयात् दर्विहोमं कुर्य्यात् इति । तस्मात् ज्ञापकमेवेदं, वैदिकानां दर्विहोमत्वे । एवमपि ज्ञापकम् उक्तम्, कुतः प्राप्तिः ? उच्यते, होमशब्दस्य सामान्याभिधायित्वात् प्राप्तिः । तस्मात् लौकिकवैदिकानां नामधेयम् एतत् । (८।४।२ अ०) ।

दर्विहोमशब्दस्य होमनामधेयताधिकरणम्।

जुहोति चोदनानां वा तत्संयोगात् ॥ ४ ॥

लौकिकानां वैदिकानाञ्च नामधेयं दर्विहोमशब्दः इति स्थितम्। इदानीं चिन्त्यते, किं यजतिचोदनानां जुहोतिचोदनानाञ्च सर्वेषां नामधेयम्, उत जुहोतिचोदनानाम्, एव? इति। अविशेषात् सर्वेषां इति प्राप्ते उच्यते, जुहोतीनां नामधेयं, न यजतीनाम्। कुतः?। तत्संयोगात्, होमशब्दसंयोगात्, अयं होमशब्दः जुहोतेर्वाचकः, न यजतेः, यजतौ लक्षणया स्यात्। तस्मात् जुहोतिनामधेयम्। (८।४।३ अ०)।

दर्विहोमशब्दस्य गुणविधिपरत्वनिराकरणाधिकरणम्।

द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥ ५ ॥ (पू०)

स्थितादुत्तरम् उच्यते, यदुक्तं कर्मनामधेयं दर्विहोमः इति। तन्न, किन्तर्हि? गुणाभिधानं स्यात्, गुणविधिः इत्यर्थः। कुतः?। द्रव्योपदेशात्, द्रव्योपदेशोऽवगम्यते, दर्व्या होमो दर्विहोमः इति। एवम् एतौ दर्विहोमशब्दौ यथाप्रसिद्धिकस्थितौ भविष्यतः। तस्मात् गुणविधिः।

न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ॥ ६ ॥ (सि०)

न अयं गुणविधिर्युज्यते। किंकारणम्?। लौकिकानां

तावत् आचारगृहीता दर्विः त्वग्विलया मूलदण्डया दर्व्या जुहोति इति, सा न विधातव्या, श्रौतानामपि अन्यानि होमार्थानि पात्राणि आम्नातानि, स्रुवेण जुहोति, चमसेन जुहोति इति, तैः सह दर्वेर्विकल्पः स्यात्, स च अन्याय्यः, यत्कारणं स्रुवादीनां विधायकः शब्दोऽस्ति, स्रुवेण जुहोति इति, न तु दर्वेः, तत्र हि आनुमानिको विधिशब्दः ।

दर्शनाच्चान्यपात्रस्य ॥ ७ ॥ (यु०)

अन्यच्च पात्रं दर्विहोमे दृश्यते, भूतेभ्यस्त्वेत्यपूर्वां स्रुवमुद्गृह्णाति इति । तस्मात् न गुणविधिः ।

तथाग्निहविषोः ॥ ८ ॥ (आ० नि०)

अथ उच्येत, अग्निहविषोः कार्य्यं दर्विर्भविष्यति, दर्वौ होमो दर्विहोमो दर्वैर्वा होमो दर्विहोमः इति । तत्र ब्रूमः, तथाग्निहविषोः अपि, यथा पात्रकार्य्यं दर्विर्न युज्यते, तथा अग्निहविषोः कार्य्येऽपि, तत्रापि आहवनीय आधारत्वेन विहितः, यत् आहवनीये जुहोति इति, अन्यच्च प्रदेयत्वेन पुरोडाशादि । तस्मात् अग्निहविषोरपि कार्य्यं न दर्वेर्निवेशः ।

उक्तस्यार्थसम्बन्धः ॥ ९ ॥ (यु०)

उक्तं च अस्माभिः अग्नेः कार्य्यं अन्यत् द्रव्यम् असमर्थं, दहनपठन प्रकाशनकर्म अग्नेः, न च, एतत् कार्य्यम्

अन्यत् द्रव्यं शक्नोति कर्तुम् इति। तस्मात् न अग्निकार्य्यं दर्वेः उपदेशः। अतो न गुणविधिः, कर्मनामधेयमेव दर्विहोमशब्दः इति। (८।४।४ अ०)।

दर्विहोमशब्दस्यापूर्वताधिकरणम्।

दर्विहोमशब्दः कर्मनामधेयम्, इत्युक्तं, तत्र चिन्त्यते, किम् अपूर्वाः दर्विहोमाः, उत कृतसिद्धमर्थग्राहिणः? इति। किं प्राप्तम्? न अपूर्वाः इति। कुतः?। इतिकर्त्तव्यताविधेः, अविहितेतिकर्त्तव्यताकं कर्म विहितेतिकर्त्तव्यताकात् धर्मान् गच्छति इत्युक्तं, अविहितेतिकर्त्तव्यताकाश्चामी। तस्मात् पूर्ववत्। इति, यद्येतदेवं, तदा एतत् आपतति, किंपूर्वाः? इति। अत्र उच्यते,

तस्मिन्सोमःप्रवर्त्तेताव्यक्तत्वात् ॥ १० ॥ (पू०)

तस्मिन् खलु दर्विहोमे सोमः प्रवर्त्तेत, सौमिको विध्यन्तः स्यात्। कुतः?। अव्यक्तत्वात्, अव्यक्तचोदनः सोमः अमी अपि च अव्यक्तचोदनाः भिन्ने जुहोति, इति। अतः चोदनासामान्यात् सौमिको विध्यन्तः इति।

न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशात्तत्रे तेन विप्रतिषेधात् ॥ ११ ॥ (सि०)

वाशब्दः पक्षं व्यावर्तयति। न अत्र सौमिको विध्यन्तो न्याय्यः। किंकारणम्?। स्वाहाकारेण संयोगात्, स्वाहा-

कारेण संयुक्ता दर्विहोमाः, पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा इति। किम् अतः ?। वषट्कारस्य निर्देशात्तन्त्वे तेन च विप्रतिषेधः, तन्त्वे च सौमिके वषट्कारो निर्दिष्टः, तेन अस्य विप्रतिषेधः, उभयोः प्रदानार्थत्वात्। यदि सौमिको विध्यन्तः, ततो वषट्कारेण भवितव्यं तत्र एतत् स्वाहाकारान्नानम् अनर्थकं स्यात्। अथ विकल्पः क्रियते, तथापि उभयोः पक्षे बाधः। अथ त्वपूर्वा दर्विहोमाः, नैषो विरोधो भविष्यति। तस्मात् अपूर्वाः।

शब्दान्तरत्वात् ॥ १२ ॥ (है० १)

शब्दान्तरं च यजतिशब्दात् जुहोतिशब्दः, यजतिचोदनया सोमः, दर्विहोमाः पुनर्जुहोतिचोदनाः, चोदनासामान्येन च धर्मप्राप्तिरिष्यते। तस्मादपि अयुक्ता सौमिको धर्मप्राप्तिः। ननु अव्यक्तत्वात् चोदनासामान्यम् उक्तम्। अत्र उच्यते, सामान्येऽव्यक्तत्वे, यजतिशब्दो विशेषलिङ्गं, तेन यजिमतीषु अव्यक्तासु धर्मनियमः, यथा समाने ओषधगुणत्वे देवतैकत्वेन विशेषलिङ्गेन सौर्यकर्मणि आग्नेयविधन्तः इति।

लिङ्गदर्शनाच्च ॥ १३ ॥ (है० २)

लिङ्गदर्शनाच्च एतत् विज्ञायते, न अत्र सौमिको विध्यन्तः इति, औदुम्बरीहोमे हि स्वाहाकारं विधाय आज्यविधिपरे वाक्ये दर्शयति, घृतेन द्यावापृथिवी आपृ-

णेत्यन्तरा कथा जुहोति। आ मूलात् अवस्रावयति। भूमिगते स्वाहा करोति इति। यदि अत्र सौमिको विध्यन्तः स्यात्, वषट्कारस्तदा भवेत्, न स्वाहाकारः।

उत्तरार्थस्तु स्वाहाकारो यथा साम्नदृश्यं तथा-विप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात्पशुवत् ॥ १४ ॥ (आ०)

लिङ्गदर्शनस्य परिहारः उच्यते, यदुक्तं, औदुम्बरीहोमे सिद्धवत् स्वाहाकारस्य दर्शनात् सौमिको विध्यन्तः इति। अत्र ब्रूमः, उत्तरार्थस्तु स्वाहाकारो यथा साम्नदृश्यं, तत् यथा, साम्नदृश्यम् अनारभ्याधीतं सम्नदृश्य साभिधेनीरन्वाह इति, अनारभ्यवादानाम् प्रकृत्यर्थत्वात् दर्श-पूर्णमासावगतम् ततः प्राकरणिकेन पाञ्चदृश्येन बाधितं सत् विकृत्यर्थं जातं, एवम् अयं स्वाहाकारः अनारभ्याधीतः, स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविः प्रदीयते इति, तेनैव न्यायेन प्रकृतिं निविविक्षुः सोमं दर्शपूर्णमासौ च, ततस्तथैव वषट्कारेण उपक्रमः, तद्वर्जम् अन्यानि प्रदानानि उपसंक्रामति। तत्र अविप्रतिषिद्धा सोम धर्मप्रवृत्तिः पशुवत्, तद्यथा, पशौ साम्नदृश्ये श्रूयमाणे न दार्शपौर्ण-मासिकी तत्र प्रवृत्तिर्विप्रतिषिध्यते, वाचनिकत्वात् साम्न-दृश्यस्य, एवम् इहापि वाचनिकत्वात्, स्वाहाकारं प्रति लिङ्गदर्शनात् न सौमिकधर्मप्रवृत्तिर्विप्रतिषिध्यते। पुनः शब्दस्य अनर्थकः, यथा किं पुनरिदम् ? इति।

अनुत्तरार्थो वाऽर्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् ॥ १५ ॥ (आ० नि०)

यदुक्तं, उत्तरार्थः स्वाहाकारः इति, तत्र । कुतः ? । अनुत्तरार्थः अर्थवत्वात्, प्रकृतौ एव अस्यार्थवत्वं, नारिष्टहोमेषु, पार्वणहोमयोश्च पूर्णमासाय सुराधसे स्वाहा इति, अनर्थकत्वात् हि प्राकृतस्य उपरोधः स्यात्, यदि प्राकृतो अनर्थकः स्यात् स्वाहाकारः, ततः प्राकृतस्य वषट्कारस्य विकृतौ प्राप्तस्य अनारभ्यवादेन स्यात् उपरोधः, वषट्कारबाधः इत्यर्थः, न त्वस्य आनर्थक्यम्, तस्मात् न उत्तरार्थः, न चेत् उत्तरार्थः, लिङ्गमेव एतत् भवति असोमपूर्वत्वे दर्विहोमानां, भूमिगते स्वाहा करोति इति ।

न प्रकृतावपीति चेत् ॥ १६ ॥ (आ०)

एवं चेत् पश्यसि, नारिष्टहोमेषु पार्वणहोमयोश्च स्वाहाकारस्य निवेशः इति, प्रकृतौ अपि नारिष्टहोमादौ न अस्य निवेशो घटते, तत्रापि वषट्कार एव प्राप्नोति, न हि अविशेषेण दर्शपूर्णमासयोर्विहितः, हायनो वषट्कार एष वै प्रजापतिः सप्तदशो यज्ञे अन्वायत्तो इति । ननु स्वाहाकारोऽपि प्रत्यक्षं पठितः । सत्यं पठितः, वषट्कारस्तु विहितः, अतस्त्वोदना इति । न अस्य यज्ञो व्यथते प्रजावतो यज्ञेन प्रतितिष्ठति इति स्वाहाकारं पाठेन प्राप्तं बाधते, पाठे हि आनुमानिको विधिः प्रत्यक्षेण विधिना बाध्यते,

न चेत् तत्रापि निवेशः, उत्तरार्थः एव स्वाहाकारो भवति विकृत्यर्थः।

उक्तं समवाये पारदौर्बल्यम् ॥१७॥ (आ० नि०)

अत्र आह, नैतत् युक्तं, वषट्कारेण स्वाहाकारो बाध्यते इति। कुतः ?। यतः उक्तं (३।३।१४ सू०) शुल्वादीनाम् समवाये परस्य दुर्बलत्वं, इह च वाक्यप्रकरणयोः सन्निपातः, प्रकरणेन वषट्कारः प्राप्नोति, नारिष्टहोमेषु तन्मन्त्रपदैरेकवाक्यत्वात् स्वाहाकारः। वाक्यं च प्रकरणाद्बलीयः। ननु स्वाहाकारस्य उपरिष्टात् प्रदानार्थो वषट्कारः प्रयोक्ष्यते। न खलु स्वाहाकारेण एव प्रदानं निर्वर्त्तितम, कथम् अविहितः प्रदानार्थे स्वाहाकारः प्रदानार्थं निर्वर्त्तयिष्यति ? विहितश्च कथम् स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते ? इति।

ननु उभयोः स्वाहाकारवषट्कारयोः प्रकृतावाम्नानात् अनारभ्यवादस्य आनर्थक्यम्। अत उच्यते, प्रदानार्थताम् अनयोर्विधास्यति। तस्मात् न सोमप्रकृतयो दर्विहोमाः।

तच्चोदना वेष्टेः प्रवृत्तिस्त्वादिधिः स्यात् ॥ १८ ॥ (पू० २)

वाशब्दः पक्षान्तरव्यपरिहृत्यै। तच्चोदना वा, तत् इत्यनेन दर्विहोमाः प्रतिनिर्दिश्यन्ते। जुहोतिचोदना ये दर्शपूर्णमासयोः अङ्गकर्मविशेषाः, ते दर्विहोमेषु प्रवर्त्तेरन्। के पुनस्ते ?। नारिष्टहोमाः। कस्मात् कारणात् ?। ते

इ प्रवृत्तधर्माणः, सर्वेष्टिषु सर्वपशुबन्धेषु प्रवर्त्तमाना दृष्टाः, स्य च यो धर्मः प्रायेण दृष्टः, स तस्य अदृश्यमानोऽप्यनुमी-ते, यथा यः परार्थान् प्रायेण करोति, अन्यस्मिन् अपि रार्थकरणे स एव सम्भाव्यते। तस्मात् तेषां प्रवृत्तिः।

शब्दसामर्थ्याच्च ॥ १९ ॥ (है० १)

शब्दसामर्थ्यं च, चोदनासामान्यं दर्विहोमानां, नारिष्ट-ोमेऽपि हि जुहोतिचोदना। नारिष्टान् जुहोति, मित्रे ुहोति इति, चोदनासामान्यात् धर्मप्राप्तिः।

लिङ्गदर्शनाच्च ॥ २० ॥ (है० २)

लिङ्गं चैतम् अर्थं दर्शयति, यथा नारिष्टहोमपूर्वत्वं विहोमानाम् इति। किं लिङ्गं भवति ?। अग्निहोत्रे ूयते, यदि कीटोऽवपद्येतान्तःपरिधि निनयेत् इति, तथा ाग्नौ श्रूयते, अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति इति, रिधयो वेदिश्च अङ्गप्रधानार्थत्वात् नारिष्टहोमाङ्गं, यदि षां धर्माः प्रवर्त्तेरन्, तत एतदर्शनम् उपपद्यते। तस्मात् षां प्रवृत्तिः।

त्वाभावस्य हेतुत्वात्, गुणार्थं स्याददर्शनम् ॥ २१ ॥ (उ०)

यदेतत् गुणार्थं नारिष्टहोमार्थं दर्शनम् उपदिष्टं, ारिष्टहोमानां प्रवृत्ताविति अर्थः, अदर्शनं तत् असाधकम् त्यर्थः। कुतः ?। तत्त्वाभावस्य हेतुत्वात्, त्रास्वकेषु अप्रति-

ष्ठिता वै वाम्बकाः इत्याहुः। नेध्मा बर्हिः संनह्यते न प्रयाजा इज्यन्ते, न अनुयाजा इज्यन्ते, न सामिधेनी अन्वाह इति, अप्रतिष्ठितत्वं वाम्बकाणां प्रतिज्ञाय तदुपादनार्थम् इध्मादीनामभावो हेतुत्वेन उपदिश्यते। यदि च नारिष्टहोमाः प्रवर्त्तेरन्, ततोऽङ्गप्रधानार्थत्वात् इध्मा बर्हिषोः सामिधेनीनां च वाम्बकेषु भावः एव स्यात् तत्र अयं तदभावो असत्वात् हेतुत्वेन न युज्यते। तस्मात् नारिष्टहोमानामप्रवृत्तिः।

विधिरिति चेत् ॥ २२ ॥ (आ०)

इति चेत् पश्यसि, दर्शनमेतत् इति, अथ कस्मात् विधिर्न भवति? नारिष्टहोमप्रकृतित्वात्, प्राप्तानाम् इध्मादीनां प्रतिषेधको विधिः सन् अपूर्वम् अर्थं विधास्यति। अनुवादोऽप्रवृत्तिविशेषकरः अनर्थकः स्यात्, स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति।

न वाक्यशेषत्वात्, गुणार्थे च समाधानं नानात्वेनोपपद्यते ॥ २३ ॥ (आ० नि०)

न अयं विधिर्युज्यते। किंकारणम्?। अन्योऽत्र विधिः आम्नातः, आदित्यं हुते चरुम् निर्वपेत्, पुनरेत्य गृहेषु इति, तस्य वाक्यशेषोऽयम्। कथं ज्ञायते?। तेन आकाङ्क्षितत्वात्। अप्रतिष्ठिता वै वाम्बकाः इति दोषम् अनुकीर्त्य इदं श्रूयते, आदित्यं हुते चरुम् निर्वपेत्

पुनरेत्य गृहेषु इति, इयं वा अदितिः इयं प्रतिष्ठा यत् आदित्योऽस्यामेव प्रतितिष्ठति इति, तदेतत् तस्य दोषस्य परिहारार्थम् इति विज्ञायते। अतः तेन सहैकवाक्यतां याति, तस्मिंश्च ये इध्माद्यभावप्रतिपादनास्तेऽपि तच्छेषा एव समुच्चारणात् न्याद्याः, ते यदि विधयः कल्पेरन् पृथग्वाक्यानि भवेयुः, तत्र एकवाक्यरूपं बाध्येत। व्यवहितकल्पना च स्यात्। न च एषां विधायकत्वम्, अनुवादस्वरूपत्वात्, तस्मात् न विधयः। अथ कोऽत्र विशेषः, यत् समानेलिङ्गत्वे अन्तःपरिधिदर्शनम् असाधकम् इतरत् साधकम्? इति। विशेषम् उपरिष्टात् वक्ष्यामः।

येषां वाऽपरयोर्होमस्तेषां स्यादविरोधात् ॥२४॥

(२य पृ०)

येषां वा यागानाम् अपरयोः, अग्न्योः होमः, तेषां प्रवृत्तिः स्यात्, पत्नीसंयाजानाम् इत्यर्थः। कुतः?। अविरोधात्, तत्र विरोधो नास्ति, यो नारिष्टहोमानां प्रवृत्तौ उक्तः, तत्राभावस्य हेतुत्वात् इति, तेषां हि इध्मा बर्हिः सामिधेन्यश्च नैवाङ्गं, तदभावदर्शनम् तत्र न विरुध्यते। प्रवृत्तिधर्माणस्तेऽपि जुहोति-चोदनाया, सह पत्न्या जुहोति इति। तस्मात् तेषां प्रवृत्तिः।

तदौषधानि चोद्यन्ते, तानि स्थानेन गम्येरन् ॥ २५ ॥ (२ उ०)

नैतत् युक्तम्। किंकारणम्?। यतः, तत्र औष-

धानि चोद्यन्ते दर्विहोमे, यथा आम्रकेषु पुरोडाशः करम्भपात्राणि तण्डुलाः इत्येवमादीनि, तानि स्थानेन गम्येरन् आज्यस्थानापन्ना आज्यधर्म्माः प्राप्नुयुः, ते न शक्याः तत्र अनुष्ठातुम्, अनुष्ठीयमाना वा अकृतकार्य्याः स्युः, तत्र चोदको बाध्येत। तस्मात् न तेषां प्रवृत्तौ किञ्चित् प्रयोजनमस्ति, याज्यानुवाक्ये अपि मन्त्रान्तरेण निवर्त्त्येते, वषट्कारः स्वाहाकारेण।

लिङ्गाद्वा शेषहोमयोः ॥ २६ ॥ (३य पू०)

पिष्टलेप-फल्लीकरणहोमयोः वा प्रवृत्तिः स्यात्। कुतः ?। लिङ्गात्, औषधसामान्यात्, यच्च पत्नीसंयाजानां प्रवृत्तौ दोष उक्तः, धर्म्माणाम् आनर्थक्यं, तत् अत्र नास्ति। तत्र औषधधर्म्मा निर्वपणादयः शक्याः कर्त्तुम्। तस्मात् तयोः प्रवृत्तिः इति।

प्रतिपत्तौ तु ते भवतस्तस्मादतद्विकारत्वम् ॥२७॥

(३ उ०)

न तु एतदेवम्। कुतः ?। यतः प्रतिपत्तिकर्म्माणौ एतौ होमौ, दर्विहोमाश्च प्रधानकर्म्माणि, तेषां दूरतो भेदः, सामान्यतश्च धर्म्मप्राप्तिः इष्यते। यच्च उक्तम्, औषधधर्म्माः शक्याः तत्र कर्त्तुम् इति, प्रतिपत्तित्वात् अप्रयोजकौ एव निर्वपणादीनां धर्म्माणाम्। अतः तत्प्रकृतित्वं तेनैव न्यायेन नोपपन्नं, नापि प्रयोजनवत्,

तस्मात् एतदप्ययुक्तम्। एवं न कुतश्चिदपि दर्विहोमानां धर्मप्राप्तिर्युज्यते। तस्मात् अपूर्वः।

सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्ति-व्यवस्थानादर्थस्यापरिणेयत्वात् वचनादतिदेशः स्यात्॥ २८॥ (आ० नि०)

अथ कस्मात् उभयपक्षसाधनानाम् अपि लिङ्गानाम् भावे अप्रवृत्तिः एव प्रतीयते, न पुनः प्रवृत्तिः? इति। उच्यते, सन्निपाते विरोधिनाम् एतेषां लिङ्गानां प्रवृत्तिः प्रत्येतुम् न न्याय्या। कुतः?। विध्युत्पत्तिव्यवस्थानात्, विधीनाम् उत्पत्तिः पाठः, स च व्यवस्थितः, केचित् दर्शे पूर्णमासयोः पठ्यन्ते, केचित् सोमे, तेषाम् अर्थस्य अपरिणेयत्वं, यत्र पठिताः, ततोऽन्यत्र परिणीयमानेषु प्रकरणं बाध्यते। तस्मात् अप्रवृत्तिः प्रतीयेत।

तत्र आह, किम् एष एव उत्सर्गः सर्वत्र अप्राप्तिः? इति। एवं खलु प्राप्ते उच्यते, वचनादतिदेशः स्यात्, यथा राष्ट्रभृताम् उद्ग्रहकर्मसु। असति एवंविधे वचने ऽपूर्वाः इति। अथ ये लिङ्गे अपदिष्टे, यदि कीटोऽवपद्येत, अन्तःपरिधि निनयेत्, अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति इति, तयोः कः समाधिः?। उच्यते, अन्यायपूर्वत्वात् लक्षणया वादः स विज्ञायते, अन्तःपरिधिदेशे अन्तर्वेदिदेशे इति, परिधीनां वेदेश्च तत्राभावात्, यथा रजनी मे कण्डूयति, तिलको मे स्यन्दते इति, रागा-

भावे तिलकाभावे च तद्देयलक्षणया भवन्ति वक्तारः इति। (८।४।४।अ०)।

इति श्रीभट्टशवरस्वामिनः कृतौ मीमांसाभाष्ये अष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः। समाप्तश्चायमष्टमोऽध्यायः।

नवमस्य अध्यायस्य प्रथमः पादः।

अग्निहोत्रादिषु उक्तानां धर्माणामपूर्वप्रयुक्तत्वाधिकरणम्। (वर्णकालरहस्यसहितम्)

यत्तत्कर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥

अष्टमेऽध्याये विशेषातिदेशलक्षणं दृत्तं, इदानीमूहलक्षणं वर्त्तयिष्यामः। त्रिविधश्च ऊहः, मन्त्र सामः-संस्कारविषयः, स इह प्राधान्येन वर्त्तते, अन्यदपि किञ्चित् उपोद्घातेन प्रसङ्गेन च। आदितस्त्वयम् अर्थविचार्यते लक्षणसिध्यर्थम्। अग्निहोत्रं दर्शपूर्णमासौ ज्योतिष्टोमश्च उदा-

हरणम्। तत्र पृथक् धर्माः समाम्नाताः। तेषु संशयः, किं ते अपूर्वप्रयुक्ताः, उत यजिप्रयुक्ताः? इति। अपूर्वप्रयुक्तेषु सत्सु ऊहः सिद्धति, यजिप्रयुक्तेषु तु सङ्करो धर्माणाम्। कथमिव?। सर्वे हि ते यजयः, यजतिसामान्ये यजतिशब्दवाच्ये धर्मा विधीयमानाः सर्वत्र भवितुमर्हन्ति, अपूर्वप्रयुक्तत्वे तु, तदीयविशेषे विधीयमाना अन्यस्मिन् अपि तदीयविशेषापन्ने भविष्यन्ति। तस्मात् तत्र ऊहः सिद्धो भवति।

ननु एतत् सर्वं सप्तमे (१ अ०) विचारितं, निर्णीतं च। उच्यते, पुनः तदेव स्मार्यते, उत्तरचिन्ताविवक्षया। अथ वा तत्र योऽर्थो न उक्तः, तदिवक्षयेदमुच्यते। कश्चासौ?। तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् इति, एतेन च इह प्रयोजनम् ऊहं विवक्षितः, एवं हि स सिध्यति, तत्र एतत् न उक्तं, नैतेन तत्र प्रयोजनम् इति। तत्रत्या एतावती चिन्ता, किं प्रतिप्रकरणं नियता धर्माः, उत सर्वे सर्वत्र? इति, तत् अपूर्वप्रयुक्तत्वे यजिप्रयुक्तत्वे च सिध्यति, न द्रव्यसंस्कारस्य अपूर्वार्थत्वे, तत्तु इह सिद्धम्, तत्र अपूर्वप्रयुक्तत्वसिद्धौ व्यवहारार्थम् असूत्रितम् उपादीयते। तस्मात् अपुनरुक्तम्।

द्वितीयवर्णकम्।

अथ वा, अन्यामेव चिन्ताम् इह वक्ष्यामः, किं यजिनिमित्ता धर्माः अपूर्वप्रयुक्ताः, उत अपूर्वनिमित्ता अपूर्वप्रयुक्ताश्च? इति। इदानीं तु यजिप्रयुक्ता अपूर्वप्रयुक्ता

वा ? इति चिन्त्यते। किं तावत् प्राप्तम् ? यजिप्रयुक्ताः इति। कुतः ?। यजिशब्देन इतिकर्त्तव्यताया अभिसम्बन्धात्, एवं यागं कुर्य्यात्, एवं यागेन कुर्य्यात्, इति।

एवं प्राप्ते ब्रूमः, यजत्यर्थस्य यत् कार्य्यं, तत् प्रधानं, तद्धि कर्त्तव्यतया चोद्यते। यत्र कर्त्तव्यता, तत्रैवेतिकर्त्तव्यता। अथ यदुक्तं, यजतिशब्देनाभिसंयोगो धर्माणाम् इति, तदुच्यते, तस्य द्रव्येषु यजतौ च, यः संस्कारः, स तत्प्रयुक्ताः अपूर्वप्रयुक्ताः, तदर्थत्वात्, यजतेः, द्रव्याणां च तदीयत्वेन धर्मैरभिसम्बन्धः, न स्वेनात्मना, न हि धात्वर्थस्य च धर्माणां च परस्परेण आकाङ्क्षा विद्यते। प्रत्ययार्थेन हि इति कर्त्तव्यता आकाङ्क्ष्यते, कर्त्तव्यं कथम् ? इति, न यजिः कीदृशः ? इति। तस्मात् यत् कर्त्तव्यं, तस्यैवेतिकर्त्तव्यतया सम्बन्धः, अपूर्वं च तत्। तस्मात् अपूर्वप्रयुक्ताः इति।

तृतीयवर्णकम्।

एवं वा, एतेषु एव उदाहरणेषु इति चिन्त्यते, किं यजिनिमित्ता धर्मा अपूर्वप्रयुक्ताः, उत अपूर्वं प्रयोजकं निमित्तं च ? इति। किं प्राप्तम् ? यजिर्निमित्तम् अपूर्वं प्रयोजकम् इति। कुतः ?। नैकस्य प्रयोजकत्वं निमित्तभावश्च उपपद्यते, यदर्थं हि क्रियन्ते धर्माः, तत् प्रयोजकम्। यस्मिन् सति क्रियन्ते, तन्निमित्तं, न च एकस्मिन् शब्दे अपूर्वायैते, अपूर्वे च भवन्ति इति शक्यं वदितुम्, अन्या हि वचनव्यक्तिः अपूर्वार्थेषु, अन्या च अपूर्वे सति

इति, यजिनिमित्तत्वे तु शब्दोऽवकल्पते, एवं यागेन कुर्यात् इति, यागे सति अपूर्वस्य उपकारकाणि, असति अनुपकारकाणि अङ्गानि इति । तस्मात् यजिर्निमित्तम्, अपूर्वं तु प्रयोजकम् इति ।

एवं प्राप्ते ब्रूमः, यज्ञकर्म प्रधानं, यजतेः कार्यं, तद्धि फलवत् घोष्यते, तद्दीयेषु द्रव्येषु यजतौ च यः संस्कारः, सोऽपूर्वप्रयुक्तः, तदर्थास्ते इति ज्ञात्वा क्रियन्ते, न यज्यर्थेन तेषाम् अभिसम्बन्धः, प्रयोगवचनेनैते प्रत्ययार्थेन सम्बध्यन्ते, स हि साकाङ्क्षो न धात्वर्थः । तस्मात् अपूर्वप्रयुक्ता अपूर्वनिमित्ताश्च । यदुक्तं, अपूर्वस्य प्रयोजकत्वं निमित्तभावश्च नोपपद्यते, वचनव्यक्तिभेदात् इति, तत्र उच्यते, प्रयोजकत्वं वाचनिकम्, निमित्तभावश्च नैव वचनात् भविष्यति इति, यद्धि येन प्रयुज्यते, भवति तत् तस्य निमित्तं, यथा, आरामपोषकस्य आरामो वेतनदाने प्रयोजको निमित्तं च, आरामे सति तस्मै वेतनं दीयते, वेतनसम्बन्धो भवति आरामं रक्षितुम् । तस्मात् धर्माणाम् अपूर्वमेव प्रयोजकं निमित्तं च इति । (८।१। १ अ०) ।

प्रोक्षणस्यापूर्वप्रयुक्तत्वाधिकरणम् । (वर्णकान्तररहितम्)

संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥ २ ॥ (पू०)

दर्शपूर्णमासौ प्रति समामनन्ति, प्रोक्षिताभ्याम् अदभ्यां खलमुसलाभ्याम् अवहन्ति, प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टि इति। तत्र अयमर्थः सांशयिकः, किं प्रोक्षणं हन्तिपिषिप्रयुक्तम्, उत अपूर्वप्रयुक्तम् ? इति। किं प्राप्तम् ? संस्कारे हन्तिपिष्याख्ये प्रयुज्यमानस्य प्रोक्षणस्य तत्प्रयुक्तता स्यात्, संस्कारप्रयुक्तता, संस्कारो हि हन्तिपिषौ। कुतः एतत्प्रयुक्तता ? इति। तादर्थ्यात्, यद्धि येन कर्त्तव्यं भवति, तत्, तस्य प्रयोजकं यदि अपूर्वम् अनेन क्रियते, ततोऽस्य अपूर्वं प्रयोजकं, यदि हन्तिपिषी, ततस्तौ प्रयोजकौ। प्रकरणाच्च अपूर्वं कर्त्तव्यं गम्यते, वाक्यात्, हन्तिपिषी, वाक्यं च प्रकरणाद्बलीयः इति।

ननु हन्तिपिष्योः क्रियमाणम् अपूर्वार्थं भविष्यति, तत्र प्रकरणं च वाक्यं च उभयमपि अनुगृहीयते। उच्यते, न शक्यम् उभयम् अनुग्रहीतुम्, न प्रकरणसमाम्नायमात्रेण प्रकरणवतोऽर्थेन समाम्नातम् इति गम्यते, प्रकरणसमाम्नानात् प्रकृतैनैकवाक्यता भवति, ततः तादर्थ्यम् अवगम्यते, इह तु प्रत्यक्षाभ्यां हन्तिपिषिभ्यां प्रोक्षणस्य एकवाक्यता, सा प्रकृतैनैकवाक्यतां परोक्षां बाधित न च, द्वाभ्याम् अपि सहैकवाक्यता स्यात्, यदा एकेनैकवाक्यता, तदा तेन निराकाङ्क्षस्य न अन्येन अपि एकवाक्यता कल्प्यते। तस्मात् प्रकृतेन एकवाक्यत्वाभावात् न अपूर्वार्थं प्रोक्षणम्।

आह, ननु हन्तिपिषी अपूर्वार्थौ, तदर्थं प्रोक्षणं, तस्मात् अपूर्वस्य उपकारकम् इति। उच्यते, भवति प्रणाड्या उपकारकं, न तु अपूर्वप्रयुक्तं, द्विविधं हि अङ्गं

अङ्गस्य उपकारकं भवति, किञ्चित् अपूर्वस्य एतदङ्गम् विशिष्टम् इत्यनेन कारणेन अङ्गेन सम्बध्यते, किञ्चित् अनपेक्ष्यैव अपूर्वसम्बन्धं, स्वरूपेण एव कारणेन सम्बध्यते, यत् अपूर्वसम्बन्धं कारणत्वेन उपादाय धर्मजातमङ्गविशेषेण सम्बध्यते, तत् अपूर्वं प्रयुक्तं भवति। तादृशं च विकृतौ अर्थान्तरे तत्कार्य्याप्रत्ये जहितव्यं भवति, तच्च पुनः स्वरूपमङ्गस्य धर्मसम्बन्धे कारणं भवति, तत् स्वरूपप्रयुक्तं, तच्च यद्यपि तेन धर्मवता अपूर्वं साध्यते, तत्र साध्यमानम् अपूर्वं न धर्मस्य प्रयोगहेतुभूतं भवति, न तत् प्रयोजकं, तस्य स्वरूपं विद्यते इति न धर्मः प्रयुज्यते। तत्र विकृतौ अर्थान्तरे तद्रूपाभावात् जहौ न अवकल्पते। एवं सति वाक्यान्निर्णयः, यदि वाक्यम् अपूर्वस्य कारणतां वदति, ततोऽपूर्वप्रयुक्तम्, अथ अङ्गस्य, ततोऽङ्गप्रयुक्तम्। तत्र उक्तप्रकरणात् अपूर्वप्रयुक्तं स्यात्, वाक्यात्तु अङ्गप्रयुक्तता इति। तस्मात् हन्तिपिषिप्रयुक्तं प्रोक्षणम् इति। यत्र यत्र हन्तिपिषी प्रयुज्येते, तत्र तत्र एवं धर्मकौ भवतः इति।

तेन त्वर्थेन यज्ञस्य संयोगात् धर्मसम्बन्धस्तस्मादङ्गप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ॥३॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, न तु एतदस्ति, हन्तिपिषिप्रयुक्तं प्रोक्षणम् इति, तेन तु अर्थेन हन्तिना पिषिणा वा। यस्मात् अपूर्वस्य संयोगः, तस्मात् तस्य प्रोक्षणसम्बन्धः, अपूर्वसाधनविशेषकारितः प्रोक्षणसंस्कारेण सम्बन्धः, ए

हन्तिपिषिकारितः। कथम्?। निष्प्रयोजनौ हन्तिपिषौ यदि तत्प्रयुक्तं प्रोक्षणं, तदपि निष्प्रयोजनम्, अतो न तत्प्रयुक्तम्।

आह, अपूर्वस्य उपकारकौ हन्तिपिषौ न निष्प्रयोजनौ इति। उच्यते, न प्रोक्षणस्य अपूर्वस्य कश्चिदस्ति सम्बन्धः, यदि प्रोक्षणं न क्रियते, न हन्तिपिषौ अपूर्वस्य साधनभावं न गच्छतः, तस्मात् यद्यपि हन्तिपिषौ अपूर्वस्य उपकारकौ, तथापि ताभ्यां सम्बध्यमानं प्रोक्षणम् अनर्थकमेव।

अथ उच्यते, यदर्थं हन्तिपिषौ उपादीयेते, तत् प्रोक्षणसम्बद्धौ शक्नुतः कर्तुम्, नान्यथा इति। उच्यते, न एवञ्जातीयकः शब्दोऽस्ति इति। तत्र आह, अयमेव शब्दः एतमर्थम् अभिवदति इति। कथम्?। प्रोक्षिताभ्याम् अवहन्ति, प्रोक्षिताभ्यां पिनष्टि इति यत् हन्तिपिषिभ्यां क्रियते, तत् प्रोक्षणसम्बद्धाभ्याम् इति हन्तिपिषिकार्येण प्रोक्षणं सम्बध्यते, न ताभ्याम् इति। उच्यते, नैतदेवं, यदि यत् हन्तिपिषिभ्यां क्रियते, तत् प्रोक्षणेन अभिसम्बध्यते, सम्बन्ध एव प्रोक्षणस्य न स्यात्, तत् हि ताभ्याम् अभिनिर्वर्त्यते, किम् अपरं, तत् प्रोक्षणम् अभिनिवर्तयेत्। अथ प्रोक्षिताभ्याम् अपूर्वं क्रियते इति सम्बन्धः। न तर्हि हन्तिना पिषिणा वा। अथ तत्सम्बन्धोऽपि उच्यते इति। अनेकसम्बन्धे वाक्यभिद्येत। तस्मात् हन्तिपिषिभ्यां प्रोक्षणं सम्बध्यमानम् अप्रयोजनम् इति प्रकरणात् अपूर्वेण सम्बध्यते।

ननु एवं हन्तिपिशिसम्बन्धो न अवकल्प्येत। अवकल्प्यते इति ब्रूमः। कथम्?। इह अवघातं प्रति यतमानस्य इयं निष्पद्यते, अवहन्तिरूपं, तण्डुलनिर्हन्तित्वं। प्रणाड्या च अपूर्वभावनाविशेषः, तण्डुलनिर्हन्तिर्हि अपूर्वोपकारः, सोऽवहन्तिक्रियया चिकीर्षितः, तेन प्रोक्षणस्य सम्बन्धः, यद्यपि अवहन्तिरूपेण सम्बध्यमानं प्रोक्षणं त्यक्त्वा सम्बन्धो भवति। तथापि तत्र निष्प्रयोजनत्वात् लक्षणैव आश्रीयते, लक्षणा हि प्रत्यक्षा, सा अदृष्टकल्पनाया ज्यायसी। न च, अवहन्तिः आरादुपकारकोऽपूर्वं निष्पादयति, दृष्टम् उपकारं कुर्वन् अदृष्टेन सामर्थ्येन समीचीनं करोति इति गम्यते, यद्यपि च निष्पादयेत्, तथापि उपकारेण असम्बध्यमानं प्रोक्षणं केवलावहन्तिसम्बन्धेन अनर्थकम् एव स्यात्। अतोऽवहन्तिलक्षितेन उपकारविशेषेणास्य सम्बन्धः। तस्मात् अनवहन्तिरूपि यः तत्कार्य्यापन्नः, तत्र प्रोक्षणं भवत्येव, यथा नखनिर्भिन्ने चरणौ नखेषु। तस्मात् अपूर्वप्रयुक्तः एवज्जातीयको धर्मः इति।

वर्णकान्तरम्। (उद्यावचध्वनेः परमापूर्वप्रयुक्तत्वाधिकरणम्)।

एवं वा,

अस्ति ज्योतिष्टोमः, तत्र इदं समाम्नायते, यावत्या वाचा कामयेत, तावत्या दीक्षणीयायाम् अनुब्रूयात्, मन्द्रं प्रायणीयायां मन्द्रतरम् आतिथ्यायाम् उपांशु उपसत्सु इति। तत्र अयम् अर्थः सांयधिकः, किं परमापूर्वप्रयुक्ता एते धर्माः, उत दीक्षणीयाद्यपूर्वप्रयुक्ताः?- इति। किं प्राप्तम्? परमापूर्वे संस्कारे दीक्षणीयाद्यपूर्वे यज्यमानस्य

अस्य धर्मस्य परमापूर्वार्थत्वात् दीक्षणीयादीनां परमापूर्वार्थतैव स्यात्, परमापूर्वं हि फलवत्, यत् कर्त्तव्यतयाऽभिसम्बध्यते, तदेव धर्मैरभिसम्बध्यते, न अङ्गापूर्वं, निष्प्रयोजनं हि तत् इति।

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् ॥३॥ (सि०)

तेन त्वर्थेन दीक्षणीयादिना, यस्मात् परमापूर्वस्य सम्बन्धः, तस्मात् परमापूर्वम् एवज्जातीयकेन धर्मेण धर्मवत्। तस्मात् अङ्गयज्ञप्रयुक्तम् एवज्जातीयकं धर्मजातं, तथा श्रुतिः शब्दो भवति, इतरस्मिन् पक्षे लक्षणा स्यात्, न च प्रायणीयाद्यपूर्वं निष्प्रयोजनं, ज्योतिष्टोमस्य हि तत् उपकारकं न च, तत् विना, एवज्जातीयकेन धर्मेण प्रायणीयाद्यपूर्वं सिद्धम्, अवहन्ति पिबिवत्।

यदुच्यते, विनैव धर्मेण, तत् अपूर्वं भविष्यति इति। तन्न। कुतः?। तदपि हि अपूर्वं, शब्दात् एव अवगम्यते, अस्तीति, प्राक् शब्दात्, अन्येन प्रमाणेन उपसङ्ग्रायते। एवज्जातीयके च शब्दप्रमाणके यत् शब्दः आह, तत् अस्माकं प्रमाणम्। शब्दस्य प्रायणीयाद्यपूर्वस्य उपकारकम् इमम् धर्मम् आह, न परमापूर्वस्य, वचनप्रामाण्यात्।

एवञ्चापरमापूर्वनिष्पत्तेरजरम् अविनाशि च अत्र धर्मः प्रतिष्ठितो न परमापूर्वं संक्रमिष्यति, एवमपि प्रयोजनसमर्थः। तस्मात् एवज्जातीयकं धर्मजातम् अङ्गापूर्वप्रयुक्तम् एव इति।

किं भवति प्रयोजनम् इतरस्मिन् इतरस्मिन् वा पक्षे ? इति । उच्यते, अग्नेमेधे समाम्नायते, त्रैधातवीया दीक्षणीया भवति इति, यदि परमापूर्वप्रयुक्त एवङ्जातीयको धर्मः, ततः तस्य उपकारविशेषे निबद्धः इति तत्कार्य्यायन्यायां त्रैधातव्यायां भविष्यति । अथ आग्नावैष्णवापूर्वप्रयुक्तः, ततो न इदम् आग्नावैष्णवापूर्वम् इति तत्र त्रैधातव्यापूर्वं न तेन धर्मेण सम्बंत्स्यते इति । (९।१।२ । अ०)

——

फलदेवतासम्बद्धधर्म्माणामप्यपूर्वप्रयुक्तताधिकरणम् ।

फलदेवतायोश्च ॥ ४ ॥ (पू०)

दर्शपूर्णमासौ स्वः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति । तत्र फलसम्बद्धो धर्मो देवतासम्बद्धश्च श्रूयते, फलसम्बद्धस्तावत्, अगन्म स्वः सं ज्योतिषा भूमा इति, देवतासम्बद्धोऽपि, अग्नेरुज्जितिमनूज्जेषं सोमस्य उज्जितिमनूज्जेषम् इत्यादिः । तत्र संशयः, किं स्वर्गसम्बद्धस्य कर्मणः स्वर्ग एव प्रयोजकः, अग्न्यादिसम्बद्धस्य अग्न्यादय एव, उत उभयत्रापि अपूर्वं प्रयोजकम् ? इति । यद्येवं अभिसम्बन्धः क्रियते, गताः स्मः स्वर्गं, अग्न्यादीनां च उज्जितिमनूज्जेषम् इति, ततः स्वर्गाग्न्यादिप्रयुक्तः । अथ एवं क्रियते, आगता दर्शपूर्णमासफलं, दर्शपूर्णमासदेवताश्च उज्जितिमनूज्जेषम् इति, ततोऽपूर्वप्रयुक्तः। किं प्राप्तम् ? स्वर्गाग्न्यादिप्रयुक्तः इति । कुतः ?। मन्त्रज्ञानसामर्थ्यात्, यस्य मन्त्रो

वाचकः, स इह वक्तव्यः इति गम्यते, श्रुत्या च स्वर्गाग्न्यादीनां वाचको मन्त्रः, लक्षणया दर्शपूर्णमासफलदेवतयोः, तस्मात् यत् फलदेवतम् इति समधिगतं स्वर्गाग्न्यादि, तत्प्रयुक्तो धर्मः स्यात् इति।

न, चोदनातो हि तादृग्ण्यम् ॥ ५ ॥ (उ०)

नैतदस्ति, स्वर्गाग्न्यादिप्रयुक्तः इति, चोदनातः तादृग्ण्यं स्यात्, यत् फलवच्चोद्यते, तदितिकर्त्तव्यतया अनुबध्यते, अपूर्वं च फलवत्, न स्वर्गाग्न्यादि, तदर्थं वचनं सत् अदृष्टार्थं कल्पेत, लक्षणया च अपूर्वफलदेवतावचनेऽदृष्टोऽर्थः स्यात्, प्रोक्षाहनात्। एतस्मिन् पक्षान्तरे दृष्टे सति न स्वर्गाग्न्यादिवचनस्य अपूर्वस्य कल्पना न्याय्या, यद्यर्थस्य च फलदेवतात्वेन संप्रतिपन्नत्वात् लक्षणा अदृष्टा। तस्मात् अपूर्वप्रयुक्त एवङ्जातीयको धर्मः इति।

किं भवति विचारस्य प्रयोजनम्?। यथा पूर्वैः पक्षैः, सौर्ये कर्मणि अविकारेण मन्त्रः प्रयोक्तव्यः, यथा तर्हि सिद्धान्तः, अहीन अगन्म ब्रह्मवर्चसं सूर्यस्य उज्जितिमनूज्जेषम् इति फले पर्य्यवसितम्। देवतायाम् उत्तरा चिन्ता वर्त्तिष्यते। (९।१।३ अ०)।

धर्म्माणामदेवताप्रयुक्तत्वाधिकरणम्।

देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥ ६ ॥ (पू०)

नैतदस्ति, अग्न्यादयोऽप्रयोजकाः इति, सर्वा देवताः

सर्वेषां धर्माणां प्रयोजिकाः भवितुमर्हन्ति। कुतः ?। भोजनस्य तदर्थत्वात्, भोजनं हि इदं देवतायाः, यागो नाम, भोज्यं द्रव्यं देवतायै प्रदीयते, सा भोक्ष्यते इति, देवतासम्प्रदानको हि अयं यागः श्रूयते, सम्प्रदानं च नाम कर्मणोऽपि ईप्सिततमादभिप्रेततरम्। तस्मात् न गुणभूता देवता, देवतां प्रति गुणभूते द्रव्यकर्मणी। अपि च यागो नाम देवतापूजा, पूजा च पूजनीयं प्रति गुणभूता लोके दृश्यते, तदेतत् अतिथिवत् द्रष्टव्यं, यथा यावत्किञ्चित् अतिथेः परिचरणं, सर्वं तत् अतिथिप्रयुक्तम्, एवम् इदमपि इति।

आह, ननु एवं ब्रुवता विग्रहवती देवता भुङ्क्ते च इत्यभ्युपगतं भवति। उच्यते, बाढं, विग्रहवती देवता भुङ्क्ते च। कुतः ?। स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च एवं हि स्मरन्ति, विग्रहवती देवता इति, स्मृतिश्च नः प्रमाणम्। तथा विग्रहवतीं देवताम् उपचरन्ति, यमं दण्डहस्तमालिखन्ति, कथयन्ति च, तथा वरुणं पाशहस्तम् इन्द्रं वज्रहस्तम्। उपचारादपि स्मृतेर्दृढिमानं कल्पयामः। तथा अन्यार्थवचनं, विग्रहवतीं देवतां दर्शयति, जगृभ्मा ते दक्षिणम् इन्द्रहस्तम् इति, पुरुषविग्रहस्य हि दक्षिणः सव्यश्च हस्तो भवति। तथा, इमे चित् इन्द्र रोदसी अपारे यत् संगृभ्मा मघवन् काशिरित्ते इति, काशिर्मुष्टिः सोऽपि पुरुषविग्रहस्य एव उपपद्यते। तथा, तुविग्रीवो वयोदरः सुबाहुरन्धसो मदे। इन्द्रो दधीचो अस्थभिः वृत्राणि जिघ्नते इति, ग्रीवा उदरं बाहू इति पुरुषविग्रहदर्शनं भवति। तस्मात् विग्रहवती

देवता इति भुङ्क्ते च। कथम् अवगम्यते ?! स्मृतेः, उपचारात् अन्यार्थदर्शनाच्च, एवं स्मरन्ति, भुङ्क्ते देवता इति। तथा च एनाम् भुञ्जानाम् इव उपचरन्ति, यदस्यै विविधान् उपचारान् उपहरन्ति। तथा च अन्यार्थवचनं भुञ्जानाम् देवतां गमयति, अद्रीन्द्र पिब च प्रस्थितस्य इति, तथा च विश्वासनार्थं नजठरेषु धत्ते इति, एकया प्रति धा पिबत्साकं सरांसि त्रिंशतम् इति।

आह, न देवता भुङ्क्ते, यदि च भुञ्जीत देवतायै हविः प्रत्तं क्षीयेत। उच्यते, अन्नरसभोजिनी देवता मधुकरीवत् अवगम्यते। कथम् ?। देवतायै हविः प्रत्तं नीरसं भवति, तस्मात् अन्नरसं भुङ्क्ते देवता इति गम्यते।

आर्थपत्न्याच्च ॥ ७ ॥ (यु०)

यदि कस्यचित् अर्थस्य ईशाना देवता उपचर्यमाणा च प्रसीदेत्, ततः तदाराधनार्थम् इयं देवतापूजा अभिनिर्वर्त्येत, न च एतदुभयम् अपि अस्ति इति, तत् उच्यते, अर्थपतिर्देवता इति। कथम् अवगम्यते ?। स्मृतेः, उपचारात्, अन्यार्थदर्शनाच्च, हि स्मरन्ति, अर्थानाम् ईष्टे देवता इति। तथा, देवयामो देवक्षेत्रम् इत्युपचारस्यामेव स्मृतिं दृढयति। तथा अन्यार्थवचनम् ईशानां देवतां दर्शयति, इन्द्रो दिव इन्द्र ईशे पृथिव्याः इन्द्रो अपामिन्द्र इत् पर्वतानां, इन्द्रो वृधाम् इन्द्र इन्मेधिराणाम् इन्द्रः क्षेमे योगे हव्ये इन्द्रः इति, तथा, ईशानम् अस्य जगतः स्वं ईशम् ईशानम् इन्द्र तस्थुषे इति।

तथा, स्मृत्युपचाराभ्यां प्रसीदति इत्युपगच्छामः, एवं

— ... ...

अपि वा इति पक्षो व्यावर्त्तते। न चेतदस्ति, यदुक्तं देवता प्रयोजिका इति, यज्ञकर्म प्रधानं स्यात्, यजतेर्जातम् अपूर्वम्। कुतः? शब्दपूर्वत्वात्, यत् हि फलं ददाति, तत् प्रयोजकं इदं फलं ददाति इत्येतत् ज्ञानं शब्दपूर्वकं न प्रत्यक्षादिभिः अवगम्यते। शब्दश्च यजतिवाच्यात् फलम् आह, न देवतायाः। कथम् अवगम्यते?। दर्शपूर्णमासयोः करणत्वेन निर्देशः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति, तथा, ज्योतिष्टोमेन स्वर्गकामो यजेत इति, यजत्यर्थस्य हि स्वर्गकामेन समभिव्याहारो न देवतायाः।

ननु द्रव्यदेवताक्रियं यजत्यर्थः। सत्यमेवं, किन्तु गुणत्वे देवताश्रुतिः, द्रव्यदेवतं हि भूतं, भावयितव्यो यजत्यर्थः, भूतभव्यसमुच्चारणे च भूतं भव्याय उपदिश्यते, तस्मात् न देवता प्रयोजिका।

अथ यदुक्तं, कर्म्मणः ईप्सितादभिप्रेततरम् इति, न अस्य अभिप्रेतताम् अपह्नुमहे, तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यात् अभिप्रेतता अवगम्यते, फलसंयोगस्तु वाक्यादेव यजत्यर्थस्य, तस्य च श्रुत्या करणता अवगम्यते, न देवतायाः। तत्र यद्यपि देवतार्थता यागस्य गम्यते, फलार्थतापि तेन न प्रतिषिध्यते। फलं च पुरुषार्थः, पुरुषार्थाः च नः प्रवृत्तिः, न च असौ देवतायाः तस्मात् न देवताप्रयुक्ताः प्रवर्त्तिष्यामहे, या तु, सम्प्रदानस्य अभिप्रेतता सा फलवतो यजेः, साधनत्वे सति उपपद्यते।

यच्च, यज्जिर्देवतापूजा सा पूज्यमानप्रधाना लोके लक्ष्यते इति। न लोकवत् इह भवितव्यं, इह पूज्यमान-पूजा प्रधानं, यत् हि फलवत्, तत् प्रयोजकं, तस्मात् यज्ञकर्म प्रयोजकम्। अपि च, एतस्मिन् पक्षे विग्रहवती देवता भुङ्क्ते च इति अध्यवसनीयं भवति, न हि अविग्रहायै अभुञ्जानायै च दानं भोजनं वा सम्भवति इति।

यच्च उक्तं, स्मृत्युपचारान्यार्थदर्शनैर्विग्रहवती। भुङ्क्ते च इति। तत्र, स्मृतेर्मन्त्रार्थवादमूलत्वात्, मन्त्रेभ्यश्च अर्थवादेभ्यश्च स्मृतिमूलं विज्ञानम् उत्पद्यते इति प्रत्यक्षम् अवगम्यते, ते च मन्त्रार्थवादा नैवंपराः इत्येतत् वक्ष्यामः।

आह, यदि नैवंपरा न तर्हि मन्त्रार्थवादमूलं तद्विज्ञानम् इति। उच्यते, ये आलोचनामात्रेण मन्त्रार्थवादान् पश्यन्ति, तेषाम् तत् स्मृतिमूलं, ये पुनर्निपुणतः पश्यन्ति, तेषां तत् बाधितम् अपि च कस्यचित् स्मृतिमूलं भवति। तस्मात् ततः एव स्मृतिः, उपचारोऽपि स्मृतिमूल एव। यत्तु अन्यार्थदर्शनम्, उक्तं, ऋग्भ्यो ते दक्षिणम् इन्द्र हस्तम् इति। नैतत् एवम्परं, इन्द्रस्य हस्तो विद्यते इति, यः तस्य दक्षिणो हस्तस्तं वयं गृहीतवन्त इति। तस्मात् वाक्यात् इन्द्रस्य हस्तसत्ता न प्रतीयते।

आह, यदि त्वसौ नास्ति, वयं ते हस्तं गृहीतवन्तः इत्येवं न अवकल्पते इति हस्तसत्ता अध्यवसीयते, अस्त्यसौ हस्तः, वयं यं गृहीतवन्तः इति। तत्र उपपद्यते, यद्यप्यस्य हस्तो भवेत्, तथापि न तम् उपगृहीतवन्तः इति प्रत्यक्ष-

मेतत्, तथाप्येतत्र अवकल्पत एव, तत्र एतत् असम्बद्ध वा अवकल्पयितव्यं, स्तुतिर्वा, तत्र मत्वर्थेऽपि तुल्यम्।

अथ एवम् उच्यते, तस्य एतद्वचनं यो गृहीतवान् तस्य हस्तम् इति। उच्यते, नैतत् अध्यवसेयम्, आदिमत्त्वादीषं वेदस्य प्रसज्येत, न च, गृहीतवान् आसीत् इत्युच्यते प्रमाणाभावात्। एतस्मात् एव वचनात् अर्थात् कल्प्यते हस्तगृहीता इति चेत्। तत्र, अयथार्थस्यापि उच्चारण सम्भवत्येव यतः, यथा, दश दाड़िमानि षड़पूपाः इति यस्यापि च एष पत्नो, विग्रहवान् इन्द्रः इति, तस्यापि इन्द्रशब्देन आमन्त्रणं सम्बोधनार्थं, सम्बोधनम् अनुवचनाय, तत्र सम्बद्धः इत्यवगते अनुवचनं न्याय्यं, न च, असौ केनचित् प्रकारेण सम्बद्धः इति अवगम्यते, अनवगते सम्बोधनं व्यर्थम्। वचनप्रामाण्यात् सम्बुध्यते इत्येवं गम्यते इति चेत्। उक्तम् अदृष्टकल्पनायां हस्तादिकल्पनानुपपत्तिरिति। न च, असौ सम्बुद्धः इति अवधार्यते, प्रमाणाभावात्। तस्मात् सम्बोधनवचनं न सम्बोधनाय, निर्देशार्थमेव। अविग्रहपक्षेऽपि तत् निर्देशार्थमेव भविष्यति तत्र आमन्त्रितविभक्तिवचनं स्तुतये, एवं इदं देवताख्यं साधयिष्टतमं, यच्चेतनादिवत् सम्बुध्य साधयति इति चेतनवदिव उपचर्यमाणः सम्बुद्धिशब्देन आमन्त्र्यते, तथा सम्बोधनशब्देन निर्दिश्य उच्यते, गृहीतवन्तो वयं तव हस्तं त्वदाश्रया वयम् इत्यर्थः। अस्माभिः इन्द्रकर्म कर्त्तव्यम् इत्येतत् अनेन स्मार्यते।

तथा इमे द्यावापृथिव्यौ दूरे अपारे यत् संगृह्णाति

मघवन्बहो ते पूजितो मुष्टिः इति सन्तमिव मुष्टिं स्तुत्यर्थेन वदति, तस्यापि भावे न प्रमाणमस्ति, न इदं वचनं इत् महान् काशिः अस्ति, किन्तर्हि, यस्तव काशिः, स महान् इति, अन्यार्थस्तव काशिरस्ति इति, अन्यः तव काशिर्महान् इति। सता हि स्तुतिः उपपद्यते इति चेत्। नैतत्, नियोगतो यस्यापि पौरुषविधिकैरङ्गैर्नास्ति संयोगः, पौरुषविधिकैरङ्गैः तस्यापि स्तुतिर्भवति, यथा, एते वदन्ति शतवत् सहस्रवत् अभिक्रन्दन्ति हरितेभिराशभिः। विष्टी ग्रावाणः सुकृतः सुकृत्यया होतुर्यित् पूर्वे हविरद्यमाशत इति। तथा, सुखं रथं युयुजे सिन्धुरश्विनम् इति। तस्मात् न श्रुतिवचनात् अर्थापत्तिर्भवति पुरुषविधत्वे देवतायाः। तथा, तुविग्रीव इन्द्रः इति नैतत् युक्तं भवति, ग्रीवावान् इन्द्रः इति, किन्तर्हि यास्य ग्रीवा, सा महतो। ग्रीवासत्त्वे नास्ति प्रमाणम्। न च, ग्रीवाश्रुतिः अर्थापत्तिः अपुरुषविधेऽपि स्तुत्युपपत्तेः।

अपि च, इन्द्रो हत्वाणि जिघ्नते इत्येताभ्यां पदाभ्याम् इन्द्रशब्दः सम्बन्धं न शक्नोति तुविग्रीवादिभिः सम्बन्धं यातुं, हिरुक्षारणम् अस्य प्रसज्यते, तुविग्रीवावान् इन्द्रो वेदितव्यः, हत्वाणि च इन्द्रो हन्ति इति, तथा हि सति भिद्येत। अभिन्नं च वाक्यम् उपलभ्यते, तदेवम् अवकल्पते, यदि तुविग्रीवादयोऽस्य न उपदिश्यन्ते इति स्तुत्यर्थं सङ्कीर्त्यते तुविग्रीवादिः, अन्यसो मदे ईदृशो हत्वाणि हन्ति इति एषा तु वचनव्यक्तिः, हत्वधोपदेशपरम् इदं वचनम् इति। यदपि वचनं, बाहू ते इन्द्र रोमशौ, अंसौ ते इन्द्र

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ॥ १० ॥ (यु० नि०)

यदुक्तम्, अतिथिवत् इति, तत् परिहर्त्तव्यम्। आतिथ्यम् अतिथिप्रयुक्तं स्यात्, आतिथ्ये हि तत्प्रीतिर्विधीयते, अतिथिः परिचरितव्यः, यथा प्रीयते, तथा कर्त्तव्यम् इति, दानं भोजनं वा कार्य्यम् इति, यद्यत् अतिथये रोचते, तत् कर्त्तव्यं, यत् तस्मै न रोचते, न तत् बलात्कारयितव्यम् इति। इह तु कर्मणि अभावः प्रीतिविधानस्य। तस्मात् विषमम् अतिथिना इति। (८।१।४ अ०)।

प्रोक्षणादीनामपूर्वप्रयुक्तत्वाधिकरणम्।

द्रव्यसङ्ख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥ (पू०)

दर्शपूर्णमासयोः आमनन्ति व्रीहीन् प्रोक्षति इति, तत्रैव त्रीन् परिधीन् तिस्रः समिधः इति मन्त्रम्। चतुर्होत्रा पौर्णमासीमभिसंपद्येत् पञ्चहोत्रा अमावास्याम् इति चतुर्मास्यानां द्वितीये पर्वणि वरुणप्रघासेषु आम्नायते सूर्येण जुहोति तेन हि अत्र क्रियते इति। तत्र संशयः, किं द्रव्य संख्या-हेतु-समुदायप्रयुक्ताः प्रोक्षणादयो धर्माः उत अपूर्वप्रयुक्ताः? इति। किं तावत् प्राप्तम्? द्रव्यादिप्रयुक्ताः इति, इह व्रीहीन् प्रोक्षति इति प्रकरणेन अपूर्वप्रयुक्तता स्यात् वाक्येन द्रव्यप्रयुक्तता, द्रव्येण हि प्रोक्षणस्

समभिव्याहारः, तस्मिन्नपि समभिव्याहारे द्रव्यगता द्वितीया विभक्तिः प्रोक्षणस्य द्रव्यप्रयुक्ततां वदति ।

तथा, त्रीन् परिधीन् इति, यत् त्रिशब्दस्य अभिधेयं, तत् इह मन्त्रामानमामर्थ्यात् वदितव्यम् इति गम्यते । सङ्ख्या न त्रिशब्दस्य अर्थः, तस्याः श्रुतिर्वाचिका, तत्सम्बद्धे अपूर्वे लक्षणा स्यात्, । यावन्तः परिधयः, तावन्तो वत्सत्याः इति ।

तथा हेतुना धर्मः संयुज्यते वाक्येन, सूर्पेण जुहोति इति । किंकारणम् ? । यतः तेन अन्नं क्रियते, तद्धोमेन मन्त्रहव्यमन्त्रकरणद्रव्यं होमे विधीयते । प्रकरणात् अपूर्व-प्रयुक्तता स्यात्. यस्मात् अनेन होमेन अपूर्वं क्रियते, तस्मात् एतत् सूर्पेण निर्वर्त्तयितव्यम् इति, प्रकरणात् वाक्यं बलीयः, अतः प्रकरणं बाधेत, येन येन द्रव्येण दर्वि-पिठरादिनाप्यन्नं क्रियते, तेन तेन होमः कर्त्तव्यः इत्येवम् अन्नकरणं सगुणं भवति इति ।

ननु प्रथमे अध्याये प्रतिषिद्धा हेत्वर्थता, सूर्पस्य अर्थवादोऽयम् इत्युक्तम् । सत्यम् उक्तम्, अपूर्वप्रयुक्त तायां हि सिद्धायां न एकस्मिन् वाक्ये होमे सूर्पविधानं हेतुविधानं च अवकल्पते इत्यर्थवादः प्रकल्पते, न अन्यथा चतुर्होत्रा पौर्णमासीम् अभिसृजेत् पञ्चहोत्रा अमावास्याः इति समुदायसमभिव्याहारात् वाक्येन तत्प्रयुक्तता, प्रक रणसामर्थ्यात् लक्षणया अपूर्वसमभिव्याहारात् अवगताः अपूर्वप्रयुक्ततां बाधते । तस्मात् द्रव्यादिप्रयुक्ताः प्रोक्षणादयं धर्माः ।

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥१२॥ (यु०)

अपूर्वप्रयुक्ते एवञ्जातीयके धर्मे सति द्रव्येण च धर्म व्यवस्था न स्यात्, पयसा मैत्रावरुणं श्रीणाति,' शक्तुभिर्मथितं धानाभिर्हारियोजनं हिरण्येन शुक्रमाज्येन पात्नीवतम् इति। यस्मात् मैत्रावरुणोऽपूर्वस्य, तस्मात् पयसा श्रयितव्यः इति, ऐन्द्रवायवोऽपि अपूर्वस्य, सोऽपि पयसा श्रयितव्यः प्राप्नोति। एवं सर्वाणि श्रयणादीनि सर्वेषां ग्रहाणाम्। तच्च मैत्रावरुणादिग्रहणम् अविवक्षितं स्यात्। तस्मादपि द्रव्यादिप्रयुक्ताः प्रोक्षणादयः इति।

अर्थो वा स्यात्प्रयोजनमितरेषामचोदनात्तस्य च गुणभूतत्वात् ॥ १३ ॥ (मि०)

वाशब्दः पक्षं व्यावर्त्तयति। न द्रव्यादिप्रयुक्ता भवेयुः, किन्तर्हि अर्थः एषां प्रयोजनम्, अर्थः इति अपूर्वं ब्रूमः, तदर्थास्ते, तद्धि कर्त्तव्यतया श्रूयते, यच्च कर्त्तव्यतया श्रूयते, तत् इतिकर्त्तव्यतया अनुबध्यते, इतरेषां द्रव्यादीनां कर्त्तव्यतया न चोदना, किन्तर्हि? अर्थस्य गुणभूतत्वेन, अर्थं प्रति अपूर्वं प्रति गुणभूतानाम् एषां श्रवणम्। किमतः?। यद्येवम्, अकर्त्तव्यानाम् इतिकर्त्तव्यतया नास्ति सम्बन्धः इति।

ननु व्रीह्यादिसमभिव्याहारात् तैर्हि सम्बन्धः, तत्र तृतीयया व्रीहिसमुदायप्रयुक्तता गम्यते, लिङ्वाक्याभ्याम्

सङ्ख्याहेतुप्रयुक्तता। न इत्याह, एवं सति फलं कल्पनीयं स्यात्, तस्मात् अपूर्वप्रयुक्तता।

ननु एवमपि सति अपूर्वोपकारः कल्पयितव्यः। सत्यं, कल्पयितव्यः, प्रकृतेनतु एकवाक्यतां नीत्वा, त्वत्पक्षे त्वत्प्रकृतेन फलवचनेन एकवाक्यता स्यात्।

ननु प्रकरणं वाक्यस्य श्रुतेर्वा न बाधकम्। सत्यम् अबाधकं, फलाभावात्तु भवदीयः पक्षो मुच्यते, तस्मिन् आनर्थक्येन अविवक्षिते प्रकरणवता प्रयोगवचनेन अपरिपन्थि प्रोक्षणादि विधायिष्यते। आह, अपूर्वसम्बन्धेऽपि तदीयैः व्रीह्यादिभिः एष धर्मः प्रयुज्यते, किम् एतत्। किम् एवं भविष्यति?। द्रव्यादिसम्बन्धश्च एवं हि न अवज्ञातो भविष्यति, फलं च न कल्पयितव्यम्। उच्यते, नैवं शक्यं, व्रीहीन् प्रोक्षति इति हि व्रीहिजातिर्निर्दिश्यते, व्रीहिद्रव्यलक्षणार्था वा, अपूर्वसाधनविशेषलक्षणार्था वा। अन्यतरलक्षणया कृतार्था इति न उभयलक्षणार्था स्यात्, द्रव्यलक्षणे वा। तत्र च लक्षणैव दोषः, फलकल्पना-इति कृत्वा साधनविशेषलक्षणार्था जातिः अवसीयते, व्रीहिजातिलक्षितं यत् साधनं, किं तत्? यतः तण्डुला भवन्ति, तत् प्रोक्षितव्यम् इति तण्डुलनिर्वृत्तिकरता हि तत्र साधनत्वं, न द्रव्यता। एवं सङ्ख्यादिष्वपि योजयितव्यम्। तस्मात् अपूर्वप्रयुक्तता प्रोक्षणादीनाम् इति।

अपूर्वत्वाद्व्यवस्था स्यात् ॥ १४ ॥ (पू० नि०)

अथ यदुक्तम्, अर्थकारिते च द्रव्येण न व्यवस्था स्यात्

इति, साधनविशेषलक्षणार्था जातिः इत्येवं सति व्यवस्था भविष्यति, मैत्रावरुणेन यत् क्रियते, तत्र पयःग्रयणं, न तत् ऐन्द्रवायवेन। अतो न मैत्रावरुणापूर्वात् ऐन्द्रवायवस्य धर्माः, अपूर्वा हि ऐन्द्रवायवः। तस्मात् अपूर्वत्वात् व्यवस्था स्यात् इति।

तद्युक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥ (पू० यु० नि०)

यस्य मन्यते, द्रव्यादिप्रयुक्ताः प्रोक्षणादयो धर्माः इति, तस्य सर्वविषयता धर्मस्य प्राप्नोति, येऽपि भक्षार्था व्रीहयः, तेऽप्येवं प्रोक्षितव्याः प्राप्नुवन्ति, न च एतत् त्वयापि इष्यते। तस्मात् अयम् अस्मिन् पक्षे दोषः इति।

तद्युक्तस्येति चेत् ॥ १६ ॥ (आ०)

इति चेत् पश्यसि, सर्वविषयता धर्मस्य भविष्यति इति, तद्युक्तस्य प्रकरणयुक्तस्य भविष्यति। एवं प्रकरणम् अनुगृह्यते, न च सर्वविषयता धर्मस्य इति।

नाश्रुतित्वात् ॥ १७ ॥ (आ० नि०)

नैतदेवम्, न हि श्रूयते, करणयुक्ता व्रीहयो निर्वप्तव्याः प्रोक्षितव्याश्च इति। ननु प्रकरणानुग्रहाय एतदध्यवसानम्। न इत्याह, न हि, वाक्येन बाधितं प्रकरणम् उत्सहते धर्मान् नियन्तुम्। अथापि न बाध्यते, तथापि न प्रकरणस्य विशेष्टुम् सामर्थ्यमस्ति, कर्त्तव्यतया हि तत् क्रियमाणं चोद्यते इति न प्रसिद्धसम्बन्धमिव विशेषण-

त्वेन। तस्मात् न प्रकृतयागविशेषितानाम् व्रीहीणाम् निर्वापः प्रोक्षणं वा चोद्यते इति।

अधिकारादिति चेत् ॥ १८ ॥ (आ०)

इति चेत् पश्यसि, न प्रकरणं विशेषकं व्रीहीणाम् इति। बाढम्, अधिकारात् ज्ञास्यति अध्वर्युः, इमे भक्षार्थाः, इमे कार्य्यार्थाः, तत्र कार्य्यार्थान् प्रोक्षिष्यति इति।

तुल्येषु नाधिकारः स्यादचोदितस्य सम्बन्धः पृथक्सतां यज्ञार्थेनाभिसम्बन्धस्तस्माद्यज्ञप्रयोजनम् ॥ १९ ॥ (सि०)

तुल्या एते व्रीहयः, ये एव भक्षार्थाः, ते एव कर्म्मार्थाः, न पृथक् केचित् कर्म्मार्था नाम। ननु ये निरूप्माः, ते कर्म्मार्थाः। सत्यं भवेदेतत्, प्रोक्षणादिषु दोषो न स्यात्, निर्वापे तु दोषः, न तत्र केचन प्रकृता विद्यन्ते, पृथक्सतां यज्ञार्थेन निर्वापः श्रूयते। कथम्?। अपरेण गार्हपत्यं प्राग्रीवम् अनोऽवस्थितं भवति, तस्य दक्षिणं चक्रं आदत्ते—नसोऽधि निर्वपति इति। तस्मात् धर्म्मस्य सर्वविषयत्वं प्राप्नोत्येव, पूर्वेण हेतुना अपूर्वप्रयुक्तत्वं प्रोक्षणादीनाम् इति। (८।१।५ अ०)।

अग्निष्टोमे उपांशुत्वस्य प्राधीनपदार्थप्रयुक्तत्वाधिकरणम् ।

देशबन्धमुपांशुत्वं तेषां स्यात् श्रुतिनिर्देशात्तस्य च तत्र भावात् ॥ २० ॥ (सि०)

ज्योतिष्टोमे समाम्नायते, त्रयो वा एषा यज्ञस्य, तस्मात् यत्किञ्चित् प्राचीनम् अग्नीषोमीयात्, तेन उपांशु चरन्ति इति । तदत्रैषोऽर्थः सांशयिकः, किं प्राक् अग्नीषोमीयात्, यानि कर्म्माणि, तत्प्रयुक्तम् उपांशुत्वम्, उत परमापूर्वप्रयुक्तम् ? इति । किं प्राप्तम् ? प्राक् अग्नीषोमीयात् यानि अङ्गापूर्वाणि आरादुपकारकाणि, यच्च प्रधानद्रव्यसंस्कारकं, तत्प्रयुक्तोऽयं धर्म्मः, योऽयं देशसम्बन्धः । कुत एतत् ? । श्रुतिनिर्देशात्, मर्य्यादया देशलक्षिता ये पदार्थाः, ते श्रुत्या एतेन धर्मेण सम्बद्धाः, ये एतस्मिन् देशे पदार्थास्तैः उपांशु चरन्ति इति ।

ननु वाक्येन एष धर्मो विनियुक्तो न श्रुत्या । न ब्रूमः, न वाक्येन इति, किन्तर्हि श्रुतेन अस्य एकवाक्यता, न प्रकृतेन, लक्षितेन, कल्पितेन वा इति । उच्यते गृह्णीम एतदङ्गापूर्वाणाम् अयं धर्म्मः इति, न तु प्रधानद्रव्यस्य संस्कारकं यत् अपूर्वं तस्यापि इति । कतमं तत् ? । यत् प्रधानद्रव्यसंस्कारकं पूर्वस्मिन् देशे अस्ति इति । उच्यते, तस्य च तत्र भावात्, तस्य एवञ्जातीयकस्य पूर्वस्मिन् देशे भावात् । अस्ति हि सोमपरिवहणीयं नाम सूक्तम् । तस्मात् देशधर्मो भविष्यति इति । यथा प्रणीताः प्रणेष्यन् वाचं यच्छति, तां सह विकृता विसृजति इति । अस्मिन् देशे

ये पदार्थाः, तेषां धर्मो वाग्यमो न प्रधानापूर्वस्य, एवम् इदम् अपि उपांशुत्वम् इति।

यज्ञस्य वा तत्संयोगात् ॥ २१ ॥ (पू०)

वाग्यमस्तात् पक्षो विपरिवर्त्तते। नेतदस्ति, तद्देशानाम् धर्मः इति। कस्य तर्हि? परमापूर्वस्य इति। कुतः?। तत्संयोगात्, तत्संयोगो भवति, यज्ञस्य संयोगः, स्मरा वा एषा यज्ञस्य यत् प्राचीनम् अग्नीषोमीयात् इति, यज्ञस्य यत् प्राचीनम् इति ह्यस्मरन्तः, न स्मरा वा यज्ञस्य इति। कुतः?। प्राचीनं विप्रिंषन् यज्ञस्य इति शब्दो विधिपदशेषो भवति। ततः प्रवृत्तिविशेषकरो भविष्यति। इतरथा अर्थवादशेषः सन् अनर्थकः स्यात्, वादमात्रं हि अनर्थकम् इति। प्राचीनम् इति च यज्ञभागं श्रुत्वा वदति, लक्षयति च तद्गतान् पदार्थान्, श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या स्यात्। तस्मात् प्राग्देयस्य एष धर्मः, तेन अस्य श्रुत्वा संयोगः, न प्राग्देयगतानाम् पदार्थानाम् तैरस्य लक्षणया सम्बन्धः स्यात्।

अथापि अर्थवादपदशेषो यज्ञस्य इति स्यात्, तथापि प्राग्देयः श्रुत्वा धर्मेण सम्बध्यते, प्राग्देयगताः पदार्था लक्षणया इति यज्ञप्रयुक्तता एव न्याय्या।

अपि च प्रत्यक्षः उपकारः परमापूर्वस्य लक्ष्यते, यत् प्राचीनम् अग्नीषोमीयात्, तत् उपांशुत्वेन शिथिलप्रयत्नः प्रचरन् अखिन्नः सुखं बहुवृत्तान्तं सौत्यम् अहर्निर्वर्त्स्यति। तस्मात् परमापूर्वप्रयुक्तम् उपांशुत्वम् इति।

अनुवादश्च तदर्थवत् ॥ २२ ॥ (पू० यु०)

अनुवादश्च तद्देशपदार्थस्यैव भवति, त्वरा वा एषा यज्ञस्य यत्प्राचीनमन्नीषोमीयात् इति, त्वरा नाम क्षुण्ण-गतिः। यथा शकुनिग्राहकस्य शकुनिं जिघृक्षतः क्षुण्णा गतिर्भवति, शनैः पदन्यासो, दृष्टिप्रणिधानम्, अशब्दकर-णञ्च, कथमनवबुद्धः शकुनिर्गृह्णीयेति। एवमिहापि अनवबुद्धमिव ग्रहीतुं यज्ञं प्रच्छन्नगतिरुपांशुत्वं नाम। यथा शकुनिग्राहकस्य यस्मिन् देशे शनैः पदन्यासो न स तद्देशार्थः, अपितु तद्देशाभिगतस्य शकुनेरर्थेन क्रियते। एवमिहापि उपांशुत्वं न तद्देशानां पदार्थानामर्थेन क्रियते, तद्देशाभिगतस्य यज्ञस्यार्थेन गम्यते। यत्तु त्वरा-शब्दं यज्ञविशेषं मन्यते, तस्य सुतरामर्थवादः परमापूर्व-प्रयुक्ततां दर्शयति, यज्ञस्यैषा त्वरेति। यथा शकुनेः त्वरा, एवं यज्ञस्येति।

प्रणीतादि तथेति चेत् ॥ २३ ॥ (आ०)

इति यदुक्तं तत्परिहर्त्तव्यम्।

न यज्ञस्याश्रुतित्वात् ॥ २४ ॥ (आ० नि०)

नैतदेवं, तद्देशपदार्थप्रयुक्तैव स्यात्, न परमापूर्व-प्रयुक्तेति। नात्र पदार्थानां यज्ञभागविशेषता वाक्य-मसम्बन्धेन अवगम्यते, यज्ञस्याश्रुतित्वात्, नात्र सम्बन्धो यज्ञशब्दः श्रूयते। नन्विदानीमेवोक्तं, यज्ञं तनिष्यन्तो

अध्वर्युयजमानौ वाचं यच्छतः इति। उच्यते, तद्देशपदार्थप्रयुक्तायामप्येतदवकल्पते। कथम्? यज्ञं विस्तारयितुं वाचं यच्छतः, तौ वाचंयमौ सन्तौ अविच्छिद्यमाणचेतस्कौ, पदार्थेषु क्रियमाणेषु अप्रमाद्यन्तौ तथा करिष्येते, यथा, न कश्चित् पदार्थः पदार्थावयवो वा हीयते, अध्वर्युर्वाग्यमेन अनन्यचेतस्को न पदार्थान् प्रमादयिष्यति। यजमानश्चैवं वाग्यमेन अनन्यचेतस्कः प्रमादयिष्यन्तं बोधयिष्यति। अङ्गैरप्यनन्तरीयमाणैः यज्ञो विस्तार्यते, न केवलैः स्रेवयवैरङ्गैश्च विस्तारयितुं वाग्यमः शक्नोति, अस्मिन् काले क्रियमाणो न स्रेनाख्यना। यज्ञसंयोगस्यापि विस्तारसम्बद्धः, तस्मादङ्गप्रयुक्तायामप्युपपद्यते, यदध्वर्यु-यजमानौ वाचं यच्छतः, तत् प्रजापतिभूयङ्गतो यज्ञं तन्वाते इति दृष्टेन कारणेन, न अदृष्टेन इति वर्त्तमानकालापदेशादवगम्यते, यथा वयं वाग्यमेन तायमानं यज्ञं विथस्तथेति।

तद्देशानां वा सङ्घातस्याचोदितत्वात् ॥ २५ ॥

(उ०)

स्यितादुत्तरम्। वाग्यदात् पक्षं विपरिवर्त्तयेत्, नेतदस्ति, परमापूर्वप्रयुक्तमुपांशुत्वमिति, कथन्तर्हि? प्राचीनम् अग्नीषोमीयात्, ये पदार्थाः तत्प्रयुक्तम्। कुतः?। सङ्घातस्याचोदितत्वात्, सङ्घात इति यज्ञयज्ञभ्यासस्सङ्घातं ब्रूमः। न तस्यायं भाग उपांशुत्वेन सम्बद्ध इति चोदना। नैवं सम्बन्धः क्रियते, यज्ञस्य यत् प्राचीनमिति, कथं तर्हि?

स्वरो वा एषा यज्ञस्येति। कुतः?। तस्मादितिपदेन व्यवधानात्।

अथापि प्राचीनेन सम्बन्धः एवमपि न परमापूर्वप्रयुक्तम्, न हि यदित्यनेन देशोऽभिसम्बध्यते, किन्तर्हि? देशगताः पदार्थाः। यदि देशोऽभिसम्बध्येत, यत् प्राचीनमग्नीषोमीयादिति भवेत्, न त्वस्तिच्छिदिति, वीप्सायां त्वेतद्भवति। वीप्सा च बहुषु भवति, नैकस्मिन्। एकत्र देशः, बहवस्तत्र पदार्थाः। तस्मात्पदार्थानामुपांशुत्वेन सम्बन्धो न तद्देशस्येति। कथं पुनर्वीप्साऽवगम्यते? इति। यदित्यनेन लक्ष्यते। किमित्यज्ञानवचनम्?। विशेषाकाङ्क्षाताः ज्ञातुमिष्टाः प्रतीयन्ते, बहुषु च सामान्यं विशेषाश्च भवन्ति। तस्मात् तद्देशाः पदार्थाः वीप्सया लक्ष्यन्ते, ते च उपांशुत्वेन सम्बध्यन्ते इति।

ननु दीक्षणीयादिषु अन्यो धर्म उक्तः, यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्, प्रायणीयायां मन्त्रतरमातिथ्यायाम् उपांशूपसत्सु इति। कथं तत्रोपांशुत्वं कर्तुं शक्यमिति?। उच्यते, स धर्मः प्रधानेषु भविष्यति, दीक्षणीयादिषु प्रधानशब्दोपबन्धत्वात्, उपांशुत्वम् प्रधानवर्जितेष्वङ्गेषु निवेक्ष्यते, सामान्योपदेशात्।

प्रयोजनं, कुण्डपायिनामयने मासमग्निहोत्रं जुहुति इत्येवमादीनि प्राग्नीषोमीयात्, एष उपांशुत्वसम्बन्धो भवति, यथा पूर्वः पक्षः। यथा तर्हि सिद्धान्तः, न सम्बन्धः॥ (९।१।६ अ०)।

इष्टकासु सकृद्विकर्षणायनुष्ठानाधिकरणम्।

अग्निधर्मः प्रतीष्टकं सङ्घातात्पौर्णमासीवत् ॥ २६ ॥ (पू०)

अस्ति अग्निः, य एवं विद्वान् अग्निं चिनुते इति। तत्रैव समाम्नायते हिरण्मयकलसहस्रेणाग्निं प्रोक्षति, द्रप्सा मधुमिश्रेणाग्निं प्रोक्षति, वेतसशाखयाऽवकाभिराग्निं विकर्षति, मण्डूकेनाग्निं विकर्षति। तत्रायमर्थः सांशयिकः, प्रतीष्टकं किं विकर्षणं प्रोक्षणं च कर्त्तव्यम्, अथ सकृदेव कर्त्तव्यम् ? इति। तत्रैवन्तावद्विचार्यते, किम् इष्टकासमुदायेऽग्निशब्दः, उत तद्व्यतिरिक्ते द्रव्यान्तरे ? इति। यदि समुदाये, ततस्तञ्चितानामिष्टकानाम् अवयवभूते विशेषे सर्वासां प्रोक्षणं विकर्षणञ्च। यदा च द्रव्यान्तरे, ततः सकृदेवेति। किं प्राप्तम् ? प्रतीष्टकम् इति। कुतः ?। समुदाये हि अग्निशब्दो वर्त्तते। कथमवगम्यते ?। द्रव्यान्तरस्याभावात्, द्रव्यान्तरमेवान्यत् नास्ति, कोऽग्निशब्देनाभिधीयेत ? कस्मिन्नग्निर्निर्धीयेत ? इति। कथं पुनर्नास्तीति गम्यते ?। द्रव्यान्तरवैलक्षण्यात्, तत्र हि द्रव्यान्तरमस्तीति गम्यते, यत्रैकस्मिन् अवयवे गृहीत्वा क्रियमाणे क्रियः क्रियते। कोऽभिप्रायः ?। यद्येकोऽवयवो हस्तेन संयुक्तः क्रियते, न द्रव्यान्तरम्। कः सङ्गः ?। यत्तत्र द्वितीयोऽप्यवयवः क्रियेतेति। अथ द्रव्यान्तरमपि तत्र क्रियते, तत्र द्रव्यान्तरस्य समवायिनां अवयवानामपि निर्भागात् कर्षणमुपपन्नम्। न च, संयुक्त-

संयोगस्य द्रव्यान्तराद्दृते धर्मे एषोऽवकल्प्यते। न हि अवद्दे काष्ठपूलके काष्ठे एकस्मिन्नाक्रम्यमाणे काष्ठान्तराणि क्रम्यन्ते। यत्र हि परस्पर-व्यतिषङ्गजनिता एका बुद्धिर्भवति, नावयवबुद्धिर्दृश्यते, नापि केनचित् अनुमानेन अनुमीयते, तत्र द्रव्यान्तरं जातमित्युच्यते, इह तु या एवेष्टका गृहीत्वा क्रम्यते, सैवागच्छति, नेष्टकान्तराणि। सन्निवेश्यते, तेन नावयवसंसूतिरस्तीति गम्यते। तस्मान्नास्ति द्रव्यान्तरम्। तत्र इष्टकाभिरग्निं चिनुते इति चयनमात्रम् इष्टकाभिः कर्त्तव्यम्। न, चयनमात्रेण क्रतेन किञ्चित् दृष्टमस्ति। तस्मादग्निनिधानार्थानामिष्टकानां चयनसमुदायोऽलक्षितानामगम्यमाने विशेषे सर्वासामेव प्रोक्षणं विकर्षणं च कर्त्तव्यम्, पौर्णमासीवत्। यथा, य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति आग्नेयादय एव क्रियन्ते, नार्थान्तरं किञ्चित्। एवमिहापीति।

अनेर्वा स्यात् द्रव्यैकत्वादितरासां तदर्थत्वात्॥ २७॥ (सि०)

वाशब्दात्पक्षो विपरिवर्त्तते। नैतदस्ति, प्रतीष्टकं कर्त्तव्यमिति, कथन्तर्हि? सकृदेवेति। तत एतद् वर्ण्यते, द्रव्यान्तरमिष्टकाभिः क्रियते, तच्चाग्निर्निधातव्यः, तच्च चाग्निशब्दो वर्त्तते इति। कथम्?। परार्थेनेष्टकानां निर्देशात्, इष्टकाभिरग्निं चिनुते इति तृतीयया विभक्त्या

पारार्थ्येनिष्टकानामवगम्यते। यदि चयनमात्रमुच्येत, तत् इष्टकासंस्कारार्थमवगम्यते। तत्र द्वितीयया विभक्त्या संयोगः स्यात्, तृतीयया संयोगो बाध्येत। तस्मादिष्टकाभिः अन्यत् क्रियते, तत्राग्निर्निधातव्यः, तदर्था इष्टकायचनं वेति।

आह, नन्वेतदुक्तं, तस्याभावादयमन्यः पक्षः परिगृह्यते इति। अत्रोच्यते, नाभावः, प्रत्यक्षा तत्रैकबुद्धिः, सा बह्वीषु इष्टकासु नावकल्पते। नच अवयवसन्निवेशेऽप्यते एवीषच्छन्नानाम्। तस्मात्यक्षामसंयोगेऽप्येकबुद्धेरुत्पादादेकम् इष्टकाभ्यो व्यतिरिक्तं द्रव्यम् अग्निनिधानार्थमस्ति। यदि वा इष्टकासंस्तूतिरप्येकबुद्धेरेवावगम्यते। यत्तु एकाकर्षणेन क्रत्वाकर्षणम् इति। सत्यं, संस्तूतौ तत्र विच्छेदः क्रियते। द्विविधानि हि द्रव्याणि, स्थावराणि जङ्गमानि च, तत्र स्थावरेषु विच्छेदो भवति। यथा, वनस्पतौ पर्णं गृहीत्वा क्रथ्यमाने न क्रत्वः क्रथ्यते, स्थावरत्वात्। एवम इदमपि, स्थावरं हीदमग्निद्रव्यम्। तस्मात् सकृदेव प्रोक्षणं विकर्षणञ्च कर्त्तव्यमिति।

चोदनासमुदायात्तु पौर्णमास्यां तथा स्यात् ॥ २८ ॥ (आ० नि०)

अथ यदुक्तं, य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति, नात्र आग्नेयादिभ्यः किञ्चिदर्थान्तरं, तथा इहापि इति। उच्यते, युक्तं पौर्णमास्यां तथाभावः, चोदनासमुदायो हि तत्र कर्म, नच, कर्म-

साध्यं विद्यते, इह तु द्रव्यान्तरमस्तीत्युक्तम्। तस्माद्दे-धम्यं पौर्णमास्येति। (८।१।७ अ०)।

उत्तमान्यानासङ्गां पत्नीसंयाजासंख्याधिकरणम्।

पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ २९ ॥

(पू०)

अस्ति अहर्गणः, द्वादशाहेन प्रजाकामं याजयेत् इति। तत्र श्रूयते, पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते इति। तत्रायमर्थः सांयविकः, किं सर्वेषामङ्गां पत्नीसंया-जान्तत्वम्, उत प्रागुत्तमात्? इति। दृश्यं वर्जयित्वा मन्देहः क्रियते, तस्य हि मानसान्तता वचनेनोक्ता। किन्तावत् प्राप्तम्? सर्वेषाम् अङ्गानामिति। कुतः?। अविशेषात् अविशेषेणोच्यते, पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्ते इति न च, कश्चिदिशेष आश्रीयते, तस्मात् सर्वे-षामिति।

लिङ्गाद्वा प्रागुत्तमात् ॥ ३० ॥ (सि०)

वाशब्दः पक्षव्यावृत्तौ। प्रागुत्तमात् अङ्गः पत्नीसंयाजा-न्तता स्यात्। कुतः?। लिङ्गात्, लिङ्गं भवति, पत्नी-संयाजान्तानि अहानि सन्तिष्ठन्ते न बहिरनुप्रहरति असंस्थितो हि तर्हि यज्ञः इति यस्मिन् अहनि असंस्थितो यज्ञस्तस्मिन् पत्नी संयाजान्ततां दर्शयति। कथम्?। इत्थंभावेन असंस्था निर्दिश्यते, यस्मादिमानि असंस्थितानि

अहानि, तस्मादेषु पत्नीसंयाजान्ततेति। संख्यितिशब्देऽहानि। अपिच, येषु अहःसु पत्नीसंयाजान्तता, तेषु असंख्या दृश्यते क्रीयमाणा। तस्मादसंख्यायाः पत्नीसंयाजान्ततायाश्च सामानाधिकरण्यम्। असंख्याश्च प्रागुत्तमात् दृष्टा, प्रागुत्तमादेव पत्नीसंयाजान्ततामध्यवस्यामः।

अनुवादो वा दीक्षा यथा नक्तंसंख्यापनस्य ॥ ३१ ॥ (आ०)

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, प्रागुत्तमात् पत्नीसंयाजान्तता स्यात् इति। किन्तर्हि? सर्वेषामविशेषात्। यदुक्तं, येषु पत्नीसंयाजान्तता, तेषु असंख्या दृश्यते। तस्मादसंख्यायाः प्रागुत्तमादङ्गः पत्नीसंयाजान्ततां नियच्छामः इति। नैतदेवं, न ह्येतं विधिमूलं दर्शनं, नान्यप्रमाणमूलम्, अतो मृगतृष्णारूपमेतद्दर्शनम्।

यद्यसंख्या हेतुरिति, तदपि न स्यात्, उक्तं हि, स्तुतिस्तु शब्दपूर्वत्वात् (१।२।२१ सू०) इति। नच, सामानाधिकरण्यम् असंख्यापत्नीसंयाजान्ततयोः, पत्नीसंयाजान्तता सर्वेषामङ्गं शब्देन गम्यते, असंख्या पुनर्न्यायेन प्रागुत्तमादङ्गः। यदेतत् असंस्थितो हि तर्हि यज्ञः इति, अर्थवादः एष पत्नीसंयाजान्ततास्तुत्यर्थः, तथाहि असंस्थितो यज्ञश्चिरेण संस्थास्यते इत्यालोच्यते, यस्मात् चिरेण संस्थास्यते तस्मादवलुप्यतां, पत्नीसंयाजान्तानि अहानि भवन्त्विति, सन्तिष्ठमानेष्वेवाहःसु असंख्यावचनं पत्नीसंयाजान्ततास्तुत्यर्थं, संस्थावन्ति हि तानि अहानि, अवश्यवादय

एवां शेषाः पदार्थाः करिष्यन्ते। यथा दीक्षीमोचनवचनं नक्षसंस्थापनस्य अर्थवादः, एवमेतत् द्रष्टव्यम्। वरुणपाशाभ्यां वा एषो निधीयते यो दीक्षितोऽहीराचे वै वरुणपाशो यदिवा संस्थापयेत् अनुक्षत्रो वरुणपाशाभ्यां स्यात् नक्षं संस्थाप्यो वरुणपाशाभ्यामेवैनमुद्यते आत्मनो हिंसायाः इति, अनुक्षत्रः स वरुणपाशाभ्यां, न तावदीक्षया मुच्यते, अवभृथो हि दीक्षामोचनार्थः। अथवा उच्यते, वरुणपाशाभ्यामिव निर्मुच्यत इति बहवो नियमास्तदानीं विसृज्यन्ते, यान् आलोच्य एष वादो भवति। एवमिहापि चिरेण संस्थामालोच्य असंस्थितवचनं भवतीति।

स्याद्वाऽनारभ्य-विधानात्तन्ते लिङ्गविरोधात् ॥ ३२ ॥ (मा० नि०)

वाशब्दात् पक्षो विपरिवर्त्तते। भवेद्वा प्रागुक्तमात् पत्नीसंयाजान्तता, न हि आरभ्य उक्तमम् अङ्गः, एष विधीयते, अथन्तर्हि? सामान्येन पत्नीसंयाजान्तानि अङ्गानि भवन्तीति। तत्रान्ते लिङ्गविरोधो भवति। का पुनर्व्यापेन प्राप्तिः? इति। पत्नीसंयाजान्तानि अङ्गानि सन्तिष्ठन्ते इति, तेन एतत् उक्तं भवति, शिष्टमवलुप्यते इति, सन्तिष्ठन्ते नानुष्ठीयन्त इति, कर्त्तुर्व्यापार एषु उपरमतीति, तेषु सङ्क्रियमाणेषु अङ्गेषु अवश्यं कस्मिंश्चित् पदार्थे अवस्थाय अवश्यम् अपरस्य अङ्गस्य पदार्था अनुष्ठातव्याः। तत्रानियमे प्राप्ते पत्नीसंयाजान्ते

संख्यातव्यमिति नियम्यते। तस्मादवखानस्थेतत् प्रयोजनं, कथम् अहरन्तरस्य पदार्थानुष्ठानेन योगपद्यमनुष्ठीयेतेति, एतदि दृष्टमवखानकार्य्यं, यस्मिन्नेतत् दृष्टम्, न शक्यं कल्पयितुं तृचादृष्टम्। तच्च न पत्नीसंयाजान्तता, तस्मान्यस्य प्रयोजनं न विद्यते। तस्मात् प्रागन्त्यात् पत्नीसंयाजान्ततेति न्यायेन प्राप्ते लिङ्दर्शनम्, असंस्थितो हि तर्हि यज्ञः इति। (८।१।८ अ०)।

त्रिःप्रथमामन्वाह इत्यादिषु स्थानधर्म्मताधिकरणम्।

अभ्यासः सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यात् ॥ ३३ ॥ (सि०)

स्तो दर्शपूर्णमासौ, तत्र सामिधेनीः प्रकृत्योच्यते, त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह इति। तत्रैषोऽर्थः सांग्रहिकः, किम् ऋग्धर्म्म एषः, यत्र तत्रस्था प्र वो वाजा त्रिरभ्यसितव्या, उत स्थानधर्मः, या अन्यासपि प्रथममुच्यते, सा त्रिरभ्यसितव्या? इति। कुतः संशयः?। उभयोरपपत्तेः यद्येवम् अभिसम्बन्धः क्रियते, या असौ उच्चारितानां सामिधेनीनां प्रथममुच्चारिता, सा त्रिरभ्यसितव्येति, ततः प्र वो वाजाया ऋचो धर्म्मः। अथैवं विज्ञायते, प्राथम्यसंयुक्तं त्रिः ब्रूयादिति, ततो वचनस्य स्थानधर्म्मता।

किन्तावत् प्राप्तम्? ऋचो धर्म्म इति। कुतः?। प्राथम्यस्य व्यक्त्या सम्बन्धात्, व्यक्तेरभ्यासेन। कथमव-

गम्यते ?। स्त्रीलिङ्गनिर्देशात्, व्यक्तिविशेषो हि स्त्री नाम, यदि तद्विशेषणं प्राथम्यं स्यात्, ततो लिङ्गविशेषनिर्देशोऽवकल्पते, साऽपि स्त्री अभ्यासेन सम्बध्यते। अथ प्रथममनुब्रुवता त्रिरभ्यसितव्यमिति ततो व्यक्तिविशेषो न विवक्षेत, तत्र स्त्रीलिङ्गविशेषनिर्देशो नोपपद्यते। अपि च वाक्यभेदः प्रसज्येत, प्रथममुक्तं त्रिरभ्यसितव्यं, प्रथममुक्ता ऋक् त्रिरभ्यसितव्येति। मत्वर्थे पुनः प्राथम्यलक्षितायाः ऋचो धर्म उच्यते, तत्रैकार्थविधाने न भवेद्वाक्यभेदः। अपिच श्रुत्या प्राथम्येन स्त्री सम्बध्यते, वाक्येनाभ्यासः। तस्मात् ऋग्धर्मो यत्र-तत्रेषा प्र वो वाजा त्रिरभ्यसितव्येति।

एवं प्राप्ते ब्रूमः, योऽयं सामिधेनीनां प्रथमायास्त्रिरभ्यास उच्यते, स प्रथमस्थाननिमित्तो धर्मः, न ऋचः कस्याश्चित् जातिनिमित्तः। कुतः ?। न हि ऋत्खेऽपि ऋग्वेदे प्रथमा नाम काचित् ऋक् विद्यते, या त्रिरभ्यस्येत, तत्र प्राथम्यम् ऋग्लक्षणार्थं स्यात्, इतरस्मिन् पक्षे श्रुतिर्न लक्षणा, श्रुतिश्च ज्यायसी लक्षणायाः। तस्मात् अस्मत्पक्षः।

अथ यदुक्तं, स्त्रीलिङ्गसम्बन्धादस्मत्पक्ष एव श्रुतिः, वाक्यं च न भिद्यते, स्त्रीलिङ्गोपपत्तेश्चेति। अत्रोच्यते, गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति अविशेष्यमाणायामपि व्यक्तौ यदवश्यं प्राप्तं लिङ्गं, तत् आश्रयभूतं गुणस्य भवति। अविधिक्षितेऽपि तस्मिन् लिङ्गविशेषनिर्देशोऽनुवादभूतो भवत्येव। यथा, शुक्लः

पुमान्, शुक्ला स्त्री, शुक्लं नपुंसकम् शुक्ल एकः, शुक्लौ द्वौ, शुक्ला बहव इति। शुक्लां शाटीमानयेति। यद्यपि शाट्याद्यानयनं न विधीयते, शुक्लसम्बन्धमात्रविधिस्तु भवति, न तत्र लिङ्गेन विशेषणं क्रियते, तथापि अनुवादभूतः स्त्रीलिङ्गनिर्देशो भवत्येव, शुक्लामानयेति, अनुवादभूतत्वाच्च न वाक्यभेदो भविष्यति। एवं च सति, यद्यपि प्राथम्यस्य स्त्रीलिङ्गसम्बन्धः श्रौतस्तथापि प्राथम्यस्यैवाभ्यासेन सम्बन्धो न लिङ्गस्य। यदि लिङ्गस्यैतेन सम्बन्धोऽभिधीयते, प्राथम्यस्यानुवादता कल्प्येत। प्राथम्यसम्बन्धेऽप्यभिधीयमाने वाक्यं भिद्येत।

अपि च, नैवात्र विवदितव्यं, प्रातिपदिकविशेषणं हि स्त्रीशब्दः, स्त्रियां यत् प्रातिपदिकं वर्त्तते, ततः टाबादय इति, न विशेषणस्य पदान्तरेण सम्बन्धो भवति, यथा राजपुरुषो गच्छतीति। यदा तु प्राथम्यस्याभ्यासेन सम्बन्धः, तत्र प्राप्तमनूद्यते स्त्रीत्वं, यानि सामिधेनीषु वचनानि, ऋचस्ताः, स्त्रीलिङ्गश्च ऋक्शब्दः, तत्र यत् प्रथमं वचनं, तस्याश्रय ऋक्, गुणवचनानाञ्च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, इत्यविशेषितायामप्यृचि स्त्रीलिङ्गं भविष्यतीति, यत् प्रथमवचनं, तत् त्रिराहेति, स्त्री च सा ऋक् सामिधेनी। तस्मात् त्रिः प्रथमामन्वाह इति प्राप्तस्य लिङ्गस्यानुवादः, त्रिः प्रथमामन्वाह त्रिरुत्तमां ताः पञ्चदश सम्पद्यन्ते इति पञ्चदशानां सामिधेनीनां सम्पत्तये त्रिर्वचनम् उच्यमानं परिपूर्णाया ऋचो भवति; न ऋग-

वयवस्य, परिपूर्णा च समिन्धनवती न ऋगवयवः। तस्मात् प्राप्तानुवादो लिङ्क्ष्येति प्राप्तस्य धर्मो न ऋचः। (९।१। ९ अ०)।

यावज्जीवदर्शपूर्णमासयोरारम्भणीयेष्टेः सकृदनुष्ठानाधिकरणम्।

इष्ट्यावृत्तौ प्रयाजवदावर्त्तेतारम्भणीया ॥ ३४ ॥ (पू०)

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति। तत्रारम्भणीया इष्टिः समाम्नाता, आग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्यै चरुं सरस्वते द्वादशकपालमग्नये भगिनेष्टाकपालं निर्वपेत् यः कामयेतान्नाद्यः स्याम् इति नित्यवत् एके भगिनम् आमनन्ति। आवृत्तिश्च दर्शपूर्णमासयोः श्रूयते, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इति। तत्र इष्ट्यावृत्तौ सन्देहः, किम् आरम्भणीयाऽप्यावर्त्तते, न? इति। किं प्राप्तम्? आवर्त्तेत इति, असकृदेव कर्त्तव्येति। कुतः?। एवं प्रयोगवचनोऽनुगृहीतो भविष्यति, प्रयाजवत्, यथा अङ्गभूताः प्रयाजा आवर्त्तन्ते, एवमङ्गभूता आरम्भणीयाऽप्यावर्त्तेत।

सकृद्वाऽऽरम्भसंयोगात् एकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥ सि०

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, यदुक्तमारम्भ-

णीया आवर्त्तेतेति । सकृदेव कर्त्तव्या । कुतः ? । आरभ्यसंयोगात्, दर्शपूर्णमासयोरारभ्येण संयुज्यते, साधारणश्च सर्वेषां प्रयोगाणामारम्भः । कथम् ? । अग्नीनाधाय सर्वः सङ्कल्पयति, पर्वणि पर्वणि मया दर्शपूर्णमासौ कर्त्तव्याविति, एवञ्च अध्यवसाय दर्शपूर्णमासौ कर्त्तव्याविति, आरभ्यणीया क्रियते, एष एवास्य आरम्भो यदध्यवसानं नाम, तच्च साधारणं सर्वेषां प्रयोगाणां, यावज्जीवप्रयोगात् । अथापि प्रथमं प्रवर्त्तनमारम्भः, तथापि प्रथमप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्ति । तस्मात् सकृदारभ्यणीया कर्त्तव्येति । (९ । १ । १०) । एवं वा,

---

आरभ्यणीयेष्टेः पुरुषसंस्कारताधिकरणम् ।

दृष्टावृत्तौ प्रयाजवदावर्त्तेतारभ्यणीया ॥ ३४ ॥

(पू०)

यस्तु प्रथमः पदार्थं आरभ्य इति, तत्रैष संशयः, किं दर्शपूर्णमासयोरारभ्यमाणयोरारभ्यणीया प्रथमं पदार्थं सम्पन्नं करोति, उत, पुरुषसंस्कारभमाणस्य प्रथमं दर्शपूर्णमासयोः प्रवर्त्तमानस्य आरभ्यणीया कर्त्तारमारभ्यणयोग्यं करोति ? । किं प्राप्तम् ? दर्शपूर्णमासयोः प्रकरणात् तयोरारम्भे स्यात्, पुरुषसंस्कारे फलं कल्पयितव्यं तस्मादर्शपूर्णमासारम्भे । एवञ्चेत् आरम्भभेदादिष्टावृत्तौ प्रत्यारम्भं स्यात्, यथा प्रयोगावृत्तौ प्रयाजाः ।

सकृदाऽऽरब्धसंयोगात् एकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥ (सि०)

सकृद्धा भवितुमर्हति। कुतः ?। पुरुषारब्धसंयोगात्, पुरुषे दर्शपूर्णमासावारभमाणे विधीयते। कुतः ?। निर्वपेत् इति हि श्रुत्या कर्तृसम्बन्धः क्रियते, तत्र पुरुषप्रयत्नवचनं विवक्षितस्यार्थं भवति, इतरथा पदार्थमात्रे विधिलिते कर्तुः प्रयत्नवचनमविवक्षितं स्यात्, प्रयोगवचनप्राप्तमेवानूद्यते। यत्तु, कर्तृसम्बन्धे फलं कल्पयितव्यम्। तत्र कल्पयिष्यते, कृतारब्धणीयाकः पुरुषः प्रयोगवचनेन ग्रहीष्यते। एवञ्चेत् एकस्मिन्नेव आरम्भे कृतारब्धणीयाके कृते पुरुषे तत्र प्रयोगात् यावज्जीवं प्रयोगे कृतारब्धणीयाकः पुरुषो भवति। प्रथमं दर्शपूर्णमासौ आरभमाणः कृतारब्धणीयाको जातः, द्वितीयादिष्वपि प्रयोगेषु दर्शपूर्णमासौ आरभमानः कृतारब्धणीयाको जात इति योग्य एव भविष्यति।

अथ उच्यते, समानेऽहनि आरभमान इति भवति, न च, द्वितीयादिषु प्रयोगेषु समानेऽहनि कृतारब्धणीयाकोऽसाविति। अत्र उच्यते, द्वितीयादिष्वपि प्रयोगेषु समाने एव अहनि दर्शपूर्णमासावारभमानोऽसौ कृतारब्धणीयाको जात इति योग्य एव भविष्यति। (९।१।१०)।

निर्वपमन्त्रे सवित्रादिशब्दानामनूद्याधिकरणम् ।

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तवा-चोदितमप्राप्तत्वोदिताभिधानात् ॥ ३६ ॥ (सि०)

स्तो० दर्शपूर्णमासौ, तत्र निर्वपमन्त्रः, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि इति। तत्रैषोऽर्थः सांशयिकः, किं सवित्रश्विपूषशब्दानां विकृतौ जघः, उत अनूद्यः ? इति । तत एतत्तावत् परीक्ष्यते, कर्मणि समवेतम् अर्थमेते शब्दाः अभिदधति, उतासमवेतम् ? इति । यदि समवेतम्, जहिष्यन्ते । अथ असमवेतम्, अविकृताः प्रयोक्ष्यन्ते । तदुभयमपि सह परीक्ष्यते । किं तावत्प्रतिभाति ? तत्र समवेतम् अभिवदन्तीति । कुतः ? । एतद्धि मन्त्रपदानां दृष्टं प्रयोजनं, यत् समवेतमर्थं प्रकाशयन्तीति, तच्चासमवेतार्थप्रकाशने न किञ्चिदपि दृष्टं प्रयोजनम् । समवेतानान्तु प्रकाशने दृष्टमस्ति, तद्यदि समवेताभिधायिन एते शब्दास्ततः प्रयोजनवन्तः । कथं पुनः समवेताभिधायिनः ? । यदि नाम सवित्रादयः शब्दाः अग्न्यादीनां वाचका भवेयुः, यदि वा सवित्रादयो देवताविशेषा दर्शपूर्णमासयोः स्युः, तथाप्यन्यपदानामदृष्टार्थता मा भूदित्यन्यतरदध्यवसीयते, मान्त्रवर्णिको वा देवताविधिः, सवित्रादयो वा शब्दा अग्न्यादीनां वाचका भवेयुः, तस्मादर्थवत्त्वादन्यतरदध्यवसेयम् ।

अत्राह, ननु अग्नये जुष्टम् इत्यत्रावयवभूताः सवित्रा-

दयोऽग्न्यादीनां वचना अपि सन्तोऽग्न्यादिभिः प्रकाशितायां देवतायां न किञ्चिदध्यधिकं कुर्युः, नो खल्वपि सवित्रादिवचना एव मान्त्रवर्णिकाः शक्नुवन्त्यप्रकर्तुम्। अत्र उच्यते, पृथग्वाक्यानि एतानि भविष्यन्ति, तेषां, जुष्टविर्वपामि इति साधारणोऽनुषङ्गः, तानि वाक्यानि दर्शपूर्णमासयोर्गुणभूतानि यदि एतद्देवत्यानि अत्र हवींषि विद्यन्ते, ततोऽवकल्पन्ते, इत्यर्थापत्त्या मान्त्रवर्णिको देवता विधीयन्ते। अग्न्यादिवचनं तावत् सवित्रादीनां, पृथग्वाक्यानि वा अग्निवाक्येन वैकल्पिकानीति।

एवं प्राप्ते ब्रूमः, न एवमादीनि लक्षितव्यानीति, अचोदिते लक्षो न प्राप्नोति, चोदिताभिधानाच्चलक्ष्येति। तत एतदुच्यते, असमवेताभिधायिनः सवित्रादय इति। कथम्?। नह्यत्र सवित्रादिदेवत्यं कर्म चोद्यते। नच, अग्न्यादीनामर्थेषु सवित्रादयः शब्दाः प्रसिद्धाः।

अत्राह, नन्वार्थापत्त्या अन्यतरदध्यवसीयेतेत्युक्तं, सति एतद्देवत्ये कर्मणि सवित्रादिवाक्यानि उपपद्यन्ते, अग्निवचनत्वे वा सति, या हविषो देवता, सा मन्त्रवचनेन प्रकाशयितव्या। सवित्रादयश्च शब्दा निर्वापवाक्ये प्रकाशनार्थाः ते हविर्देवतां प्रकाशयन्त उपपद्यन्ते, नान्यथेति, अग्न्यादयश्च हविर्देवता इति तद्वचना इत्यध्यवसीयते। अत्र उच्यते, यदि अकल्प्यमाने आनर्थक्यमेषां स्यात् ततोऽन्यतरत्कल्प्येत, अर्थाभिधानसंयोगाच्चलक्ष्येषु शेषभावो (३।२।१ सू०) भवतीति, न त्वेवमकल्प्यमानेऽप्यानर्थक्यम्। तस्मात् न अन्यतरस्यापि कल्पने किञ्चिदस्ति प्रमाणम्।

न च, चोद्यन्ते एतच्छब्दिका देवताः। तचाचोदितमप्राप्तम् जहम् चोदिताभिधानात्।

अथ यदुक्तं, प्रत्यायकेन शब्देन प्रकाश्यन्ते अत्र देवताः, तत्रापि अश्रुतानां प्रकाशने न किञ्चिदस्ति प्रयोजनमिति, तत् परिहर्त्तव्यम्। अत्रोच्यते,

ततश्चावचनं तेषामितरार्थं प्रयुज्यते ॥ ३७ ॥

(आ० नि०)

ततश्च तेन कारणेन अश्रुतानां वचनं न क्रियते, सविचादिभिः शब्दैः। केन तर्हि कारणेन क्रियते? इतरार्थं प्रयुज्यते। निर्वापसंस्त्यर्थम्, देवस्य सवितुः प्रसवे, देवेन सविता यजमानेन प्रसूते, उदिते वा सवितरि, अश्विनोर्बाहुभ्यां, परिक्रयमभिप्रेत्य यजमानयोर्दम्पत्योर्बाहुभ्याम्, अश्विनौ हि तौ अध्वर्यौ अश्वदानेन अग्नितवन्तौ वा तदृग्यज्ञफलमश्नुवाते, तत् बाहू इति स्त्री बाहू व्यपदिशति। देवताध्वर्यूंर्वा अश्विनोरेतौ बाहू इति। पूषणन्तु यजमानमेव मन्यते पुष्णातेः, एवं सर्वे निर्वापविशेषप्रकाशनार्थाः।

अत्राह, कस्मात् न, उत्कृष्टाः सविचादयः शब्दाः प्रकरणान्तरे सवितारम्, अश्विनौ पूषणञ्चाभिवदन्ति? लिङ्गेन तत उत्कृष्यमाणाः प्रकरणं बाधितुमर्हन्ति। अत्र उच्यते, सविचादयः परविशेषणं विभक्तिमुत्पाद्य क्रियन्ते, प्रातिपदिकार्थस्तु अव्यतिरिक्तः इति गम्यते। तच्च लिङ्गमुत्पाद्य बाध्यते, लिङ्गं हि प्रातिपदिकार्थप्रकाशनं देवतार्थ-

मिति ज्ञात्वा, इह देवताभावात् यज्ञ देवता तत्रोत्कर्षति, विभक्तिश्रुतिस्तु प्रातिपदिकार्थं पदार्थान्तरविशेषणं ज्ञापयति, तच्चेहास्ति पदान्तरम् श्रुतिश्च लिङ्गात् बलीयसी, तस्मात् न उत्कर्षः।

आह, यदा सविचादयो यजमानपराः, तदा सर्वे कथमनूद्यः ? इति। उच्यते, जोषणार्थमिदं वाक्यं, अनुज्ञापनार्थम्, अजोषितस्य जोषणं कर्त्तव्यम्, तच्च दृष्टोऽर्थः, अनुज्ञापनं पूर्वं हविषानेन कृतं, तददृष्टार्थमापद्येत। अपिच, जुष्टं निर्वपामि इति जोषणकरणं निर्वपामि इति भावशब्देन उच्यते, सवितुः प्रसवे इत्यनुज्ञानिर्वृत्तापरविशेषणार्थं कीर्त्यते, अननुज्ञातमपि निर्वपणं शब्दार्थं कुर्यादेव, नत्वयोषितेन यागः श्रूयते, तस्मात् जोषणार्थत्वात्परार्थाः सविचादयः शब्दा नोद्दिश्यन्ते इति। (८।१ ११ अ०)।

अग्नये जुष्टमिति मन्त्रे अग्निशब्दस्य विकृतावूहाधिकरणम्।

गुणशब्दस्तथेति चेत् ॥ ३८ ॥ (पू०)

तस्मिन्नेव वाक्ये दर्शपूर्णमासयोः अग्नये जुष्टं निर्वपामि इति समाम्नायते। तत्रायमर्थः सांग्रहिकः, किम् अग्निशब्दोऽपि विकृतौ नोह्यते, सोऽपि न समवेतवचनः। उत उह्यितव्यः, समवेतवचनो हि सः ? इति। किं प्राप्तम्, एवं चेत्तत्र संशयः, सोऽपि गुणशब्दस्तथेवासमवेतवचनः।

कुतः ?। सविचार्योऽस्मिन् वाक्येऽसमवेतवचनाः, यद्यग्निशब्दोऽपि असमवेतवचनः, एवमवैलक्षण्यं भविष्यति, अवैलक्षण्यञ्च न्याय्यम्। यदि समानं कारणं, तेन न्यायेन अवैलक्षण्यमुच्यते, समानञ्चेह कारणं, य एषां शब्दानामर्थः, स इह प्रयोगे नास्तीति अग्नये जुष्टं निर्वपामि इत्यस्यापि योऽर्थः, स इह नास्ति, अग्नये जुष्टं निर्वपामि इत्यनेन जुष्टस्य निर्वाप उच्यते, न चेह जुष्टस्य निर्वापोऽस्ति। अजुष्टं चेह निर्वप्तव्यं, निर्वापेणैव तत् क्रीयते, तस्मान्न समवेतवचनः। तस्माच्च्युतार्थस्य वचनमुत्तरार्थं प्रयुज्येत निर्वापस्तुत्यर्थेनेति। तस्मादेतदपि विकृतौ नोद्धितव्यमिति।

न समवायात् ॥ ३९ ॥ (सि०)

नैतदेवं, समवेतवचनो हि अग्नये जुष्टं निर्वपामि इति। ननु एतदुक्तं, जुष्टस्यात्र निर्वाप उच्यते, नच जुष्टं निर्वप्तव्यम् इति। अत्रोच्यते, नैव जुष्टस्य निर्वाप एतेन वाक्येनोच्यते, किन्तर्हि निर्वापेण जुष्टकरणम्, अग्नये जुष्टं करोमि इति। एवं हि दृष्टार्थं भवतीति। अतोऽतुल्यकारणत्वात् वैलक्षण्यमेव न्याय्यम्। तस्मात् समवेतवचनोऽग्निशब्द उद्धितव्यश्च विकृताविति। (९।१।१२ अ०)।

सर्वत्र खावापमन्त्रे धान्यशब्दस्योद्धाधिकरणम्।

एवं वा,

गुणशब्दस्तथेति चेत् ॥ ३८ ॥ (पू०)

दर्शपूर्णमासयोरामनन्ति, धान्यमसि धिनुहि देवानिति दृषदि आवपति इति।

तत्र धान्यशब्दं प्रति संशयः, किं समवेतवचनः, न वा ? इति। किं प्राप्तम्, योऽयं गुणवचनशब्द इव लक्ष्यते धान्यशब्दः, नासौ समवेतवचनः स्यात्, धान्यशब्दो हि धान्यमभिवदति, न तु धान्यमोप्यते, सतुषे हि धान्यशब्दो वर्त्तते, तण्डुलेष्वेव ओप्यमानेषु धान्यप्रकाशनं क्रियते तत् असमवेतस्य प्रकाशनेऽदृष्टं यथा स्यादिति। तस्माद् विकृतिषु नोहितव्यमिति।

न समवायात् ॥ ३९ ॥ (सि०)

नैतदेवं, समवेतो हि धान्यशब्दार्थः, स हि तण्डुलेषु वर्त्तते, तद्विकारत्वात् लक्षणया। यथा काण्डिकेषु शाखयो भुञ्जन्ते, गावः पीयन्ते इति व्युत्पादनेऽदृष्टं कल्पयितव्यमिति लक्षणाशब्दः परिकल्प्यते। तस्मात् समवेतवचनः, विकारे च जहितव्य इति।

प्रयोजनमस्ति, आख्यानामयनं षट्त्रिंशल्लक्षवत्सरं, तत्रेदं समाम्नायते, संख्याते संख्यातेऽहनि षट्पतिर्ह्यगयां याति, स तत्र यान् खगान् हन्ति तेषां तरसाः सवनीयाः पुरोडाशा भवन्ति इति। तत्राविकारेण धान्यमसि धिनुहि देवान् इति प्रयोगः कर्त्तव्यः, यथा पूर्वः पक्षः। यथा सिद्धान्तः, जहः कर्त्तव्यः, मांसमसि धिनुहि देवान् इति। (९।१।१२ अ०)।

इडोपह्वाननन्तं यज्ञपतिशब्दस्यानूहाधिकरणम्।

चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ॥४०॥

स्तो दर्शपूर्णमासौ, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति, तत्र इडानिगदः, इडोपह्वता इत्येवमादिः। तत्रेदमाम्नायते, दैव्या अध्वर्यव उपह्वता उपह्वता मनुष्या य इमं यज्ञमवान् ये च यज्ञपतिं वर्द्धान् इति। तत्रायमर्थः सांशयिकः, किं बहुयजमानके यज्ञपतिशब्दः जहितव्यः, उत, अविकारेण प्रयोक्तव्यः ? इति।

तत्रेदं तावत् परीक्ष्यते, किं समवेतवचनो यज्ञपतिशब्दः, उत, असमवेतवचनः ? इति। कथं समवेतवचनः ?। यदि यज्ञपतिहविर्वचनं यज्ञपतेरुपकारकं, ततः समवेताभिधायी, अथेतत् स्तुत्यर्थं, ततो न समवेताभिधायी।

किं प्राप्तम् ? जहितव्यः, समवेताभिधायी। कथम् ?। यज्ञपतिहविर्वचनात् यज्ञपतयः प्रोक्षन्ति, इडापदानपेक्षेय पदैर्यज्ञपतिहविरभिधीयते। तस्मात् मुख्यः प्रत्ययः, इडास्तुतौ जघन्यः। तस्मादर्थविप्रकर्षात् न इडास्तुतिः। अतो यज्ञपतिशब्दः जहितव्यः। यस्यैव हविर्नीयते, स एवोत्साहसंस्कारेण संस्कृतो न स्यात्। तस्मात् सर्वे हविःसंस्कारार्थं वदितव्याः। सर्वेषु वदितव्येषु बहुवचनम्।

एवम् प्राप्ते ब्रूमः, चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात्, चोदितमपि यत् समवेतं, परार्थं चिकीर्ष्यते, न स्वसंस्कारार्थं, तदपि अविकारेण प्रयुज्यते, तत् न जहितव्यं स्यात्, परार्थत्वात्, अत्र हि यज्ञपतिवचनं हविर्विशे-

षणार्थं, हविर्वचनञ्च इड़ास्तुत्यर्थम्। कथमवगम्यते ?। इड़ोपक्रमेण ऐकवाक्यत्वात्, इड़ाप्रकरणाच्च।

अथ यदुक्तं, गम्यते, इड़ापदानपेक्षं यज्ञपतिहविर्वचनं तेषामुत्साहकम्, उपहूता मनुष्या ये यज्ञपतिं वर्द्धयेयुः इति। अत्रोच्यते, स यो वैवं विद्वानिड़या चरति इत्यभिधाय, अथ प्रतिपद्यत इड़ोपहूतोपहूतेड़ोपास्या इड़ाह्वयामि इड़ोपहूता इत्याह। तेनावगम्यते, यस्यैष आरम्भः, स इड़ाया मन्त्र इति, तस्मिंश्च यज्ञपतिं उपहूता मनुष्याः इत्येवमादिः, यज्ञपतिं वर्द्धान्, इत्यन्तः। तस्मादिड़ामुपक्रम्य वदितव्य इति वाक्यादवगम्यते। समर्थस्य इड़ोपक्रमे, यजमानन्तु प्रोत्साहयितुं वदितव्य इति नास्ति वाक्यं, केवलं वदितुं सामर्थ्यमस्ति, नच, सामर्थ्यमात्रेण वाक्यानि नियोगा भवन्ति। इड़ाप्रकरणं चैवमनुगृहीतं भविष्यतीति, इड़या च सहैकवाक्यता। तस्मादियं वचनव्यक्तिः, उपहूता मनुष्या ये यज्ञपतिं वर्द्धयितुं समर्था इति, तत्र यज्ञपतिविशिष्टा हविर्वक्तव्येति एकस्मिन्नपि यजमाने कीर्त्तिते, भवति विशेषणकार्यम्। तस्मात् अविकारः स्यात् विधिवत्, यथा यत्र यजमानो गुणभूतो विधीयते, तत्र येन केनचित् यजमानेन स विधिः सिध्यति, यथा, यजमानसम्मितोदुम्बरी भवति, शुक्लं यजमानोऽन्वारभते इति। (६।१।१३। अ०)।

प्रहरणकरणतूक्षवाके यजमानग्रब्दस्य ऊहाधिकरणम्।

विकारस्तत्प्रधाने स्यात् ॥ ४१ ॥

अस्ति दर्शपूर्णमासयोः सूक्तवाकः, सूक्तवाकेन प्रस्तरं प्रहरति इति। तत्रेदं समाम्नायते, अयं यजमान आयुराशास्ते इति। तत्रायमर्थः सांयज्ञिकः, किं बहुकर्तृके विकारे यजमानग्रब्दः ऊहितव्यः, उत न ? इति। किं प्राप्तम् ? अविकारेण प्रयोक्तव्यः, तथा सामर्थ्यमनुगृह्यते, न च, अयं समवेतवचनः, परार्थेन हि अत्र यजमान आयुराशास्ते इति आयुराशासनेन यजमानस्य न कश्चित् दृष्टोऽर्थः संजन्यते, तस्मात् आयुराशासनमदृष्टार्थं, यजमानविग्रिष्टा अग्रीरकेनापि यजमानेन कीर्त्तितेन यथा श्रुता, तथा कृता भवति। यथा यजमानेन सम्मितोदुम्बरी भवति इति, तद्वेतत्। तस्मादविकारेण प्रयोक्तव्यमिति।

एवं प्राप्ते ब्रूमः, विकारः स्यात् ऊहः, तत्प्रधाने यजमानप्रधाने। कथं यजमानप्राधान्यम् ?। एवं श्रूयते, सूक्तवाकेन प्रस्तरं प्रहरति इति, यदि सूक्तवाकः प्रस्तरप्रहरणे तत्साधनं तत्फलं वा प्रकाशयति, ततः सूक्तवाकेन प्रस्तरः प्रकृतो भवति। प्रहरणफलमायुराशासनं कथ्यते, यजमान आयुराशास्ते, एतेन कर्म्मणेति यजमानेन प्रस्तरः प्रकृतो भवति। तत्र य एव यजमानः फलं प्रति प्रधानभूतो न सङ्कीर्त्यते, तेन न प्रकृतं स्यात्। तस्मात्सर्वं सम-

वेता: सङ्कीर्त्तयितव्या:। सर्वेषु च कीर्त्यमानेषु बहुवचन भवति। तस्मादूहो यजमानस्येति। (८।१।१४ अ०)।

सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानूहाधिकरणम्।

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥ (सि०)

अस्ति ज्योतिष्टोम:, तत्र सुब्रह्मण्यानिगद: समाम्नात:, इन्द्र आगच्छ हरिव आगच्छ मेधातिथेर्मेष: इत्येवमादि:। अग्निष्टुति च श्रूयते, आग्नेयी सुब्रह्मण्या भवति इति। तत्र इन्द्रशब्दस्य स्थाने जह: क्रियते। अथेदानीं हरिव आगच्छ इत्येवमादिषु संशय:, जहितव्यं न? इति। किं प्राप्तं, तद्विशिष्टं प्रतीयेत, तेन विशिष्टम्, इन्द्रपदस्थाने जह:, एतेन विशेषेण विशिष्टम् अविकृतमेव वचनं प्रतीयेत। कुत:?। असंयोगात् तदर्थेषु, नैषां शब्दानां तेषु अर्थेषु संयोग:, हरिवत्तादिषु, न हरिवदादय: समवेता इन्द्रे विद्यन्ते गुणा:, प्रमाणाभावात्, अविद्यामानास्त्वेते उच्यन्ते। एवं श्रुत्या अर्थ: प्रतिज्ञातो भवति, इतरथा लक्षणा स्यात्, न हरिवत्तादय उच्येरन्, हरिवत्तादिभि: सोऽस्य गुणो लक्ष्यते। अथ असमवेतवचना मुख्यार्था एव भविष्यन्ति, आत्मीयं गुणं न लक्षयिष्यन्ति इत्युच्येत। तथा अश्रुत्यैव। तस्माददृष्टार्थं गुण उच्यत इति अविकारेण प्रयोग: स्यात्। तत्रैवं वचन-

व्यक्तिर्भवति, इन्द्र आगच्छ हरिव आगच्छ इति हरिवदादीन् अस्य गुणानारोपयति, हरिवदादिभिः सम्बध्यमान इन्द्रोऽभ्युदयकारी भवति। शक्यते चाग्निरपि तैः सम्बन्धयितुं, तस्माद्विकारेण गुणानां प्रयोगः।

अथोच्यते, अस्मादेव सामानाधिकरण्यवचनादिन्द्रे एते गुणा विद्यन्ते इति। तन्न, अविद्यमानेष्वपि स्तुत्या अस्य सामानाधिकरण्यवचनमुपपद्येतैव, यथा इन्द्रो बृहस्पतिर्देवदत्तः इति।

कर्माभावादेवमिति चेत् ॥ ४३ ॥ (आ०)

इति चेत् भवान् पश्यति, अविकारेण हरिवदादीनां वचनमिति। कर्माभावादेवं स्यात्, यद्येते गुणा इन्द्रे न भवेयुः, कर्मजास्तु एते गुणाः इन्द्रस्य विद्यन्ते। हरिव आगच्छेति पूर्वपश्चापरपश्चो वा इन्द्रस्य हरी ताभ्यां ह्येष सर्वं हरति इति। मेधातिथेर्मेषः इति मेधातिथिं हि कागवायनं मेषो भूत्वा जहार, बृषणश्वस्य मेनका नाम दुहिता बभूव, तामिन्द्रयकमे, गौरावस्कन्दन् इति, गौरमृगो भूत्वा अरण्याद्राजानं सोमं पिबति इति वचनैः इमे गुणा इन्द्रस्याख्यायन्ते। तस्मात्समवेतवचना हरिवदादयः शब्दाः। तथासतीन्द्रप्रत्ययाय उच्चार्यन्ते इति न अदृष्टकल्पना भविष्यति। तत्रैवं वचनव्यक्तिः, इन्द्र आगच्छ, हरिव आगच्छ इति, हरिवत्तादिगुण एव यस्त्वं, स आगच्छेति। लक्षणा च अदृष्टकल्पनाया न्याय्यसी। तस्माद्दृष्टव्या हरिवदादयः शब्दा इति।

न परार्थत्वात् ॥ ४४ ॥ (आ० नि०)

नैतदेवं, परार्था हि हरिवदादयः शब्दाः, इन्द्रसुत्यर्थाः, सुतये हरिवदादिसम्बन्धोऽस्य क्रियते। तत् पुरस्तादेवोपवर्णितम्। सुत्यर्थश्च अग्नेरप्येतैरभिसम्बन्धः शक्यते कर्तुम्। यस्तूक्तं, समवेता गुणा इन्द्रस्य विद्यन्ते, पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी इत्येवमादिभिर्वचनैरवगताः इति, तत्र, न हि इमानि वचनानि इन्द्रस्य सम्बन्धिनौ हरी विदधति, नह्येवमभिसम्बन्धः क्रियते, यावेतौ पूर्वपक्षापरपक्षौ ताविन्द्रस्य हरी इति, तत्र हि हेतुरुपदिश्यते, ताभ्यां ह्येष सर्वं हरति इति। न ह्येदं प्रसिद्धं ताभ्यां इन्द्रः सर्वं हरति इति, सिद्धो हि हेतुर्भवति, न प्रसाध्यः। यथा तु इमौ हर्त्तारौ प्रसिद्धौ, कालेन सर्वमपचीयते इति, तथा न इन्द्रस्याग्नेश्च कश्चिद्विशेषः। तत्र एभिरभिधानम् अग्नेः प्राप्नोत्येव।

अथ इन्द्रस्य हर्त्तृत्वं विधीयते इत्युच्यते। तथा च वाक्यं भिद्येत, इन्द्रस्य एतौ हरी इत्येतदपि विधातव्यम्। अथैतत् विधीयते, तदा स एव दोषः, नास्त्यग्नेरिन्द्रस्य वा विशेष इति। अथ पूर्वपक्षापरपक्षाविन्द्रस्येति विधीयते, तौ च हरी तत्सादिन्द्रो हरिवानिति। तथा हेत्वप्रसिद्ध्यादिः स एव दोषः। न च, विधीयमाने वैयर्थ्यं भवति। प्रसिद्धवचनो ह्येष दृष्टः, न वै ज्ञेयानि सख्यानि सन्ति इति यथा।

तथा मेधातिथेर्मेषः इत्येवमादि इतिहासवचनमिव

प्रतिभाति, इतिहासे च विधौ सति आदिमत्तादोषो वेदस्य प्रसज्येत। अस्तु इति चेत्। तथा सति तस्या-म्नायाख्यात् मेधातिथेर्हि काण्वायनस्य मेध इत्यप्रसिद्धिः सर्वत्र च निगदविधानं, तत्र अपरस्मिन् विधीयमाने वाक्यभेदप्रसङ्गः। तस्मात् नैते गुणा इष्टे विद्यन्ते, इति असमवेतवचनत्वादविकारेण प्रयोग इति।

तत् एतत् न रोचयन्ते याज्ञिकाः, जहं कुर्वन्ति, अग्न आगच्छ रोहिताश्व हव्यवाहनो धूमकेतो जातवेदो विच-र्षण इति। (८।१।१५ अ०)।

तस्मै प्रतमितिमन्त्रलिङ्गाधिकरणम्।

अथेदमन्यदुदाह्रियते,

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥

(मि०)

अस्ति साधस्कः, तत्रेदं समामनन्ति, साधस्क्लिवस्कः सोमक्रयणः इति। अस्ति तु प्रकृतावेकहायनी क्रयार्था। तत्र इदमाम्नायते, इयं गौस्तया ते क्रीणामि तस्मै घृतं तस्मै घरः तस्मै दधि तस्मै मस्तु तस्या आतञ्चन तस्मै नवनीतं तस्मै घृतं तस्या आमिक्षा तस्मै वाजिनम् इति। तद्दिह चोदकेन प्राप्तम्। तत्र सन्देहः, किं गोशब्दस्थाने जहं कृत्वा अवशिष्टानां पदानामविकारः, उत सर्वेषामूहः? इति। किं प्राप्तम्? गोपदार्थविशिष्टमेव जहवचनं

स्यात्। तस्मै घृतम् इत्येवमादीनाम् अविकारः, असंयोगात् घृतादिभिरर्थैः, तेषामेकहायन्याम्, एकहायनीत्वादेव, न हि एकहायनी दुह्ये, तस्याम् असमवेतं वदन्ति यते। तस्मात्साण्डेऽपि अविकारेण प्रयोक्तव्या इति।

कर्माभावादेवमिति चेत् ॥ ४३ ॥ (आ०)

इति चेत् एवं भवान्मन्यते, नैकहायन्याम् एते समवेतान् अर्थानभिवदन्ति इति, भवेदेतदेवं, यद्येकहायन्या इमे गुणा न भवेयुः, कालान्तरे तु तस्या उपपद्यन्ते, न तु साण्डस्य, भविष्यत्कालवचना अप्येते प्रतीचनार्था भवन्ति, तस्मै घृतं भविष्यति। तस्मात्राविकारेण प्रयोक्तव्या इति।

न परार्थत्वात् ॥ ४४ ॥ (आ० नि०)

नैतदेवं, अविकारेण प्रयोक्तव्या इति। असमवेतवचना होते नैकहायन्यां भवन्ति, एकहायनीत्वादेव। अथ मन्येत, कालान्तरे भविष्यन्ति इति, साण्डेऽपि कालान्तरे भवितुम् अर्हन्ति, साण्डादपि हि या धेनुर्जनिष्यते, सा धोक्ष्यते इति। तस्मादविकारेण प्रयोक्तव्या इति। (८।१।१५ अ०)।

सारस्वत्यां मैथ्यामग्निवचनाभावाधिकरणम्।

लिङ्गविशेषनिर्देशात् समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४५ ॥ (सि०)

अस्ति ज्योतिष्टोमः, तत्र पशवः समाम्नाताः, आग्नेयः पशुरग्निष्टोमे आलब्ध्य ऐन्द्राग्नः पशुरुक्थ्ये ऐन्द्राबार्हणिः षोडशिनि सारस्वती मेषी अतिरात्रे इति। अस्ति तु अग्नीषोमीयेऽध्रिगुप्रेषः, उपनयत मेध्यादुर आयासाना मेधपतिभ्यां मेध्य इति। तत्र सन्देहः,-किं सारस्त्यां मेष्याम् अध्रिगुवचनं कर्त्तव्यं, न? इति। ननु अग्नीषोमीयार्थं तत् चोदकेनेह प्राप्तम् इति। अत्र उच्यते, सर्वेषां समानो विधिरिति कृत्वा-चिन्ता।

किन्तावत् प्राप्तम्? समानविधानेष्वेषु पशुषु अप्राप्ता सारस्वती मेषी अध्रिगुवचनम्। कुतः?। लिङ्गविशेषनिर्देशात्, विशिष्टलिङ्गो हि अध्रिगुवचनेन निर्दिष्टः, प्राप्ता अग्निं भरता इति पुंशब्दः, स्त्रीत्वं चाप्राप्तः। नच पुंवचनः स्त्रियमभिधित्सितुमलं भवति शब्दः, तस्मादध्रिगुवचनम् अप्राप्ता सारस्वती मेषीति।

पशवभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ ४६ ॥ (पू०)

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति अप्राप्ता सारस्वती अध्रिगुवचनमिति। तस्यामपि अध्रिगुवचनं स्यात्। कुतः?। प्रकरणात्, समानं प्रकरणं सर्वेषां पशूनामिति कृत्वा चिन्त्यते, तेन सारस्वत्या अपि प्राप्तीति। लिङ्गविशेषादयुक्तं तस्यामिति यदुच्यते, तत्र, पशवभिधानात्, अस्ति तत्र पशुत्वं सन्निहितं, तदभिप्रेत्य, प्राप्ता अग्निं भरता पशवः इति ब्रूयात्। तद्धि चोदनाभूतं, सर्वनाम-

शब्दस्य पुंविषयत्वं, तत् पशुशब्देनोच्यते। अस्ति च तत् मेध्यां, तदभिप्रेत्य पशुशब्दसमानाधिकरणं सर्वनामशब्दं समुच्चारयिष्यति। एवं प्रकरणमनुगृहीष्यते। तस्मात् प्राप्नुयात् सारस्वती अध्रिगुवचनमिति।

विशेषो वा तदर्थनिर्देशात् ॥ ४७ ॥ (उ०)

वाशब्द एतं पक्षं व्यावर्त्तयति। नैतदस्ति, प्राप्नुयात् सारस्वती अध्रिगुवचनमिति। अयमन्यः पक्षः, न प्राप्नुयादिति। कुतः? विशेषो वा तदर्थनिर्देशात्, पुमर्थं श्लेष शब्दो निर्देष्टुं शक्नोति, स्त्रीलिङ्गश्चायमर्थो मेषीति, स्त्रियं पुंशब्दो न शक्नात्यभिवदितुम् इति प्रथम एव पक्षः संकीर्त्तितः। केवलं परपक्षस्य अनवकृप्तिर्वक्तव्या।

पशुत्वं चैकशब्दात् ॥ ४८ ॥ (आ०)

अथ यदुक्तं, पशुत्वाभिप्रायमेतद्वचनम्, एको हि शब्दः पशुत्वस्य च पर्यायश्च, तेन प्राप्नै पशवः इत्यभिसम्बन्धो भविष्यतीति। तत्परिहर्त्तव्यमिति।

यथोक्तं वा सन्निधानात् ॥४९॥ (आ० नि०)

यथोक्तं स्यात् अध्रिगुवचनम्, अप्राप्ता सारस्वती। कुतः?। पूर्वस्मादेव कारणाल्लिङ्गविरोधादिति। यदुक्तं, पशुशब्दसमानाधिकरणः सर्वनामशब्दः प्रयोक्ष्यते इति। तत्र। कुतः?। सन्निधानात्, सन्निहितवचनो हि सर्वनामशब्दः, उच्चरितमात्रो यः पदार्थः शब्देन सन्निहितः,

तेन सम्बध्यते, अथ तस्मिन् असति, लिङ्गादिसर्वविशेषण-विशिष्टे रूपेण सन्निहिते प्रयुज्यते । सन्निधाने न एकेन विशेषणेन विशिष्टां व्यक्तिमभिवदितुं शक्नोति । सन्निधानात्तत्रैकं सामान्यमाश्रीयते, नान्यत् किञ्चित् पशुत्वादि । तत्रोच्चार्यमाणे पशुशब्दे शब्देन व्यक्तिर्निष्कृष्टे पशुत्वे अस्मै पशवः इति श्रूयते सम्बन्धः कर्तुम् । अनुच्चार्यमाणे तु लिङ्गविशेषवचनः प्राप्नोति । तस्मात् अप्राप्ता सारस्वती अग्निगुवचनमिति ज्ञात्वा चिन्तेयम् । अत्र प्रयोजनं न वक्तव्यं, किमग्नीषोमीयार्थाः पशुधर्माः, उत साधारणाः ? इत्यस्मिन्नधिकरणे प्रयोजनाय विचारोऽयं, यदि साधारणाः पशुधर्माः ततः सारस्वती अग्निगुवचनमप्राप्ता, अथाग्नीषोमीयधर्मा ततोऽस्याम् अग्निगुवचनमूहेन प्राप्यते । नच प्रयोजनस्य प्रयोजनं वक्तव्यम् । (८ । १ । १६ अ० ।

यज्ञायज्ञीये गिराशब्दस्य स्थाने इरापदस्यैव कर्त्तव्यताधिकरणम् ।

आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥ ५० ॥ (मि०)

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत इति । तत्र यज्ञायज्ञीयं प्रकृत्यामनन्ति, न गिरा गिरेति ब्रूयात् यद्गिरा गिरेति ब्रूयात् आज्ञानं तदुद्गातोद्गिरेदेरं ज्ञात्वोद्गेयम् इति । तत्र संशयः, किम् इरापदं गिरापदं वा कर्त्तव्यम्, अथ वा इरापदमेव ? इति ! किं प्राप्तम् ?

यत्र अधिकारे आम्नातात् अन्यत् उच्यते, तद्विकारभूतं स्यात्। ज्योतिष्टोमाधिकारे आम्नातात् गिरापदादन्यदुच्यते इरापदं, तत् विशेषे उच्यमानं सामान्येन प्राप्तं गिरापदं बाधेत।

वैधं वा तुल्यहेतुत्वात्सामान्यादिकल्पः स्यात् ॥ ५१ ॥ (पू०)

वाशब्दः पक्षं व्यावर्त्तयति। न इरापदं नियम्येत, वैधं स्यात्, द्वौ प्रकारौ स्यातामित्यर्थः। कौ द्वौ प्रकारौ?। इरापदवचनं गिरापदवचनञ्च, तुल्यो हि हेतुः, गिरापदमाम्नातम्, तद्वता साम्ना ज्योतिष्टोमः साधयितव्य इत्येतदप्यवगम्यते, इरापदेन साधयितव्यम् इत्येतदपि। समानार्थे चेते हे पदे, एकमपि तुल्यार्थम् अपरमपि। तस्मात् विकल्पः स्यात्, इरापदं गिरापदं वेति।

उपदेशाच्च साम्नः ॥ ५२ ॥ (उ०)

अत्राह, नैतयोस्तुल्यता विद्यते, गिरापदे समाम्नानमात्रं, न कर्त्तव्यता विधीयते, इरापदे तु कर्त्तव्यता विधीयते। तत्र। कुतः?। उपदेशात् साम्नः, उपदिश्यते हि साम, यन्नायन्नीयेन स्तुवन्ति इति, गिरापदवच्च यन्नायन्नीयं, तस्मिन् उपदिश्यमाने गिरापदमप्युपदिष्टं भवति। तस्मादिकल्पः इति।

नियमो वा श्रुतिविशेषादितरत्सामदृश्यवत् ॥ ५३ ॥ (उ०)

नियमः, वा स्यात् इरापदस्य। कुतः ?। श्रुतिविशेषात्, श्रुतिविशेषेण इरापदमुपदिष्टम्, ऐरं कृत्वा इति, सामान्येन गिरापदं, तत्कथं सान्नः उच्यते ?। गिरापदस्य पाठमात्रं, न कर्त्तव्यता, न त्वन्यथा साम कृतं भवतीत्यर्थापत्त्या गिरापदस्य कर्त्तव्यता कल्प्यते, इरापदस्य पुनः श्रुत्यैव कर्त्तव्यता। तेन सान्नि सिद्धे नास्त्यर्थापत्तिः गिरापदस्य। अत्र यः सामान्येनोपदिष्टः, तस्य को विषयः ?। तदुच्यते, इतरत् सामदृश्यवत् इति, गिरापदमुपदिश्यते, तथथा सामदृश्यं, तथा स्यात्, विकृतिषु सामदृश्यं निवियते, इतरदपि विकृतीरभिनिवेष्टुमर्हतीति। (८।१।१७ अ०)।

इरापदस्य प्रकीर्णताधिकरणम्।

अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥ ५४ ॥ (पू०)

ज्योतिष्टोमे यज्ञायज्ञीयं प्रकृत्य आमनन्ति, न गिरा गिरेति ब्रूयात् यद्गिरा गिरेति ब्रूयात् आत्मानमेव तद्धाता उद्गिरेदैरं कृत्वोद्गेयम् इति। ज्योतिष्टोमे गिरापदस्य स्थाने इरापदं कर्त्तव्यमिति समधिगतम्। इदानी-

मिदं सन्दिह्यते, किं प्रगीतमिरापदं कर्त्तव्यम्, उत अप्रगीतम् ? इति। किं प्राप्तम् ? गिरापदादन्यस्मिन् शब्दे श्रूयमाणे ब्रूमः, अप्रगीतमिरापदं कर्त्तव्यम्। कुतः ?। अप्रगाणात् नहि तत् अप्रगीतमुपदिश्यते, सर्वं हि यत् यथाभूतमुपदिश्यते, तत् तथाभूतमुपयोक्तव्यम्।

ननु नैव तत् अप्रगीतमुच्चार्य्यते, तद्धितशब्देन अयं निर्देश्यः क्रियते, तेन स्वरविशेषः कश्चित् निर्दिष्टो भवति। अत्रोच्यते, यद्यपि चास्ति स्वरविशेषः, अन्ये तु गीतिविकारा आईभावादयो न निर्दिश्यन्ते, अविवक्षितात् तद्धित उत्पादितः। तस्मात् अविवक्षितं प्रयोक्तव्यम्। अथोच्यते, तद्भूतनिर्देशोऽविवक्षितः इति। उच्यते, अविवक्षायां न किञ्चित्, विवक्षायान्तु निर्देश एव कारणम्। तस्मात् अप्रगीतं प्रयोक्तव्यमिति।

यत्स्थाने वा तद्गीतिः स्यात् पदान्यत्वप्रधानत्वात् ॥ ५५ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। यस्य पदस्य स्थाने इरापदं प्रयुज्यते, तस्य पदस्य या गीतिः, सा इरापदे स्यात्। कुतः ?। पदान्यत्वप्रधानत्वात्, पदान्यत्वप्रधानं हि इदं वाक्यं, गिरापदस्य स्थाने इरापदं भवतीति, नाप्रगीतं प्रयोक्तव्यमिति। अन्या हि वचनव्यक्तिः, इरापदस्य विशेषे विधीयमाने, अन्या इरापदे। एवं हि श्रूयते, इरापदस्य विकारभूत्वोद्गेयम् इति, तत्रानेन प्रकारेण इरापदं विधीयते, नान्यं प्रगाणात्, इरापदस्य विकारं ब्रूयात्।

न गिरापदस्येत्येतत् तद्धितेनोच्यते, नाप्रगीतस्य इरापदस्य विकारस्तद्धितशब्देनाध्यवसीयते । यद्यात्तद्धितार्थो विकारं ब्रूयादिति असावनूद्यते एव । यः प्रकृत्यर्थः इरापदस्येति, स विधीयते । तेन पदान्यत्वपरम् एतद्वचनं, न गीत्यनन्वयपरं, गीतिर्हि विकारः सामान्याविर्दिश्यते ।

गानसंयोगाच्च ॥ ५६ ॥ (यु०)

गानसंयोगो भवति, उद्ध्येयमा इरा चा दाचासा इति इरागानं दर्शयति ।

वचनमिति चेत् ॥ ५७ ॥ (आ०)

इति चेत् पक्षसि, गानदर्शनमेतद्भवति इति, नैवं, वचनं भविष्यति, उद्ध्येयमा इरा चा दाचासा इति ।

न तत्प्रधानत्वात् ॥ ५८ ॥ (आ०नि०)

नैतदेवं, तत्प्रधानं हि इदं वाक्यम् । किंप्रधानम् ? । इरापदप्रधानं, निर्देशात् । न गीतिप्रधानम्, अनिर्देशादित्युक्तम् । तथा इरापदस्य अर्थवादो भवति, न गीतेः, इरामहं यजमाने ददानि इतिपदस्य चायमर्थवादः, न गीतेः । तस्मात् प्रगीतं प्रयोक्तव्यमिति ।

किं भवति प्रयोजनं चिन्तायाः, नात्र कश्चिद्विशेषः ? । अन्यस्मिन् एतत्प्रदेशे प्रयोजनमस्ति, न प्रप्रेति ब्रूयात्, प्रप्रीति ब्रूयात्, यदि पूर्वः पक्षः, प्रप्रपदं वा वक्तव्यं,

प्रणीपदं वा। यदि सिद्धान्तः, प्रणीपदमेव वक्तव्यमिति। (८।१।१८ अ०)।

इति आचार्यशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य अध्यायस्य प्रथमः पादः।

गीतिषु सामाख्यातत्वाधिकरणम्।

सामानि मन्त्रमेके स्तुत्युपदेशाभ्याम् ॥१॥ (पू०)

सन्ति सामानि, रथन्तरं बृहद्-वैरूपं वैराजं शाक्करं रैवतम् इति अभित्वा शूर नो नुमः इत्येवमादिषु। तत्रैषोऽर्थः सन्दिह्यते, किं प्रगीता एते मन्त्राः सामानि, उत गीतयः सामानि? इति। ननु सिद्धं, गीतिषु सामाख्या (२।१।३६ सू०) इति। उच्यते, तत्र द्वितीयेऽध्याये मन्त्रगते भावशब्दे चोदकत्वं प्रति विचार्यमाणे मन्त्राभावाशङ्कायां मन्त्रसद्भावोपपादनाय, तच्चोदकेषु मन्त्राख्या (२।१।३२ सू०) इति कृते लक्षणे, अहेर्बुध्नियं मन्त्रं मे गोपाय यजुषय-स्त्रयीविदा विदुः ऋचो यजूंषि सामानि इति ऋगादीनां विभागाय प्रसङ्गानुप्रसङ्गं लक्षणं गीतिषु सामाख्या इत्युक्तम्। तत्र यदि प्रगीतो मन्त्रः साम, यदि वा गीतिमात्रं उभयथापि ऋग्यजुषाभ्यामन्यत्सामेति सिद्धे विभागे न विवेकाय प्रयत्नः, प्रयोजनाभावात्, इह तु प्रगीते मन्त्रेऽन्यत् कर्म, गीतिमात्रेऽन्यदिति विवेकाय प्रयत्यते।

आह, ननु एतदपि सिद्धं, गानकर्मणो वाचकः सामशब्दः इति । उच्यते, तदेव पुनरभिधीयते, स्मरणाय, उत्तरमधिकरणं चिन्तयितुम् ।

गीतिः सामेति स्थिते इदं चिन्त्यते, गीतिषु ऋचः प्रधानभूताः, उत, गुणभूताः ? इति । आह, नैव स्मरणाय पूर्वपक्षोत्तरत्वं, नहि मन्त्राः सामानीत्येषोऽर्थः स्मर्त्तव्यः । अत्र उच्यते, पूर्वपक्षेऽपि सिद्धान्तस्मरणार्थमेवोपादीयते, यत् प्रगीतं मन्त्रवाक्यं तत्सामेत्येवं पूर्वपक्षं कृत्वा, गीतिमात्रं सामेति स्थापितम् । तस्मिन् स्थिते अयमुत्तरो विचारः कर्त्तव्यः, गीतिषु किमृचः प्रधानभूताः, उत, गुणभूताः ? इति ।

किं प्राप्तम् ? एवं मन्यन्ते, प्रगीतं मन्त्रवाक्यं सामेति । कुतः ? । स्मृत्युपदेशाभ्याम्, एवं हि स्मरन्ति, प्रगीतं मन्त्रवाक्यं सामेति, तत्रभवन्तः छान्दसाः एवञ्च उपदिशन्ति शिष्येभ्यः । आह, ननु यदेव स्मरन्ति, तदेवोपदिशन्ति, नैवं सति उपदेशो हेत्वन्तरम् इति । उच्यते, बाढम्, अन्यथा तर्हि उपदेशं वर्णयामः, अयमुपदेशः । अहेर्बुध्निय मन्त्रं मे गोपाय यज्ञयज्ञियीविदा विदुः ऋचो यजूंषि सामानि इति । मन्त्रप्रकारः क्वचित् सामानीति मन्त्रोपदेशो भवति । तस्मादुपदेशान्मन्त्राः सामानीत्यवगच्छामः ।

तदुक्तदोषम् ॥ २ ॥ (सि०)

तस्यैतस्य पक्षस्यायं दोषः सप्तमे, ऋचः प्रदेशो नोपपद्यते कवतीषु रथन्तरङ्गायति इति, देशलक्षणा धर्म्म-

प्रवर्त्तते, स एव निर्णयो भविष्यति। किं प्राप्तम्? तेनैवाधिकरणेन संस्कारकर्मेति।

तथा प्राप्ते ब्रूमः, प्रधानकर्म वा सामशब्देनोच्यते इति। किंकारणम्?। प्रधानविधिलक्षणं हि अत्रास्ति द्वितीया विभक्तिः, रथन्तरं गायति इति। तस्मात् प्रधानकर्मेति। अपिच, कर्मकाले गानं भवति, तत् यदि द्रव्यसंस्कारार्थं, संस्कृतं द्रव्यमदृष्टेन संस्कारेण न कर्मकाले पुनः संस्कर्त्तुं शक्यं, न हि खिन्नस्य स्वेदनं शक्यं कर्त्तुं, पिष्टस्य वा पेषणं, स एषोऽग्नीनामिवाभ्युपगन्तव्यः, अकर्मकाले क्रियमाणः संस्कारो भवतीति। अस्मात्पक्षे पुनः प्रधानकर्म फलाय भविष्यति, तत्र अविप्रतिषिद्धम् अकर्मकाले गानम्।

अपिच, श्रावण्यां पौर्णमास्यां व्रतानि उपाकृत्य, अर्द्धपञ्चमान् मासान् स्वाध्यायमधीयीतेति, तदेषां फलाय भविष्यति, इतरथा पुरुषाणामुपदिश्यमानं, कर्मणां कल्पेत। तस्मादपि प्रधानकर्मेति।

तद्गुद्रव्यं वचनात् पाकयज्ञवत् ॥४॥ (आ० नि०)

आह, प्रधानकर्मेत्युच्यते, न च एतत् प्रधानकर्म, न हीदं फलदं, फलकल्पनायां च श्रुतं कल्पेत, तेन यागं प्रति गुणभूतं, यदि न गुणभूतं, किमस्य द्रव्यं, यत् प्रति प्रधानभूतमेतत्?। तदुच्यते, तद्गुद्रव्यम्, तद् अस्य द्रव्यस्थानीयं, यद्वा अस्यस्य कर्मणो द्रव्यं साधकम्, एवमस्य

ऋक् साधिका, तस्मात् ऋचं प्रति प्रधानभूतमेतत्, भूतं हि भव्यायोपदिश्यते । कथं पुनरेतत् ऋग्द्रव्यम् ? । वचनात्, वचनमिदं भवति, ऋचि साम गायति इति । यथा पाकयज्ञेषु तत्तद्वाचनिकं द्रव्यं भवति, लाजाः, धानाः, तण्डुलाः आज्यमिति, एवमिहापि ऋक् द्रव्यं, वचनादिति ।

तत्राविप्रतिषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ॥ ५ ॥ (यु० २)

आह, या ऋगस्य वचनेनोच्यते, तद्द्रव्यमेतत् भवति, कथम्, द्रव्यव्यतिरेके सति द्रव्यान्तरे प्रदेशे च तदिदं साम ? इति । अत्रोच्यते, अविप्रतिषिद्धमेतत्, गीतिमात्रं हि सामेति, द्रव्यमस्य निर्वर्त्तकं वाचनिकं, तत् सामान्यविहितं, विशेषविहितेन द्रव्यान्तरेण बाध्यते । यदत्र द्रव्यव्यतिरिक्तं गीतिमात्रं, तदेव हृदहा रथन्तरं वेति न दोषो भवति । तस्मात् प्रधानकर्म सामेति ।

शब्दार्थत्वात्तु नैवं स्यात् ॥ ६ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, नैतदेवं भवितुमर्हति, प्रधानकर्म्म सामेति, गुणकर्म्म स्यात् । कुतः ? । शब्दार्थत्वात् शब्दस्य उपकारकं साम प्रत्यक्षमुपलभ्यते, साम्नि क्रियमाणे ऋगक्षराणि उच्चार्य्यन्ते, तस्मिन् सति नाहृष्टं कल्पनीयम् ।

परार्थत्वाच्च शब्दानाम् ॥ ७ ॥ (यु० १)

परार्थाश्च शब्दाः स्तुत्यर्थाः, स्तुतिर्हि चोदिता, आज्यैः स्तुवते पृष्ठैः स्तुवते इति सामभिः ऋगक्षरैः उच्चार्यमाणैः प्रत्यक्षा अवगम्यते, ततः स्तुत्यर्थाया ऋचः सत्याः सामार्थता परिकल्प्येत, कल्पनायाश्च प्रमाणं नास्ति। तस्मादपि साम गुणभूतमिति।

असम्बन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ ८ ॥ (यु० २)

इतश्च गुणभूतं साम। कुतः ?। असम्बन्धश्च सामभिः स्तोत्रेण स्यात्, तस्य प्रधानभावेन स्तुतिः सामभिरुपदिश्येत, न साम स्तुतेः, तच्च बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवति इति वचनं बाध्येत, रथन्तरगुणकं पृष्ठं भवतीत्येतदेवमुपदिश्यते, तत् ऋगर्थं सामां अवकल्पते, प्रत्यक्षं हि तदा पृष्ठस्योपकारं साम करोति, यदस्य वाचकं प्रकाशयति शब्दं, तत् रथन्तरपृष्ठशब्दयोः सामानाधिकरण्यादेकार्थत्वे शक्यं विज्ञातुम्। पृथगर्थत्वे तु असम्बन्धः स्यात्। तस्मात् ऋचः साम गुणभूतमिति।

संस्कारस्याप्रकरणेऽग्निवत्स्यात् प्रयुक्तत्वात् ॥ ९ ॥ (आ०)

अथ यदुक्तम्, कर्मकाले गानम् ऋचः संस्कारकम् अग्न्याधानमिव कल्प्येत, प्रयुक्तत्वादिति। तत् परिहर्त्तव्यम्,

अकार्य्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥

१० ॥ (आ० नि०)

यदि हि अकर्म्मकाले गानं स्यात्, कर्म्मकालं यावत्, स्थितं, न विनश्येत्, ततः पुनः अप्रयोगः प्रतीयेत, यदि वा पुनर्न शक्येत कर्म्मकाले गानं कर्त्तुं, तथाप्यप्रयोगः स्यात्, शक्यन्ते तु प्रगीताः शब्दाः पुनः प्रयोक्तुम्। तस्मादकर्म्मकाले प्रयुक्ता असाधका इति कर्मकाले प्रयुञ्जीरन्। तस्मान्न दोषो भविष्यतीति।

अश्रितत्वाच्च ॥ ११ ॥ (यु०)

अपिच कर्म्मकालाश्रितं गानं दर्शयति, औदुम्बरीं स्पृष्टानपाश्रित उद्गातोद्गायेत् इति, सदश्चौदुम्बरी मध्यमा स्थूणा भवति, तां स्पृष्ट्वा इति ब्रुवन् सदसि गानं दर्शयति। तस्मात् न अकर्म्मकालम् अग्न्याधानवत् कल्पयितव्यमिति।

प्रयुज्यत इति चेत् ॥ १२ ॥ (आ०)

अथ यदुक्तम्, अर्द्धपञ्चमान्मासान् अध्ययनं प्रयुज्यते, तत्, फलाय भविष्यति इति, तत् परिहर्त्तव्यम्,

ग्रहणार्थम् प्रयुज्येत ॥ १३ ॥ (आ० नि०)

नहि फलाय भवितुमर्हति, तद्धि अदृष्टं कल्पेत, दृश्यते अत्र प्रयोजनं, यत्तावत् उपाध्यायः ग्रिथस्त्रिधावीते, तत् ग्रहणार्थम्। यत् ग्रिथः, तत् धारणार्थम्।

ग्रहणधारणे प्रयोगार्थे भूतिरधिकवत् शुक्रेष्टिवद्वा। तद् यथा, भूमिरधिको भूमौ रत्नमाहित्य ग्रिचां करोति संग्रामे प्राणुभावो भवितेति, यथा च क्षात्रः शुक्रेष्टीः प्रयुङ्क्ते, प्रयोगे प्राणुकर्मा भविताऽस्मीति। एवमेतत् द्रष्टव्यम्। तस्मात् दृष्टे सति नादृष्टाय 'अध्ययनम्। तस्मात् संस्कारकर्म सामेति। (८।२।२ अ०)।

तृचे प्रत्यृचं क्रत्वसावः समापनाधिकरणम्।

तृचे स्यात् श्रुतिनिर्देशात् ॥ १४ ॥ (पू०)

ज्योतिष्टोमे समाम्नायते, तस्मादेकं साम तृचे क्रियते स्तोभीयम् इति। अथायमर्थः सांशयिकः, किं तिसृषु ऋक्षु व्यासज्य गानं कर्त्तव्यम्, उत, प्रति ऋचं, समाप्तं गानं कर्त्तव्यम्? इति। किं प्राप्तम्? व्यासज्येति। कुतः?। श्रुतिनिर्देशात्, एवं श्रूयते, एकं साम तृचे क्रियते इति, सामि क्रियमाणे, निर्दिश्यमानो गुणभूता त्रिसंख्या ऋक्गता श्रूयते, तत्र यद्येकस्यामृचि उपक्रम्य तस्यामेव परिसमापयेयुः, न त्रिसंख्यया साधनमस्य क्रियमाणस्य परिच्छिन्द्युः, एकसंख्यापरिच्छिन्नं क्रियमाणं स्यात्, तत्र श्रुतिर्बाध्येत, तद्यथा, अयं घटः त्रिषु नागदन्तकेषु स्थाप्यताम् इत्युक्ते व्यासज्य स्थाप्यते, न पर्य्यायेण, एवमिहापि द्रष्टव्यम्।

ननु पर्य्यायेऽप्येवंजातीयकः शब्दो भवति, यथा त्रिषु

कुलेषु देवदत्तो भुङ्क्ते इत्युक्ते न यौगपद्यमवगम्यते, पर्य्यायेणापि भुञ्जाने भवत्येष वादः। एवमिहापि पर्य्यायेण प्राप्नोति इति। अत्रोच्यते, न तत्र त्रिसंख्या भुजिं प्रत्युपदिश्यते, येनैतदेवं भवति, तत्र कुलशब्देन सम्बध्यते, त्रिषु कुलेषु, न ह्योरेकस्मिन् वेति, यदा भुजिनिर्वृत्तिं प्रत्युपदिश्यते, तदा यौगपद्येनैव भोजयितव्यः। इह तु त्रिसङ्ख्या क्रियते इत्यनेन सम्बध्यते, एवं सति क्रियायां त्रिसङ्ख्या विहिता भवति, तत्र स्वपदगतस्य किञ्चिद्विधायकेन विहितं भवति, इतरथा ऋचः सङ्ख्यायाश्च सम्बन्धस्य पदान्तरगतेन शब्देन भावनोच्येत, तथा, अर्थविप्रकर्षः स्यात्। तस्मात् सामनिर्वृत्तिं प्रति त्रिसङ्ख्या उच्यते।

आह, ननु त्रिसङ्ख्या ऋच्छब्देनैवात्र सम्बध्यते, अन्यथाऽसति सामर्थ्ये समास एव, न स्यात् इति। अत्रोच्यते, न ब्रूमो न सम्बध्यते इति, सम्बध्यते एव, समासश्च भवति, स तु समासशब्दः सामनिर्वृत्तावुपयुज्यते इति, तत्र त्रिशब्दस्य ऋच्छब्दस्य चार्थो निर्वृत्तावुपदिष्टो भवति, साम निर्वर्त्तयितव्यम्, एवं तास्मिन्नृचो भवन्ति, न न्यूना इति। इतरस्मिन् पक्षेऽभ्यासस्त्रिसङ्ख्यया सम्बध्येत, तत्र साम क्रियते इति लक्षणा स्यात्, अभ्यासनिर्वृत्तौ सामनिर्वृत्तिशब्दो भवेत्। तस्मात् अभ्यासस्य गानं कर्त्तव्यम्।

शब्दार्थत्वाद्विकारस्य ॥ १५ ॥ (यु० १)

इतश्च पश्यामः, ऋचे व्यासज्य साम गातव्यमिति। कुतः ? । शब्दार्थोऽयं सामसंज्ञको विकारः, ऋच गुणभूत इत्यर्थः। स यदि व्यासज्य क्रियते, बह्वन्यक्षराणि अविकृतानि भवन्ति, तत्रायं चोदकोऽनुग्रहीष्यते। तस्माद्व्यासज्य गातव्यम्।

दर्शयति च ॥ १६ ॥ (यु० २)

ऋक्सामौ वाव मिथुनीसम्भवावेति सोऽब्रवीन्न वै त्वं ममालमसि जायार्थं वेदो मम महिमेति ते ह्ये भूत्वोचतुः, सोऽब्रवीत् न युवां ममालं स्त्रो जायार्थं वेदो मम महिमेति तास्तिस्रो भूत्वोचुः, मिथुनीसम्भवामेति, सोऽब्रवीत् सम्भवामेति, तस्मादेकं साम ऋचे क्रियते स्त्रोचीयमिति, नैकास्त्रोचीया साम्नः सम्भवति, नापि ह्ये तिस्रः सम्भवन्तीति व्यासज्य गानं दर्शयति।

वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिः स्यात् संस्कारस्य तदर्थत्वात् ॥ १७ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति। वाक्यानि विभक्तानि त्रीणि एतानि, याः तिस्र ऋचः, तत्रैकैका ऋक् क्रतुस्त्रेन पदयामेण काञ्चित् स्तुतिमभिनिर्वर्त्तयति, न ऋगन्तरेण सह कञ्चिदर्थं संस्तौति, तत्र साम, ऋचः संस्तवमभिनिर्वर्त्तयन्त्या गुणभावं गच्छत् साहाय्यं करोति, तत्र यदि व्यासज्य गीयेत, न ऋचः स्तुतिमभिनिर्वर्त्तयन्त्याः साम उपकारकं स्यात्, न हि सामावयवः साम भवतीति, न

च ऋक्समुदायेन कचिदर्धः स्तूयते, यत्र सामसम्बन्धा स्तुतिं कुर्य्यात्, ऋक् स्तुतिं करोति, सा न सामसम्बन्धा, य ऋक्समुदायः सामसम्बन्धः स स्तुतिं न करोति, तत्र प्रत्यृचं सान्नि परिसमाप्ते क्रियमाणे सामवता ग्रन्थेन स्तुतिः कृता भवति, सामसंस्कारस्य स्तुतिभावनार्थत्वात् प्रत्यृचं परिसमाप्तं गानं कर्त्तव्यमिति।

तथा चान्यार्थदर्शनम् ॥ १८ ॥ (यु० १)

अन्यार्थमपि वाक्यमेतमर्थं दर्शयति, अष्टाक्षरेण प्रथमायामृचि प्रस्तौति द्वाक्षरेणोत्तरयोः इति प्रस्तावे भेदं दर्शयति। तथाच, एका वा अस्योत्तमा स्तोत्रीया तामुद्गीथाद्गायेत् इति उद्गीथभेदं दर्शयति, तस्मादपि प्रत्यृचं गानं कर्त्तव्यमिति।

अर्धर्चप्रगीतेष्वपि ऋचेव गानं कर्त्तव्यम्, अपरिपूर्णं तद्वाक्यं अर्धर्चे भवति, ऋचि तु परिपूर्यत इति। पादप्रगीतेषु पाद एव गानं कर्त्तव्यमिति, पाद एव हि तत्परिपूर्णं वाक्यं, यथा, गोष्ठे वासिष्ठ इति, एवं यावति परिपूर्णं वाक्यं, तावति साम परिसमापयितव्यम्। क्वचित्यादेऽपि पूर्णं वाक्यम्, ऋचपि, क्वचिदर्धर्चेऽपि परिपूर्णं, यत्र यथा परिपूर्णं, तत्र तथा गातव्यमिति।

अनवानोपदेशश्च तद्वत् ॥ १९ ॥ (यु० २)

अनवानोपदेशश्च तद्वत् युक्तो भविष्यति, यथाऽऽ-

भिर्न्यायं उपदिष्टः, अनवानं गायति इति शक्यते अनवानं, प्रत्यृचं परिसमापयितुं, न तु तिसृषु व्याप्तस्य शक्यते ।

अपि च स्वाध्यायकाले प्रत्यृचं गानं परिसमापितं, स्वाध्यायकाले चाभ्यासः, प्रयोगकाले कथं प्राप्तता स्यादिति, तदपि प्रयोगकाले प्रत्यृचं गानं कर्त्तव्यं, ततः स्वाध्यायकाले तदभ्यासो युक्तः । तस्मादपि प्रत्यृचं गेयमिति ।

अभ्यासेनेतरा श्रुतिः ॥ २० ॥ (आ० नि०)

अथ यदुक्तं, तस्मादेकं साम ऋचे क्रियते इति, तासु अभ्यासेनेतरा श्रुतिः द्रष्टव्या, पर्य्यायेणेत्यर्थः । नह्यत्र ऋक् सामनिर्वृत्त्यर्थमुपादीयते, तस्मात् न शक्यमिदं वक्तुं, सामनिर्वृत्तिसाधनीभूतामृचं त्रिशब्दः परिच्छेत्स्यति इति । साम स्तोत्रस्य गुणभूतं निर्दिश्यते, रथन्तरं पृष्ठं भवति बृहत् पृष्ठं भवति इत्येवमादि, तत्र प्रत्यृचं न्यायेन गानं प्राप्तं न सामनिर्वृत्त्या संख्या सम्बध्यते, किन्तर्हि ऋग्भिः, तत्रान्यथा नावकल्पते इति अभ्यासो लक्ष्यते, तिसृष्वभ्यसितव्यं सामेति, यथा, त्रिषु कुलेषु देवदत्तो भोजयितव्यः इति, यदा त्रिसंख्या कुलैः सम्बध्यते, तदाऽभ्यासो लक्ष्यते, एवमिहापि द्रष्टव्यम् । तस्मात् प्रत्यृचं परिसमाप्तं गानं कर्त्तव्यमिति । (८ । २ । ३ अ०) ।

समाप्तेषु तिसृषु ऋक्षु गानाधिकरणम् ।

तदभ्यासः समासु स्यात् ॥ २१ ॥ (सि०)

अस्मिन् ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत इति। तचैतत् समाम्नायते, तस्मादेकं साम ढचे क्रियते स्तोत्रीयम् इति। तच एतत् समधिगतं, प्रत्यृचं परिसमाप्तं गेयमिति। इदमन्यत् सांशयिकं, समासु विषमासु वा गेयम्, उत समास्वेव? इति। किं तावत्? प्रतिभाति? नियामकस्य शास्त्रस्याभावादनियमं इति।

एवं प्राप्ते ब्रूमः, समासु एव गेयं न नानाच्छन्दस्कासु इति। किमेवं भविष्यति?। गीतेः संग्रह विलेखो न भविष्यतः, यदि न्यूनच्छन्दस्का ऋच उपादास्यामहे, गीतिं संभृणीयाम। अथ अधिकच्छन्दस्काः, ततो गीतिं विलेखयेयाम उभयथा चार्थे बाधेमहि समासु तु उपादीयमानासु न किञ्चिद्दूषयति। तस्मात्समासु गानं कर्त्तव्यमिति। अपिच त्रियङ्योपचारः समासु युक्तो भविष्यति, समाने हि कस्मिंश्चिदाश्रीयमाणे सङ्ख्याव्यवहारो भवति।

लिङ्गदर्शनाच्च ॥ २२ ॥ (यु०)

लिङ्गं खल्वपि अस्मिन्नर्थे पश्यामः, ख्याख्यां सञ्जावधीयते सम्भवति इत्याहुः, यदृहत् गायत्रीषु क्रियते ऋक्त्वे नात्तरुजति इति नचास्यां सम्भवति इति विच्छन्दस्कासु दोषं ब्रुवन् समानच्छन्दस्कासु गानं दर्शयति। (६। २। ४ अ०)।

उत्तरयोर्गायतीत्यत्र उत्तरान्यसमधीतयोरेव ऋचोर्ग्रहणाधिकरणम्।

नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ २३ ॥

(सि०)

ज्योतिष्टोमे समामनन्ति, रथन्तरमुत्तरयोर्गायति बृहदुत्तरयोर्गायति कवतीषु रथन्तरं गायति यद्योन्यां गायति, तदुत्तरयोर्गायति इति। तत्रैतत् समधिगतम्, समासु नेयमिति, अथ इदानीमिदं सन्दिह्यते, किं योन्युत्तरयोर्वा उत्तरान्यसमधीतयोर्वा नेयम्, उत, उत्तरान्यसमधीते एव उपादातव्ये ? इति, किं प्राप्तम् ? नियमकारिणः शास्त्रस्याभावादनियमः इति। एवं प्राप्ते ब्रूमः, नैमित्तिकं तु उत्तरात्वम् उत्तरान्यसमधीतासु उपपद्यते इति। कुतः ?। समाख्यानात् प्रकृतत्वाच्च उत्तरान्यसमधीतानाम्।

आह, द्वाभ्यामपि समाख्याप्रकरणाभ्यां वाक्यं बलीयस्त्वादनियम एव प्राप्नोति। अत्रोच्यते, सर्वे हि सम्बन्धिशब्दा पदान्तरमनपेक्षमाणाः न कञ्चिदप्यर्थमाहुः, तस्मात् अपेक्षितं पदान्तरं, तत् प्रकृतं चोदितं वा, इतरथा अपरिपूर्णार्थं वाक्यमनभिधायकमेव कस्यचिदर्थस्य स्यात्, संज्ञासंज्ञिग्रहणे न पुनः पदान्तरमपेक्षते, श्रुत्यैव परिपूर्णार्थौ गृह्यते। तस्मात् न सम्बन्धिशब्दोऽध्यवसायीयः, उत्तरासंज्ञैवोपादातव्येति, नहि संज्ञासु गृह्यमाणासु पदान्तरानन्तर्यमपेक्षितव्यं भवति।

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥ (यु०)

तास्वेव चोत्तरायन्वसमधीतासु साम अभ्यसितव्यम्, एवम् एकार्थता ऋचग्रन्थस्य भविष्यति, एकं कञ्चित् सामान्यविशेषमाश्रित्य ऋचग्रन्थम् उपचरन्ति। एतदेवमुक्तम् यद्विशेषे कस्मिंश्चित् संख्या भवति, इतरथा हि सर्वत्र सर्वसंख्या भवेयुः, तथाहि संव्यवहाराभावः स्यात्। तस्मात् समानच्छन्दस्कासु समानदेवताकासु च ऋचग्रन्थोपचारात् उत्तरायन्वसमधीता एव गृहीतव्या इति। (८।२।५)

अतिजगत्यामभ्यस्यमानायां विभीकगानाधिकरणम्। (द्वितीयवर्णकम्)।

एवं वा,

तदभ्यासः समासु स्यात् ॥ २१ ॥ (पू०)

अस्ति हादशाहः, हादशाहेन प्रजाकामं याजयेत् इति। तत्र चतुर्थेऽहनि त्रैयोकं नाम साम अतिजगत्याम् उत्पन्नम्, अतिजगती, विश्वाः धृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रज्येष्ठजनुष राजसे। क्रत्वा वरिष्ठं वरासुरीमुतोग्रमोजिष्ठं तवसं तरस्विनम्। उत्तरे हे ऋहल्यौ, तयोः पूर्वा, नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा। सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः। उत्तरा, समौ रेभासो अस्वरन्निन्द्रं सोमस्य

पीतये। स्वर्पतिं यदीं हुवे। धृतव्रतो ह्योजसा सम्मृतिभिः इति। तत्रैषोऽर्थः सांग्रयिकः, किमन्ये अतिजगत्यो उपादाय समासु गेयम्, उत ये एव ते उत्तरे हविष्मत्यो, एते एव उपादाय विषमाक्षेव गातव्यम्? इति। किं प्राप्तम्? संशयविलेशो मा भूताम् इत्यन्ये उत्पत्तिजगत्यावुपादाय एतत्साम समाक्षेव अभ्यसितव्यमिति।

लिङ्गदर्शनाच्च ॥ २२ ॥ (यु०)

लिङ्गं खल्वप्यस्मिन्नर्थे दर्शयति, अतिजगतीषु सुवन्ति इति। किं लिङ्गम्?। अतिजगतीष्विति बहुवचनम्। तस्मादन्ये अतिजगत्यो उपादातव्ये इति।

नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ २३ ॥ (सि०)

नैमित्तिकं तूत्तरात्वमानन्तर्यात् उत्तरापाठनिमित्तम् आनन्तर्ये सति प्रतीयेत, श्रुतिर्हि वाक्याद्बलीयसीति प्रकृतत्वादुत्तरे हविष्मत्यो एवमनुगृहीष्येते। तस्मान्नान्ये आदातव्ये इति।

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥ (यु० २)

एवञ्च समानदेवताके त्रैयोके त्व इति त्वशब्दोपचारो युक्तो भविष्यति, तस्मादपि नान्ये उपादातव्ये इति। अथाह, अथ यदुक्तम् अतिजगतीषु सुवन्ति इति शब्दोपचारात् अतिजगतीबहुत्वं दर्शयति इति, तत्परिहर्त्तु-

व्यम्। अत्रोच्यते, तदभ्यासः एव द्रष्टव्यः बोढ्यभ्यासः एकविंशः बोढ्री इति एकविंशतिकृत्वः बोढ्रिनि अभ्यस्यमाने त्रैशोकाभ्यासः, तत्र समकृत्वोऽतिजगत्याम-भ्यस्यमानायाम् अतिजगतीषु सुवन्ति इति वचनमुप-पद्यते इति। (८।२।५५०)

बृहतीपङ्क्त्योरेव प्रयत्नेन रथन्तरस्य गानाधिकरणम्।

प्रागाथिकन्तु ॥ २५ ॥ (सि०)

ज्योतिष्टोमे श्रूयते, बृहत् पृष्ठं भवति रथन्तरं पृष्ठं भवति इति। रथन्तरस्य योनिर्बृहती, अभि त्वा शूर नोनुमो दुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमी-शानमिन्द्र तस्थुषः। उत्तरा पङ्क्तिः, न त्वावान् अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे। बृहतो योनिर्बृहत्येव, त्वामिद्धि हवामहे सातौ वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः। उत्तरा पङ्क्तिरेव, स त्वं नश्चित्र वज्रहस्त धृष्णुया महःस्तवानो अद्रिवः। गामश्वं रथ्यमिन्द्र सं किर सभा वाजं जिग्युषे इति। तयोः वैच्छन्दस्कं गानम् आमनन्ति, न वै बृहद्रथ-न्तरमेकच्छन्दो यच्चैतयोः पूर्वा बृहती क्रकुभावुत्तरे इति।

तत्रायमर्थः सांशयिकः, किमत्र उत्पत्तिक्रकुभावागमस्य गानव्यम्, उत, याऽसौ पूर्वा बृहती, उत्तरा च पङ्क्तिः,

तयोः प्रयत्नेन तृचकर्म कृत्वा ककुभावुत्तराकारं गानं कर्त्तव्यम् ? इति । किं प्राप्तम् ? उत्पत्तिककुभावागमयितव्ये इति । कुतः ? । एवमन्यासां ककुभामुत्पत्तिरर्थवती भविष्यति, यदि ताः ककुप्कार्य्यं प्रयुञ्जते ।

आह ननु वाचस्तोमे तासामर्थवत्ता भविष्यति । उच्यते, सत्यमर्थवत्ता तत्र भविष्यति, ककुप्कार्य्यार्थतापि तु गम्यते, सा नापक्षीतव्येति ।

एवं प्राप्ते ब्रूमः, प्रागाथिकं तु, तुशब्दः पक्षं व्यावर्त्तयति, प्रागाथिकं सामगानं कर्त्तव्यमिति यासौ पूर्वा बृहती, उत्तरा च पङ्क्तिः, तयोः प्रयत्नं कर्त्तव्यम् । एवं हि स्मरन्ति, काकुभः प्रगाथः इति । आह, ननु ककुभि अनार्षायां काकुभ इति न प्राप्नोति इति । उच्यते, तस्येदम् इति तत्र भवः इति वा न दोषः ।

स्वे च ॥ २६ ॥ (यु० १)

एवं च स्वे च्छन्दसि गानं कृतं भवति, उत्तरापाठेन हि अन्येषा पङ्क्तिरुपदर्शिता तृचकर्मणि, तत्र प्रकृतहानं अप्रकृतप्रक्रिया च न कृता भविष्यति । तस्मादपि तयोः प्रयत्नं कर्त्तव्यमिति ।

प्रगाथे च ॥ २७ ॥ (यु० २)

एवञ्चात्र प्रगाथशब्द उपपन्नो भवति, प्रकर्षं हि प्रशब्दो द्योतयति, प्रकर्षेण यत्र गानं, स प्रगाथः । कश्च प्रकर्षः ? ।

यत् किञ्चित्पुनर्नीयति । तस्मादपि प्रकृतयोः प्रयत्नं कर्त्तव्यमिति ।

लिङ्गदर्शनाच्चातिरेकाच्च ॥ २८ ॥ (यु० ३)

अत्यतिरेकेण च सर्वत्र लिङ्गं दर्शयति । कथमिदमत्यतिरेकेण ? इति । यत् प्रकृतयोरेव प्रयत्नमुपपद्यते, न प्रकृतव्यतिरेकेणेति । किं लिङ्गं भवति ? । एवमाह, एषा वै प्रतिष्ठिता दृहती या पुनःपदा तथत्याहं पुनरारभते तस्मात् वत्सो मातरमभि हिङ्करोति इति । पुनःपादारम्भः प्रयत्ने उपपद्यते, न अन्यथा । तस्माद्याऽसौ पूर्वा दृहती, उत्तरा च पङ्क्तिः, तयोः प्रयत्नेन दृढकर्म कृत्वा ककुबुत्तराकारकरणं कर्त्तव्यमिति । (८।२।६ अ०)

दृहतीविकारपङ्क्त्योः प्रयत्नेन रौरवयौधाजयसाम्नोर्नाधिकरणम् ।
(द्वितीयवर्णकम्) ।

एवं वा,

प्रागाधिकन्तु ॥ २५ ॥ (सि०)

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत इति तत्र चिच्छन्दा आवापो माध्यन्दिनः पवमानः पञ्चसामा, नायज्ञामहीयवे गायत्रे दृढे भवतो रौरवयौधाजये बार्हते दृढे वैश्वनरसमस्वं विष्टुषु इति । यदेतत् रौरवं यौधाजयञ्च ते सामनी, तयोः पूर्वा दृहती, पुनाः स्तोम

धारयापो वसानो अर्षसि। आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः। उत्तरा विष्टारपङ्क्तिः, दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्। आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धौतो विचक्षणः। तदत्र संशयः, किमन्त्ययोरुत्पत्ति-दृहत्योरागमं कृत्वा समासु गानं कर्त्तव्यम्, उत, याऽसौ पूर्वा दृहती, उत्तरा च विष्टारपङ्क्तिः, तयोः प्रग्रथनेन तत्कर्म कृत्वा दृहतीकारं गानं कर्त्तव्यम्? इति।

किं प्राप्तम्? अन्ये दृहत्यावागमयितव्ये इति। कुतः?। एवमृचामुत्पत्तिरर्थवती भविष्यति इति।

एवं प्राप्ते ब्रूमः, प्रागाथिकन्तु, तुशब्दः पक्षं व्यावर्त्तयति। प्रागाथिकं सामगानं कर्त्तव्यं, नोत्पत्तिदृहत्यावामयितव्ये, प्रकृतयोरेव प्रग्रथनं कर्त्तव्यम्, एवं हि स्मरन्ति, बार्हतः प्रगाथः इति। उत्पत्तिदृहत्योरानीयमानयोः प्रगाथो न स्यात्, तत्र स्मृतिर्बाध्येत। तस्मात् प्रकृतयोः प्रग्रथनं कर्त्तव्यमिति।

खे च ॥ २६ ॥ (यु० १)

एवञ्च खे च्छन्दसि प्रकृते गानं भविष्यति, न प्रकृतस्थानमप्रकृतप्रक्रियां च। तस्मादपि नान्ये दृहत्यौ आगमयितव्ये इति।

प्रगाथे च ॥ २७ ॥ (यु० २)

एवञ्च प्रगाथशब्द उपपन्नो भविष्यति, स हि प्रकर्षे

गानस्य भवति, प्रकर्षस्थेह पुनःपादे उपादीयमाने भवति। तस्मादपि नान्ये बृहत्यौ उपादातव्ये इति।

लिङ्गदर्शनाच्चातिरेकाच्च ॥ २८ ॥ (यु०)

अत्यतिरेकेण च लिङ्गं दर्शयति। किं लिङ्गं भवति? एवमाह, षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनम् इति। कथं कृत्वा लिङ्गम्?। यदि प्रयाजेन बृहतीकारकानं क्रियते, ततः सर्वस्मिन् सवने या ऋचः समाम्नाताः, ताः षष्टिर्भवन्ति, इतरथा उत्पत्तिबृहत्योरानीयमानयोरभ्यधिकाः भवेयुः। तदिदं निर्दिश्यते, गायत्रामहीयवे गायत्रे तृचे भवतः, ताः षड्गायत्रयः। रौरव-यौधाजये बार्हते, ता अपि षड् बृहत्यः। औशनसमन्त्थं त्रिष्टुप्सु, ता अपि तिस्रस्त्रिष्टुभः। अथ होतुः पृष्ठे बृहति रथन्तरे वा सप्तदशस्तोमे क्रियमाणे पञ्च बृहत्यो भवन्ति, द्वादश च ककुभः।

कथम्?। एषा हि तत्र तत्र विष्टुतिः, पञ्चभ्यो हिङ्करोति, स तिसृभिः, स एकया, स एकया। पञ्चभ्यो हिङ्करोति, स एकया, स तिसृभिः, स एकया। सप्तभ्यो हिङ्करोति स एकया, स तिसृभिः, स तिसृभिः इति। तत्र बृहतीभिस्तिसृभिः प्रथममेकया च ककुभा, पुनस्त्रिभिरेकया ककुभा। ततः पुनरेकया बृहत्या तिसृभिः ककुब्भिः एकया च ककुभा। एवं चतस्रो बृहत्यः षट् ककुभः। ततः पुनः एकया बृहत्या, पुनश्च तिसृभिः ककुब्भिः पुनश्च तिसृभिः ककुब्भिरिति, एवं पञ्च बृहत्यो द्वादश ककुभ इति।

ताभिश्च बृहतीभिः सह त्रैकादश बृहत्यो भवन्ति। ततः पक्षां गायत्रीणां चतस्रो गायत्र्यो द्वादशभिः ककुब्भिर्द्वादश बृहत्यो भवन्ति एवं चतुर्विंशतिर्बृहत्यः। ततो वामदेव्ये सप्तदशका गायत्रः, पावमानीभ्यां द्वाभ्यां गायत्रीभ्यामवशिष्टाभ्यां सह त्रैकोनविंशतिगायत्रो भवन्ति। ततो नौधसकालेयर्योरेकत्र सप्तदश बृहत्यः, एकत्र सप्तपञ्चाशता गायत्रीपादैः सह सप्तपञ्चाशद्बृहत्यः सप्तपञ्चाशत् त्रिष्टुभो भवन्ति। पावमानीभिस्त्रिष्टुब्भिः सह षष्टिस्त्रिष्टुभ इति सिद्धं भवति।

अथ बृहद्रथन्तरयोरुत्पत्तिककुभोरागमः क्रियते, तत्र याः सवने समाम्नाताः, ताः षष्टिर्भवन्ति, ये ते द्वे सवने ककुभौ असमाम्नाते आनीयेते, तयोर्द्वादशत्वात् प्रयोगस्तेन सा षष्टिः पूर्यते, यास्ता ऋचः सवने समाम्नातास्ता इह सवनशब्देन उच्यन्ते, न कर्मणि सवनशब्दप्रयोगः, तत्र हि त्रिषु सवनेषु बृहत्रिष्टुभो भवेयुः, न षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनमिति। तस्माद्याऽसौ पूर्वा बृहती उत्तरा च विष्टारपङ्क्तिस्ताभ्यां प्रगाथं कृत्वा गातव्यमिति। (८।२।६ भ०)।

अनुष्टुप्गायत्रीः प्रयाजेन सावित्रान्त्रीगवयोर्गानाधिकरणम्।
(तृतीयवर्णकम्)।

एवं वा,

प्रागाधिकन्तु ॥ २५ ॥ (सि०)

पक्षच्छन्दाः सावित्र आर्भवः पवमानः सप्तसामा,

गायत्रसंहिते गायत्रे ह्वे भवतः, श्यावाश्वान्धीगवे आनुष्टुभे, उक्थिहि सक्थं, वक्रुभि पौष्कलं, वावमन्यद्यद्गतीषु इति। यदेतत् श्यावाश्वम् आन्धीगवञ्च ह्वे सामनी, तयोः पूर्वा अनुष्टुप्, पुरोजिती वो अन्धसः सुताय माद्यिवन्वे। अप ध्वानं अधिष्टन सखायो दीर्घजिह्वम्। उत्तरे ह्वे गायत्र्यौ, यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्वयः। तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यज्ञं हिन्वन्ति अद्रिभिः इति। तत्रैषोऽर्थः सांयिकः, किमन्ययोरुत्पन्नानुष्टुभोरागमं कृत्वा समासु गानं कर्त्तव्यम्, अथ वा यासौ पूर्वाऽनुष्टुप्, उत्तरे च गायत्र्यौ, तयोः प्रयत्नेन ह्वचक्षं कृत्वा अनुष्टुप्कारं गानं कर्त्तव्यम्? इति।

किं प्राप्तम्? अन्ये अनुष्टुभावागमयितव्ये इति। कुत एतत्?। एवं तासामुत्पत्तिरर्थवती भविष्यति। एवं प्राप्ते ब्रूमः, प्रागाधिकं तु, प्रागाधिकं गानं कर्त्तव्यम्, एवं हि स्मरन्ति, आनुष्टुभः प्रगाथः इति, प्रगाथता स्मर्यमाणा ज्ञापयिष्यति।

स्वे च ॥ २६ ॥ (यु० १)

एवं स्वे गानं भविष्यति। तत्र प्रकृतमनुयक्ष्यते, नाप्रकृतप्रक्रिया भविष्यति।

प्रगाथे च ॥ २७ ॥ (यु० २)

प्रगाथशब्दश्चोपपत्स्यते पुनःपादे गीयमाने ॥

लिङ्गदर्शनाच्यतिरेकाच्च ॥ २८ ॥ (यु० ३)

अव्यतिरेकेण च लिङ्गं भवति, एवमाह, चतुर्विंशति जगत्यस्तृतीयसवनं, एका ककुभ् इति। तन्निर्दिश्यते, पञ्चच्छन्दा आयाप आभवः पवमानः समसामा, गायत्रसंहिते गायत्रे दृचे भवतः, ताः षट् गायत्रास्त्रिस्रो जगत्यो भवन्ति। श्यावाश्वान्धीगवे आनुष्टुभे, तयोः पूर्वा अनुष्टुप्, उत्तरे गायत्र्यौ, तत्र प्रयथनेन क्रियमाणे द्वयोः साम्नोः षडनुष्टुभः, तावतस्रो जगत्यः, पूर्वाभिः सह सप्त। उष्णिहि मध्ये, ककुभि पौष्कले एकमपि एकस्यामृचि, अपरमध्ये कस्यां, ते द्वे उष्णिक्ककुभौ, सैका जगती, गायत्रीपादेन पूर्वाभिः सहाष्टौ जगत्यः। कावे तिस्रो जगत्यः, ताभिः सहैकादश भवन्ति। एकविंशं यज्ञायज्ञीयं, तत्र पूर्वा बृहती, उत्तरा विष्टारपङ्क्तिस्तत्र ककुभावुत्तरे कृत्वा प्रगाथः क्रियते। एकविंशे च स्तोमे क्रियमाणे सप्त बृहत्यो भवन्ति, चतुर्दश ककुभः, याः सप्त बृहत्यः, ता पञ्च जगत्यः, पूर्वाभिः सह षोडश, एकयाऽत्र जगतीपादः, पूर्वेण गायत्रीपादेन सह विंशतिरक्षराणि। अथ चतुर्दशसु ककुप्सु या द्वादश ककुभः, ताः सप्त जगत्यः पूर्वाभिः सह त्रयोविंशतिः, ये द्वे ककुभौ त्रिष्टुभौ, सैका जगती गायत्रीपादश्च, पूर्वाभिः सह चतुर्विंशतिर्जगत्यः, गायत्रीपादः पूर्वैर्विंशत्यक्षरैः सह ककुब्भवति। एवं प्रगाथे क्रियमाणे चतुर्विंशतिः जगत्यः, एका च ककुप्। अथ प्रगाथो न क्रियते, ततः श्यावाश्वान्धीगवयोरुत्तरयानुष्टुभोराग-

माध्यन्दिनीये चत्पत्तिककुभोरागमात्रैषा संख्या सम्पद्यते। तस्मात् प्रयत्नेन गानं कर्त्तव्यमिति। (८।२।६अ०)।

पादप्रयत्नेन ब्रह्मसामगानाधिकरणम्।

(चतुर्थवर्णकम्)

एवं वा,

गवामयने ब्रह्मसाम प्रकृत्य समामनन्ति, चतुःशत-मैन्द्रा बार्हताः प्रगाथास्त्रयस्त्रिंशतं च सतोबार्हतास्त्रिकाः इति। तत्र सन्देहः, किं द्वयोर्द्वयोः ऋचोः प्रगाथं कृत्वा गातव्यम्, उत, तिसृषु ऋक्षु गातव्यम्? इति। किं प्राप्तम्?, तिसृषु ऋक्षु इति। कुतः?। एवं प्रकृतौ श्रूयते, तस्मादेकं साम तृचे क्रियते इति। तदिह चोदकेन प्राप्तं, तस्मात्तिसृषु गातव्यमिति। एवं प्राप्ते ब्रूमः,

प्रागाथिकन्तु ॥ २५ ॥ स्वे च ॥ २६ ॥ प्रगाथे च २७ ॥ (सि०)

द्वयोर्द्वयोः ऋचोर्गेयम्, एवं स्वे गानं कृतं भविष्यति। कस्मिन् स्वे?। प्रगाथे। कथं प्रगाथः स्वः?। विहितौ हि गवामयने ब्रह्मसाम प्रकृत्य, तस्मात् ब्रह्मसाम्नः स्वः प्रगाथः, प्रगाथशब्देन च वचनात् स्वः प्रगाथ इत्युच्यते।

लिङ्गदर्शनाच्चतिरेकाच्च ॥ २८ ॥ (यु०)

भवति हि लिङ्गदर्शनं, पञ्चसुमाः सुबार्हताः प्रगाथा

आप्यन्ते इति। तच्च प्रयजने युज्यते, न ऋचगाने। कथम्?। चतुरुत्तरं हि शतन्ते प्रगाथाः, तत्र बृहद्रथन्तरयोर्ज्योतिष्टोमे प्रगाथद्वयं, नौधसकालेययोरपि तत्रैव प्रगाथद्वयं, इन्द्रक्रतुः प्रगाथ उत्तरस्मिन् यज्ञसि भवति, त एते नवनवतिः प्रगाथाः शिष्टाः अभिप्लवेषु कर्त्तव्याः। पृष्ठेषु सतोबृहत्यो विधीयन्ते, अभिप्लवानां तृतीये दिवसे सतोबृहत्यः, एवमवशिष्टानि अभिप्लवानां शतमष्टानि, तेषामन्त्ये सतोबृहत्यः, अन्येषु नवनवतौ दिवसेषु नवनवतिः प्रगाथाः। आप्यन्ते इति लिङ्गमप्युपपन्नं भवति। ऋचे पुनर्गाने क्रियमाणे षट्षष्टिस्तृचाः त्रिषु सप्ताधिकेषु मासेषु समाप्येरन्। तदेतत्सर्वं लिङ्गदर्शनात् प्रगाथे गानं कर्त्तव्यमिति मन्यते।

आह, अथ कस्मात् प्रथमर्चे गानं कृत्वा ततस्तस्मात् ऋचादेकामृचमादायान्ये द्वे ऋचौ गृहीत्वा ऋचे गानं क्रियते? तथा हि ऋचगानप्राप्तौ चोदकोऽनुगृहीतो भवति, लिङ्गोपपद्यते, पञ्चसुमाः सुवार्हताः प्रगाथा आप्यन्ते इति। उच्यते, अन्यतिरेकेण लिङ्गं दर्शयति, अन्या ऋचो भवन्ति, तदेव सामेति। तस्मात् द्वयोर्द्वयोः ऋचोः प्रगाथं कृत्वा गानं कर्त्तव्यमिति। (८।२।६अ०)।

गौरिसम्पादकानामक्षरविकारादीनां विकल्पाधिकरणम्।

अर्थैकत्वात् विकल्पः स्यात् ॥ २६ ॥

सामवेदे सप्तत्रं गीत्युपायाः। आह, के इमे गीत्यु-

पायाः नाम ? । उच्यते, गीतिर्नाम क्रिया, सा आभ्यन्तरप्रयत्नजनितस्वरविशेषाणामभिव्यञ्जिका, सा सामशब्दाभिलप्या, सा नियतपरिमाणे ऋचि च गीयते, तस्मात्तदर्थः ऋक्षु अक्षरविकारो विश्लेषो विकर्षणमभ्यासो विरामः स्तोभ इत्येवमादयः सर्वे समधिगताः समाम्नायन्ते । तेषु संशयः, किं समुच्चीयन्ते उत विकल्प्यन्ते ? इति । किं तावत्प्राप्तम् ? प्रतिभाति, सर्वेषां समाम्नानात् सर्वाङ्गोपसंहारित्वाच्च प्रयोगवचनस्य, समुच्चयेरन्निति । एवं प्राप्ते ब्रूमः, अर्थैकत्वाद्विकल्पः स्यात् इति । एकार्था हि गीत्युपायाः, गीतिः कथं निर्वर्त्तेतेति प्रयुज्यन्ते, तत्रान्यतरेण भिन्नो गीतौ निर्वृत्तायां नेतरे प्रयोगमर्हन्ति । तस्माद्विकल्प इति । (८।२।७अ०) ।

ऋचा स्तुवते साम्ना स्तुवते इति विधिना सार्वत्र्य सर्वविधानाधिकरणम् ।

अर्थैकत्वाद्विकल्पः स्याद्ब्रुक्सामयोस्तदर्थत्वात् ॥

३० ॥ (पू०)

क्वचित्कर्मविशेषे श्रूयते, ऋचा स्तुवते साम्ना स्तुवते यदृचा स्तुवते तदसुरा अन्वजायन् यत् साम्ना स्तुवते तदसुरा नान्वजायन् य एवं विद्वान् साम्ना स्तुवीत इति । तत्रायमर्थः, सांशयिकः, किमृचा वा स्तोतव्यं साम्ना वा, उत सामैव ? इति । किं तावत्प्राप्तम् ? विकल्पः, ऋचा वा सामा वा । भिन्नमिदं वाक्यं दृश्यते, यदृचा स्तुवते

तदसुरा अन्ववायन् इति, ऋचा स्तवे क्रियमाणेऽसुरा अन्ववगता इति, परिपूर्णमेतावति वाक्यं पश्यामः, एवमर्थमिदं सङ्कीर्त्यते, कथं नाम गम्यते ऋचा स्तोतव्यमिति। किमर्थम्?। यस्मिन् कर्मविशेषे श्रूयते, तस्याङ्गं यथा स्यात्, तच्च प्रयोगसामर्थ्यात् प्रयोगवचनेन गम्यते इति।

ननु असुरसङ्कीर्त्तनानिन्दैषा। नेत्याह, न वयं निन्दितान् अनिन्दितान्वा असुरान् विद्मः। सङ्कीर्त्तनात् कर्त्तव्यतामध्यवस्यामः। एवं साम्ना स्तुवते इति पृथग्वाक्यं, तस्मादिकल्पः। ऋक्सामयोः स्तुत्यर्थत्वादुभयोरप्येकं कार्यं, स्तुतिर्हि निर्वर्त्तयितव्येति, तदन्यतरेण सिध्यतीति विकल्पः।

वचनादिनियोगः स्यात् ॥ ३१ ॥ (सि०)

नैतदस्ति, विकल्प इति। साम्नोविनियोगः स्यात्। कुतः?। तस्येह विनियोजकं वचनमस्ति, यदृचा स्तुवते तदसुरा अन्ववायन् य एवं विद्वान् साम्ना स्तुवीत इति साम्ना स्तुतिः प्रशस्यते प्रत्यक्षेण प्रशंसावचनेन, इतरथा कल्पना स्यात्, ऋचा स्तवने असुरा अनुगताः। तस्मात् ऋचा स्तोतव्यमिति। अथ साम्ना स्तवः प्रशस्यते, ततो यदृचा स्तुवते तदसुरा अन्ववायन् इतीतरप्रशंसार्था निन्दैषा न किञ्चित् विकल्पयिष्यते इति। कथं निन्दावचनमेतदिति गम्यते?। इतरस्तुतिवचनात्। तस्मात् साम्नैव स्तोतव्यमिति। (८।२।८।अ०)।

अयं सहस्रमानव इत्यृचा प्रगीतयैवाहवनीयोपस्थानाधिकरणम्।

(द्वितीयवर्णकम्।)

अर्थैक्यात्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥ (पू०)

क्वचित् कर्मविशेषे श्रूयते, अयं सहस्रमानवः इत्येतया आहवनीयमुपतिष्ठते इति। अथायमर्थः सांग्रहिकः, किमप्रगीतया उपस्थातव्यम्, उत, प्रगीतया? इति। किं प्राप्तम्?। प्रगीतया अप्रगीतया वा। कुतः?। अविशेषापदेशात्, प्रगीताऽप्यसौ इयमेव ऋक्, अप्रगीताऽपीयमेव, उभयथा हि तां समामनन्ति, तस्माद्य विशेषः आदर्त्तव्य इति। न चेद्विशेषः, स्तुतिपरत्वात् ऋक्सामयोर्विकल्प इति। एवं प्राप्ते ब्रूमः,

वचनाद्विनियोगः स्यात् ॥ ३१ ॥ (सि०)

प्रगीतैव विनियुज्येत, नाप्रगीता। कुतः?। वचनात्। किं वचनम्?। अयं सहस्रमानवः इत्येतया इतिप्रकृतवचनशब्दः। प्रगीता च सामवेदे प्रकृता, सा, एतया इति सम्बध्यते। ननु अप्रगीताऽपि तत्र पठ्यते। सत्यं, प्रगानसम्बन्धार्था तु सा। न ह्यपठितायां प्रगानं शक्यते कर्त्तुमिति ऋक् सामार्थं, ऋचोऽध्ययनं सामार्थं गम्यते, नह्यन्तरेण ऋचं, सामनिर्वृत्तिर्भवति, अन्तरेणापि तु साम, ऋक् निर्वर्त्यते। न ऋक् साम आकाङ्क्षति इति। तस्मादेवं सामवेदे, उपतिष्ठते वा, स्तौति वेत्युक्ते प्रगीतायामेव ऋचि संप्रत्ययो भवति, नाप्रगीतायाम्।

आह, यदि प्रगीतायां संप्रत्ययः प्रकरणात्, वचनाद् प्रगीतायाम्, अप्रगीताऽपि हि शाखान्तरे समाम्नायते, सा प्रकरणं बाधित्वा वाक्येन रुद्ध्येत इति। उच्यते, न वाक्येन ऋक् रुद्ध्यते, प्रतीकग्रहणं ह्येतत्, अयं सहस्रमानवः इत्येतया इति पुनः प्रकृताया ऋचो वाचको मुख्य ऋक्शब्दः, त्वत्पक्षे प्रतीकग्रहस्य लक्षणा स्यात्। श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा। तस्मात् प्रगीतया उपस्थातव्यमिति। (८।२।८अ०)।

अग्निमुँळ्हेत्यादि याज्यानुवाक्यादीनां तानेन प्रयोगाधिकरणम्॥

(तृतीयवर्णकम्॥)

अर्थैकत्वादिकल्पः स्याद्दृक्सामयोस्तदर्थत्वात्॥

३१॥ (पू०)

इह केचित् वैषर्ण्येणाम्नायते, केचिच्चातुःस्वर्ण्येण। आह, ये इमे चातुःस्वर्ण्येणाधीयन्ते, किं ते, उदात्तानुदात्तस्वरितेभ्योऽधिकं अपरं स्वरं कुर्वन्ति?। नेत्याह, तेषामप्येते एव स्वराः, येऽन्येषाम्। किं नु कुर्वन्ति?। एकं स्वरान्तरमुत्क्रम्याधीयन्ते। तत्र सन्देहः, किं समुच्चयः, वैषर्ण्यादीनाम्, उत विकल्पः? इति। किम्प्राप्तम्?। सर्वाक्षेपसंहारित्वात् प्रयोगवचनस्य, समुच्चयः इति। एवम्प्राप्ते ब्रूमः, अर्थैकत्वादिकल्पः स्यात्, एकोऽर्थः सर्वेषां वैषर्ण्यादीनामध्ययननिर्वृत्तिः। तस्मादिकल्पः।

वचनादिनियोगः स्यात् ॥ ३१ ॥ (सि०)

वचनमिदं भवति स्मृत्यनुमितं, ज्ञानो यज्ञकर्मणि ति, तस्मात्तानेन प्रयोगः कर्त्तव्यः। अथ चैश्वर्य्यादीनां क्रमर्थं समाम्नानम् ? इति। उच्यते, अर्थावबोधनार्थं ाविष्यति। (८।२।८अ०)।

रथन्तरमुत्तरयोर्गायतीत्यादौ उत्तरावर्णवशेन गानाधिकरणम्।

ामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात् ॥ ३२ ॥ (पू०)

इदमाम्नायते, रथन्तरमुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायति, कवतीषु रथन्तरं गायति, विराट्सु वामदेव्यं इति। तत्र सन्देहः, किमुत्तरावर्णवशेन गातव्यं, किं योनिवर्णवशेन ?। कथमुत्तरावर्णवशेन गीतं भवति ? थं वा योनिवर्णवशेन ? इति। उच्यते, किञ्चिदुदाहरणं गृहीत्वा व्याख्यास्यामः, यदा तावत् हृहन्तालव्याई भवति इति योनौ यस्मिन् भागे आईभावः कृतः तस्मिन्नेव भागे उत्तरासु आईभावः क्रियते, ततो योनिवर्णवशेन गीतं भवति, अथ भागान्तरे हृहन्तालव्यं दृष्ट्वा ाईभावः क्रियते, तत उत्तरावर्णवशेन गीतं भवति।

किं पुनरत्र कर्त्तव्यम् ? योनिवर्णवशेनेति। कथम् ?। ावति भागे एकारस्य योनौ आईभावः कृतश्चं विचारयामः, किं तत्र कृतमिति ? एकारो नोच्चारितः, ईकारा-

स्तरे निवृत्तिः, यद्वा ऋगक्षराणामगीतित्वात् निवृत्तिरेवं स्तोभाक्षराणामपीति ।

सर्वातिदेशस्तु सामान्यात्लोकवद्विकारः स्यात् ॥ (सि०)

नैतदस्ति, स्तोभानां निवृत्तिरिति, सर्वातिदेशो हि भवति, ऋक्-स्तोभ-स्वर-कालाभ्यासविशिष्टायाः गीतेः सामशब्दो वाचकः । कथमवगम्यते ? । तत्र प्रयोगात्, यदि स्तोभा निवर्त्तेरन्, ततक्रतौ विशेषो नोपसंगृहीतः स्यात् तत्र शब्दो बाधेत । तस्मात् स्तोभाः प्रदिश्येरन् । यत्तूक्तम्, ऋक्शब्दार्थैः असम्बध्यमानाः स्तोभा अनर्थका भवेयुः । अत्र ब्रूमः, लोकवत् न अनर्थका भविष्यन्ति । तद्यथा, लोके गायनैरङ्गवसुकानि यानि नाम प्रक्षिप्यन्ते, तानि गीतिकालगणनार्थानि, नार्थसम्बन्धाय, उच्चार्यन्ते, सुखं ह्युत्तरैः गीतिकालः परिच्छिद्यते । तद्वदिहापि कालपरिच्छेदार्थानि स्तोभाक्षराणि अनुवर्त्तेरन्निति :

अन्वयश्चापि दर्शयति ॥ ३६ ॥ (यु०)

अन्वयतश्चापि स्तोभान् दर्शयति, यत्पादिकानि पदानि निवर्त्तन्ते, स्तोभा गेष्यामावयन्ति इति, स्तोभाः स्तोभा एव गेष्यामः स्वराः । तस्मादपि स्तोभाः प्रदिश्यन्ते ।

निवृत्तिर्वाऽर्थलोपात् ॥ ३७ ॥ (वा०)

वाशब्दात्पक्षो विनिवर्त्तते । निवृत्तिः अभिनष्टपति

इत्येवञ्जातीयकानां स्तोभानाम्। प्रीतकर्मा ह्येन्द्रो वाक्यशेषे उपलभ्यते, न तेनैवञ्जातीयकाः स्तोभाः सम्बध्येरन्निति। अन्वयात्सम्बध्यन्ते लोकवदिति यदुक्तं, तत्परिहर्त्तव्यम्।

अन्वयो वार्थवादः स्यात् ॥ ३८ ॥ (आ०नि०)

अन्वीयुर्वा एवञ्जातीयका स्तोभाः, नहि वयमिन्द्ररूपं प्रत्यक्षमुपलभामहे। यच्च वाक्यशेषवचनं, सोऽर्थवादः। (८।२।१० अ०)।

स्तोभलक्षणाधिकरणम्।

अधिकञ्च विवर्णञ्च जैमिनिः स्तोभशब्दत्वात् ॥३९॥

अथ कः स्तोभो नाम? तस्य लक्षणं कर्त्तव्यम्। उच्यते, य ऋगक्षरेभ्योऽधिको न च तैः सवर्णः स स्तोभो नाम, ईदृशे हि लौकिकाः स्तोभशब्दमुपचरन्तीति, तद्यथा देवदत्तेन सभायां परं प्रलपता बहुस्तोभं कथितमिति, यदर्थवचनेभ्योऽधिकं विवर्णञ्च, तत् आलोच्य एवंवक्तारो भवन्ति।

लक्षणकर्मणः प्रयोजनं न वक्तव्यं, लक्षणकर्मणो हि तदेव प्रयोजनं, यल्लक्षितो भविष्यतीति। किमर्थमुभयं सूत्रितम्? नन्वन्यतरत् पर्य्याप्तम् अधिकमिति वा विवर्णमिति वा इति। नेत्याह, भवति हि किञ्चित् अधिकं न

विवर्णं, यद्वा अभ्यासवाद्विवादिः इति। तथा किञ्चित् विवर्णं, नाधिकं, यद्वा विकारः, ओम्नाद इति। तस्मादुभयं सूचयितव्यमिति। (९।२।११ अ०)।

नीवारादिषु प्रोक्षणावघातादिधर्मानुष्ठानाधिकरणम्।

धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥ ४० ॥

वाजपेये श्रूयते, बार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपति इति। अस्ति च प्रकृतौ व्रीहिषु प्रोक्षणं, तत् नीवारेषु भवति, न वा? इति संशयः। तथा, उद्गीथा वा एतर्हि वाग्भवति यर्हि पृष्ठः षड्हः सन्तिष्ठते, न बहु वदेत्, नान्यं पृच्छेत् नान्यत्रै ब्रूयात्, संस्थिते षड्हे मध्वाग्रयेत् घृतं वा इति मध्वग्रने घृताग्रने च षड्हधर्मा भवन्ति वा, न भवन्ति? इति संशयः। तथा राजसूये श्रूयते, नैर्ऋतं चरुं नखावपूतानां परिहृत्यै यहे इति अस्ति प्रकृतौ उलूखलमुसलयोः प्रोक्षणं, प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति इति, तत् नखेषु भवति, न भवति? इति संशयः। तथा चातुर्मास्येषु श्रूयते, परिधौ पशुं नियुञ्जीत इति परिधौ यूपधर्माः कर्त्तव्याः, न कर्त्तव्याः? इति संशयः। तथा, न गिरा गिरेति ब्रूयादिति गिरा गिरेति ब्रूयादाज्यं तदुद्गातोद्गिरेत् ऐरं क्लोदेयम् इति इरापदे गिरापदधर्मा भवन्ति, न भवन्ति? इति संशयः।

किं तावत्प्राप्तम्। व्रीह्यादिषु उक्ता धर्मा न नीवारा-

दिषु, तस्मात्तेषु न भवेयुरिति। एवं प्राप्ते ब्रूमः, नीवारादिषु चोदनानुबन्धः स्यात्, समवैति हि तेषु च प्राकृतो धर्मः, प्रकृतौ तावदपूर्वप्रयुक्तोऽसौ न व्रीह्यादिप्रयुक्तः, येनापूर्वस्य विशिष्टोऽयं साधनविशेषः, तत्रैव धर्मो न व्रीह्यादाविति समधिगतमेतत्। नीवारादयस्तु व्रीह्यादिकार्यकारिण इत्यवगम्यते, नीवारस्य भावचोदना, नैवारैरुत्कर्त्तव्यः इति, स च नान्येन प्रकारेण नीवारो यागस्योपकरोति, वर्जयित्वा तण्डुलनिर्वृत्तिं, स प्रत्यक्षेण अवगम्यते, व्रीहिकार्ये वर्त्तते इति। तस्माद्व्रीहिधर्मा नीवारे भवेयुरिति।

एवं षड्ढेनोपासीत इति चोदनायां सत्यां यदा षड्ढः सन्तिष्ठते न षड्ढेनोपास्यते इत्यर्थः, मधुघृताभ्यामुपासीतेति गम्यते, यस्य भावे यस्य निवृत्तिस्तस्य स्वार्थेऽवगम्यते, षड्ढनिवृत्तौ मध्वाज्यं हुवन् षड्ढकार्ये वर्तत इति गम्यते। तस्मात् षड्ढधर्मो व्रतं नियमो वा मध्वाज्ये भवतीति। यागाभावात्तन्निमित्ता ग्रहा न प्रवर्त्तन्ते, ग्रहं वा गृहीत्वा चमसं वोन्नीय स्रोत्रमुपाकरोति इति ग्रहचमसाभावात् स्रोत्राभावः, श्रुतमनुगंसति इति स्रोत्राभावादश्वाभावः। सवनाभावाच्चवनीया न प्रवर्त्तन्ते, इत्येवमादि न प्रवर्त्तते, व्रतानि नियमाश्च प्रवर्त्तन्ते इति।

यच्चान्यदनर्थकुप्तं न नक्षावपूतानामिति, नान्यथा नक्षावपूता भवन्ति, यदि न तैलुषाः विधूयन्ते, तस्मात्तुषविमोचने नक्षाः श्रुता इति गम्यते। अतश्चोलूखलमुसलधर्मैः सम्बध्यन्ते इति।

तथा परिधिर्यूपकार्ये वर्त्तते इति विरुद्धमेव वचनं, परिधौ पशुं नियुञ्जन्ति इति। तस्मात्तदर्थकः परिधिः स्यात् इति।

तथा न गिरा गिरेति ब्रूयादेरं कृत्वोङ्कियम् इति नेतौ द्वावपि विधीयेते प्रतिषेधः इरापदस्य, तथा हि वाक्यं भिद्येत। नच, इरापदमप्राप्तत्वादनूद्यते, प्रतिषेधे त्वनुवादः सम्भवति। यदा इरापदं तदा व्यक्तं गिरापदं न भवतीति। एकवाक्यरूपत्वं गम्यते, यस्माद्गिरापदस्थायं दोषस्तस्माद्गिरापदं ब्रूयादिति, भिन्नवाक्यरूपे त्वाश्रीयमाणे भूयसी अदृष्टानुमानकल्पना स्यात्, तस्मात्तानं गिरेदिति दोषो विधीयते, अरीरं गिरितुमसम्भवः, परमात्मन्यदोषः। वाक्यभेदस्तु स्थित एव। तस्माद्गिरापदोच्चारणमिरापदस्य तत्कार्यापत्तिषु दर्शनार्थं, न गिरा गिरेति कृत्वोङ्कारयेदिति। तस्माद्गिरापदधर्म्या इरापदे भवेयुरिति सर्वत्र पर्य्यवसितम्। परिधौ अनन्तरा कथा वर्त्तिष्यते (९।२।१२ अ०)।

परिधौ यूपधर्म्यानुष्ठानाधिकरणम्।

तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात्स्यात् ॥ ४१ ॥

(प्र०)

चातुर्मास्येष्वाम्नायते, मध्यमे पर्वणि परिधौ पशुं नियुञ्जन्ति इति। तत्रोक्तं, यूपधर्माः परिधौ कर्त्तव्या इति। तद्विपरिवर्त्तते, ते न कर्त्तव्याः तदुत्पत्तेः परिधेरा-

ध्वनीयपरिधानार्थोत्पत्तेर्यूपधर्मा निवर्तेरन्, तत्कृता हि ते अपूर्वप्रयुक्तपशुबन्धनहारेण अपूर्वं गच्छन्ति, तच्च यद्-बन्धनस्याङ्गभूतमिति श्रुतं तदबन्धनार्थमेव द्रव्यमुक्तं, यथा-ध्वनीयपरिधानार्थमुत्पन्नं, तस्मिन् पराङ्गभूते बन्धनं कृतं भवति, न तद्धर्माणां हारं भवितुमर्हति, न हि तच्च क्रिय-माणाः पशोः कृताः भवन्ति, न पशुकस्य, अपिच सत्वकः परिधिरनुच्छ्रयश्च यूपधर्मैः परिधित्वात् हीयेत। यूपा-याज्यमानायेति च शब्द जह्यात्, तथायं बाधितः स्यात्। तस्मात्परिधौ यूपधर्मा न स्युरिति।

आवेश्ये रज्वार्थवत्त्वात्संस्कारस्य तदर्थत्वात् ॥ ४२ ॥ (सि०)

आवेश्ये रज्वा यूपधर्माः परिधौ, बन्धनोपकारकाधने हि विधीयन्ते, सच परार्थो बन्धनं नयति निष्पादयति, करोत्यसौ बन्धनोपकारम्। अयश्च संस्कारो बन्धनं निष्पा-दयति, तदर्थोत्पत्तिम् अनर्थोत्पत्तिं वा नापेक्षते। तस्मात्परिधौ यूपधर्माः कर्त्तव्या इति।

यदुक्तम् अनुच्छ्रयश्च सत्वकश्च परिधिरिति। अत्रोच्यते, ये परिधित्वाविरोधिनो यूपधर्मास्ते करिष्यन्ते, न विरुद्धा इति।

आख्या चैवं तदावेशात् विकृतौ स्यादपूर्वत्वात् ॥ ४३ ॥ (आ० नि०)

अत्र यदुक्तं, यूपायाज्यमानाय इति शब्द जहितव्यः

स्यादिति, अत्रोच्यते, नोद्धितव्यो भविष्यति, धर्मावेक्षात् आख्या अपि यूपः इति भविष्यति, धर्मनिबद्धा हि सा, यथैव यूपे, तद्वा परिधावपि भवितुमर्हति, तस्मान्नोद्धिष्यते यूपमुच्छ्रयेत् इति। (६।२।१३ अ०)

श्रुतादौ प्रणीताधर्मानुष्ठानाधिकरणम्।

परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥ (पू०)

वि वा एनं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान् विभजेत् ये मध्यमास्तावन्मये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्। ये क्षविष्ठास्तानिन्द्राय प्रदात्रे दधरुं ये क्षोदिष्ठाः तान् विष्णवे शिपिविष्टाय श्रृते चरुं श्रृते चरुं दधरुम् इत्येवमुदाहरणम्। तत्रायमर्थः सांयविकः, किं श्रृते दध्नि प्रणीता धर्माः कर्त्तव्याः, उत न कर्त्तव्याः? इति। किं प्राप्तम्? न कर्त्तव्या इति, परार्थम् एतत् प्रदानार्थमिति न प्रणीतार्थम्। दधि च तण्डुलविभागश्च एको भाग इन्द्राय प्रदात्रे दातव्यः, श्रृतस्य तण्डुलविभागस्य विष्णवे शिपिविष्टाय, न श्रपणार्थं दधि पयो वा विधीयते। तत्र हि समसंयोगोऽनुवाद एव, न च प्रणीताकार्ये विधीयते दधि पयो वा। तस्मात् प्रणीतानां धर्मैर्न संयुज्यते। न हि प्रणीतानां दध्नश्च अर्थसामान्यं

किञ्चिदस्ति, तदर्थायं संस्कारः, अपवहारकः, तस्मात्र प्रणीताधर्म्याः पयसि दधनि वा भवेयुरिति।

क्रियेरन् वाऽर्थनिर्वृत्तेः ॥ ४५ ॥ (सि०)

नचैतदस्ति, प्रणीताधर्म्या दधिपयसोर्न कर्त्तव्या इति, अपवसाधने हि ते विधीयन्ते, न अपवार्थमुत्पन्ने द्रव्ये, येनार्थो निवर्त्तेत, तत्र ते अपूर्वप्रयुक्तत्वात् क्रियते, क्रियते च दधिपयोभ्यां अपवम्। तस्मात् तद्धर्मैः संयोगः स्यात्। (८।२।१४ भ०)।

बृहद्रथन्तरयोर्धर्म्यव्यवस्थाधिकरणम्।

एकार्थत्वाद्विभागः स्यात् ॥ ४६ ॥ (पू०)

ज्योतिष्टोमे समामनन्ति, बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवति इति, अस्ति हि बृहद्रथन्तरयोर्विकल्पः, यस्मिन् कार्य्ये रथन्तरं प्रवर्त्तते तस्मिन्नेव कार्य्ये बृहत्पृष्ठस्तुतिद्वारेण धर्मा विहिताः। तस्माद्बृहद्धर्मा रथन्तरधर्माश्च उभयत्र कर्त्तव्या इति। बृहद्ग्रहणं रथन्तरग्रहणञ्च लक्षणार्थं भविष्यति।

निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥ (सि०)

निर्देशाद्वा रथन्तरे रथन्तरधर्माः कर्त्तव्याः, नोच्चैर्गेयं नच बलवत् गेयं, रथन्तरे प्रस्तूयमाने संमीलेत् खर्दूरं

प्रतिबोधेत इत्येवमादयः। हृहद्वर्मांश, हृहति उच्चैर्गेयं हृहति गीयमाने समुद्रं मनसा ध्यायेत् इत्येवमादयः। एवं निर्देशोऽर्थवान् भविष्यति, इतरथा रथन्तरग्रहणञ्च हृहद्ग्रहणञ्च प्रदर्शनार्थं स्यात्, तथा लक्षणा भवेत्, न च श्रुतिसम्भवे लक्षणा न्याया। यदुच्यते, अर्थैक्यात्तद्वद्रथन्तरयोरिति, सत्यमेकोऽर्थः पृष्ठसिद्धिः, एतदस्ति, अन्यथा हृहता साध्यते पृष्ठम्, अन्यथा रथन्तरेणेति। यथा पर्वणि विभज्यमाने द्वावभ्युपायौ, यथा द्वौ पुरुषौ अन्तर्यौ हीत्वा आकर्षतः। यद्वा तीक्ष्णेन शस्त्रेण च्छेदनम्, तच्च यत् शस्त्रस्य तीक्ष्णीकरणं द्रव्यं तच्छेदनाभ्युपाये सम्बध्यते, नाकर्षणाभ्युपाये तदर्थापत्तेऽपि। एवं हृहद्वर्मा रथन्तरे तदर्थापत्ते भवेयुर्वा न वा? इति जायते विचारणा, तत्र निर्देशसामर्थ्यादिदमवगच्छामः, अन्यथा हृहत्साध्यति, अन्यथा रथन्तरमिति। प्रत्यक्षं खल्वपि अन्यदुपलभामहे, रथन्तरं शूरादिकां संस्तुतिं कुर्वत् पृष्ठं साधयति, हृहत् चित्रादिकाम्। तस्माद्रथन्तरधर्मा शूरादिकायां स्तुतौ निर्वक्ता रथन्तरे प्रस्तूयमाने भवेयुर्न हृहति, हृहद्वर्मा अपि चित्रादिकायां स्तुतौ निवक्ता हृहति भवेयुः। न रथन्तरे, तस्माद्रावस्था धर्माणामिति। (८।२।१५ अ०)।

कल्परथन्तरे हृहद्रथन्तरधर्मसमुच्चयाधिकरणम्।

अप्राकृते तद्धिकारादिरोधाद्व्यवतिष्ठेरन्॥ ४८॥

अस्ति वैश्वस्तोमः, वैश्यो वैश्वस्तोमेन यजेत इति। तत्र इदमाम्नायते, कखरथन्तरं पृष्ठं भवति इति। तत्रायमर्थः सांशयिकः, किं कखरथन्तरे अन्यतरस्य रथन्तरस्य इहतो वा धर्माः कर्त्तव्याः, उतोभयोरपि ? इति। किं प्राप्तम्, अन्यतरस्येति। कुतः ?। एवं हि उक्तं, रथन्तरस्य राथन्तरा भवन्ति, इहतो इहधर्माः इति निर्देशसामर्थ्यादिति, तद्विशेषेऽनुच्यमाने यावदुक्तं तावत्प्राप्तमिति। तस्मादन्यतरस्य धर्माः कर्त्तव्याः।

इत्येवं प्राप्ते ब्रूमः, अप्राकृते कखरथन्तरे तद्विकारात् यस्मात् कखरथन्तरमुभयोः कार्य्ये वर्त्तते, तस्मादुभयधर्मान् लभेत, नहि विकृतौ निर्देशोऽस्ति यथा प्रकृतौ, अर्थापत्तित इह भवन्ति, चोदकेन कखरथन्तरम् उभयोरर्थापन्नम्। तस्मादुभयधर्मान् लभेत। ये तु विरुद्धा धर्माः तद्यथा उच्चैर्गेयं बलवद्गेयम् इत्येवंजातीयकाः विरोधाद् व्यवतिष्ठेरन्, अविरुद्धेषु समुच्चयः। (९।२।१६ अ०)

द्विसामके इहद्रथन्तरधर्म्मयोर्व्यवस्थाधिकरणम्।

उभयसाम्नि चैवमेकार्थात्ति ॥४९॥ (पू०)

सन्ति उभयसामानः क्रतवः, संसवः उभे कुर्य्यात् गोसव उभे कुर्य्यात्, अपवितावपि एकाहे उभे इहद्रथन्तरे कुर्य्यात् इति श्रूयते, सन्ति तु प्रकृतौ इहधर्मा रथन्तरधर्माश्च, ते इह चोदकेन प्राप्यन्ते। तत्र संशयः, किमुभय-

सामि उभयधर्माः कर्त्तव्याः, अथवा पृष्ठापि सत्रैव व्यवतिष्ठेरन् ? इति। किं प्राप्तम् ?, उभयसामि चैवं स्यात्, यथा रथन्तरे, उभे हि तत्र सामनी पृष्ठकार्ये वर्त्तेते, नैकैकं, तस्मात् नैकधर्मान् उभेत उभे हि तत्र संपृक्ते, उभे धर्मैः संपृज्येयाताम्, उभे हि ते संपृक्ते, एकार्थापत्ते पृष्ठकार्ये वर्त्तेते इति।

स्वार्थत्वाद्वा व्यवस्था स्यात् प्रकृतिवत् ॥ ५० ॥

(सि०)

वाशब्दः पक्षं व्यावर्त्तयति, न चैतदस्ति पृष्ठद्वयन्तरयोः संपृक्तयोरुभये धर्माः कर्त्तव्या इति। रथन्तरे रथन्तरधर्मा पृष्ठमिति पृष्ठधर्माः। कुतः ?। स्वार्थत्वात् धर्माणां, रथन्तरधर्मा रथन्तरार्थाः, पृष्ठधर्मा पृष्ठधर्माः, सामैवैते धर्माः, न पृष्ठस्य, तच्च साम प्रयुज्यते रथन्तरं पृष्ठवा, रथन्तरे प्रयुज्यमाने तद्धर्माः प्रयोक्तव्याः, पृष्ठत्वेऽपि प्रयुज्यमाने पृष्ठधर्माः, सामप्रयुक्ता एवैते धर्माः, सामापि हि दृष्टमदृष्टं क्रियते। तस्मात् सामापि धर्मप्रयोजने समर्थम्, अतो व्यवस्था धर्माणां प्रकृतिवत्, यथा प्रकृते रथन्तरे प्रयुज्यमाने तदङ्गं प्रयुज्यते, पृष्ठमिति तदङ्गम्, एवमिहापीति। (८।२।१७ अ०)।

सौर्यादिषु पार्श्वद्वयोमायनपृष्ठावाधिकरणम्।

पार्श्वद्वयोमयोरुभयप्रवृत्तिः समुदायार्थसंयोगात्तदर्थ्या हि ॥५१॥ (सि०)

स्तो दर्शपूर्णमासौ, तत्रेदं समाम्नायते, सुवेण पार्वणौ जुहोति इति। दोर्व्यादिषु वैकृतेषु कर्मसु भवति सन्देहः, किं तेषु पार्वणहोमो कर्त्तव्यो न वा? इति। तत इदं तावत्परीक्ष्यं, किं कालाभीज्या पार्वणहोमो, उत समुदायाभीज्या? इति, कालाभीज्यायां तयोः प्रवृत्तिः, समुदायाभीज्यायामप्रवृत्तिः। कुतः संशयः?। उभयत्र प्रसिद्धेः, उभयत्र हि पर्वशब्दो लोके प्रसिद्धः, काले समुदाये च आ हिमवत आ च कुमारीभ्यः। किं तावत्प्राप्तम्? कालाभीज्या इति, ततः कालगता प्रसिद्धिर्ज्यपदिश्यते।

एवं प्राप्ते ब्रूमः, पार्वणयोर्वैकृतेषु कर्मसु अप्रवृत्तिः। कुतः?। समुदायार्थसंयोगात्, ततः समुदाये प्रसिद्धिर्व्यपदिश्यते, काले प्रसिद्धिं परिहरिष्याम इति। अतः समुदायवाचित्वात् पर्वशब्दस्य समुदायस्याभिधेयत्वात् वैकृतेष्वप्रवृत्तिरिति।

कालस्येति चेत् ॥ ५२ ॥ (आ०)

इति चेत् पश्यसि कालस्य पर्वशब्दो वाचकः। तस्मात् कालाभीज्येति, तत्परिहर्त्तव्यम्। आभाषाज्ञं सूत्रं परेण विशेष्यते।

नाप्रकरणत्वात् ॥ ५३ ॥ (आ० नि०)

नास्ति कालस्य प्रकरणम्, अस्ति तु समुदायस्य, तस्मात् प्रकरणेन विशेषेण समुदायवाची गृह्यते, न कालवाची। अत्राह, न प्रकरणेन गम्यते पर्वशब्दस्य काल-

बाधितां बाधितुं, दुर्बलं हि बलवत् प्रकरणम्। उच्यते, नायम् उभयत्र पर्वशब्दो वर्त्तते, यदि कालवचनस्तत् सम्बन्धात् समुदाये गम्यते, यदि वा समुदायवचनस्तत्सम्बन्धात् काले, अन्यतरवचनो युक्तो नोभयवचनः। तत्र समुदायवचने कल्प्यमाने प्रकरणमनुगृहीतं भवति।

अपि च पृणातेः पर्वशब्दः, पृणातिश्च दाने प्रसिद्धः, दानानि च समुदायाः, तस्मात् समुदायाभीष्या। एवं शब्दावयवप्रसिद्धिः अनुगृहीता भवति इति। तस्माद्वैकृतेषु पार्वणयोरप्रवृत्तिः।

मन्त्रवर्णाच्च ॥ ५४ ॥ (यु०)

मन्त्रवर्णाच्च फलवदनुवादो भविष्यति, ऋषभं वाजिनं वयं पूर्णमासं यजामहे। अमावास्या सुभगा सुयेवा इति च। तस्मादपि समुदायाभीष्येति।

तद्भावेऽग्निवदिति चेत् ॥ ५५ ॥ (पुनः आ०)

नैतदस्ति, यदुक्तं वैकृतेष्वप्रवृत्तिरिति। तद्भावेऽपि यद्यपि समुदायवचनोऽयं,नच वैकृतेष्वयमस्ति समुदायः, तथापि पार्वणवद्दोषो भवेतामिव। कुतः?। अन्या एवं-शब्दिका देवता भविष्यन्ति। समुदायो वाऽसन्निहितोऽपि यज्यते, सौर्य्यादिषूपकारार्थेन। यथा, अग्निमन्न आवह इति सन्निहितोऽसन्निहितो वा अग्नेर्यागार्थेनावाह्यते, एवमिहापि इति।

नाधिकारिकत्वात् ॥ ५६ ॥ (आ० नि०)

नैतदेवम्, आधिकारिकं ह्रीदं वचनम्, अधिकारे भवं, यस्याधिकारस्तस्य गुणं विदधाति इति आग्नेयादीनाम्याधिकारिः, ते चात्र देवताः। तेषां होमो देवतार्थः। एवं यत्र सा देवता नास्ति, तत्र तदर्थो होमो न करिष्यते। तस्मात् पार्वणहोमयोर्वैकृतेभ्यो निवृत्तिः। (९। २। १८ अ०)।

दर्शपौर्णमासयोर्होमस्य व्यवस्थाधिकरणम्।

उभयोरविशेषात् ॥ ५७ ॥ (पू०)

इदमिदानीं सन्दिह्यते, किमुभौ होमौ पौर्णमास्याममावास्यायाञ्च, उत पौर्णमासीहोमः पौर्णमास्याम्, अमावास्याहोमोऽमावास्यायाम् ? इति। किं प्राप्तम् ? उभावप्युभयत्र। कुतः ?। उभयोर्हि प्रकरणे उभावप्यान्नातौ, तस्मादुभयत्र भवितुमर्हतः।

यदभोज्या वा तद्विप्रयौ ॥ ५८ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति, नैतदस्ति, उभयमुभयत्रेति, यदभोज्या, स तत्र भवेत्, तस्य हि स उपकारकः, अनुपकारक इतरस्य, न चानुपकारकः कर्त्तव्यः, समु-

दायप्रधानावत्र होमाविलुप्तम्। तस्मादङ्गीज्या, तद्विषयो भवेतामिति। (९।२।१९ अ०)।

समिदादीनां यागनामधेयताधिकरणम्।

प्रयाजेऽपीति चेत् ॥ ५९ ॥ (आ० नि०)

दर्शपूर्णमासयोः प्रयाजा आम्नाताः, समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजति इति। तत्र संशयः क्रियते, किं समिधो यजति इत्यादिशब्दैः समिदादयो देवताविशेषा विधीयन्ते, एतान् समिदादीन् यजतीति, किं वा न प्रकृतेः समिदादिभिः सम्बन्ध उपादीयते? एवंशब्दिका देवताः न प्रकृतौ उपदिश्यन्ते इति।

किं तावत् प्राप्तम्? प्रकृतानां समिदादीनां यागो विधीयते, समिदादयश्च देवता वाक्यसम्बन्धादिति। एवं प्रकृतेः समिदादिभिः सम्बन्धे क्रियमाणे प्रकरणान्नयङ्गो भविष्यति, तस्मात् प्रयाजेऽपि प्रकृता देवता भवितुमर्हति इति। देवता प्राधान्यञ्च यथा पार्वणहोमे इति।

नाचोदितत्वात् ॥ ६० ॥ (सि०)

नैतदेवं, नात्र समिदादयश्चोद्यन्ते देवतात्वेन। कुतः?। द्वितीयानिर्देशात्। तद्धितनिर्देशेन वा देवता चोद्यते, चतुर्थ्यन्तनिर्देशेन वा, तत्र हि तादर्थ्यं गम्यते, तादर्थ्ये च सति देवता भवति। न देवता नाम जात्वा

कांचित्, सैव कस्यचित् रूपस्य देवता, सैव मान्त्रस्य, यस्य यां प्रति तादर्थ्यं, सा तस्य देवता, द्वितीया दीक्षितत्तमे कारके भवति। तच्च न द्रव्यस्य, तादर्थ्यं गम्यते। तस्मान्न द्वितीयान्तेन देवताविधानम्।

अथाह, तादर्थ्यं कल्पयिष्यामः, यथा विष्णुं यजति वरुणं यजति इति। अत्र न विष्णुर्वरुणो वा यागः। नापि यागादर्थान्तरं यागस्य कारकं यदीप्सितं, तद् द्वितीयया-ऽभिधीयते तेन तच्च कल्पते तादर्थ्यं, शब्दान्तरेण वा विहितं गम्यते, इह तु न, शब्दान्तरविहितं, नचैवं शक्यं परिकल्पयितुम्। नच यागस्य कारकत्वेन सम्भवति, समिदादिशब्दकत्वात्तु यजीना समिदादय वाचका उपपद्यन्ते। क्रियायां चेक्षितायां यथा पाकं पचतीति। तस्मात् समिधो यजति इत्यनेन समिधो यजिः कर्त्तव्य इति। यदा च यजिं प्रति अनुष्ठानं चोद्यते, तदा यजिरुपदिष्टो भवति, यदि पुनरत्र देवता उपदिश्येत, उपदिष्टे यजौ देवतोपदिश्येत, तत्रोपदिष्टोपदेशे वाक्यं भिद्येत, तस्मान्न देवतोपदेशः। यदा न देवतोपदेशस्तदा मान्त्रवर्णिको देवताविधिः, तदा चोद्यादेयत्वादेवंशब्दिका देवताचोद्यन्ते। तस्मात् मान्त्रवर्णिको देवताविधिः। (८।१।२०अ०)।

इत्याचार्यशबरस्वामिकृते मीमांसाभाष्ये नवमस्य अध्यायस्य द्वितीयः पादः।

विकृतौ सन्नयतरौ व्याख्यातानामूहाधिकरणम् ।

प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यान्ततो तत्प्रकृतित्वादर्थे चाकार्य्यत्वात् ॥ १ ॥ (सि०)

वैकृतानि कर्म्माणि उदाहरणं, सौर्य्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः इति । ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः इति, चित्रया यजेत पशुकामः इति, वैश्वदेवीं सांग्रहणीं निर्वपेत् ग्रामकामः इति । अस्ति तु प्रकृतौ निर्वापमन्त्रः, अग्नये जुष्टं निर्वपामि इति । तथा इन्द्राय मरुत्वते, नैवारमेकादशकपालं निर्वपेत् इति । अस्ति तु प्रकृतौ व्रीहिलिङ्गो मन्त्रः, स्योनस्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदाग्नेऽप्रतिक्षितो व्रीहीणां मेध सुमनस्यमानः इति । तच्चेतच्च विकृतौ चोदकप्राप्तं सन्दिह्यते, किम् अविकारेण प्रयोक्तव्यम् उतोहेन ? इति ।

किं प्राप्तम् ? अविकारेणेति । तथा चार्थमनुरुध्यते, यत् प्रकृतौ कर्त्तव्यं, तद्विकृताविति प्रकृतौ चाम्निव्रीहिशब्दौ प्रयुक्तौ, तस्माद्विकृतावपि तावेव प्रयोक्तव्याविति ।

एवं प्राप्ते ब्रूमः, सत्यं प्रकृतौ यथा उत्पत्तिवचनमर्थानां

कृतं मन्त्रे, तथोत्तरस्याम् अपि ततो विकृतौ तेनैव मन्त्रेण वचनं कर्त्तव्यं, तत्प्रकृतित्वात्।

तथा प्राप्ते इदमुच्यते, नेतदेवम्, अर्थे चाकार्थ्यत्वात् इति, एतावदर्थौ अग्निग्रीद्धिशब्दौ सूर्यं नीवारञ्च नाभिदधाताम्। चशब्दोऽत्र तुशब्दस्यार्थे, मन्त्राणां चार्थवचनं कार्य्यं, न स्वरूपं, स्वरूपे च्छदृष्टं कल्पयितव्यम्। अर्थवचनेन दृष्ट उपकारः, तस्माद् जहितव्यो इति।

लिङ्गदर्शनाच्च ॥ २ ॥ (यु०)

लिङ्गं खल्वपि अस्मिन्नर्थे भवति, न माता वर्हते न पिता न भ्राता न सखा इति, प्रत्यक्षं, भ्रातरं सखायञ्च वर्हमानं पश्यामः, अतो नार्थद्वद्विप्रतिषेधसंवादोऽयं, यद्यद्वद्विप्रतिषेधस्तु न भ्रात्रशब्दो वर्हते, न सखिशब्द इति। का च तयोर्हद्धिः?। वर्णान्तरोपजननं सा, एकस्मिन् भ्रातेति द्वयोर्भ्रातराविति। एतदुक्तं भवति, न भ्रात्रशब्द जह्यते, न सखिशब्दश्चेति। अतोऽवगम्यते अन्ये जह्यते इति। यथा न भवन्तः समाजं गच्छन्ति, न भवन्तः प्रेक्षका भवन्तीत्युक्ते नूनमन्ये गच्छन्तीति गम्यते। एवमिहापि न भ्राता जह्यते, न सखा इत्युक्ते नूनमन्ये जह्यते इति लिङ्गदर्शनम्। स्थितमावत् अपर्य्यवस्थितमेव, अन्तराचिन्तान्तरं वर्त्तिष्यते। (८।३।१ अ०)।

पौष्करीयेषु हविःषु स्तरणमन्त्रौदाहरिष्यन्।

जातिर्नैमित्तिकं यथास्थानम् ॥ २ ॥ सि०)

इदमामनन्ति, मौञ्जं चषं निर्वपेत् श्रियै श्रीकामः इति। तत्रेदं विधीयते, पौष्करीकाण्यि बर्हींषि भवन्ति इति। अस्ति प्रकृतौ मन्त्रः, स्तृणीत बर्हिः परिधत्त वेदिं जयामि मा हिंसीरसुपाग्रयाना दर्भैः स्तृणीत हरितैः सुपर्णैः निष्का ह्येते यजमानस्य ब्रह्मः इति, इह चोदकेन प्राप्तः। अत्र दर्भैरिति जातिशब्दः हरितैरिति नैमित्तिको गुणशब्दः। तत्र संशयः किं जातिशब्दः लक्षितव्यः, नैमित्तिकोऽविकारेण प्रयोक्तव्यः, उतोभावपि यथास्थानं लक्षितव्यौ, जातिशब्दः स्तरणे, नैमित्तिकः स्तरणसाधने द्रव्ये ? इति। तत एवं तावत्परीक्ष्यं, किमयं हरितशब्दो हरितगुणविवक्षया प्रयुज्यते, उत स्तरणद्रव्यगुणाभिधित्सया ? इति। कश्चात्र विशेषः ? यदि दर्भाणां हरितगुणसम्बन्धो वक्तव्यः, अन्यसमावदृष्टोऽर्थः, तदा पुष्करीकाणामपि अदृष्टादेव हरितसम्बन्धो वचनीयो भवति इत्यविकारेण प्रयोक्तव्यः। अथ स्तरणद्रव्यगुणविवक्षया प्रयुज्यते, तत्र पुष्करीकाणामपि स्तरणो वक्तव्यो भविष्यति। तदेतत् हयमपि हरितशब्दादवगम्यते। किन्तु विवक्षितम् ? इति संशयः।

किं तावत् प्राप्तम् ? अविकारेण प्रयोक्तव्य इति। तत एतत्तावच्चिन्त्यते, हरितगुणविवक्षया प्रयुज्यते इति।

[illegible] हरितशब्दस्य यत्रे प्रयोगः तत्र सो सो दर्भ-

गुणः सोऽवश्यवचनीयो भवति, यस्य यस्य तु वाचको मन्त्रे शब्दोऽस्ति, स गुणो वक्तव्य इति गम्यते। हरितगुणस्य वाचको मन्त्रोऽस्ति। तस्मात् हरितगुणो वक्तव्य इति।

ननु स एव स्तरणद्रव्यगुणस्य वाचकः। न इत्याह, नाम्नो स्तरणद्रव्यगुण इत्यनेन कारणेन हरितशब्देनोच्यते कथं तर्हि? हरितत्वयोगात् हरितशब्देन उच्यते, स एव हारित्यं श्रुत्वा अभिदधाति लक्षणया स्तरणद्रव्यगुणम्। श्रुतिश्च लक्षणाया ज्यायसी। तस्माद्धरितगुणविवक्षया प्रयुज्यते, विकृतौ न जहितव्यः इति।

एवं प्राप्ते ब्रूमः, जातिशब्दो नैमित्तिकश्च उभावप्यूहितव्यौ, तत एतदर्थते, स्तरणद्रव्यस्य गुणविवक्षया प्रयुज्यते इति। यद्यपि हारित्यं श्रुत्वा हरितशब्दोऽभिवदति, तथापि हरितगुणवचनमनर्थकम्, अदृष्टं हि तत्र कल्पनीयं स्यात्, तच्चायकं दृष्टे सम्भवति। स्तरणद्रव्यगुणन्तु लक्षणयाऽभिवदति, तद्वचनेऽदृष्टं प्रयोजनं स्तरणद्रव्यप्रत्यायनं, एवञ्चेदिहापि स्तरणद्रव्यस्य पुष्करीकस्य गुणः प्रत्याययितव्यः। तस्मात्तद्वाचक जहितव्यो वक्तव्यश्च इति। तत एव अन्तरागर्भिणीन्यायो भवतीत्यन्यथा सूत्रं वर्ण्यते,

लिङ्गदर्शनाच्च ॥ २ ॥ (यु०)

जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥ (सि०)

इति। इतश्च पश्यामो विकृतावूहः कर्त्तव्य इति। कुतः?। लिङ्गं दृश्यते। किं लिङ्गं भवति?। एवमाह.

विशेषां देवानामुक्षाणां छागानां वपानां मेदसोऽनुब्रूहि इति, जातिशब्दानामूहितानां समुच्चारणं भवति, तन्मन्त्राणामर्थवचनपक्षे एव कल्पते, जहे क्रियमाणे अनर्थपरत्वे अग्निच्छागशब्दावेव प्रयुज्येयातां, तेषामीषामक्रियार्थानां वचनमनर्थकमेव स्यात्, न चाचैते शब्दा विधीयन्ते, विधायकस्याभावात्। ननु प्रयोगवचनेन विधायिष्यन्ते। एवं तर्हि अदृष्टार्थतादोषः। तस्मादस्ति जहे इति।

अविकारमेके नार्षत्वात् ॥ ४ ॥ (पू०)

एके पुनराचार्या अविकारम् अनुमन्यन्ते, अग्निवर्षे लिङ्गं वक्ष्यति, तस्येयं प्राप्तिः क्रियते। यदि हि जह्येत, आर्षः चोदको बाध्येत, तस्मादनूह इति।

लिङ्गदर्शनाच्च ॥ ५ ॥ (यु०)

लिङ्गमग्निवर्षे दृश्यते, आग्नेये वैकृते पशौ आम्नायते, अग्नये छागस्य वपाया मेदसोऽनुब्रूहि इति। जहपक्षे न विधातव्यं स्यात्, विधीयते तु, तस्मादनूह इति। अपिचेदमपरं लिङ्गं अग्नीषोमीये पशौ श्रूयते, यर्ष्टिकं यूपमुपस्थृणेत् एष ते वायो इति ब्रूयात्। यदि ह्येतौ ते वायू इति, यदि बह्वन् एते ते वायवः इति। यद्यूहो भवेत् एतदपि प्राप्तत्वाच्च विधातव्यं स्यात्, विधीयते तु। तस्मादप्यनूह इति।

विकारो वा तदाकृतिः ॥ ६ ॥ (उ०)

वाग्शब्देन पशो व्यावर्त्तते, यदुक्तमविकार इति, तत्र, ऊहः स्यात् । अस्मिन्नर्थे पूर्वोक्तो हेतुः, अर्थे चाकार्थित्वात् इति, मन्त्रार्थं ह्यनुरुध्यते चोदकः, न मन्त्राक्षराणि, अर्थपराणि हि तानि, न स्वरूपप्रधानानि । तस्मादूहः स्यात्पूर्वेणैव हेतुना । केवलं लिङ्गपरिहारो वक्तव्यः ।

लिङ्गं मन्त्रचिकीर्षार्थम् ॥ ७ ॥ (१म आ० नि०)

यत् लिङ्गम् उक्तम्, अग्नये छागस्य वपाया मेदसोऽनुब्रूहि इति, तन्मन्त्रचिकीर्षया विधीयते, इतरथा जल्पितत्वादमन्त्रः स्यात्, तस्मात्पुनर्वचनम् ।

नियमो वोभयभागित्वात् ॥८॥ (२य आ० नि०)

यल्लिङ्गमुक्तम् एष ते वायो इति, तत्परिक्रियते, यदि हि एतत् न उच्येत, यदि ह्यवपद्येत, यदि बह्वृच, सर्वे इमे मन्त्रा एकयूपे भवेयुः, उभयमपि मा प्रकृतौ भूदिति नियमः क्रियते, यदि ह्यवपद्येत, एतौ ते वायू इति ब्रूयात्, यदि बह्वृच, एते ते वायव इति ब्रूयात्, तस्मादेतदप्यलिङ्गमिति । (८ । ३ । २ अ०) ।

अग्नीषोमीयपशौ लौकिकयूपस्यप्रायश्चित्ताधिकरणम् ।

लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ ९ ॥

अस्ति ज्योतिष्टोमः, तत्राग्नीषोमीये पशौ आलभ्यते,

यदि एकं यूपमुपस्पृशेदेव ते वायो इति ब्रूयाद्यदि द्वावेतौ ते वायू इति यदि बहून् एते ते वायवः इति। तत्रैषोऽर्थः सांप्रयिकः, लौकिके वैदिके च यूपोपस्पर्शने प्रायश्चित्तम्, उत वैदिके एव वा लौकिके ? इति। किं प्राप्तम् ? लौकिके वैदिके वाऽनियमः इति। कथम् ?। विशेषानाश्रयत्वात्, नहि विशेषमाश्रीयते लौकिके वैदिके वेति, तस्मादनियम इति। वैदिके वा, तथाहि अस्य मन्त्रस्य ममीपगतेन प्रयोजनेनाभिसम्बन्धो भविष्यति, इतरथा दूरगतेनाप्रकृतेन परोक्षः सम्बन्धः स्यात्, तस्मात् वैदिके यूपोपस्पर्शने इदं प्रायश्चित्तम् इति।

एवं प्राप्ते ब्रूमः, लौकिके उपस्पर्शने भवितुमर्हति न वैदिके। कुतः ?। एवं दोषसंयुक्तं हि श्रूयते इदं प्रायश्चित्तं, यूपो वै यज्ञस्य दुरिष्टमामुष्णुते, यद्यूपमुपस्पृशेद्यज्ञस्य दुरिष्टमामुष्णुते तस्माद्यूपो नोपस्पृश्यः इत्यभिधाय यद्येकं यूपमुपस्पृशेत् इति समाम्नायते। तस्माद्यच्च दोषस्तच्च प्रायश्चित्तमिति। लौकिके च दोषो न वैदिके, वैदिकं हि अञ्जनम् उपक्षयणं च कर्त्तव्यमुक्तं, न तत् कर्त्तव्यं सत् अकर्त्तव्यं भविष्यति, सावकाशश्चोपस्पर्शनप्रतिषेधवचनं लौकिके अविरुद्धं भविष्यति।

अपि च अपहृते कर्मणि चोद्यते निमित्तेन। कथम् ?। यूपो वै यज्ञस्य दुरिष्टमामुष्णुते इति, यस्मिन् यज्ञे दुरिष्टं तद्यूप आमुष्णुते, यत् सुकृतं तद्यजमान इति, सर्वमिदं प्रशंसार्थं न विधिपदान्तरेण सम्बध्यते। इष्टशब्द एवैको विधिपदैः सम्बन्धमुपैति, प्रशंसापदैरपि सम्बध्यमान इह

सविशिष्टो भवति । सविशिष्टत्वाच्च पदान्तरैः सम्बध्यते, यथा दक्षो मनोहरो रमणीयश्च प्रहर शीघ्रमिति रमणीय-मनोहर-सम्बन्धेऽपि सति सविशिष्टत्वात् प्रहर शीघ्रमित्येतैः पदैः सम्बध्यते, एवमिष्टशब्दोऽपि सविशिष्टत्वात् सम्बध्यते, इष्टे वहि यूपमुपस्तृणेदेव ते वायो इत्येवमादि न्यायादिति, सोऽयमिष्ट इत्यपवर्गस्य वक्ता शब्दः । अपवृक्ते चेदुपस्पर्शनं मन्त्रश्च निमित्तं, व्यक्तं न वैदिकम् । तस्मात् लौकिके यूपोपस्पर्शने प्रायश्चित्तं, न प्रकृतौ वैदिके अभागित्वात् प्रतिषेधस्यापवर्गस्य च वैदिके न सम्भवति इति । (९ । ३ । ३ अ०) ।

द्विपशुयागे पाशसन्दर्शेरेकवचनान्तशब्दवचनात्पदशेषेद्विवचनान्तेन ऊहाधिकरणम् ।

अन्यायस्त्वविकारित्वादृष्टप्रतिघातित्वाद्विशेषाच्च तेनास्य ॥ १० ॥ (प्र० पू०)

अस्ति पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति, तत्र पाशैकत्वाभिधायी मन्त्रः, अदितिः पाशं प्रमुमोक्तेतम् इति । तथा पाशबहुत्वाभिधायी अदितिः पाशान् प्रमुमोक्तेतान् इति । प्रकृतौ तयोः समुच्चयं वक्ष्यति । अस्ति द्विपशुर्विकृतिः, मैत्रं क्षेत्रमालभेत वारुणं क्षत्रमपां ओषधीनां च सन्नावयत्काम इति । तत्र चोदकेन पाशाभिधायिनौ मन्त्रौ प्राप्तौ । तयोः

संशयः, किं बहुवचनान्तोऽविकारेण प्रवर्त्तते एकवचनान्तस्य निवृत्तिः, उत बहुवचनान्तो निवर्त्तते एकवचनान्त आश्रितव्यः, उत उभयोरपि प्रवृत्तिरभिधानविप्रतिपत्तिश्च, उतैकवचनान्त आश्रितव्यो बहुवचनान्तोऽपि निवर्त्तेत ?।

किं प्राप्तम् ? अन्यायस्थविकारेण अन्यायनिगदो बहुवचनान्तोऽविकारेण प्रवर्त्तते, एकवचनान्तो निवर्त्तितुमर्हति। कुतः ?। नास्त्येकस्मिन् पाशे प्रवर्त्तमानस्य दृष्टः प्रतिघातः, यथैवैकस्मिन् पाशे प्रवर्त्तते, तथा द्वयोरपि प्रवर्त्तितुमर्हति, नासौ एकस्य वाचकः, न द्वयोः। एवमार्षः चोदको ऽनुग्रहीतो भविष्यति। इतरथा हि क्रियमाणे यथाप्रकृति मन्त्रो न कृतः स्यात्। न द्वयोः पाशयोः एकस्मिंश्च पाशे कश्चित् विशेषोऽस्ति। तस्मात् अविकारेण बहुवचनान्तः प्रयुज्यते, एकवचनान्तस्य निवृत्तिरिति।

विकारो वा तदर्थत्वात् ॥ ११ ॥ (द्वि० पू०)

वाशब्दः पक्षं व्यावर्त्तयति, विकारो वा स्यात् एकवचनान्त आश्रित्य प्रवर्त्तते, बहुवचनान्तनिवृत्तिरिति। कुतः ?। तदर्थत्वात्, यौ पाशौ विकृतौ वक्तव्यौ, तौ च प्रयोगवचनानुग्रहात् यौगपद्येन, न पर्य्यायेण, तत्र न लभ्यते विशेषः, पाशशब्दे उच्चरिते कस्य पाशस्याभिधानं, कस्य न ? इति, अविशेषात् द्वयोरपि पाशयोः, तत्र तयोः कर्त्तृत्वाभिसम्बन्धं द्वितीयाद्विवचनमेव शक्नोति वदितुं, नान्यत्। तस्मात् द्विवचनमूह्येत, बहुवचनमेकवचनं च निवर्त्तितुमर्हत इति।

अपि त्वन्यायसम्बन्धात् प्रकृतिवत् परेष्वपि यथार्थं स्यात् ॥ १२ ॥ (ट० पू०)

अपि इति पक्षो व्यावर्त्तते, न बहुवचनं निवर्त्तेत, यथा प्रकृतौ बहुवचनान्तमेकवचनान्तं च प्रवृत्तं, अन्यायसम्बन्धात् बहुवचनान्तम्, एवं विकृतावपि एकवचनान्तं, द्विवचनान्तम् ज्ञेयम् । अन्यायसम्बन्धाच्च बहुवचनान्तं प्रवर्त्तेत, यदि प्रकृतौ प्रातिपदिकार्थमात्रं पक्षे प्रकाशितं, विकृतावपि तत् पक्षे प्रकाशयितव्यम्, अत्र बहुवचनान्तेनैकत्वमुक्तम्, इहापि बहुवचनान्तेन द्वित्वं वक्तव्यम् । तस्मादभिधानविप्रतिपत्तिः कर्त्तव्या इति ।

यथार्थत्वन्यायस्यापोदितत्वात् ॥ १३ ॥ (सि०)

तुशब्दः तमपि पक्षं व्यावर्त्तयति, नाभिधानविप्रतिपत्तिः कर्त्तव्येति, किन्तर्हि ? यथार्थं द्विवचनमूहितव्यं, बहुवचनमेकवचनं च निवर्त्तेयातां,तद्धि द्विपाद्याभिधायिनः पाद्यशब्दात्परं बहुवचनं एकवचनं वा न शक्नोति कर्मसम्बन्धं वदितुं, लोको हि शब्दार्थावगमे प्रमाणं,नच लोके द्वयोरर्थयोः बहुवचनान्त एकवचनान्तो वा प्रवर्त्तमानो दृश्यते, तस्माद्द्वेन द्वयोः पाद्ययोर्बहुवचनान्त एकवचनान्तो वा प्रयोक्तव्यः ।

कथं प्रकृतौ एकस्मिन् पाद्ये बहुवचनान्त इति चेत्,

छन्दसि तु यथादृष्टम् ॥ १४ ॥ (आ० नि०)

यावदर्थेन प्रामाण्यमभ्युपगन्तव्यं, छन्दसि न दर्शनमतिक्रमितव्यम्, यो हि दर्शनमतिक्रामत्यन्धदपि कल्पयेत्, न तेन छान्दसं कृतं स्यात्, न लौकिकं नापि लक्षणसिद्धम्। यदुक्तं, चोदकेनाभिधानविप्रतिपत्तिश्चोद्यते इति। नैतदेवम्, अन्यायस्य अचोदितत्वात्, न हि चोदकोऽन्यायमभिधानविप्रतिपत्तिमभिप्रापयति। किंकारणम्?। प्रकृतावेकत्वात्, पाशस्य प्रकृतत्वाच्च बहुवचनान्तस्य प्रत्यक्षाभिधानविप्रतिपत्तिः। केयमभिधानविप्रतिपत्तिर्नाम?। यदन्यथाऽभिधानं, अन्यथा अभिधेयम्। नच प्रकृतौ एकस्मिन् बहुवचनान्तं प्रयुक्तमभिधानविप्रतिपत्तिं कर्तुं, किन्तर्हि?, यद् तेन शक्यते, तत् कर्तुम्। किञ्चानेन शक्यते?। अस्य सिद्धे प्रयोगेऽर्थमन्विच्छन्तो, बहुवगम्यते तदर्थः शब्द इत्यवधारयामः। अस्याश्च पाशद्रव्यस्य मोचनेन सम्बन्धोऽवगम्यते, तदर्थता शब्दस्य भवितुमर्हति, न एकत्वेन बहुत्वेन वा प्रयोजनम्। इह तु विकृतौ पाशस्य च पाशस्य च योगपद्येन मोचनेन सम्बन्धो वक्तव्यः, बहुवचनञ्च हयोः पाशयोरन्याय्यं तस्याभिधाने इह पुनर्न प्रयोगः, किन्तु प्रयोग एव चिन्त्यते, कः शब्दः प्रयोक्तव्यः?। इति। तत्र प्रयोगेऽस्मदायत्ते किमित्यवाचकं प्रयोक्ष्यामहे विद्यमाने वाचके। न चायं हयोः छन्दसि दृष्टो बहुवचनान्तः, सोऽयं मन्त्रः प्रयुज्यमानोऽपभ्रंश एव स्याच्छान्दसः। न च बहुवचनं द्वित्वप्रत्ययार्थं लभ्यते लौकिके वैदिके च। न चाभिधित्सिते द्वित्वे हयोर्बहुवचनं भवति। तद्यथा देवदत्तयज्ञदत्ताभ्यां कर्त्तव्यमिति देवदत्तयज्ञशब्द-

— ... ...

एतस्यां विप्रतिपत्तौ किं मन्त्र उत्क्रष्टव्यते, न ? इति। उच्यते, न उत्क्रष्टव्यः। ननु प्रकृतो अन्यो मन्त्रः ?। उच्यते, तेन सह विकल्पो भविष्यति। कुतः ?। पाद्य-प्रातिपदिकार्थस्य प्रकृतो विद्यमानत्वात्. उत्क्रष्टुं न न्याय्यः। ननु बहुपाद्यवचन एष मन्त्रः, प्रकृतौ त्वेकः पाद्यः, तस्मात् तत्र न सम्भवति इति। उच्यते, बहूनप्यसौ पाद्यान् वदन् बहुत्वाधिष्ठानं द्रव्यं प्रकाश्ययत्येव, यदि न प्रकाश्ययेत् न पाद्यविशिष्टं बहुत्वं गमयेत। प्रकाश्ययति चेत् तावता नः प्रयोजनम्, तस्य हि उच्चोचनं क्रियते, न बहुत्वस्य, पाद्याकृतेर्वा। तस्मात् तस्य प्रकाशनं कर्त्तव्यं, तत् प्रातिपदिकेन करिष्यते, नोत्क्रष्टव्यते। अस्त्येव श्लोक-वचनान्तं प्रातिपदिकं, तत्तस्य प्रकाशनं करिष्यति इति। अत्रोच्यते, न हि इदं तस्मादन्यत्। यद्येकवचनान्तं प्राति-पदिकं न उत्क्रष्टव्यते प्रकरणादित्युच्यते, सिद्धस्त्वर्थः तुल्कर्षस्त-देवेदमिति।

ननु बहुवचनस्य बहुपाद्यकप्रयोगेऽर्थवत्ता। तस्मादुत्-क्रष्टव्यम्। तदुत्क्रष्टव्यमाद्यम् एकदेशत्वात् प्रातिपदिकमुत्-कर्षति इति। उच्यते, गुणे स्वन्यायकल्पना स्यादिति न प्रधाने,गुणश्च विभक्त्यर्थः, प्रधानं प्रातिपदिकार्थः, प्राति-पदिकार्थविशेषो विभक्त्याऽभिधीयते, सति प्रातिपदिकार्थे विभक्त्यर्थेन भवितव्यम्। नच विद्यते प्रातिपदिकमस्ति, अनारभ्याप्यभिहितं प्रकृतिं प्रविशति, किमङ्ग पुनः प्रकृता-वेवाभिहितम्। तस्माच्च प्रातिपदिकार्थस्य च विभक्त्यर्थो भविष्यति।

ननु विकृतावपि चोदकेन प्राप्तं प्रातिपदिकं, प्रातिपदिकार्थश्च उच्यते। बाढं, विप्रकृष्टस्तु चोदकः, बहुवचनसमर्थकं प्रातिपदिकं चोदको नोत्क्रक्ष्यति। तस्मात् प्रातिपदिकमेकदेशत्वात् बहुवचनमाक्रक्ष्यतीति। न च प्रकृतौ अनर्थकमेव बहुवचनं, पाशाक्रतिकस्य हि तदुच्चोदने कर्मसम्बन्धं करोति। तस्मात् गुणे बहुवचने अन्यायकल्पना न प्रधाने प्रातिपदिकार्थे इति। किं पुनरन्याय्यम्?। यद् बहुत्वं गम्यमानमविवक्षितमित्युच्यते, तत् कल्प्यतां, न तु प्रकृतौ प्रातिपदिकस्य प्रातिपदिकार्थाभिधानमन्याय्यं कल्पयितव्यम्। अस्य हि गुणस्यावाच्यमेव वैकृतं बहुत्वं सन्निधानाभावात्। तस्मात् प्रकृतौ बहुवचनान्तस्यापि निवेश इति।

प्रकरणविशेषाच्च ॥ १६ ॥ (यु०)

प्रकरणविशेषाच्च एतदध्यवसीयते, प्रातिपदिकं बहुवचनमाकर्षति, न प्रातिपदिकं बहुवचनेनोत्क्रक्ष्यते इति, प्रकृतौ प्रातिपदिकार्थो विद्यते अग्नीषोमीये पशौ, बहुवचनार्थो विकृतिषु। तस्मादपि बहुवचनान्तस्य प्रकृतौ निवेश इति।

उत्कर्षो वा द्विपशुवत् इति यदुक्तं, तत्परिहर्त्तव्यम्,

अर्थाभावात्तु नैवं स्यात् गुणमात्रमितरत् ॥ १७ ॥ (आ० नि०)

युक्तं यत् प्रतिपदिधानमुत्कृष्यते, नास्ति प्रकृतौ यज-

आनर्थक्यं यजमानबहुत्वं वा, तत्र न अवैदिकयोः एतयोः प्रतिपदोः। इह तु सुत्यायां नास्ति बहुत्वं, अस्यन्तु बहुवचनस्य प्रयोजनं 'सुत्यिना सत्रिणः, यत्रानेकप्रयोजनमस्यतमेन प्रयोजनेन न प्रयुज्यते। न हि उक्ता प्रकाशनेनाप्रयुज्यमानो मन्त्रो न प्रयुज्यते। तस्मात् विषमं प्रतिपदभ्यामिहेति।

द्यावापृथिवीयादीनामेवं सति ॥ १८ ॥ (आ०)

अथ यदुक्तं, द्यावापृथिवीयादीनामनुमन्त्रणानां यथा उत्कर्षस्तथाऽऽख्येति, तत्परिहर्त्तव्यम्,

नोत्पत्तिशब्दत्वात् ॥ १९ ॥ (आ० नि०)

नैतदनुमन्त्रणेन तुल्यं, न हि दर्शपूर्णमासयोर्द्यावापृथिव्यादीनामुत्पत्तौ शब्दोऽस्ति, अस्ति त्विह पात्रस्योत्पत्तौ शब्दः। तस्मात् विषममनुमन्त्रणेनेति। (८।२।५ अ०)।

दर्शपूर्णमासयोर्हि पत्नीके प्रयोगे पत्नीं सन्नह्यतीति मन्त्रसामूहाधिकरणम्।

अपूर्वे त्वविकारो प्रदेशात् प्रतीयेत ॥ २० ॥

दर्शपूर्णमासयोरामनन्ति, प्राचीरादाहवनीयं वर्हिः उपसादय सुव: सदसि पत्नीं सन्नह्य आग्नेयोऽष्टाकपालोऽष्टाकपाल इति। तत्र, पत्नीं सन्नह्येति विधत्ते, अस्ति हि यजमान एकपत्नीको बहुपत्नीकश्च, तत्र सर्वत्र प्रयोगसमवेतत्व पत्नीशब्दं उच्चरतीति एतत्न्यायाधिकरणेनैव निर्णीतम्, इदन्तु

सन्दिह्यते, किं द्विपत्नीके बहुपत्नीके च प्रयोगे ऽहितव्यः पत्नीशब्दः, उत न ? इति। किं प्राप्तम् ? अभिधानार्थत्वान्नाचार्यानूहितव्यः इति।

एवं प्राप्ते ब्रूमः, अपूर्वे तु अप्रकृतिपूर्वके कर्मणि अविकारेण प्रयुज्यते। कुतः ? ईकारान्तं स्त्रीलिंगं पत्नीशब्दस्य वाचकं, तच्च द्विपत्नीके बहुपत्नीके च प्रयोगे पत्नीशब्दे उपादीयमाने द्विवचनं बहुवचनं च सामर्थ्यात् प्राप्नोति सङ्ख्यानसम्बन्धं कर्तुं, समाम्नानसामर्थ्यात्तु एकवचनेन क्रियते। नचाप्य द्वित्वं बहुत्वं वा विवक्षति, लक्षणत्वेन हि पत्नीशब्दस्य स्मरणात्, नचैकपत्नीकात् प्रयोगाद्विपत्नीके प्रयोगेऽतिदेशो भवति, यथा तत्र सङ्ख्या उक्ता तद्वदिहापि इति। तस्मादविकारेण पत्नीशब्दस्य प्रयोगः। अथापि कथञ्चिदेकत्वं विवक्ष्येत, तथापि द्विपत्नीके प्रयोगे सम्प्रतिपत्त्यभावादेकवचनार्थमेकवचनं, तदनेकपत्नीके प्रयोगेऽविरुद्धमित्यविकारेण प्रयुज्यते इति। (८।३।६ अ०)।

द्विपत्नीके विकृतियागेऽपि पत्नी समर्थयति नाचार्यानूहाधिकरणम्।

विकृतौ चापि तद्वचनात् ॥ २१ ॥

यद्येदानीं विकृतौ पत्नीशब्दश्चिन्त्यते, किं द्विपत्नीके बहुपत्नीके च प्रयोगे ऽहितव्यः, न ? इति। द्विवाची बहुवाची वा पत्नीशब्दो द्विवचनं बहुवचनमपादत्ते; प्रकृतौ

समाख्यानेन बाधितः इह समाम्नानाभावात् उपादातुमर्हति इति।

एवं प्राप्ते ब्रूमः, विकृतौ अपि अविकारेण प्रयोक्तव्य इति। कुतः?। तद्वचनात्, यत् प्रकृतौ तत् विकृतौ कर्त्तव्यमिति तद्वचनं, प्रकृतौ चैकत्वमविवक्षितमिहापि इत्वं बहुत्वमेकत्वञ्च न विवक्षितव्यमिति, तस्मादविकारः। अथ वा तदेव विवक्षितं, तदनेकपत्नीकेऽपि अविरुद्धमित्यविकार एवावसीयते। (९।३।७ अ०)

सवनीयपशूनामग्नीषोमीयसमानविधानत्वे प्राप्ते अग्निम् इति मन्त्रस्तूहाधिकरणम्।

अग्निगुः सवनीयेषु तद्वत्समानविधानात्स्यात् ॥२२॥

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्राग्निगो इदं समाम्नायते, प्राक्षा अग्नि भरतस्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता इत्येवमादि। यदा तु अग्नीषोमीयाः सवनीयाश्चसमानविधानाः, तदेदं विचार्य्यते, किम् अग्निगो प्राक्षे इत्येवमादि पदमूहितव्यम् उत न? इति। किं प्राप्तम्?। ततः अतिदेशः क्रियते, अग्निगो तद्वत् इति, तत्र यः पक्षाधिकरणे पूर्वपक्षः स इह पूर्वपक्षः, यः सिद्धान्तः स इह सिद्धान्तः। ऊह इति पूर्वपक्षः, अविकार इति सिद्धान्तः। (९।३।८ अ०)

नीवाराणां व्रीहिप्रतिनिधित्वे मन्त्रे व्रीहिशब्दानूहाधिकरणम् ।

प्रतिनिधौ चाविकारात् ॥ २३ ॥ (सि०)

अस्ति प्रतिनिधिः श्रुते दृश्येऽपचरति, आगमो वा चोदनार्थाविशेषात् इति । स च सदृशः सामान्यं तच्चिकीर्षा इति । तद् यदा व्रीहिषु अपचरत्सु नीवारा उपादीयन्ते प्रतिनिधित्वेन, तदा व्रीहिमन्त्रो यः समाम्नातः, स्योनं ते सदनं कृणोमि । घृतस्य धारया सुश्रेवं कल्पयामि तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः इति । तं प्रति सन्देहः, किं नीवारेषु व्रीहिशब्दस्य ऊहेन प्रयोगः, उताविकारेण ? इति । किं प्राप्तम् ? अविकारेण व्रीहिशब्दः प्रयुज्यमानः कार्यवतो नीवारान् न शक्नोति प्रकाशयितुमिति तेषु प्रकाशयितव्येषु नीवारशब्दः प्रयोक्तव्यो भवति । तस्मात् ऊहः कर्त्तव्य इति ।

एवं प्राप्ते ब्रूमः, प्रतिनिधौ च अविकारात् प्रतिनिधौ चेति ऊहो न कर्त्तव्य इत्यनुक्तथते । किमेवं भविष्यति ? । एवमविकारो भविष्यति, तत्रार्थमनुग्रहीष्यते, तस्मादनूहः ।

अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् ॥२४॥ (आ०)

न चैतदस्ति अनूह इति, एवमनूहो भवेत्, यदि तस्मिन् मन्त्रे व्रीहिशब्दो नाम्नातः स्यात्, अभावाच्चेतरस्य

प्राणस्य सिद्धमनूद्य हेतुत्वेनोपदिश्यति, तस्मात् संसर्गिनोऽन्ते इति। (८।३।१०)।

द्विपशुयागे दध्निग्रहणे एकधेत्यस्य शब्दस्याभ्यासाधिकरणम्।

एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात्॥ २९॥ (सि०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयो यो दीक्षितं यदग्नीषोमीयं पशुमालभते इति तत्राध्वर्युप्रैषे समाम्नायते एकधाऽस्य त्वचमाच्छ्यतात् इति तद्विकृतो द्विपश्वादिः सन्दिह्यते, किमभ्यसितव्यः, उताविकारेण प्रयोक्तव्यः इति। किं प्राप्तम्? एकधेत्ययमभ्यसितव्यः। कुतः? एकसंयोगात् एकस्त्वचः प्रकारः आच्छता कर्त्तव्या इति, तत्र हयोर्बहुषु वा तच्छ्यु उत्कृत्यमानासु नैकः प्रकारो भवति, पर्य्यायेण हि तां पशुभ्योऽपाच्छन्ति एकस्यां त्वचि अपाच्छ्यमानायामेकेन प्रकारेणापाच्छेयुस्तस्मादसर्वविषयो भवति अविकृतः शब्दः प्रयुज्यमानस्तस्माद्भ्यसितव्यः इति।

अविकारो वा बहूनामेककर्मवत्॥ ३०॥ (पू०)

वाशब्दात्पक्षो विपरिवर्त्तते, नैतदस्ति, अभ्यसितव्य इति, अविकारेण प्रयोक्तव्य इति। कुतः?। ऐकध्यवचन एष शब्दः, एकीकृत एषां त्वचः इति।

किं तत्र ऐक्यं एककालोपदेशो वा एकदेशोपदेशो वा ?। बहूनामेककर्मवत्. यथा बहूनामेककाले कर्माणि भवन्ति, एकया गाः पाययति इति, एवमिहापि ऐकध्यं त्वचः कुरु इति, बहूनां तु एकीकरणं शक्यते कर्त्तुं, नैकस्यास्त्वचः। तस्माद्बहीषु त्वसु एकीकरणमेकधाशब्दो वदतीत्यवसेयम्।

सकृत्तु त्वैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात् परेष्वभ्यासेन विहृद्भावभिधानं स्यात्॥ ३१॥ (उ०)

तुशब्दः पक्षं व्यावर्त्तयति, नाविकारः, अभ्यसितव्यः शब्द इति, एककाले कर्मण्यभिधीयमाने सकृत्वं त्वचामभिहितं भवति, तत्प्रकृतावेकस्यास्त्वचि असम्भवात् अनभिप्रेतं तत्प्रकृतित्वात् उत्तरासान्नतीनां परेषु वर्द्धमानेषु पशुषु अभ्यासेन अभिधानं स्यात्। (८।२।११अ०)।

द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणेहाधिकरणम्।

मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात्तस्य चान्यायनिगदत्वात् सर्वत्रैवाविकारः स्यात्॥ ३२॥ (१म पू०)

अस्ति ज्योतिष्टोमेऽग्नीषोमीये पशावभिप्रगर्थे मेधपतिशब्द एकवचनिगदः, परेषां शाखिनां द्विवचनिगदः। तं प्रति संशयो भवति, द्विपश्वादिषु पशुगणेषु किमविकारेण

इतरस्येतरस्य प्रयोक्तव्यः, उत स्वामिपर ऊहः कर्त्तव्य उत देवतापरः ? इति। किम्प्राप्तम् ? अविकारकृतः ?। मेधपतित्वं स्वामिदेवतस्य, स्वामी मेधपतिर्भवता च, स्वामिना पशुर्देवताभ्यान्दत्तः सङ्कल्पितः, पतये स्वामिनेऽप्यसौ भवति, तस्य कार्य्यं करिष्यती देवताभ्यामपि ताभ्यामुत्सृज्यते इति। त्रयाणामपि तं मेधं प्रति आधिपत्येन समवायोऽस्ति, सर्वत्र च अपत्ये पतिशब्दः प्रयुक्तः, आ हिमवतः, आ च कुमारीस एष त्रयाणां एकवचनान्तो वाचको द्विवचनाः यथा प्रकृतावविवक्षितैकत्वोऽविवक्षितद्वित्वश्च सम्बन्धः निबन्धनः, एवं सर्वासु विकृतिषु। तस्मात्र विक्रियेत

अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात् ॥ ३३ ॥ (२य पू०)

अपि वा नैतदेवं, तयोरिह समवायः, एकवचिगदद्विवचिगदस्य च। तयोरेकवचिगदः स्वामिनि प्रयोक्तव्येषां समाम्नातः। येषां द्विवचिगदः समाम्नातस्ते देवते वक्ष्यति। तस्माद्विकृतौ बह्वीषु देवतासु द्विवगद ऊहेन प्रवर्त्तिष्यते, यजमानेष्वेकवचिगद ऊहिष्य एवं यथासंख्यं प्रयोगो भविष्यति।

स्वामिनो वैकशब्दादुत्कर्षो देवतायां स्यात् पत्न्यां द्वितीयशब्दः स्यात् ॥ ३४ ॥ (३य पू०

वाशब्दः पक्षं व्यावर्त्तयति, स्वामिदेवतयोरुभयोर्वा इति, नैतदेवं, एक एव मेधपतिशब्दः। यस्मात् द्विवच

स्मात् एकवचनं, स एव न स्वामिदेवतयोर्वाचको भविष्यति। नन्वेकोऽपि मेधपतिः अपरोऽपि प्रतीयते, कथमवाचक इत्युच्यते। यदा स्वामिनस्तदा मेधपतये यो मेधस्तं मेध्यादुर उपनयतेति सम्बन्धः, यदा देवतावचनस्तदा मेधपतये उपनयत मेध्यादुर इति सम्बन्धः, स एष सकृदुच्चरितभाभ्यां पदाभ्यां न सम्बन्धमुल्लङ्घते, वचनव्यक्तिभेदात् वाक्यभेदः प्रसज्यते। तस्मात् स्वामिनो वाचक इति अध्यवसीयते।

अथ किमर्थं न देवतावचनः कल्प्यते?। तथा हि कल्प्यमाने एकवचनादेव उत्कृष्येत एकदेवत्यः क्रतुः, तच्च प्रकरणं बाध्येत। यजमानवचने पुनः कल्प्यमाने न द्विवचनाद उत्कृष्येत, तत्रैव यजमानयोर्देम्पत्योर्वाचको भविष्यति, तस्मात् प्रकरणानुग्रहाय स्वामिवचनः कल्प्यते, स्वामिपरत्वेऽपो भविष्यतीति।

देवता तु तदाशीष्टात्मप्राप्तत्वात् स्वामिन्यनर्थिका स्यात् ॥ ३५ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, न स्वामिवचनो देवतापरो भविष्यति। कुतः?। तदाशीष्टात् आशासाना मेधपतये मेधमिति देवताभ्यां हविराशास्यते, मेधपतिभ्यां मेधमाशासाना उपनयत ताभ्याम् इति यजमानं प्रत्याशासानानुकीर्त्तनमनर्थकम्, अकर्त्तव्यञ्च, स प्राप्त एव स्वामिनं, मेधः किमर्थमाशास्यते। न च तेन नित्यमेव स्वामिसम्ब-

ङेन प्रयोजनम्। याग एव हि न संवर्त्तेत। तस्माद्देवत वचनो मेधपतिशब्द इति।

उत्सर्गाच्च भक्त्या तस्मिन् पतित्वं स्यात्।

३६ ॥ (यु०)

उत्सृष्टश्च यजमानेन नायं ममेति, केवलं परकीय रक्ष्यते, कालेन देवतया सम्भंत्स्यते इति। कः पुनरव देवतया सम्बन्धः?। यत्तामुद्दिश्य परिग्रहोऽस्य त्यज्यते, च यागात् प्राक्ततः, तस्मात् यागात्परार्थं द्रव्यं नात्मी परित्यज्य आस्ते, आत्मप्रधानं यत्तदात्मीयं, न यं प्रति आत्मा गुणभूतस्तादृग्येषु भक्त्या पतित्वं भवति तस्मात् देवतयैव तत्र मुख्यं मेधपतित्वं, भाक्तं स्वामिः इति।

उत्कृष्टेतैकसंयुक्तो द्विदेवते सम्भवात् ॥ ३७ ॥

(आ०)

इति यदुक्तं तत्परिहर्त्तव्यम्,

एकस्तु समवायात्तस्य तल्लक्षणत्वात् ॥ ३८ ॥

(आ० नि० १म)

अत्रोच्यते, यौ हि तौ द्यावाभीषोमौ तयोर्गणे मेधपति शब्दः, सचात्र देवतासमवेतस्तस्मिन् कर्म्मणि एकस्मै गणाय मेध उपनयत इत्युच्यते। तस्मादेकवचनान्तो गणवाची मेधपतिशब्दो नोत्कृष्यते इति।

संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ॥ ३६ ॥
(आ०नि० २य)

अयं चान्यः परिहारः, संसर्गी अयमर्थो देवता नाम, द्वौ अर्थौ संसृष्टौ कदाचिदेका देवता भवति। यदि इयाय परिकल्पितं किञ्चित् द्रव्यं, तच्च इयं देवता भवति, द्वावर्थौ संसृष्टौ एकतां यातः। तस्मादेकवचनान्तोऽपि प्रकरणमभिनिविशते पूर्वेण च सह विकल्पेत इति।

एकत्वेऽपि गुणानपायात् ॥ ४० ॥ (यु०)

अन्यादृक्षं वचनमिदं, मा तावत् भूदिदैकत्वमर्थः, तथापि प्रकरणमनुप्रविशेतैव एकवचनान्तः, प्रातिपदिकं हि तस्य विद्यमानार्थम्, एकवचनञ्चोपनयनसम्बन्धार्थम्, एकत्वं वाऽविवक्षितम्। तस्माच्च प्रकरणादुत्कृष्येत इति। अथोच्यते, एकत्वविशिष्टस्य विभक्तिः सम्बन्धं ब्रवीति इति। तथाप्यस्मात्पक्षात् उपपद्यतेतरां, सर्वोऽपि ह्येकत्वसम्बन्ध इति। अथ सम्बन्धं करोति एकत्वञ्च ब्रवीतीति। न तेन विशिनष्टि अविवक्षितत्वादविरुद्धं भविष्यति इति। अथोच्यते, अविवक्षितेऽपि वचने एकत्वसम्बन्धे एकवचनं भवति नान्यथेति। तथा मेधपतिगतमेकत्वमस्य भविष्यति, ततः सोऽनुवदिष्यते तस्माददोष इति। (८।३।१२ अ०)।

बहुदेवत्य पशावपि एकवचनालम्भेपतिग्रन्थस्य विकल्पाधिकरणम् ।

नियमो बहुदेवते विकारः स्यात् ॥ ४१ ॥ (पू०)

अस्ति बहुदेवत्यः पशुः, स एतान् पशूनादित्येभ्यः कामाय आलभते इति। तथा वैश्वदेवं धूम्रमालभेत इति। अस्ति तु प्रकृतौ अग्नीषोमीये द्विवचनिगदं एकवचनिगदश्च मेधपतिशब्दः चोदकप्राप्तः सन्दिह्यते, किं द्विवचनिगद उक्षितव्यः, एकवचनिगदो निवर्त्तेत, उत उभावपि परस्परेण विकल्प्यमानौ निविशयाताम् ? इति। किं तावत् प्राप्तम् ? द्विवचनिगदः समवेताभिधायित्वात् उक्षितव्यः, एकवचनिगदोऽयक्तुवचनभिधातुमित्येतावता दर्शनेन निवर्त्तते एष नियमः। आह, ननु प्रकृतौ द्वित्वस्याविवक्षितत्वादविकारेण प्रयोगः प्राप्नोतीति। उच्यते, अविशेषकमत्र द्वित्वं ननु तत्र सम्बेतत्व गम्यते, न च गम्यमानं निष्प्रयोजनम्, अन्यसंख्यापरिच्छेदेन पुनः संख्येयमुपस्थापयति, तदस्य दृष्टमेव प्रयोजनम्। तस्माद्बहुष्वप्यूहो भवतीति।

विकल्पो वा प्रकृतिवत् ॥ ४२ ॥ (सि०)

यदुक्तं द्विवचनान्त उक्षितव्य इति, तत् यद्भोम, यत्त्वेकवचनान्तो निवर्त्तेतेति तत्र, एकवचनान्तोऽपि प्रकृतिवदिह द्विवचनान्तेन विकल्पितुमर्हति। उक्तं हि गणाभिप्रायत्वत् प्रकृतौ, संसर्गित्वाद्वा देवतानामिति, तद्दिहापि गणाभिप्रायात् संसर्गित्वाद्वा देवतानां विकल्पेन निवेक्ष्यते इति। (८।३।१३ अ०)।

एकादशिन्याम् एकवचनान्तमेधपतिशब्दस्त्रीत्वाधिकरणम्।

अर्थान्तरे विकारः स्याद्देवतापृथक्त्वादेकाभिधम-वायात् स्यात् ॥ ४३ ॥

अस्येकादशिनी, प्रेषान्तेयेन वापयति मिथुनं सारस्वत्या करोति रेतः सौम्येन दधाति प्रजनयति पौष्णेन इत्येवमादि। अस्ति च प्रकृतौ अग्निगुप्रैषे एकवचिगदो द्विवचिगदश्च मेधपतिशब्दः, तस्येह चोदकप्राप्तिचिन्त्यते, द्विवचिगद उच्चारितव्य एव, अथैकवचिगदः किमविकारेण प्रवर्त्तेत, उत निवर्त्तेत ?। किं प्राप्तम् ? विकल्पो वा प्रकृतिवत् इति। एवं प्राप्ते ब्रूमः, विकारः एवैकादशिन्यां न विकल्पः, तत एकवचनान्तेन निवर्त्तितव्यम्। कुतः ?। देवतापृथक्त्वात्, पृथगत्र देवता, अन्यस्य पशोरन्या देवता, अन्यस्यान्येत्येवं, नात्र गुणो देवतात्वेन, तदभावात् संसर्गित्वमपि नास्ति। प्रकृतौ च एतदृदृश्यं कारणं, एकवचनान्तस्य निवेशे न तदभावादिहास्ति प्रवृत्तिः। यथोक्तम्, एकत्वेऽपि गुणानपायादिति, परपक्षमन्यारुह्य तदचनं न खपक्षः तस्माददोष इति। (८।३।१४ अ०)।

इति आचार्यशबरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य अध्यायस्य तृतीयः पादः।

षड्विंशतिरस्य वङ्क्रय इत्यादौ समस्योद्धाधिकरणम् ।

षड्विंशतिरभ्यासेन पशुगवे तत्प्रकृति त्वाङ्गस्य प्रविभक्तत्वाद्विकारे हि तासाम क्रात्स्न्येनाभिसम्बन्धो विकारान्न समासः स्याद्-संयोगाच्च सर्वाभिः ॥ १ ॥ (१म पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षित यदग्नीषोमीयं पशुमालभते इति । तत्राधिगुप्रैषे इत मामायते, षड्विंशतिरस्य वङ्क्रयः इति । तत्रोदके द्विपञ्चाशीन् पशुगवान् संप्राप्तम् । मैत्रं श्वेतमालभ वारुणं कृष्णमपाम्नोषधीनाञ्च सम्भावयकामः इत्येवम दिषु अयमर्थः सांशयिकः, किं षड्विंशतिशब्दोऽभ सितव्यः, किमविकारेषु प्रयोक्तव्यः, किं वचनमात्रमूति तव्यम्, अथ अस्य पदाभ्यासः, उत समस्य वचनम् इति । किं प्राप्तम् ? षड्विंशतिशब्दोऽभ्यसितव्यः, हि खादिषु पशुसंज्ञेषु प्रकृतावेकस्य पशोः षड्विंशतिर्वङ्क्र उक्ताः, इह स गुणः प्रविभक्तः, पशौ पशौ षड्विंशतिर्वङ्क्र तत्र यदि अविकारेषु प्रयुज्येत, न कृत्स्ना वङ्क्री

भिवदेत्। अथ समस्य वचनं क्रियते, तथा षड्विंशति-शब्दो निवर्त्तेत, तत्रार्थं बाधितं स्यात्। नच सर्वाभिर्वङ्क्रिभिः पशोः सम्बन्धोऽस्ति। पशुहृदयस्य ताभिः सम्बन्धः, नच पशुहृदयं पशुः।

ननु पशोः कार्यं यः पशोः स्थाने, स वङ्क्रिभिः सम्बन्धयितव्यः, तथा हि प्रकृतौ वचनं कृतं, समस्ताभिर्वङ्क्रिभिः पशुहृदयस्य सम्बन्धे कृते एकैकस्य षड्विंशत्या सम्बन्धः प्रत्यायितः स्यात्। अथोच्यते, नैवं, प्रकृतौ साक्षात् षड्विंशत्या पशुसम्बन्धः, इह परसंख्यया सम्बन्धे क्रियमाणे परोक्षयाऽवयवसंख्या सम्बन्धः आनुमानिकः स्यात्। न च नियोगतः षड्विंशत्या एकैकस्य सम्बन्धः प्रत्यायितः स्यात्, पञ्चविंशतिरेकस्य सप्तविंशतिरेकस्येत्यपि तत्र गम्येत, न चैवं प्रकृतावभिधानं कृतं, तस्मादभ्यसितव्य इति।

अभ्यासेऽपि तथेति चेत् ॥ २ ॥ (आ०)

इति चेत् भवान् पश्यति, समासवचने अप्राकृतः शब्द उच्चरितो भवति इति। अभ्यासेऽपि अनभ्यस्तं प्रकृतौ वचनम्, इह साभ्यासमप्राकृतं स्यात्।

न गुणादर्थकृतत्वाच्च ॥ ३ ॥ (आ० नि०)

नैष दोषः, गुण एष शब्दस्याभ्यासो नाम, स मत्यर्थेऽप्राकृतः, त्वत्पक्षे पुनः शब्द एव, अङ्गगुणाविरोधे च तादर्थ्यादित्युक्तम्। अथाच्च मयैतदद्भुतमुपादीयते, प्रवि-

भक्तां गुणं वक्तुं, यच्च श्रुतविकीर्षयाऽश्रुतं क्रियते, इ
एव तदस्माभिः तस्माददोषः ।

समासेऽपि तथेति चेत् ॥ ४ ॥ (आ०)

इति चेत् पश्यसि, अभ्यासवचने चोदकोऽनुगृह्यो
भविष्यति, कार्त्स्न्येन वङ्क्रयो वक्ष्यन्ते इति, समासे
चोदकानुग्रहः, कार्त्स्न्येन वङ्क्रीणामभिधानात् अपि
समासवचने यौगपद्यवचनात् प्रयोगवचनोऽनुगृहीतो भ
ष्यति । तस्मात् समभ्यसितव्या वङ्क्रय इति ।

नासम्भवात् ॥ ५ ॥ (आ० नि०)

नैतदेवं, मम चोदकोऽनुगृहीतः षड्विंशतिग्र
प्रयोगात्, तव प्रयोगवचनः समस्य वचनात्, न च सम
वति चोदके प्रयोगवचनं प्रत्यादर्तव्यं, बलीयान् ।
चोदकः स हि धर्म्याणामुत्पादकः प्रापकश्च । प्रयो
वचनः प्रामाण्यमुपसङ्ग्राहकः, स उत्तरकालेऽर्थविप्रकर्षा
दुर्बलः । तस्मादभ्यसितव्यं वचनमिति ।

स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ ६ ॥ (यु०

स्वाभिश्च वङ्क्रिभिः पशुरुपलक्षितः प्रकृतौ, इहापि
तथैव उपलक्षयितव्यः, सोऽभ्यासवचने श्रूयते, समास
दृश्यते हि परसङ्ख्या समुदायस्योक्ता भवति । तथ
न स्वाभिः पशव उपलक्षिता भवन्ति, तस्मादसदेतत् ।

वङ्क्रीणान्तु प्रधानत्वात् समासेनाभिधानं स्यात् प्राधान्यमग्निगोस्तदर्थत्वात् ॥ ७ ॥ (उ०)

तुशब्दः पक्षं व्यावर्त्तयति, नैतदेवम्, अभ्यसितव्यः षड्विंशतिशब्द इति, किन्तर्हि ? समस्य वदितव्या वङ्क्रय इति। कुतः ?। तत्र वङ्गीणां प्रधानत्वात्, प्राधान्यं हि तासां, प्रकृतौ षड्विंशतिरेता वङ्क्रयः इति अभिसम्बन्धः, तत्रेप्सितः षड्विंशतिरस्येति वङ्क्रयो गणिताः, न ताभिर्गणिताभिः पशुरुपलक्षितः। किंकारणम् ?। वङ्क्रीभिर्गणितार्भिर्दृष्टं प्रयोजनं क्रतुरं पार्श्वमुद्दरिष्यते इति, न तु वङ्क्रीभिर्गणिताभिः पशावुपलक्ष्यमाणे किञ्चित् दृष्टमभ्यधिकं भवति, तस्माच्च पशुसम्बन्धो विवक्षितः, एवं प्राधान्यं वङ्गीणाम्, अग्निगोः, वङ्क्रार्थत्वाच्च तस्य सङ्गापशुसम्बन्धः प्रयोजनम्। तस्मात्तमस्य-वचनं कर्त्तव्यम्, एतावत्त्वं प्रकृतौ उक्तमिति विकृतौ एतावत्त्वेव वक्तव्यमिति तस्मात्तमस्य-वचनं कर्त्तव्यमिति।

तासाञ्च क्रतूरुवचनात् ॥ ८ ॥ (यु०)

तासाञ्च वङ्गीणामिदं क्रातूरुमुच्यते, न पशूनाम्, ता अनुष्ठोच्चावयतात् इति, षड्विंशतिवङ्क्रयस्ताः प्रयत्नेन उद्दर्त्तव्या इति। इतरथा षड्विंशतिरस्य वङ्क्रयस्तं प्रयत्नेन किञ्चित् कुर्य्यादित्येवमभिसम्बन्धो भवेत्। यद्धि लक्ष्यते, तद्धिकार्य्यमम्बन्धार्थं प्रतिनिर्दिश्यते। तदिह षड्विंशतिरस्य वङ्क्रयस्ताः इति वङ्गीणां प्रतिनिर्देशः कार्य्यार्थः। तस्मात्तासां प्राधान्यमिति।

अपित्वसन्निपातित्वात् पत्नीवदाम्नातिनाभिधानं स्यात् ॥ ९ ॥ (पू० २)

अपित्विति पक्षव्याहत्तिः। नैतदेवं, समभितव्या वा क्रय इति, किन्तर्हि ? अविकृतः षड्विंशतिशब्दः प्रत्याख्यः। कुतः ?। असन्निपातित्वात्, असन्निपाती ह्यग्निः न करणत्वेन निर्दिश्यते, यदि हि करणत्वेनानु निर्दिश्ये ततोऽनेन प्रकाशितं कर्त्तव्यं, न ध्यानेनेति मन्त्रान्ते कर्मसन्निपातः स्यात्। तचाग्नक्यमविकृतेन योगपद्यं कर्मणमिति विक्रियेत अभ्यस्येत वा। अथ पुनरेतदकरणं, किं माणानुवादिनयनकालमग्निगुवचनमनेकस्मिन् पशौ चोदकेनात्र निपतितम्। तत्रैषां° स्वसङ्ख्यावतीर्वङ्कीरर्वदितुमशक्यं विप्रतिपत्तिरूपं तत्। तस्मात्र तद्वङ्गीणामि यत्ता वदितव्या, किन्तर्हि ? षड्विंशतिसङ्ख्यायाःसम्बन्धः कर्त्तव्यः, यथा द्विपत्नीके बहुपत्नीके वा प्रयोगे पत्नीशब्द एकवचनान्तो न सङ्ख्यां पत्नीः परिच्छिनत्ति, किन्तर्हि एकत्वेन सम्बध्नाति एवमिहापि, तस्मादविकारेण प्रयोगः एवमविकारे आर्षमनुगृहीष्यते इति।

विकारस्तु प्रदेशत्वाद्यजमानवत् ॥१०॥ (उ०)

तुशब्दात्पक्षो विपरिवर्त्तते, नाविकारः, ऊहः कर्त्तव्य इति। यद्यत्सङ्ख्येषु आहृत्य तत्सङ्ख्योच्यते, तच्च वचनप्रामाण्यात् विप्रतिपन्नसङ्ख्याकस्य शब्दस्य प्रयुज्यमानस्य अदृष्टोऽर्थोऽभ्युपगम्यते, यथा प्रकृतौ पत्नीशब्दस्य न तु इहाहृत्य षड्विंशतिशब्दोऽनेकस्मिन् पशौ प्रयुज्यते, किन्तु चोदकेनेह प्राकृतवचनं प्राप्यते। तच्च यत् न्याय्यं तत् चोदकः प्रापयिष्यति, नाहृत्य षड्विंशतिशब्दम्। किं

तत् न्याय्यम्?। यत् प्रकृतौ विवक्षितं, प्रकृतौ च बहूनां दृश्यत्वं कथितं। तस्मादिह सा प्रदिश्यते।

नन्वेतदुक्तं गृध्रिणीः करणत्वेन निर्देश्य इति, यदा च न करणं, तदा कथमयं बहुत्वयुक्तावचनः, श्रुत्या षड्विंशतिसङ्ख्यावचन एव भवितुमर्हति इति। उच्यते, यद्यपि नास्य तृतीयया निर्देशः, तथापि प्रयोगवचनेनोपगृहीतः साधको भवन् कमन्यं दृष्टमुपकारं करिष्यति, अन्यतोऽवदानप्रकाशनात्। अथोच्यते, नास्यावदानैरभिसम्बन्धः प्रकृतियागप्रयोगवचनो यागेन सम्बध्नाति, तत्र च हविष्कृतीक्तनं दृष्टं प्रयोजनं, षड्विंशतिग्रह्योऽपि तत्सुतये भविष्यति इति। नैतदेवमिति ब्रूमः, प्रकरणात् यागमात्रेण अभिसम्बन्धे सति ऋत्विजां प्रैष इति गम्यते। लिङ्गात्तु ग्रभिक्षप्रैषमेनमध्यवस्यामः। तथारूपाणि ह्यत्र वाक्यानि, देश्या ग्रभितार उपङ्क्तां मनुष्या आरभध्वम् इति। तथा षड्विंशतिरस्य बहुत्वस्या अनुष्ठोत्त्वावयवात् इति। तस्मात् बहुत्वयुक्तावचन एष न षड्विंशतिसङ्ख्यावचनः। यथा यजमानपदे एकयजमानवाचिनि स्वसङ्ख्यामात्रकवचनमितिकृत्वा द्वियजमानके च प्रयोगे स्वसङ्ख्यावचनप्रदेशात् जहः क्रियते, एवमिहापीति।

अपूर्वत्वात्तथा पत्नीनाम् ॥ ११ ॥ (यु०)

यदुक्तं पत्नीवदिति, युक्तं पत्नीनां न तत्रैकपत्नीके यजमाने पत्नीशब्दः समाम्नातः, द्विपत्नीके बहुपत्नीके च प्रदे-

मात् भवति। यदा एकस्याः पूजायाः सप्तशतावचनः
द्वयोर्बहूनां च सप्तशतावचन इति। तस्मादेवम् यदा

आम्रातस्त्वविकारात् सङ्ख्यासु सर्वगामि-
त्वात् ॥ १२ ॥ (पृ० ३)

तुशब्दोऽयं पक्षमवतारयति, न समस्त-वचनं सा
धः स्यादिति, यथा समाम्रातं षड्विंशतिप्रातिपदिकं
लक्ष्यम्, एवमविकारे आर्थानुग्रहो भविष्यति। प्रवि
शुद्धमभिवदितुं वचनमूह्यिष्यते, षड्विंशती एतयोर्व
इति। ननु षड्विंशती इत्यभिधाने बहूनां प्रथम
प्राप्नोति। उच्यते, यदा षड्विंशतिगुणः प्राधान्येन वि
क्षितो भवति, तद्विशेषणार्थं सङ्ख्ये यमुच्चार्यते, त
प्रथमान्तेनापि लक्षणया सङ्ख्या विशेष्यते, यथा इन्द्रा
देवते इति। यदा द्विवैरेकार्थैकधर्मयोऽर्थो गुणो विवक्षि
भवति, तदैकवचनान्तमेव इन्द्राग्नी इतिशब्दो लक्षण
विग्रिनष्टि। तथा च प्रयोगो दृश्यते, पञ्चपञ्चाशतस्त्रिह
संवत्सराः पञ्चपञ्चाशतः पञ्चदशा पञ्चपञ्चाशतः सप्तदः
पञ्चपञ्चाशत एकविंशाः इति सङ्ख्यावचनः शब्दः त्रिह्नत इ
नेन लक्षणया विशेष्यते। यथा देवदत्तयज्ञदत्तविष्णुमित्र
पर्वेदिति, एवं षड्विंशती बहूव इति। एवमविकारं
भविष्यति, बहुगामी च षड्विंशतिशब्दो भविष्य
इति।

सङ्ख्या त्वेवं प्रधानं स्याद्द्रव्यः पुनः प्रधानम् ॥
१३ ॥ (उ०)

सत्यनुपपन्नत एव वचनं, बहुविंशती बहुत्व इति। बहुगाप्रधानस्यैवविधेयः स्यात्, बहुविंशतिशब्दः प्राधान्येन विवक्षितः, तद्विशेषत्वेन बहुत्वोपचारत्वं, बहुत्वः पुनः प्रकृतौ प्रधानं, न बहुगा, तदुक्तं, प्राधान्यमभिप्रेत्यद्वंत्वात्। तासाञ्च क्रमवचनात् इति, तदेवं न प्रकृतिवदभिधानं स्यात् भवेत्। तच्च चोदक एव बाध्येत। तस्मात्समस्तशब्दमेव वचनमिति।

अनाम्नातवचनमवचनेन हि बहूनां स्याद्विधेशः ॥ १४ ॥ (यु०)

न खल्वप्यस्मिन् पक्षे सर्वमेवाम्नातमुच्यते, अनाम्नातवचनमपि प्रतीयते इति बहुविंशती बहुविंशतय इति। अथ द्विवचनं बहुवचनं वा अनार्थं, तथा न क्रियते, न तासां बहूनां कात्स्न्येनाभिधानं स्यात्।

अभ्यासो वाऽविकारात् ॥ १५ ॥ (पू० ४)

वाशब्दः पक्षं व्यावर्त्तयति, न समासवचनम्, अभ्यासः स्यात्, एवमविकारो भविष्यति। तथार्थचोदकावनुग्रहीष्येते। सर्वं समाम्नातं स्यात् भविष्यति। वैपरीत्यम् अभ्यशब्दोऽभ्यस्यिष्यते, क्रमाच्च बहुत्वोऽभिहिता भविष्यन्ति।

पशुत्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात् तस्मात्समासशब्दः स्यात् ॥ १६ ॥ (सि०)

तृयशब्देनावयार्थते, नैतदेवं, समस्त-वचनमेवेति। कथम्?।

एवं सति पशुः प्राधान्येनात्र निर्दिष्टः स्यात्, पशोः-पशोः षड्विंशतिः, षड्विंशतिर्वङ्क्रयः न कश्चित् अषड्विंशतिवङ्क्रुः पशुरिति पशोः सङ्ख्यासम्बन्धेऽभिधिक्षिते एवं वचनं भवति। न च पशुसङ्ख्यासम्बन्धः प्रकृतौ क्वचित्ः इति। उक्तमियत्ता वङ्क्रीणां प्रकृतौ वक्तव्या। इहापि सैव चोदकेन प्रदिश्यते। तेन नाभ्यासः कर्त्तव्यः, स हि पशुनिमित्तकः, तस्मात् समस्य-वचनं वङ्क्रीणां कर्त्तव्यमिति। (८। ४। १ अ०)।

चतुस्त्रिंशत्वाजिन इत्यनेन आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशत्वङ्क्रुरूप-विशेषवचनाधिकरणम्।

अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥२७॥

अस्त्यश्वमेधः, तत्र सवनीयः पशुः अश्वस्तूपरगोसृगौ च। अस्ति तु प्रकृतौ अग्नीषोमीये षड्विंशतिरस्य वङ्क्रयः इति वचनं, तदिह चोदकेन प्राप्तम्। तत्राश्वस्य चतुस्त्रिंशद्वङ्क्रयः तूपरगोसृगयोः षड्विंशतिः, अस्ति तु ऋक् समाम्नाता, चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य खादितिः समेति। अच्छिद्रा गात्रा वसुना सगोत परस्परसनुधुरा विश्रस्ता इति। तदिदं सन्दिह्यते, किं अश्वस्य वैशेषिकमिदं वचनं कर्त्तव्यं, तूपरगोसृगयोः समासेन, उत सर्वेषामेव समासवचनम्?। किं प्राप्तम्?, अश्वस्य चतुस्त्रिंशद्वङ्क्रयस्तस्य वैशेषिकमिदं वचनं कर्त्तव्यम्। कस्मात्?।

वचनात्, एवं चतुस्त्रिंशद्राजिनो देवबन्धोः इत्येतत् वचनमर्थवदिति, इतरथा एतद्वचनमनर्थकं स्यात्। तस्माद्वैशेषिकमप्यस्त्येति। (९।४।२ अ०)।

आत्मनेभिक्षवनीयात्मस्य न चतुस्त्रिंशद्वर्षाणि ब्रूयात् इत्यनेन समस्याया एव •ऋचो निषेधाधिकरणम्।

तत् प्रतिषिध्य प्रकृतिर्नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १८ ॥ (सि०)

तत् प्रतिषिध्य प्रकृतिर्नियुज्यते, प्रकृतौ यत् कृतं वचनं तत् कर्त्तव्यमिति। कथम्?। न चतुस्त्रिंशद्वर्षाणि ब्रूयात् षड्विंशतिरित्येव ब्रूयात् इति, सा नियुज्यमाना चतुस्त्रिंशद्वाच्यत्वात् वारयति शब्दं, तस्मात् प्रतिषिद्धत्वाद्वैशेषिकं वचनं न कर्त्तव्यं सामासिकं वचनं कर्त्तव्यम्।

ननु षड्विंशतिरित्येव ब्रूयात् इति वचनात् प्रतिषिद्धेऽपि वैशेषिकमेव वचनं कर्त्तव्यमिति। न, इत्युच्यते न श्रूयते षड्विंशतिशब्दो विधीयते, किन्तर्हि? यथाप्राप्तवचनमनूद्यते, कथमवगम्यते?। एवकारकरणात्, यथाप्राप्ते एवकारकरणं, न च षड्विंशतिशब्दः प्राप्तः, षड्विंशतिसङ्ख्याभिधानं प्रकृतौ कृतमिष्टापि तदेव प्राप्तम्। षड्विंशतिशब्देन तत् प्रकृतौ स्थितमिष्टापि षड्विंशतिशब्दस्तत्रत्यार्थमेवोच्चारितः। षड्विंशतिसङ्ख्यापरोऽनेकोऽर्थो विधीयते, चतुस्त्रिंशत्प्रतिषेधः, षड्विंशतिसङ्ख्यावच-

नच्च, तच्च वाक्यं भिद्येत, भिद्यमाने एकवाक्यरूपं बाध्येत। किं तत्?। साकाङ्क्षत्वं, न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयात् इति। एतद्धि वचनं चतुस्त्रिंशदचनाभावे प्राप्तमेव सत् कर्त्तव्यतया प्रतिषेधं प्रसंसितुमुच्यते, तदेवमेकवाक्यतामापद्यते। सैकवाक्यता सङ्ख्यापरे बाधिता स्यात्। अनेकार्थविधानच्चाम्नाय्यम्, एकार्थविधाने सम्भवति, भूयसी हि तत्राऽदृष्टकल्पना स्यात्। तस्मादवधाप्राप्तवचनं कर्त्तव्यमिति।

ऋग्वा स्यादाम्नातत्वादविकल्पस्य न्याय्यः॥ १९॥ (पू०)

आम्नाता हि ऋक् प्रतिषिद्धा च तस्मादस्यस्य वैशेषिकं वचनं स्यात्। तथा च अविकल्पो भविष्यति, अविकल्पस्य न्याय्यः। विकल्पे विरुद्धं वचनं अन्योन्येन भवति। भवति इति चेत्, न प्रतिषेधः। नेति चेत्, न विधिः तस्मादैशेषिकं वचनं कर्त्तव्यम्।

तस्यान्तु वचनादैरवत् पदविकारः स्यात्॥ २०॥ (आ० नि०)

अथ यदुक्तम्, ऋक् तत्र प्रतिषिध्यते इति। नैतदेव, तस्यां वचनात् पदविकारः स्यात्, वचनं हि भवति, न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयात् इति। तत्र चतुस्त्रिंशत्पदं श्रुत्वा प्रतिषिध्यते, ऋक् लक्षणया प्रति-

विध्यते। ऋतिलक्षणाविप्रवे च ऋतिर्नाम्या। तस्माद्ऐ-ग्निकं वचनं कर्त्तव्यमिति।

सर्वप्रतिषेधो वाऽसंयोगात् पदेन स्यात्॥ २१॥ (उ०)

सर्वस्या एव वा ऋचः प्रतिषेधोऽयं, न चतुस्त्रिंशत्पद-स्य। कस्मात्?। पदेन असंयोगात्, चतुस्त्रिंशत्पदेन ऋचः संयोगो न स्यात्, विना तस्मात् पदात्, नैव ऋक्-शेषो वह्निगमनं कुर्य्यात्।

अथ षड्विंशतिपदेन सम्बध्येत, तथापि नाऽऋचो सङ्गां ब्रूयात्, तव दृष्टोऽर्थो नावकल्पेत, जनस्य वाक्यमर्थं न साधयेत्, जने च वाक्ये दोषश्रवणात्, मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् इति। चतुस्त्रिंशत्पदं चेह अनर्थकं स्यात्। तस्मात् समस्त-वचनं कर्त्तव्यम्। ऋचय विध्यन्तरेण विहितत्वाद्ऐग्निकं वचन-मिति। (८।४।३ अ०)।

अग्नीषोमीयपशावनुवाक्यशब्देन वषाभिधानाधिकरणम्।

वनिष्टुसन्निधानादनूक्तेन वषाभिधानम्॥२२॥

ज्योतिष्टोमेऽग्नीषोमीये पशौ अग्निगो वचनं, वनिष्टु-

मस्य मा राविष्टोरुकं मन्यमानाः इति। तत्रोरुकशब्दं प्रति विचारः, किं वनिष्टुमस्य मा राविष्टोलूकसदृशं मन्यमानाः, उत उरुकं वपां मन्यमाना वनिष्टुं मा राविष्ट ? इति। किं प्राप्तम् ? वनिष्टुमुलूकं मन्यमाना इति। कथम् उरुकशब्दः उलूकवचनः ? रज्वोः समानवृत्तित्वात्, पर्श्वङ्गः पञ्चङ्गः, रोमाणि, लोमानि, अङ्गुरिः अङ्गुलिः। उलूकसदृशत्वाच्च वनिष्टोः, वपायाश्चाप्रसिद्धेः।

एवं प्राप्ते ब्रूमः, उरुकशब्देन वपाभिधानं स्यात्। वपां मन्यमाना वनिष्टुं मा राविष्टेति एषा बुद्धिः क्रियमाणा दृष्टार्था भवति, भवति हि वनिष्टुसन्निधानात् व्यामोहेन वनिष्टोर्लवनप्रसङ्गः, तस्य निवर्त्तयन्नेष शब्दो दृष्टप्रयोजनो भवति, न हि वनिष्टुर्न लवितव्य एव, वपोद्धरणकाले वपां मन्यमानैर्न लवितव्यः इतरस्मिन् पक्षे वनिष्टुं मा राविष्टेति लवितव्ये वनिष्टौ अनर्थक्रः प्रतिषेधः उलूकसदृशवचनस्य अदृष्टार्थम्। कथं पुनर्वपायामप्रयुक्तो वपां प्रत्याययिष्यति उरुकशब्दः ? इति। उच्यते, अवयवप्रसिद्धया उरुशब्दस्तावद्विस्तीर्णे वचनो दृष्टः, तद्यथा उरु राजाङ्गुष्ठम् उरु तैलिकाङ्गुष्ठमिति। तथा, उरुं हि राजा वरुणश्चकार सूर्य्याय पन्थां मन्वेतवा उ इति। तथा उरु विष्णो विक्रमस्व इति। इहापि स विस्तीर्णे वचन एव। तथा कशब्दो मेदसि प्रसिद्धः, यथा कशवाहिनो रथाः, मेदोवाहिन इति गम्यते। तस्यैकदेशः कशब्दः समुदायप्रत्यक्षमादधाति। मेदस्विनी तस्य वपा, न विस्तीर्णं मेदो मन्यमानेन तत्रभवता वनिष्टुर्लवितव्य

इति वपावचनता सिद्धा भवति । किं भवति प्रयोजनम् ? । वनिष्टुवचनपक्षे उपमानस्य उरुकशब्दस्य अनर्थः । वपावचनपक्षे उरुशब्दः ज्ञापितव्यः कशब्दश्चेति उरुणी के, उरुणि कानि । अथ वा उरुके उरुकानि: यदि समासाभिप्रायः । (८।४।४ अ०) ।

अधिगौ प्रशंसा बाहूं इत्यत्र प्रशंसाशब्दस्य प्रशंसापरत्वाधिकरणम् ।

प्रशस्याख्याभिधानम् ॥ २३ ॥ (पू०)

तस्मिन्वेवाधिगावाख्यायते, प्रशंसा बाहू इति । तत्र सन्देहः किं प्रशंसा बाहू कृणुतात् प्रशंसेति तृतीयान्तः, प्रशंसा बाहू गृहीतव्याविति, उत, प्रशंसेति द्विवचनं, आकारे विभक्तेः लुप्ते प्रशस्तौ बाहू कर्त्तव्याविति ? । किं प्राप्तम् ? प्रशंसाऽस्याभिधानम्, असौ हि ग्रासशब्दः प्रसिद्धः, तत्राहि तमनुवदति, दृश्य प्रयाजानिष्टाङ ग्रासमाहरेति, असिं वै ग्रासमाचक्षते इति । 'अनर्थिका च बाह्वोः स्तुतिः स्तुतौ बाहू किमप्यदृष्टं कुरुत इति मान्त्रवर्णिकं तयोर्हेवतात्वं कल्पितं स्यात्, तत्रायुक्तम् अन्यस्मिन् पक्षे सति । तथा शौनःशेफे भवति दर्शनम्, अतस्त्वामग्निं ग्रासहस्तं ग्रासेन विग्रसनत्वाच्च द्रष्टुमुऋषे इति । तस्मादसिना प्रशंसेति गम्यते ।

बाहुप्रशंसा वा ॥ २४ ॥ (सि०)

अथ वा बाहुप्रशंसेयम्, प्रशस्ता बाहू अस्यतात् प्रशस्तौ बाहू अस्येत्यर्थादिति। तथा प्रशस्तशब्दस्य दृढार्थता भविष्यति इति, आत्मार्थेन हि बाहोः प्रशस्तता, अस्त्रो बाहू उद्यरतेत्यर्थः, अस्त्रौ च बाहू उद्यच्छेत्यादिति। इतरस्मिन् पक्षे खधितिना विशसनं क्रियते अतश्च वाचकः शब्दः उच्चार्यते। यदि वा मान्त्रवर्णिकं द्रव्यं विधीयते असिना बाहू छेत्तव्यौ इति, तिसृणामपि विधिविहिते खधितौ सति। न च न प्रशस्तौ बाहू, ताभ्यां पशुर्हि गच्छति। अवनम्य च ग्रसीकरीरे भक्षयति। तस्मात् बाहुप्रशंसा। किं भवति प्रयोजनम्?। अश्वमेधे यूपं राजता हरितत्वरवोऽस्यः, तत्रासिपर अस्त्रो भवति, यथा पूर्वः पक्षः। यथा तर्हि सिद्धान्तः, तथा बाहुपरेणोक्षेन भवितव्यम् (९।४।५ अ०)।

अग्निर्गौ श्येनस्य यच्च इत्यादौ श्येनादिशब्दानां आत्मवचनाधिकरणम्।

श्येन-शला-काश्यप-कवष-श्वेकपर्णेष्वाकृतिवचनं प्रसिद्ध-सन्निधानात् ॥ २५ ॥

अस्मिन्नेवाग्निगाविदमाम्नायते, श्येनस्य वचः अस्त्रो तात् शला श्रोणी काश्यपेवांसौ कवषौ श्वेकपर्णाष्ठीवन्त इति। एषु संशयः, किं आकृतिवचनमेषु भवति, उत आत्मौदरवचनम्? इति। किं प्राप्तम्?, प्रसिद्धसन्नि-

धानात् चाञ्जतिवचनम्, इह प्रसिद्धस्य सन्निधौ बहुभिधीयते, किंचिदिदं कर्त्तव्यमिति तच्चाञ्जतिवचनं गम्यते, यथा अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम् इति अर्जुनबदरा मेखलाः क्रियन्ताम् इति सिंहाञ्जतिवचनं मेखलाञ्जतिवचनत्व गम्यते, एवं श्येनाञ्जति वचः कर्त्तव्यं, अक्षाञ्जती दोषदी, अक्षपाञ्जती अंसौ, अवघाञ्जती जङ्घे, करवीरपर्वाञ्जती अष्ठीवन्तौ इति।

कार्त्स्न्यं वा स्यान्नयाभावात् ॥ २६ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति न चैतदस्ति, आञ्जतिवचन इति, किन्तर्हि, कृत्स्नोद्धरणं विवक्षितं, कृत्स्नानि उद्धृतानि एतानि एतदाञ्जतिकानि भवन्ति। यथा श्येनाद्याञ्जतिकानि भवन्ति, तथैतानि कुरुत, कृत्स्नानि उद्धरतेत्ययमर्थोऽवगम्यते, सचयेदं चोद्यमानं दृष्टार्थं भवति। कृत्स्नोद्धृतैर्हि तैः प्रयोजनम्। तथा हि तदाञ्जतिधानामवत्तं भवति। इतरथाऽतदाञ्जतिकानामवद्यात्। तस्मात् कार्त्स्न्यमवगम्यत इति।

अभिगोश्च तदर्थत्वात् ॥ २७ ॥ (यु०)

अभिगुश्चाङ्गानामुद्धरणार्थः, अङ्गानां कार्त्स्न्येनोद्धरणं कथं स्यादित्येवमर्थः। कथम्?। एवं हि भवति वचनं, गात्रं गात्रमस्यानून क्षणुतात् इति। तस्मादपि श्येनादिभिः कृत्स्नोद्धरणं गम्यत इति। प्रयोजनं पर्याप्तम्। (९।४।६ भ०)।

दर्शार्थौदृताग्निलोपे प्रायश्चित्तरूपज्योतिष्टुत्या अननुष्ठानाधिकरणम् ।

प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात्तदर्थं हि विधीयते ॥ २८ ॥

अस्ति अग्निहोत्रम्, य एवं विद्वानग्निहोत्रं जुहोति इति । तत्रेदमाम्नायते, अग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत् यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्दायात् इति । यदि तु दर्शार्थेन पौर्णमासार्थेन वा अग्निः उद्धृतोऽहुतेऽग्निहोत्रे उद्दाहात्, किं ज्योतिष्मती कर्त्तव्या, न ? इति

प्राप्तम् ? कर्त्तव्येति । कुतः ? । उपसम्भ्रमं हि निमित्तं, भवितव्यं नैमित्तिकेनेति । अग्निरसौ उद्धृतोऽहुतेऽग्निहोत्रे उद्दातः, एतावच्च निमित्तं ज्योतिष्मत्याः तस्मात्सा कर्त्तव्येति । न चात्र शब्दोऽस्ति अग्निहोत्रार्थमुद्धृते उद्दाते कार्य्येति तस्मादपि कर्त्तव्या ।

एवं प्राप्ते ब्रूमः, प्रासङ्गिके एवंलक्षणकेऽग्न्यनुगे प्रायश्चित्तं न कर्त्तव्यं, परार्थं हि तदुद्धरणं कृतं दर्शपूर्णमासार्थम्, अग्निहोत्रार्थे चोद्धृते व्यापन्ने तदाम्नातम् तस्मान्न कर्त्तव्यम् । आह, ननूक्तं नास्त्यत्र शब्द अग्निहोत्रार्थमुद्धृतेऽनुगते प्रायश्चित्तमिति । अत्रोच्यं यद्यपि नास्त्येवञ्जातीयकः शब्दः, तथाप्यग्निहोत्रानेवोद्धृतेऽनुगते प्रायश्चित्तं गम्यते । कथम् ? । अग्निहोत्रप्रकरणे एतदाम्नातमिति, अग्निहोत्रप्रकरणे आम्नानात्स्वोपकारकमिति गम्यते । नाग्निहोत्रविशिष्टमुद्धरणं स्वार्थं हि सर्वं क्रियते, न परविशेषणार्थेन । अतोऽ

अग्निसम्बन्धमेतत् प्रायश्चित्तमुच्यते, नोद्दानसम्बन्धम्। किमतो यद्येवम्?। यद्युद्दानसम्बद्धं भवेत्, उद्दानस्यानङ्गत्वादेतदुद्दानार्थमिति गम्यते, प्रकृतेनाग्निहोत्रेण प्रयोजनेन सम्बध्यते। अग्निसम्बन्धे पुनर्गुणत्वादग्नेरेनेव प्रायश्चित्तस्य प्रयोजनसम्बन्धः, तच्चैवमुद्धृतो व्यापन्नो भवति, यदि स प्रयोजनं नाभिनिर्वर्त्तयति। तच्चाग्निहोत्रार्थस्योद्धरणस्याग्निहोत्रनिर्हृत्तिः प्रयोजनम्। दर्शपूर्णमासार्थस्य दर्शपूर्णमासनिर्हृत्तिः। उद्धृतत्वानुगतं खल्वै प्रयोजनायायोग्यं प्रायश्चित्तेन योग्यं क्रियते। तच्च योग्यं कुर्वन् प्रायश्चित्तमग्निहोत्रस्योपकरोति। यस्तूद्धृतो दर्शपूर्णमासप्रयोजनः तं योग्यं कुर्वन्नग्निहोत्रस्योपकुर्यात्। यस्त्वग्निहोत्रार्थमुद्धृतः तं योग्यं कुर्वन् अग्निहोत्रायोपकरोति। तस्मादग्निहोत्रार्थमुद्धृते प्रायश्चित्तम्। कथं पुनर्ज्ञायते, अग्निना प्रायश्चित्तस्य सम्बन्धः नोद्दानेनेति?। अग्निविशिष्टेन उद्दानेन सम्बन्ध इति श्रुत्या गम्यते, उद्दानपरीतेनाग्निनेति वाक्येन। श्रुतेर्वाक्याद्बलीयस्त्वादुद्दानसम्बन्धः प्राप्नोति इति। उच्यते उद्दानसम्बन्धस्यापरिहार्यत्वात् यस्योद्दायात् इत्यविवक्षितमेव प्राप्नोति, अदृष्टार्थत्वान्न अनाकाङ्क्षितेन सम्बन्धः, तदुद्दानपरीतेऽग्नौ प्रायश्चित्तेन सम्बध्यमाने व्यापत्तौ सत्यामाकाङ्क्षितेन सम्बन्धः, दृष्टार्थता च। तस्मादुद्दानपरीतोऽग्निः प्रायश्चित्तेन सम्बध्यत इति। दर्शपूर्णमासार्थमुद्धृतो यत्रानुगच्छति तच्चाग्निहोत्रस्य परकीयोऽग्निर्व्यापन्नः। परकीयस्योद्धरणमिति तत्र प्रायश्चित्तं

न स्यात् । अपि च लिङ्गं भवति । किमिति ? । यस्मा
रुद्धृतो अग्निहोत्रं इत्यनुवादः । विधौ हि एतस्मिन् सं
वाक्यभेदप्रसङ्गः । यद्यग्निहोत्रप्रयोजनमुद्धरणं, ततोऽकृत
प्रयोजनमिति विवक्षायाम् अद्धृतेऽग्निहोत्रे इति वचनमर
वदितुमुपपद्यते । तस्मादपि अग्निहोत्रप्रयोजने उद्धृते
ऽनुगते प्रायश्चित्तं भवितुमर्हतीति । किन्तर्हि तदा कर्त्त
व्यम् । अविशेषविहितमग्नेरुपशमे प्रसज्यादिति । (९
४ । ७ भ०) ।

धार्योद्धाने प्रायश्चित्तस्य ज्योतिष्टोमनयानाधिकरणम् ।

धारणे च परार्थत्वात् ॥ २९ ॥ (सि०)

इदमाम्नायते, धार्यो गतश्चिय आहवनीयः इ
अस्यानुगमे प्रायश्चित्तं अग्नये ज्योतिष्मतेऽष्टाकप
यस्याग्निरुद्धृतोऽद्धृतेऽग्निहोत्रे उद्दायात् इति । तत्रैष
र्थः सांयविकः, यदा धार्योऽग्निरनुगच्छति, तद
किमिदं प्रायश्चित्तं कर्त्तव्यं, न ? किं प्राप्तम् ? कर्त्तव्यमिति
उपसम्प्राप्तं, हि निमित्तं, एतावदिह निमित्तं, अग्निरग्नि
होत्रार्थमुद्धृतः कृतप्रयोजन उदातीति । तत्रेह सं
प्राप्तं, तस्मात् कर्त्तव्यं प्रायश्चित्तमिति । ननु सर्वकर्मार्थ
मेतत् न केवलायाग्निहोत्राय । उच्यते, यदि सर्वकर्मार्थ
समुदायार्थं तत् न केवलस्यार्थेन भवतीत्युच्यते । य
एकैकस्मै इत्येवं सर्वार्थं तत्, सर्वेभ्योऽपि प्रयुक्तमग्निहोत्रा

युक्तं भवति। न चेदं सर्वकर्मसमुदायार्थं, समुदायस्यादितत्वात् साधनानि प्रत्याकाङ्क्षाभावः। एकैकं तच्च कर्माहरणमाकाङ्क्षति। तस्मात् सर्वार्थमपि सत् अग्निहोत्रार्थं भवति। एवञ्चेदनुगमनप्रायश्चित्तं प्राप्नोति इति। यथा पर्य्युक्षणं परिसमूहनं तृणापवर्ह इत्येवमादयः पदार्था धार्य्येऽग्नावहन्यहनि क्रियन्ते एवं प्रायश्चित्तमपि क्रियेत।

एवं प्राप्ते ब्रूमः, धारणे च गतत्रियोऽनुगमने इदं प्रायश्चित्तं न कर्त्तव्यम्। कुतः?। परार्थत्वात्, न हि तदा अग्निहोत्रार्थमुद्धरणं यस्मिन् काले भवत्यसौ गतत्रीः, तच्चान्यार्थमुद्धृतोऽग्निः सर्वार्थं धार्य्यते, उद्धरणं तु तत् एकस्मै एव प्रयोजनाय, धारणं तु सर्वकर्मार्थं, नच धारणेऽग्निहोत्रार्थेऽनुगमने प्रायश्चित्तं विहितं, किन्तर्हि उद्धरणे, परकीयं चात्रोद्धरणं, परार्थमुद्धरणं, यदर्थमुद्धरणं तदर्थमुद्धृतेऽपि तत् प्रायश्चित्तम्। तस्मान्न तच्चेदं प्रायश्चित्तमिति।

क्रियार्थत्वादितरेषु कर्म स्यात् ॥३०॥ (आ०नि०)

अथ यदुक्तं, परिसमूहनं पर्य्युक्षणम् इत्येवमादयः पदार्था धार्य्येऽपि क्रियन्ते, एवं प्रायश्चित्तमपीति। अत्रोच्यते, युक्तं तत्, परिसमूहनादीनि क्रियन्ते, चोदितानि हि तानि, संस्कारार्थत्वेन श्रुत्यानि च अकृतप्रयोजनानि च। उद्धरणं तु कृतप्रयोजनत्वात् निवृत्तं, नियतदेश-

कालत्वाच्चाशक्यम्। तस्मात् इदमतुल्यं प्रायश्चित्तेन। (६।४।८ अ०)।

दर्शार्थस्योद्धरणस्यामन्त्रकत्वाधिकरणम्।

न तूत्पन्ने यस्य चोदनाःप्राप्तकालत्वात् ॥ ३१ ॥

अस्त्यग्निहोत्रे उद्धरणमन्त्रः, वाचा त्वा हौत्रा प्राणेन उद्गात्रा इत्येवमादिः। तत्रायमर्थः सांग्रयिकः, यद्दर्शपूर्णमासार्थेनोद्धरणं क्रियते, किं तत्रैष मन्त्रः कर्त्तव्यो न ? इति।

किं प्राप्तम् ? दर्शपूर्णमासार्थमप्युद्धृतेऽग्नौ अग्निहोत्रं हूयत एव। तत्र चेन्मन्त्रो न क्रियते, अमन्त्रोद्धृतेऽग्निहोत्रं प्रवर्त्तते। तस्मात् मन्त्रेण तदुद्धरणं कर्त्तव्यम्। अथोच्येत, कालाभावे विगुणत्वादुद्धरणं नाग्निहोत्रस्येति, तत्र, कालमात्रं हि अपगतम्, उद्धरणं तु विगुणमप्यग्निहोत्रस्य भविष्यतीति। एवं चेत् समन्त्रकं कर्त्तव्यमिति।

एवं प्राप्ते ब्रूमः, परार्थम् उत्पन्ने अग्नौ यस्य अग्निहोत्रं प्रवर्त्तते, चोदनेति कर्म ब्रूमः न तत्र मन्त्रः कर्त्तव्य इति। न तदग्निहोत्रस्योद्धरणं, अतः परकीये उद्धरणे न कर्त्तव्यमिति। उच्यते, ननूक्तं, विगुणमुद्धरणमग्निहोत्रस्यैव भविष्यति, न गुणाभावे प्रधानाभावोऽपि इति। अथोच्यते, न गुणः कालः, निमित्तमसौ भवति, इत्येतदुक्तम्। अतो निमित्ताभावे क्रियमाणमश्रुतं कृतं

भवति । तस्माच्च तदुत्तरमग्निहोत्रयज्ञेति । न चेदुत्तरमग्निहोत्रम्, तस्मादत्र मन्त्रो न कर्त्तव्यः, श्रुतोऽपि श्रुतावनर्थक इति । (८।४।८ अ०) ।

प्रायणीयचरौ प्रदानपर्याणामननुष्ठानाधिकरणम् ।

प्रदानदर्शनं श्रयणे तद्धर्मभोजनार्थत्वात् संसर्गाच्च मधूदकवत् ॥ ३२ ॥ (पू०)

ज्योतिष्टोमे समाम्नायते, आदित्यः प्रायणीयः पयसि चरुः इति । तत्र सन्देहः, किं प्रदानार्थाः पशोर्धर्माः पयसि कर्त्तव्याः, उत न ? इति । यदि प्रदानार्थमेतत् पयः, ततः कर्त्तव्याः, अथ श्रयणार्थं, न कर्त्तव्याः । कथं संशयः ? । मन्त्रमीनिर्हेयात् श्रयणार्थं पय इति गम्यते, देवतासम्बन्धस्य तु चरोरधिकरणे पयसि, श्रूयमाणे वाक्यभेदाशङ्का, अतः संशयः ।

किं तावत् प्राप्तम् ? प्रदानार्थमिति । कथम् ? । आदित्यः चरुर्भवति, स च पयसीत्येवमनेकार्थावधाने वाक्यं भिद्येत, द्वावपि चेहार्थौ अतो वाक्यादवगम्येते, यदन्यतरदेवतयोर्विधीयते, तदाज्यतरदविधीयमानं गम्यते, अतो न वाक्यभेदः । यथा च न वाक्यभेदस्तथा आश्रयितव्यम् । तत्राधिकरणसम्बन्धे विधीयमाने देवतासम्बन्धावगतिर्नावकल्पते, प्रमाणान्तरेणाप्राप्तत्वात् । देवतासम्बन्धे

तु विधीयमाने हि ये निर्दिश्येते चरुपयसी, तयोर्निर्देश्य-सामर्थ्याद्वाक्येन संसृष्टं गम्यते, तच्च देवतया सम्बध्यते, तच्चार्थात्पय आधारत्वगम्यते ।

आह, वाक्येन हे चरुपयसी गम्येते, न तयोः संसर्गः । उच्यते, यदा हे गम्येते, तदा प्रयोगवचनेन यौगपद्यमितयोर्गम्यते, तच्चार्थात् संसर्गः, एकत्वाच्च वाक्यस्य समुच्चयः । तेनाच्च निर्देश्य एव विवक्षितः, नाधिकरणसम्बन्धो गम्यमानोऽपि विधीयते । एवं तु निर्देशः क्रियते, संसृष्टे चरुपयसी कथं गम्येयातामिति, तत्र चरुसंसृष्टं पयः चरौ त्रुट्यमाने नियतं त्रुट्यते, तदस्य प्रदानदर्शनं भवति । पयसा त्रुट्यमाणस्य तस्य प्रदानं कथम् स्यादिति सप्तमी निर्दिश्यते । तस्मात् भोजनार्थं यागार्थमेतत् पयः । भोजनमिति सारूप्याद् यागमाह । तस्माच्च पयः प्रदानार्थं पयोधर्मैः सम्बध्यते ।

आह, न त्यागमात्रं यागः, देवतामुद्दिश्य यस्त्यागः स यागो भवति । उच्यते, त्रुट्यमित्यदितिं देवतामुद्दिश्य त्यागः क्रियते इति । आह, न पयसोऽदितिर्देवता, श्रुतेरुद्देशमात्रेण देवता भवति, या यस्य श्रूयते सा तस्य देवता इति । चरोरेषा श्रूयते न पयसः । उच्यते, उभयस्य निर्देशात्, उभयेन देवता सम्बध्यते, संसृष्टेन मधूदकवत् यथा दधि मधु घृतं धाना उदकं, तत् संसृष्टं प्राजापत्यमिति भवति, एवमेवेदं द्रष्टव्यम् । यद्यपि सप्तमीनिर्दिष्टं सप्तम्यर्थस्याविधिलिंगत्वाविर्देश्यमात्रस्य विवक्षितत्वात्, यद्दधि दत्वा अभ्यवहर्त्तव्यमिति ओदनस्य निर्देश्यमा

ऋते, नाधिकरणत्वम्, एवमिहापि द्रष्टव्यम्। तस्मात् प्रणार्थं पयः प्रदानार्थाच्च पयोधर्माः कर्तव्या इति।

संस्कारप्रतिषेधश्च तद्वत् ॥ ३३ ॥ (यु० १)

एवञ्च कृत्वा प्रदेयसंस्काराणां केषाञ्चित् प्रतिषेध उपपन्नो भवति, अयजुषा वक्षानपाकरोति, अपविधवति गां हिनष्टि इति। प्राप्ते हि प्रतिषेधो न्याय्य इति।

तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ॥ ३४ ॥ (यु०२)

तत्प्रतिषेधे पयःप्रतिषेधे तथाभूतमपि लोके वर्ज्यते, पयसा सिक्तं, पयः भृतञ्च। नचैष अयणार्थस्य द्रव्यस्य धर्मः, यथा अयणार्थं पानीयं, तत्प्रतिषेधे तेले पीतं पानीयं न पातव्यमिति विलेप्यं यवागूञ्च पीयते। नच तथाभूतस्य वर्जनात् पयो लोके एवं भवति, भोजनार्थं हि तत्। यथा हि लोके पयः, तद्वदिहापि भवितुमर्हति इति सामान्यतो दृष्टं व्यपदिष्टम्।

अधर्मत्वमप्रदानात् प्रणीतार्थं विधानादतुल्यत्वादसंसर्गः ॥३५॥ (सि०)

अधर्मत्वं तु पयसः, नास्य प्रदेयपयोधर्मा भवेयुरित्यर्थः। कुतः ?। अप्रदानात्, नहीदं प्रदीयते। ननु चरौ प्रदीयमाने प्रदायिष्यत इत्येवमर्थं पयसि अयणमुच्यते। नैत्याह,

मृतस्वरः कथं स्यादित्येवमर्थं हि तत् श्रूयते। मृतैस्तण्डुलैः प्रयोजनमस्ति, नच्छन्त्यद्या चरुर्भवति इति, ननु प्रत्तेन पयसा नैतदहातव्यं भूयते। कथम्?। प्रणीतार्थं विधानात्। ननु वाक्यभेद एवं भवति इति परिहापित एष पक्षः, संसृष्टमत्र हविर्भवति इत्युक्तम्। उच्यते, अतुल्यत्वादसंसर्गः, अतुल्ये चरुपयसी, प्रत्यक्षतोऽधिकरणत्वेन पयः श्रूयते, प्रदेयत्वेन चरुः, पयसो यद्यङ्गेन प्रदेयत्वं गम्यते, तदधिकरणश्रुत्या बाध्यते। यत्तु वाक्यभेदप्रसङ्ग इति, तत्र, न हि पयसि चरुरिति सम्बन्धो भविष्यति, कथन्तर्हि, पयसि आदित्य इति, उभावादित्यशब्देन सम्बध्येते, आदित्यः पयसि, आदित्यश्चरुरिति उभौ चरुपयःशब्दौ आदित्यप्रधानावित्येकं वाक्यं भविष्यति, न वाक्यभेदप्रसङ्गः, पयआधार आदित्यो भविष्यति। तस्मान्न पयसि प्रदेयधर्मा भवितुमर्हन्ति।

परो नित्यानुवादः स्यात् ॥३६॥ (आ० नि०१)

अथ यद्विरङ्गमुक्तं, अयजुषा वत्सानपाकरोति अपवर्तयति गान्दोहयति इति। नैतत्, एवं सति अस्यार्थस्य साधकं भवति, किन्तर्हि एतद्विद्यानुवादकम्। नित्यमेतमर्थं सन्तं अनुवदति। नैवाप्रदेयत्वात् यजुषा वत्सा अपाक्रियन्ते, न पवित्रवति गौर्दुह्यते। ननु नित्यानुवादोऽनर्थकः। उच्यते, न वयं प्रयोजनवत्त्वाम् अप्रयोजनवत्त्वं वा विचारयामः, किम् एतस्माद्वाक्याद्गम्यते? इति परीक्षामहे, अस्माच्च वाक्यादिदं गम्यते, न यजुषा वत्सा

अपाक्रियन्ते, न पवित्रवति गौर्दुह्यते इति, तच्चास्य अप्रदेयत्वात् अप्राप्तं यजुः पवित्रं वेति।

विहितप्रतिषेधो वा ॥३७॥ (आ० नि० २)

अथवा, विहितस्यैव प्रतिषेधो द्रष्टव्यः, विहितं केषाञ्चित् यजुषा वत्सानपाकरोति, पवित्रवति गां दोग्धि इति, तस्य प्रतिषेधोऽर्थवानेव भवति इति।

वर्जने गुणभावित्वात्तदुक्तप्रतिषेधात् स्यात् कारणात् केवलाशनम् ॥३८॥ (अ० नि०)

अथ यदुक्तं, पयःप्रतिषेधे पयसा सिक्तं पयसा संसृष्टं च वर्ज्यते इति, तत्र ब्रूमः, युक्तं हि लोके यत्संसृष्टस्य वर्जनं, तदेव हि तत्र प्रतिषिध्यते, नित्यं ह्युपसर्जनीभूतं भोजने पयः प्रचरति, यत्र प्रचरति, तत्प्रतिषेधोऽर्थवान्, यत् न प्रचरति, तस्य ह्यप्रसङ्गात् प्रतिषेधोऽनर्थकः। ननु केवलमपि लोके पय उपभुज्यते। उच्यते, कारणात् केवलाशनं, व्रतमौषधं वा यस्य, स केवलं उपयुङ्क्ते, नत्वेतत् प्रचुरम्। तस्मात् प्रायेण गुणभूतत्वात् पयसः, पयोयुक्तमेव न भक्षयितव्यमित्येवमर्थः पयःप्रतिषेध उच्यते।

व्रतधर्माच्च लेपवत् ॥ ३९ ॥ (आ०)

अथ कस्मादायमन्यः परिहार उच्यते ?, व्रतवदेतत् द्रष्टव्यमिति, यथा ब्रह्मचारिणा मांसं न भक्षयितव्यमित्युक्ते दर्विगतमपि लेपं वर्जयन्ति, एवमिहापि पयो न

पातव्यमित्युक्ते पयसा क्षिप्तं पयसा संसृष्टं वर्जयिष्यन्ति इति।

रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ४० ॥

(आ० नि०)

न वा एष परिहारः। परिहारान्तरनिर्वृत्त्यर्थो वाशब्दः। कुतः ?। पुरुषधर्मत्वात् व्रतस्य, अदृष्टार्थं ब्रह्मचारिणो मांसाभक्षणं, तत्र तावदपि यो भक्षयति, यावति मांसरसमात्रं विदितं भवति, तस्यापि दोषः, न श्लेष्मप्रकोपादि किञ्चित् दृष्टमपेक्ष्यते, ननु पयःप्रतिषेधे तथा, तस्मात् पूर्व एव परिहार इति। (८।४।१० अ०)।

अभ्युदयेष्टौ दधिव्रतयोः प्रदेयधर्मानुष्ठानाधिकरणम्।

अभ्युदये दोहापनयः स्वधर्मा स्यात् प्रवृत्तत्वात् ॥ ४१ ॥

इदं समाम्नायते, वि वा एनं प्रजया पशुभिर्द्वयति वर्द्वयत्यस्य भ्रातव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति चेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, ये स्विष्ठास्तानिन्द्राय प्रदात्रे दधीवते येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय घृते चरुम् इति। घृते चरुन्दध्नश्चरुम् इत्येतदुदाहरणम्।

तत्रैषोऽर्थः सांग्रयिकः, किं सृते दधनि च इज्यार्थाः पर्यग्धर्माः कर्त्तव्या, उत न? इति। किं प्राप्तम्?। न कर्त्तव्या इति। कुतः?। अप्रदानार्थत्वात्, प्रणीतार्थे विधानात् अतुल्यत्वाच्च चरुणा न संसर्ग इति।

एवं प्राप्ते ब्रूमः, अभ्युदये निमित्ते योऽयं दोहो देवताया अपनीतः, स स्वधर्मा स्यात्, इज्यार्थाश्च तच्च पर्यग्दधिधर्माः कर्त्तव्याः। कुतः?। इज्यार्थमेव हि तत् पर्यग्दधि च प्रवृत्तं, यतश्चेज्यार्थम्, अतोऽस्येज्यार्थाः प्रवृत्ता एव धर्माः, तद्धर्माणां प्रवृत्तावस्ति कारणं, निवृत्तौ नास्ति।

ननु प्रणीतार्थे दधिपयसी विधीयेते। नेत्याह, वाक्यं हि तदा भिद्येत, चरौ देवतार्थे, चर्वर्थयोश्च दधिपयसोः। आह, ननु चरोरपि देवतासम्बन्धो दधिपयसोरपि तथा, न भविष्यति वाक्यभेद इति। नैवं शक्यं, विभागः कर्त्तव्य इति, पूर्ववाक्यं कृत्स्नं, त्रेधा तण्डुलान् विभजेत् इति। तदनन्तरं विभागविशेषपरमिदं भवति वाक्यं, ये स्थविष्ठाः, तानिन्द्राय प्रदात्रे दधीयुरु येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय सृते चरुम् इति। अत्राविशेषाद्दधिपयसोरपि विभागो वक्तव्यः। यदि च दधिपयसी विभक्तव्ये सती प्रणीतार्थेऽप्युच्येयाताम्, ततो भिद्येत वाक्यम्, अतो नैतयोः प्रणीतार्थे विधानम्। अविधीयमाने च समस्यर्थे प्रातिपदिकार्थो देवतया सम्भत्स्येते, वाक्यसामर्थ्यात्। उभे च दधिपयसी देवतया सम्भत्स्येते चरुणा सह, दधनि चरुरेको भाग इन्द्राय प्रदात्रे भवति इति। यथा

विभज्यमानेषु नानाद्रव्येषु उच्येत, रुक्मपात्र्यां समाहार्य्या मणयः, एको भागो देवदत्तस्य। रजतपात्र्यां सुवर्णं निहितम् अपरो भागो विष्णुमित्रस्येति सर्वं पात्रीभ्यां हौ भागौ गम्येते, विभागविशेषपरत्वाद् वाक्यस्य, प्राप्तयोश्च विभक्तत्वादनुवादश्च सप्तम्यर्थो गम्यते। एवमिहापि विभाग परत्वादेव वाक्यस्य, विभक्तत्वाच्च दधिपयसोरेको भाग इति गम्यते। अर्थप्राप्तत्वाच्च सप्तम्यर्थोऽनुवादो भविष्यति। तस्मात् प्रदानार्थे दधिपयसी। प्रदानार्थाश्च दधिपयसोर्धर्माः कर्त्तव्याः।

श्रुतोपदेशाच्च ॥ ४२ ॥ (यु०)

इतश्च प्रदानार्थे दध्नि पयसि च इज्यार्था धर्माः कर्त्तव्या इति। कुतः?। सिद्धवत् श्रुतोपदेशो भवति, [illegible] चरुं दधिचरुम् इति। स सत्सु धर्मेषु उपपद्यते, इतरथा श्रयणं न क्रियेत इति। तच्च सिद्धवच्छ्रुतोपदेशो नावकल्पेत। तस्मादपि पश्याम इज्यार्थाः दधिपयसोर्धर्मा कर्त्तव्या इति। (८।४।११अ०)।

पशुकामेष्टौ दधिपयसोः प्रदेयधर्मानुष्ठानाधिकरणम्।

अपनयो वार्थान्तरे विधानाच्चरुपयोवत् ॥ ४३ ॥ (सि०)

अस्ति पशुकामेष्टिः, यः पशुकामः स्यात् सोऽमावास्या

निष्टा वत्सानपाकुर्य्यात्। ये यज्ञेदिष्टास्तानन्वये सनिमतेऽष्टाकपालं निर्वपेद् ये मध्यमास्तान् विष्णवे शिपिविष्टाय सृते चरुं ये स्वविष्टास्तानिन्द्राय प्रदात्रे दधस्वरुम् इति। सृते चरुं, दधंस्वरुमित्येतदुदाहरणम्। अत्र सन्देहः; किं सृते दधनि चेज्यार्था दधिपयोधर्माः कर्त्तव्या उत न? इति। किं प्राप्तम्? पूर्वेणाधिकरणेन कर्त्तव्या इति, समाना हि श्रुतिर्भवति इति। सिद्धवच्च सृतोपदेशः सक्तु प्रदानार्थेषु धर्मेषु उपपद्यते।

एवं प्राप्ते ब्रूमः, अपनयो वा धर्माणां भवेत्। अर्थान्तरे श्रोतव्यो विधीयते, दधि च अयनार्थं, न प्रदानार्थं। सप्तमीसंयोगात् चरुपयोवत्। यथा प्रायणीये चरौ पयसि प्रदेयधर्मा न क्रियन्ते सप्तमीसंयोगात्, एवमिहापि।

लक्षणार्था श्रुतिः ॥ ४४ ॥ (आ० नि०)

अथ यदुक्तं सिद्धवच्छृतोपदेशो भवति इति। नैष दोषः। अयनेन द्रव्यं लक्षयिष्यति, अर्थप्राप्तं हि चरोरयनं, तत्सम्बद्धं लक्ष्यते, अयनवति द्रव्ये चरुरिति। तस्मात् प्रदेयधर्म्मा न भवेयुरिति। (९।४।१२अ०) ॥

ज्योतिष्टोमे श्रयणानां प्रदेयधर्माननुष्ठानाधिकरणम्।

श्रयणानान्त्वपूर्वत्वात् प्रदानार्थं विधानं स्यात् ॥ ४५ ॥ (पू०)

ज्योतिष्टोमे श्रूयते, पयसा मैत्रावरुणं श्रीणाति सक्तुभिर्मन्थिनं धानाभिर्हारियोजनं हिरण्येन शुक्रं आज्येन पात्नीवतम्। तत्र संशयः। किं श्रयणानां प्रदेयधर्मा भवन्ति, उत न? इति। कुतः संशयः?। यदि प्रदेयानि श्रयणानि, तत एषु प्रदेयधर्मा भवन्ति, अथ न प्रदेयानि, न भवन्ति इति। किं प्राप्तम्? प्रदेयानि प्रदेयधर्मैः सम्बध्येरन् इति। श्रयणाद्धि इयं जायते, पयोमिश्रश्च सोमो भवति, संमिश्रे च ह्रियमाणे पयोऽपि क्षीरेण सम्बध्यते। यदि पयोमिश्रश्च सोमो भवति, तत्र सोमस्य पयसा मिश्रमानस्य न कञ्चिदुपकारं पश्यामः, यागे तु उपकारो भवति निर्वृत्तिर्नाम। यदि क्षीरेण सम्भक्ष्यत इति मिश्रणाभिप्रायः, ततः उपकारकं मिश्रणं दृष्टेनोपकारेण, श्रुतो हि गुणवान् यागः प्रत्यक्षः पयसा निर्वर्त्यत इति। सोमोपकारः कल्प्यः स्यात्। तस्मात् पयसा सोमो मिश्रते, स मिश्रितः प्रयोगवचनेन कथं सम्बध्यत इति। न च प्राक्तं मिश्रणं केनचिद्द्रव्येण प्राप्तं, यच्चेदं द्रव्यान्तरं पयो विधीयते इति, अपूर्वत्वात् सोमस्य। तस्मात् प्रदानार्थस्य पयसो विधानं स्यात्। प्रदेयपयोधर्माश्चात्र कर्त्तव्या इति।

गुणो वा श्रयणार्थत्वात् ॥ ४६ ॥ (सि०)

वा शब्दः पक्षं व्यावर्त्तयति। गुणभूतं पयः स्यात् सोमस्य, न प्रदेयद्रव्यं, प्रदेयत्वे नाश्रवणात्, सोमार्थेन च श्रुतत्वात्।

अनिर्देशाच्च ॥ ४७ ॥ (यु० १)

न होमे प्रयोगवचनेन वा अस्य सम्बन्धः। अनिर्देश्यः परार्थत्वात्। न च, प्रत्यक्षेणापि पयस्त्यागे यागनिष्पत्तिः पयसा, प्रत्यक्षदेवतासम्बन्धो हि त्यागो यागः। न चात्र पयसो देवतासम्बन्धः, मैत्रावरुणं ग्रहं गृह्णाति इति वचनं, न मैत्रावरुणं पय इति। तस्मात् दृष्टोपकाराभावात् अदृष्टः सोममिश्रणे सोमसंस्कारोऽभ्युपगम्यते, तस्माच्च प्रदेयधर्मैः सम्बध्यत इति।

श्रुतेश्च तदप्रधानत्वात् ॥ ४८ ॥ (यु० २)

इतश्च सोमार्थं पयः। कुतः ?। श्रुतिर्हि सोमप्रधाना भवति, द्वितीयाविभक्तिः श्रूयते। तस्मात् श्रयणेन सोम एवेष्यत इति।

अर्थवादस्य तदर्थवत् ॥ ४९ ॥ (यु० ३)

अर्थवादश्च श्रयणस्य सोमार्थस्य भवति, स मिश्रोऽब्रवीत् पयसैव मे सोमं क्रीणन् इति, न हि भवति पयो मे दद्युः इति। कथं तर्हि ? सोमं पयसा संस्कुर्युः इति। तस्मादपि सोमार्थं श्रयणम्।

संस्कारं प्रति भावाच्च तस्मादथ प्रधानं स्यात् ॥ ५० ॥ (यु० ४)

संस्कारं प्रति अयणवचनं भवति, यत्र संस्काराः श्रूयन्ते तत्रेदं श्रूयते, पयसा मैत्रावरुणं श्रीणाति इत्येवमादि। तस्मात् संस्कारप्राये अवणादयमपि संस्कार एवेति गम्यते। भवति हि प्रायोवृत्त्या तद्बुद्धिः, यथाऽग्न्याप्राये लिखितोऽग्न इति गम्यते। तस्मात् प्रदेयधर्मेण सम्बध्यत इति। (८।४।१३ अ०)।

अश्वमेधे इज्यानाय परस्वत इत्यनेन यागान्तरविधानाधिकरणम् ॥

पर्य्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ५१ ॥ (पू०)

अश्वमेधे समामनन्ति, इज्यानाय परस्वत आलभेत इति। तत्प्रकृत्य श्रूयते, पर्य्यग्निकृतान् आरण्यानुत्सृजन्ति इति संशयः, किमारण्यानामालम्भ उत्सर्गार्थ एव, द्रव्योत्सर्गश्च अस्य किं कर्मशेषप्रतिषेधः, पर्य्यग्निकरणान्तैः संस्कृता उत्सृष्टव्याः ? इति। किं प्राप्तम् ? द्रव्योत्सर्गोऽयम्, आलम्भश्च उत्सर्गार्थ एवेति। कुतः ?। एवमुत्सर्गम् अप्राप्तं विदधत् तस्य सत्तां ब्रुवन् श्रुत्या वक्ष्यति, इतरथा उत्सर्गं प्राप्तमनुवदेत्। वाक्यार्थस्य प्रतिषेधस्य सत्तां ब्रूयात् प्रत्ययः। श्रुतिश्च वाक्याद् बलीयसी। एवञ्च सति देवतासम्बन्धो

इत्ये, ईशानमुद्दिश्य परस्तात् आलब्धव्याः, पर्य्यग्निकरणं कृत्वा त्वालब्धा इति । उपधानवत्, यथा, एतत् खलु वा-क्षादनं य एष चरुर्य एनं चरुमुपदधाति इत्युपधानार्थमेव वरोरुपादानम्, एवमिहापि उत्सर्गार्थ एवालब्धो भवि-थति ।

शेषप्रतिषेधो वाऽर्थाभावादिड़ान्तवत् ॥ ५२ ॥ (सि०)

कर्मशेषप्रतिषेधो वाऽस्मिन् वाक्य उच्यते । कुतः ? । अर्थाभावात्, ईशानाय परस्तात आलभेत इत्यस्य वाक्यस्य न कश्चिदर्थो भवेत्, यदुत्सर्गार्थं आलब्धः स्यात् । कथम् ? । आलब्धकाल एवाध्वर्युर्ब्रूयात् नेमे ईशानाय दास्यन्त इति, तस्यैवं जानतो नैवं सङ्कल्पो भवति, ईशानाय दातुं गृहीतव्या इति । अप्रकार्थत्वादनर्थकमिदं वाक्यं भवति । स एष सङ्कल्प एवमवकल्पते यदीशानाय दातव्याः । तस्मा-दालब्धवचनेन शब्देन दानमेव विधीयते इति गम्यते । यदा च दानं विधीयते, तदा पर्य्यग्निकृतानुत्सृजन्तीत्युत्सर्गमनूद्य, एवमुत्सृजन्तीति विशेषविधानार्थं भवति शास्त्रम् ।

कथं पुनरत्र विशेषो विधीयते, किं कालः पर्य्यग्नि-करणे, एतस्मिन् काले उत्सृजन्तीति । नेत्याह, नाव-कालवचनः शब्दः श्रूयते । काले च विधीयमाने कालान्तरं प्रतिषिध्यते न अङ्गान्तराणि । अथ किं पर्य्यग्नि-करणवदुत्सर्जनमपि कर्तव्यमिति ? । तदपि नास्ति, न ह्यत्र पर्य्यग्नि-करणभावना क्रीयते । तस्माच्च सत्यां पर्य्यग्निकरणात्

प्राप्तः परार्थार्थाः सर्वे प्रतिषिध्येरन्। कथं तर्हि ? निर्दृष्टे पर्यग्निकरणे उत्सृष्टव्यः इति। किमेतस्यामवस्थायामिति ?। नेत्याह, चोदकादेवैतत् प्राप्तम्, एतदवस्थं पशुवत्सर्जनीय इति। अवस्थान्तरप्रतिषेधस्य चानायं शब्दो वाचकः। चोदकप्राप्ते हि काले उत्सृज्यमाने कृतपर्यग्निकरण एवासौ भवति। यदि तु अवस्थायाः प्रतिषेधः स्यात्, पर्यग्निकरणादूर्ध्वं उत्सर्गात् प्राक् पदार्थाः प्रतिषिध्येरन्, न परार्थाः। कस्तर्ह्यर्थः ?। पर्यग्निकरणं कृते यादृशो भवति तादृशस्यार्थ इति। ननु चोदकेनैतदृष्टोऽसौ प्राप्तः। उच्यते, पुनरस्यैतद्वचनमनूद्यते, अङ्गान्तरपरिसङ्ख्यानार्थम्, एतैरेव अङ्गैरङ्गवानुत्सृष्टव्यः। एवं चोदकप्राप्तानि परिसङ्ख्यायन्ते, नान्यानि अङ्गानि भवन्तीति कथमेष शब्द एवं परिसङ्ख्यातुं शक्नोति इति चेत्। शक्नोतीति ब्रूमः, कथम् ? प्रत्यवेक्ष्य वाक्येन तैरङ्गैर्निराकाङ्क्षे कृते प्रधाने शेषैरङ्गैः सह चोदकेन परोक्षा एव वाक्यता न भविष्यति इति। तस्मात् कर्मशेषप्रतिषेध इति

पूर्ववत्तु शब्दस्य संस्थापयतीति चाप्रवृत्तेर्नोपपद्यते ॥ ५३ ॥ (यु०१)

पूर्ववांश्च भवति शब्दो यागप्रवृत्तिपूर्वकः, आज्येन शेषं संस्थापयति इति। यदि याग एव प्रारब्धस्तं संस्थापयतीति समाप्तिसादृश्यादुपपद्यते। यागस्य हि द्रव्ययागान्तरं समाप्तिः सदृशम्। यदि हि पूर्वो न यागः प्रवृत्तः स्यात् उत्सर्गमात्रं, न तस्य यागः समाप्तिः सदृशं

स्तच्च संख्यापयतीति नोपपद्यते। तस्मादपि शेषकर्म-प्रतिषेधः।

प्रवृत्तेर्यज्ञहेतुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात् तत्कारितत्वाद् यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ॥ ५४ ॥ (यु० २)

इदं प्रयोजनसूत्रम्। यदि द्रव्योत्सर्गो विधीयते ततः संस्काराणामकर्म स्यात्। कुतः?। संस्कार प्रवृत्तेः यज्ञहेतुत्वात्। तत् प्रतिषेधे यज्ञाभावे किमिति संस्काराः क्रियेरन्, यज्ञकारिता हि ते। यथा प्रयाजाभावे तदर्थ-माज्यं न गृह्यते, ग्रहणमाज्यस्य न क्रियते, अप्रयाजास्तो अननूयाजा इति यच्च श्रूयते तत्र प्रयाजाभावे तदर्थमाज्यं न गृह्यते, एवमिहापि संस्कारा न कर्त्तव्या इति।

क्रिया वा स्याद्वच्छेदात्कर्म सर्वहानं स्यात् ॥ ५५ ॥ (आ० नि०)

यदा तु कर्मशेषप्रतिषेधपक्षस्तदापि किं न कर्त्तव्याः संस्काराः? इति। नैतदेवं, क्रिया स्याद्वच्छेदपक्षे, यागो हि तदा भवति। तस्मात् सर्वे यागपदार्थाः कर्त्तव्याः। यदि न यागो भवेत् ततः अकर्म, संस्काराणां सर्वहानं स्यात्, यागस्तु तदा भवति। तस्मात् कर्मशेषप्रतिषेधपक्षे सर्वं कर्त्तव्यम् इति। (८।४।१४ अ०)।

आज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानाधिकरणम्।

आज्यसंस्थाप्रतिनिधिः स्यात् द्रव्योत्सर्गात् ॥ ५६ ॥ (पू०)

पर्य्यग्निकृतं पात्नीवतमुत्सृजति इति प्रकृत्य श्रूयते, आज्येन शेषं संस्थापयति इति। तत्र सन्देहः, किमाज्यं पूर्वस्मिन् प्रतिनिधीभूतम्, अथ वा आज्यद्रव्यकं पूर्वस्मात् कर्मान्तरं विधीयते? इति। किं प्राप्तम्? प्रतिनिधिरिति। कुतः?। पात्नीवतमिति द्रव्यम् उच्यते, उत्सृजतीति तत्रैवोत्सर्गः श्रूयते। शेषमित्युपयुक्तेतरत् विद्यमानं गम्यते, तत् आज्येन संस्थापयति इति पशोः कार्ये आज्यं श्रुतं भवति इति। ननु पूर्वकर्म परिसमाप्तमित्युक्तम्। अत्रोच्यते, द्रव्योत्सर्गवचने प्रत्यक्षे, शेषशब्दे वाऽपरिहृते पुनरसमाप्तं पूर्वकर्मेत्याशङ्क्यते, तस्मात् प्रतिनिधीयते आज्यमित्याशङ्कामहे। संस्थापयति इति च अपूर्वे नोपपद्यते।

इत्याशङ्कामहे,

समाप्तिवचनात् ॥५७॥ (२ यु०)

समाप्तिवचनमिदं भवति, संस्थापयति इति, तेन मन्यामहे, यत् पूर्वं पशुना आरब्धं तदुत्सृष्टे पशावाज्येन परिसमाप्यते इति। अपूर्वस्यात्र कर्मणः उच्यमानस्यारम्भ एव वक्तव्यो भवति, यतश्चनभिधायारब्धं परिसमाप्ति-

रेवोच्यते, ततोऽवगच्छामः, पूर्वस्येव परिसमाप्तिर्नापूर्वकर्म चोद्यत इति ।

चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् ॥ ५८ ॥ (सि०)

कर्मान्तरचोदना वा । कुतः ? । पूर्वस्य कर्मणः परिसमाप्तत्वात् । ननूक्तं द्रव्योत्सर्गे शेषवचने वाऽपरिच्छिते पूर्वकर्मणोऽसमाप्तिराशङ्किता भवति । अत्रोच्यते, इदं द्रव्यमपि परिच्छियते, संख्यापयति इति प्रकृतेन पाक्षीवतशब्देन सम्बध्यते, तत्रायमर्थः, पाक्षीवतं संख्यापयति इति, स एष यागो विधीयते । संपूर्वश्च ख्यापयतिः प्रयुज्यते, अवश्यं कस्मिंश्चातुः पूर्वो भावनावचनस्य प्रयोक्तव्य इति तत्राविरुद्धो भावनायामुच्यमानायामर्थप्राप्तः संख्यापयतिरालभतिरिव प्रयुज्यते । शेषशब्दश्चैवं साहचर्यात् प्रयुज्यते । द्रव्योत्सर्गाविरुद्ध एव यागे उच्यमाने, तस्माद् यथाऽन्ये निर्वपत्यादयः कर्मान्तरविधाने भवन्ति, एवं तैरविशिष्टत्वात् संख्यापयतिरपि भवितुमर्हति इति ।

अनिज्याच्च वनस्पतेः प्रसिद्धां तेन दर्शयति ॥ ५९ ॥ (यु०)

प्रसिद्धां वनस्पतेः अनिज्याम्, अत एव पठति । कथम् ? । यत् त्वष्टारञ्च वनस्पतिमावाहयस्यथ वैनो यक्ष्यसि त्वाष्ट्रा नवमो प्रयाजेज्या वानस्पत्या दशम्यश्चैवेताविष्टौ विद्यात् इत्यङ्गान्तरेणानुग्रहं ब्रुवन् वनस्पतीज्याया

अभावं दर्शयति, शेषपरिसमाप्तौ सत्यां वनस्पतिं जुहोति इति। अथ परिसमाप्तं पूर्वं कर्म, ततो लुप्ता स्यात्, तत्राभावदर्शनमुपपद्यते। तस्मात् पूर्वकर्म परिसमाप्तम्, इदमपि कर्मान्तरम् इति।

संस्था तद्देवतत्वात् स्यात् ॥ ६० ॥ (आ० नि०)

अथ यदुक्तं, संस्थापयति इति च अपूर्वे नोपपद्यते इति, तत् परिहर्त्तव्यम्, अत्रोच्यते, असंस्थाता संस्थावचनमेतत्, तदपि पूर्वं पाक्षीवतमिति समानदेवत्वात् समाप्तिसादृश्यं ज्ञायते, तत्र तत्पाक्षीवतमारब्धमिह परिसमाप्तमिति। स एष सादृश्यात् संस्थापयतीति शब्दोऽवकल्पत इति। (८।४।१५ अ०)।

इति भट्टश्वरस्वामिनः कृतौ मीमांसाभाष्ये नवमस्य अध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः। शुभमस्तु।

मीमांसा-दर्शने

१० अध्याये १ पादः ॥

विकृतौ लुप्तार्थानां प्राकृतानां बाधाधिकरणम्।

(प्रथमवर्षकम्)

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् ॥ १ ॥ (पू०)

अहो खलु, बाधाभ्युच्चयमिदानीं वर्त्तयिष्यामः।

बाधो नाम यदेवेदमिति निश्चितं विज्ञानं, कारणान्तरेण मिथ्येति कथ्यते । तथा अभ्युच्चयो यत् इदमिह भवति इति विज्ञायते, अपरमपि भवति इति विज्ञानम् । तत्रायमर्थः प्रथमं परीक्ष्यते, किं सर्वं प्राकृतं विकृतौ कर्त्तव्यम्, उत किञ्चिदाध्यते ? इति । किं तावत्प्राप्तम् ? विधेः प्राकृतस्य प्रकरणान्तरे विकृतौ यतो भवत्यविशेषेणातिदेशः, अतो यच्च यावच्च प्राकृतं धर्मजातं तत्सर्वं विकृतौ कर्त्तव्यं, यदप्यर्थलुप्तम् । कुतः ? । वचनेन ह्येतत् सर्वं प्राप्यते, न च वचनस्यातिभारोऽस्ति प्रापयतः । कथं वचनमिति गम्यते ? । सर्वास्वेव वैकृतीषु देशनासु प्राकृतं धर्मजातम् अपेक्ष्यते वाक्यशेषत्वेन, तथैव प्राकृत्यां देशनायामनुषज्यते, एवं वैकृत्यामपि । न कश्चिद्विशेषोऽस्ति । तत्र यथा कृष्णलानां पाकोऽप्राकृतार्थोऽपि वचनप्रामाण्यात् क्रियते, एवमवहन्त्यादि अप्राकृतार्थमपि सर्वं कर्त्तव्यमिति ।

अपि वाभिधानसंस्कारद्रव्यमर्थं क्रियेत तादर्थ्यात् ॥ २ ॥ (सि०)

अपि वा इति पक्षव्यावृत्तिः । नैतदस्ति, सर्वं प्राकृतं विकृतौ कर्त्तव्यमिति, क्वचित् अभिधानसंस्कारद्रव्यं निवर्त्तितुमर्हति यल्लुप्तार्थम् । कुत एतत् ? । अभिधानसंस्कारद्रव्यं हि प्रयोजने सति क्रियते, नाप्रयोजनम्, अन्यस्मै प्रयोजनाय तदाम्नायते न स्वार्थम् ।

ननु चोक्तं लुप्तार्थमपि क्रियते वचनप्रामाण्यात्यथा कृष्णलेषु पाकः । नेत्याह, नास्ति लुप्तार्थस्य देशकं वचनम् ।

न वैकृतं कर्म प्राकृतैरङ्गपदार्थैः सहैकवाक्यतां याति, नैवं विज्ञायते, यागेन फलं कुर्य्यात्, कथम्? प्राकृतैरङ्गैरिति, कथन्तर्हि, यथा प्राकृतेन यागेन फलं साधितुमभूत् तथा इति। कुत एतत्?। यागगतो हि व्यापारविशेषस्तेनापेक्ष्यते, न व्यापारमात्रं, यागगतश्च व्यापारः प्राकृते यागे प्रयोगवचनेन कल्पितः, सङ्गृहीतश्च विद्यते, स शक्योऽपेक्षितुम्। स चाकाङ्क्षितो निराकाङ्क्षञ्च शक्नोति कर्त्तुमिति। अङ्गेष्वपेक्ष्यमाणेषु न यागगतो विकृतो व्यापारविशेषः कल्पः स्यात्। इतरथा लक्षणा स्यात्। यथा दण्डेन युध्यते इति वचने न दण्डिरूपं शब्देनाभिहितम्। यदि तु तेन लक्षितेन प्रयोजनं स्यात्, शक्यते तेन लक्षयितुं, एवमिहाप्यङ्गवत्त्वं यागगतो विशेषो नाङ्गेष्वपेक्ष्यमाणेषु शब्दाभिहितो भवति, लक्षणया तु कल्प्यते, लक्षणायाञ्च शब्दो बाध्येत। अथ शब्दो मा बाधीति यागगतो विशेषो नैवापेक्ष्येत, अङ्गान्येवापेक्ष्येरन्। ततः, कथमिति इतिकर्त्तव्यताविशेषं प्रति वैकृतस्य कर्मणश्चोदकशब्दोऽनिवृत्ताकाङ्क्ष एवावतिष्ठेत, अङ्गैरपि च अपरा इतिकर्त्तव्यता आकाङ्क्ष्यात, गम्यमाना च प्राकृतयागेतिकर्त्तव्यता उत्सृज्येत प्राकृतानाञ्च अङ्गानां प्रकरणेऽर्थवतां दुर्लभो वैकृतेन कर्मणा एकवाक्यभावोऽप्युपगम्येत। सर्वं चैतदन्याय्यम्। तस्मादेवमभिसम्बन्धः क्रियते, यथा प्राकृतेन यागेन फलं साध्यते, तथैवैतेनापि इति।

किमतो यद्येवम्? एतदतो भवति, प्राकृतान्यङ्गानि यस्मै प्रयोजनाय प्रकृतौ भवन्ति, नासति तस्मिन् प्रयोजने

विकृतौ चोदितानि भवन्ति। तस्मात् लुप्तप्राकृतप्रयोजनं न चोदकश्चोदयति इति।

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥ (सा० नि०)

अथ यदुक्तं; यद्वा क्षणलेषु लुप्तप्राकृतप्रयोजनोऽपि पाको वचनप्रामाण्यात् क्रियते, एवमन्यदपि क्रियेतेति। तत्र, न हि क्षणलेषु पाकश्चोदकेन प्राप्नोति, प्रत्यक्षं हि तत्र वचनं, हुते अपयति इति। न तत् प्राकृतप्रयोजनं पाकमाह, तत्र वचनप्रामाण्याददृष्टार्थः पाकः। यदि च तत्र प्रत्यक्षवचनं नाभविष्यत्, तेषामप्रत्यक्षविशिष्टत्वात् पाकोऽपि नाभविष्यदेव। तस्मादनुपवर्णनं पाकवदिति।

किं भवति प्रयोजनम्? कृतरङ्गा वेकृतमुदाहियते? इति। क्वचित् श्रूयते, स्वयंदितं बर्हिर्भवति इति। तत्र प्राकृतं द्रव्यं निवर्त्तते। स्वयंकृता वेदिर्भवति इति उद्धान खनन-परिलेखनानि निवर्त्तन्ते। स्वयंशीर्णा शाखा भवति इति असिद्रव्यं निवर्त्तते, मन्त्राश्चेषु निवर्त्तन्ते। वर्णकम्।

एवं वा,

क्षणलेऽवहन्तिबाधाधिकरणम्।

द्वितीयवर्णकम्

विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् ॥ १ ॥ (पू०)

इति। अस्ति प्राजापत्यश्चरुः, प्राजापत्यं चरुं निर्वपेत् शतकृष्णलमायुष्कामः इति। तत्रैतद्विशिष्टमुदाहरणमङ्गीकृत्य एतदेव सर्वं चिन्त्यते, किं कृष्णलेष्ववहन्ति कर्त्तव्यः, न? इति। विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् इति पूर्वः पक्षः, कर्त्तव्यः, यथा तेषामेव पाक इति।

अपिवाऽभिधानसंस्कारद्रव्यम् ॥ २ ॥ (सि०)

इति सिद्धान्तो, न कर्त्तव्य इति।

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥ (आ० नि०)

दृत्युपवर्णनापरिहारः। २ वर्णकम्।

एवं वा,

वैष्णवैवे चरौ विष्णोरावाहनस्याधिकरणम्।

तृतीयवर्णकम्।

वैष्णवैवं चरुं निर्वपेद् भ्रातृव्यवांस्तं बर्हिःपदं कृत्वा ग्राम्यया स्फ्येन व्यूहेदिदमहममुष्मामुष्य व्यूहामीति यं द्विष्यात् तं ध्यायेत् यदधोऽवमृशेत यच्च स्फ्या आस्थिश्येत तद्विष्णव उरुक्रमायावद्येत् इति। तत्र संशयः, किं विष्णुरुरुक्रम आवाहयितव्यः, उत न? इति। किं प्राप्तम्?।

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥१॥

(पू०)

आवाहयितव्यः। ननु स्त्री कदाचिद्वा आश्लिष्येदपि, न वाऽधोऽवमृद्येत, तत्रावाहनं कृतम् अनर्थकं स्यात्। न च, वचनबलादाश्लेषयितव्यम् अवमर्दयितव्यं वा, न ह्युपादेयत्वेनाश्लिष्टमवमृदितं वा श्रूयते। न च विष्णोरुरुक्रमस्य यागो अर्थकर्म, किन्तर्हि, आश्लेषणेनावमर्दनेन च लक्षितम् अनेन प्रकारेण आहवनीये प्रतिपाद्यते, तथा हि दृष्टमपनयने तस्य प्रयोजनं भवति स्फ्यादिसंशोधनं, इतरथा हि यागाददृष्टं कल्प्येत। ननु यागादृष्टमवश्यं कल्पनीयं, द्रव्यप्रतिपादनद्वारं तत्।

अत्रोच्यते, लुप्तार्थमपि कर्त्तव्यं, यथा कृष्णले चरौ पाकः। अपि च कदाचिदाश्लिष्येत, अधश्चावमृद्येत, तत्रान्तरिते आवाहने वैगुण्यमापद्येत। तत्राप्रमाद्यद्भिरावाहयितव्या देवता, यर्हि स्फ्या आश्लिष्यते अधश्चावमर्द्यते, न आवाहनमङ्गम् अन्तरा ईप्यते, स्वकाले हि आवाहनेन देवता स्मर्यमाणा साध्वी भवति इति, न स्वकालोत्तरकाले, तत्र हि अर्थप्राप्तममन्त्रकं स्मरणम्। अथ स्फ्यो नोपश्लिष्यते न वाऽधोऽवमर्द्यते तदा कृतेष्वावाहने न किञ्चित् दुष्यति। नैवं मन्तव्यं, यथा राजा प्रमाद्यो वा ब्राह्मणो वा परिचरितुं निमन्त्रितः आहूतः प्रपरिचर्यमाणो विमानितमात्मानं मन्यमानो अपचरि-

अतीत्याग्रहणते, एवं देवताऽपि इति, न तत्र देवता आहूयते आहूता सती हविरुपयोक्ष्यते, तर्पयति च। तस्मा प्रसक्ष्यति, प्रसन्ना सती फलेन संयोक्ष्यति इति तदेतत्रवमे सिद्धम्। तस्माद्र दोषः, आवाहितायामनिज्यमानायाम्।

अपि वाभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥ २ ॥ (सि०)

अपि वेति पक्षव्याहृत्तिः, एषोऽभिधानसंस्कारो निवर्त्तते। कुतः ?। अभिधानसंस्कारो द्रव्यं वा सति प्रयोजने क्रियते नान्यथा, तदर्थितम्। यदप्युक्तं, कदाचित् स्खलेत अवस्खलेत वा, तथावाहनं नान्तरा दृश्यते इति। नैष दोषः, अन्तरितमेतदनन्तरितेनैव तुल्यं, यदा आवाहनस्य कालो, न तदा उपक्रमयागस्य निमित्तमापतितम्, आपतिते हि निमित्ते तस्य प्रयोगो भविष्यति। न ह्यनाम्नातम् अनवरुद्धं वा तत्र प्रतिपादयितव्यं, न चारब्धे प्रयोगे क्रतमुपकारकं भवति। तस्माद् विष्णुक्रमो नावाहयितव्य इति।

तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥ (आ० नि०)

इत्युपवर्णनापरिहार उक्तः। ३वर्णकम्। (१०।१।१५०)

दीक्षणीयादिषु आरम्भणीयाबाधाधिकरणम्।

दृष्टिरारम्भसंयोगाद्दग्भूतान्निवर्त्तेतारम्भस्य प्रधानसंयोगात् ॥ ४ ॥

अस्ति ज्योतिष्टोमो ज्योतिष्टोमेन स्वर्गकामो यजेत इति। तत्र दर्शपूर्णमासप्रकृतिकानि कर्माणि दीक्षणीयादीनि आग्नावैष्णवमेकादशकपालं निर्वपेत् इत्येवमादीनि। अस्ति तु प्रकृतौ आरम्भणीयेष्टिः आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारभमाणः सरस्वत्ये चरुं सरस्वते द्वादशकपालमन्वये भगिने अष्टाकपालं निर्वपेद् यः कामयेत भग्यन्नादः स्याम् इति। नित्यवदेके भगिनमामनन्ति। तत्र सन्देहः, किं दीक्षणीयादिषु आरम्भणीया कर्त्तव्या, उत न? इति। किं प्राप्तम्?, सर्वं प्राकृतं विकृतौ कर्त्तव्यं, विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् इति।

एवं प्राप्ते ब्रूमः, इष्टिरारम्भणीया ज्योतिष्टोमाङ्गभूतात् दर्शपूर्णमासप्रकृतिकादीक्षणीयादेः कर्मराशेर्निवर्त्तते। किंकारणम्?। योऽत्रारम्भः स ज्योतिष्टोमस्य न दीक्षणीयादेः। कुतः?। आरम्भो हि प्रथमः पदार्थः, स्यात्, प्रथमं वा पुरुषस्य प्रवर्त्तनम्?। यदि प्रथमः पदार्थः, स ऋत्विगानमनं देवयजनजोषणं वा, तदिह ज्योतिष्टोमस्याङ्गं क्रतोरर्थेन क्रतं स दीक्षणीयादीनामर्थं साधयति, न पुनस्तेषां कर्त्तव्यं, लुप्तमेव तत्। तस्मिन् लुप्ते आरम्भे तल्लिङ्गार्थो धर्म आरम्भणीयाख्यो

लुप्येत। अथ प्रथमप्रवर्त्तनम् आरभ्यः, औदासीन्यात् व्याहृत्तिः, पुरुषस्य व्याहृतता, तदा ज्योतिष्टोमं साङ्गं कर्त्तुम् असावौदासीन्यात् व्याहृतो ज्योतिष्टोमिकेन प्रथमेन पदार्थेन, स ततः प्रभृति आ-साङ्गज्योतिष्टोमसमाप्तेः व्याहृत एव न पुनरुदासीनो भवति, यतो व्याहृतो भवति। साङ्गज्योतिष्टोमारम्भेणैव प्रहृतो दीक्षणीयादिरिति लुप्यत एवैषामारम्भः, तस्मिन् लुप्ते आरभ्यणीयापदार्थं आरभ्यसिद्ध्यर्थो लुप्येत।

ननु अङ्गभूतस्य दीक्षणीयादेरन्य आरम्भो जातः। नित्याङ्ग, ऋत्विगानयनं देवयजनजोषणादि वा प्रथमं वा पुरुषस्य प्रवर्त्तनम् आरम्भः, प्रथमश्च प्रहृतोऽसौ ज्योतिष्टोमार्थमेव। अथायमन्यः प्रथमः पदार्थो दीक्षणीयादेर्जात इत्युच्यते। तथापि न तस्यारभ्यणीया प्रकृतावुक्तेति तस्मादङ्गभूतात् पदार्थादारभ्यणीया निवर्त्तेत। अपि च दीक्षणीययैव ज्योतिष्टोमे आरभ्यार्थः सिध्यति, एवं हि श्रूयते, आग्नावैष्णवमेकादशकपालं निर्वपेत् दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवतास्वेव यज्ञस्वारभते अग्निः प्रथमो देवतानां विष्णुः परमो यदाग्नावैष्णव मेकादशकपालं निर्वपति देवतास्वेव यज्ञस्वोभयतः परिगृह्यावरुन्धे इति। (१०।१।२५०)।

अनुयाजादिषु आरभ्यणीयाबाधाधिकरणम्।

प्रधानाच्चान्यमंयुक्तात्सर्वारम्भान्निवर्त्तेतानङ्गत्वात्॥ ५॥

अस्ति राजसूयः, राजसूयेन स्वाराज्यकामो यजेत इति। तत्रेष्टिपशुसोमदर्विहोमाः प्रधानभूताः। ऐष्टिकेष्वनुमत्यादिषु संशयः, किं आरभ्यणीया कर्त्तव्या, न? इति। किं प्राप्तम्?, कर्त्तव्या, विधेः कारणान्तरेऽतिदेशात् सर्वकर्म स्यात् इति।

एवं प्राप्ते ब्रूमः, प्रधानाच्च अपरप्रधानसंयुक्तान्निवर्त्तितुमर्हति। कुतः?। सर्वारम्भार्थेन तत्र ज्योतिष्टोमः समाम्नायते, अग्निष्टोमं प्रथममाहरति इति। स प्राकृतानां प्रधानानामेकैकस्य तन्त्रेण समाम्नातो भवितुमर्हति, एकैकस्य चात्र प्रधानस्य तन्त्रेण साधारणं प्रकरणं, तेनानुमत्यादीनाम् आरम्भार्थे सिद्धे न आरभ्यणीया भवितुमर्हति इति। (१०। १। ३ अ०)।

आरभ्यणीयायां आरभ्यणीयाबाधाधिकरणम्।

तस्यां तु स्यात् प्रयाजवत् ॥ ६ ॥ (पू०)

अस्त्यारभ्यणीया इष्टिः, आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारभमाणः सरस्वत्यै चरुं सरस्वते द्वादशकपालं अग्नये अग्निनेऽष्टाकपालं यः कामयेत भग्यन्नादः स्याम् इति नित्यवदेके अग्निनामनन्ति। तत्रेषोऽर्थः सांयत्रिकः, किमारभ्यणीयायामारभ्यणीया कर्त्तव्या, उत न? इति। किं प्राप्तम्? तस्यां तु स्यात् प्रयाजवत्। संशयनिवृत्त्यर्थं तुशब्दः, न खलु संशयोऽस्ति, आरभ्यणीया-

यामारभ्यणीया भवितुमर्हति। कुतः ?। विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् इति, यथा प्रयाजा एवमारभ्यणीयापि इति। आह, ननु तस्या अप्यर्थे अन्या आरभ्यणीया, तस्या अप्यर्थे अन्या आरभ्यणीया, तस्या अप्यर्थेऽन्येत्येवमारभ्यणीया न व्यवतिष्ठेत। व्यवस्थितेन च शास्त्रार्थेन भवितव्यम्। अत्रोच्यते, सर्वास्वेव अनवस्थासु सामर्थ्येन व्यवस्था भविष्यति।

नवाङ्गभूतत्वात् ॥ ७ ॥ (सि०)

नवेति पक्षः प्रतिषिध्यते, न स्यादारभ्यणीयायामारभ्यणीया इति। कुतः ?। अङ्गभूता हि सा दर्शपूर्णमासयोः, अङ्गभूतस्य च प्रधानारम्भेणैव सिद्धिरित्युक्तम्।

आरभ्यणीयाप्रवृत्तेन दर्शपूर्णमासौ कर्त्तव्यौ, अतः प्रकृतिवदारभ्यणीयापि आरभ्यणीयाप्रवृत्तेन कर्त्तव्येति, तस्मात् किल आरभ्यणीयायामारभ्यणीया स्यात्। तच्च नैवं, अकृत्वाप्यन्यामारभ्यणीयामारभ्यणीयां कुर्वन्नारभ्यणीयाप्रवृत्त एव करोतीति गम्यते। तस्मान्नारभ्यणीयायामारभ्यणीया स्यात्। अपि च जलबुद्बुदवत् अव्यवस्था आरभ्यणीयायां वाक्येन गम्यमाना सामर्थ्येन बाध्येत। अस्मत्पक्षे नाव्यवस्था न बाधः, तस्मान्नारभ्यणीयायामारभ्यणीया इति।

एकवाक्यत्वात्त ॥ ८ ॥ (यु०)

इतश्च पक्षामः एवमेवेति। कुतः ?। एकं ह्येतद् वाक्यं

यदा आरभ्णीयां विदधाति, तदा नासौ दर्शपूर्णमासयोर्विहिता, ताम् अविहितामिव दर्शपूर्णमासयोर्विदध्यात्, विहितामिव चारभ्णीयायामतिदिशेत्, नैतत् कर्त्तुमलं भवति सकृदुच्चरितम्। तस्मादप्यारभ्णीयायामारभ्णीया नास्ति। (१०।१।४ अ०)।

खलेवाल्यां यूपाहुतिबाधाधिकरणम्।

कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्त्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ६ ॥

तस्मिन्नेव ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्रेदमाम्नायते, यूपमच्छेष्यता होतव्यं न हि दीक्षितस्याग्नौ जुहोति आज्यं चारणिं चादाय यूपस्यान्तिके अग्निं मथित्वा यूपाहुतिं जुहोति इति। साग्रयणे श्रूयते, खलेवाली यूपो भवति इति। तत्रैषोऽर्थः सांग्रयणिकः, किं साग्रयणे खलेवाल्यां यूपाहुतिः कर्त्तव्या, न? इति। किं प्राप्तम्?, कर्त्तव्या, विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् इति।

एवं प्राप्ते ब्रूमः, कर्म च एतत् द्रव्यसंयोगार्थं यूप एवमादिभिः संस्कारैः भविष्यतीति क्रियते, यूपं प्राप्नुमेषत एतच्छ्रूयते, तेनास्य संस्कारस्य श्रुतिसंयोगेन यूपार्थता। अच्छशब्दो हि प्राप्नुमित्यर्थे वर्त्तते, न चात्र यूपेन प्रयोजनम्, अयूपे हि खलेवाल्यां पशुर्बध्यते, तस्मात् तत्र यूप-

करणार्था यूपाहुत्यादयः संस्कारा अर्थलोपाश्रिवर्त्तितुमर्हन्ति इति। तस्मान्नास्ति खलेवाल्यां यूपाहुतिरिति। (१०।१।५ अ०)।

साद्यस्क्रं स्थाखाहुतिबाधाधिकरणम्।

स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत ॥ १० ॥ (पू०)

तस्मिन्नेवाग्नीषोमीये पशौ त्रयूपते, स्थाणौ स्थाखाहुतिं जुहोति इति। ततः साद्यस्क्रेऽयमर्थः सांशयिको भवति, किं साद्यस्क्रे स्थाखाहुतिः कर्त्तव्या, न? इति। तत्र एतत्तावत्परीक्ष्यं, किमारादुपकारकं कर्म स्थाखाहुतिः, उत यूपसंस्कारः इति। यद्यारादुपकारकं कर्म तदा कर्त्तव्या, अथ यूपसंस्कारो निवर्त्तेत इति। कथमारादुपकारकं कर्म स्यात्, कथं वा यूपसंस्कारः? इति। यद्येवमभिसम्बन्धः क्रियते, यूपमच्छेष्यता स्थाखाहुतिः कर्त्तव्येति, ततो यूपसंस्कारः। अथ यूपमच्छेष्यतेति प्रकृतेन न सम्बध्येत, तदा आरादुपकारकं कर्मेति। किन्तावत्या प्रम्?। आरादुपकारकं कर्मेति। एतद्विज्ञातं कर्मणा प्रयोजनं, भूतं हि तावद् भव्यार्थमिति।

अपि च निवृत्तप्रयोजनेन स्थाणुना सम्बध्यमाना आहुतिः किमिव यूपस्य उपकरिष्यति? सम्बद्धे हि क्रियमाणं सम्बन्धिनि उपकुर्यात्, व्यावृत्तो हि यूपात् स्थाणुः। अपि च

तन्नमेकादशिन्यां यूपाहुतिर्भविष्यति, यदारादुपकारकं कर्म स्यात्, तथा हि नाशुतोऽभ्यासः कल्पयिष्यते। अपि च अविशिष्टेन वाक्येन स्थाणौ स्थाखाहुतिः श्रूयते, सा च प्रकरणेन यूपवचनस्थाणुविशेषे कल्प्येत। तस्मादारादुपकारकं कर्म स्थाखाहुतिः सायस्के च कर्त्तव्या चोदकानुग्रहायेति। एवं प्राप्तम्। एवं प्राप्ते ब्रूमः,

अपि वा शेषभूतत्वात् तत्संस्कारः प्रतीयेत ॥ ११ ॥ (सि०)

अपि वेति पक्षव्यावृत्तिः। यूपसंस्कारः प्रतीयेत। कुतः ?। प्रकरणविशेषात् यूपमच्छेष्यतः स्थाखाहुतिर्विधीयत इति गम्यते, यो हि मन्यते अविशिष्टेन वाक्येन स्थाणुदेशमात्रे विधीयत इति, फलं तस्य कल्पनीयं भवति। योऽपि मन्यते प्रकरणादारादुपकारकमग्निषोमीयस्य भवतीति, तस्यापि प्रकरणसामान्यं प्रकरणविशेषेण बाध्येत। कर्मशेषभूतस्य यूपः प्रयोजनवत्त्वात्, तेन सम्बध्यमाना अदृष्टार्थापि आरादुपकारिका सती कल्पाप्रयोजना स्यात्। अतः प्रसिद्धिन्यायेन बाध्येत, यथा अश्वकर्ण इति। निवृत्तप्रयोजने चापि स्थाणौ यूपात् व्यावृत्ते च यूपीयो असाविति कृत्वा तत्र क्रियमाणा यूपाहुतिः यूपसम्बन्धा कृता भवतीति तदा व्रश्चने क्रियते, यथा शिरसा धारितायाः स्रजः शिरसोऽवतारितायाः देवदत्तीया असाविति कृत्वा शुचिदेशनिधानादिः संस्कार एषितव्यो भवति। एवं स्थाखा-

हुतिरपि एकादशिन्यां चान्तिकदेश्यस्याविवक्षितत्वात् तस्यं यूपाहुतिर्भविष्यत्येव। तस्मात् संस्कारपक्ष एव न्याय्यान्।

समाख्यानञ्च तद्वत् ॥ १२ ॥ (यु० १)

स्थाखाहुतिरिति च समाख्यानं स्थाणुप्रधानाया इवाहुतेर्भवतीति। कथं षष्ठीसमासोऽयं, कर्मणि षष्ठी। ईप्सिततमञ्च कर्म। सप्तमीसमासो लक्षणापेत इति कृत्वा नादर्त्तव्यो भवति।

मन्त्रवर्णश्च तद्वत् ॥ १३ ॥ (यु० २)

इतश्च पश्यामः संस्कारकर्मेति, यतो मन्त्रवर्णः अपि तद्वत् भवति, अतस्त्वं देववनस्पते शतवल्शो विरोह इति। यस्त्वं मया दृक्षः, सोऽत आत्रयणादूर्ध्वप्रकारो विरोहेति यूपम् इवाद्रियमाणो मन्त्रवर्णो भवति। तस्मादपि संस्कारकर्म खलेवाल्यां न कर्त्तव्यम् इति। (१०।१।६ अ०)।

उत्तमप्रयाजस्य संस्कारकर्मताधिकरणम्।

प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥

दर्शपूर्णमासयोराम्नायते, उत्तमः प्रयाजः, स्वाहाकारं यजति इति। तत्र संशयः, किम् ? उत्तमः प्रयाज आराद्रूपकारकं कर्म उत संस्कारकर्म इति। तत्र एतत् तावत् परीक्ष्यते, किम् ? आज्यभागादिषु या देवता यष्टव्या स्ता

एवाज देवताः, उत अन्याभ्यो देवताभ्यः ? इति। कथम् अन्या देवताः ? कथं वा प्रकृताः स्युः ? इति। यदि स्वाहाकारं यजति इति देवताविधानं, ततोऽन्या प्रकृताभ्यो देवता। अथ ये यजामहे, स्वाहाग्निम् इति नियतेन मान्त्रवर्णिको देवताविधिस्ततः प्रकृता देवता इति।

किं प्राप्तम् ? आरादुपकारकं कर्म इति। तदेतद् वक्ष्यते, अन्या देवता स्वाहाकारं यजति इत्यनेन विधीयते, एवं वचनप्राप्ता भविष्यति, इतरथा मान्त्रवर्णिकी कल्पयितव्या भवेत्। ननु अन्या अन्यादिशब्दैर्न शक्यते वदितुं, तत्रायं ये यजामहे स्वाहाग्निम् इति मन्त्रवर्णोऽपि विप्रतिषिध्येत। अत्रोच्यते, नैतद्विप्रतिषिद्धं, अनेकस्याप्येकः शब्दो भवति वाचकः। तद्यथा मातेति मातरमपि वदति मातारमपि। माता च स्वयं देवतं, क्षमा च पृथिवित्येतेष्वपठ्यमानो जननीवचनोऽवगम्यते। माता क्षमः क्षिप्रमेति एभिरप्यनुवध्यमानो धात्र्यस्य मातुर्वाचकः। एवं मन्त्रेऽप्यन्यादयः स्वाहाकारदेवतादौ वाक्ये प्रयुज्यमानास्तदादिनोऽवगम्येरन्। तद्या सति प्रयातं यागस्य कार्यमनुगृहीतम्, आरादुपक्रिया। तस्मादारादुपकारकं कर्म उत्तमः प्रयाज इति।

एवं प्राप्ते ब्रूमः, प्रयाजे च तत्रावयवत्वात् उत्तमश्रुत्वात् स्याद्वाहुतिः संस्कारकर्मेति, इहापि यजमन्त्रेनान्वादिश्यते, उत्तमः प्रयाजः संस्कारकर्मेति। तत एतत्तावदवधार्यन्ति, या आज्यभागादिषु देवता यष्टव्यास्ता एव इह देवता

इति। कुतः ?। स्वाहाकारस्य देवतासंयोगाभावात्, तद्धितेन वा देवतासंबोगा विज्ञायते चतुर्थ्यन्तेन वा। न चेह तद्धितो न चतुर्थी, अतो न देवताविधिः। यागसामानाधिकरण्यं च द्वितीयया गम्यते। तस्माद् यागवचनः स्वाहाकारशब्दो यथा समिदादय इति।

आह, यदि द्वितीयया संयोगात् तं यागवचनं मन्यसे, आरादुपकारकत्वाद्धि यागः, ईप्सिततमे हि द्वितीयाविभक्तिर्भवति इति। अत्रोच्यते, एवमेव प्राप्ते वदामः, तन्त्रायत्वात् इति। स एव न्यायः इह, यः स्वाग्वाकृतौ अपि वा शेषभूतत्वात् तत्संस्कारः प्रतीयेत इति। शेषभूतात्वाच्च भाग्यादिष्वन्वादयः, तदर्थो यागः सन् प्रयोजनवान् भवति। इतरस्मिन् पक्षे यागो निष्प्रयोजनः स्यात्, तदर्थं देवताभिधानमपि निष्प्रयोजनं स्यात्। सत्यां च देवतासंस्कारशङ्कायां यागप्रयोजनं कल्पयितुं न शक्यते। तथा अग्न्यादीनां सम्भवति स्वार्थेऽदृष्टा स्वाहाकारवचनता न शक्या कल्पयितुम्। तस्मात् देवतासंस्कारार्थमुत्तमः प्रयाजः। देवतास्मरणसंस्कारद्वारं चादृष्टमपि तस्माद् यागाद् भवति इति।

लिङ्गदर्शनाच्च ॥ १५ ॥ (हे०)

लिङ्गमप्यस्मिन्नर्थे भवति। किं लिङ्गम् ?। संप्रतिपन्नदेवताकयातुर्मास्येषु उत्तमप्रयाजस्य निगदो दृश्यते, स्वाहाग्नि स्वाहा सोमं स्वाहा सवितारं स्वाहा सरस्वतीं [illegible] स देवतासंस्कारपक्षेऽव-

क्ष्यते। इतरस्मिन् अदृष्टार्थः स्यात्। तस्मादपि देवतासंस्कार उत्तमः प्रयाजः स्यात्। प्रयोजनं विप्रतिपन्नदेवताकेषु सौर्य्यादिकर्मसु प्राकृतानि देवतापदानि न निवर्त्तन्ते पूर्वपक्षे, सिद्धान्ते तु निवर्त्तन्ते। (१०।१।७ अ०)।

अग्नियागस्यारादुपकारकताधिकरणम्।

तथाज्यभागाग्निरपीति चेत् ॥१६॥ (पू०)

दर्शपूर्णमासौ स्तो दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति। तत्रेदमाम्नायते, आज्यभागौ यजति इति। इदं चापरं श्रूयते, तौ होचतुः किमावयोस्ततः स्यादिति। यस्यै कस्यैचिद्देवतायै हविर्निर्वपंस्तहां पुरस्तादाज्यस्य यजविति तस्मादस्यै कस्यैचिद्देवतायै हविर्निर्वपन्ति ते पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति तौ न सौम्येऽध्वरे न पशौ इति। तत्रैतत् सन्दिह्यते, यदाज्यभागयोरग्नीषोमाविज्येते किं तत्राग्नियोगो देवतासंस्कारार्थ उत आरादुपकारकः? इति। किं प्राप्तम्?। इति चेत् सन्देहं पश्यसि, तथा आज्यभागाग्निरपि स्यात्, यथोत्तमः प्रयाजः, अपि वा शेषभूतत्वात् तत्संस्कारः प्रतीयेत इति।

व्यपदेशाद्देवतान्तरम् ॥ १७ ॥ (सि०)

न चैतदस्ति, देवतासंस्कारः आज्यभागयोरिति,

प्रधानाग्नेर्देवतान्तरमिह दृश्यत इति। क्रोऽसौ व्यपदेशः?। अग्निमग्न आवह सोममावह अग्निमावह इति, कथमग्निनावाहने एतावत्यस्य देवता दृश्येरन् इति। एवमावाहनेन देवतासु अभ्यामोहार्थं परिगण्यमानासु हिरण्मयशब्देन परिगणनं ज्ञातं, तद्देवतान्तरेऽवकल्पते, इतरथा हि सङ्ख्याहेतवा आसुञ्जेत। गणनं चोभयत्रापि पञ्चयोस्तुल्यम्। अपि च स्वत्वे सोमव्यवधानात् गणने क्रमो बाध्येत। अपि च असन्निहितं शब्देनालम्बमानमन्यमिव व्यपदिशति। यथा ब्राह्मण आगतो बधान आगतो ब्राह्मण आगत: इति द्वयोरिव ब्राह्मणयोर्भवति गणनावादः। एवमिहापि द्वयोरिव अग्न्योर्भवति वादः।

स एष व्यपदेशो भवति विशेषम्। प्राप्तिस्तु वक्ष्यामो वक्ष्यते,

समत्वात् ॥ २८ ॥ (हे०)

इयं प्राप्तिः, सोमोऽपि देवतया यागः, देवतापि श्रुता प्रधानयागे, यागोऽपि वाक्यान्तरे, आज्यभागौ यजति इति। तदिहोभयोः यागदेवतयोः प्रयोजनवतोर्देवताया यागार्थता ज्ञाप्या, प्रज्ञातं द्वारादुपकारकत्वं यागस्य इति। न हि देवतां विना यागो भवति, तेन स देवतामाकाङ्क्षति, न तु प्रधानदेवता यागान्तरमाकाङ्क्षति। यच्च येन आकाङ्क्ष्यते तत् तदर्थं भवति। तस्माद् देवता

चक्षुषी वा एतौ यदाज्यभागौ यत् प्रयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्यस्य अभिभूत्यै इति। (१०।१।८ ब्र०)

पशुपुरोडाश्ययागस्य देवतासंस्कारकताधिकरणम्।

पशावपीति चेत् ॥ १९ ॥ (पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, आ सोमं वहन्त्यस्मिन्ना प्रतितिष्ठन्ति तौ सभ्यवन्तौ यजमानमभिसभ्यवतो वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षितो यदग्नीषोमीयं पशुमालभते वरुणपाशाभ्यामेव मुच्यते इति। तत्रेदं समामनन्ति, अग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति। तत्र सन्देहः, किं पशुपुरोडाशयाग आरादुपकारकः, उत देवतासंस्कारार्थः? इति। किं तावत्प्राप्तम्?। ततः प्रयाजाधिकरणे पराजितोऽपि हेतुः केनचिदपरेण विशेषेण पुनरनुप्राप्यत इति पुनरुपदिश्यत, पशावपीति चेत्, इति चेत् पश्यसि, किम् आरादुपकारको, देवतासंस्कारः? इति। पशावप्यारादुपकारकः स्यात्, एतद्धि कर्मणां प्रसिद्धं कार्यम्। अग्नीषोमीयमिति च गुणभूतदेवताकस्तद्धितशब्दो भवति। पशावपि तद्धित एव शब्दो वाक्यशेषेण बलवता श्रवनवत्तो व्यपदिश्यते, न नियोगतस्तद्धनः पशुपुरोडाशे।

न तद्भूतवचनात् ॥ २० ॥ (सि०)

नेति प्रतिषेधकः शब्दः। आ सोमं वहन्ति अग्निना प्रतितिष्ठन्ति इत्यर्थवादवचन एषः, यदर्थवादवचनादन्या पशो देवता, अन्या पुरोडाशयागे इति गम्यते। अर्थवादवचनादेव सैवेत्यवगन्तव्या। एवं ह्याह, यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाशः इति। तस्मादर्थवादसाम्ये देवतासंस्कार इति गम्यते।

लिङ्गदर्शनाच्च ॥ २१ ॥ (हे०)

इतश्च पश्वाम्नः संस्कारकर्म पशुपुरोडाश इति। कुतः ?। लिङ्गमप्येतमर्थं दर्शयति, इन्द्राय वज्रिणे वृषभमालभेत इत्यस्य पशोः पुरोडाशस्य क्रमे सम्प्रतिपन्नदेवताकं याज्यानुवाक्याद्वयं समाम्नातं, इन्द्रं स्तुहि वज्रिणं स्तोमपृष्ठं स्तुहि शूरं वज्रिणं सुप्रतीतिम् इति च तत् संस्कारपक्षेऽवकल्पते, नान्यथा। तस्मात् पशुदेवतासंस्काराथैः पुरोडाशयाग इति।

गुणो वा स्यात् कपालवत् गुणभूतविकाराच्च ॥ २२ ॥ (वि० पू०)

विशेषविवक्षया पुनस्तमेव हेतुं व्यपदिशति। वाशब्देन पक्षं व्यावर्तयति। गुणः स्यात् देवता। एवमारादुपकारकत्वप्रसिद्धिरनुगृहीता भवति। अनेकगुणभावश्च कपालवद् भविष्यति। यथा कपालं त्रयाणेऽपि तुषोपवपनेऽपि, एवमग्नीषोमावप्यभिनौ पशुयागे पुरोडाशयागे च गुणभूतौ भवि-

श्यतः । एवं च सति दार्शपौर्णमासिकयोरन्नाधोमयोर्गुण-भावेन यागि हारभूतयोः कर्म आत्मातम्, इह गुणभूतयो-रेवाविरोधेन भविष्यति, इतरथा प्रधानभूतयोरन्यकार्ययोः न प्राप्नुयात् । दृश्यते चानिरुक्तः स्विष्टकृदिति । तस्मादप्यारादुपक्रिया । अपि च सौत्रामण्यामाश्विनसारस्वत-सौत्रामटैवतकेषु पशुषु ऐन्द्रावरुणसावित्राः पुरोडाशाः पशुप्रकरणान्नोत्कृष्यन्ते, संस्कारपक्षे उत्कृष्येरन् । छिद्रापि-धानार्थतायाश्च उत्क्रमर्थवाद्त्वम् । तस्मादप्यारादुपक्रिया

अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहा-कारवदङ्गानामर्थसंयोगात् ॥ २३ ॥ (उ०)

अपि वा इति पक्षव्यावृत्तिः । न आरादुपकारकं कर्म । तत्संस्कारः प्रतीयेत देवतासंस्कार इति । कुतः ? । शेषभूतत्वात् देवतायाः प्रयोजनवत्त्वम् । तस्मा-द्यथा स्वाहाकारयजिर्निर्भुयोजन इति देवतासंस्कारः प्रतीयते, एवमिहापि । अङ्गानामर्थसंयोगात्, अर्थेन प्रयोजनेन संयोग इह गम्यते वाक्येन, तेन न आरादुप-कारकम् । आरादुपकारकेभ्यः सामवायिकानि अङ्गानि वरीयांसि भवन्ति इति । यदुक्तं, गुणभूतदेवताकेन तद्धितशब्देन निर्देशः इति, प्रधानभूतदेवताकेनाप्येवं-जातीयकेन शब्देन सम्बन्धे विधीयमाने निर्देशो भवति । अपि च दृष्टं कार्यमदृष्टाद्धलीयः, तस्मात् संस्कार-कर्मेति ।

व्यूहवचनञ्च विप्रतिपत्तौ तदर्थत्वात् ॥२४॥ (यु०)

इतश्च संस्कारकर्मेति, सौत्रामण्यां पशुपुरोडाश्यदेवता-विप्रतिपत्तौ व्यूहवचनं देवतासंस्कारे एवावकल्पते। यद्वै सौत्रामण्यां व्यूढं तदस्याः समृद्धं यदन्यदेवत्याः पशुपुरोडाश्या भवन्ति, अन्यदेवत्याः पशवः इति।

गुणेऽपीति चेत् ॥ २५ ॥ (आ०)

एवं चेत् पक्षसि, संस्कारपक्षे व्यूहवचनमवकल्पत इति, तत्र, संस्कारपक्षेऽपि व्यूहवचनं नावकल्पते, न हि तत्र किञ्चित् व्यूढं, विप्रतिपन्नदेवताकैरेव पुरोडाश्यैस्तत्कर्म समृद्धतरं भवति। एवं ह्याह, यदन्यदेवत्याः पुरोडाश्या भवन्ति अन्यदेवत्याः पशव इति तदस्यां समृद्धं भवति इति। यस्योभयोः पक्षयोर्दोषः, न तमेकस्मिन्दोषो भवति। यथैव हि संस्कारपक्षे व्यूहवचनमर्थवाद एवमितरस्मिन्नपि पक्षेऽर्थवादो भविष्यति।

नासंहानात् कपालवत् ॥ २६ ॥ (आ० नि०)

नैतदेवं, भवदीये पक्षे न किञ्चिदपि हीनं, यथैवैकेन कपालेन तुष्येषु उप्यमाणेषु अन्येषां कपालानां न किञ्चिद्धीयते, एवमन्यया देवतया पशुपुरोडाश्याग्नौ निर्वर्त्यमाने न किञ्चित् पशुदेवतायां हीयते, तच्चाव्यूढे एव व्यूहवचनं भवति। मदीये तु पक्षे देवताप्रकाशनमङ्गभूतं हीयते। अन्यदेतदुच्यते, यत् व्यूढमपि समृद्धं

भवति इति। अहीने तु व्यूढग्रहे उच्चरिते न ग्रहार्थो गृहीत इति।

ग्रहाणाञ्च सम्प्रतिपत्तौ तद्वचनं तदर्थत्वात् ॥ २७ ॥ (यु० १)

इतश्च संस्कारकर्मेति। सौत्रामण्यां सम्प्रतिपन्नदेवताकेषु ग्रहेषु तद्वचनं भवति, पुरोडाश्यवचनम्। नैतेषां पशूनां पुरोडाशा विद्यन्ते, ग्रहपुरोडाशा ह्येते पशव इति। न तावन्न विद्यन्ते, विप्रतिपन्नदेवताकेषु संस्काराभावमात्रोच्च एवमुच्यते, ग्रहा एषां पुरोडाशाः ग्रहपुरोडाशा ह्येते इति। किं तेषां पुरोडाशैः सामान्यम्?। यदेते देवतासंस्कारार्थाः, यदि पुरोडाशा अपि देवतासंस्कारार्था एवमेतदवकल्पते। तस्मात् संस्कारपक्ष एव श्रेयान्।

ग्रहाभावे च तद्वचनम् ॥ २८ ॥ (यु० २)

एवं श्रूयते, नैतस्य पशोरर्थं ग्रहन्ति पुरोडाश्यवानेष पशुः इति। पशुपुरोडाश्यवत्ताहेतुकं ग्रहाभावं ब्रुवन् ग्रहपुरोडाश्ययोरेकार्थतां दर्शयति। तत्र ग्रहस्य देवतासंस्कारार्थता विज्ञाता, यदि पुरोडाशोऽपि देवतासंस्कारार्थ एवमेतदवकल्पते।

देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति ॥ २९ ॥ (यु० ३)

इतश्च पश्यामः संस्कारकर्मेति। एवं ह्याम्नायते, अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते कामा वा अग्नय आग्नेयाः पुरोडाशा भवन्ति आग्नेया हि पशवः इति। पशुदेवताहेतुकान् पुरोडाशान् ब्रुवन् देवतासंस्कारार्थतां पुरोडाशानां दर्शयति।

अविरुद्धोपपत्तिरर्थापत्तेः श्रुतवत् गुणभूतविकारः स्यात् ॥ ३० ॥ (आ० नि० १)

अथ यदुक्तं, गुणभूतयोर्धर्मः प्रधानभूतयोरग्नीषोमयोर्न स्यात् इति। उच्यते, अविरुद्धा प्रधानभूतयोरप्यग्नीषोमयोर्धर्माणाम् उपपत्तिः। कुतः ?। अर्थापत्तेः प्रधानभूतावपि प्राकृतं कार्यं यागनिर्वृत्तिं कुर्वाणौ हविर्भूताविति धर्मैर्युज्येते श्रुतवत्, यथा श्रुते चरुं, दधिचरुम् इति प्रदानार्थे दधिश्रुते प्रणीताकार्यं कुर्वाते इति धर्मैर्युज्यते न च दोषो भवति।

स हार्थः स्यादुभयोः श्रुतिभूतत्वाद्विप्रतिपन्नौ तादर्थ्यादिकारत्वमुक्तं तस्यार्थे वादत्वम् ॥ ३१ ॥ (आ० नि० २)

अथ यदुक्तं, ऐन्द्रवारुणसावित्राणां पुरोडाशानां सौचामनीप्रकरणादुत्कर्षः प्राप्नोति, तच्चेदमुच्यते, स हार्थः यागो देवतासंस्कारार्थश्छिद्रापिधानार्थश्च, उभयोः अर्थयोः श्रुतिभूतत्वात्। अतो विप्रतिपन्नदेवताकेषु छिद्रापिधानार्थतया प्रकरणादुत्कर्षो न भविष्यति, तत्प्रकरणगत

एवायं विकारो भविष्यति। तस्य अपि उक्तम् अर्थवादत्वम् इति यदुक्तं, तच्चेदमुच्यते,

विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ ३२ ॥ (आ० नि० ३)

एवं तर्हि अनेन प्रकारेण प्रकरणादनुत्कर्षः, देवतासंस्कारस्तावत्प्रकरणादुत्कर्षेण न शक्यते बाधितुम्। तत्र सौत्रामण्यां सम्मतिपत्रदेवताका एव चोदकेन पुरोडाशाः प्राप्ताः, तत्रेन्द्रादयः शब्दाः पशुदेवतानामेव वाचकाः। कथम्? एकदेशा हि तेषामिमे वर्णान्तरसहिता उच्चारिता इति गम्यते। शक्नुवन्ति ह्येकदेशाः समुदायिनः समुदायं प्रत्याय्य समुदायार्थान् गमयितुं, यथा गाव्यादयः। यथा च सरस्वतीदेवताके निगदे सरस्वति देवनिदो निबर्हय प्रजां विश्वस्य हसयस्य मायिनः इति। हसयशब्दो हृहत्शब्दार्थं गमयति। किमर्थं पुनरेवं कल्प्यते?। यतो देवतान्तराणि पशुदेवतासंस्कारार्थेषु यागेषु प्रत्याय्यमानानि अनर्थकानि भवेयुः। तस्मात् पशुदेवतानाम् आख्याविकाराः पुरोडाशदेवताशब्दा इति।

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ॥ ३३ ॥ (२ यु०)

संस्कारपक्षे एव, वाशब्दो युक्तिं व्यावर्तयति न पक्षं, न वा आख्याविकारः, संस्कारपक्षेऽन्यथानुपपद्यमाने

लक्षणाशब्दस्तत्संयोगादित्येवं मन्तव्यम्। अन्यायो ह्येवं-जातीयकेष्वनेकार्थभावः, तस्मात् स्थाल्या हविर्विक्रियते इति। यदुक्तम्, ओदनीयेन शिष्टा देवतायागमाचरन्तीति ध्रुवमेषां स्मृतिः इति। उच्यते, अनुमानमेतत् प्रत्यक्षेण वचनेन बाध्यते। वचनादवगम्यते स्थाल्या यागः कर्त्तव्य इति। कथम्?। तस्यां हि चरुशब्दः प्रसिद्धः। न असौ आचारानुरोधेन लक्षणाशब्दः कल्पनीयः। कल्प्यमाने वा आचारेण शब्दो बाध्येत, न चैतत् न्याय्यम्। शब्दानुरोधेन हि व्यामोहादाचार इति कल्पयितुं न्याय्यम्। यथा शूलेन मांसेन चावभृथमभ्यवयन्ति इति, प्राजापत्यं चरुं निर्वपेत् यतक्षणमायुष्कामः इति च।

कपालविकारो वा विशयेऽर्थोपपत्तिभ्याम्॥

३८॥ (२य पू०)

हविर्विकारपक्षो न सिद्ध्यति, स्थाल्या विकारे स्मृतिहेतुराचारात्, श्रुतिरागच्छति, ओदनेन विकारे स्थाली-संयोगाल्लक्षणाशब्दः आगच्छः। अस्ति चान्या गतिः, कपालविकारो भवेदिति। तस्मादाशब्देन पक्षं व्यावर्त्य कपालविकारमवकरिति ब्रूमः। कपालविकारोऽप्यर्थः सूर्यस्य, तेन सौर्य्य इति शक्यते व्यपदेष्टुम्। उपपत्तिश्चास्ति, शक्यते स्थाल्यां श्रपयितुम्। तस्माद्धविर्विकारपक्षे संशये कपालविकार आश्रयणीयः।

गुणमुख्यविशेषाच्च॥ ३९॥ (यु० १)

अस्ति च गुणमुख्यभावविशेषः, गुणो बाधितव्यो न्याय्यः, न मुख्यः, तदुक्तम् अङ्गगुणविरोधे च तादर्थ्यात् इति।

तच्छ्रुतौ चान्यहविष्ट्वात् ॥ ४० ॥ (यु० २)

चरुश्रुतौ ह्यान्यहविर्दर्शयति, प्राजापत्यं हुते चरुं निर्वपेच्छतक्रष्णलमायुष्कामः इति, शतक्रष्णलानि हविः, चरुरेषां सम्बन्धी। चत्वारि चत्वारि क्रष्णलान्यवद्यति इति क्रष्णलानां हविष्ट्वम्।

लिङ्गदर्शनाच्च ॥ ४१ ॥ (यु० ३)

एवं हि आह, मारुतं चरुं निर्वपेत् पृश्नीनां दुग्धे प्रैयङ्गवं ग्रामकामः इति मृण्मयो हि चरुर्न प्रियङ्गुविकारः। तस्मात् अन्यहविः, चरुरपि कपालविकार इति।

ओदनो वा प्रयुक्तत्वात् ॥ ४२ ॥ (आ० एवं २ पू० नि०)

हविर्विकार एवायं चरुस्तद्धितसंयोगादवगम्यते, सौर्य्यचरुः कर्त्तव्य इति। यदि पुरोडाश उत्सृज्येत, चरूत्सृष्ट्योऽवगम्यमानो बाध्येत, सूर्यसम्बन्धो हि चरुः कर्त्तव्यः, तस्मिन् अशक्ये सौर्य्यसम्बन्धः क्रियेत, न शक्ये, यदा च हविर्विक्रियते, तदा ओदनेन, ओदने हि चरुशब्दः प्रसिद्धः आ हिमवतः आ च कुमारीभ्यः। तत्र अदनीयसंयोगो युक्तो भविष्यति।

यत्तु, दार्षत्वमन्याय्यमिति, अन्याय्यमेव दार्षत्वम्। तत्र कुत एतत् स्थालीसंयोगेन ओदने भविष्यतीति, न पुनरोदनसंयोगात् स्थाल्यां स्यात्। स्मरन्ति च पात्रे चरुशब्दं, अनवस्थितात्मरूपपक्षो विग्रहसिद्ध ओदनवदिति। तदुक्तं न पक्तिनामत्वात् इति। आचाराच्च स्मृतिर्बलीयसी, तस्मादोदने चरुशब्दः, ओदनेन हविर्विक्रियत इति। तथायमप्यर्थोऽनदनीयेन यागो भविष्यति इति। अपि च सूर्यस्थान्यद्द्रव्यं नैवास्ति येन चरुः सम्बध्येत। ओदकप्रायः पुरोडाश इति चेत्। नैतदेवं, कर्मौदनायां हि निष्पत्तायां ओदको भवति। प्राक् चरुशब्दवचनान्न यजतिचोदना। द्रव्यदेवतासम्बन्धो हि यज्यर्थः। तेन चोदनाविधिशेषः चरुशब्दो न पुरोडाशविशेषणं भवति, जघन्यत्वाच्चोदकस्य इति।

अपूर्वव्यपदेशाच्च ॥ ४३ ॥ (१ यु०)

इतश्च पश्यामः, ओदनेन हविर्विक्रियत इति। कुतः ?। अपूर्वव्यपदेशो भवति, एवं ह्याह, पुरोडाशेन वै देवा अस्मिँल्लोक आर्ध्नुवंश्चरुणामुस्मिँल्लोके इति, पुरोडाशेन आप्नोति चरुणामुस्मिन् इति। यदि स्थाल्यां चरुशब्दः कपालविकारशब्दः, ततो यस्मिन्नेव पक्षे पुरोडाशस्तस्मिन्नेव पक्षे चरुः, पुरोडाशेन वै देवा अस्मिँल्लोके आर्ध्नुवन् इति चरुणा अस्मिँल्लोक इति गम्यते, तत्र चरुणामुस्मिन् इति अन्यवद् व्यपदेशो नावकल्पते। तस्मादपि ओदनेन हविर्विक्रियत इति।

तथा च लिङ्गदर्शनम् ॥ ४४ ॥ (२ यु०)

एवञ्च कृत्वा लिङ्गदर्शनम् अप्युपपन्नं भविष्यति। कथम् ?। आदित्यः प्रायणीयचरुः आदित्य उदयनीयः इति। तच्चैतच्छ्रूयते, आज्यस्यैव चरुमभिपूर्य्य चतुर आज्यभागान् यजति। पथ्यां स्वस्तिमिष्ट्वाग्नीषोमौ यजति अग्नीषोमाविष्ट्वा सवितारं यजति। अदितिमोदनेन इति। चतुर्षु आज्यभागेषु विधिः, अदितेः आदित्यचरुः इति प्राप्तत्वादनुवादः। तत्र चरुम् ओदनशब्देन ब्रुवन् ओदनेन हविर्विक्रियत इति दर्शयति। तथा इदमपरं लिङ्गं भवति, यदि तण्डुलो विद्यते आमं तद्धविः स्यात् इति। तण्डुले हविःशब्दं ब्रुवन्ओदनेन हविर्विक्रियत इति दर्शयति। (१० । १ । १० अ०)।

सौर्य्यचरोः स्याल्लामेव पाकाधिकरणम्।

स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ ४५ ॥ (१म पू०)

अस्ति चरुः सौर्य्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति। अथैषोऽर्थः समधिगतः, ओदनेन हविर्विक्रियत इति। स इदानीम् ओदनः क्व पक्तव्यः ? इति भवति संशयः। किन्नावत्प्राप्तम् ? न नियमः स्यात्, कपालेष्वेव इति, अथेष्टप्राप्ते येष्वेषु-केषुचित् द्रव्येषु पचेत। यद्वि

हि कपाले चोदकेन प्राप्येत, कपालवच्चोदकेन सङ्ख्यापि प्राप्येत। न हि प्रकृतौ कपालेषु अपयितव्यमित्येव चोदना, किन्तर्हि, अष्टाकपालो भवति इति, सङ्ख्यायां प्राप्यमाणायां अष्टाकपालताया चोदिता भवति, नान्यथा। न चैवं सङ्ख्या प्राप्यते, न हि बहुषु कपालेषु पुरोडाश वदोदनः पक्तुं शक्यः। केवले च कपाले प्राप्यमाणे यासावष्टाकपालता चोदिता सा नैव प्राप्येत। अतो यस्मिन्-कस्मिंश्चित् अर्थप्राप्ते द्रव्ये पक्तव्यश्चरुरिति।

एवं प्राप्ते ब्रूमः, स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात्। स एष चरुः कपाल एव स्यात्। एवं प्रकृतिवच्छब्दोऽनुगृहीतो भवति, न चान्यत् किञ्चित् द्रव्यमाम्नायते, तस्मान्नियमः।

सङ्ख्या चापि कपालवत् इति यदुक्तं तत्परिहर्त्तव्यम्,

एकस्मिन् वा विप्रतिषेधात् ॥४६॥ (आ० नि०)

यदि बहुषु कपालेषु न शक्यते चरुः पक्तुं, विप्रतिषेधात् एकस्मिन् पक्तव्यः। यदेतदुच्यते, अष्टाकपालो भवति इत्येतदुक्तं भवति, अष्टसु कपालेषु अपयितव्यः इति। तत्र, यदि अष्टत्वं विरोधात्र प्राप्यते, तत् कपालमविरोधात् प्राप्येत।

न वार्थान्तरसंयोगादपूपे पाकसंयुक्तं धारणार्थं चरौ भवति तदर्थात् पात्रलाभः स्यादनियमोऽविशेषात् ॥ ४७ ॥ (२य पू०)

न वा कपालेषु पक्तव्यः। कुतः ?। अर्थान्तरसंयोगात्, अपूपपाके यत् कपालमुपादीयते, तद्धतेनोष्णा अपूपस्य निर्वर्तकः पाको यथा स्यादिति। तत्र कपालं चरोरुपादीयमानं उदकधारणार्थं यदूष्मणा उदकगतेन ओदनपाको निर्वर्त्यते, स ओदनपाको न कपालगतेन ऊष्मणा निर्वर्त्तते। तथोदकधारणार्थं कपालम् उपादीयमानं न प्राकृतकार्यं स्यादिति चोदको नैवानुरुध्यते। तस्मात् अर्थात् पाचलाभः स्यात् इति तद्, अविशेषात् न नियम्येत, किं तत् ? इति।

चरौ वा लिङ्गदर्शनात् ॥ ४८ ॥ (सि०)

स्थालयां वा अपूपं क्रियेत, लिङ्गं हि भवति, यासु स्थालीषु सोमाः स्युस्ते चरवः स्युः इति। सोमस्थालीषु चरुं पक्तव्यं ब्रुवन् विशेषेण स्थालीं चरुस्थापनार्थां दर्शयति।

आह, दर्शनमिदं व्यपदिश्यते, प्राप्तिरुच्यताम् इति। अत्रोच्यते, स्थालयां स चरुसञ्ज्ञकः पाको निर्वर्त्यते, न कटाहे कपाले वा। तस्मात् स्थालयां चरुः पक्तव्यः इति।

किं भवति प्रयोजनं, यदि कपालविकारश्चरुः यदि वा ओदनेन इविर्विक्रियते ? इति। यदि कपालविकारः, तस्मिन् पेषणमनर्थलोपात् कर्त्तव्यम्। अथ ओदनेन इविर्विक्रियते, अक्रिया पेषणस्य अपूपहेतुत्वात्। पिण्डार्थत्वाच्च संयवनं पूर्वपक्षे कर्त्तव्यं, न सिद्धान्ते। संवपनमप्येवम्। सन्तापनञ्च अधस्तात्, अपूपार्थं पूर्वपक्षे कर्त्तव्यं,

न सिद्धान्ते। उपधानस्यैवमेव। पृथुबध्ने च पूर्वपक्षे कर्त्तव्ये, न सिद्धान्ते। अभ्यूहयाङ्गारायां पूर्वपक्षे कर्त्तव्यः, न सिद्धान्ते, उपरिपाकार्थत्वात्। अवच्छेदनमप्येवमेव। व्यूढ्यासादनं पूर्वपक्षे अर्थात् कर्त्तव्यम्। अर्थो नास्ति इति न सिद्धान्ते। अर्थात् कृतं हि व्यूढ्यासादनं न शब्दप्राप्तम्, अर्थाच्च कृतं न चोदकः प्रापयति ॥ (१०। १। ११ अ०) ॥

सौर्यचरौ पेषणाभावाधिकरणम्।

एवं वा, पृथगधिकरणानि पेषणादीनि। अस्ति चरुः, सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति। ओदनेन हविर्विक्रियते, इत्येतत्समधिगतम्। तत्र तत्सन्दिह्यते, किं चरौ पेषणं कर्त्तव्यं, न? इति। किं प्राप्तम्?,

तस्मिन् पेषणमनर्थलोपात्स्यात् ॥ ४९ ॥ (पू०)

शक्यते हि तण्डुलेषु पेषणं कर्त्तुम् ॥

अक्रिया वा अपूपहेतुत्वात् ॥ ५० ॥ (सि०)

यद्यपि शक्यते, तथापि न क्रियते। अपूपः पेषणेन विना न निर्वर्त्तते, ओदनस्तु विनैव पेषणेन भवति, कामं पेषणेन व्याहन्यते, पिष्टकं यवागूर्वा स्यात् खलिर्वा। तस्माच्चरोः पेषणं निवर्त्तेत ॥ (१०। १। १२ अ०) ॥

सौर्यचरौ संवपनाभावाधिकरणम् ।

पिण्डार्थत्वाच्च संवपनम् ॥ ५१ ॥

चरुरेवोदाहरणम् । प्रकृतौ श्रूयते, प्रथीताभिर्वपति इति । तदिह सन्देहः, चरौ संवपनं कर्त्तव्यं, न ? इति । कर्त्तव्यं, शक्यते हि कर्तुमिति ।

एवं प्राप्ते ब्रूमः, शक्यमपि न क्रियते, पिण्डार्थं हि तत् पिण्डेन च अपूपस्य प्रयोजनं, न चरोः ॥ (१० । १ । १३ अ०) ॥

सौर्यचरौ संवपनाभावाधिकरणम् ।

संवपनञ्च तादर्थ्यात् ॥ ५२ ॥

सौर्य एव चरूदाहरणम् । प्रकृतौ श्रूयते, सवितृ-प्रसूत इत्येवैनं देवताभिः संवपति इति । इह चरौ सन्देहः, संवपनं कर्त्तव्यं, न ? इति । किं प्राप्तम् ?, शक्यत्वाच्चोदकानुग्रहाय कर्त्तव्यम् इति । एवं प्राप्ते ब्रूमः, संवपितुं हि तत् प्रकृतौ क्रियते, न चरोः संवपनस्येन प्रयोजनम् । (१० । १ । १४ अ०) ।

—:o:—

सौर्यचरौ सन्तापनाभावाधिकरणम् ।

सन्तापनमधःश्रपणात् ॥ ५३ ॥

चरावेव च सन्देहः। प्रकृतौ सन्तापनं कपालानामस्ति, वसूनां रुद्राणामादित्यानां भृगूणामङ्गिरसां धर्मस्तपसा तप्यध्वम् इति। चरौ सन्तापनं कर्त्तव्यं, न? इति सन्देहः। प्रकृतिवद्वचनात् कर्त्तव्यमिति प्राप्तम्। अधःपाकार्थं हि तत्। तस्मात्र चरौ चोदकः प्रापयति॥ (१०।१।१५ अ०)॥

सौर्यचरावुपधानाभावाधिकरणम्।

उपधानञ्च तादर्थ्यात्॥ ५४॥

चरावेव कपालोपधानं प्रति सन्देहः, कर्त्तव्यं न? इति। प्रकृतिवद्वचनात् प्राप्तम्। अधःपाकार्थत्वान्निवर्त्तते इति॥ (१०।१।१६)॥

सौर्यचरौ पृथुबध्नाभावाधिकरणम्।

पृथुबध्नौ वानपूपत्वात्॥ ५५॥

पृथुबध्नौ च प्रति चरोरेव सन्देहः, प्रकृतौ श्रूयते, उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयति। मन्त्रेतन्वा तनूः सृज्यतामिति त्रिभिः परिमार्ष्टि। तदुभयं चरौ कर्त्तव्यं, न? इति। चोदकानुग्रहाय कर्त्तव्यमिति प्राप्ते, अनपूपत्वात् तत् निवर्त्तते॥ (१०।१।१७ अ०)॥

सौर्यचरावभ्यूहाभावाधिकरणम् ।

अभ्यूहस्योपरिपाकार्थत्वात् ॥ ५६ ॥

प्रकृतौ श्रूयते, वेदेन भक्षनाङ्गारान् अभ्यूहति इति । तत् सौर्यं चरौ कर्त्तव्यं, न ? इति सन्देहः । प्रकृतिवद्वचनात् कर्त्तव्यमिति प्राप्ते ब्रूमः, उपरिपाकार्थं हि तत् पुरोडाशस्यावकल्पते, न चरोरिति निवर्त्तते ॥ (१०। १।१८ अ०) ॥

सौर्यचरावज्वलनाभावाधिकरणम् ।

तथावज्वलनम् ॥ ५७ ॥

दर्शपूर्णमासयोः श्रूयते, दर्भपिञ्जूलैरवज्वलयति इति । सौर्ये चरौ सन्देहः, किं तत्कर्त्तव्यं, न ? इति । किं प्राप्तम् ? । प्रकृतिवद्वचनात् कर्त्तव्यम्, उपरिपाकार्थत्वान्निवर्त्तते इति ॥ (१०। १। १८ अ०) ॥

सौर्यचरौ व्युद्वृत्यासादनाभावाधिकरणम् ।

व्युद्वृत्यासादनञ्च प्रकृतावश्रुतित्वात् ॥ ५८ ॥

प्रकृतौ श्रूयते, अन्तर्वेद्यां हवींष्यासादयति इति । तत् प्रकृतौ कपालेभ्यो व्युद्वृत्यासादनं क्रियते । सौर्ये चरौ सन्देहः, किं स्थाल्या व्युत्याप्य चरुरासादयितव्यः, उत व्युत्यानं न कर्त्तव्यम् ? इति । प्रकृतौ कृतत्वाच्चरावपि कर्त्तव्यमिति प्राप्तम् । तदुच्यते, व्युद्वृत्यासादनञ्च

प्रकृतावनुतित्वात्, प्रकृतौ न श्रूयते, कपालेभ्यो व्युद्वृत्य सादयितव्यः पुरोडाशः इति, अर्थात् स व्युद्वियते, यथार्थात्कृतं न स चोदनार्थः, तस्माच्चरौ व्युद्वरणं न कर्त्तव्यम्। अपि चोद्धरणे क्रियमाणे कपित्थवत् परिशोष्य उद्वियेत। तत्र पापभेदः स्यात्? तस्मात् व्युद्वृत्यासादनं चरौ न कर्त्तव्यमिति॥ (१०।१।२० अ०)॥

इति भट्टश्रीशवरस्वामिनः कृतौ मीमांसाभाष्ये दशमस्य अध्यायस्य प्रथमः पादः।

मीमांसा-दर्शने

१० अध्याये २ पादः।

क्रचसे चरौ पाकानुष्ठानाधिकरणम्।

क्रचसेष्वर्थलोपात्पाकः स्यात्॥ १॥ (पू०)

प्राजापत्यं चरुं निर्वपेत् घृते श्रतक्रचसमायुष्कामः इति। तत्र सन्देहः, किं चोदकेन पाकः प्राप्यते कर्त्तव्यश्च, उत न प्राप्यते न कर्त्तव्यः? इति। किं तावत् प्राप्तम्?। क्रचसेषु पाको न स्यात्। प्रकृतौ हि पुरो-

ङाशार्थः पाकः, इडाम्तरेष्वपि पाकं, ङ्खलानि ङ्खलान्येव भवन्ति। तस्माच्च प्राप्यते, यतो न कर्त्तव्यः इति।

स्वाद्वा प्रत्यक्षशिष्टत्वात् प्रदानवत् ॥२॥ (सि०)

स्वाद्वा पाकः। चोदकेन तु न प्राप्यते, प्रत्यक्षन्तु अस्य शासनं, घृते श्रपयति इति। प्राकृतस्य कार्यस्यार्थे न भवति, वचनप्रामाण्याददृष्टार्थो भवति। यथा तेषामेवानदनीयानां प्रत्यक्षशासनात् प्रदानम्, एवं पाकोऽपीति। (१०।२।१ अ०)।

ङ्खले उपस्तरणाभिघारणयोरभावाधिकरणम्।

उपस्तरणाभिघारणयोरमृतार्थं स्वादकर्म स्यात् ॥३॥ (सि०)

ङ्खलचरावेव सन्देहः, ये प्रकृतावुपस्तरणाभिघारणे, यदुपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोति इति। ते उपस्तरणाभिघारणे ङ्खलचरौ कर्त्तव्ये, न? इति एष संशयः। किं प्राप्तम्?। उपस्तरणाभिघारणयोः न क्रिया। कुतः। अमृतार्थत्वात्, अमृतार्थत्वेन हि ते क्रियेते, यदुपस्तृणात्यभिघारयति अमृताहुतिमेवैनां करोति इति अमृतेनोपमिमानः स्वादुभावार्थतां तयोर्दर्शयति, न च ङ्खलेषु स्वादुभावः सम्भवति। तस्माद् अक्रियेति।

क्रियेत वार्थवादत्वात्तयोः संसर्गहेतुत्वात् ॥ ४ ॥ (पू०)

क्रियेत वा उपस्तरणमभिघारणञ्च, विधेः प्रकारान्तरेऽतिदेशात् सर्वकर्म स्यात् इति। यदुक्तं, स्वादुत्वाय ते क्रियेते इति, न स्वादुतार्थः प्रकृतौ श्रुतः, स्वादुः कर्त्तव्य इति। तस्मात् अर्थवादः, अस्तताइतिमेवैनां करोति इति। संसर्गमात्रमाज्यस्य क्रियते हविषश्च। तच्च क्षणालेप्यपि शक्यं कर्त्तुं, तस्माद् अनिवृत्तिः।

अकर्म वा चतुर्भिरासिवचनात् सह पूर्णं पुनश्चतुरवत्तम् ॥ ५ ॥ (उ०)

वाशब्दः पक्षं व्यावर्त्तयति। अक्रिया तयोरिति। कुतः ?। चतुर्भिरासिवचनात्, चत्वारि क्षणालान्यवद्यति इति। कोऽभिप्रायः ?। चत्वारि क्षणालानि चत्वारि अवदानानि। एकैकं क्षणालम् एकैकस्यावदानस्य स्थाने, तेनोपस्तरणाभिघारणयोर्निवृत्तिः। तथा चासिवचनं भवति, चत्वारि क्षणालान्यवद्यति चतुरवत्तस्यास्य इति। अविद्यमानस्यार्थान्तरेणानुग्रहो भवति, तस्मान्निवृत्तिरेतयोः। सह पुनः उपस्तरणाभिघारणाभ्यां पूर्णं चतुरवत्तम् एव स्यात्, तच्चासिवचनं व्याहन्येत।

क्रिया वा मुख्यावदानपरिमाणात् सामान्यात् तद्गुणत्वम् ॥ ६ ॥ (पुनः पू०)

क्रिया वा तयोरुदकानुग्रहाय, मुख्यावदानस्य हि प्रकृतो परिमाणमुक्तम्, अङ्गुष्ठपर्वमात्रं देवतानामवद्यति इति। इहापि क्षणलशब्दः परिमाणवचनः श्रूयते। स चतुःसङ्ख्यया अनुबध्यते, चत्वारि क्षणलान्यवद्यति इति, न यानि चत्वारि अवदानानि तानि क्षणलपरिमाणानि भवन्तीति। हिरण्यपरिमाणवचनः एष क्षणलशब्दो न आज्यस्य परिमाणं वदितुमुत्सहते। तच्च परिमाणं न द्रव्यं निवर्त्तयति, न हि द्रव्यकार्य्येषु गुणो वर्त्तितुमर्हति। परिमाणं यत् प्राकृतं तस्य कार्य्ये वर्त्तमानं तन्निवर्त्तयेत्, यथा, इदं दधि घृतं शाकम् इमे शालयः, देवदत्तो भोक्ष्यतां, देवदत्तवत् यज्ञदत्तस्तैलेनेति, तैलं हि भोजने स्नेहनेनोपकरोति, तत् स्नेहनार्थं प्राकृतं निवर्त्तयितुमर्हति घृतं, न शाकं दधि चौदनं वा। एवमिहापि परिमाणं मुख्यावदानं परिमिमीते न द्रव्यं निवर्त्तयेत्। प्रकरणात्तु मुख्यपरिमाणं स्यात् न उपस्तरणाभिधारणयोः। तस्मात् तयोरनिवृत्तिरिति।

तेषां चैकावदानत्वात् ॥ ७ ॥ (यु०)

चतुर्णां चैकावदानतां दर्शयति, चत्वारि क्षणलान्येकमवदानम् इति, इतरथा चत्वारि अवदानानि अभविष्यत्। तेनैकावदानवचनमुपरुध्यते। तस्मादाज्यनिवृत्तिरिति।

आप्तिः संख्यासमानत्वात् ॥ ८ ॥ (परिहारः)

अथ यदुक्तं, आग्निवचनं भवति इति, चतुःसङ्ख्या-संस्तुतिरेषा, एवं चतुःसङ्ख्यावा नाहानां यदेकस्मिन्-वदाने चत्वारि अवदानानि भवन्ति इति। यद्वा, यद्वैश्व-देव: प्रातःसवने यज्यते, प्रातःसवने वा एतद्वैश्वदेवयज्ञं संख्यापयति इति वैश्वदेवसंस्तुतिर्न अन्यसवननिह्नुत्ति:। एवमिहापि चतुःसङ्ख्यासंस्तव:, नोपस्तरणाभिघारणयो-र्निह्नुत्तिरिति।

सतोस्त्वाग्निवचनं व्यर्थम् ॥ ९ ॥ (परि० नि०)

तुच्यच्द: एनं चतुःसङ्ख्यासंस्तवं व्यावर्त्तयति। न हि, विद्यमानयोरुपस्तरणाभिघारणयोस्तदाग्निवचनेन क्वचित् संस्तवोऽस्ति। यच्चविद्यमानम् आपयति द्योत्यते, ततो गुणवानिच्छुको भवति, तच्च संस्तूयते। अत्र विद्यमानम् आपयति इति अनर्थको भवतीच्छुं भवति, न संस्तव:। तस्माद्विद्यमानयोरुपस्तरणाभिघारणयोरग्निवचनं व्यर्थमेव, अन्य: परिहारो वक्तव्य:।

विकल्पस्त्वेकावदानत्वात् ॥ १० ॥ (२ परि०)

तुच्यच्द आग्निवचनाग्निह्नुत्तिरुपस्तरणाभिघारणयोरि-त्येतद्व्यावर्त्तयति। यथा भवान् ब्रूते, आग्निवचनाग्निह्नु-त्तिरेतयोरिति, एवमेकावदानवचनाग्निह्नुत्तिरेत-योरिति लिङ्गविरुद्धम्। लिङ्गविरुद्धत्वाच्च नैकान्ततो निह्नु-त्तिमाग्निवचनं कर्तुमर्हति।

सर्वविकारे त्वभ्यासानर्थक्यं हविषो द्वीतरस्य स्यादपि वा खिष्टकृतः स्यादितरस्यान्याय्यत्वात् ॥ ११ ॥ (२ परि० नि०)

तृयब्द आग्निवचनं बाधते। आग्निवचने बाधिते सति चतुर्षु क्षणलेषु सर्वावदानविकारेष्वभ्यासो अनर्थकः स्यात्, चत्वारि चत्वारि क्षणलान्यवद्यति समुद्रा इति। अस्मत्पक्षे पुनः इतरद्विर्हितीयमवदानमपेक्षाभ्यासोऽवकल्पिष्यते। अथ मतं, एतस्मादपि खिष्टकृतमपेक्षाभ्यासे भवति इति। तच्चेवं, इतरस्य खिष्टकृतोऽपेक्षणमन्याय्यम्। प्रकरणात् प्रधानमभिसम्बध्यते वचनेन, न च खिष्टकृतः प्रकरणं, चोदकेन हि स प्राप्यते, तस्मात् त्वत्पक्षेऽभ्यासोऽनर्थक एव। उपस्तरणाभिघारणे कर्त्तव्ये एव।

अकर्म वा संसर्गार्थनिवृत्तित्वात् तस्मादाग्निसमर्थत्वम् ॥ १२ ॥ (पुनः पू० उ०)

अक्रिया उपस्तरणाभिघारणयोः। कुतः ?। संसर्गः स्रुचि पुरोडाशचूर्णानां सूक्ष्माणां माभूदिति उपस्तरणेन स्रुक् स्निग्धीक्रियते, अभिघारणेन हविः स्रुचि अमंयुक्तं कृतं श्रवा अग्नौ पतेदिति। न तु विद्यमस्य क्षणलस्य स्रुचि संयोगो भवति, यन्निमित्तमुपस्तरणमभिघारणञ्च स्नेहनार्थं स्रुवस्य क्रियेत। तस्मात् प्राकृतस्य प्रयोजनस्य निवृत्तत्वात् क्षणलेषु उपस्तरणाभिघारणे निवर्त्तितुमर्हतः।

तत्रैव श्रूयते, एकधा ब्राह्मणे परिहरति इति। तत्र सन्देहः, किमेतत् सकृत्त्वम् उत सकृत्त्वम् इति। किं प्राप्तम्? सकृत्त्वं वा सकृत्वं वा अनियम इति। कुतः?। एकप्रकारवचन एकधेति शब्दः, सकृत्त्वमप्येकः प्रकारः, सकृत्वमपि। तद्यथा, यः सकृत् गाः प्रापयति स एकधा प्रापयतीत्युच्यते, योऽपि सकृत् प्रापयति सोऽप्येकधा प्रापयतीति, तस्मात् सकृत्त्वं सकृत्वं वा कर्त्तव्यम् इति।

एवं प्राप्ते ब्रूमः, एकधा ब्राह्मणे परिहरति इति सकृदिति गम्यते, एवं ब्रह्मभक्षस्याब्रह्मभक्षस्यापि परिहारः कृतो भविष्यति। इतरस्मिन् पक्षे कस्यचिद्ब्रह्मभक्षस्य परिहारो न क्रियेत, तत्र प्राकृतः प्रयोगवचनो बाध्येत। विकृतावामी भक्षाः प्रकृतौ, ते इह चोदकेन विकृता एव प्राप्तास्तत्र सकृत्वचन एकधाशब्दोऽवकल्प्यते। ननु वाचनिक इह भक्षोऽप्राकृतः, न प्राकृता विकृताः प्राप्तुमर्हन्ति इति। उच्यते, पुरुषसंस्कारार्थत्वेन न प्राप्नुवन्ति, द्रव्यसंस्कारार्थत्वेन तु प्राप्नुवन्तीति। यदि प्राप्नुवन्ति, किमर्थं तर्हि वचनम्? इति। भक्षोपायविधानार्थम्। ननु निर्हानं चक्षुषाकरणं वा अर्थप्राप्तम्, अर्थप्राप्तत्वादनुवादः। उच्यते, न नियमेन प्राप्यते, नियमार्थश्च विधीयते इति॥ (१०।२।४ अ०॥

क्रत्वलचरी ब्रह्मणे सर्वभक्षभागार्पणाधिकरणम्।

सर्वत्वं च तेषामधिकारात्मात्वात् ॥ १८ ॥ (पू०)

क्रत्वलचक्रैरेवोदाहरणम्। तत्र श्रूयते, सर्वं ब्रह्मणे परिहरति इति। तत्र सन्देहः, किं ब्रह्मभक्षाणामेवैष परिहारः, उत पुरुषेभ्यः शेषापनयः? इति। कथं ब्रह्मभक्षाणां परिहारः, कथं वा शेषापनयः? इति। यदि ब्रह्मणे परिहरति इत्यनूद्य सर्वम् इति विधीयते, ब्रह्मणे सर्वम् इति वानूद्य परिहरति इति विधीयते, ततो ब्रह्मभक्षाणां परिहारः। अथ सर्वम् इति लक्षयित्वा ब्रह्मणे परिहरति इति विधीयते, परिहरति इति वा लक्षयित्वा सर्वं ब्रह्मणे इति, ततः शेषापनयः। किं प्राप्तम्?। सर्वत्वं ब्रह्मभक्षाणां स्यात्। कुतः?। ब्रह्मणे परिहरति इति प्राप्तमेव न विधीयते। सर्वपरिहारस्तु अप्राप्तः तस्य विधानं भवितुमर्हति।

अथ वा अस्यैव ब्रह्मणे सर्वो भागस्तत्र कस्यचिद्भागस्य परिहारः प्राप्तः कस्यचित्र प्राप्तः, यस्य च न प्राप्तस्य परिहारो विधीयते। तस्मादधिकृतानां ब्रह्मभक्षाणामेव वाद इति।

पुरुषापनयो वा तेषामवाच्यत्वात् ॥ १९ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। पुरुषापनयः स्यात्। किमेवम् उच्येत, यत् ब्रह्मणे परिहरति, तत् सर्वमिति, सर्वमेव हि तद्विधानमनर्थकं स्यात्। अथ यत् ब्रह्मणे,

तत् सर्वं परिहरतीति। विशेषस्यानिर्देशात् न ब्रह्मशब्दो विशेषणम्। अथ यद् ब्रह्मणे, सर्वं तत् परिहरति इति। एवमपि विशेषो नैव निर्दिष्टः स्यात्। यत् सर्वं तत् परिहरतीति नैवं वचनमर्हति, सर्वं हि सर्वं, ततश्च विशेषयितव्यम्। तस्मात् सर्वं ब्रह्मणे परिहरतीति ब्रह्मसम्बन्धः सर्वस्य विधीयते चरोः, एवं न किञ्चिदनर्थकम्। तस्मात् पुरुषेभ्यः शेषापनय इति॥ (१०। २। ५ अ०)॥

भक्षभागानां स्वस्वकाले ब्रह्मणा भक्षणाधिकरणम्।

पुरुषापनयात् स्वकालत्वम्॥ २०॥

तत्रैव सन्देहः, समधिगते शेषापनये किमेकस्मिन् काले सर्वे भक्षा भक्षयितव्याः, उत स्वस्मिन् स्वस्मिन् काले? इति। किं प्राप्तम्?। भक्षयितुं तत्परिहरणं क्रियते, अतो यत् भक्षणाय परिहृतं तदनन्तरं भक्षयितव्यमेव।

एवं प्राप्ते ब्रूमः, पुरुषापनयात् स्वकालत्वम् इति, पुरुषापनयं कृत्वा कृतार्थः शब्दः स्वकालतां भक्षणानां न निवारयति, तस्माद्यथाकालमेव भक्षयितव्याः इति॥ (१०। २। ६ अ०)॥

ब्रह्मभक्षे चतुर्धाकरणादीनामभावाधिकरणम्।

एकार्थत्वादविभागः स्यात्॥ २१॥

तत्रैवेदं चिन्त्यते, प्रकृतौ व्यादेशः आम्नातः, इदं ब्रह्मण

इदं होतुरिदमध्वर्योरिदमग्नीधः इति । स इह कर्त्तव्यो न कर्त्तव्यः ? इति संशयः । चोदकप्राप्तो कर्त्तव्य इति यस्य बुद्धिः स्यात्, तस्य निवृत्त्यर्थं सूत्रम् । प्रकृतौ बहूनां सम्बन्धः कर्त्तव्यः, स विभागमन्तरेण न सिध्यतीति विभागो बहुसम्बन्धाय क्रियते । इह तु सर्वं ब्राह्मणे परिहरति इति एकस्मै सर्वस्वम्, तत्र विभागेन न प्रयोजनं, क्रियमाणोऽपि न प्राकृतार्थः स्यात्, अदृष्टार्थमेव क्रियेत तस्मात् कृष्णलचरो न व्यादेय इति ॥ (१०।२।७ अ०) ॥

ज्योतिष्टोमे ऋत्विग्दानस्यानर्थताधिकरणम् ।

ऋत्विग्दानं धर्ममात्रार्थं स्याद्दाति सामर्थ्यात् ॥ २२ ॥ (पृ०)

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत इति । तत्रेदं समामनन्ति, गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च एष द्वादशयतं दक्षिणा । इदं चापरं श्रूयते, ऋत्विग्भ्यो दक्षिणां ददाति इति । तत्र संशयः, किं दानं धर्ममात्रम्, न ऋत्विगानमनम् ? इति । किं प्राप्तम् ? । ऋत्विग्दानं धर्ममात्रं स्यात्, तस्यहि कर्त्तव्यता श्रूयते । दातिकर्त्तव्यता अस्माच्छब्दाद् गम्यते, ऋत्विगानमनं

कर्त्तव्यं वाक्याद्गम्यते, श्रुतिश्च वाक्याद् बलीयसी। लोकेऽपि अदृष्टार्थतैव ददातेर्गम्यते इति सामर्थ्यादेव नानमनादि। अपि च कर्मानुरूपमपि दाक्षिण्यं क्वचित् श्रूयते, वैधातव्यायां सहस्रमृतपेये सोमचमसः। अपि च यत्रोच्चनीचपणीपणः क्रियते स परिक्रयो भवति, न यत्र नियतपरिमाणं दानम्। तस्माद्धर्ममात्रं दानम्। अपि च नियमवन्मल्पत्वञ्च क्रियते, तददृष्टार्थत्वेनावकल्पते। क्वचिच्च श्रूयते, दक्षः, उपानद्दो, शुष्का इतिः सा हि दक्षिणा इति। को हि दक्षिनानमेत्? तस्मात् धर्ममात्रं दानमिति।

परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ २३ ॥

(सि०)

परिक्रयार्थं वा दानम्। कुतः?। कर्मसंयोगात् कर्मसंयुक्तेभ्यः श्रूयते, ऋत्विग्भ्यो दक्षिणां ददाति इति। तत्र दृष्टं प्रयोजनमुत्सृज्य न शक्यमदृष्टं कल्पयितुम्। यदपि नियमादृष्टं, तदपि दृष्टद्वारमेव, अनेन नियतेन नियतगुणकेन च दानेनानम्यमाना ऋत्विजः अभ्युदयकारिणो भवन्ति। कथम्?। आनमने गुणभूतस्त्यागशब्दोऽयते न प्रधानभूतः, वाक्यार्थश्च अवश्यं ग्रहीतव्यः, इतरथा ऋत्विग्भ्यः इत्येतदेव पदमनर्थकं स्यात्। अगृह्यमाणो सुतरां श्रुतिर्बाध्येत। यच्च, न कर्मानुरूपं दाक्षिण्यमिति। नैतावता दृष्टोऽर्थः सन् अपक्रूयेत। नियमात् दृष्टद्वारमदृष्टमित्युक्तमेव। वचनप्रामाण्याच्च दक्षोऽवगम्यते। अपि च भवति

तत्र या च मात्रती यानमनमात्रा, लोकेऽपि हि काष्ठवाह-प्रभृतिभ्यो यद्दीयते, तदसङ्कीर्त्तनेऽपि परिक्रये यानमना-र्थमेव भवति । तस्मात् परिक्रयार्थं दक्षिणादानमिति ।

दक्षिणायुक्तवचनाच्च ॥ २४ ॥ (यु० १)

दक्षिणायुक्तवचनाच्च लिङ्गात् परिक्रयार्थं दानमिति पश्यामः । दक्षिणायुक्ता वहन्ति ऋत्विजः इति ।

न चान्येनानम्येत परिक्रयात्, कर्मणः परार्थ-त्वात् ॥ २५ ॥ (यु० २)

इतश्च परिक्रयार्थं दानमिति । कुतः ? । नान्तरेण परिक्रयं, परार्थे परः प्रवर्त्तते । ननु सामादयोऽपि प्रवर्त्त-नोपायाः । न ब्रूमो, न प्रवर्त्तनोपाया इति, किन्तर्हि परिक्रयः त्वन्मात्रात इति । अतस्तेनैव परिक्रेतव्या नान्येन इति ।

परिक्रीतवचनाच्च ॥ २६ ॥ (यु० ३)

परिक्रीतवचनं भवति, तेनायमर्थो द्योत्यते, दीक्षित-दीक्षिता दक्षिणापरिक्रीता ऋत्विजो याजयन्ति इति । तस्मादपि परिक्रयार्थं दानमिति ॥

निवन्ध्येव श्रुतिवचनात् ॥ २७ ॥ (यु० ४)

सनिवनिप्राप्तं सनिवन्धं याच्ञाप्राप्तमित्यर्थः । तस्मिन् श्रुतिवचनं भवति, यज्ञो वै देवतानां न समभवत्, तं

भृत्या समभावयन्, यत् भृतिं वसते, यज्ञस्य भृत्ये दारुग्रावीदीक्षिती भृतिं वन्वीत इति। यज्ञार्थं वृद्धं भिक्षित ऋत्विजः परिक्रीतुम्, धनस्य यज्ञार्थं साधयितुं, लक्षणमेव भृतिवचनम्। भृतिश्च कर्मकरेभ्य आत्मत्यर्थं यद्दीयते। तस्मादपि परिक्रयार्थं ऋत्विग्भ्यो दानमिति॥

नैष्कर्त्तकेन संस्तवाच्च ॥ २८ ॥ (यु० ५)

नैष्कर्त्तकेन च संस्तवो भवति, यथा वै दारुग्रावो नैष्कर्त्तको निष्कर्त्तनभृतः कर्मयोगी वर्त्तते, एवं वा एते यज्ञस्य ऋत्विजः इति। नैष्कर्त्तको दारुग्रावः, यथाऽसौ, एवम् ऋत्विज इति ब्रुवन् परिक्रयार्थं दानं दर्शयति॥ १०। २। ८ अ०॥

ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थताधिकरणम्।

शेषभक्षाश्च तदृत् ॥ २९ ॥ (पू०)

सन्ति शेषभक्षा ज्योतिष्टोमे दर्शपूर्णमासयोश्च, यथा वषट्कारनिमित्ता होमाभिषवनिमित्ताश्च, तथा दृढ़ा-प्राग्निचयतुर्द्धाकरण-संयुवाककालाः। तेषु संशयः, किं ते परिक्रयार्थाः, उत न इति। किं प्राप्तम्?। शेषभक्षाश्च तदृत् भवितुमर्हन्ति, यदृत् दधिप्राशनम्। प्रीतिं हि करोति भक्षणं, प्रीत्या चानमस्ति। तस्मात् परिक्रयार्थाः शेषभक्षा इति।

संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ ३० ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति, न परिक्रयार्थं भक्षणं, द्रव्यसंस्कारार्थम् इति। कुतः ?। यज्ञार्थेन हि द्रव्यमुत्पन्नं प्रयोजनवत्, यदि तस्य संस्कारार्थं भक्षणं, ततस्तदपि प्रयोजनवत्। दधिघार्द्राभ्यञ्जावयति इत्येवमादि च एकदेशवचनं प्रकृतस्येवापेक्षं भवति, न द्रव्यस्योत्पादकं, तस्मात् द्रव्यस्य भक्षणमुच्यते, न भक्षणार्थं द्रव्यमुपादीयते, प्रकृतस्य च भक्षणम्। तस्मात् संस्कारार्थमिति गम्यते।

शेषे च समत्वात् ॥ ३१ ॥ (यु०१)

अपि च यच्छेषं द्रव्यं, तत् देवतार्थे सङ्कल्पितं यजमानेन न स्वयमुपयोक्तव्यम् इति। तस्मात्र तस्योपयोक्तुम् ऋत्विज ईयते, नो स्वस्यापि यजमानः। साम्यमत्र यजमानस्य ऋत्विग्भिः, परिक्रीणानश्च स्वीकुर्यात् द्रव्यं, तच्चास्य देवतार्थः सङ्कल्प एव न भवत्यवतिष्ठते। तस्मादपि न परिक्रयार्थं भक्षणम् इति।

स्वामिनि च दर्शनात् तत्सामान्यादितरेषां तथात्वम् ॥ ३२ ॥ (यु०२)

स्वामिनि च भक्षणं दृश्यते, यजमानपक्षमाः समुपकृता इडां भक्षयन्ति इति। यजमानस्य असंयुक्तम् अपरिक्रयः, तत्सामान्यादितरेषाम् अपि न परिक्रयः। कथम् ?। एवं सति, नैव विज्ञायते, इडाभक्षणेन यजमानपक्षमाः

परिक्रीयन्त इति। किं तत् सामान्यम्?। द्वितीया विभक्तिः। तस्मादपि न परिक्रयार्थं भक्षणमिति।

तथा चान्यार्थदर्शनम् ॥ ३३ ॥ (यु० ३)

एवम् अन्यार्थदर्शनम् इदमुपपन्नं भवति, कुण्डपायिनामयने अक्षरुकैश्चमसैः सोमान् भक्षयन्ति इति प्राप्ते भक्षे विशेषः श्रूयते, अक्षरुकैः इति। एवं सत्रेषु भक्षणं दृश्यते, तत्परिक्रयार्थत्वे न अवकल्पते। तस्मादपि न परिक्रयार्थं भक्षणमिति ॥ (१०।२।८ अ०) ॥

सत्रे ऋत्विग्वरणाभावाधिकरणम्।

वरणमृत्विजामानमनार्थत्वात् सत्रे न स्यात् स्वकर्मत्वात् ॥ ३४ ॥

सन्ति हादशाहप्रभृतीनि सत्राणि, हादशाहेऽहर्हिकामा उपेयुः इत्येवमादीनि। अस्ति च प्रकृतौ ज्योतिष्टोमे वरणम्, अग्निर्मे होता स मे होता होतस्त्वं मे होतासीति होतारम् इत्येवमादीति। तत् सत्रेषु सन्दिह्यते, किं कर्त्तव्यं न? इति। तत्र एतत् तावत्ः परीक्ष्यं, किं प्रकृतौ धर्ममात्रं वरणम्, उत परिक्रयार्थम्? इति। यदि धर्ममात्रं, प्रकृतौ सत्रेषु कर्त्तव्यम्। अथ परिक्रयार्थं, न कर्त्तव्यमिति। किं प्राप्तम्?। मन्त्रवत्त्रियमवश्चेति कृत्वा धर्ममात्रम्। तस्मात् सत्रेषु कर्त्तव्यम् इति।

एवं प्राप्ते ब्रूमः, वरणमृत्विजां सत्रेषु न स्यात्, न कर्त्तव्यमिति। स्वार्थं हि तेषां कर्म, न च कश्चिदात्मानं वृणीते। प्रकृतौ चानमनार्थं वरणं दृष्टप्रयोजनमिति न शक्यमदृष्टं कल्पयितुम्। तस्मात् सत्रेषु वरणं न स्यादिति। (१०।२।१० अ०)

सत्रे परिक्रयाभावाधिकरणम्।

परिक्रयस्य तादर्थ्यात् ॥ ३५ ॥ (नि०)

परिक्रयस्य प्रकृतौ ज्योतिष्टोमे आम्नातः, गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य ह्यादशयतं दक्षिणा इति। तत् दाक्षिण्यं सत्रे चोदकेन प्राप्तं किं कर्त्तव्यं, निवृत्तं वा? इति संशयः। किं प्राप्तम्?, कर्त्तव्यः परिक्रयश्चोदकानुग्रहाय। अपि च तत्र गवादयः प्रतिषिध्यन्ते, न त्वत्र गौर्दीयते न वासो न हिरण्यम् इति, तत् सति परिक्रयेऽवकल्पते।

एवं प्राप्ते ब्रूमः, परिक्रयस्य तादर्थ्यात् इति, परिक्रयस्य न कर्त्तव्यः। उक्तमधस्ताद्वरणं सत्रेषु न कर्त्तव्यमिति, परिक्रयश्चेति च शब्देनान्वादेशः क्रियते, न कर्त्तव्यः परिक्रयः। कुतः?। आत्मार्थत्वात्, न कश्चिदात्मानं परिक्रीणीत इति।

प्रतिषेधस्य कर्मवत् ॥ ३६ ॥ (आ०)

प्राप्तौ सत्यां प्रतिषेधोऽवकल्पते इति यदुक्तं, तत् परिहर्त्तव्यम्,

स्याद्वा प्रासर्पिकस्य धर्ममात्रत्वात् ॥ ३७ ॥ (पू०)

प्रतिषेध उपपद्यत इत्यर्थः। कस्य ?। प्रासर्पिकस्य दानस्य इति। धर्ममात्रं हि तत् सर्वेषु चोदकप्राप्तं, तन्निवर्त्तते। तस्मादुपपन्नः प्रतिषेध इति।

न दक्षिणाशब्दात् तस्मान्नित्यानुवादः स्यात् ॥ ३८ ॥ (सि०)

नायं प्रासर्पिकस्य प्रतिषेधः। कुतः ?। दक्षिणाशब्दात् दक्षिणाशब्दो ह्यत्र भवति, अदक्षिणानि सर्वाण्याहुः न हि अत्र गौर्दीयते न वासो न हिरण्यम् इति। दक्षिणाशब्दस्य परिक्रयार्थो भवति। तत्र हि श्रूयते, गौश्चाश्वाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य दाक्षायणं दक्षिणा इति, ऋत्विग्दानं दक्षिणा, न प्रासर्पिकम्। तस्यैवासौ प्रतिषेधो न प्रासर्पिकस्य। तस्मान्नित्यप्राप्तस्यैवानुवादोऽसौ न सर्वेषु दक्षिणा इति। (१०। २। ११ अ०)।

उदवसानीयस्य सवानङ्गतया तत्र दानस्य परिक्रयार्थताधिकरणम्।

उदवसानीयः सवधर्मा स्यात् तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात् ॥ ३९ ॥ (पू०)

यद्यपि उदवसानीयः, सवादुदवसाय पृष्ठ्यमनीयेन

ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन् इति। तत्रैषोऽर्थः सांप्रयिकः, दक्षिणादानं धर्ममात्रम्, उत परिक्रयार्थम्? इति? तथा इदमपरं हैतं, किं सत्राङ्गमुदवसानीयः, न? इति। यदि सत्राङ्गं, धर्ममात्रं दानम्। अथ न सत्राङ्गं, परिक्रयार्थम् इति। किं प्राप्तम्? सत्राङ्गम् इति। कुतः?। सत्रप्रकरणात्, सत्रं परिसमाप्य कर्त्तव्यमिति श्रूयते, सत्रप्रकरणात् सत्रं लक्षयित्वेति गम्यते। उदवसानीयश्च सत्रस्य विधीयते इति। सत्रस्य च फलार्थत्वात्तदुदवसानीयार्थता गम्यते। न च सत्रोदवसानकाले उदवसानीयः, लक्षणा हि तदा स्यात्। अनङ्गत्वे च फलं कल्पयितव्यं, तस्मादानन्तर्य्यादेकवाक्यतासम्बन्धाच्च सत्राङ्गमुदवसानीयः, सत्रं यथोक्तं परिसमाप्य न सन्तोष्टव्यं, न तावत् कृत्वा कृतिता मन्तव्या, इदमपरं तस्याङ्गं कर्त्तव्यमुदवसानीय इत्येवमभिसम्बन्धः क्रियते। यथा अग्निं चित्वा सौत्रामण्या यजेत वाजपेयेनेष्ट्वा द्वादशातिसवेन यजेत इति। तस्मात् सत्राङ्गम्। एवं चेत् साङ्गस्य सत्रस्य स्वयंकर्त्तृत्वात् धर्ममात्रं, तच्च दानम्। सत्रधर्मा उदवसानीय इति।

न त्वेतत्कृतित्वादिभक्तचोदितत्वाच्च ॥ ४० ॥

(भि०)

तुयब्दः पक्षं व्यावर्त्तयति। नैतदेवं धर्ममात्रमत्र दानम् इति, किन्तर्हि, परिक्रयार्थम् इति। कुतः?। नैतत् सत्राङ्गं विभक्तचोदितत्वात् नैतद् द्वादशातिसवेन

सौत्रामण्या च तुल्यं, तत्रैवं श्रूयते, यद्वोत्साङ्गं कृत्वा नैव सन्तोष्टव्यमिदमपरं तस्य कर्त्तव्यम् इति। इह पुनः सत्रमुत्सृज्य उदवसानीयः कर्त्तव्य इति, सत्रादुदवसाय उत्थायेत्यर्थः। तत्रान्योऽर्थः क्रियाशब्दस्य, यथोदितं निर्वर्त्य न प्रहातव्यम्। उत्पूर्वस्य अवपूर्वस्य स्थतेः प्रहायेत्यर्थः। प्रहाणे इह क्रियाशब्दस्तत्र पुनरनुष्ठानानन्तर्य्यं। तस्माद् विभक्तचोदितत्वान्न सत्राङ्गं, न च सत्रप्रकृतिकम्। तस्मादत्र दानं परिक्रयार्थमिति॥ (१०।२।१२ अ०)॥

उदवसानीयस्य ऋत्विजामेकैकेनानुष्ठानाधिकरणम्।

तेषां तु वचनात् द्वियज्ञवत् सहप्रयोगः स्यात्॥ ४१॥ (पू०)

इदमेवोदाहरणं, सत्रादुदवसाय पृष्ठ्यगमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन् इति। तत्रैषोऽर्थः समधिगतः, न सत्राङ्गं पृष्ठ्यगमनीयः इति। अथेदानीमिदं सन्दिह्यते, किं संहत्य तैस्तत् कर्त्तव्यम्, उत एकैकेन? इति। किं प्राप्तम्? संहत्य इति। कुतः?। उपादेयत्वेन यागे चोद्यमानस्य बहुत्वस्य श्रवणात्। स चेदेकेन क्रियेत, बहुत्वसंयुक्तः प्रयोगो न स्यात् द्वियज्ञवत्, यथा एतेन राजपुरोहितो सायुज्यकामौ यजेयाताम् इति, यद्यपि राजपुरोहितौ लक्षणत्वेन श्रूयेते एवमपि यजेयाताम् इति याग उपादेयत्वेन, यागे च एतत् कर्त्तृद्वित्वं

श्रूयते, यजेयाताम् इति। तद्वत् पृष्ठ्यमनीयेन यजेरन् इति। तस्मात् संहत्य पृष्ठ्यमनीयं प्रयुञ्जीरन् इति।

एवं स्थितं तावदपर्य्यवसितम्, अन्तराचिन्तान्तरस्थं सूत्रं तावद्व्याख्यास्यामः,

---

उदवसानीये सविभ्योऽन्ये वासत्विक्त्वाधिकरणम्। अन्तरा-चिन्ता॥

तत्रान्यानृत्विजो वृणीरन्॥ ४२॥

अस्मिन्नेवोदाहरणे एषोऽर्थः सांशयिकः; किं त एव सविष्ठ ऋत्विजः, उतान्ये वा वरीतव्याः? इति। किं प्राप्तम्? त एव। कुतः?। समानकर्तृकता हि गम्यते, उदवसाय यजेरन् इति। य एव ह्युदवसातारस्त एव यष्टार इति भवति प्रत्ययः। यथैव वचनप्रामाण्यादोदक-प्रामाणिककर्तृकतां बाधित्वा बहुकर्तृकता भवति, एवं वोदकप्रामाण्यादृत्विजो बाधित्वा वचनप्रामाण्यात् त एव भवितुमर्हन्ति इति।

एवं प्राप्ते ब्रूमः, तत्रान्यानृत्विजो वृणीरन् इति। न हि पृष्ठ्यमनीये ये सवादुदवसातारस्ते कर्त्तारो विधी-यन्ते, न तेषामुपादेयत्वेन चोदनेत्यर्थः, न चाविहितमङ्गं भवति, न चाङ्गे हीने विगुणता काचित् भवति। सन्ति च चोदकप्राप्ता अन्ये ऋत्विजः। अपि चाव यावति कर्त्तृभिप्रायं क्रियाफलं, तावति त एव कर्त्तारः, तदेतदुपयन्नविशेषादवगम्यते। न च ऋत्विजः प्रति

यानस्य कर्त्रभिप्रायं क्रियाफलम्। तस्माद्यार्त्विज्ये त एव कर्त्तारः, प्रधानयागे तावत्कर्तृन् अवगच्छामः। ऋत्विजः पुनरन्ये वरीतव्या इति॥ (१०।२।१३ भ०)॥

एकैकशस्त्वविप्रतिषेधात् प्रकृतेश्चैकसंयोगात्॥ ४३॥ (पू०)

स्थितादुत्तरम्। तुशब्दः पक्षं व्यावर्त्तयति। न पृष्ठ्यमनीयं संहत्य प्रयुञ्जीरन्, किन्तर्हि एकैकशः। कुतः?। अविप्रतिषेधात्, उदवसानेन हि पुरुषा लक्ष्यन्ते ये सचादुदवस्यन्ति इति। तत्र चैकोऽप्युदवसाता भवति, ये चोदवसानलक्षिताश्चेषां याग इति एकैकस्मिन्नपि यागो विहितो भवति, न च केनचित् प्रतिषिध्यते, तस्मादेकैकोऽपि यजेत। ननु बहूनां प्रयोग उच्यते, तैरेकैकस्य न भवति। नैष दोषः, एकैकस्मिन्नपि न वार्यते, तेन चोदकसामर्थ्यादेकैक एव यजेत इति।

यद्यु, बहुसंयुक्तः प्रयोग एकैकेन न शक्यते कर्त्तुम् इति। एवमपि न दोषः, नात्र बहुवचनं विधीयते, ये सचादुदवसातारस्तेषामेव यागः, ते च बहवः, तेषां बहूनामत्र ग्रहणानाम् अग्रहणानुवादः। एकैकस्मिंश्चापि च ते उदवसातारः। तस्मात् तेषां तत्रैव यागो भविष्यति, यथैवोदवसाने तेषामसंहतानां बहुवचनं, एवं यागेऽपि असंहतानामेव भविष्यति।

अत्रोच्यते, न बहुवचनमनुवादः, अग्रहणात्, न हि बहुवचनं यागे ग्रहणं यद्नूद्येत। अस्मिन्नधीनेयोऽनुवद-

वसानृतां यागस्थे च बहव इति । उच्यते, बहुत्वं तेषामुदवसाने, न यागे । ननु वाक्यसामर्थ्यादागेऽपि भविष्यति । नेत्याह, अपरिपूर्णं हि पदं पदान्तरमाकाङ्क्षति, ततो वाक्यं भवति, अयज्ञ यागः प्रागेव बहुवचनेन सम्बन्धो न तस्यामवस्थायां वाक्येनोदवसातारः प्राप्ताः । उपादत्ते तु तदा बहुत्वं, ततो बहुवचनसंयुक्तः पदान्तरगतान् उदवसातॄनपेक्षते, तस्माद् बहुत्वसंयुक्तः प्रयोगः कर्त्तव्यः, यथा द्वियज्ञे सचेषु च इति ।

आह,नैतदेवं, यत्र केनचित्प्रकारेणानुवादः सम्भवति तत्रानुवादो वा स्याद् विधिर्वेति । यद्यप्यपूर्वत्वादन्यत्र विधिर्न्याय्यस्तथाप्यनुवादात्, तथाप्यत्रानुवाद एव बहुत्वस्य भवितुमर्हति, तथा हि यागसम्बन्धो बहूनां न ज्ञातो भवति, तत्र दृष्टमेव प्रयोजनं, इतरस्मिन् पक्षे बहुत्वस्य यागसम्बन्धेऽदृष्टं कल्पनीयं स्यात्, तस्मादनुवाद इति । आह, द्वियज्ञेऽपि तर्ह्येवमेव प्राप्नोति सचेषु च इति । अत्रोच्यते, अस्त्यत्र विशेषः उदवसाय यजेरन् इति, राजपुरोहितौ यजेयातां, ऋत्विजाः सचमासीरन् इति । यत्र ज्ञातः ग्रन्थो भवति तत्र द्वौ प्रयोगौ गम्येते, समानाश्च कर्त्तारः अवघादेव, तत्रोत्तरप्रयोगवचनेन केवलो धात्वर्थो विधीयते, तदाश्रयः प्रयोगः, कर्त्तारश्च, तद्गता च सङ्ख्या, एवं सर्वमेतत्, धात्वर्थे विधीयमाने प्राप्तमेवानूद्यते द्वियज्ञे सचेषु च धात्वर्थो विधीयते, प्रयोगोऽपि, कर्त्तारः, तद्गता च सङ्ख्येति सर्वमेव तत्प्राप्तम् । न हि राजपुरोहितावित्येष शक्नोति प्रयोगं वक्तुं, तत्र च

कर्त्तव्यं तद्गताश्च सङ्ख्याम्। तथा ऋद्धिकामाः इति। तस्मादेवंजातीयकेषु सङ्ख्या उपादेयत्वेन श्रूयते। अतो दियज्ञादिषु मानुवादस्तेषु बहुत्वसंयुक्तः प्रवीनाः कर्त्तव्यः, इह तु न तथा। तस्मादेकैकः पृष्ठ्यमनीयेन यजेत इति। (१०।२।१४ अ०)।

कामेष्टौ दानस्याङ्गार्थताधिकरणम्।

कामेष्टौ च दानशब्दात्॥ ४४॥ (पू०)

अस्ति सारस्वते सत्रे कामेष्टिः, प्राचं प्रस्तरणं याज्यानुवाक्ये कामायाष्टाकपालं पुरोडाशं निर्वपति तस्यामस्यां पुरुषौ च धेनुके हत्वा प्रति वसुनामानमृषभमध्वर्यवे ददति इति। तत्र संशयः, किं परिक्रयार्थं दानम्, उत धर्मत्वम्? इति। पृष्ठ्यमनीये च सत्रस्याङ्गभूते परिक्रयार्थं दानमित्युक्तम्, अथेदानीमङ्गभूतायां कामेष्टौ विधीयते। तत्र किं तावत् प्राप्तम्? यथा पृष्ठ्यमनीये परिक्रयार्थम्, एवमिहापीति यच्छब्देनान्वादिश्यते। कुतः?। दानशब्दात्, दानशब्दो भवति, तस्यामस्यां पुरुषौ च धेनुके हत्वा इति। दानशब्दः कर्मकरेषु खलु परिक्रयार्थ इत्युक्तम्।

न चैतदस्ति, सत्रस्याङ्गभूतमेतत्। प्रकरणाच्च सत्रस्य स्वयंकर्तृकता, नाङ्गानां, तच्चोदकप्राप्तैः ऋत्विग्भिः सगुणं सत् सत्रस्योपकारकं भवति। अन्येस्तैर्ऋत्विग्भिर्विना

विगुणं सत्रस्य नोपकुर्य्यात्। तस्मादत्र दानं परिक्रयार्थं इति।

वचनं वा सत्रत्वात् ॥ ४५ ॥ (सि०)

वाशब्दात् पक्षो व्यावर्त्तते, नात्र परिक्रयार्थं दानं धर्म्ममात्रम् इति। कुतः?। सत्रत्वात्, सत्रे हि आनतिर्निवृत्ता। आह, नैतत् सत्रं सत्राङ्गमित्युक्तम्। उच्यते, न त्वत्रं, सत्राङ्गं तु सत्रमध्यपतितं, सत्रस्य च साङ्गस्य स्वयंकर्त्तृकता. तस्यां क्रियमाणायां सिद्धा अस्या इष्टेः कर्त्तारः। तत्र आनत्या न प्रयोजनं, श्रूयमाणं तु दानं धर्म्ममात्रं भवितुमर्हति इति। (१०।२।१५ अ०)।

दर्शपूर्णमासयोर्ह्यायदानस्याहृष्टार्थताधिकरणम्।

इष्टे चाचोदनाहक्षिणापनयः स्यात् ॥ ४६ ॥

दर्शपूर्णमासयोरिदमाम्नायते, यदि पत्नीः संयाजयन् कपालमभिजुहुयात्, वेश्वानरं द्वादशकपालं निर्वपेत् तस्यैकहायनो गौर्दक्षिणा तं स इष्टयेय दद्यात् इति। तत्र संशयः, किं परिक्रयार्थम् एकहायनस्य दानम्, उत धर्ममात्रम्? इति। किं प्राप्तं, दक्षिणाशब्दात् परिक्रयार्थमिति, परिक्रयार्थे हि दक्षिणाशब्दो भवति।

एवं प्राप्ते ब्रूमः, इष्टये च धर्ममात्रं दानम् इति चशब्देन

अन्वादिश्यते। कुतः?। अपोदनात् हेयस्य ऋत्विजः, न हि हेय ऋत्विग् भवति, ऋत्विगाचार्यौ नातिचरितव्यौ इति। यदा परिक्रेतव्ये नैव कर्त्रा प्रयोजनं नास्ति, तदा किं दक्षिणाशब्दः करिष्यति?। अपि च परिक्रयार्थे सति दक्षिणाशब्दः स्यात् पोदकग्रामोऽन्वाहार्योऽपनीयेत, तत्र पोदको बाधेत, तस्मात् धर्ममाचमेकहायनस्य दानमनृत्विजे दातव्यम् इति॥ (१०। २। १६ अ०)॥

जीवतामक्षियज्ञाधिकरणम्।

अक्ष्नियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादक्ष्णां॥ ४७॥ (मि०)

इदमाम्नायते, यदि सन्दीक्षितानां प्रमीयेत तं दग्ध्वा कृष्णाजिने अक्षीन्युपनह्य योऽस्य नेदिष्ठस्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन् ततः संवत्सरे अक्षीनि याजयेत् इति। योऽयं संवत्सरे यज्ञः, स सन्दिह्यते, किमक्ष्णामुत जीवताम्? इति, किञ्चातः प्राप्तम्?, सामानाधिकरण्यादक्ष्णामिति। किं सामानाधिकरण्यम्?। याजयतेरक्षीनि कर्मभूतानि।

ननु अक्षीण्यचेतनानि न शक्नुवन्ति स्वयं तन्त्रयितुं, कथं तानि क्रियायां कर्तृणि भवेयुः? इति। उच्यते, प्रयोज्यता तेषां श्रूयते, ततो ऽन्ये प्रयोजयितारः, ते एतानि क्रियां कारयिष्यन्ति इति।

आह, न हि अकुर्वति कारयतीति भवति, कर्तुः हि

प्रयोजको हेतुः, न चेतानि कात्स्न्र्येन क्रियासुपसंहर्त्तुं शक्नुवन्ति इति । उच्यते, वचनप्रामाण्याद् यावत् यजमानं कारयितुं शक्यन्ते, तावत् कारयिष्यन्ते, औदुम्बरीसञ्ज्ञानं शुक्रान्वारम्भणस्त्वेवमादीनि ।

आह, प्रधानमेव न शक्नुवन्ति नाङ्गानि कुर्वन्ति, याजमानानि भवन्ति इति । अत्रोच्यते, वचनसामर्थ्यात् तच्छवद्रव्यं ऋत्विजः प्रतिग्रहीष्यन्ति तद्दक्षिणास्तत्परिक्रीताः तत् पत्नन्ति ईदृशो द्रव्यत्यागो वाचनिको भविष्यति इति । आह, एवं वर्ष्यमाने याजयितृणामेव कर्त्तृत्वमुपदिष्टं भवति नाऋत्वाम् इति । उच्यते, यष्टृणामेवैतेन प्रकारेण कर्त्तृत्वमुपदिश्यते, न ऋत्विक्कर्त्तरि कारयतीति भवति, हेतुकर्त्तृत्वं चाऋत्वां यागे सति प्राप्तमेवानूद्यते, यथा, ग्रामकामं संयाजयेत् इति ग्रामकामो यजेत इति विधीयते, हेतुत्वं च प्राप्तानुवादमात्रं, तच्च दर्शयति, स्तोत्रे अस्थिकृष्णमुपदधाति इति । अऋत्वामेव यजमानत्वं दृश्यते । तस्माद् अऋत्वां यज्ञो न जीवताम् ।

इति प्राप्ते ब्रूमः, अस्थियज्ञः इतरेषां जीवतां स्यात्, ग्रामविप्रतिषिद्धो यज्ञः, अऋत्वां विप्रतिषिध्यते, त्यागो नाम मनसा क्रियते, न चाऋत्वाम् अस्ति मनः । यदुक्तं, ऋत्विजः शवद्रव्यं दक्षिणां प्रतिगृह्य तत्परिक्रीताः त्यागं कुर्वन्ति ति, ईदृशो वाचनिकस्त्यागो भवति इति । नैतदेवं, न हि जेतेत्युक्ते अयज्ञकुवस्तु वचनप्रामाण्यादन्यो यज्ञर्थो भवति, ागं कुर्वीत इति हि तद्वचनं, नान्यो यज्ञर्थ इति । न वचनप्रामाण्यादेतद्भवति, यच्छवद्रव्यं तत् गृह्यते, न हि

तद् अस्थिमिर्दत्तं भवति, न चासति दाने परिक्रयः। न च गौणोऽर्थो विधिशब्दादवगम्यते, अन्येन हि प्रमाणेन परिच्छिन्नेऽर्थे गौणः शब्दः सम्बध्यते, यथा, गौरनुबन्ध्यः इति गोजातिविशिष्टः पशुरनुबध्यते, न वाहीकः, गौरयं वाहीक इति तु संवादे वाहीके गौणः शब्दः प्रवर्त्तते। तस्मान्न त्यागविधाने अन्यो यज्यर्थः स्यात्। न चास्यां द्रव्यं स्वं सम्भवति, यत् ऋत्विजो गृहीत्वा वयमनेन परिक्रीता इति मन्येरन्। तस्मान्न कथञ्चन अस्थीनि यष्टव्यानि भवन्ति अतो न विवक्षितं सामानाधिकरण्यम् इति।

आह, सम्बन्धवचनादनर्थकं तर्हीदं वाक्यम्। नेति ब्रूमः, न हि गम्यमाने अर्थे अनर्थकं भवति, ततः संवत्सरे याजयेदित्येतावतो वाक्यात् कश्चिदर्थोऽवगम्यते, स इह विवक्षितः, अस्थीनि याजयेदित्येष सम्बन्धो न विधीयते। आह, किमस्थीनीति प्रमादपाठः?। न च प्रमादपाठ इति ब्रूमः, न हि स एवाप्रमादपाठो यो विधानार्थः मुख्यार्थश्च, अनुवदन्नप्यर्थं लक्षणयापि ब्रुवन् वाक्ये समवायं गच्छति, न च प्रमादपाठो भवति, तच्च, अस्थीनीत्येष शब्दो विद्यत् स्वमर्थं मुख्यया वृत्त्या ब्रुवन् वाक्ये न समवैति, अनुवदंस्तु लक्षणया समवेष्यति। ततः संवत्सरे याजयेत् इति जीवतः प्रकृतान् वक्ष्यति। तत्रास्थिशब्दो वर्त्तिष्यते लक्षणया, ततः संवत्सरेऽस्थिमतो याजयेदिति। के तेऽस्थिमन्तः?। ये तेन सह यष्टुं प्रक्रान्ताः। तस्माद् यस्य तानि अस्थीनि तैरस्थिभिः स यक्ष्यते लक्षयितुं, तस्मादस्थीनां यज्ञ इति।

यावदुक्तमुपयोगः स्यात् ॥ ४८ ॥ (आ० नि०)

अथ यदुक्तमस्थ्नां याजमानं दर्शयति, स्रोचेऽस्थिकुम्भ-पदधाति इति। नैतद् याजमानं, न हि अस्थीनि जन्ते इत्युक्तम्, अतो वचनप्रामाण्यादेतत् कर्म याजमानरूपं भवति, यावति वचनं, तावत्येव त्वद् भवितुमर्हति, न तत्, सर्वं याजमानं शक्नोति लक्षयितुं, तस्मा, जीवतामेव यज्ञ इति। (१०।२।१७ अ०)।

अस्थियज्ञे अस्थ्नां जपादाननुष्ठानाधिकरणम्। औदुम्बरीमानयक्रम्यशा नुष्ठानाधिकरणञ्च। (क्रत्वा चिन्ता)।

यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४९ ॥

इह जपसंस्कारमिष्टिश्च चिन्त्यते। तत्र सूत्रेतरार्थेन जपसंस्कारं चिन्त्यते, शेषेणापीष्टिः। जपाः यत्र जपति इति चोदनाः, संस्काराः केशश्मश्रु वपति इत्येवमादयः। किम् अस्थ्नां जपसंस्कारं कर्त्तव्यं, न? इति संशयः। ननु नैवास्थ्नां यज्ञो जीवतामामित्युक्तम्। अर्चोच्यते, क्रत्वा चिन्तैषा। अस्थ्नामिति क्रत्वा चिन्त्यते, अनेन प्रकारेण पूर्वाधिकरणस्य प्रयोजनं विचार्यते, यदि अस्थ्नां यज्ञः स्यात्, किं जपसंस्कारं क्रियते, न? इति। क्रत्वा-

वत् प्राप्तम् ?, विधेः प्रकरणान्तरेऽतिदेशात् सर्वकर्म स्यात् इत्यनेन न्यायेन कर्त्तव्यमिति ।

एवं प्राप्ते ब्रूमः, यदि तु वचनात्तेषां अस्त्यां यज्ञः स्यात्, तेषां जपसंस्कारं लुप्तार्थं निवर्त्तेत, न तैः यज्ञं जपितुं, नापि केशश्मश्रु वप्तुं, अयज्ञश्च चोदको न प्रापयति । अत्र सूत्रोत्तरार्द्धं, सेष्टि तदर्थत्वात् इति । दीक्षणीया इष्टिः कर्त्तव्या न ? इति विचारः । किं प्राप्तम् ? चोदकानुग्रहाय कर्त्तव्या ।

एवं प्राप्ते ब्रूमः, सइच्छा जपसंस्कारं न कर्त्तव्यम्, इष्टिर्लुप्येत इति । कुतः ? । तदर्था, हि सा, यजमानो दीक्षां ग्रहीष्यतीति, दीक्षा च व्रतानि, नियमाश्च मानसं कर्म, न चैषां मनोऽस्ति, दीक्षाग्रहणार्था चेष्टिः संयोगात् ज्ञायते, आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः इति तस्मादिष्टिरपि निवर्त्तेत इति । क्रत्वर्थं तु क्रियेत गुणभूतत्वात् । (१० । २ । १८ अ०) ।

अस्त्रियज्ञे एवेदं सन्दिह्यते, यजमाने न सन्निधौदुम्बरी भवति, तथा शुक्रं यजमानोऽन्वारभते इति । अस्त्यां यागे सति किमेवंजातीयकं कर्त्तव्यं, न ? इति । किं प्राप्तम् ?, अचेतनानामस्त्यां सर्वक्रियासु स्वातन्त्र्यं नास्ति, तस्मात् औदुम्बरीसन्निधाने शुक्रान्वारम्भे च नास्त्रीनि कर्त्तृणि भवेयुः इति ।

एवं प्राप्ते ब्रूमः, क्रत्वर्थन्तु क्रियेत, गुणभूतत्वात्, यत् क्रत्वर्थम् एवंजातीयकं, तत् क्रियेत, गुणभूतत्वात्, गुणभूतः तत्र यजमानः, यजमानपरिमाणसन्निधया औदुम्बर्या

प्रयोजनं, यजमानाम्बारब्धेन च शुक्रेण अचेतनेनैव च परिमीयते, शुक्रश्च अन्वारभ्यते। तस्मादेवंजातीयकं कर्त्तव्यम् इति। (१०।२।१९ अ०)।

अस्तियज्ञे अस्यां काम्यकर्म्माद्यननुष्ठानाधिकरणम्। (कृत्वा चिन्ता)।

कामान्यनि तु न विद्यन्ते कामात्तानात् यथेतरस्यानुच्यमानानि ॥ ५० ॥

अस्ति ज्योतिष्टोमस्तव श्रूयते, यदि कामयते वषत् पर्जन्यः इति, नीचैः सदो मिनुयात् इत्येवमादि। तदिह चोदकेन प्राप्तं काम्यं कर्त्तव्यं, न? इति सन्दिह्यते। चोदकानुग्रहाय कर्त्तव्यम् इति।

तत्रैवंजातीयानि न किञ्चित् कामयन्ते यजमानकामनिमित्तकार्थवंजातीयाः पदार्थाः। अत्रोच्यते, नात्र यजमानेन कामयमानेन प्रयोजनम्, एषोऽर्थो, नीचैः सदसि मीयमाने वृष्टिर्भवति इति, तद्यदि वृष्ट्या प्रयोजनं, नीचैः सदो मातव्यं, वृष्टिः प्रयोजनवती भविष्यतीति।

एवं प्राप्ते ब्रूमः, काम्यान्येवंजातीयकानि न कर्त्तव्यानि। कुतः?। यदि यजमानो वृष्टिं कामयेत नीचैः सदसि मीयमाने वृष्टिर्भवति। यजमानफलदं हि उपयदविशेषात् साङ्गं कर्म, नान्येषां कामयितृणां दातुमर्हति इति। न च वृष्टिर्यजमानस्य फलमिति विज्ञायते, यथेतरस्य जीवतो यजमानस्य विद्यमानेऽपि कामो-

ऽनुच्यमानो न भवति, किमङ्ग पुनरस्थ्नां, येषां काम एव नास्ति, तस्मात् काम्यानि न कर्त्तव्यानि इति ॥ (१० । २ । २० अ०) ॥

अग्नियज्ञे अस्थ्नां सूक्तवाकगताम्नासनानुष्ठानाधिकरणम् ।

ईहार्थाश्चाभावात् सूक्तवाकवत् ॥ ५१ ॥ (नि०)

सन्ति अग्नियज्ञे दर्शपूर्णमासप्रकृतिकानि चोदकप्राप्तानि प्रायणीयादीनि । तेषु चोदकप्राप्तः सूक्तवाकः, तत्रेमानि, अयं यजमान आयुरागास्ते सुप्रजास्त्वमागास्ते विश्वं प्रियमागास्ते यदनेन हविषागास्ते तदग्न्यात् तदध्यात् तदग्नौ देवारासत्ताम् इति । किम् इमानि कर्त्तव्यानि, न कर्त्तव्यानि ? इत्येषोऽर्थः सन्दिह्यते । किं तावत् प्राप्तम् ?, ईहार्था ये कामाः सूक्तवाके श्रूयन्ते, तेऽपि न स्युः । किं कारणम् ? । अभावात् कामयितुः, न हि अस्थीनि कामयन्ते, इत्येतदुक्तं, तस्मात् न कर्त्तव्यानि । सूक्तवाके इति सूचयितव्ये सूक्तवाकवदिति सूचितम् ।

कथमेवं वर्ण्यते ? इति । उच्यते, ईहार्थाः सूक्तवाकाङ्गाः, अङ्गे वतिर्द्रष्टव्यः । यथा छन्दो व्यतिक्रमाद्यूढे भक्षपदमानपरिधिकपालम् ?, मन्त्राणां यथोत्पत्तिवचनमूहवत् स्यात् इति । तस्मान्न सूक्तोपालम्भः ।

स्युर्वा अर्थवादत्वात् ॥ ५२ ॥ (पू०)

न चैतदस्ति, यदुक्तं भवता अस्यामीहार्थाः कामा न कर्त्तव्या इति। स्युर्वा अर्थवादत्वात्, स्युर्वा एते कामाः। कस्मात्?। अर्थवादत्वात्, अर्थवादा एते आयुराशास्ते सुप्रजास्त्वमाशास्ते इति, नैते विधयोऽर्थवादा एते, अर्थवादत्वाच्च तेषां क्रियां चोदक. प्रापयति, एवं चोदकानुग्रहो भवति, तस्मात् पश्यामः, ईहार्थाः कामाः कर्त्तव्या इति।

नेच्छाभिधानात् तदभावादितरस्मिन्॥ ५३॥ (मि०)

न चैतदस्ति, यदुक्तं भवता ईहार्थाः कामाः कर्त्तव्याः इति। कस्मात्?। इच्छाभिधानात्, इच्छाभिधाना एते कामाः, आयुराशास्ते दिव्यं धामाशास्ते सुप्रजास्त्वमाशास्ते इतीच्छायामुत्पत्तायां प्रयुज्यन्ते, य एतान् कामान् इच्छेत्, स चेह यजमानो नास्ति, अचेतनावन्ति एतानि अस्थीनि, अस्यामिच्छा न विद्यते, तदभावाद् अस्यामिच्छाया अभावात्। इतरस्मिन् जीवति एते कामा भविष्यन्ति, नास्थिषु, तस्मात् पश्यामोऽस्यामीहार्थाः कामा न कर्त्तव्या इति।

ननु एतेऽर्थवादा इत्युक्ताः। अत्रोच्यते, नैते अर्थवादाः, विधय एते। एवं चेत् परिहृतमेतत् भवति। तस्माद् यदुक्तं भवता, अस्यामीहार्थाः कामाः कर्त्तव्या इति, नैतदेवं, न कर्त्तव्याः, नेच्छाभिधानात् तदभावादितरस्मिन्॥ (१०।२।२१ अ०)।

अस्तियज्ञे होतृकामाभावाधिकरणम्।

स्युर्वा होतृकामाः ॥ ५४ ॥ (पू०)

दादशाहप्रभृतीनि सत्राणि तदाहरणम्। तानि प्रकृत्य श्रूयते, ततः संवत्सरे अग्नीनि याजयेत् इति। चोदकप्राप्तानि दीक्षाप्रभृतीनि कर्माणि श्रूयन्ते, सन्ति च प्रकृतौ होतृकामाः, यं कामयेत अपशुमान्स्यादिति, पराचीं तस्येडामुपह्वयेत, अपशुमानेव भवति। यं कामयते प्रमायुकः स्यादिति, तस्योच्चैस्तरां वषट् कुर्यात्, यं कामयेत पापीयान्स्यादिति, नीचैस्तरां तस्य याज्यया वषट्कुर्यात्। यं कामयेत वर्षीयान्स्यादिति, उच्चैस्तरां तस्य याज्यया वषट्कुर्यात् इति। एवं तत्र संशयः क्रियते, किमस्यां होतृकामाः कर्त्तव्या अथ वा न कर्त्तव्याः? इति। ननु जीवतां यज्ञ इत्युक्तम्।

अत्रोच्यते, अस्यां यज्ञ इत्येवं कृत्वा चिन्ता प्रवर्त्तते। तत्र सूत्रेणैवोपक्रमः क्रियते, स्युर्होतृकामाः, एतेऽस्यां कर्त्तव्याः स्युः। कस्मात्?। चोदकः प्रापयति, एवं चोदकानुग्रहो भविष्यति। तस्मात् पश्यामो होतृकामाः कर्त्तव्या इति।

न तदाग्नीध्रात् ॥ ५५ ॥ (सि०)

न चैतदस्ति, यदुक्तं भवता होतृकामाः कर्त्तव्या इति, न कर्त्तव्याः। कस्मात्?। तदाग्नीध्रात्, तदाग्नीध्रेषा भवति, यजमानाग्नीध्रेषा, यां वै कांचन यज्ञे ऋत्विज

ाग्निषमाशासते सा सर्वा यजमानस्य इति यजमान-
वषयतामाग्निषो दर्शयति। स चेह यजमानो नास्ति,
ाचेतनानि अस्थीनि, अस्थ्नां कामयितुं सामर्थ्यं नास्ति,
ार्थी समर्थेष्वाधिक्रियते इत्युक्तं, कर्त्तुर्वा श्रुतिसंयोगादिधिः
ात्स्वौं न गम्येत इति। तस्मात् पश्यामोऽस्थ्नां क्षाल-
ामः न कर्त्तव्या इति। क्षीणा कृत्वा चिन्ता, प्रयोजनं
ाच्यते। न तदाशीष्टात्। (१०।२।२२ अ०)।

यजमानस्य दिष्टगतावपि सर्व्वसारस्य समापनाधिकरणम्।

सर्वसारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ ५६ ॥ (पू०)

अस्ति सर्वसारः क्रतुः श्रुतःकर्षोऽग्निष्टोमः। मरण-
ामो ह्येतेन यजेत, यः कामयेतानामयः स्वर्गं लोक-
यम् इति। तत्र संशयः, किं दिष्टगते यजमाने
दन्तं कर्म उत्सृष्टव्यम्, उत परिसमापयितव्यम् ? इति।
न्तावत्प्राप्तम् ? सर्वसारे दिष्टगतौ यजमानस्य सत्यां
दन्तं कर्म उत्सृष्टव्यं, कर्मणो जीवसंयोगात्, जीवता
ा शक्यं, न यजीवता। तस्मादिदमर्थादापद्यते, सर्व-
ारेण दिष्टमत्यन्तं यजेत इति।

स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ॥ ५७ ॥ (सि०)

स्याद्वा तस्य परिसमाप्तिः, उभयं हि प्रत्यक्षशिष्टं,

क्रतुः, परिसमाप्तिश्च। मरणकामो हि एतेन यजेत इत्यारभ्य परिसमापयितव्यमित्याख्यातार्थः, तेन समाप्तिराख्यातेनैवोक्ता भवति। अपि चेदमाम्नायते, आभवे प्रस्तूयमाने औदुम्बरीं परितोऽग्नेन वाससा परिवेष्ट ब्राह्मणाः परिसमापयत मे यज्ञमिति सम्प्रेष्याग्निं विशति इति। यदि प्रेषमात्रं स्यात्, अदृष्टार्थं भवेत्। तस्मात् सम्प्रेषणद्वारलक्षणया परिसमाप्तिरेव विधीयते। यथा यदि सोममपहरेयुः विधावतेच्छतेति ब्रूयात् इति। अ यदुक्तं, जीवन् कर्त्ता भवति, न मृतः इति। न इत्युच्यते, जीवता वचनं प्रोक्तम्, आरब्धं परिसमापयतेति, अतः तत्कृतेवासौ परिसमाप्तिः।

अत्राह, यदासौ प्रयुक्तवांस्तदा तावत् परिसमाप्तिस्तेन न कृता, यदा परिसमाप्तिस्तदासौ नास्ति, क परिसमाप्तेः कर्त्ता? इति। अत्रोच्यते, मुक्तसंज्ञयेनैवत तुल्यं, यद्वान् मुक्तसंज्ञयं जीवन्तं कर्त्तारं मन्यते, तेनैवत तुल्यं, योऽपि परिसमापयतेति प्रेष्य परिसमाप्तिकाले जीवति, तस्यापि जीवनं परिसमापनकालेऽनुपकारकं पूर्वप्रेषादेवास्य कर्तृत्वम् उपपद्यते इति, स च पूर्वप्रेषं जीवतो अजीवतश्च तुल्यः। तस्माज्जीवन्निव अयमर्थ कर्त्तेति। अथोच्येत, जीवतः सत्त्वात् कर्तृत्वमुपपद्य इति। एतदपि तुल्यमेव, जीवतोऽपि पुरुषः कर्त्ता शरीरं, स च पतितेऽपि शरीरे पुरुषोऽस्ति। तस्मात् एव परिसमाप्तौ कर्त्तेति। अथोच्येत, याजमानास ---- हि दिष्टगतौ उत्तरं तन्त्रं कर्तुम्, अतस्त

दक्षा न प्रापयति इति । न एतदेवं, याजमानवर्जं प्रापयिष्यति सः, तस्माददोषः । अथ वा, प्रत्यक्षमेव परिसमाप्तेर्वचनं, ब्राह्मणाः संस्थापयत मे यज्ञम् इति, तत्सामर्थ्यादेव याजमानं भविष्यति ॥ (१०।२।२३ अ०) ॥

यजमानस्य दिष्टगतौ सर्वस्वारस्य शुक्रस्यर्शादियोग्याङ्गावयवेष्ठानाधिकरणम् ।

गते कर्मास्थियज्ञवत् ॥ ५८ ॥

अस्ति सर्वस्वारः क्रतुः शुनःकर्णोऽग्निष्टोमः, मरणकामो हि एतेन यजेत, यः कामयेत अनामयः स्वर्गं लोकमियाम् इति । तत्र दिष्टगतौ यजमानस्य सत्यां किं कर्त्तव्यम्, ? इति प्रश्नः, भवति चादर्शयित्वापि हौत्रीं, प्रश्ने नोपक्रमः । पक्षद्वयेऽपि प्रतिभाति भवति संशयः, सर्वाप्रसिद्धावपि भवति । यथा को नामायं पर्वतः ? का नामेयं नदी ? किमिदं फलम् ? इति । तदभिधीयते, गते कर्म्म अस्थियज्ञवत् दृष्टां गतिं गते यजमाने अस्थियज्ञवत् कर्म भविष्यति । यथा अस्थियज्ञे क्रत्वर्थं क्रियते नान्यत् अस्थिभिः, एवं दिष्टामपि गतिं गते क्रत्वर्थं धनेन कारयितव्यं नान्यत् । यथा, शुक्रं यजमानोऽन्वारभते, यजमानेन सम्मिता औदुम्बरी भवति इति ॥ (१० । २ । १४ अ०) ॥

सर्वस्वारे यजमानस्य दिष्टगतावपि आयुराशंसनाधिकरणम् ।

जीवत्यवचनमायुराशिषस्तदर्थत्वात् ॥५९॥ (पू०

सर्वस्वारे एव जीवति यजमाने भवत्येव संशयः आयास्ते यजमानः इति किमायुराशीर्वक्तव्या, उत न इति । किं प्राप्तम् ?, 'जीवति अवचनम् आयुराशिषः' कुतः ? । तदर्थत्वात्, यत्रायुरायास्ते यजमानस्तत्र प्रस्तरं प्रयच्छत एवंकामो यजमान इत्यावेदयितव्यं भवति, तत् यजमानः कथं प्राप्नुयात् इति । स च अयमत्र यजमानो विपरीतकामो, मरणकामः । तस्मादायुराशीस्तत्र न वक्तव्या ।

वचनं वा भागित्वात् प्राक् यथोक्तात् ॥ ६० ॥ (सि०)

उच्यते, वक्तव्या आयुराशीः, भागी हि आयुराशीर्वादः । आर्भवे प्रस्तूयमाने यजमानस्य दिष्टा गतिः प्रार्थयितव्या भवति । प्राक् आर्भवकालादायुरायास्ते यजमानः, आर्भवकालं यावज्जीव्यासम् इति । षोढकर्षेव मनुष्यधीयते । तस्मादत्रापि आयुराशीर्वक्तव्या इति । (१०।२।२५ अ०)।

द्वादशाहे ऋतुयाज्याऽनुष्ठानाधिकरणम् ।

क्रिया स्याद्धर्मभावाद्याम् ॥ ६१ ॥

अस्ति हादश्याहः, हादश्याहस्यदक्षिणामा उपेयुः इति। अस्ति तत्र चोदकप्राप्तं धर्ममात्रं किञ्चित्, यथा ऋतुयाज्या, वरणम्, आग्नेयाहिरण्यदानञ्च। तत्र संशयः किं धर्ममात्रं कार्य्यं, न ?.इति। किं प्राप्तम् ? स्वयंकर्तृकत्वात् सत्रस्य, वरणं दानञ्च निवर्त्तते इत्युक्तम्। न च, अन्यदचनमस्ति, कर्त्तव्यमिति, यावानेव श्रुतस्य उक्तर्गे दोषः, तावान् अश्रुतकल्पनायाम्। तस्मान्न कर्त्तव्यमिति।

एवं प्राप्ते ब्रूमः, क्रिया स्याद्धर्ममात्राणां, यद्धि वरणं दानं वा, न भवत्यानर्थ्यं, तत् स्वयंकर्तृकेऽपि न विरोधमुपैति। तस्माच्चोदकानुग्रहाय क्रिया स्यादिति॥ (१०। २।२६ अ०)॥

पवमानेष्टौ निर्वापानुष्ठानाधिकरणम्।

गुणलोपे च मुख्यस्य॥ ६२॥

सन्ति अग्न्याधाने पवमानेष्टयः, यः अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेत्, अग्नये पावकायाग्नये शुचये इति। तत्र चोदकेन प्राप्तम् अग्निहोत्रहवण्या हवींषि निर्वपेत् इति, तत्र तावदग्निहोत्रस्य कालः, तस्मादग्निहोत्रहवणी नास्ति पवमानेष्टिषु, तदभावे किं निर्वापोऽपि न कर्त्तव्यः, उत कर्त्तव्यः ? इति। किं प्राप्तम् ?, यथाश्रुतोऽसौ न शक्यते कर्त्तुं, न चायथाश्रुतेन कृतेन किञ्चिदस्ति प्रयोजनम्। तस्मादिगुणत्वान्न कर्त्तव्य इति।

एवं प्राप्ते ब्रूमः, गुणलोपे च मुख्यस्य क्रिया स्यात् इति। गुणोऽग्निहोत्रहवणी, प्रधानं निर्वापः, यदि निर्वापो न सम्भवेत्, ततस्तदसम्भवात् अग्निहोत्रहवण्यपि न सम्भवतीति निवर्त्तेत। न तु गुणलोपे मुख्यं न सम्भवतीति। तस्मान्निर्वापः कर्त्तव्यः, अग्निहोत्रहवणीसाधनता च तस्य न सम्भवतीति निवर्त्तते ॥ (१०।२।२७ अ०) ॥

वाजपेये मुष्टिलोपाधिकरणम्।

मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वात् स्यात् ॥ ६३ ॥ (पू०)

अस्ति वाजपेयः, श्रूयते वाजपेयेन स्वाराज्यकामो यजेत इति। तत्र श्रूयते, नैवारः सप्तदशशरावः क्षीरे चरुर्भवति इति। अस्ति तु प्रकृतौ सङ्ख्या मुष्टयश्च, चतुरो मुष्टीन्निर्वपति इति, उभयं चोदकेन प्राप्तम्। तत्र संशयः, किं सङ्ख्यानुग्रहो मुष्टिलोपः, उत मुष्ट्यनुग्रहः सङ्ख्यालोपः? अथ वा किं सङ्ख्यालोपः? अथ वा किं सङ्ख्याया मुष्टीनाञ्च लोपः? अथ वा अन्यतरलोपः? इति। किं प्राप्तम्? अन्यतरलोपः इति यदि वा मुष्टिषु, यदि वा सङ्ख्यायाम्। कुतः?। नियमकारिणः शब्दस्याभावात् अनियम इति।

एवं प्राप्ते ब्रूमः, मुष्टिलोपः स्यात्, सङ्ख्यानुग्रहश्चेति। कुतः?। मुख्यत्वात् सङ्ख्यायाः, पूर्वं हि सङ्ख्या निष्पद्यते, सा पूर्वमेव अवगम्यते, न तदवगमकाले सङ्ख्याविज्ञानस्य

परिपन्थि किञ्चिद्विज्ञानमस्ति, तस्मिन्विप्रतिषिद्धे सङ्ख्याविज्ञाने प्राप्ते मुष्टिविज्ञानमापद्यते, तत् सङ्ख्याविज्ञानपरिपन्थितां नाचरितुमर्हति। तस्माद् यद्यन्यत्वान्मुष्टीनां लोपः। मुख्यार्थत्वात् सङ्ख्यानुग्रहः। तदुक्तं, मुख्यं वा पूर्वचोदनालोकवत् इति।

एवं प्राप्ते ब्रूमः, मुष्टिलोपेन सङ्ख्या लोपमर्हति इति। कुतः ?। तद्गुणत्वात्, मुष्टिगुणो हि सङ्ख्या श्रूयते, चतुरो मुष्टीः इति, चतुःसङ्ख्याविशिष्टा मुष्टयः कथं भवेयुरिति सङ्ख्या उच्चार्यते, न स्वार्थे। तस्मात् सङ्ख्या पूर्वनिर्दिष्टा अनिर्दिष्टैव, सा हि परविशेषणार्थमेवोच्चार्यते, तेन नैव तस्या अनुग्रहः कार्यः, मुष्टिलोपे सति तदधिकरणा सङ्ख्या अधिकरणाभावान्निवर्त्तते। अन्याधिकरणायां क्रियमाणायां न प्रकृतिवत् कृता स्यात्। सङ्ख्यालोपे पुनर्मुष्टयो निर्वापाधिकरणाः श्रूयमाणा अधिकरणानिहत्या न निवर्त्स्यन्ति। तस्मान्मुष्टिगुणत्वात् सङ्ख्या निवर्त्तेत न मुष्टयः। तदुक्तम्, गुणविरोधे च तादर्थ्यात् इति।

न निर्वापशेषत्वात् ॥ ६४ ॥ (सि०)

नैतदेवं, न सङ्ख्या मुष्टिषु श्रूयते, यदि मुष्टिषु श्रूयेत, तद्गुणत्वान्निवर्त्तेत। क्व तर्हि श्रूयते ?। निर्वापे। कथम् ?। नैवमभिसम्बन्धः क्रियते, चतुरो मुष्टीरिति, कथं तर्हि ?, चतुरो निर्वपति इति, मुष्टिगुणः सङ्ख्यागुणश्च निर्वापो निर्दिश्यते, क्रियासम्बन्धे हि द्वितीया विभक्तिर्भवति। कथम् ?। कारकविभक्तिर्हि सा, कारकं क्रियाया

एव भवति, न द्रव्यस्य। अतः चतुःसङ्ख्या श्रुत्या अवगता निर्वापस्य, वाक्येन मुष्टीनां, वाक्याच्च श्रुतिर्बलीयसी। तस्मान्मुख्यानुग्रहान्मुष्टीलोप एव इति।

संख्या तु चोदनां प्रति सामान्यात् तद्विकारः संयोगाच्च परं मुष्टेः ॥ ६५ ॥ (द्वि० पू०)

तुरुष्कः एतं पक्षं व्यावर्त्तयति। न सङ्ख्यानुग्रहो मुष्टिलोप इति, किं तर्हि? सङ्ख्यया सङ्ख्या निवर्त्तते, शरावैश्च मुष्टयः। कथम्?। सामान्यात्, निर्वापसाधनं द्रव्यं प्रकृतौ मुष्टयः, तासां परिच्छेदिका चतुःसङ्ख्या, इह समदशसङ्ख्याकः शरावद्रव्यकरम्भवतीति श्रूयते, तत्र मापनार्थं मुष्टिद्रव्यं मापनार्थैः शरावैर्निवर्त्त्यते, तत्परिच्छेदनार्था चतुःसङ्ख्या परिच्छेदार्थया समदशसङ्ख्यया निवर्त्त्यते। तद्यथा इदं दधि घृतं शाकमिमे शालयः, देवदत्तो भोजयितव्यः, देवदत्तवद् यद्यदत्तस्तेनेति भोजने यत् घृतेन शक्यते कर्त्तुं, तत् तैलेन क्रियते। तस्माद् यद्यपि न श्रूयते तैलेन सेहयितव्यम् इति, तथापि समानकार्यत्वात् तैलं घृतस्य विनिवर्त्तकं भवति। एवं सङ्ख्यापरिच्छेदं कुर्वती परिच्छेदिकाया एव सङ्ख्याया निवर्त्तिका भवितुमर्हति। परं च शरावद्रव्यं मुष्टेः निवर्त्तकं संयोगात्। तस्मात् प्राकृती सङ्ख्या प्राकृतं च द्रव्यं निवर्त्तते।

न चोदनाभिसम्बन्धात् प्रकृतौ संस्कारयोगात् ॥ ६६ ॥ (सि०)

न एतदेवम्। चोदनेति यागं ब्रूमः। यागसम्बद्धा हि समदग्यसङ्ख्या ग्रहवद्द्रव्यञ्च, प्रकृतौ निर्वापसंस्कारसम्बद्धा चतुःसङ्ख्या मुष्टिद्रव्यञ्च, न चान्यच्च क्रियमाणं समानकार्य्यमपि अन्यच्च निवर्त्तकं भवति, यस्य हि प्रत्यक्षश्रुतेन चोदकप्राप्तस्य कार्य्यमभिनिर्वर्त्त्यते, तेन च यागे क्रियमाणे निर्वापकार्य्यं निवर्त्त्यते। तस्मान्निर्वापप्राप्तं किञ्चिदपि अनेन न निवर्त्त्यत इति। विरोधात्तु चतुर्भिर्मुष्टिभिर्निरूप्यमाणं द्रव्यं न समदग्यग्रहवं भवति, तस्माद्विरोधात् अन्यतरं निवर्त्त्यते द्रव्यं सङ्ख्या वा, तत्र चतुःसङ्ख्यानुग्रहान्मुष्टिलोपो न्याय्यतर इति॥ (१०। २। २८ अ०)॥

धेनुमालभेतेत्यादिश्रुतौ धेन्वादिशब्दानां गोवाचिताधिकरणम्।

औत्पत्तिकं तु द्रव्यतो विकारः स्यात्कार्य्यत्वात्॥ ६७॥

क्वचित् श्रूयते, द्यावापृथिव्यां धेनुमालभेत मारुतं वत्सैन्द्रं ऋषभम् इति। तदत्र संशयः, किमजा धेनुवत्सर्षभाः, उत गावः? इति। किं प्राप्तम्?, चोदकानुग्रहाय अजा इति, गुणनिमित्तास्ते शब्दाः, स गुणश्चोदकेन प्राप्ते द्रव्ये आवेशयितव्यः। ननु गवि गुणमाहुस्ते शब्दाः। सत्यं गवि आहुः, ननु गौरत्र प्रत्यक्षेण वचनेन, चोदकेन वा। स एष गुणवचनो यद्यपि श्रुत्या गोविशेषानं गुणं वदति, वाक्येनालब्धद्रव्यम् आक्षिपति, तथापि

गोद्रव्यस्याभावात् आलभतिवाक्यमेव गच्छति न श्रुतिः। अपि च धानवयोवचना एते शब्दाः, गुणसामून्यत्वात् न क्रियया सम्बध्यन्ते, द्रव्येणैषां सम्बन्धो भवति, चोदकप्राप्तञ्च द्रव्यम्। तेनैषां सामानाधिकरण्यम्। यथा अग्नी हे धेनू ददाति, तस्य पुरुषो धेनुर्दक्षिणा। तथा अजर्षभस्य अजिनमवस्तृणाति इति धानवयोवचनः शब्दस्तदेकवाक्यगतेनैव द्रव्येण सम्बध्यते। एवमिहापि चोदकप्राप्तेन द्रव्येण सम्बंत्स्यत इति। तस्मादजा धेनुवत्सऋषभा इति।

एवं प्राप्ते ब्रूमः, औत्पत्तिके एतस्मिन् उत्पत्त्यैव जातिविशिष्टे गुणशब्दे द्रव्यतो विकारः स्यात्, द्रव्यमपि विकुर्य्यात् न गुणमात्रं, यदेतज्जातिविशिष्टं धानं वयश्च, न तद् अजपशुषु शक्यं कर्त्तुं, गोपशुष्वेव तद् भवति। नन्वत्र यदपि स्यात् शक्यमावेशयितुं, तद् आवेशयिष्यते, यत्र शक्यं, तत् प्रमादिष्यते, यथा अजा धेनुवत्सऋषभाः इति उच्यते, विशिष्टस्तत्र अजशब्देन धेन्वादीनामेकवाक्यभावः. इह चोदकेन अजद्रव्यं, चोदकस्य विरोधे सति न अजद्रव्यं प्रापयति। न च धेन्वादीनां द्रव्येण सम्बन्धः, कारकविभक्तिरेषा आलभ्येन सम्बन्धं करोति। गवि सा च श्रुतिः, द्रव्यसम्बन्धो वाक्येन स्यात्, तत्र दुर्बलं श्रुतेः। तस्मिंश्च जातिविशिष्टे गुणे आलम्भसंयुक्ते सति न शक्यम् अजाद्रव्येण भवितुम्। न च चोदकापेक्षया प्रत्यक्षा जातिरुत्सृष्टुं शक्यते। तस्माद् गावो धेन्वाद्यो भविष्यन्तीति। (१०।२।२९ अ०)।

वायव्यं श्वेतमालभेतेत्यनेन अजस्यैवालम्भनाधिकरणम्।

नमित्तिके तु कार्य्यत्वात् प्रकृतेः स्यात् तदापत्तेः ॥ ६८ ॥

इदमामनन्ति, वायव्यं श्वेतमालभेत भूतिकामः इति। अत्र संशयः, किमिहापि नाजः पशुः कर्त्तव्यः, उत अजः पशुः ? इति। उच्यते, औत्पत्तिकोऽयं श्वेतगुणसम्बन्धे श्वेतशब्दः, अतो यः कश्चित् श्वेतगुणसम्बद्धः, स आलभ्यः, न हि श्वेतशब्दः प्रत्यक्षः सन् कुतश्चित् श्वेतद्रव्यात् चोदकेन निवर्त्तयितव्यः। तस्माद् अजो गौरन्यो वा श्वेत आलभ्यव्य इति।

एवं प्राप्ते ब्रूमः, नैमित्तिके एतस्मिन् श्वेतगुणनिमित्तके द्रव्ये श्वेतशब्दे सति गुणमात्रं विक्रियते, न ह्यत्र जातिविशिष्टं द्रव्यं प्रतीयते, यदेव आलम्भसाधनभूतं तदेव परिच्छेत्तव्यं, इत्येतदाख्यादवगम्यते। यच्चास्य चोदकप्राप्तं द्रव्यं साधनमविरुध्यमानं श्रुत्या प्राप्नोति, तदयं श्वेतशब्दः परिच्छेत्स्यति। ननु अजादन्यान्यपि द्रव्याणि परिच्छेत्तुमयं शक्नोति। न ब्रूमो न शक्नोति, न तेन परिच्छित्तेन प्रयोजनमस्ति। तस्मात् प्रत्यक्षोऽपि श्वेतशब्दः क्रामनेव परिच्छिन्द्यात् नान्यं पशुमिति। (१०। २। ३० अ०)।

माधवः, विधायाञ्च खलेवाल्यादेरुलूखलं च यथाक्रमं खादिरत्वं इत्यादि-नियमाधिकरणम्।

विप्रतिषेधे तद्वचनात् प्राकृतगुणलोपः स्यात् तेन च कर्मसंयोगात् ॥ ६६ ॥

माधवः यूयते, खलेवाली यूपो भवति इति। तत्र सन्देहः, किं खादिरश्चोदकेन प्राप्येत, स खलेवाली कर्त्तव्यः, अथ न प्राप्यते, खादिरी अखादिरी वा खलेवाली स्यात् ? इति। तथा विधायां श्रूयते, दधि मधु घृतमाद्यो धानाः तण्डुलास्तत्संसृष्टं प्राजापत्यं भवति इति। तत्रापि सन्देहः, किं व्रीहयश्चोदकेन प्राप्यन्ते, व्रैहास्तण्डुलाः कर्त्तव्याः, उत न प्राप्यन्ते, व्रैहा अव्रैहा वा तण्डुला उपादातव्याः ? इति।

किं तावत् प्राप्तम् ? खादिरादिः खलेवाली कर्त्तव्या, व्रैहास्तण्डुलाः कर्त्तव्याः, चोदकेन खादिरादयो व्रीहयश्च प्राप्नुवन्ति। एवं चोदकानुग्रहो भविष्यति, तेषां प्राप्तानां खलेवालीत्वं विधीयते, यो यूपः स खलेवाली कर्त्तव्य इति। अथ्यते, हि यूपः खलेवाली कर्त्तव्यः, न खलेवाली केनचित्कारेण यूपो भवति, खादिरादीनां हि काष्ठानां संस्कारैर्यूपः क्रियते छेदनादिभिः, न त्वन्येषाम्। तत्र यूपो भवति इति यूपकार्य्ये भवतीत्युक्तं स्यात्, तथा खलेवाल्यश्चो भवेत्, व्रीहीणामपि तण्डुलाश्चोदकेन प्राप्ता एव, तेषां तद्भूतानां पिष्टभावं प्रत्याख्याय देवतासम्बन्धः क्रियते। तस्मात् खादिरादयः खलेवालीत्वमापादयितव्याः, व्रीहयश्च तण्डुलभावमापादयितव्या इति।

एवं प्राप्ते ब्रूमः, विप्रतिषेधे एतस्मिन् प्राकृतस्य गुणस्य लोपः स्यात्। कथं विप्रतिषेधः?। तद्वचनात्, खलेवाल्या यूपस्य विधीयते, न यूपस्य खलेवालीता, तथा अव्यवहितेन भवतिना सम्बन्धात् प्रत्यक्षं वाक्यम्, इतरथा व्यवहितेन परोक्षं स्यात्। खलेवालीशब्दश्च यः खले वारणे प्रवर्त्तते तस्य वाचकः, तथाभूतस्य यूपकार्य्ये विनियुज्यते, या खलेवाली स यूप इति, शक्यते च यूपकार्य्ये विनियोक्तुम्। यत्तु, 'यूपशब्दः कार्य्यलक्षणार्थ इति, व्यवधानाल्लक्षणापि न्यायकी, प्रत्यक्षं हि लक्षणायां, परोक्षं व्यवधाने वाक्यम्। तस्माद् यज्जातीयस्य हस्तस्य खलेवाली कृता, तज्जातीयस्य यूपकार्य्ये विनियोक्तव्या, नैनां चोदको विशेषे अवस्थापयितुं शक्नोति, प्रत्यक्षा हि श्रुतिः, तथा चोदकेन बाधिता स्यात्। तस्माद् खादिरादिनियम इति। (१०।२।३१ अ०)।

खलेवाल्यां तक्षणाद्यननुष्ठानाधिकरणम्।

परेषां प्रतिषेधः स्यात् ॥ ७० ॥ (सि०)

खलेवाल्यामेव संशयः, किं तक्षणं जोषणमुच्छ्रयणमित्येवमादयः पदार्थाः कर्त्तव्याः, न? इति। किं प्राप्तम्? चोदकानुग्रहाय कर्त्तव्या इति।

एवं प्राप्ते ब्रूमः, परेषां प्रतिषेधः स्यात् इति। तथाभूतस्य हि यूपकार्य्ये विनियोगे कृते कृतः शास्त्रार्थो भवति,

क्रते शास्त्रार्थे स अपरस्मै गुणाय यतितव्यम्। अपि च तक्षणादीनि यूपकारणानि, न चात्र यूपे योजनम्, अयूपो हि यूपकार्य्ये विनियोगयितव्यः। तस्मात् तक्षणादयो न कर्त्तव्या इति।

प्रतिषेधाच्च ॥ ७१ ॥ (है०)

इतश्च न कर्त्तव्याः, विप्रतिषेधः क्रतौ भवेत्, क्रियमाणेषु तस्याः खलेवाल्याः, यत् काष्ठं खलेवारणप्रवृत्तं, सा खलेवाली, तादृश्येवोपादातव्या, तक्षणे क्रियमाणे सा विनश्येत्, द्रव्यान्तरं जायेत? यत् न खले वारणे प्रवृत्तम्। जोषणं तु भ्रष्टावसरमेव, जोषितं तद् अन्यार्थेनैव, वृक्षाणां हि जोषणं न तु विकारस्य। उच्छ्रयणं चोच्छ्रितायां अशक्यमेव। तस्मात् तक्षणादयो न कर्त्तव्या इति॥ (१०।२।३२ अ०)॥

खलेवाल्यां पर्य्यूहणादिसंस्काराणामनुष्ठानाधिकरणम्।

अर्थाभावे संस्कारत्वं स्यात् ॥ ७२ ॥

खलेवाल्यामेव सन्देहः, किं मैत्रावरुणदण्डेन भूमेः ममक्रिया, अङ्गिरवसेचनं, बलवद्वधानमञ्जनमित्येवमादयः पदार्थाः कर्त्तव्याः, उत न? इति। किं प्राप्तम्? न कर्त्तव्या इति, परेषां प्रतिषेधः स्यात् इत्युक्तम्। यादृग्यः खले वारणे वर्त्तते, तादृश्य एव यूपकार्य्ये विनियोक्तव्याः अयूपः, यूपार्थाश्च चोदकप्राप्ताः संस्काराः तस्मिन् निवर्त्तेरन् इति।

एवं प्राप्ते ब्रूमः, अर्थाभावे कार्याभावे यदि खले-वाल्यास्तैः संस्कारैः कार्यं न भवति, ततो यूपत्वमेव तेषां निमित्तं स्यात्, खलेवाल्यां न भवेयुः, इह पुनर्भूमेः सम-क्रियया अङ्गिरस्त्वेचनेन बलवद्वधानेन च कार्यमस्ति कार्यं, शिथिला हि सा खले वारत्वे न भवति, न च खलेवालीत्वमुपपद्यन्ति । तस्मात् कर्त्तव्याः । अञ्जनमपि अवि-घातकं चोदकप्राप्तं क्रियमाणमधिकाय गुणाय स्यान्न दोषाय । तस्मात् तदपि कर्त्तव्यमिति ॥ (१०।२।३३अ०) ॥

महापितृयज्ञे धानासु अवघातानुष्ठानाधिकरणम् ।

अर्थेन च विपर्य्यासे तादर्थ्यात् तत्त्वमेव स्यात् ॥ ७३ ॥

अस्ति महापितृयज्ञः, सोमाय पितृमते षट्कपालं पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवा-न्याये दुग्धे मन्थम् इति । धाना इत्यत्र सन्देहः, किं धानासु हन्तिः कर्त्तव्यः, उत न ? इति । किं प्राप्तम् ? न कर्त्तव्य इति । कुतः ? । विघातात्, क्रियमाणे हन्तौ धानात्वं विहन्येत सक्तवो हि भवेयुस्तस्मात् न कर्त्तव्या इति ।

एवं प्राप्ते ब्रूमः, उक्तम् अविघातकम् अधिकाय गुणाय कर्त्तव्यम् अञ्जनवत् इति । आह अञ्जनम् अविघातकं,

इत्तिस्तु धानात्वं विहन्तीति। अभीष्यते, यद्या न विघातकं भवति, तद्या करिष्यते, विपर्ययसिष्यते तथा, न विहनिष्यते। विपर्यासे क्रममात्रं न ज्ञातं भवति, पदार्थस्तु न निवर्त्तते, तदुक्तं, गुणलोपे च मुख्यक्रियाभवतीति। तस्मात् पूर्वं इत्तिं कृत्वा पाकः कार्य्यः, तत्र हि इत्तिः पाकार्थी भविष्यति, न धानात्वं विहनिष्यते इति।

इति भट्टश्रीप्रवरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य द्वितीयः पादः।

मीमांसा-दर्शने

१० अध्याये ३ पादः।

पत्न्यादौ सानिध्येनादिप्राकृतेतिकर्त्तव्यतानुष्ठानाधिकरणम्।

विकृतौ शब्दवत्वात् प्रधानस्य गुणानामधिकोत्पत्तिः सन्निधानात् ॥ १ ॥ (पृ०)

अस्ति सोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्रेदं समाम्नायते, एकादश प्रयाजान् यजत्येकादशानुयाजान् यजति इति। तद्या

ातुर्मास्यानि चातुर्मास्यैः स्वर्गकामो यजेत इति। त्राप्याम्नायते, नव प्रयाजान् यजति नवानुयाजान् इति। था वायव्यं श्वेतमालभेत भूतिकामः इति। तत्राप्याम्नायते, हिरण्यगर्भः समवर्त्तताग्रे इत्याधारमाधारयति। था अवभृथे श्रूयते, अप्सु नृणां प्रास्याधारमाधारयति ति। तदेतेषु संशयः, किं प्राकृतेतिकर्त्तव्यता न प्राप्यते, ग्राम्नायां कर्मान्तराण्येतानि चोद्यन्ते, अथ वा प्राप्यते, ाम्नायां गुणविधयः? इति। किं प्राप्तम्? न प्राप्यते ति। विकृतौ तस्यां तस्यां शब्दवत् प्रधानं नाङ्गानि, स्मादग्नीषोमीयादिषु गुणकर्मणामधिकानाम् उत्पत्तिः। ाजति, आधारमाधारयतीति च कर्मान्तराण्येतानि विधी-यन्ते, तथा हि श्रुतिरनुगृहीता भवति, तैरेव च तानि ाङ्गानि जायन्ते, तस्मात् प्राकृती इतिकर्त्तव्यता न ाप्यते, सन्निहिता हि सा प्रकृतौ, न प्रकृतिं सन्निहिता-तिक्रमिष्यति इति।

प्रकृतिवत् तस्य चानुपरोधः ॥ २ ॥ (यु०)

एवञ्च न उपरोधो भविष्यति। क उपरोधः?। प्रकृतिवदिति कल्पना, स चोदकशब्दो न दूरे सतीम् इमा-मनेकवाक्यव्यवहितां प्रकृतिमपेक्षिष्यते, तस्मात् कर्म्मान्त-राणि चोद्यन्ते, प्रयाजयागान् करोति, नव करोति, आधारं करोति, हिरण्यगर्भः समवर्त्तताग्रे इति करोति इति।

चोदनाप्रभुत्वाच्च ॥ ३ ॥ (आ० नि० ॥

इदं परिचोदनोत्तरं सूत्रं, ननु एषां कर्म चोदयितुं सामर्थ्यं नास्ति। कथमिति। नैतस्माद्दाक्षादिदमवगम्यते, यागं करोति इति, कथं तर्हि?, यागे एकादशसङ्ख्यां करोति इति, यागे गुणवत्तां भावयतीति गुणशब्दश्रवणात्, यागसत्तायां भाव्यमानायां गुणशब्दश्रवणमनर्थकं स्यात्। तस्माद् गुणविधिस्वरूपा एते शब्दा इति।

अत्रोच्यते, अस्त्येतेषां चोदनाप्रभुत्वे सामर्थ्यं, प्रभवन्त्येते कर्म चोदयितुम्। कुतः?। आख्यातशब्दा ह्येते, आख्यातशब्दाश्च कर्मणः चोदकाः समधिगताः, भावार्थाः कर्मशब्दाः (२।१।१सू०) इति। त एते सगुणं कर्म चोदयिष्यन्ति। यागः कर्त्तव्यः, एकादशसङ्ख्या चेत्येवं सर्वत्र। तस्मात् कर्मणश्चोदका एते शब्दाः। इतिकर्त्तव्यता न प्राप्नोति इति।

प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात् तस्य विध्युपलक्षणात् सर्वो हि पूर्ववान् विधिरविशेषात् प्रवर्त्तितः॥ ४॥ (सि०)

न त्वेतदस्ति, इतिकर्त्तव्यता न प्राप्यते कर्मान्तराणि इति। प्रधानं प्राकृतम् अङ्गसंयुक्तं तथाभूतमपूर्वम् अपि वैकृतं स्यात्। उक्तमेतद् विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्त्तते, तथा हि लिङ्दर्शनम् (७।४।१०सू०) इति। तस्य प्राकृतस्य कर्मणो विधिः वैकृतेषु कर्मसु केषुचिदुपलक्ष्यते। तस्मात् सर्वः वैकृतो विधिः पूर्ववान् प्रकृतिपूर्वकः, अविशेषात्

र्त्तितः चोदकादवगम्यते, तस्मात् इहापि प्राकृती इति-
र्त्तव्यता प्राप्यते । यदुच्यते, प्रधानादिभिर्निराकाङ्-
क्षात् प्रकृती इतिकर्त्तव्यता न प्राप्यते इति । स्यादेत-
दं, यदि यागो विधीयते, यागे हि विधीयमाने एका-
ग्र, नव, हिरण्यगर्भः समवर्त्तताग्रे इत्येतानि पदान्य-
र्थकानि भवेयुः, न च शक्यते वक्तुमेकादयादीनि अनू-
द्यन्ते इति, अपूर्वाणि हि तानि अवश्यं विधातव्यानि,
ानि च वाक्येन यागे । अत्र यागो विधीयते, यागे
ा सङ्ख्या, तथा वाक्यं भिद्येत । तस्माद् इतिकर्त्तव्य-
ायां प्राप्तायां गुणविधय एते इति ।

न चाङ्गविधिरनङ्गे स्यात् ॥ ५ ॥ (१म यु०)

इतश्च गुणविधय इति । न हि अनङ्गे कर्मणि अङ्गस्य
विशेषविधिः स्यात् । भवति च विशेषविधिः, आञ्चवालः
प्रस्तरः इति । न ह्यसति प्रस्तरे प्रस्तरविशेषः श्रियेत,
यथा यस्य नास्ति पुत्रो, न तस्य पुत्रस्य क्रीडनकानि
क्रियन्ते । एवमिहापि प्रस्तरस्याञ्चवालता न विधीयेत ।
तस्माद् गुणविधय इति ।

कर्मणस्त्वेकशब्दात् सन्निधाने विधेराख्यासंयोगो गुणेन तद्विकारः स्यात् शब्दस्य विधिगामित्वात् गुणस्य चोपदेश्यत्वात् ॥ ६ ॥ (२य यु०)

अयंत्वपरो विशेषः, प्रधानकर्मणो गुणकर्मणश्च एक-

ग्रहणात्, प्रयोगवचनेन हि एकेन शब्देनाङ्गप्रधानानि उच्यन्ते, तस्मात् प्रधानवचने सन्निहितानि अङ्गानि, तेषु सन्निहितेषु गुणविधेर्नाम गृहीत्वा अभिसम्बन्धो भवति, यः प्रयाजसञ्ज्ञको भागः, तत्र गुण इति। एवं सर्वत्र यागे गुणेन तद्विकारः स्यात्, सङ्ख्यया मन्त्रेण च सङ्ख्यान्तरं मन्त्रान्तरञ्च विक्रियेत। प्रयाजादिविधिगामी हि शब्दः, गुणश्चोपदेष्टव्यः, नानर्थकं पुनर्वचनम्। तस्माद् इतिकर्त्तव्यता प्राप्यते, प्राप्तायां गुणविधय इति।

अकार्य्यत्वाच्च नाम्नः ॥ ७ ॥ (३य यु०)

न च शक्यते वदितुं, नामनामिसम्बन्धोऽयं विधीयते इति, अन्या हि वचनशक्तिः शब्दार्थसम्बन्धे विधीयमाने भवति, एकादश यागान् करोति, ते च प्रयाजानुयाजसञ्ज्ञका भवन्ति इति, वाक्यं हि अस्यां वचनशक्तौ भिद्येत अथ पुनरेषां प्रसिद्धनामकानाम् उच्चारणं गुणविधानार्थं, तस्मादपि इतिकर्त्तव्यता प्राप्यते, गुणविधयश्चैते इति।

तुल्याच्च प्रभुता गुणे ॥ ८ ॥ (१म आ० नि०)

इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम्। कानि तानि पदानि ?। यदुक्तं, प्रयाजानुयाजा असन्निहिताः, न शक्यते तेषां गुणो विधातुमिति। तत् परिहर्त्तव्यम्।

अत्रोच्यते, तुल्या ह्येषा प्रभुता गुणान् प्रति चोदकस्य, प्राकृतान् गुणान् इह प्रापयिष्यति। ते च प्राप्ता गुणविधानपरे वाक्ये इह गृहीष्यन्ते। यदा तत्प्राप्य प्राप-

ग्रिष्यति, ते गुणवचने न सम्भनत्स्यन्ते इति। तचोत्पत्तानां प्राप्तिर्लघीयसी। प्राकृतान् प्राप्य कृतार्थः शब्दो नापूर्वान् उत्पादयितुं शक्नोति। इदम् अधुनातनवचनम् उत्पादकमिति चेत्। न एतदेवं, गुणसम्बन्धार्थमेव तद्, गुणवचनस्य श्रवणात्। तस्मादपि प्राप्तेषु गुणविधय इति।

अथ यदुक्तं, आख्यातशब्दा एते कर्मणो विधायकाः भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत (२।१।१।सू०) इति। तुल्या एषां प्रभुता आख्यातशब्दानां, ये हि शक्नुवन्ति गुणवचनसहिता गुणं कर्म च विधातुं, शक्नुवन्तितरां ते केवलं गुणं विधातुम्। यो हि पाषाणान् भक्षयति, इषत्कारस्तस्य सुष्ठशक्नुत्य इति। तस्मादपि गुणविधय इति।

सर्वमेवं प्रधानमिति चेत् ॥९॥ (२य आ० नि०)

इति चेत् पश्यसि आख्यातशब्दोऽयं गुणं विधास्यति इति, एवं सति सर्वं प्रधानम् आख्यातशब्दवाच्यत्वात् इति।

तथाभूतेन संयोगाद्यथार्थविधयः स्युः ॥ १० ॥

(आ० नि० यु०)

न हि आख्यातशब्दाभिधानेन प्रधानभूतो गुणभूतो वा अर्थो भवति, यः स्वभावतो गुणभूतोऽर्थः, नासौ आख्याताभिधानेन प्रधानभूतो भवति। तथाभूतेन संयोगे सति आख्यातशब्दभूतेन यथार्थविधयो भवेयुः। यत् प्रधानं तत् प्रधानमेव, यद् गुणभूतं तद् गुणभूतमेव इति।

विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणा योगात्तस्मात् सर्वं प्रधानार्थम् ॥ ११ ॥ (४र्थं यु०)

इतश्च पश्यामो गुणविधय इति। कुतः ?। विधित्वं चाविशिष्टं, प्राकृतानां वैकृतैः अर्थवादकर्मणा योगो न विशिष्यते, अग्निं खिष्टकृतं यजति यज्ञस्य प्रतिष्ठित्यै इति प्रकृतौ य एव, स एव विकृतावर्थवादो भवति, अग्निं खिष्टकृतं यजति यज्ञमेव प्रतिष्ठापयति इति। तथा चक्षुषी वा एते यज्ञस्य यदाज्यभागौ इति प्रकृतौ, आज्यभागौ यजति चक्षुषी एव नान्तरेति इति विकृतौ। तस्मात् सर्वम् एवंजातीयकं प्रधानार्थं, विकृतौ गुणभूतमिति।

समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ १२ ॥ (५म यु०)

इतश्च पश्यामो न सर्वं प्रधानं, प्रधानार्थमपि किञ्चिदस्तीति। समा हि उत्पत्तिक्रमता प्रयाजानुयाजानां, येनैव क्रमेण प्रकृतौ प्रयाजानुयाजानां संस्काराणामधिकारः, तेनैव क्रमेण विकृतौ दृश्यते। कथम् ?। प्रजापतिर्यज्ञमसृजत स आज्यं पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात् इति। तस्मादाज्येन पुरस्तात् प्रयाजा वर्तन्ते पशुना मध्यतः पृषदाज्येन पश्चादनुयाजा वर्तन्ते इति प्रयाजानुयाजानां स्वक्रमाणां दर्शनं प्रधानार्थत्वे सति

उपपद्यते, न प्रधानत्वे। तस्मात्र सर्वं प्रधानं, प्रधानार्थमपि किञ्चिदस्तीति॥ (१०। ३। १ अ०)॥

वायव्यपशौ हिरण्यगर्भः इत्यादिमन्त्रस्योत्तरस्मिन्नाधारे गुणत्वाधिकरणम्।

हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात्॥ १३॥ (पृ०)

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकामः इति। तत्र श्रूयते, हिरण्यगर्भः समवर्त्तताग्रे इत्याधारमाधारयति इति। तत्रायमर्थः समधिगतः, प्राग्ने एवाधारे गुणविधिरयम् इदन्तु चिन्त्यते, किं पूर्वस्मिन्नाधारे गुणविधिः, उत, उत्तरस्मिन्? इति। किं प्राप्तम्?। हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात्, पूर्वस्य आधारस्य गुणविधिरयम्। कुतः?। मन्त्रलिङ्गात्, एवं मन्त्रार्थो भवति, हिरण्यगर्भः समवर्त्तताग्रे इत्याधारमाधारयति इत्यत्र मन्त्रे इदमस्ति वचनं, भूतस्य जातः पतिरेक आसीत् इति, एकः इति च प्रजापतेरभिधानम् इति। स हि प्रजोत्पत्तिसम्भवात् प्राक्, प्रजोत्पत्तेरेकसङ्ख्यायुक्त इति गम्यते, स एष मन्त्रः प्रजापतिमभिवदितुं शक्नोति। प्राजापत्यश्च पूर्व आधारः, तत्रायं समर्थः कार्यं निर्वर्त्तयितुं, नोत्तरस्मिन्। अतः पूर्वस्य गुणविधिरिति।

प्रकृत्यनुपरोधाच्च॥ १४॥ (पु०)

प्रकृतिवदिति चोदकस्यानुपरोधो भविष्यति, उत्तरस्य

आधारस्य मन्त्रानपनयात्, इतरथा अपनीयेत, जह्नोऽध्वर्यु: इति मन्त्र:। तस्मादपि पूर्वस्य गुणविधिरिति।

उत्तरस्य वा मन्त्रार्थित्वात् ॥ १५ ॥ (सि०)

वाशब्द: पक्षं व्यावर्त्तयति। न पूर्वस्य गुणविधिरिति, किं तर्हि? उत्तरस्य गुणो विधीयते, तस्य मन्त्रेणार्थो न पूर्वस्य। कथम्। एवमाम्नायते, हिरण्यगर्भ: समवर्त्तताग्रे इत्याधारमाधारयति इति। कोऽर्थ:?। आधारे एतामृचमुच्चारयति इति। सा उच्चारिता विशिष्टं श्रौतं विज्ञानमङ्गभूतं करोति, कस्मै देवाय हविषा विधेम इति, एकस्मै देवाय इत्यर्थ:। एकारलोपेन एतच्छब्दविज्ञानात् एतदर्थप्रत्ययो भवति, एकस्मै देवाय हविर्दातव्यमिति। न च पूर्वस्मिन्नाधारे श्रौतं विज्ञानमङ्गभूतमस्ति, तत्र कल्पयितव्यं स्यात्, श्रौतं विज्ञानमङ्गभूतं भवति इति, तच्च हिरण्यगर्भ: समवर्त्तताग्रे इत्येतेन कर्त्तव्यमिति, कल्पनायां न प्रमाणमस्ति। इदं हि वाक्यं मन्त्रकार्य्यविशेषस्य विधायकं, न मन्त्रकार्य्यसामान्यस्य नियामकम्। सामान्यं मन्त्रकार्य्यं पाक्षिकम्। तस्मिन् पाक्षिके मन्त्रकार्य्ये विशेषविधानमिति चेत्। आनर्थक्यम्, असत्यप्यपरिग्रहस्य, उपदेशस्य चार्थवत्त्वं, औदवाधारविषयत्वात्। तस्मादुत्तरस्य गुणविधिरिति।

यदुक्तं, प्रजापतिवचनोऽयं मन्त्र इन्द्रमभिवदितुं न शक्तो भविष्यतीति, न एतदेवं, यथा हि प्रजापतिरेक इति संस्तुत: प्रजापतिशब्दत्वात्, एकोऽसौ प्राक् प्रजोत्पत्तेरिति

प्रजापतिरेक आसीदित्युक्तेः, एवमिन्द्रोऽपि, ऐश्वर्यवचनत्वात् इन्द्रशब्दस्य, सर्वमुत्पादयितुमयम् अजनिति संस्तूयते, क ईंस्तावत् कः पृणात् को यजाते यदुग्रमिन्नमघवा विश्वहावेत् । पादाविव प्रहरन्नन्यमन्यं कवीति पूर्वमपरं शचीभिः (ऋ० ६ म० ४७ सू०) इति । तथा क उ नु ते महिमनः समस्याऋतं पूर्व ऋषयोऽन्तमायुः । यन्मातरच्च पितरच्च साकमयजनयथाः स्तन्वा स्वायाः (ऋ० १० म० ५४ सू०) इति । क ईंस्तावत् कः पृणात् को यजाते इति ऐन्द्रे सूक्ते वचनादैन्द्री ऋक् । क एनं शक्नोति स्तोतुं, को वाऽस्मै ददाति को वा यजतीति सर्वज्ञानवक्तृभिः, अयमेव सर्वमिदं करोति, यथा गच्छन् कश्चित् पूर्वपादमपरं करोति अपरच्च पूर्वम्, एवमयमिदं सर्वं करोति इति । अयं चेत् सर्वं करोतीति, प्राक् करणादेकः । तथा, क उ नु ते महिमनः समस्य इति, केऽस्य सकलस्य महिम्नः प्रख्यातूर्वेऽप्यृषयोऽन्तं प्राप्तुं शक्नुवन्ति, यन्मातापितरावपि वस्माच्छरीराज्जनयसीति मातापितृभ्यामपि पूर्वः, किमुत अन्यस्माज्जनादिति सिद्धमेकत्वमस्येति । सोऽपि प्राक् वींत्पत्तेः, एक एव । अत इन्द्राभिधायिन्येषा ऋक्, स्मादविरोधः ।

विधतिदेशात् तच्छ्रुतौ विकारः स्यात् गुणानामुपदेश्यत्वात् ॥ १६ ॥ (१ यु०)

गुणविधिरयमुपदिश्यते, आधारश्रुतौ, स तत्कर्मस्य कारः स्यात्, उपदेशो हि कर्मविशेषोऽत्र उत्तरक्रिया-

धारे, यत् श्रौतं मन्त्रविशेषविज्ञानम्, जह्नोऽध्वरो दिविस्पृशमङ्गता यज्ञो यज्ञपतेरिन्द्रावान् हवड्डावी हि मधोर्घृतस्य स्वाहा इति, तदङ्गभूतमुपकारकस्य विज्ञानस्य साधनमिति इन्द्राय हविर्द्रातव्यम्, इह तु हिरण्यगर्भ इति विज्ञानं श्रौतं, श्रौतस्य प्राकृतस्य विज्ञानस्य कार्ये विधातुमर्हति सामर्थ्यात्, इदं दधि घृतं ग्राकम् इमे ग्रालयः, देवदत्तो भोजयितव्यः देवदत्तवद् यज्ञदत्तस्तैलेन इति भोजने तैलमुपकारकं श्रूयमाणं, यस्य प्राकृतस्य कार्थमभिनिर्वर्त्तयितुं शक्नोति, तस्य कार्ये विनियुज्यते घृतस्य। सामान्यं हि अस्य स्नेहनसामर्थ्यं घृतेन इति। इहापि मन्त्र उच्चार्यमाणः प्राकृते श्रौतविज्ञाने विशेषमुत्पादयति, तच्चोत्तरस्मिन्नङ्गभूतं तदर्थविज्ञानस्य साधकं, न पूर्वस्मिन्। तस्मादुत्तरस्य गुणविधिरिति।

पूर्वस्मिंस्त्वामन्त्रत्वदर्शनात् ॥ १७ ॥ (२ यु०)

पूर्वस्मिंस्त्वाधारे अमन्त्रत्वमेव दर्शयति, स्वाहेति करोति, मन्त्रश्च न आहेति। तस्मादप्युत्तरस्य गुणविधिरिति ॥ (१०।३।२अ०) ॥

चातुर्मास्येषु सोमेष्वासादननियोजनयोः प्राकृतगुणविधित्वाधिकरणम्।

संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥ १८ ॥ (पू०)

सन्ति चातुर्मास्याः सोमाः, न चूयते, उत्कारे वाजिनमासादयन्ति, परिधौ पशुं नियुञ्जन्ति इति। तत्रैषोऽर्थः सांशयिकः, किम् एतत् आसादनान्तरं नियोजनान्तरञ्च, उत प्राकृतयोरासादननियोजनयोर्गुणविधिः इतरच्चेतरच्च ? इति। तत्रैतत्तावत्: परीक्ष्यं, किं धर्ममात्रमासादनं नियोजनञ्च, उत दृष्टकार्य्यम् ? इति। यदि धर्ममात्रं, ततः क्रियान्तरं, अथ दृष्टकार्य्यं ततो गुणविधिरिति। तत उभयं सन्दिग्धमित्युभयं संहत्य परीक्ष्यते, किं धर्ममात्रमितरच्चेतरच्च क्रियान्तरं, उत दृष्टकार्य्यं, गुणविधिः ? इति।

किं प्राप्तम् ?। तुल्यत्वात् तीक्ष्णाग्रत्वाच्चोत्करस्थ दृष्टं कार्य्यमासादनं न शक्यं कर्त्तुं, तथोपयमत्वात् परिधेर्दृष्टकार्य्यकं नियोजनमशक्यं कर्त्तुं, तस्मात् धर्ममात्रम्। यथा सौत्रामणीप्रकरणे ब्राह्मणस्य मूर्द्धनि आसादयति इति धर्ममात्रमासादनम्, एवमिहापि धर्ममात्रं चेत् क्रियान्तरं, तथा च सति आसादनं नियोजनञ्च विधायिष्यते, तत्र श्रुत्या विहितं भविष्यति। इतरथा वाक्यं विधायकं स्यात्। अपि च अस्मत्पक्षे आसादननियोजने गुणविधिलक्षणार्थे न भविष्यतः, भवत्पक्षे तु गुणविधिं लक्षयेयाताम्। तस्मात् क्रियान्तरम् इतरदितरच्च, तस्य विधायकत्वात्, स्वपदगतस्य भावप्रत्ययस्य पदोत्तरस्य न यथा आधारे गुणविधिः, तथा अस्मिन् संस्कारे आसादननियोगाख्ये।

प्रकृत्यनुपरोधाच्च ॥ १९ ॥ (यु०)

एवञ्च प्राकृतस्य धर्मस्य प्रापकत्वोदको नोपरोत्स्यते वेद्यां हवींष्यासादयति, यूपे पशुं नियुनक्ति इति । तस्मादपि क्रियान्तरम् इति ।

विधेस्तु तत्र भावात् सन्देहे यस्य शब्दस्तदर्थः स्यात् ॥ २० ॥ (सि०)

तृग्यद: पक्षं व्यावर्त्तयति । नासादनान्तरं नियोजनान्तरं चेति, किन्तर्हि ? प्राकृतयोरासादननियोजनयोर्गुणविधिः, तत्र एतदुच्यते, दृष्टकार्थके आसादननियोजने इति । कुतः ? । कार्य्यस्य दृष्टत्वात्, आसादनं समीपानयनं, तस्य होमनिर्हरणनिर्दृष्टं प्रयोजनं, नियोजनस्यापि पशुनयनम्, एवं चेत्, तस्माद् गुणविधिरितरस्य इतरस्य । कुतः ? । विधेः आसादननियोजनविधेः तत्र दृष्टत्वात्, चोदकेन तत्र प्राप्तत्वात् । सन्देहे, तत्र गुणविधिः कर्मान्तरमिति, न कर्मान्तरविधानं युक्तम्, अज्ञातस्य हि ज्ञापनं विधिः, ज्ञाते च चोदकेन आसादननियोजने । तस्मात् यस्य गुणस्य चोदकः शब्दः तदर्थतया उच्चारणं स्यात् । तस्माद्गुणविधिरिति । अत्र यदुक्तं, श्रुतिरेवंविधायिका, त्वत्पक्षे तु वाक्यम् इति । उच्यते, यद्यपि वाक्यं, तथापि अल्पीयसी अदृष्टानुमानकल्पना भविष्यतीति, यावता केवलस्य गुणस्य विधीयमानस्य, न गुणस्य कर्मसहितस्य इति ।

संस्कारसामर्थ्यादङ्गसंयोगाच्च ॥ २१ ॥ (आ० नि०)

अथ यदुक्तं, तीक्ष्णाग्रत्वादुत्करस्य, उपग्रयत्वाच्च परिधेः, दृष्टकार्ये आसादननियोजने न शक्यते कर्त्तुम् इति। अत्रोच्यते, यथा शक्येते उत्करे च परिधौ च आसादननियोजने कर्त्तुं, तथा करिष्यते, पृथ्वग्रमुत्करं करिष्यामः, महान्तञ्च परिधिम्। अतः पृथ्वग्रतया स्थविम्ना च गुणेन संयोगादासदननियोजनसंस्कारसामर्थ्यं भविष्यति। तस्मान्न कर्मान्तरम् इति।

विप्रतिषेधात् क्रियाप्रकरणे स्यात् ॥ २२ ॥ (यु० नि०)

अथ यदुक्तं, यथा सौत्रामणीप्रकरणे धर्ममात्रमासादनं, एवमिहापि इति। तत्परिहर्त्तव्यं, अत्रोच्यते, सौत्रामणीप्रकरणे विप्रतिषेधान्न शक्यं दृष्टकार्थकमासादनं कर्त्तुं, तस्मात् क्रियामात्रमदृष्टकार्थकं सौत्रामणीप्रकरणे स्यात्, नत्विह दृष्टकार्थकमशक्यम्। तस्माद् गुणविधिः ॥ १०। ३। ३ अ०)॥

अग्निचयने प्रोक्षणमैक्षतीभयदीक्षाक्षतीनामनुष्ठानाधिकरणम्।

षड्भिर्हीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ २३ ॥ (पू०)

अस्ति अग्निः, य एवं विद्वानग्निं चिनुते इति। तत्र

दीक्षाइतयः, प्राकृत्यो वैकृत्यश्च, आकूतिमग्निं प्र
स्वाहा मनो मेधामग्निं प्रयुजं स्वाहा चित्तं विज्ञातम
प्रयुजं स्वाहा वाचो विधृतिमग्निं प्रयुजं स्वाहा प्रजाप
मनवे स्वाहा अग्नये वैश्वानराय स्वाहा विश्वे देव
नेतुर्मर्त्तो वृणीत सख्यम्। विश्वे राय इषुध्यसि द्यु
वृणीत पुष्यसे स्वाहा (तै० स० ४। १। ८ अ०) इ
प्राकृत्यः। तथा वैकृत्यः, आकूत्यै प्रयुजेऽग्नये स्वा
मेधायै मनसेऽग्नये स्वाहादीक्षायै तपसेऽग्नये स्वाह
सरस्वत्यै पूष्णेऽग्नये स्वाहा आपो देवीर्बृहतीर्विश्व
यन्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविः
विधातु स्वाहा विश्वे देवस्य नेतुर्मर्त्तो वृणीत सख्
विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा (तै० स
१। २। २ अ०) इति। एताः प्रकृत्य समामनन्ति, षड्भि
दीक्षयति इति। तत्र संशयः, किं वैकृतीनां प्रयोग
प्राकृतीनां निवृत्तिः, अथ वा समुच्चयः प्राकृतीनां वैकृती-
नाञ्च? इति। किं प्राप्तम्? षड्भिर्दीक्षयतीति तासां
प्राकृतीनां आहुतीनां मन्त्रविकारः स्यात्, वैकृतैर्मन्त्रैः
प्राकृता निवर्त्तेरन्, श्रुतिसंयोगात्, प्रत्यक्षश्रुतिसंयोगो
विकृतानां, षट् वैकृता मन्त्राः, षट्शब्देन वैकृता गृह्यन्ते।
तस्मात् प्राकृतानां बाधो न समुच्चय इति।

अभ्यासात्तु प्रधानस्य ॥ २४ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, प्राकृतानां बाध इति, न
बाधः, समुच्चयः। कुतः?। सम्भवात्, यत्र हि प्राकृत-

वैकृतयोर्यूपस्य न सम्भवः, तत्र वैकृतेन प्राकृतं बाध्यते, समुच्चये हि आहुत्तिः स्यात् प्रधानस्य इति। अत्र पुनराहुत्तिः श्रुता कर्तव्यैव, तत्र नैष दोषो भवति, आहुत्तिः प्राप्नोति इति। इह चाहुत्तिः श्रूयते प्रधानस्य होमस्य, हादस्य जुहोति इति। अतः सम्भवात् समुच्चय इति।

आहुत्या मन्त्रकर्म स्यात् ॥ २५ ॥ (आ०)

नैतदस्ति, समुच्चय इति, प्रत्यक्षश्रुतेर्वैकृतैरेवोदकप्राप्तेः प्राकृता बाध्येरन्। अथ यदुक्तं, सम्भवे सति न बाधितव्याः इति। अत्रोच्यते, नास्ति सम्भवः। कथम्?। वैकृताः षट् मन्त्रा अग्नौ प्राकृतेषु होमेषु प्रत्यक्षेण श्रवणेन विधीयन्ते, ते चेडोमाः, वैकृतैर्मन्त्रैर्भवितव्यम्, अभ्यासे सति पुनस्त एव होमा भवन्ति। ते चेडोमाः, वैकृतैरेव मन्त्रैर्भवितव्यम्। तस्मात् आहुत्या मन्त्रकर्म स्यात्। अतः प्राकृता बाध्येरन्नेवेति।

अपि वा प्रतिमन्त्रत्वात् प्राकृतानामहानिः स्यादन्यायश्च कृतेऽभ्यासः ॥२६॥ (आ० नि०)

अपि वेति पक्षव्यावृत्तिः। प्रतिमन्त्रं आहुतयो भवन्ति। अभ्यासाच्च हादयता प्राकृता अपि मन्त्रोदकेन प्राप्ताः, वैकृता अपि श्रवणेन। सर्वाङ्गग्राही च प्रयोगवचनः उभयान् सङ्गृह्णाति। समुच्चयासम्भवे च बाधविकल्पौ, न सम्भवति समुच्चये। बाधे हि चोदकप्राप्तिरपक्रुयेत; न च होमनिर्वृत्तौ निष्कृष्टा वैकृताः श्रूयन्ते,

तेन होमसंदर्शनतस्तत्र वैकृतास्य 'साधका इत्यध्याहारेण सेयम्। दीक्षणे हि ते वैकृताः श्रूयन्ते, षड्भिर्दीक्षयति इति। होमप्रयोगवचनस्तु प्रदानार्थान् स्वाहाकारान्ता सामर्थ्येन सन्निहितान् गृह्णाति। उभये च प्राकृत वैकृताश्च सन्निहिताः। तस्मान्न विनिगमनायां हेतुरस्ति इमान् सङ्गृह्णाति इमान्न इति। न च प्रधानाहुत्तिरिह दोषो भवति, इत्युक्तमेव, तस्मात् प्राकृतानां मन्त्राणामहानम्। अपि च मन्त्राश्च क्रतेऽभ्यासः, सकृद्वैकृताः मन्त्राः पठ्यन्ते, तैर्दीक्षितः सम्यादयितव्य इति, सकृत्सम्पादिते तैर्दीक्षिते क्रतेऽर्थे पुनरभ्यासो न न्याय्यः। तस्मादपि प्राकृतानामहानम् इति।

पौर्वापर्य्यञ्चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥ २७ ॥ (१ यु०)

अपि च पूर्वापरशब्दौ भवतः, षट् पूर्वान् जुहोति षडुत्तरान् जुहोति इति। न च वैकृतानां केवलानामभ्यस्यमानानां पूर्वापरता उपपद्यते, नैमित्तिकत्वात्, पूर्वनिमित्तो हि उत्तरशब्दः उत्तरनिमित्तश्च पूर्वशब्दः। तस्मादपि प्राकृतानामहानमिति।

तत्पृथक्त्वञ्च दर्शयति ॥ २८ ॥ (यु०)

इतश्च पृथक्त्वम्, न निवृत्तिः, समुच्चय इति। कुतः ?। तासामाहुतीनां पृथक्त्वं दर्शयति, उभयीर्जुहोति आग्नेयीश्चाग्नेयीश्च इति। यद्युभयेषां मन्त्राणां समुच्चयस्तत-

स्तेषामाग्निकत्वात् आध्वरिकत्वाच्च भवत्येव निर्हैयः, इतरथा सर्वा एवाग्निक्यो भवेयुः, तच्च पृथङ्नोपपद्येत। भवति च पृथङ्, तस्मादनिवृत्तिः, समुच्चय इति।

न चाविशेषाद्व्यपदेशः स्यात् ॥ २९ ॥ (३यु०)

इतश्चानिवृत्तिः, समुच्चय इति। कुतः ?। व्यपदेशात्, व्यपदेशो भवति, अध्वरस्य पूर्वमथाग्नेरुपाग्नि क्षेतत्कर्म यदग्निकर्म इति, पूर्वमध्वरस्य अथाग्नेरिति व्यपदेशः समुच्चयेऽवकल्पते, नासति विशेषे। तस्मात् समुच्चय इति ॥ (१०।३।४ अ०) ॥

पुनराधानेऽग्न्याधानदक्षिणानां निवृत्त्यधिकरणम्।

अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥ (पू०)

अस्ति पुनराधानं निमित्ते श्रूयते, भाग्ययज्ञः श्रीकामानां पुनरादधीत योऽग्नीनाधाय भाग्यज्ञानिं पुत्रज्ञानिं वा जीयेत स पुनरादधीत इति। तत्र श्रूयते, पुनरुत्सूतं वासो दक्षिणा पुनरुत्सृष्टोऽनड्वान् इति। तथा, आधाने दक्षिणा, एका देया षट् देया द्वादश देयाश्चतुर्विंशतिर्देया शतं देयं सहस्रं देयमपरिमितं देयम् इति। तत्र संशयः, किं पुनराधानेऽग्न्याधानदक्षिणानामनिवृत्तिः, समुच्चयः। अथाग्न्याधेयदक्षिणानां निवृत्तिः ? इति। किं प्राप्तम् ?, आग्न्याधेयस्य नैमित्तिके पुनराधेये दक्षिणादानमधिकं

स्यात्, प्राकृतीनामनिवृत्तिः समुच्चय इति । कुतः ? एकस्मिन् वाक्ये उभयो दृश्यन्ते, उभयीर्ददातीति, आग्नेयिकीश्च पुनराधेयिकीश्च इति । तस्मादनिवृत्तिः, समुच्चय इति ।

शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥ (यु०)

इदं पक्षोत्तरं सूत्रम् । कथं चोदकप्राप्तस्य, प्रत्यक्षश्रुतस्य समुच्चयो भविष्यति ? । अत्रोच्यते, शिष्टत्वात् इतरासां, प्राकृतीनां वचनप्रामाण्यात् यथास्थानं समुच्चयो भविष्यतीति । प्रत्यक्षं हि इदमनुशासनम्, आग्नेयिकीर्दत्वा पुनराधेयिकीर्ददाति इति । तस्मान्न बाधः प्राकृतीनां, समुच्चय इति ।

विकारस्त्वप्रकरणे हि काम्यानि ॥३२॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, न तु समुच्चयो हि ... इति । कुतः ? । काम्यं श्रोतत् पुनराधेयं श्रूयते, तत्र असति प्राकृते प्रकरणे आत्मानमवकल्पते न मिति, यत् तत्रोच्यते वैकृतं, तत् प्राकृतं बाधत इत्यर्थः । काम्यो वा नैमित्तिको वा अग्नौ नित्यमर्थं विकृत्य निविशते, यथा श्यामये सुप्तौदनभोजनं निवातशय्या च इति नित्यं शय्यासनं भोजनञ्च विकरोति । प्रत्यक्षं हि वैकृतम्, आनुमानिकञ्च प्राकृतं, तस्माद् वैकृतेन बाध्यते । यत्र यदुक्तं वचनप्रामाण्यात् प्राकृत्यो भविष्यन्ति इति । अत्रोच्यते ता उभयीर्ददाति इति नात्र विधिविभक्तिरस्ति, कर्त्तृमन्त्र

नापदेशोऽयम्। प्रमाणान्तरमादायापि अयमर्थः प्राप्तिः, उभयीर्दक्षिणा ददाति, अग्नाधेयिकी: पौनराधेयिकीश्च, अग्नाधेये] अग्नाधेयिकी:, पुनराधेये पौनराधेयिकी:, तदेतत् भूतानुवादमात्रम्। तस्मात् प्राकृतीनां निवृत्तिरिति।

शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥३३॥ (यु०)

इतश्च प्राकृतीनां निवृत्तिः। कुतः। निवृत्त्याशङ्कादर्शनात् शङ्कते हि निवृत्तेः इति गम्यते। कथम्?। उभयत्वं हि श्रूयते, यद् वैकृतीर्ददाति दक्षिणा उभय्योऽपि तेन दक्षिणाः प्राप्ता भवन्ति। ननु उभय्योऽपि प्रदीयन्ते, यत उभय्योऽपि प्राप्ता भवन्तीत्याह। अग्नाधेयिकी हि अग्नाधेये, पुनराधेयिकाः पुनराधेये। तस्मात् प्राकृतीनां निवृत्तिरिति॥ (१०। ३। ५ अ०)॥

आश्वयुजे वासोवत्साभ्यामन्वाहार्यस्य निवृत्त्यधिकरणम्।

वासो वत्सश्च सामान्यात् ॥ ३४ ॥

आश्वयुजं भवति, इताशाय यजमानस्वापराभवाय नवानामैन्द्राग्नः पुराणानामाग्नेयः सौम्यः श्यामाकः वैश्वदेवः पयसि चरुः द्यावापृथिवीय एककपालः इति। तत्र श्रूयते, वासो दक्षिणा वत्सः प्रथमजो दक्षिणा इति। अस्ति तु प्रकृतौ अन्वाहार्यो दक्षिणेति, स इह चोदकेन प्राप्यते। तदत्र संशयः, किं वासो वत्समन्वाहार्यश्च निव-

र्त्तकम् ? उत अनिवर्त्तकम् ? इति । किं प्राप्तम् ? । पौष्ट-कानुग्रहात् विरोधाभावाच्च अनिवर्त्तकम् इति ।

एवं प्राप्ते ब्रूमः, वासो वक्षश्च सामान्यात् । उत्तमधर्म्यात्, आधानदक्षिणानां पुनराधेये निवृत्तिरिति, चयशब्देनान्वादेशः क्रियते, अन्वाहार्य्यस्य निवृत्तिः । कुतः ? । कार्य्यसामान्यात्, दक्षिणाकार्य्ये अन्वाहार्य्यः प्रकृतौ, इह वासो वक्षं तस्मिन् कार्य्ये, दक्षिणाशब्दश्रवणात् । तस्मान्न समुच्चयः, निवृत्तिरिति । प्राप्तिर्वा उत्तरविचयेन क्रियते इति ॥ (१० । ३ । ६ अ०) ॥

आचयर्थं वासो वक्षयोरन्वाहार्य्यधर्मानुष्ठानाधिकरणम् ।

अर्थापत्तेस्तद्धर्म्याख्यानिमित्ताख्याभिसंयोगात् ॥ ॥ ३५ ॥

तत्रैव वाससि वक्षे च संचयः, अन्वाहार्य्यधर्म्माः कर्त्तव्याः, उत न ? इति । किं प्राप्तम् ? न तावत् न्याय उच्यते, कर्त्तव्या इति, तेनाकर्त्तव्या इति मन्यामहे इति ।

एवं प्राप्ते ब्रूमः, अर्थापत्तेस्तद्धर्म्या वक्षः स्यात्, तद्धर्म-कश्च वासः साधनविशेषनिबन्धना हि ते धर्माः, नान्वाहार्य्यनिबन्धनाः । तस्माद् अन्यस्मिन्नपि तत्कार्य्यापन्ने भवितुमर्हन्ति इति । कथं पुनर्वासो वक्षं तत्कार्य्यापन्नम् ? इति । निमित्ततया आख्याय परिक्लृप्तेव दक्षि-णेति तयाऽभिसंयोगो भवति, वासो दक्षिणा वक्षः प्रथ-

प्रजो दक्षिणा इति । तस्माद्दासो वत्सावत्वाद्दार्ष्यधर्मको स्याताम् इति ॥ (१० । ३ । ७ अ०) ॥

आग्रयणे वत्से पाकाभावाधिकरणम् ।

दाने पाकोऽर्थलक्षणः ॥ ३६ ॥

तत्रैव वत्सः प्रथमजो दक्षिणा इति । तत्रैतत् समधिगतं, अन्वाहार्य्यधर्माः कर्त्तव्याः इति । तदत्र संशयः, किं वत्से पाकः कर्त्तव्यः, उत न ? इति । किं प्राप्तम् ? वोदकानुग्रहात् शक्यत्वाच्च कर्त्तव्यः इति ।

एवं प्राप्ते ब्रूमः, वत्सस्य दाने पाको न कर्त्तव्यः, अपक्को हि वत्सो वत्स एव, वत्सस्य श्रूयते न मांसं, परिक्रयाय च श्रूयते, न पुरुषसंस्काराय । तस्माच्चोदकः पाकं न प्रापयति, तद्यदि पाकः क्रियेत, अश्रूतः प्राणिवधः आचारविरुद्धोऽनुष्ठीयेत । तस्मात् पाको न कार्य्यः ॥ (१० । ३ । ८ अ०) ॥

आग्रयणे वाससि पाकाभावाधिकरणम् ।

पाकस्य चान्नकारितत्वात् ॥ ३७ ॥

तत्रैव श्रूयते, वासो दक्षिणा इति । तत्रायमर्थः समधिगतः, अन्वाहार्य्यधर्माः कर्त्तव्या इति, अथ पाकः कर्त्तव्यः, न ? इति संशयः । अर्थापत्तेः कर्त्तव्यः । इति

प्राप्ते ब्रूमः, न कर्त्तव्यः, अकारितत्वात् इति, अकारितो हि पाकः, न च वासोऽत्रं, न तत्र पाकः शक्यते कर्त्तुम्। तस्मात् तत्र पाको न कर्त्तव्य इति ॥ (१०।३।९ अ०) ॥

आग्रयणे वासो वत्सयोरभिधारणाभावाधिकरणम्।

तथाभिधारणस्य ॥ ३८ ॥

आग्रयणे श्रूयते, वासो दक्षिणा वत्सः प्रथमजो दक्षिणा इति। तत्रायमर्थः समधिगतः, अन्वाहार्य्यधर्मा वाससि वत्से च कर्त्तव्या इति। अथायमर्थः सांशयिकः, किमभिधारणं कर्त्तव्यं, न ? इति। किन्तावत् प्राप्तम् ? अप्राप्तेः कर्त्तव्यम् इति।

एवं प्राप्ते ब्रूमः, तथाभिधारणस्य। किम् ?। क्रियेति, अभिधारणं हि अन्वाहार्य्ये स्वादिम्ने क्रियं स्वादिमा हि ओदनस्य परिक्रये उपकरोति, न च, वाससि वत्से च स्वादिम्ना प्रयोजनम्। तस्मात् तत्राभिधारणं न स्यात् इति ॥ (१०।३।१० अ०) ॥

ज्योतिष्टोमे गवामेव द्वादशप्रतस्य दक्षिणात्वाधिकरणम्।

द्रव्यविधिसन्निधौ सङ्ख्या तेषां गुणत्वात् स्यात् ॥ ३९ ॥ (१म पू०)

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेत

इति। तत्रैवाम्नायते, गोवाश्वस्य अश्वतरस्य गर्दभस्य अजावयस्य व्रीहयस्य यवास्य तिलास्य माषास्य तस्य दादशगृहीतं दक्षिणा इति। तत्र संशयः, किमेकैकस्य गवादेर्द्रव्यस्य दादशगृहीतम्, उत एकस्य द्रव्यस्य? यदा एकस्य, तदा किमनियमो यस्य कस्यचित्, उत, माषाणाम्? अथ वा सर्वसम्पादनी इयं सङ्ख्या, उत, एकजातीयस्य?। यदा एकजातीयस्य, तदा किम् अनियमः, यस्य कस्यचित्, उत, पशूनाम्?। यदा पशूनां, तदा किमनियमः, येषांकेषाञ्चित्, उत, गवाम्? इति, एते पक्षा भविष्यन्तीति। किन्तावत् प्राप्तम्?। द्रव्याणां विधीयमानानां सन्निधौ। केषां द्रव्याणाम्?। गवादीनां, क्व विधीयमानानाम्?। दक्षिणासम्बन्धे सङ्ख्या समाम्नाता, तस्य दादशगृहीतं दक्षिणा इति, तेषां गवादीनां एकैकस्य सङ्ख्या स्यात्। कुतः?। गुणतः सङ्ख्या विधीयते, गवादीनि प्रधानतः। कथम्?। नैवमभिसम्बन्धः क्रियते, दादशगृहीतं स्यादिति, कथन्तर्हि दादशगृहीतं तस्य इति। एवं तस्य ग्रहणमर्थवद् भवति, इतरथा तद् अनर्थकं चानुवादो वा स्यात्, एकवचनमपि प्रकृतापेक्षं लक्षणया अनूद्येत। प्रधानसन्निधौ च गुणः श्रिथमाणः प्रतिप्रधानं भिद्येत, इति। अस्ति चैतया सङ्ख्यया प्रयोजनं, गवादीनि द्रव्याणि तत्सङ्ख्यानि कर्त्तव्यानि। तत्र न गम्यते विशेषः, किमेतत्सङ्ख्यं कर्त्तव्यं, किं न? इति। यदेव द्रव्यं नेतत्सङ्ख्यं स्यात्, तत् प्रतिश्रुतिं बाध्येत। तस्मादेकैकमेतया सङ्ख्यया सम्पादयम् इति।

समत्वात् तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥ (२य पू०)

तुशब्दः पक्षं व्यावर्त्तयति । तस्य तस्य हादग्रयतम् इति, न एतदेवमेकस्य कस्यचित् हादग्रयतं स्यात् । कुतः ? । समत्वाद् गुणानां, गवादयोऽपि हि दक्षिणा सम्बद्धाः, सङ्ख्यापि । न गवादीनां सङ्ख्या विधीयते दक्षिणा तु सङ्ख्याविशिष्टा चोद्यते, न गवादयः । कुतः ? सङ्ख्याया दाक्षिण्येन अनभिसम्बन्धे सति अनियत सङ्ख्यानां गवादीनां दक्षिणासम्बन्धे नानर्थक्यमेव सङ्ख्याया स्यात् । सङ्ख्येयसामानाधिकरण्याच्च तच्छब्दस्य बहुवचन प्रसज्येत । गवादिषु तस्य हादग्रयतमिति चैकवचन न स्यात् । तस्माद् यस्य कस्यचित् परिक्रयसाधनस द्रव्यस्य एतस्यां सङ्ख्यायां क्रीतायामेतत्सङ्ख्यः परिक्र क्रीतो भवति । तस्मादेकस्य सङ्ख्या, नैकैकस्य । एवमेक वचनश्रवणं युक्तरूपं भविष्यति ।

ननु लक्षणत्वात् तस्य शब्दस्याविवक्षितं वचनम् । उच्यते अविवक्षितेऽपि वचने या सङ्ख्या अनूद्यते, तेन वचनं भवितव्यम् । यथा लक्षणत्वेनाप्युच्यमाने ब्राह्मणजातीय न हन्तव्य इति न द्विवचनान्तेन निर्देश्यो भवति, ब्राह्मणं न हन्तव्यो इति । आह, जात्याख्यायामेकस्मिन् बहु वचनं भवति, बहुषु वा एकवचनं भवति, न तु एकस्मि बहुषु च द्विवचनं भवति, तेन अत्र बहुवचनान्तेन निर्देश्यः एकवचनान्तेन वा बहुषु निर्देश्यो भवति । अत्रोच्यते

जात्याख्यायामेतदेवं भवति, व च तच्छब्देन जातिरभिधीयते, सन्निहितव्यक्तिवचन एष भवति । तस्मादेकस्य कस्य चित्सङ्ज्ञा इति ।

यस्य वा सन्निधाने स्याद् वाक्यतो ऽभिसम्बन्धः ॥ ४१ ॥ (३य पू०)

इदं पदोत्तरं सूत्रं, यदा एकस्य सङ्ज्ञासम्बन्धः, तदा अनियमः, यः कश्चिद् विशेषाश्रवणात् इति ।

एवं प्राप्ते ब्रूमः, यस्य वा सन्निधाने स्यात्, यस्य शब्दस्य सन्निधाने सङ्ज्ञाशब्दः उच्चरितः, सोऽर्थः सङ्ज्ञाविशिष्टः प्रतीयेत, अनन्तरमुच्चरितेन हि सहैकवाक्यता भवति । कुतः ? । अनन्तरसम्बद्धं हि विशेषणं विज्ञानं विशेष्टुं शक्नोति, न हि व्यवहितम् । व्यवहिताश्च गवादयो माषैः, वाक्यश्च प्रकरणाद् बलीयः । तस्मान्माषाः सङ्ज्ञाया सम्बध्येरन्निति ।

असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते तस्मात् सर्वाधिकारः स्यात् ॥ ४२ ॥ (४थ पू०)

तुशब्दः पक्षं व्यावर्त्तयति । माषाः सङ्ज्ञायुक्ता इति, नैतदेवं, सर्वव्यापिनी सङ्ज्ञा स्यात्, सर्वैर्गवादिभिः सम्पाद्येत ; असंयुक्ता केवलमाषैः सङ्ज्ञा, तुल्यवदितराभिः द्रव्यश्रुतिभिर्माषाः श्रूयन्ते । कथम् ? । तिलाश्च माषाश्चेतिचशब्देन तिलैः सहिता माषा इति गम्यते, गवादिभिः सहितानां सङ्ज्ञासम्बन्धः, चशब्दश्रुतिरर्थान्तर-

सम्बन्धमेषामाह। चशब्दश्चवणश्चेतत्सामर्थ्यं, यस्माच्चशब्दः पर उच्चार्यते, तस्मादर्थान्तरसम्बन्धं श्रुत्यैवाह, न वाक्येन। यदि हि वाक्येन स्यात्, पुरस्तादप्युच्चार्यमाण एतमर्थं कुर्यात्, सङ्ख्या तु वाक्येन सम्बध्यते। यदि च पूर्वं न चार्थोऽवकल्पेत, चशब्दश्चवणमनर्थकं स्यात्, न हि असावुत्तरकाले सम्बध्यते सङ्ख्यासम्बन्धे अभिनिर्वृत्ते, तस्य हादशगतं चेति अन्य एवावगम्येत, हादशगतमन्यच्च किञ्चिदिति, न च तदन्यत् किञ्चिदुच्चार्यते। तस्मात् पूर्वं चर्योगः, पश्चात् सङ्ख्यासम्बन्धः, समर्थतराणि समानविभक्तीनि, दुर्बलो विभक्तिः।

अपि च समानविभक्तीनि समर्थतराणि, तेषां हि आशुतरा आवृत्तिः, विलम्बिता विविभक्तीनां, स्वार्थे समानविभक्तीनि समर्थतराणि प्रथमान्तानि भवन्ति। परपदार्थं षष्ठ्यन्तो विशिनष्टि। तस्मात् समुच्चितानि वा इतरेतरयुक्तानि वा सङ्ख्येयानि सङ्ख्या सम्बध्यन्ते। समाहारो वैषां सङ्ख्यया युक्तः। तस्मात् सर्वैः सङ्ख्या सम्पादयितव्या। किमेवं भविष्यति?। सङ्ख्यासम्बन्धे न कश्चिदङ्गिनो भविष्यति, विनिगमनायां हेत्वभावे यमेव सङ्ख्या सम्बन्धो वर्जयेत्, तत्रैव प्रत्ययो बाधेत। तस्माद्वादिराशिः सङ्ख्येयतया सम्बध्येत इति।

असंयोगाद्विधिश्रुतावेकजाताधिकारः स्यात् श्रुत्याकोपात्क्रतोः॥ ४३॥ (सि०)

नैतदस्ति, सर्वसम्पादनीया सङ्ख्या इति, असंयोगा-

द्विधिश्रुतौ सर्वसम्बन्धे सम्बन्धो नास्ति, न श्रूयते, गवादिराग्नेः सङ्ख्या भवतीति, न गवादिराग्निः शब्देन निर्दिश्यते, यः सर्वनाम्ना प्रतिनिर्दिश्येत, गवादयस्तु शब्देनोक्ताः, तेन ते सर्वनाम्ना प्रतिनिर्दिश्यमाना न चाव गवादीनां प्राधान्यमित्युक्तं, दाक्षिण्ये न हि सङ्ख्या सम्बध्यत इति सङ्ख्याविशेषणं सर्वनामशब्दः सङ्ख्यां विशेष्टुमुपादीयते। तच्चैकवचनं विवक्षितमेव, तच्चैषां नानाजातीयानां निर्दिष्टानामन्यतमदेकं प्रतिनिर्देशेन सङ्ख्याविशेषणमुपादीयते। तस्मान्नानाजातीयानां निर्दिष्टानामेकं स्यात्, स एकजातीय एव भवति। तस्माद् एकजाताधिकारः, इति सूचितम्। किमेवं भविष्यति ?। एवमेकश्रुतिर्न कोपिता भविष्यति, इतरथा, वाक्येन द्रव्यस्य भवन्ती प्रवृत्तिविशेषमकुर्वती नाप्रवृत्तिविशेषकरा प्रकरणवशेन क्रतोः कल्पिता भविष्यति, तस्य क्रतोर्दादशशतं दक्षिणा इति। तस्मादेकजातीयस्य द्वादशशतं दक्षिणा इति।

शब्दार्थस्यापि लोकवत् ॥ ४४ ॥ (यु०)

अपि च लोकवदेतत् द्रष्टव्यं, लोके हि निर्विशेषिते सङ्ख्याशब्दे उच्चरिते, एकजातीये प्रत्ययो भवति। कुतः ?। अन्यथा व्यवहारानुपपत्तेः, असति एकस्मिन् जातिविशेषे, सर्वत्रान्यैः सह पराङ्सङ्ख्या निविष्टा, पराङ्स्य चावान्तरसङ्ख्याभिः संव्यवहारः क्रियते। येषामेकेन केनचित् सम्बन्धः, तेषां तमेकं सम्बन्धिनमपेक्ष्य सङ्ख्या निविशते। स तच्चैकः सम्बन्धी वक्तव्यः, ज्ञातो वा ग्रहीतव्यः, अर्थाद्वा

य चापदेत, स उपादेयः । इह च प्रकृता नानाजातीयास्तेषामन्यतमः सङ्ख्यया सम्बन्धः स्यात् इति । यथा, शतमाभ्यां क्रीयताम् इति, एकजातीयानां शतं, न भिन्नजातीयानां, यथा द्रव्यं गुणः कर्मावयव इत्येवमक्षीनाम् । (१०।३।११च०) ॥

तस्य द्वादशशतं दक्षिणा इत्यनेन पशुगतसङ्ख्याभिधानाधिकरणम् ।

सा पशूनामुत्पत्तितो विभागात् ॥४५॥ (१ सि०)

एकजातीयस्य सङ्ख्येयेतत्प्रमधिगतम् । सा पशूनाम्. उत माषाणाम् ? इत *अनियमे प्राप्ते उच्यते, पशूनाम्* इति । *कुतः ?* । *उत्पत्तितो विभागात्* औत्पत्तिकेन विभागेन पशवः संव्यवहारेषु सङ्ख्यायन्ते, पञ्चभिरश्वैः क्रीतः, पञ्चभिर्गोभिः क्रीतः इति, न व्रीह्यादीनां. तु औत्पत्तिकेन विभागेन संव्यवहारेषु सङ्ख्या सङ्कीर्त्यते, निगदाभिप्राया मानाभिप्राया वा भवति, न हि भवति, पञ्चभिर्माषैः क्रीत इति, पञ्चभिर्माषाणामाढकैर्द्रोणैर्वा कुडवैर्वा खारीभिर्वेति भवति, तत्र आढकादिभरनुच्चार्यमाणैः साकाङ्क्षमेव वाक्यमपरिपूर्णमप्रमाणमर्थस्य कस्यचित् ।

अथ माषाणामपि औत्पत्तिकेन विभागेन कस्मादिह परिक्रयो न क्रियते ? इति । अत्रोच्यते, मूलस्य सतः परिक्रये विशेष उच्यते, द्वादशशतं दक्षिणा इति न च

दृश्यतं व्रीह्यादिबीजानां, ऋतित्वेन ऋत्विजामव-
स्थते। त्रिभिः प्रकारैर्ऋतिर्भवति व्यापारतः, फलतः
वनत इति। व्यापारस्तावन्न माषबीजानां द्वादशगृहीतं
तिः, कर्म कुर्वाणा हि कर्मकराः पात्रिकमप्यहर्लभन्ते।
लानुरूप्यं नैव दृश्यते। वचनं तु ऋतौ सत्यां परि-
ाणविशेषपरं भवति। यच्च हि पात्रिकमप्यहर्न लभ्यते
। सा दक्षिणा भवति, न हि सा तस्मिन् कर्मणि दक्षं
करोति, स्वेडादा अन्येन वा प्रकारेण क्षत्रमयः कर्म
कुर्यात्, न व्रीहीणां द्वादशगृहीतेन प्रोक्षादितः।

आह, यः कश्चित् कस्याश्चिदवस्थायां व्रीहीणां द्वादश-
हीतेन प्रोक्षाञ्चते, तस्य किं सा दक्षिणा भवेत्?। न इति
ूमः, दक्षकरणी हि दक्षिणा, दक्षस्य बलं, या न आश्रि-
मत्वं करोति, नासौ बलकरणी, तस्माद् या न आश्रित-
भवा, नासौ दक्षिणा। आश्रितभवाया आधिक्यं वचनस्य
विषयः।

आह, व्रीहिबीजानामपि द्वादशगृहीतं यावत् यावतीं
बलमात्रां करोति। अत्रोच्यते, आपेक्षिकं इदं बलं नाम,
स एव हि पुरुषः कञ्चित् प्रति बलीयान्, कञ्चित् प्रति
अबलः तत्र यावदाश्रितत्वं नास्ति, तावद् अबलता,
बलवत्तरो हि आश्रितेन भवतीति आश्रितत्वादूर्ध्वं बल-
करणं, तस्मादाश्रितत्वं यत् द्रव्यं, सा ऋतिः, सा दक्षिणा,
ततोऽधिकं दक्षिणात्वे सिद्धे वचनप्रामाण्यात् भवति।
विकृतौ ऋतपेये वचनप्रामाण्यादल्पबलकरणमपि दक्षि-
णायाः स्थाने विधीयते सोमचमसः, स आश्रयात् सिध्यति।

पशवस्तु सर्वे मुख्यबलकरणे समर्थाः, तेषु सत्सु न व्रीह्यादि-बीजानि सङ्ख्यया सम्भन्त्स्यन्ते इति ।

अनियमोऽविशेषात् ॥४६॥ (पुं०)

यदा पशूनां द्वादशगतं, तदा अनियमो गवादीनां, अन्यतमस्य कस्यचिद्द्वादशगतम् । एवमनियमे लाघवं भविष्यति, प्रयोगप्राशुभावश्च, तच्चाधिकारशास्त्रं महा-विषयं भविष्यति इति ।

भागित्वाद्वा गवां स्यात् ॥ ४७ ॥ (२ सि०)

वाशब्दोऽनियमं व्यावर्त्तयति । गवां द्वादशगतं स्यात् । कुतः ? । भागित्वात्, भागवत्यो हि गावो महाभागाः, महति उपकारे वर्त्तन्ते इत्यर्थः । एवमृत्विजामुपकारभू यस्त्वं भविष्यति, ऋत्विजाञ्च उपकारः कर्त्तव्यः । महत्सु हिते उपकारे वर्त्तन्ते, उपकुर्वतां चोपकर्त्तव्यमिति सदा चारः । एवं सदाचारोऽनुगृहीतो भविष्यति, यदि महा भागानां भूयसी सङ्ख्या दीयते, गावश्च महाभागाः तस्मात् तासां द्वादशगतम् । अथवा उपकारकतरा भवेयुः यद्येषां दानप्रतिग्रहविक्रया न प्रतिषिध्येरन्, न केसरिण ददाति, नोभयतोदतः प्रतिगृह्णाति इति श्रुतिः । स्वर्थे च, नाश्वं विक्रीणीते इति । तस्माद् द्वादशगतं गवां स्यात

प्रत्ययात् ॥ ४८ ॥ (पु०)

[illegible] गवां सङ्ख्या । कुतः ? । प्रत्ययात् । सङ्ख

सम्यादनार्थं उपादीयमानेषु प्रकृतेषु यत्नेन उपायेन स्मर्य्यमाणेषु पूर्वं गावः प्रतीयन्ते, यतस्ताः सङ्ख्यया सम्बध्यन्ते, न च तत्र विरोधः कश्चिदस्ति, गोषु सम्बद्धासु न पुनरख्याटयः सम्बध्यन्ते, एकजातीयो हि सम्बन्धव्यः, स च सम्बन्ध इति। तस्मात् गवां सङ्ख्या।

लिङ्गदर्शनाच्च ॥ ४९ ॥ (यु० २)

लिङ्गं खलु एतमर्थं दर्शयति। किं लिङ्गं भवति ?। एवमाह, सहस्रं दक्षिणा। सहस्रं स्तोत्रीया यावत्य माहस्रस्य उत्तराधरा गौर्गवि प्रतिष्ठिता तावदस्मात् लोकादसौ लोकः इति गाः प्राप्ता दर्शयति। तथा तां वा एतां शवलीं समामनन्ति। इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतिरदिति सरस्वति महि विश्रुति। एता ते अघ्न्ये नामानि देवेभ्यो मा सुप्रजातं प्रजातात् इति गवामेतानि नामानि सहस्रतमीञ्च दक्षिणामेवमाह, एतानि ते नामानि इति यदि सा गोः, एवमेतदवकल्पते। तस्मादपि गवां सङ्ख्या इति ॥ (१०। ३। १२ अ०) ॥

विभज्य गोदक्षिणाया दानाधिकरणम्।

तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ ५० ॥ (सि०)

ज्योतिष्टोमे गवादयो दक्षिणा, तत्रैषोऽर्थः समधिगतः,

गवां सङ्ख्या इति। अथेदानीमिदं सन्दिह्यते, किं यस्य यावान् भाग आभजति, स्वयमेव यजमानेन विभज्य तस्य तावान् कल्पयितव्यः, उत परिषदैव विभज्यत इति। किं प्राप्तम्? अनियमो विभज्याविभज्य वा दातव्यम्, एतावद्धि श्रूयते, दातव्यम् इति, न, विभज्याविभज्य वा इति। तस्मादनियम इति।

एवं प्राप्ते ब्रूमः, विभज्य दातव्यमिति, दातव्यस्यैव तद्रूपं, यत् स्वत्वपरित्यागेन परस्वत्वापादनं, तच्च यजमानेन स्वयं कर्त्तव्यम्। तस्मात् स्वयं प्रयोगे स्यात् इति। यो यस्यांश आभजति, स तस्मै अनिर्दिष्टो न शक्यते तेन सम्बन्धयितुं, तेन यस्तं निर्दिशति स दानमभिनिर्वर्त्तयति। यजमानेन च दानं निर्वर्त्तयितव्यम्। तस्माद् यजमानो विभज्य निर्दिशेत्, प्रदानानां पृथक्त्वात्। असति विभागे न शक्यः स्वेन भागेन सम्बन्धः कर्त्तुम्। तस्माद्विभज्य दक्षिणा दातव्येति।

परिक्रयाच्च लोकवत् ॥ ५१ ॥ (यु० १)

अस्ति च परिक्रयार्थं दानं, न धर्ममात्रं, परिक्रयार्थेन च भर्त्रा भृत्येन सह पणितव्यम्। यदि च परिषदं प्रत्युच्येत, परिषच्च विभजेत, न स्वामिना सह अपणिष्यत, तच्च परिक्रय एव नाभविष्यत्। यथा लोके काष्ठवाहप्रभृतिभ्यो यद्दीयते, तच्च काष्ठवाहाः स्वामिना सह पणन्ते, तेभ्यः स्वामी विभज्य निर्दिशति, इदं तुभ्यमिदं तुभ्यमिति, तद्वदिहापि द्रष्टव्यम्। तस्माद्विभज्य दक्षिणा दातव्येति।

विभागश्चापि दर्शयति ॥ ५२ ॥ (यु० २)

अपि च दर्शयति विभागं, यत् विभागाभिधायिनं मन्त्रमामनन्ति तुथो वो विश्ववेदा विभजतु इति । क्षणाजिनेन विलाय्य दक्षिणां ददाति इति । तथा अग्नीधेऽग्ने ददाति, अग्निमुखानेव पितॄन् प्रीणाति, ब्रह्मणे ददाति प्रस्तृभ्यो ददाति प्रस्तृत्वे होत्रे ददाति नेष्ट्रे ददाति हविर्धान आसीनेभ्य अध्वर्युभ्यो ददाति, उद्गातृभ्यो ददाति, अन्तःसदसि आसीनेभ्यो यथाग्रहं प्रासर्पकेभ्यो ददाति इति । एवं विभागदर्शनमुपपद्यते । तस्माद्विभज्य दातव्यमिति ॥ (१० । ३ । १३ अ०) ॥

ज्योतिष्टोमे समाख्यानुसारेण दक्षिणाविभागाधिकरणम् ।

समं स्यादश्रुतित्वात् ॥ ५३ ॥ (१ पू०)

ज्योतिष्टोमे सामाम्नायते, गोश्चाश्वस्य अखतरस्य इति । तत्रायमर्थः समधिगतः, विभज्य दातव्यम् इति । इदमिदानीं सांशयिकं, किं समो विभागः, उत कर्मकृतं वैषम्यं, उत शब्दकृतम् ? इति । किं प्राप्तम् ?, समो भागः स्यात् अश्रुतित्वात् विशेषस्य, यत्र विशेषो न श्रूयते, तत्र समो विभागो भवितुमर्हति । कथमिव ?। एकस्मै सर्वं दातव्यं प्राप्नोति, यदपरस्मै दातव्यं न भवति । तत्र यावति एकस्मै दीयमाने नान्यः संविभज्यते, तावत् तस्मै

एकस्मै न दातव्यम्, अविशिष्टं दातव्यं, एवमेकैकस्मै, तस्मादविशेषश्रवणात् समं देयमिति ।

अपि वा कर्मवैषम्यात् ॥ ५४ ॥ (२पू०)

अपि वेति पक्षव्यावृत्तिः, न समं स्यात्, कर्मकृतं वैषम्यं भवेत्, यो बहु कर्म करोति, तस्मै बह्वी श्रुतिर्दीयते । तस्मात् कर्मानुरूप्येण वैषम्यमिति ।

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयात् न कर्मण्युपपद्यते दर्शनादविशेषस्य तथाभ्युदये ॥ ५५ ॥ (सि०)

न चैतदस्ति, कर्मकृतं वैषम्यम् इति, किन्तर्हि उपकारकृत् । स उपकारः श्रुत्या विज्ञायते, तस्मात् श्रुतिकृतं वैषम्यम् । तेन अतुल्याः परिक्रये भवेयुः । विषमा हि एषाम् आख्या, कंचित् अर्द्विनः, कंचित् तृतीयिनः कंचित् पादिनः, येषामर्द्धं ते अर्द्विनः, कथं च तेषामर्द्धं भवति ?, यदि तेभ्यः अर्द्धं दीयते । एवं तृतीयिनः, पादिनः इति च दीक्षा विधिश्रुतौ समाख्यायन्ते, सा परिक्रयात् कर्मकृते वैषम्ये न उपपद्यते । क्व पुनरयं विशेषो दृश्यते ? । अभ्युदये, अभ्युदय इति अभ्युदयफलं ऋद्धिफलं वादमाहं ब्रूमः । अध्वर्युर्दृषदं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारं, ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्द्धिनो दीक्षयति । ब्रह्मणाच्छं-

सिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति । अग्नीधं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः, ततस्तं उन्नेता दीक्षयित्वा पादिनो दीक्षयति । पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, गावस्तुतं होतुः, ततस्तमन्यो दीक्षयति ब्रह्मचारी वा आधार्य्यप्रेषितः इति अर्द्धिनः तृतीयिनः पादिनः इति द्वादशाहे अनुवादः । यदि प्रकृतौ यथासमाख्यम् अमीषामिमे भागाः, ततो द्वादशाहे दर्शनमुपपद्यते । तस्मादङ्गादिभिः समाख्यानात् समाख्यास्तुतिकृतं वैषम्यं भवितुमर्हतीति ॥ (१० । २ । १४ अ०) ॥

अनामैकाहे तस्य धेनुः इत्यनेन कृतस्नकृतदक्षिणाबाधाधिकरणम् ।

तस्य धेनुरिति गवां, प्रकृतौ विभक्तचोदितत्वात् सामान्यात् तद्विकारः स्यात् यथेष्टिर्गुणशब्देन

॥ ५६ ॥ (पू०)

इदमामनन्ति, अथेष भूर्वैश्वदेवः चित्तदेव सर्वस्तस्य विश्ववत्यस्तौत्रीया धेनुर्दक्षिणा इति । अत्र सन्देहः, किं धेनुर्गवां निवर्त्तिका, उत कृत्स्नाया दक्षिणायाः ? इति । तत्र इदं तावत् परीक्ष्यं, किं प्रकृतौ विभक्तां दाक्षिण्यं, उत, समस्तम् ? इति । तत इदं तत्र संहत्याधिकरणं क्रियते, किं प्रकृतौ विभक्तां दाक्षिण्यं, धेनुर्गवां निव-

र्त्तिका।, उत, अविभक्तां, क्रतुजाया दक्षिणाया निवर्त्तिका? इति। किं प्राप्तम्?। तस्य धेनुः इति श्रूयमाणे ब्रूमः, धेनुः गवां निवर्त्तिका इति।

तत एतत्तावद् विचार्य्यते, प्रकृतौ विभक्तां दाक्षिण्यमिति। किमिदं विभक्तम्? इति। गवादीनामेकैकं द्रव्यं दक्षिणा इति। कथम्?। गौश्च अश्वश्च अश्वतरश्च दक्षिणा इति प्रकृतौ गवादिभिर्दक्षिणाशब्दः प्रत्येकं परिसमाप्यते, निर्दिष्टा हि गवादयः, न तेषां समुदायः। चशब्दः समुच्चयार्थो भवति, न तु समुच्चयस्य निर्देशकः, परपदविशेषणार्थन्तु समुच्चयमुपादत्ते। यदि हि निर्दिशेत्, क्रियागुणैः समुच्चयः सम्बध्येत। समुच्चयः शोभनः समुच्चयो द्रष्टव्य इति यथा भवति, एवं च शोभनः च द्रष्टव्य इति वा भविष्यति। तथा, यथेह समुच्चययोः षष्ठी भवति, धवखदिरयोः समुच्चय इति, एवं धवः खदिरश्चेत्यत्रापि अभविष्यत्। न तु भवति। तस्माच्च चशब्दः समुच्चयं निर्दिशति, श्रुत्या निर्दिष्टेन च एकवाक्यता न्याय्या, न गवादिलक्षितेन समुदायेन। तस्माद् गौर्दक्षिणा, अश्वो दक्षिणेत्येवं सम्बन्धः। लक्षयित्वा हि गवादीन्, तेषां दक्षिणात्वं विधीयते, तच्च गुणभूतं प्रतिप्रधानं भिद्येत। चशब्दश्चैवं समर्थितो भविष्यति, गौर्दक्षिणा अश्वश्च दक्षिणा इति, न गोरश्वादिसहितो गवादीनां वा समाहार इति।

यदि विभक्तां दाक्षिण्यं, तदा प्राप्ता गौर्दाक्षिण्ये, पुनर्विशेषार्थमुच्यते, धेनुर्दक्षिणा इति, यासौ गौर्दक्षिणा सा धेनुरिति अन्यासां दक्षिणानामविकारेण, यथाप्रकृति-

भावेन चोदकानुग्रहो भविष्यति। शब्देनैव गवि एष गुण उच्यते धेनुत्वं नाम। गौरेव हि धेनुर्नान्या, यद्येष्टिः गुणशब्देन, सौर्य्यं निर्वपेत् इति सूर्य्यसम्बन्धं कुर्य्यात्, द्रव्यस्येति विवक्षिते निर्वपणाश्रय एव प्रयोगः शब्देन निर्दिश्यते इति, सनिर्वपणकात् प्रयोगात् अनेन निर्वपणशब्देन ऐष्टिको विध्यन्तो नियम्यते, एवमिहापि गोर्गुणवचनेन धेनुशब्देन गौर्दक्षिणाविकारः क्रियते, नान्या दक्षिणा विक्रियते इति।

सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्य्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात् तस्मात् समन्नायाद्धि कर्मभिः॥ ५७ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति, सर्वस्य क्रतुदाक्षिण्यस्य निवर्त्तिका धेनुरिति प्रतिज्ञायते। तत्रैतदृणं ते समस्तं दाक्षिण्यम् इति। किमिदं समस्तं दाक्षिण्यम्? इति। न प्रतिद्रव्यं दक्षिणाशब्दः सम्बध्यते, गौर्दक्षिणा, अश्वो दक्षिणा, अश्वतरो दक्षिणा इति, कथन्तर्हि गवादयो दक्षिणेति। न हि गवादीन् उद्दिश्य, दक्षिणासम्बन्धो विधीयते, ये गवादयस्ते दक्षिणा इति, तथा हि दक्षिणाशब्दो गवादीन् दक्षिणासम्बन्धविधानार्थं योगपद्येन अन्तर्गतसम्बन्धमभिवदन् बहुवचनान्तः स्यात्। गवादयो दक्षिणाः इति; यथा अग्नीषोमौ देवते प्राणापानौ अभिसमभवताम् इति। गुणवचनानां शब्दानाम् आश्रयतो लिङ्गवचनानि भवन्ति। कथं तर्हि, दक्षिणामुद्दिश्य गवा-

दयो विधीयन्ते, का दक्षिणा ?, गवादयः इति। दक्षिणा नाम दत्तेरुत्साहकर्मणः, दक्षिणा उत्साहिका इति, एकः सः गुणः, स च प्राधान्येन विवक्षितः, तद्विशेषणत्वेन गवादयः। गुणवचनानाञ्च शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति, न द्रव्यवचनानामाश्रितगुणवशेन, यथा विश्वे देवा देवता इति। का पुनर्दक्षिणा ?, गौश्च अश्वश्च अश्वतरश्च इति दक्षिणाशब्दो दाने सम्बध्यते, ऋत्विग्भ्यो ददातीति, न गवादयः। एको हि दक्षिणानामर्थः, ऋत्विजाम् आनयनम्। सङ्घश्च आनयन्तो भवन्ति, भूय आनयनेन अर्थो नास्ति, गवादीनामपि गुणानामेकं कार्यं दक्षिणात्वम्।

यदा समस्तं दाक्षिण्यं, तदा विकृतौ भवि तस्मिन् प्राकृते अर्थे धेनुः श्रुतिभूता, सा च प्राकृतं कार्यमभिनिर्वर्त्तयति। क्रतुसंयोगेन हि श्रूयते, तस्य क्रतोः [illegible] दक्षिणा इति, तस्मिन्निर्वृत्ते सर्वं चोदकप्राप्तमानुमानिकं निवर्त्तते। तया समवायादि कर्मभिः ऋत्विजः सम्बध्यन्ते श्रुतिभूतया।

अपि च पशुशब्दश्रुत्या सहायं गोद्रव्यमिति प्रतीयते दक्षिणासम्बन्धोऽस्य वाक्येन, श्रुतिश्च वाक्याद् बलीयसी तस्मात् पूर्वं चयोगः, पश्चात् दक्षिणासम्बन्धः, इतरेतरयुक्ताः दक्षिणात्वेन सम्बध्यन्ते गवादयः अर्थाः। तस्मात् क्रतुशेषस्य क्रतुदाक्षिण्यस्य निवर्त्तिका धेनुरिति।

चोदनानामनाश्रयालिङ्गेन नियमः स्यात् ॥ ५८ ॥ (आ० नि०)

यदुक्तं, यवेष्टिर्मयमद्वेन इति, अत्रोच्यते, आग्नेयोपांशुयाजाग्नीषोमीयानां प्राकृतानां दौर्श्यार्धमयप्राजापत्यनैर्ऋतीनां चोदनानां न किञ्चित् एकं कार्यं, यद्वैकृती चोदना आन्नयेत्, तत्र वक्ष्यते, एकस्य कर्मणो वैकृतं कर्म विध्यन्तं गृह्णातीति । तत्र कस्य ग्रहीष्यति ? इति सन्देहे युक्तो लिङ्गेन नियमः, इह तु अदिष्टो हेतुः, यवादीनामेकं कार्यं दक्षिणात्वं, तस्मिंश्च धेनुः श्रुतिभूता चोदकप्राप्तान् निवर्त्तयितुमर्हति इति ॥ (१० । ३ । १५ अ०) ॥

यस्य सोममपहरेयुः इत्यादौ एकां गाम् इत्यादिना गौगतसङ्ख्याबाधाधिकरणम् ।

एका पञ्चेति धेनुवत् ॥ ५९ ॥ (पू०)

यस्य सोममपहरेयुरेकां गां दक्षिणां दद्यादभिदध्ये पञ्च गाः इति । अत्र सन्देहः, एका पञ्च च गावः श्रूयमाणाः किं क्रतुस्नस्य क्रतुदाक्षिणस्य निवर्त्तिकाः, उत गवाम् ? इति । किं प्राप्तम् ?, एका पञ्चेति धेनुवत् । यथा धेनुः क्रतुस्नस्य निवर्त्तिका एवमेका पञ्च च भवेयुः, दक्षिणासम्बन्धो हि तासां प्रत्यक्षः श्रूयते, तेन ताः प्राकृतीनां कार्यमभिनिर्वर्त्तयन्ति, प्राकृत्यश्च आनुमानिक्यो निवर्त्तन्त इति ।

इदं तावदपर्य्यवसितं तिष्ठतु । अथाधिकरणान्तरं प्रस्तूयते,

साद्यस्क्रौ त्रिवत्सेन सर्वेषां क्रयार्थानां बाधाधिकरणम्।

त्रिवत्सश्च ॥ ६० ॥ (सि०)

अस्मिन् साद्यस्क्रे षाण्डस्त्रिवत्सः सोमक्रयणः स्मर्यमाणानाम् इति। सन्ति क्रयार्थानि द्रव्याणि चोदकप्राप्तानि, अजया क्रीणाति, हिरण्येन क्रीणाति, ऋषभेण क्रीणाति, अश्वतरीरथेन क्रीणाति, वाससा क्रीणाति इत्येवमादीनि। तत्र संशयः, किं त्रिवत्सः ऋषभस्य निवर्त्तकः, अथ वा सर्वेषां क्रयार्थानां द्रव्याणाम्? इति। किं प्राप्तम्?, ऋषभस्य निवर्त्तक इति। कुतः?। पुङ्क्त्वात्, पुङ्क्त्वेन, सामान्येन, पुङ्क्त्वोऽसौ विधीयते। कुतः पुङ्क्त्वत्वम्?। षाण्ड्यवणात्। तस्मात् ऋषभस्य निवर्त्तक इति।

इदं प्राप्ते ब्रूमः, त्रिवत्सश्च। किम्?। क्लप्तस्य क्रयार्थस्य निवर्त्तक इति। प्रत्यक्षः स क्रीणातिना सम्बध्यते न चोदकप्राप्तं निवर्त्तयति, तस्मात् क्लप्तस्य क्रयार्थस्य निवर्त्तक इति।

तथा च लिङ्गदर्शनम् ॥ ६१ ॥ (यु०)

एवञ्च कृत्वा लिङ्गं दर्शयति। किं लिङ्गं भवति? एवमाह, अपरस्मिन् साद्यस्क्रे स्त्री गौः सोमक्रयणी आहृता शेषां स्पर्शं इति। यदि सर्वस्य क्रयार्थस्य निवर्त्तिका स्त्री गौः ततः सैव एकाकिनी केन सह स्पर्शमर्हति? इति। इतरथा सर्वस्यानिवर्त्तिकायां सह

स्वर्गो भवेत्, तत्राप्यां वर्त्तमानायां स्वर्गायां व्याहृत्तां द्यौर्यां स्वर्गो इति नोपपद्यते। तस्मात् सर्वस्य निवर्त्तिकेति, त्रिवृत्तोऽपि तत्समानश्रुतिः, सोऽपि च सर्वस्य निवर्त्तक इति।

एवं वा, यदि त्रिवृत: सर्वेषां निवर्त्तकः, तदा तम् अपबाधमाना साधस्क्रान्तरे स्त्री गवी श्रूयमाणा केवला स्यात्, तत्र व्याहृत्ता द्यौर्यां स्वर्गो इति दर्शनमुपपद्यते, इतरथा हि केवलस्य ऋषभस्यापबाधितारं त्रिवृत्तं निवर्त्तयन्ती सङ्कुमध्यपतिता स्यादेताषि, तत्र व्याहृत्ता द्यौर्यां स्वर्गो इति वचनं नावकल्पते। अतः क्रत्वस्य क्रतुदाक्षिण्यस्य निवर्त्तकस्त्रिवृत्त इति॥ (१०।३।१७ अ०)॥

तत्र एवमन्तरागभिणीन्यायो भवतीति अन्यथा सूत्रं वर्ण्यते, इतश्च एका पञ्च च क्रत्वस्य क्रतुदाक्षिण्यस्य निवर्त्तिका त्रिवृत्तश्च, तथा च लिङ्गदर्शनं, एवमेतत्-समानश्रुतिस्त्रिवृत्तोऽपि सर्वस्य निवर्त्तकः प्राप्नोति, तदेतदर्शनम् उपपद्यते, व्याहृत्ता द्यौर्यां स्वर्गो इति।

एके तु श्रुतिभूतत्वात् सङ्ख्या गवां लिङ्गविशेषेण॥ ६२॥ (सि०)

स्थितादुत्तरम्। यदुक्तम्, एका पञ्च च क्रत्वस्य क्रतुदाक्षिण्यस्य निवर्त्तिकेति, एतत्, एके तु अर्था निवर्त्तन्ते, एके गावो निवर्त्तन्ते, अश्वादयो न निवर्त्तन्ते। एका देया पञ्च देयाः इति च एष नियमः, स गोविषयः। कुतः?। गोविशिष्टया सङ्ख्यया सम्बन्धात्। यदेतत् एकां

ददाति पञ्च ददाति इति, नैवमभिसम्बन्धः क्रियते, एकां दक्षिणां ददातीति, कथन्तर्हि एकां गामिति, गोसङ्ख्या-सम्बन्धो हि मुख्यत्वात् बलीयान्।

अपि च गोशब्देन सह सङ्ख्यायाः प्रत्यक्षः सम्बन्धः, गोशब्दव्यवधानात् परोक्षो दक्षिणाशब्देन, गोशब्देनैवं मुख्यार्थो भवति, इतरथा लक्षणा स्यात्, एकां गामश्वादि चेति। तेन गवां लिङ्गविशेषेण सङ्ख्या गोषु निविश्यते। एवञ्च सर्वेषामनिहत्तावश्वादीनां यथा प्रकृतिभावे चोदकानुग्रहो भविष्यति, तस्मादेका पञ्च च गवां निवर्त्तिका इति॥ (१०।३।१६ अ०)॥

अश्वमेधे प्राकाशाविल्यनेनोध्वर्यु भागबाधाधिकरणम्।

प्राकाशो तथेति चेत्॥ ६३॥ (पृ०)

अश्वमेधे श्रूयते, हिरण्मयी प्राकाशावध्वर्यवे ददाति इति। तत्रैषोऽर्थः सांशयिकः, किं प्राकाशो क्रत्वस्य क्रतु-दाक्षिणस्य निवर्त्तको, उत अध्वर्यु भागस्य निवर्त्तको? इति। कुतः संशयः?। इह प्राकाशाविल्येष यदि ददा-तिना सम्बध्यते, ततः क्रत्वस्य क्रतुदाक्षिणस्य निव-र्त्तकः, अथ अध्वर्युणा, तदा अध्वर्यु भागस्य। किं प्राप्तम्? क्रत्वस्येति। तत्र एतदुच्यते, प्राकाशाविति-शब्दो ददातिना सम्बध्यत इति। कुतः?। एवं ददाति-सम्बन्धविधाने श्रुतिरनुगृहीता, अध्वर्युणा सम्बन्धे

ाक्यम्। अपि च प्राकाश्याविति द्वितीया कारकविभक्तिः सामर्थ्यादेवाख्यातेन सम्बध्यते, न नाम्ना। तस्माद् ददातिना सम्बन्धः। अध्वर्यु सम्बन्धे चाध्वर्यु शब्दात् षष्ठी अभविष्यत्, तस्मादपि ददातिना सम्बन्धः। ददातिं लक्षयित्वा प्राकाश्यो विधीयेते, तत्र न शक्यो ददातिरध्वर्यु णा विशेष्टुं, वाक्यं हि तदा भिद्येत। अपि च विशेषणे सत्यपि यदि ददातिरविशिष्टः पदान्तरेण सम्बध्यते, अविशिष्ट एव कार्ये प्राप्नोति, प्रयुज्यमानमपि हि विशेषणमशक्तं न विशेष्यं विशिनष्टि। तस्मात् योऽध्वरं युनक्ति, सोऽध्वर्यु-रिहाभिप्रेतः। अतः क्रतुस्थस्य क्रतुदाक्षिणस्य निवर्त्तको प्राकाश्याविति।

अपि त्ववयवार्थत्वात् विभक्तप्रकृतित्वात् गुणेदन्ताविकारः स्यात् ॥ ६४ ॥ (सि०)

अपि त्विति पक्षव्यावृत्तिः। दक्षिणावयवकार्यार्थौ प्राकाश्यौ, न क्रतुस्थदक्षिणाकार्यार्थौ, विभक्ता हि तेषां भागा अध्वर्यादीनाम्, अयम् अध्वर्योर्भागः, इमे अन्येषाम् इति। तस्मात् गुणेदन्ताविकारः स्यात्। किमिदं गुणेदन्ताविकारः इति ?। गुणस्य इदन्ता गुणेदन्ता, इदंभाव इदन्ता, गुणेदन्ताया विकारो गुणेदन्ताविकारः, अध्वर्योर्भागस्य निवर्त्तको प्राकाश्यो। कथमिव ?। एकमिदं हि वाक्यं, स्थिरस्थयो प्राकाश्यो इति, नेयं प्रथमा, नापि दक्षिणाशब्देन सम्बन्धः, येन दक्षिणाकार्ये वर्त्तेयाताम्। का तर्ह्येषा ?। द्वितीया, ददातिनैव सम्बध्यते। तदेकं

वाक्यं, हिरण्मयी प्राकाशावध्वर्यवे ददाति इति, अध्वर्यु-सम्प्रदानकेन ददातिना एतयोः सम्बन्धस्तस्मात् तत्राध्वर्यु-ददातिभागं निवर्त्तयतः। यद्वा सर्वविशेषणविशिष्टो ददातिरपूर्वो विधीयते। दृष्टार्थत्वादध्वर्योरन्यान् आनन्त्यर्थान् प्रत्याख्यास्यति।

अथ यदुक्तं, प्राकाशयोर्ददातिसम्बन्धो विधीयत इति तथा हि श्रुतिरनुगृहीता भविष्यति इति। नासौ वाक्यानपेक्षिणी श्रुतिः, असति ददातिना आनन्त्यं नावकल्पते। यदप्युच्यते, कारकविभक्तिराख्यातेन सम्बन्धयोग्या इति। योग्यत्वं दर्शनेन बाध्यते, दृश्यते त्वानन्त्यं प्राकाशयोरध्वर्युशब्देन। यदप्युक्तं, तत्सम्बन्धे षष्ठी अभिधत्त इति। सत्यं प्राप्नोति षष्ठी, न तु तद्भावे सम्बन्धो नास्ति अध्वर्युणा, गम्यते हि स वाक्येन। आह, चतुर्थीश्रुतिरत्र या, सा वाक्यमपबाधिष्यते इति। न, अविधीयमाना बाधितुम् उत्सहते। कथं तर्हि अविधित्सिते सम्प्रदाने श्रूयते? इति। सामर्थ्यप्राप्तस्यानुवादेनेति। तस्माददोषः। उक्तं वा सर्वविशेषणविशिष्टं दानं विधीयत इति। एवमन्येषामपि निवृत्तौ यथाप्रकृतिभावे चोदकानुग्रहो भविष्यति। तस्मा-दध्वर्युभागस्य निवर्त्तको प्राकाशाविति॥ (१०।३।१८अ०)

उपहव्यं अश्वेन क्रत्वङ्गतदक्षिणस्य बाधाधिकरणम्।

धेनुवच्चाश्ववदक्षिणा, स ब्रह्मण इति पुरुषापनयं यथा हिरण्यस्य॥ ६५॥ (सि०)

अस्ति उपहव्यः, उपहव्यो अनिरुक्तेनाभिग्रस्यमानं याजयेत् । अग्निष्टोमो यज्ञः पञ्चदशस्तोमो रथन्तरसामाश्वः खेतो दक्षिणा । उपहव्यो निरुक्तः तेनाभिग्रस्यमानं याजयेत् । उक्थ्यो यज्ञः सप्तदशस्तोमो बृहत्पृष्ठः अश्वः श्यावो रुक्मललाटो दक्षिणा । तत्र श्रूयते, स ह्यनिरुक्तः स ब्रह्मणे देयः इति । तत्र सन्देहः, किमश्वो ब्रह्मभागस्य निवर्त्तकः, उत क्रतुस्वस्य क्रतुदाक्षिण्यस्य ? इति । किं प्राप्तम् ? ब्रह्मभागस्य निवर्त्तकः इति । कुतः ? । कर्तृसम्बन्धाद् अवयवार्थत्वात् विभक्तप्रकृतित्वाच्च गुणेदन्ताविकारः स्यात् । स्रग्वत्, यथा, स्रजमुद्गात्रे ददाति इति उद्गात्रभागस्य निवर्त्तिका स्रक्, न क्रतुस्वस्य क्रतुदाक्षिण्यस्य । एवमिहापि इति ।

एवं प्राप्ते ब्रूमः, धेनुवत् अश्वदक्षिणा स्यात्, क्रतुस्वस्य निवर्त्तिका इति । कुतः ? । दक्षिणाशब्दसम्बन्धात्, अश्वः श्यावो रुक्मललाटो दक्षिणा इति प्रत्यक्षश्रुतेनाश्वेन आनुमानं कर्त्तव्यं, एवञ्चेत् आनुमानिकं निवर्त्तितुमर्हति । ननु कर्तृसम्बन्धोऽस्य श्रूयते, स ह्यनिरुक्तः स ब्रह्मणे देयः इति । उच्यते, एकेन वाक्येन देयकप्राप्तानां निर्देशः, द्वितीयेन वाक्येन विनियुक्तौ सत्यां पुरुषापनयः क्रियते, यथा, हिरण्यस्य सर्वं ब्रह्मणे परिहरति इति । तस्मात् क्रतुस्वस्य निवर्त्तकोऽश्व इति ।

कर्तृसंयोगात् तु स्रग्वत्तस्य लिङ्गविशेषेण ॥

६६ ॥ (आ०)

अथ यदुक्तं, एके अर्था निवर्त्तन्ते, कर्तृसंयोगात् लिङ्गविशेषेण स्रुग्वद् इति तत्परिहर्त्तव्यम् ।

अपि वा तदधिकाराद्विरण्यवद्विकारः स्यात् ॥ ६७ ॥ (आ० नि०)

अपि वेति पक्षव्याकृत्तिः, तदधिकारात् दक्षिणाधिकारात् दक्षिणाशब्देन दक्षिणामधिकृत्याख्रसम्बन्धः, तस्मात् कृत्स्नदक्षिणाविकारोऽख्रः । अतो हिरण्यवद् भवति, न स्रुग्वत् ॥ (१० । ३ । १९) ॥

ऋतपेये सोमचमसेन कृत्स्नक्रतुदाक्षिण्यबाधाधिकरणम् ।

तथा च सोमचमसः ॥ ६८ ॥ (पू०)

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा प्रियाय सगोत्राय ब्रह्मणे देयः इति । तत्र सन्देहः, ब्रह्मभागस्य निवर्त्तकः सोमचमसः, उत कृत्स्नस्य क्रतोः दक्षिणस्य ? । किं प्राप्तम् ?, तथा सोमचमसः स्यात्, स्रुक् उद्गात्रे तद्भागस्य निवर्त्तिका, उद्गात्संयोगात्, ब्रह्मसंयोगात् ब्रह्मभागस्य निवर्त्तकः सोमचमसः ।

सर्वविकारो वा क्रत्वर्थे प्रतिषेधात् पशूनाम् ६९ ॥ (सि०)

[illegible] न ब्रह्मभागस्य निवर्त्त

कस्तर्हि क्रतुस्रस्य क्रतुदाक्षिण्यस्य। ब्रह्मकर्मगम्यते ?। पशु-
प्रतिषेधानुवादात्, एवमाचार्यते, ऋतं वै सोमोऽनृतं पशवो
यत् पशून् दद्यात् सोऽनृतं कुर्य्यात्। औदुम्बरः सोमचमसो
दक्षिणा इति, पशुदानमपोद्य सोमचमसो विधीयते, यः
पशून् दद्यात् तस्यैष दीर्घो भवेत्, एतस्मात् न पशवो
दातव्या इति वक्तव्ये तमेवार्थमुक्तं मन्यमानः, सोमचमसो
दक्षिणा इत्याह। सोमचमसदानेन पशवो न दीयन्त इति
गम्यते। तदेवं क्रतुस्रस्य निवर्त्तकोऽवकल्पते। ब्रह्मदानस्य
निवर्त्तके सति अन्येभ्यः पशवो दीयेरन्। तस्मात् क्रतुस्रस्य
निवर्त्तक इति।

ब्रह्मदानेऽविशिष्टमिति चेत् ॥ ७० ॥ (आ०)

इति चेत् पश्यसि पशुदानविप्रतिषेधात् क्रतुस्रस्य क्रतु-
दाक्षिण्यस्य निवर्त्तक इति। ब्रह्मदानेऽप्येतदवकल्पते,
ब्रह्मणे सोमचमसो देयः, यः पशून् दद्यात् स ब्रह्मणे इति
गम्यते। तस्मान्न नियोगतः क्रतुस्रस्यैव क्रतुदाक्षिण्यस्य
निवर्त्तके पशुप्रतिषेधानुवादोऽवकल्पते, ब्रह्मणे दानेऽपि
तदुपपद्यत इति।

उत्सर्गस्य क्रत्वर्थत्वात् प्रतिषिद्धस्य कर्म स्यात् न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥ (आ० नि०)

न चैतदस्ति, ब्रह्मभागस्य निवर्त्तकः सोमचमस इति, क्रतुशस्य क्रतुदाक्षिणाश्य निवर्त्तकः स्यात् । अस्य सोमचमसस्य य उत्सर्गः, स क्रत्वर्थः स्यात्, दक्षिणाशब्देन हि सम्बध्यते, सोमचमसो दक्षिणा इति । न च प्रकृतावेकैको गवादिर्दक्षिणा, उक्तमेवेदं (५७सू०) गवादीनां समुदाये दक्षिणाशब्द इति । तदेवं सोमचमसदानेन प्रतिषिद्धेषु पशुषु यदि ब्रह्मदानेऽप्येतदविशिष्टमिति कृत्वा अन्येभ्यः पशवो दीयेरन् प्रतिषिद्धं क्रियेत । यो हि ब्रह्मभागो न सा दक्षिणा, दक्षिणावयवो हि सः, दक्षिणावयवे दक्षिणाशब्दो निविश्यमानो गौणः स्यात्, न च विद्यमाने मुख्ये गौणः उपादीयते । सोमचमसस्य हि प्रयोजनं दक्षिणानिवृत्तिः, सर्वेषामृत्विजाम् आनमनं प्रयोजनं दक्षिणानां, न ब्रह्मदानम् । तस्मात् क्रतुशस्य क्रतुदाक्षिणाश्य निवर्त्तकः सोमचमस इति ।

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥ सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ॥ ७३ ॥ (प्र०)

प्रयोजनसूत्रद्वयमिदम् । यदि तु ब्रह्मभागस्य निवर्त्तक सोमचमसः, ततः ब्रह्मभागोना सा दक्षिणा, एतेन विकारेण अन्या दीयेरन् यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्त तथा सर्वं निवर्त्तते । तस्मिन् निवर्त्तिते, ततः पुरुषापनय [illegible] इति । तासां दक्षिणां क्रतुप्रधानत्व

ावति। सर्वत्रिंगानमनेन हिंक्रतुः सिध्यति, न ब्रह्मानत्या
ावत्या, सोमचमसेन च सा सर्वानतिः क्रतेति नान्यत्
कश्चन दोषेत, एतत्प्रयोजनं भवत्येव पक्षोक्तं यथोपवर्णि-
तम् इति।

एवं वा,

सोमचमसेन क्रत्वदक्षिणापुरुषान्तरसंबंधाधिकरणम्। (वर्णकान्तरम्)।

यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात् ॥ ७२ ॥

(पू०)

ऋतपेये श्रूयते, औदुम्बरः सोमचमसो दक्षिणा। स
प्रियाय सगोत्राय ब्रह्मणे देयः इति। तत्रैषोऽर्थः सांशयिकः,
किं ब्रह्मभागीनोनं दातव्यम्, उत सोमचमस एव केवलो
दातव्यः? इति। ननु सोमचमसो दक्षिणेत्येष सम्बन्ध
इत्युक्तम्। तत्रोच्यते, सोमचमसो ब्रह्मण इत्येष सम्बन्ध इति
कृत्वा चिन्ता। यद्येवं, ब्रह्मणः सोमचमस इति सम्बन्धो
विवक्षितः, सोमचमसेन ब्रह्मभागो निवर्त्तितोऽवशिष्टं
दातव्यं तदूनो विकारः स्यादिति।

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥

॥ ७३ ॥ (सि०)

सर्वं वा सोमचमसेन निवर्त्तते। कुतः?। सोमच-

मसो दक्षिणा इत्येष सम्बन्धः प्रत्यक्षः, तेन निवर्त्तिते सर्वस्मिन् दाक्षिणे पुरुषापनय एव क्रियते, तासां क्रतुप्रधानत्वात्, दक्षिणानां सोमचमसो यः क्रतुदक्षिणा, स सर्वं क्रतुदाक्षिणं निवर्त्तयतीति ॥ (१०।३।२७ अ०) ॥

वाजपेये रथस्य भागनियामकताधिकरणम् ।

यजुर्युक्ते त्वध्वर्य्वोर्दक्षिणा विकारः स्यात् ॥ ७६ ॥

अस्ति वाजपेयः, तत्रेदं समाम्नायते, यजुर्युक्तं रथमध्वर्यवे ददाति इति तत्रायमर्थः सांप्रयिकः, किं यजुर्युक्तोऽध्वर्योर्भागस्य निवर्त्तकः, किं भागे नियमः ? इति । किं प्राप्तम् ? । यजुर्युक्ते दक्षिणा तु अध्वर्योः विकारः स्यात् । तुशब्दः संशयव्यावृत्त्यर्थः, न खलु संशयोऽस्ति । यजुर्युक्तं रथमध्वर्यवे ददाति, नान्यदिति गम्यते, स रथोऽध्वर्युभागं निवर्त्त्य कृतार्थः अवशिष्टानां चोदकप्राप्तानां निवृत्तिं न शक्नोति कर्त्तुम् । नैवमभिसम्बन्धः क्रियते, यजुर्युक्तं रथं वाजपेये ददातीति, येन क्रतुसंयोगो गम्यते । कुतः ? । प्रकृतो हि वाजपेयः, अध्वर्युः पुनर्वाक्येन श्रूयते । वाक्यं पुनः प्रकरणाद् बलीयः । तस्मादध्वर्युभागस्य निवर्त्तको रथ इति ।

अपि वा श्रुतिभूतत्वात् सर्वासां तस्य भागो नियम्यते ॥ ७७ ॥

अपि वेति पक्षव्यावृत्तिः । श्रुतिभूता हि सर्वे रथाः

सामान्येन वचनेन, सप्त सप्तदशकानि ददाति इति, सप्तदश रथाः, सप्तदश निष्काः, सप्तदश दासाः, सप्तदश च युग्मानि, सप्तदश गवां शतानि, यवसो वयस्यश्च सप्तदश इति। तेनाविशेषेण सप्तदश रथाः सर्वेषां प्राप्ता विभक्तव्याः, तत्र न ज्ञायते कस्य को रथः ?, तत्राध्वर्योर्यजुर्युक्तः पक्षे प्राप्तः स नियम्यते, यजुर्युक्तमध्वर्यवे ददाति, न अन्यं, न चान्यस्मै। एवम् ऋग्भिर्युक्तं होत्रे, नान्यं न चान्यस्मै। सामभिर्युक्तमुद्गात्रे ददाति, नान्यं, न चान्यस्मै। तत्र पक्षे विधानार्थं यजुर्युक्तग्रहणं, न अध्वर्योर्भागं निवर्त्तयितुमुत्सहते। तस्यानिवृत्तौ चोदकानुग्रहो भविष्यति। तस्मादध्वर्योर्भागे रथो नियम्यते, न तद्भागं निवर्त्तयतीति। (१०। ३। २१ अ०)।

इति भट्टश्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य तृतीयः पादः॥

मीमांसा-दर्शने

१० अध्याये ४ पादः।

अन्त्यादौ नारिष्टेष्टीमादिभिः नक्षत्रेष्ट्यादीनां समुच्चयाधिकरणम्।

प्रकृतिलिङ्गसंयोगात् कर्मसंस्कारं विकृतावधिकं स्यात्॥ १॥ (सि०)

अस्ति अग्निः, य एवं विद्वानग्निं चिनुते इति। तत्र नचचेष्टिः, अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत् सोऽनु जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा अग्नाये स्वाहा नियतये स्वाहा अग्नपत्ये स्वाहा निवर्गपत्ये स्वाहा निपुणिकाये स्वाहा इति। सन्ति तु प्रकृतौ नारिष्टहोमाः, नारिष्टान् होमान् जुहोति इति। तत्र संशयः, किं नारिष्टहोमानां निवृत्तिः अथवाऽनिवृत्तिः, समुच्चयः? इति। तथा ग्रहेन श्रूयते, लोहितीषीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति इति। अस्ति प्रकृतौ, निवीतं मनुष्याणां, प्राचीनावीतं पितृणाम्, उपवीतं देवानामुपव्ययते देवलक्ष्यमेव तत् कुरुते इति, तदिह चोदकेन प्राप्तम्। तत्र संशयः, किमुपवीतस्य निवृत्तिः उत अनिवृत्तिः, समुच्चयः? इति। तथा पृष्ठे षडहे श्रूयते, मधुमायेत् घृतं वा इति। अस्ति तु प्रकृतौ, पयोव्रतं ब्राह्मणस्य यवागूराजन्यस्यामिक्षा वैश्यस्य इति। तदिह चोदकेन प्राप्तम्। तत्र संशयः, किं तस्य निवृत्तिः उतानिवृत्तिः, समुच्चयः? इति।

किं प्राप्तम्? तस्य निवृत्तिरिति, प्रत्यक्षश्रुता उपहोमादयः चोदकप्राप्तानाम् आनुमानिकानां निवर्त्तका इति। अपि च प्रकृतिलिङ्गसंयोगो भवति, जुहोति, निवीताः, प्रचरन्ति, आश्रयेत् इति। यथा, अरमयं वर्हिर्भवति इति शराः कुशान्निवर्त्तयन्ति।

एवं प्राप्ते ब्रूमः, अनिवृत्तिः, समुच्चय इति। कुतः?। प्रकृतिलिङ्गसंयोगात्, प्रकृतेन लिङ्गेन कार्येण संयोग

एषाम् उपहोमादीनां नास्ति, स हि प्रत्यक्षदर्शनेन वा भवति, यथा नैवारश्चरुः इति। अभावे विधानेन वा भवति, यथा, जुह्वणा वा एतर्हि वाग्भवति यर्हि पृष्ठ्यः षडहः संतिष्ठते। न बहु वदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयात् मधु आश्नयेत् घृतं वा इति। विकारेण वा, यथा, नैर्ऋतश्चरुर्नखावपूतानाम् इति। स्वशब्देन वा भवति, यथा,परिधौ पशुं नियुञ्जीत इति। प्रतिषेधेन वा भवति, यथा, न गिरा गिरेति ब्रूयात् यो गिरा गिरेति ब्रूयादात्मानं तदुद्गाता गिरेर्दरं कृत्वोद्गेयम् इति। अन्येन वा, येनावगम्यते प्राकृतं कार्यमभिनिर्वर्त्तयतीति, तदिह न किञ्चिदप्यस्ति। न चैतावता निवृत्तिः, इदं प्रत्यक्षश्रुतम्, इदं चोदकेन प्राप्तमिति। प्रकृतिलिङ्गसंयोगे निवृत्तिर्भवति नान्यथा।

नन्विदानीमेवोक्तं, भवतीह प्रकृतिलिङ्गसंयोगः, जुहोति, निवीताः, प्रचरन्ति, आश्नयेत् इति। उच्यते, प्रकृतानां जुहोत्यादीनां जुहोत्याद्यन्तराणि इमानि विधीयन्ते। तत्र तावत् जुहोतिरदृष्टार्थः, कथमसौ गम्येत प्राकृतस्यार्थे वर्त्तत इति। तथा, उपवीतमदृष्टार्थं, कथं तस्य कार्ये निवीतं वर्त्तत इति गम्यते। तथा, व्रतं दृष्टार्थं, मध्वश्नं घृताश्नञ्च तस्मिन्नर्थे वर्त्तत इत्येतन्न श्रायत एव। तस्मान्नास्ति प्रकृतिलिङ्गसंयोगः।

अथोच्यते, नैवोपहोमा जुहोत्यन्तरं, प्रकृते होमे मन्त्रो विधीयते इति। तच्च न, विधायकस्याभावात्। सोऽनु जुहोति इति परिसमाप्ते वाक्ये केवलस्य मन्त्रस्यानानं,

नास्ति वचनम्, एवं जुहोतीति। भिन्नान्येतानि वाक्यानि, सोऽनु जुहोति इति विधिवाक्यम्, अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा इत्येवमादीनि मन्त्रवाक्यानि। तस्मात् न मन्त्रविधानार्थं जुहोतेः पुनःश्रवणम्। होमविधानार्थे श्रुतिर्विधायिका भवति, मन्त्रविधाने वाक्यं, तस्मादपि न मन्त्रविधानं, अतः समुच्चयः। उभयमपि प्रमाणेन प्राप्तं, प्रत्यक्षश्रवणं प्रमाणं, चोदकोऽपि प्रमाणं, नानाकार्यत्वान्नैतयोर्विरोधः। तस्माद्यथा, प्रयाजादीन्न बाधन्ते एवं नारिष्टहोमानपि न बाधेरन्। अत एवंजातीयकं कर्मसंस्कारं विकृतावधिकं स्यात् इति।

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ॥ २ ॥ (आ० नि०)

अथ यदुक्तं, शरमयं बर्हिर्भवति इति यया शराः कुशान् निवर्त्तयन्ति, एवमिहापीति। अत्रोच्यते, यः शरमये, भवति हि तत्र प्रकृतिलिङ्गेन संयोगः, बर्हिःशब्देन, एवंविशिष्टं वा बर्हिर्भवति, शरा वा बर्हिषः कार्यं वर्त्तन्त इति। इह तु प्रकृतिलिङ्गासंयोगः, तस्माद्विषमं बर्हिषेति ॥ (१०।४।१ अ०) ॥

शरमयबर्हिषा कौशबर्हिषाधिकरणम्। (प्रथमवर्णकम्)।

एवं वा। इदमाम्नायते, सोमा रौद्रं चरुं निर्वपेत् क्षत्रानां व्रीहीणामभिचरन् इति। तच्चेदं श्रूयते, शरमयं

वर्हिर्भवति इति। तत्र संशयः, किं कौशं निवर्त्तते, न ? इति। किं प्राप्तम् ? उभयस्य प्रमाणावगतत्वात् समुच्चयः।

एवं प्राप्ते ब्रूमः, चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत इति। अस्ति हि तत्र प्रकृतिलिङ्गेन वर्हिःशब्देन संयोगः, तस्मात् प्राकृतस्य निवृत्तिरिति।

वाजपेये रथघोषदुन्दुभिघोषाभ्यां दर्भमन्त्रयोरुभयोरेव बाधाधिकरणम्।

(द्वितीयवर्णकम्)

एवं वा, अस्ति वाजपेयः, श्रुतिः वाजपेयेन स्वाराज्यकामो यजेत इति। तत्र श्रूयते, रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति। दुन्दुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति इति। अस्ति च प्रकृतौ, उपावर्त्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोति इति। तदिह चोदकेन प्राप्तम्। तत्र संशयः, किं रथघोषेण दुन्दुभिघोषेण यो नादः स मन्त्रस्य निवर्त्तकः, यत् द्रव्यं तत् दर्भयोः, उतोभयम् उभयस्य निवर्त्तकम् ? इति। किं प्राप्तम् ?, शब्दत्वेन सामान्येन नादो मन्त्रस्य निवर्त्तकः, द्रव्यत्वेन द्रव्यं दर्भयोः। ननु तत्पुरुषनिर्देश्योऽयं, तेन परार्थेन रथस्य घोषविशेषणत्वे नोच्चारणं, न स्वकार्य्येण निर्देशः।

अत्रोच्यते, इन्द्रनिर्देश्योऽपि इष्टयो भवति, तत्रायमर्थः, न रथः परार्थ उच्चरिष्यते। श्रुतिर्हि तथा हीयेत, लक्षणा च स्यात्। चोदनालिङ्गसंयोगाच्च बाध्येत, तस्मात् घोषो मन्त्रस्य निवर्त्तको द्रव्यं दर्भयोः इति।

एवं प्राप्ते ब्रूमः, चोदनालिङ्गसंयोगी तद्विकारः प्रतीयेत, उभयस्य चोदनालिङ्गसंयोगो नैककस्य, रथघोषेणेति श्रूयते, न रथेन घोषेण चेति। रथविशिष्टो घोषो लक्षणं स्तोपाकरणस्य, प्रकृतौ दर्भौ लक्षणं मन्त्रश्च। ननु पूर्वानीमेवोक्तं द्वन्द्वनिर्देशो भविष्यति इति। नैतदेवं, द्विवचनं हि तथा स्यात्, एकवचनेन च निर्देशः, तेनैको लक्षणं, स च घोषः, तेन हि समभिव्याहारः स्तोत्रीयायाः। ननु समुदायेन समभिव्याहारो भविष्यति। न हि समुदायस्य अशब्दार्थत्वात्। अथ समुदायो निर्दिश्येत, ततोऽभ्युपगतमुभयस्य निवर्त्तकमिति। ननु मन्त्रो वाचक एव उपावर्त्तध्वमिति। नेत्युच्यते, उपावर्त्तनमाचक्षाभिधायको मन्त्रो न चोपावर्त्तनमाच स्तोत्रोपाकरणम्। अथाप्यभिधानं स्यात्, तथापि तस्य निवर्त्तकः, *लक्षणेनोपाकर्त्तव्यमिति*-प्रत्यक्षा श्रुतिः, अभिधानेन उपाकर्त्तव्यमिति चोदकः श्रुतिश्च चोदकाद्बलीयसी। तस्मादुभयस्य निवर्त्तको रथघोषो दुन्दुभिघोषश्चेति। किं भविष्यति प्रयोजनम्? यदि रथो न घोषविशेषणम्, अरथविशिष्टोऽपि घोषस्तोपाकरणं लक्षयेदिति॥ (१०। ४। २ अ०)॥

बृहस्पतिसववादी वाईश्वत्यग्रहादिभिः प्राकृतेन्द्रवायवादिग्रहाणां समुच्चयाधिकरणम्।

सर्वत्र तु ग्रहास्नानमधिकं स्यात् प्रकृतिवत्॥ ३॥ (सि०)

बृहस्पतिसवे श्रूयते, वाईश्वत्यं ग्रहं गृह्णाति विश्व-

त्यर्कं ग्रहं गृह्णाति इति। महाव्रते शुक्रग्रहं गृह्णाति इति। अश्वमेधे सौवर्णराजताभ्यां महिमानौ ग्रहौ गृह्णाति इति। सन्ति तु प्रकृतौ ऐन्द्रवायवादयो ग्रहाः, त इह चोदकेन प्राप्ताः। तत्र संशयः, वैकृतेस्ते निवर्त्स्यन्ते उतानिवृत्तिः, समुच्चयः? इति। किं प्राप्तम्? प्रत्यक्षश्रुता वैकृताश्चोदकप्राप्तान् प्राकृतान् निवर्त्तयितुमर्हन्ति, अस्ति हि तेषां प्रकृतिलिङ्गेन ग्रहशब्देन संयोगः इति।

एवं प्राप्ते ब्रूमः, तत्र तत्र सर्वत्र ग्रहाज्ञानमधिकं भवितुमर्हति, प्राकृतस्यानिवृत्तिः इति। कुतः? उभयेषां प्रमाणावगतत्वात्, चोदकोऽपि प्रमाणं, प्रत्यक्षश्रवणमपि। ग्रहशब्दः प्रकृतिलिङ्गम् इति चेत्। नैवं, यदि ग्रहशब्दमुच्चार्य गुणा विधीयते, ततः प्राकृता एव ग्रहा गुणविकृता भवेयुः। अथ ग्रहसम्बन्धेनाग्रहो विधीयते, ततो ग्रहकार्ये वर्त्तत इति प्राकृतं निवर्त्तयेत्, यथा, खलेवाली यूपः इति। अन्यः पुनरेष ग्रहशब्दो ग्रहणवचनः, अर्कं नाम ग्रहं गृह्णाति, महिमानौ नाम ग्रहौ गृह्णाति इति। अत्रापूर्वा ग्रहणक्रिया विधीयते। तस्मान्न ग्रहशब्दश्चोदनालिङ्गमेकार्थानां हि विकल्पो वा बाधो वा भवति, न चैषां वैकृतैरेकार्थता।

ननु यागनिवृत्त्यर्थाः सर्वे, तेनैषामेकार्थता इति। उच्यते, यागं प्रति संहत्यकारिण एते, न निरपेक्ष एकैक एषां साधकः; न चैषां पृथक्त्वेन यागसम्बन्धः, अर्केण यजेत, शुक्रेण यजेत इति, कथन्तर्हि प्रयोगवचन एषां ग्राहकः, स च सन्निहितानां, न च सन्निधाने विशेषोऽस्ति,

तस्मात् सर्वेषां प्राकृतानां वैकृतानाञ्च संग्राहकः प्राकृतिवत्, यथा प्रकृतौ ऐन्द्रवायवग्रहणं चोदितं, मैत्रावरुणग्रहणं पुनश्चोद्यते, विभागश्चाऽदृष्टार्थः संस्कारो देवतोद्देशश्च, अदृष्टत्वात् कार्य्यस्य, न ज्ञायते पूर्वं उत्तरस्य कार्य्यं भवति इति, प्रयोगवचनग्रहणाच्च समुच्चयः, न केवलं मैत्रावरुणादिभिः सह अप्रकरणाधीताभ्यामंशुदाभ्यामपि। एवं विकृतावपि समुच्चयो भवितुमर्हति।

आह, ननु ग्रहं सङ्क्षीर्त्य गुणो विधीयते, अश्वमेधे सौवर्णराजताभ्याम् इति। अत्रोच्यते, न तौ प्राकृतौ ग्रहौ रुज्ज्ञा वीत्पत्तिसंयोगात् इति ग्रहकर्मणी भिद्येते। आह, इह तर्हि वाईस्त्यं गृह्णाति इति देवताविधानार्थं स्यात्। उच्यते, ग्रहे विधीयमाने श्रुतिरनुगृहीता, देवतायां वाक्यं, श्रुतिश्च वाक्यादबलीयसी। आह, आग्नेयवत्, यथा अग्निष्टुति आग्नेया ग्रहा भवन्तीति देवताविधानं भवति, एवमेकवचनान्तेनापि तस्याविवक्षितत्वात्, यथा ग्रहं समाः इति सर्वग्रहाणां सम्भारोऽभिधीयते, एवमिहापि सर्वग्रहाणां देवता विधीयते। अत्रोच्यते, उक्तमेतच्छ्रुतेर्बलीयस्त्वादिति। आग्नेया ग्रहा भवन्तीति तु वाक्यमविरुद्धं श्रुत्या, न हि तत्राग्नेयं ग्रहं गृह्णातीति, आग्नेयसत्ता तत्र वाक्येन श्रुत्यविरुद्धेन चोद्यमाना युक्तेवेति। तस्मात् प्राकृतेभ्यो व्यतिरिक्तो वाईस्त्यः प्राकृतैः समुच्चीयते। यथा प्रकृतौ अंशुं गृह्णाति अदाभ्यं गृह्णाति इति अप्राकरणिको प्राकरणिकैः समुच्चीयेते, एवमिहापि वैकृताः समुच्चीयेरन्निति।

अधिकैश्चैकवाक्यत्वात् ॥ ४ ॥ (यु०)

इतश्च पञ्चानां समुच्चय इति । कुतः ? । निःसन्दिग्धेश्च अधिकैः सुराग्रहैरेकवाक्यत्वं भवति । कथम् ? । समदश्च एते ग्रहा गृह्यन्ते इये प्राजापत्याः सोमग्रहाः सुराग्रहाश्च, अत्र व्यक्तमधिकाः सुराग्रहाः, तेषु गृह्यन्ते इति ग्रहणं घोष्यते, नानूद्यते । सकृदुच्चरितः गृह्यन्ते इति शब्दः सोमग्रहैरपि सम्बध्यते । तस्माच्चोदनान्तरं ग्रहाणामनेन असन्दिग्धेन अन्यदप्येवमेवावगम्यते ।

लिङ्गदर्शनाच्च ॥ ५ ॥ (है०)

लिङ्गमप्येतमर्थं दर्शयति । किम् ? । विरण्वो वा एष यज्ञक्रतुर्यद् वाजपेय अतीव ह्यग्निष्टोमं क्रामत्युक्थ्यमति षोडशिनं नातिरात्रम् आप्नोति इति । विरण्यग्रहो विस्तीर्णो भवति, यथा विरण्यानि अरण्यानि विस्तीर्णानीति गम्यते, यदि समुच्चयः, एवं विस्तीर्णता, बाधायां नोपपद्यते, तस्मादपि समुच्चय इति ॥ (१० । ४ । ३ अ०) ॥

वाजपेये प्राजापत्यपशूनां क्रतुपशूनां समुच्चयाधिकरणम् ।

प्राजापत्येषु चाम्नानात् ॥ ६ ॥

अस्ति वाजपेयः, वाजपेयेन स्वाराज्यकामो यजेत इति । तत्र प्राजापत्याः पशवः, समदश्च प्राजापत्यान् पशूनालभते इति । सन्ति तु प्रकृतौ क्रतुपशवः, ते इह चोद-

केन प्राप्ताः। तत्र संशयः, किं ते प्राजापत्यैः क्रतुपशवो बाध्यन्ते, उत समुच्चीयन्ते ? इति। किं प्राप्तम् ? प्रत्यक्षाः प्राजापत्याः चोदकप्राप्तान् क्रतुपशून् बाधेरन्निति।

एवं प्राप्ते ब्रूमः, प्राजापत्येषु च समुच्चयःस्यात्। चशब्दः अन्वाचयार्थः। आम्नायन्ते हि क्रतुपशवः, ब्रह्मवादिनो वदन्ति, नाग्निष्टोमो नोक्थ्यो न षोडश्यी नातिरात्रः इति। अथ कस्माद् वाजपेयेन सर्वे यज्ञक्रतवोऽवरुध्यन्ते, पशुभिरिति ब्रूयात् यदाग्नेयं पशुमालभतेऽग्निष्टोमे तेनावरुन्धे ऐन्द्राग्नेनोक्थ्यम् ऐन्द्रेण षोडशिनं सारस्वत्याऽतिरात्रं मारुत्या बृहत्स्तोत्रमेतावन्तो वै यज्ञक्रतवस्तान् पशुभिरेवावरुन्धे इति समुच्चयं दर्शयति। ननु दर्शनमिदमुपलक्ष्यते, कोऽत्र न्यायः ? इति। उच्यते, प्रकृतिलिङ्गसंयोगः। ननु पशुशब्दः प्रकृतिलिङ्गम्। नेत्याह, नात्र पशुमनूद्य देवता विधीयते, सङ्ख्याश्रवणात्। सङ्ख्यादेवताश्रवणात् कर्मान्तरं चेदमुक्तं, पृथक्त्वनिवेशात् सङ्ख्या कर्मभेदः स्यात् इति। अतो ग्रहाणामिव समुच्चयो भवितुमर्हतीति॥ (१०। ४। ४ अ०)॥

साङ्ग्रहणीष्टौ आमनहोमैः अनुयाजानां समुच्चयाधिकरणम्।

आमने लिङ्गदर्शनात्॥ ७॥

अस्ति साङ्ग्रहणीष्टिः, वैश्वदेवीं साङ्ग्रहणीं निर्वपेद् आमकामः इति। तत्र श्रूयते, आमनमस्या देवा इति तिस्र

आहुतीर्जुहोति इति। सन्ति तु प्रकृतौ त्रयोऽनुयाजाः, तेषु चोदकेन प्राप्ताः। तत्र संशयः, किमामनहोमैरनुयाजा निवर्त्तन्ते, उत तैः समुच्चीयन्ते? इति। किं प्राप्तम्?, प्रत्यक्षश्रुतेरामनहोमैरानुमानिका अनुयाजा निवर्त्येरन्। अपि च चित्वं प्रकृतिलिङ्गयोगो भवति।

एवं प्राप्ते ब्रूमः, आमने समुच्चयः स्यात्। कुतः?। लिङ्गदर्शनात्, लिङ्गं हि इममर्थं दर्शयति। किं लिङ्गम्? अहिरात्मा वै प्रयाजानुयाजा आत्मा देवता यत् प्रयाजानुयाजानां पुरस्ताद्धा उपरिष्टाद्धा जुहुयादहिरात्मानं सजातानामादधीत, अथ यन्मध्यतो जुहोति मध्यत एव सजातानामात्मानं धत्ते इति अनुयाजानाम् अनिवृत्तिं दर्शयति। आह, ननु चित्वं प्रकृतिलिङ्गसंयोगः। इत्याह, न हि सङ्ख्यामात्रमनूद्य शक्यते गुणो विधातुं, न हि, कस्यचित् काचित् सङ्ख्या न भवति। तस्मान्न सङ्ख्या प्रकृतिलिङ्गसंयोगः। लिङ्गदर्शनं त्विदम् अपदिष्टं, प्राप्तिरत्र वक्तव्येति। उच्यते, आहुतीर्जुहोति इति श्रुत्या आहुतिसत्ता, वाक्येन मन्त्रविधानं, त्रिसङ्ख्या चानुवादत्वेनावकल्पते। सङ्ख्यामन्त्रवन्ति तु यागान्तराणि विधीयन्ते। तेषां चोभयप्रमाणावगतत्वात् समुच्चयो न्याय्य इति॥ (१०। ४। ५ अ०)॥

महाव्रते ऋत्विगुपगानस्य पत्न्युपगानेन समुच्चयाधिकरणम् ।

उपगीषु शरवत् स्यात् प्रकृतिलिङ्गसंयोगात् ॥८॥

(पू०)

महाव्रते श्रूयते, पत्न्य उपगायन्ति पिच्छोलाभिरुपगायन्ति, काण्डवीणादिभिरुपगायन्ति आपाटलिकाभिरुपगायन्ति इति। अस्ति तु प्रकृतौ ऋत्विज उपगायन्ति इति। तदिह चोदकेन प्राप्यते। तत्रायमर्थः सांशयिको भवति, किं पत्नीभिः उपमायन्ति इति ऋत्विज उपगायन्तो निवर्त्स्यन्ते, उत न निवर्त्स्यन्ते ? इति। तत्रैतत् तावच्चिन्त्यते, किं गानोपगानमेतत्, उत वादित्रोपगानम् ? इति। तत्रापि हेतं, किं गानस्योपगानम्, गानोपगानं, उत गानमेवोपगानं गानोपगानम् ? इति। किं तावत् प्राप्तम् ? प्राकृतं निवर्त्स्यते इति। तत इदं वर्ण्यते, गानस्योपगानमिति, पत्न्यो गायतां गानमुच्चिन्वन्ति इति, गानं प्राप्तमेव प्राकृतम्, उपचय उपसर्गार्थो विधीयते। तस्माद्गानस्योपगानम् इति।

अथ वा गानमेवोपगानं, गानशब्दो हि गारीर्थां गीतौ प्रसिद्धः, तस्माद्गानमेतदुपगानं, गानस्य चोपगानमिति यदा एतयोरन्यतरं, तदा ऋत्विक्कार्य्यं पत्न्यो वर्त्तन्ते अतः प्रकृतिलिङ्गसंयोगात् प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्त्स्यते शरवत्, यथा शरमयं बर्हिर्भवति इति शराः प्रत्यक्षश्रुताः चोदकप्राप्तान् दर्भान् निवर्त्तयति, एवमिहापीति।

आनर्थक्यात् त्वधिकं स्यात् ॥ ९ ॥ (सि०)

तुशब्दः पक्षं व्यावर्तयति, न निवृत्तिरिति, समुच्चयः स्यात्। तत एतच्चिन्त्यते, वादित्रस्योपगानम्, अस्ति ह्यत्र वादित्रं, दिक्षु दुन्दुभयो नदन्ति इत्येवमादि, तस्योपगानं वादित्रस्योपगानम्। कथम्? प्रत्ययेन हि श्रुत्या धात्वर्थस्य सत्ता उच्यते, विप्रकृष्टा उपसर्गार्थस्य सत्ता अर्थविप्रकर्षात् दुर्बला भवति। तस्मादुपसर्गार्थसत्ताविधानं धात्वर्थसत्ताविधानेन बाध्यते।

अथ वा वादित्रमिदमुपगानम्, एवं ह्याह, पत्नय उपगायन्ति काण्डवीणादिभिरुपगायन्ति इति। काण्डवीणादिभिर्वादित्रमुपगानं भवति, भवति च तन्त्रीगाने गानशब्दः। तस्माद् वादित्रमुपगानम्। तत्र यद्येवं वादित्रस्योपगानं, यदि वा वादित्रमुपगानम्, उभयथा प्राकृतादर्थान्तरे भवति। तस्मात् समुच्चयः। कुतः?। आनर्थक्यात्, एवं चोदकानर्थक्यं न भविष्यति, चोदकोऽनुग्रहीष्यतीत्यर्थः। तस्मात् समुच्चय इति॥ (१०।४।६ अ०)॥

अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गौमृगवाभ्यञ्जनादिभिः समुच्चयाधिकरणम्।

संस्कारे चान्यसंयोगात्॥ १०॥ (सि०)

अस्ति अञ्जनाभ्यञ्जनो नाम एकोनपञ्चाशद्रात्रः। तत्रेदं समाम्नायते, गौमृगवेन प्रातः सवने समञ्जते अभिवाञ्छते पैलुदारवेण माध्यन्दिने सवने सौगन्धिकेन तृतीयसवने इति। अस्ति तु प्रकृतौ नवनीतेनाभ्यञ्जनं, तदिह

चोदकेन प्राप्तम्। तत्र संशयः, किं तद् वैकृतेन बाध्यते, उत न? इति। किं प्राप्तम्?। प्रत्यक्षश्रुतत्वात् वैकृतेषु अञ्जते अभि वाजते इति च, प्रकृतिलिङ्गसंयोगाद्बाध्यते इति। आह, ननु सुत्याकालम् अञ्जनमभ्यञ्जनञ्च सचे, दीक्षाकाले नवनीतेनाभ्यञ्जनं प्रकृतौ, अन्यकालत्वात् प्रयोजनान्तरे वर्त्तते इति बाधो न स्यात्। उच्यते, प्रयाजवदन्यकालमपि तत्कार्थमेव द्रष्टव्यं, कालमात्रमन्यत्, पदार्थस्तु स एव। यथा तिष्ठन्तं पशुं प्रयजन्ति इति तिष्ठन्ति पशौ प्रयाजा वर्त्तमानाः प्राकृतकार्थका एव भवन्ति, एवमिहापि द्रष्टव्यम्।

एवं प्राप्ते ब्रूमः, संस्कारे अञ्जनेऽभ्यञ्जने च प्राकृतेन सह समुच्चयः स्यात्। कुतः?। अन्यसंयोगात्। अन्यकालमिदं कार्यान्तरे वर्त्तते, एवं चोदकोऽनुगृह्यते। तस्मात्समुच्चयः इति।

प्रयाजवदिति चेत् ॥ ११ ॥ (आ०)

इति यदुक्तं तत्परिहर्त्तव्यम्।

नार्थान्यत्वात् ॥ १२ ॥ (आ० नि०)

न च प्रयाजवत् भवितुमर्हतीति। कुतः?। अर्थान्यत्वात्, स्नेहनार्थम् आदौ नवनीतं सुखप्रचाराय। प्रवृत्ते कार्ये सुत्याकालं गौरगुलवेनाभ्यञ्जनं विरूक्षीकरणार्थं प्रत्यक्षं कार्यान्तरे वर्त्तत इति, न प्राकृतं निवर्त्तयितुमर्हति ॥ (१०। ४। ७ अ०) ॥

महाव्रते अहतवाससः तार्ख्यादिभिः समुच्चयाधिकरणम्।

आच्छादने त्वेकार्थ्यात् प्राकृतस्य विकारः स्यात् ॥ १३ ॥ (पू०)

महाव्रते श्रूयते, तार्ख्यं यजमानः परिधत्ते दर्भमयं पत्नी इति। अस्ति तु प्रकृतौ, अहतवासः परिधत्ते इति। तदिह चोदकेन प्राप्तम्। तत्र संशयः, किम् अहतस्य वाससो निहत्तिः, न ? इति। किं प्राप्तम् ?। आच्छादने तु प्राकृतस्य विकारः स्यात्। कुतः ?। एकार्थात्, एको ह्यर्थः प्राकृतस्य वैकृतस्य च कौपीनम् आच्छादयितुं, प्रकृतौ विकृतौ च प्रच्छादनं क्रियते। तस्मात् प्रत्यक्षश्रुतेन चोदकप्राप्तं निवर्त्तेत।

अधिकं वान्यार्थत्वात् ॥ १४ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति, अधिकम् इदं प्राकृताद्वाससो भवितुमर्हति इति। कुतः ?। तत् हि निवर्त्तकं भवति, यदनिवर्त्यं न प्रक्रामति निविष्टं, यत् तु अनिवर्त्यापि प्रक्रामति भवितुं, न तत् निवर्त्तयति, तत् हि निवर्त्तयत् अप्रतिषेधकं सत् चोदकं प्राप्तं बाधेत। ननु कौपीनप्रच्छादने परिधत्ते इति भवति, नान्यकार्थके। उच्यते, नैतदेवं, उपरि वाससोऽपि कार्ये परिधत्ते इति भवति। तत्रापि, कम्बलं परिधत्ते, रौरवं परिधत्ते इति। सर्वतो धत्ते परिधत्त इति अवयवप्रसिद्धया भवति। तस्मादहतस्य वाससो न निहत्तिः, समुच्चय इति।

समुच्चयश्च दर्शयति ॥ १५ ॥ (यु०)

समुच्चयश्च वासःशब्देन बहुवचनान्तेन दर्शयति, वासांसि वाराही चोपानही विमुञ्चति इति । 'क्षणविषाणया वासांसि विभ्रंसयति, ततोऽध्वर्युः परिधत्ते इति । तस्मादपि पश्यामो अनिहृत्तिः समुच्चय इति ॥ (१० । ४ । ८ अ०) ॥

महाव्रते रथन्तरादिसाम्नां श्रौकादिसामभिः समुच्चयाधिकरणम् ।

सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ॥ १६ ॥

महाव्रते श्रूयते, श्रौकेन पुरस्तात् सदसः स्तुवते अनुश्रौकेन पश्चात् सदसः क्रौञ्चेन चात्वालमवेक्ष्यमाणः इति । सन्ति तु प्राकृतानि सामानि इह चोदकेन प्राप्तानि । तत्र संशयः, किं प्राकृतानां साम्नां निहृत्तिः, उत अनिहृत्तिः, समुच्चयः ? इति । किं प्राप्तम् ? । स्तुवते इति प्रकृतिलिङ्गसंयोगे प्रत्यक्षश्रुते चोदकप्राप्तानि सामानि निवर्त्स्यन्ते इति । यथा, कौक्षं भवति, काण्वं भवति, वसिष्ठस्य जनित्रे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः । क्रौञ्चानि भवन्ति इति श्रुतेषु चोदकप्राप्तानि निवर्त्स्यन्ते, एवमिहापि द्रष्टव्यम् ।

एवं प्राप्ते ब्रूमः, सामसु श्रौकेन पुरस्तात् स्तुवते इत्येवमादिषु श्रूयमाणेषु प्राकृतानाम् अविकारः प्रतीयेत । कुतः ? । अर्थान्तरश्रुतेः, अर्थान्तरेण हि सम्बन्धः श्रूयते,

पुरस्तात् सदसः सुवते इत्येवमादिषु । यच्च पदं केनचित् पदेन सम्बध्यते विशेषणत्वेन न तत् पदान्तरेण सह सम्बन्धमर्हति सन्नदुच्चरितम् । यथा, भार्या राज्ञः, पुरुषो देवदत्तस्य इति भार्याविशेषणत्वेनोच्चार्यमाणः राज्ञः इतिशब्दो न पुनः पुरुषशब्देन सम्बध्यत इति, एवं पुरस्तात् सदसः सुवते इत्यनेन सम्बध्यमानो न पुनः श्लोकेन सुवते इति सम्बन्धमर्हति ।

यदि सुतौ देशसत्ता विधीयते, श्लोकेन चेति अनूद्येत, तत उपपद्येत एकं वाक्यमिति । यदा तु पुनर्देशसत्ता विहिता, तदा परिपूर्णं वाक्यं, श्लोकेन चेत्येतदपि विधातव्यं, तदा पुनर्विधिप्रत्ययो हृदयम् आनेतव्यः, हृदयम् आनेतुमुच्चारयितव्यः । न चोच्चारितः, तस्माद् अनुच्चारितो वा कल्पयितव्यः, उच्चारणं वा कल्पयितव्यं, कल्पनायाञ्च शब्दो बाध्येत । तस्मात् नैवम् । कथन्तर्हि ?, देशसामविशिष्टा सुतिः श्रुत्वा विधीयते, न चैकेन केनचित् सम्बन्धे विहिते, परिपूर्णे वाक्ये पुनरपरं वाक्यं कल्पयितव्यं भवति । उभयविशेषणविशिष्टा हि सुतिः श्रुत्वा यदा विहिता, तदा परिपूर्णं वाक्यं, न तदा पुनरपरेण केनचित् सम्बन्धः कल्पयितव्यो भवति, यदर्थं किञ्चित् हिरुच्चार्यते, तस्मात् सुत्यन्तरमिदं विधीयते, न प्राकृतं निवर्त्तयते, समुच्चयः इति ।

अर्थे त्वश्रूयमाणे शेषत्वात् प्राकृतस्य विकारः स्यात् ॥ १७ ॥ (यु०)

अत्र यदुपवर्णितं, यथा कौत्सं भवति, काण्वं भवति,

वशिष्ठस्य जनित्वे भवतः इत्येवमादिभिरिव प्राकृतानां निवृत्तिः, इति, तत् परिहर्त्तव्यम्। अत्रोच्यते, युक्तमत्र यत् प्राकृतं निवर्त्स्यते, अत्र हि अर्थान्तरं न श्रूयते, प्राकृतस्यैव शेषः श्रूयते, तस्मात् तत्र वैकृतेन प्रत्यक्षश्रुतेन प्राकृतस्य निवृत्तिरिति, इह तु अर्थान्तरश्रवणाद् वाक्यभेदप्रसङ्गात् अनिवृत्तिरित्युक्तम्।

विकृतिविशेषे प्राकृतसाम्नां कौत्साद्यभिधोधाधिकरणम्।
(द्वितीयवर्णकम्।)

एवं वा, क्वचित् श्रूयते, कौत्सं भवति, काण्वं भवति, वशिष्ठस्य जनित्वे भवतः, शुद्धाशुद्धीये भवतः, भर्गयशसी भवतः, कौण्डानि भवन्ति इति, सन्ति तु प्रकृतौ सामानि तत्र चोदकेन प्राप्तानि। किं तानि निवर्त्स्यन्ते, न? इत्येषोऽर्थः सन्दिह्यते। किं प्राप्तम्?। अनिवृत्तिः, समुच्चय इति। कुतः?। सामसामान्यं विधीयते, न स्तुवत इति प्रकृतिलिङ्गसंयोगोऽस्ति। तस्मादधिकमिति।

एवं प्राप्ते ब्रूमः,

अर्थे त्वश्रूयमाणे शेषत्वात् प्राकृतस्य विकारः स्यात्॥ १७॥

तुशब्दः पक्षं व्यावर्त्तयति, अश्रूयमाणेऽप्यर्थे प्राकृतस्य विकारः स्यात्, शेषभूतं हि प्रकृतौ साम, इदमपि साम श्रूयते, तत्सामत्वेन सामान्येन साम्नः कार्यं भवितु-

महति । तद्यथा, दधि घृतं शाकं शालयः देवदत्तो भोजयितव्यः, देवदत्तवत् यज्ञदत्तस्तेनेति, यद्यपि तैलेन स्नेहयितव्य इति न श्रूयते, तथापि स्नेहने एव तैलं भवति, तत्समर्थत्वात् । एवं यद्यपि साम्ना ऋक् संस्कर्त्तव्येति न श्रूयते, एवमपि तत्समर्थत्वात् साम ऋक्संस्कारे एव भवितुमर्हति ॥ (१०।४।८अ०) ॥

कौत्सादिभिर्व्यवस्थया एकादिबाधाधिकरणम् ।

सर्वेषामविशेषात् ॥ १८ ॥ (पू०)

क्वचित् श्रूयते, कौत्सं भवति काण्वं भवति वशिष्ठस्य जनित्रे भवतः शुनाशुद्दीये भवतः भर्गयशसी भवतः कौत्सानि भवन्ति इति । सन्ति तु प्राकृतानि सामानि तत्र चोदकेन प्राप्तानि, तानि प्राकृतानां निवर्त्तकानीत्येतत् समधिगतम् । अथेदोऽर्थः सन्दिह्यते, किं सर्वाणि सर्वेषां निवर्त्तकानि, अथ किमेकम् एकस्य, द्वे द्वयोः, बहूनि बहूनाम् ? इति । किं तावत् प्राप्तम् ?, सर्वाणि सर्वेषामिति । कुतः ? । विशेषाभावात्, न हि विशेषः कश्चिदस्ति, येनावगम्यते, इदमस्य निवर्त्तकं, नान्यस्येति । तस्मात् सर्वं सर्वस्य निवर्त्तकमिति ।

एकस्य वा श्रुतिसामर्थ्यात् प्रकृतेश्चाविकारात् ॥ १९ ॥ (सि०)

न चैतदस्ति, सर्वाणि सर्वेषां निवर्त्तकानीति। एकमेकस्य, द्वे द्वयोः, बहूनि बहूनाम् इति। कुतः ?। श्रुतिसामर्थ्यात्, कौत्सं भवति साख्नं भवति इति एकैकस्य निवृत्तिं कृत्वा श्रुतिः समर्था अर्थवतीति। एवं वशिष्ठस्य जनित्रे भवतः सुदासदीये भवतो भर्गयशसी भवतः इति द्वयोर्निवृत्तौ कृतायां श्रुतिसामर्थ्यमनुगृहीतं भवति। तथा क्रौष्टानि भवन्ति इति त्रिभिः त्रीणि निवर्त्त्य कृतसामर्थ्या श्रुतिर्भवति। यथैकस्मिन् श्रुते एकमेव निवर्त्तते, ततो यावत्येव असौ अङ्गीकृता प्राकृती सामसङ्ख्या तावत्येव भवति, एवं सर्वत्र। किमेवं भविष्यति ?। एकैकविकारः, प्राकृतानामवशिष्टानां साम्नां ग्रहणं न भविष्यति, तच्च चोदकोऽनुग्रहीष्यते। तस्मादेकम् एकस्य निवर्त्तकं, द्वे द्वयोः, बहूनि बहूनामिति ॥ (१०।४।१० अ०)॥

विरुद्धाविरुद्धस्तोमकतुषु यथाक्रमं प्राकृतसामभवाधिकरणम्।

स्तोमविरुद्धा त्वधिकं स्यादविरुद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वाच्च ॥ २० ॥

सन्ति विरुद्धस्तोमका अविरुद्धस्तोमकाश्च क्रतवः, एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकामम् इति। तथा द्वात्रिंशाः पवमाना अभिषेचनीयस्य। तत्र नव राजसामानि, एकादश राजसामानि, बलोपस्थवसे वशिष्ठस्य जनित्रे च साक

अवेदनान्नाङ्गः। शुद्धाशुद्धीये च संज्ञावोपपदे चोमे। तथा रथन्तरविधाने पुनःस्तोमस्य यज्ञस्य, तथा अपचितिवत्यः पुनःस्तोमस्य यज्ञस्य,

पुनःस्तोमस्य सवनं मध्यमं द्वादशं स्मृतम्।
कार्य्यौ नवदशस्तोमावभितः सवने उभे॥ इति।

तदत्र क्वचित् प्राकृती स्तोमसङ्ख्या विहृता, क्वचिदीना। तत्र सन्देहः, किं विकृतौ विहृतौ हानौ च प्राकृतानां साम्नां निहृत्तिः, उत हानौ निहृत्तिः, विहृतावनिहृत्तिः? इति। किं प्राप्तम्?। उभयत्र निहृत्तिः, प्रत्यक्षश्रुतेन हि चोदकप्राप्तं निवर्त्तयते। साम्नां चोत्पत्तिरर्थवती भविष्यति अपूर्वेषु क्रियमाणेष्विति।

एवं प्राप्ते ब्रूमः, स्तोमविहृतौ अनिहृत्तिराधिक्यं स्यात्। कुतः?। आगमेन हि सामां सङ्ख्यापूरणं वक्ष्यते, आगमेन वा स्यादभ्यासस्याश्रुतित्वात् (१०।५।२३सू०) इति। एवं चोदकानुग्रहो भविष्यति। अविहृतौ तु प्राकृतं निवर्त्तयत, यावता निहृत्तेन सा सङ्ख्या पूर्य्यते, तावत् प्राकृतं बाधितव्यं, अन्यत् प्राकृतमेव स्यात्। कुतः?। इतरस्य अश्रुतित्वात्, इतरं न श्रूयते, आगमः कर्त्तव्य इति, सङ्ख्यामात्रं श्रूयते। तस्मात् विहृतस्तोमकेषु अनिहृत्तिः, हीनस्तोमकेषु यावदर्थं निवर्त्तयितव्यम्। अथ यदुक्तं, साम्नां उत्पत्तिरर्थवती भविष्यति इति। उच्यते, बाध्यतां आर्षं चोदकेन, गुणमात्रमविशिष्टार्थम्। गुणश्चोदकः इति॥ (१०। ४। ११ अ०)॥

पवमान एव विहृद्धाविहृद्धस्तोमकक्रतूनां सामावापोद्धापाधिकरणम् ।

पवमाने स्यातां तस्मिन्नावापोद्धापदर्शनात् ॥ २१ ॥

इह हृद्धस्तोमका अविहृद्धस्तोमकाश्च क्रतव उदाहरणं, त एव ये पूर्वस्मिन्नधिकरणे उदाहृताः । तत्रैषोऽर्थः समधिगतः, विहृद्धस्तोमकेष्वनिहृत्तिरविहृद्धस्तोमकेषु निहृत्तिः इति । अथेदानीम् इदं सन्दिह्यते, किं यस्मिन् कस्मिंश्चिदावापौ यतः कृतस्विदुद्धापः, उत पवमानेष्वेव अवापोद्धापौ ? इति । किं प्राप्तम् ? । अविशेषात् अनियमः इति ।

एवं प्राप्ते ब्रूमः, पवमाने आवापोद्धापौ स्याताम् इति । कुतः ? । अस्मिन्नेव हि तौ दृश्येते, त्रीणि छन्दांस्युदराणि गायत्री हृहती अनुष्टुप्, अत्र ह्येवाव ति अत एवोद्धापत्ति इति ।

ननु दर्शनमिदं प्राप्तिरुच्यताम् । उच्यते,

वचनानि त्वपूर्वत्वात् ॥ २२ ॥

असति न्याये वचनान्येव एतानि कल्प्यन्ते । तस्मात् पवमान एव आवापोद्धापस्थानमिति ॥ (१०।४।१२ अ०) ॥

आगादौ विधिशब्देनैव देवताभिधानाधिकरणम् ।

विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना ॥ २३ ॥

तौ दर्शपूर्णमासौ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति। तत्रेदमामनति, यदाग्नेयोऽष्टाकपालो अमावास्यायां पौर्णमास्यां चाचुतो भवति इति। सन्ति चाग्नेरभिधानानि, अग्निः ऋषिः पावकः धूमकेतुः क्रव्यादवैश्वानरः आङ्गिरस इत्येवमादीनि। तत्र सन्देहः, वाचिषु नियमेषु किं येन केनचिदग्नेः शब्देनाभिधानं कर्त्तव्यम्, उत विधिशब्देनाग्निशब्देन ? इति। किं प्राप्तम् ?। येन केनचिदिति। कुतः ?। अन्यार्थनिर्देशात्, अन्यार्थेन पुरोडाशः संबद्धव्यः, अन्यार्था देवता कर्त्तव्या, त्यागकाले उद्देष्टव्या, सा येन शब्देन शक्यते उद्देष्टुं, तेनोद्देश्यनीया, सा एवां शब्दानामन्यतमेन शक्या उद्देष्टुम्। तस्माद् येन केनचित् वाचिषु नियमेषूद्देशः कर्त्तव्य इति।

एवं प्राप्ते ब्रूमः, विधिशब्देनैव अग्निशब्दोद्देष्टव्या, नान्येन मुख्यादिना इति। कुतः ?। तेन चोदना, तेन विधिशब्देनास्य हविषः सम्बन्धः चोदना भवति। कथमिव ?। आग्नेयः कर्त्तव्य इत्यग्नेरस्य देवता कर्त्तव्येत्यर्थः।

का पुनरियं देवता नाम ?। एकं तावत्तं, या एता इतिहासपुराणेष्वम्नायाः सङ्कीर्त्यन्ते नामसदृक्षा देवता इति।

उच्यते, तासु देवतासु ग्रहरादीनां शार्दूलादीनां वा न संग्रहः। स्मर्यते च कालवाचिनां देवतात्वं, कालेभ्यो भवति, मासो देवता संवत्सरो देवता इति।

अपरं मतं, येषु देवताशब्दो मन्त्रब्राह्मणे श्रूयते,

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता इत्येवमादिषु तेऽत्र देवताशब्दो नोच्यन्ते इति।

तत्राप्यहरादीनाम् अनुपसंग्रह एव। किंतु सामान्यवचनस्य शब्दस्य लौकिके व्यवहारे अभावाद्दर्शयाप्रसिद्धिः स्यात्। तस्मात् सूक्तभाजो हविर्भाजश्च देवताः। काः सूक्तभाजः?। इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं त्वव (ऋ० १८।४ म०) इति, हविर्भाजः, आग्नेयमष्टाकपालं निर्वपेत्। अग्नीषोमीयमेकादशकपालम् इति। आह, यदि हविर्भाजो देवताः कपालानामपि देवतात्वं प्राप्नोति, तान्यपि हविर्भाजि। एवं तर्हि मा हविर्भाग् देवता, यां प्रति तादर्थ्यं हविषः, सूक्तस्थाप्येवमेव। अत्र हि देवताशब्दः स्मर्यते, अग्निदेवत्यं सूक्तम्, अग्निदेवत्यं हविः इति। तथा अतिथिदेवत्यं पितृदेवत्यम् इति। एवं मूर्तानाममूर्तानां चेतनानामचेतनानां मुख्या काश्चिदर्थं प्रति तादर्थ्येन सङ्कल्पनीयानां देवतात्वं भविष्यति, सामान्यवचनत्वं चोपपत्स्यते

किमतः?। यद्येवं, यस्याः वाचकं शब्दमुद्दिश्य श्रुत्वा वा हविरुत्स्यामीति सङ्कल्पः क्रियते, सा देवता भवति तत्र।

नन्वेवं सति सुतरां येन केनचिदग्नेः शब्देन निर्देशः करणीयः।

अत्रोच्यते, भवेदेतदेवं, यद्यग्निशब्दोऽर्थप्रत्ययनार्थमुच्चार्येत, अर्थोऽपि हविःसम्बन्धार्थं प्रत्याय्येत, न त्वग्नि-

त्रिशब्दोऽर्थप्रत्यायनार्थमुच्चार्यते, यत्र त्वर्थे कार्यमाधीयते, तत्र शब्दोऽर्थप्रत्यायनार्थो भवति, यत्रार्थे न प्रयोजनं, यत्र पुनः शब्दे एव कार्यं, तत्र कार्यसम्बन्धार्थः शब्द एव प्रत्यापयितव्यः। देवतायाश्च यज्ञसाधनभावो न रूपेण भवति, केन तर्हि ?, सम्बन्धिना शब्देन। यथा अध्वर्यु-र्हस्ताभ्यामुपकरोति,, एवं देवता शब्देनोपकरोति, यथा होतुः पादौ हिर्लेपेनोपस्तृणाति इति पादिसम्बन्धेऽपि होतैव उपकरोति, एवं सम्बन्धिना शब्देन उपकुर्वती देवता उपकारिणी गम्यते। देवतायामप्युपकारिण्यां चोदितायां शब्दस्यैव यज्ञे समवायः। तस्माच्च शब्दोऽर्थ-प्रत्यायनार्थमुच्चारितः। स चार्थः पुनः शब्दं प्रत्याययेदिति लक्षितलक्षणा हि तथा स्यात्। किन्तर्हि ? शब्द एव हविषा सम्बध्यते, तत्सम्बन्धादर्थोऽपि देवता भविष्यति, यस्य हि शब्दो हविषा तादर्थ्येन सम्बध्यते, सा देवता, शब्दे कार्यस्यासम्भवादर्थं कार्यं विज्ञायते, इह तु शब्द एव कार्यं सम्भवति। तस्माच्चार्थप्रत्ययनार्थः शब्द इति। तदुक्तं वृत्तिकारेण, न वा शब्दपूर्वको ह्यर्थसम्प्रत्ययस्तस्मा-दर्थनिष्पत्तिः इति। एवं चेदग्निशब्देन हविषः सम्बन्धः, नास्ति प्रसङ्गः शुचादीनां शब्दानामिति। तस्मात् मन्त्रत्वे विधिशब्द उपादातव्य इति।

उच्यते, मन्त्रे वं शब्द एव देवता प्राप्नोति। अत्रोच्यते, नैतदस्माभिः परिहर्त्तव्यं, न ह्येदमुच्यमानमस्मत्पक्षं बाधते, सुतरां शुचादीनामप्रसङ्ग इति।

शेषाणां चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते ॥

॥ २४ ॥ (यु०)

इतश्च विधिशब्देन वाचिषु वचनं कर्त्तव्यम् । कुतः ? । शेषाणां मन्त्राणाम् एकः शब्दः, य एवासौ विधिशब्दः, स एव सर्वत्र श्रूयते अपाट्कारे उज्जित्यां स्वाहाकारे च, अपालग्नेः प्रिया धामानि अपाट् सोमस्य प्रिया धामानि अपालिन्द्रस्य प्रिया धामानि इति अपाट्कारे । अग्नेरुज्जितिमनूज्जेषं सोमस्योज्जितिमनूज्जेषम् इत्युज्जित्याम । स्वाहाऽग्निं स्वाहा सोमम् इत्येवमादि स्वाहाकारे । एवञ्च नित्यवत् श्रूयमाणा अपाचिका भविष्यन्ति, यथाऽस्माभिर्न्यायोऽपदिष्टः । तस्मात् विधिशब्दस्य मन्त्रत्वे भावः स्यात् इति ॥ (१० । ४ । १३ अ०) ॥

अतिदेशस्थलेऽपि विधिशब्द एव देवताभिधानाधिकरणम् ।

तयोत्तरस्यान्ततो तत्प्रकृतित्वात् ॥ २५ ॥

अस्ति चरुः, सौर्य्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इति । सन्ति सूर्य्यस्याभिधानानि, सूर्य्य आदित्यो भास्करः सविता दिवाकरः इति । तत्र किं वाचिषु निगमेषु येन केनचिच्छब्देनाभिधानं कर्त्तव्यम्, उत विधिशब्देन सूर्य्यशब्देन ? इति । किं प्राप्तम् । अग्निशब्दसंयुक्तास्ते प्रकृतौ निगमा इह चोदकेन प्राप्ताः, न सूर्य्यशब्देनेति, सूर्य्यशब्दो

हि चरौ, न उक्तित्वादिषु, ते यद्यर्थं विपरिणमयितव्याः, सूर्य्यार्थश्च तेषु सङ्कीर्त्तयितव्यः, स च येन केनचित् सूर्य्यवाचिना शब्देन सङ्कीर्त्यते, तस्मादनियमः । ये च प्रकृतावग्निशब्दसंयुक्ता, निगमास्ते इहोदाहरणं, न असंयुक्ताः ।

एवं प्राप्ते ब्रूमः, तथोत्तरस्यान्ततो तत्प्रकृतित्वात् इति । यथा प्रकृतौ, तथा उत्तरस्यां ततौ विकृतौ कर्त्तव्याः, तत्प्रकृतित्वात् तेषां, चोदकानुग्रहाय प्रकृतौ च विधिशब्दाभिप्रायो अग्निशब्दः प्रयुक्तः, न अग्न्यभिधानपरः । इहापि तत्प्रकृतित्वात् विधिशब्दाभिप्रायेणैव निगमाः प्रयोक्तव्याः । न चायं चरुणा सूर्य्यशब्दस्य सम्बन्धः, किन्तर्हि प्रयोगेण, सौर्य्यं निर्वर्त्तयेत् इति प्रयोगेण सम्बन्धः, न सौर्य्यश्चरुः इति, कारकविभक्तिर्हि द्वितीया, सा आख्यातेन सम्बध्यते, तस्मात् तत्रापि सूर्य्यशब्देन संयुक्ताः कर्त्तव्या इति ॥ (१० । ४ । १४ अ०) ॥

आधानेऽग्नेः सगुणेनाभिधानाधिकरणम् ।

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् ॥ २६ ॥ (सि०)

अस्ति आधानं य एवं विद्वानग्निमाधत्ते इति । तत्र पवमानहवींषि श्रूयन्ते, अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकायाग्नये शुचये इति । तत्र संशयः क्रियते, किं सगुणमग्नेरभिधानं कर्त्तव्यं, उत निर्गुणम् ?

इति। किं प्राप्तम्? । प्राकृतस्य निर्गुणस्य सगुणेन अभिधानं कर्त्तव्यमिति।

अविकारो वा अर्थशब्दानपायात्स्यात् द्रव्यवत् ॥ २७ ॥ (पू०)

अविकारो वा स्यात्, निर्गुणमभिधानम्। कुतः? । अर्थशब्दानपायात्, एवं शब्दोऽर्थवानपेतो भवति, य एव असौ अग्निः, स एव पवमानः, पावकः शुचिश्च। या देवता निर्दिष्टा, सा निर्दिष्टैव भवति, असत्यपि गुणवचने, द्रव्यवत्, यथा, सा वा एषा सर्वदेवत्या यदजावयो, वायव्यामालभेत भूतिकामः इति, अजावयाशब्देन चोदिते कर्मणि छागाशब्देन वाचिषु निगमा भवन्ति, अर्थः शब्दोऽनपेत इति कृत्वा। एवमिहापि द्रष्टव्यम्। तस्मान्निर्गुणेन अभिधानं कर्त्तव्यमिति।

तथारम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् ॥ २८ ॥ (उ०)

अथ वा, चोदितेन, सगुणेनाभिधीयेत। कुतः? । आरम्भासमवायात्, न हि आरब्धेण देवता कर्मणि समवैति, न खेन रूपेण देवताया: कर्मणि साधनभाव इत्युक्तम्। यदि हि रूपेण समवेयात्, तथा सति अग्निशब्देन पवमानोऽपि प्रत्याय्यते इति गुणाभिधानं न क्रियेत। कथं

तर्हि साधनभावः?। श्रुतिसमवायित्वात् देवतार्थस्य, देवताशब्दस्य च हविषश्च सम्बन्धः साक्षादुच्यते, यस्य शब्दस्य सम्बन्धः, स शब्दो वक्तव्यः, एवमसौ सम्बन्धः कृतो भवति। यदि च गुणाभिधानं न क्रियते, गुणश्रावणमनर्थकं स्यात्। एवमर्थं हि तत्र शब्द उच्चार्यते, कथमसौ कर्मणि सम्बध्येत इति। तत्र यदि गुणो न सम्बध्नीयात्, गुणवचनवैयर्थ्यं स्यात्। तस्मात् सगुणेनाभिधानं कर्त्तव्यमिति।

द्रव्येष्वारम्भगामित्वादर्थे विकारः सामर्थ्यात्॥ २६॥ (आ० नि०)

अथ यदुक्तं द्रव्यवत् इति, सा वा एषा सर्वदेवत्या यदजावया, वायव्यामालभेत भूतिकामः इति, अजावयाशब्देन चोदिते कर्मणि छागाशब्देन निगमा वाचिषु भवन्तीति यदुक्तं, तत् परिहर्त्तव्यम्। अत्रोच्यते, युक्तं द्रव्येष्वारम्भसमवायः, रूपेण समवायं गच्छति द्रव्यं, तत्र छागाशब्देन या असौ आलब्धा यदि वशा यद्यवशा, तत्र साऽभिधीयत इति गम्यते। तस्मादर्थे साधने सति अविकारेऽप्यर्थे वचनसामर्थ्यमुपपद्यत इति विना गुणवचनेन, अभिधानं स्यात् चोदकानुग्रहाय। इह श्रुतिसमवायित्वादवश्यं चोदकप्राप्तस्य विकारः कर्त्तव्य इति॥ (१०।४।१५ अ०)॥

—:o:—

आधानाज्ययोरग्नेर्निर्गुणेनाभिधानाधिकरणम् ।

बुधन्वान् पवमानवद्विशेषनिर्देशात् ॥ ३० ॥(पू०)

अस्ति आधानं य एवं विद्वानग्निमाधत्ते इति । तत्र पवमानेष्टयः, अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नेये शुचये इति । तत्राज्यभागौ प्रकृत्य श्रूयते, बुधन्वान् आग्नेयः कार्य्यः,पावकवान् सौम्यः इति । तत्रायमर्थः सांशयिकः, किं सगुणमग्नेरभिधानं कर्त्तव्यम, उत निर्गुणम् ? इति ।

तत्रेवं तावत् परीक्ष्यते, किं देवतानिर्देशोऽयं, मन्त्रनिर्देशः ? इति । देवतानिर्देशे सति सगुणमभिधानं, मन्त्रनिर्देशे निर्गुणमिति । किं तावत् प्राप्तम् ? । सगुणमभिधानमिति । तत्र एतदृच्यते,देवतानिर्देशः इति । कुतः ? । रूपत एव मन्त्रपदां प्राप्तत्वात् विधानमनर्थकं, देवता पुनर्न प्राप्नोति, तस्या विधानमर्थवत् भवति, बुधन्वान् आग्नेयः कर्त्तव्य इति देवतया बुधन्वत्गुणयुक्ता भवति बुधन्वान् आग्नेयः । तस्मात् सगुणमभिधानं, यथा पावमानेष्टिषु अग्निः पवमान इति । एवमत्रापि अग्निर्बुधन्वानिति विशेषनिर्देशोऽर्थवान् भविष्यति । तस्मात् सगुणमभिधानमिति ।

मन्त्रविशेषनिर्देशात् न देवताविकारः स्यात् ॥ ३१ ॥ (सि०)

न चैतदेवं, सगुणमभिधानमिति, निर्गुणं कर्त्तव्यम् ।

तत्र एतद् वर्णयन्ति, मन्त्रविशेषनिर्देशोऽयम् इति। कुतः। ? मन्त्रविशेषरूपोऽयं शब्दः, आग्नेयो यो विशिष्टाग्निर्विशिष्टः स बुधन्वान् कर्त्तव्यः नाग्निः। अथ अग्निर्बुधन्वान् क्रियते, तत्र बुधन्वानग्निर्देवता स्यात्, तत्राग्नेय इति सापेक्षे तद्धितनिर्देशो न स्यात्, न हि सविशेषणानां वृत्तिर्भवति। न खल्वपि हुतस्य विशेषणं प्रयुज्यते। तस्मान्नाग्नेविशेषणं बुधन्वत्ता। कस्तर्हि बुधन्वत्तया विशेषः ?। आग्नेयः, तस्य बुधो मन्त्रः,तेनासौ बुधन्वान् भवति यागः, अग्निं स्तोमेन बोधय समिधानो अनक्तर्याम् इति। अथ वा मन्त्र एवाभिसम्बध्यते, बुधन्वान् आग्नेय इति।

अथ यदुक्तं, रूपादेव मन्त्रः प्राप्नोति न विधातव्यः इति। उच्यते, यः कश्चिदन्यभिधानो मन्त्रः प्राप्नोति, तन्निषेधार्थमिदमुच्यते, बुधन्वान् कर्त्तव्यः, अग्निं स्तोमेन बोधय इति। एवं चेत् न देवताविशेषणम्। तस्मान्निर्गुणमभिधानं देवतायाः कर्त्तव्यम्। एवं चोदकानुग्रहो भविष्यति॥ (१०। ४। १६ अ०)॥

गवानुषक्तनृषदाज्यौष्णीयोर्विधिशब्दाभ्यामिव उत्पवनस्थतिशब्दाभ्यामभिधानाधिकरणम्।

विधिनिगमभेदात् प्रकृतौ तत्प्रकृतित्वादिकृतावपि भेदः स्यात्॥ ३२॥ (पृ०)

अस्ति ज्योतिष्टोमः, तत्र श्रूयते, गौरनुबन्ध्योऽजोऽग्नी-

षोमीयः इति। सन्ति तु गोरभिधानानि, उक्षा उक्षिया अही मही अदितिरिला (निघ० २।११) इति। तत्र संशयः, किं निगमेषु केनचिदेव शब्देन गोरभिधानं कर्त्तव्यम्, अथ वा विधिशब्देन कर्त्तव्यम्? इति।

तथा, पृषदाज्येन वनस्पतिं यजति इति। सन्ति वनस्पतेरभिधानानि, वृक्षः पादपो द्रुमो नगः इति। तत्र संशयः, किं निगमेषु केनचिदेव शब्देन वनस्पतेरभिधानं कर्त्तव्यम्, अथ वा विधिशब्देन? इति। किं प्राप्तम्?। केनचिदेवेति। कुतः?। विधिनिगमभेदात् प्रकृतौ, विधिनिगमभेदः कृतः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति विधौ, मन्ये, छागस्य वपाया मेदसोऽनुब्रूहि इति। इहापि चोदकेन यत् प्राकृतं, तत् प्राप्यते। विधिनिगमभेदस्य प्रकृतावस्ति, तस्मात् स प्राप्यते छागशब्दः, प्रकृतौ कृतः स न शक्यते गवि कर्तुं, विधिनिगमभेदस्तु शक्यते। तस्मात् उक्षादीनाम् अन्यतमेन वाचिषु वचनं कर्त्तव्यम्।

तथा, अग्निं स्विष्टकृतं यजति इति विधौ, निगमेऽपि, प्रीहि देवं उशतो यविष्ठ विद्वान् ऋतूंश्च ऋतुपते यजेह। ये देवा ऋत्विजस्तेभिरग्ने त्वं होतृणामस्या यजिष्ठ इति। विधिनिगमभेदः प्रकृतौ कृतः। स्विष्टकृदधिकारस्थ वनस्पतिरिति सङ्कर्षे वक्ष्यते। तस्मात् तत्रापि विधिनिगमभेदः कर्त्तव्यः। अतो येन केनचित् वनस्पत्यभिधानेन निर्देश्यः कर्त्तव्यः, तत्प्रकृतित्वात् इति।

यथोक्तं वा विप्रतिपत्तेर्न चोदना ॥ ३३ ॥

(सि०)

यथोक्तेन वा शब्देन वचनं कर्त्तव्यं, गोः उस्राशब्देन, स हि तत्रात्मातः, उस्रायै वपायै मेदसोऽनुब्रूहि इति । आह, मन्त्रात्मानमेतत् न वचनमस्ति, अनेन कर्त्तव्यम् इति । वचनं पुनश्चोदको विधिभिन्नेन वक्तव्यम् इति । नैतदेवं, न विप्रतिपत्तिं चोदकः प्रापयति, न हि यत् प्रकृतावस्ति तद्विकृतौ कर्त्तव्यमिति केनचित् प्राप्यते, किन्तु यत् प्रकृतौ चिकीर्षितं शब्देनाभिहितं न अर्थात् प्राप्तं, तत् चोदकः प्रापयति । न च, प्रकृतौ विधिनिगमभेदो विवक्षितः, छागस्य वपायै मेदसोऽनुब्रूहि इत्येतदकर्त्तव्यमिति विधीयते, तत्रार्थाद् विधिनिगमभेदो जातः । छागशब्दविधानं श्रुत्या गम्यते, विधिनिगमभेदो लक्षणया । श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा । तस्मात्र येन केनचिदभिधानं, आत्मानसामर्थ्याद् उस्राशब्देन । तथा पृषदाज्ये देवतार्थां यो विधिशब्दः उक्तः, तेन वचनं कर्त्तव्यं, विधिनिगमविप्रतिपत्तिर्न चोद्यते । तस्माद् वनस्पतिशब्देन निर्देशः कर्त्तव्यः इति ॥ (१०।४।१७अ०) ॥

अथस्थ अधीवकृणयोः सक्थिष्टकृच्छब्दं नाभिधानाभिकरणम् ।

स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्त्तत ॥ ३४ ॥

(पू०)

अस्ति अवभृथः, वारुणेनैककपालेनावभृथं यजेत इति। तत्र इदमाम्नायते, अग्नीवरुणौ खिष्टकृतो यजति इति। तत्रायमर्थः 'सांग्रयिकः, किं निगमेऽखिष्टकृच्छब्दकं वचनं कर्त्तव्यम्, उत सखिष्टकृच्छब्दकम्? इति। तत्र एवं तावत् परीक्ष्यते, किं सांविग्रायिकः खिष्टकृच्छब्दः, उत खिष्टं करोतीति एतेन गुणेन प्रवृत्तः इति गौणो न रूढः? इति। यदि रूढः, अखिष्टकृच्छब्दकं वचनं कर्त्तव्यम्, अथ व्युत्पाद्यते, ततः सखिष्टकृच्छब्दकम्। किं प्राप्तम्?, सांविग्रायिकः, न व्युत्पाद्यते इति। कुतः?। न तावत् खिष्टं कृतवान्, अथ च तस्मिन्नेव काले खिष्टकृदित्युच्यते, खिष्टकृतं यजति इति, न ह्यत्र खरसंस्कारो समर्थो प्रादेशिकेन गुणेनान्वितो भवतः। अग्निरेव खिष्टकृच्छब्देनोच्यते, तयोर्यः खिष्टं कृतवान्। यदा सांविग्रायिकः, तदा अखिष्टकृच्छब्दकं वचनं कर्त्तव्यम्। कुतः?। अग्नेर्हि देवताया असौ वाचकः, नाग्नीवरुणयोः, विकृतौ अग्नेर्देवताया अभावात् अग्नीवरुणाभ्यां निवर्त्यते। तस्मादखिष्टकृच्छब्दकं वचनं कर्त्तव्यमिति।

संयोगो वा अर्थापत्तेरभिधानस्य कर्मजत्वात् ॥ ३५ ॥ (सि०)

न चैतदस्ति, अखिष्टकृच्छब्दकं वचनं कर्त्तव्यम् इति। किन्तर्हि सखिष्टकृच्छब्दकं वचनं कर्त्तव्यम् इति। तत एतदर्थ्यते, गौणमिदमभिधानमिति, खिष्टकरणात् खिष्ट-

क्तादिति गम्यते, गम्यमानं न न्याय्यं अविवक्षितं कल्पयितुं, क्रियानिमित्तत्वम् अवयवशब्देभ्यो गम्यते। समुदायस्य चाग्नौ अप्रयोगात् लोकेऽग्न्यभिधानत्वं नाध्यवसीयते। तस्मान्न सांविज्ञानिकः। एवं चेत् संस्थितक्रतुशब्दकं वचनं कर्त्तव्यम्, अर्थापत्तेः, अग्नेरर्थे अग्नीवरुणौ श्रूयेते, अग्नीवरुणौ स्विष्टकृतो यजति इति, क्रियासंयोगित्वाच्च शक्नोति स्विष्टकृच्छब्दः अग्निवरुणौ वक्तुम्। तस्मात् संस्थितक्रतुशब्दकं वचनं कर्त्तव्यम् इति। अथ यदुक्तं, स्विष्टं कृतवति चैष शब्दः, न चाग्निः स्विष्टं कृतवान्, इति। अत्र ब्रूमः, मत्वर्थे भूतकालता हीयेत, त्वत्वर्थे सा च सोपपदस्य धात्वर्थः। अपि च ततः पूर्वान् यागानपेक्ष्य स्विष्टं कृतवानग्निः॥ (१०। ४। १८ अ०)॥

अग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गवेनाग्निशब्देनाग्नेरभिधानाधिकरणम्।

सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात्॥ ३६॥ (पू०)

अस्ति सोमे पशुरग्नीषोमीयः। तत्र श्रूयते, अग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति इति। तत्र स्विष्टकृति गुणलोपः श्रूयते, अग्निं यजति इति। तत्र संशयः, किं याग एव स्विष्टकृतो गुणलोपः अवशिष्टेषु निगमेषु यथा प्रकृति भावः, उत सर्वत्रैव गुणलोपः? इति। किं प्राप्तम्? स्विष्टकृतो

अग्नेः, सगुणस्य गुणलोपे ऋूयमाणे ब्रूमः, यत्रैवोच्यते, गुणलोपस्तत्रैव स्यात्, यागे चोच्यते, अग्निं यजति इति, यागे गुणलोपे उच्यमाने यदि सर्वनिगमेषु गुणलोपोऽध्यवसीयेत, अश्रुतं कल्पेरत। यावांश्च श्रुतस्योत्सर्गे दोषः, तावान् अश्रुतकल्पनायाम्। तस्माद् याग एव लोपः स्यात्, न सर्वेषु निगमेष्विति।

सर्वस्य वैककर्म्यात् ॥ ३७ ॥ (सि०)

सर्वस्य वा निगमस्यापि स्विष्टकृतोऽग्निशब्दस्य गुणो लुप्येत। कुतः? एककर्म्यात्, नैष स्विष्टकृद्याग एव गुणो लुप्येत, किन्तर्हि यागप्रयोगे। कथम्?। अग्निं यजति इति प्रयोगवचन एष शब्दः, सर्वस्मिन् स्विष्टकृद्यागप्रयोगे लुप्येत, अन्येऽपि हि स्विष्टकृन्निगदाः स्विष्टकृद्याग एव। तस्मात् सर्वत्र लोप इति ॥ (१० । ४ । १८ अ०) ॥

अनुयाजेषु स्विष्टकृद्यागस्य संस्मारककर्मकताधिकरणम्।

स्विष्टकृदावापिकोऽनुयाजे स्यात् प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३८ ॥

स्तो दर्शपूर्णमासौ। तत्र स्विष्टकृत्, अनुयाजेष्वग्निं स्विष्टकृतं यजति इति। तत्र सन्देहः, किं स्विष्टकृद्यागोऽनुयाजेष्वारादुपकारकः, उत संस्मारकः? इति। किं

प्राप्तम्? आरादुपकारकः इति। कुतः?। एतद्धि कर्मणां प्रसिद्धं कार्यं, यत् आरादुपक्रिया, तथा हि भूतस्य भव्यार्थता भविष्यति, श्रुत्या च विधानम्। इतरथा भव्यस्य भूतार्थता स्यात्, वाक्येन च विधानम्। तस्मादारादुपक्रियेति।

एवं प्राप्ते ब्रूमः, स्विष्टकृदावापिकः स्यात् न वाङ्गः, किमिदम् आवापिकः इति?। आज्यभागस्विष्टकृतो अन्तरा आवापः स्यात्, तत्र भवः आवापिकः। बहिरावापादनुयाजस्तान्त्रिकः, या तु स्विष्टकृद्देवता तत्र, सैवासौ प्रधानदेवता आवापिकी। तस्मादावापिक इत्युच्यते। यदा चैवं, तदा संस्कारकर्म स्यात्, तथा प्रयोजनवद् भवति, प्रयोजनवतो अग्नेरुपकरोति इति। अपि च हि विधानि अङ्गानि, आरादुपकारकाणि, सामवायिकानि च। आरादुपकारकेभ्यः सामवायिकानि गरीयांसि, तत्र हि साक्षाद्वाक्यम्। आरादुपकारकेषु प्रकृतेन परोक्षेणैकवाक्यता स्यात्। तस्मात् संस्कारकर्मेति॥ (१०। ४। २० अ०)॥

दर्शपूर्णमासयोर्याज्यापुरोनुवाक्ययोः संस्कारकर्मताधिकरणम्।

अन्वाहेति च शश्वत् कर्म स्यात् चोदनान्तरात्॥ ३९॥ (पू०)

दर्शपूर्णमासयोः श्रूयते, याज्यामन्वाह पुरोनुवाक्या-

मन्वाह इति। तत्र संशयः, किं याज्यापुरोनुवाक्यानुवचनं प्रधानकर्म, उत संस्कारकर्म? इति। किं प्राप्तम्? अन्वाहेति प्रधानकर्म स्यात्। कुतः?। चोदनालक्षणात्, यदि संस्कारकर्म ततोऽस्यैवोपदेशे तयोर्वचनं प्राप्नोति, पुनः अन्वाहेति वचनमनर्थकं, प्रधानकर्मत्वे तु वक्तव्यं, न ह्यन्यथा तस्य कर्त्तव्यता गम्यते इति। अतः श्रुत्या कर्त्तव्यतावगमात् प्रधानकर्मेति। श्रुवत्, यथा स्रोचयस्ते स्रोतीति शंसति इति कर्त्तव्यतावगमात् प्रधानकर्मणी। एवमिहापि द्रष्टव्यम्।

संस्कारो वा चोदितस्य शब्दवचनार्थत्वात्॥ ४०॥ (सि०)

संस्कारकर्म वा स्यात्। कुतः?। चोदितस्य अर्थस्य यः शब्दः, स तद्वचनार्थो भवति, स तस्य दृष्टोऽर्थः। तस्मिन् सति अदृष्टकल्पनायां हेतुर्नास्ति। तस्मात् संस्कारकर्मेति। अवाच्यत्वाच्चेति चेत् इति यदुक्तं, तत् परिहर्त्तव्यम्,

स्याद्गुणार्थत्वात्॥ ४१॥ (आ० नि०)

स्याद् उपपद्येत अन्वाहेति वचनम्। कुतः?। गुणार्थत्वात्, तिष्ठन् याज्यामन्वाह आसीनः पुरोनुवाक्यामन्वाह इति स्थानासनगुणार्थं पुनर्वचनं उपपद्यते। तस्मात् संस्कारकर्मेयौ याज्यापुरोनुवाक्ये इति॥ (१०।४। २१ अ०)॥

मनोतायाश्चोदनाभावाधिकरणम् ।

मनोतायास्तु वचनाद्विकारः स्यात् ॥ ४२ ॥

अस्ति वायव्यः पशुः, वायव्यं श्वेतमालभेत भूतिकामः इति । अस्ति तु प्रकृतावग्नीषोमीये पशौ मनोतामन्त्रः, त्वं ह्यग्ने प्रथमो मनोता । अस्याधिगो अमवोदया शता (तै० ब्रा० ३ । ६ । १०) इति । स इह चोदकेन प्राप्यते । तत्र सन्देहः, किं यथादेवतमूहितव्यो मनोतामन्त्रः, अथ वा अविकारेण प्रयोक्तव्यः ? इति । उच्यते, ननु प्रकृतावन्यायनिगदोऽयम्. अग्नीषोमौ हि प्रकृतौ देवता, अयमप्याग्नेयः, असमवेताभिधानाद्विकारेण प्रयोक्तव्यः । अत्रोच्यते, सत्यमग्नीषोमौ देवता प्रकृतौ, तौ तु अग्निश्च सोमश्च । तत्राग्निरदेवता न त्वसमवेतः, अग्निप्रत्ययेन या अत्र देवता सा प्रतीयते । अयमिह वायुदेवताकार्ये श्रूयते, स देवताकार्ये श्रूयमाणो अग्निकार्यमपि करोति देवताप्रत्ययम् । तस्मात्तदर्थापत्तिरूढमर्थं स्यात् (१० । २ । ३५ सू०) तस्मात् यथादेवतं मनोतामन्त्रः प्रयोक्तव्य इति ।

एवं प्राप्ते ब्रूमः, मनोतायां तु वचनाद्विकारः स्यात् इति । वचनमिदं भवति, यद्यप्यन्यदेवत्यः पशुः, आग्नेय्येव मनोता कार्या इति, किमिव वचनं न कुर्यात्, नास्ति वचनस्यातिभारः । तस्माद्विकारेण मनोतामन्त्रः प्रयोक्तव्य इति ॥ (१० । ४ । २२ अ०) ॥

कखरथन्तरस्य स्वयोनौ सन्निधिकरणम्।

पृष्ठार्थेऽन्यद्रथन्तरात् तद्योनिपर्ववत्वात् स्याद्वा प्रविभक्तत्वात् ॥ ४३ ॥ (पू०)

अस्ति वैश्वस्तोमः वैश्यो वैश्वस्तोमेन यजेत इति। तत्र श्रूयते, कखरथन्तरं पृष्ठं भवति इति। उभयविकारः कखरथन्तरमित्युक्तम्, अप्राकृते तद्विकाराद् विरोधाद्रथन्तरिष्ठेरन् (८।२।४८ सू०) इति। तत्र संशयः, किं रथन्तरयोनौ बृहत्योनौ वा अनियमेन कखरथन्तरं गेयम्, उत रथन्तरयोनौ, अथ वा स्वयोनौ ? इति। किं प्राप्तम् ?, यौदृच्छेन अनियमः, लाघवं हि तथा भवति, ततः प्रयोगप्राशुभावः।

एवं प्राप्ते ब्रूमः, पृष्ठार्थं यदेतत् अन्यत् रथन्तरात्, कखरथन्तरं श्रूयते, तद्रथन्तरयोनौ स्यात्। ज्योतिः पूर्वको हि वैश्वस्तोमः, ज्योतिष्टोमे रथन्तरयोनौ पृष्ठं कृतम्। तनु बृहत्योनावपि तत्र कृतम्। नैवम्, ऋचां प्रविभक्तत्वात्, ऋचां प्रविभागः इह गम्यते, यथा रथन्तरयोनि भवति इति। कुतः ?। कखरथन्तरे रथन्तरशब्दः श्रूयते, तेन गम्यते रथन्तरविशेषः कखरथन्तरम् इति। अर्थान्तरे कखरथन्तरशब्दो भवेत् यदि रथन्तरधर्मा न भवेयुः, तेषु सत्सु यूपवदुपपद्यते। यथा औदुम्बरो यूपो भवति इति, न हि औदुम्बरो यूपद्रव्यं प्रकृतौ सङ्कीर्त्तितम्। धर्मनिमित्तस्वयं शब्दः उपपद्यते। एवमिहापि धर्मनिमित्तः कखरथन्तरे रथन्तरशब्दो भवति, नान्यथेति

स्वयोनौ वा सर्वाख्यत्वात् ॥ ४४ ॥ (सि०)

न चैतदस्ति, रथन्तरयोनौ गीयेत इति, किन्तर्हि, स्वयोनौ। कुतः ?। सर्वाख्यत्वात् सर्वविशेषणविशिष्टस्य हि रथन्तरशब्दो वाचकः, प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य सस्तोभस्वरकालाभ्यासस्य कखरथन्तरमित्याख्या भवति, तस्मात् योनिरपि विशेषणम्। अपि च अर्थान्तरे कखरथन्तरे रथन्तरशब्दः कल्पाः स्यात्। तस्मात् स्वयोनौ गीयमिति।

यूपवदिति चेत् ॥ ४५ ॥ (आ०)

इति चेत् पश्यसि, स्वयोनौ गीयमिति रथन्तरशब्दः तेनोपपद्यते, स हि रथन्तरधर्मेषु सत्सु यूपवदुपपद्यते इति।

न कर्मसंयोगात् ॥ ४६ ॥ (आ० नि०)

न एतदेवं, कर्मसंयोगात् काष्ठस्य यूपता, न हि लोके यूप इति सञ्ज्ञातः कश्चित् वृक्षोऽस्ति। यत्र ते संस्काराः, स यूपः, तस्मात् औदुम्बरो यूपो भवति इति संस्कारनिमित्तः, इह पुनरेवंविशेषणविशिष्टः कखरथन्तरशब्दो लोक एवास्ति, नासौ कखानां रथन्तरं कखरथन्तरमित्येवं कृत्वा उच्यते, रथन्तरत्वे कखसम्बन्धे वा अस्य विधीयमाने वाक्यभेदः प्रसज्येत। तस्मात् सांज्ञायिकः कखरथन्तरशब्दः। अत एव स्वयोनौ गीयते ॥ (१० । ४ । १३ अ०) ॥

कखरथन्तरस्य स्वयोन्युत्तरयोर्गानाधिकरणम्।

कार्य्यत्वादुत्तरयोर्यथाप्रकृति ॥ ४७ ॥ (पू०)

कखरथन्तर एव भवति संशयः, उत्तरयोर्गायति इति। किं रथन्तरयोन्युत्तरयोः बृहद्योन्युत्तरयोर्वा गेयम्, उत स्वयोन्युत्तरयोः ? इति। किं प्राप्तम् ?, बृहद्योन्युत्तरयोर्वा रथन्तरयोन्युत्तरयोर्वा इति। कुतः ?। चोदकानुग्रहात्। न तत्रैष दोषो भवति स्वयोनिविशिष्टं कखरथन्तरम् इति, उत्तरयोर्हि यत्नार्थं, तत्र स्वयोनिरवश्यं ज्ञातव्या भवति। तस्मात् प्रकरणमपेक्षितव्यमिति।

समानदेवते वा तृचस्याविभागात् ॥४८॥ (सि०)

न चैतदस्ति, बृहद्योन्युत्तरयोः रथन्तरयोन्युत्तरयोर्वा गेयम् इति, किन्तर्हि, स्वयोन्युत्तरयोः। कुतः ?। तृचग्रहात्, समानच्छन्दसि समानदेवताके च अविशेषितस्य ग्रहो भवतीत्युक्तम्। अतः श्रुत्या चोदको बाध्यत इति स्वयोन्युत्तरयोर्गेयमिति ॥ (१० । ४ । २४ अ०) ॥

अग्निष्टुति स्तुतशस्त्रयोरविकाराधिकरणम्।

ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ॥ ४९ ॥ (सि०)

अस्ति अग्निष्टुत् एकाहः। तत्र श्रूयते, आग्नेया ग्रहा

भवन्ति इति । तत्र सन्देहः, किं प्राकृतयोः स्रोग्यग्रस्रयो-र्यथादेवतमूहः, उत अविकारः । इति । जडबुद्धिं व्याव-र्त्तयितुमिदमभिधीयते, ग्रहाणां देवतान्यत्वे स्रुतग्रस्रयोः कर्मत्वादविकारः स्यात्, प्रधानकर्मत्वादिति । कस्य पुन-रेषा बुद्धिः स्यात्, यं निवर्त्तयेत् ? । यो मन्दधीर्मन्यते अभिधानं सेत्स्यतीति । मन्दधियामपि चोपदेशः क्रिय-माणः फलवान् भवति । अपि च कश्चिदपेक्ष्य सर्वे मन्द-धियः । अथ तु न परितोषः एवं, ततोऽन्यथा वर्ण्यते, यत्तत् हृत्तमधिकरणं द्वितीयेऽध्याये, (१ पा० ५ अ०) तस्येदं प्रयोजनसूत्रं, ग्रहाणां देवतान्यत्वे स्रुतग्रस्रयोः कर्म-त्वादविकारः स्यात् इति । यदि संस्कारकर्मणी स्रोग्य-ग्रस्रे, किं भवति प्रयोजनम् ? । अग्निष्टुदेकाहे यथादेवत-मूहः । अथ प्रधानकर्मणी, ततो ग्रहाणां देवतान्यत्वे स्रुतग्रस्रयोः कर्मत्वादविकारः स्यात् इति ॥ (१० । ४ । २५ अ०) ॥

चातुर्मास्येषु आज्यग्रब्दस्याविकारेणावाहनाधिकरणम् ।

उभयपानात्पृषदाज्ये दध्नः स्यादुपलक्षणं निग-मेषु पातव्यस्योपलक्षणात् ॥ ५० ॥ (प्र० पू०)

सन्ति चातुर्मास्यानि, चातुर्मास्यैः स्वर्गकामो यजेत इति । तत्रानुयाजान् प्रकृत्य समामनन्ति, पृषदाज्येना-नुयाजान् यजति इति । अस्ति तु प्रकृतौ आवाहनं,

देवान् आज्यपान् आवह इति। तद्दिह चोदकेन प्राप्तम्। तत्र संशयः, किमविकारेणावाहनं कर्त्तव्यम्, उत ऊहेन। इति। यदा ऊहेन, तदा किम् आज्यपान् दधिपान् इति कर्त्तव्यम्, उत दधिपान् इति, अथ वा पृषदाज्यपान् इति?। किं प्राप्तम्?, दध्नः अपि उपलक्षणं स्यात् आज्यस्यापि। कस्मात्?। उभयपानात्, उभयं हि तत् देवतामुद्दिश्य त्यज्यते, यच्च त्यज्यते, तत्पीयत इति मन्त्रेणोक्तं, यच्च पातव्यं, तदुपलक्षितं, प्रकृतौ आज्यपान् इति, इह आज्यस्यार्थे दधिसर्पिषी श्रूयते, अथ पृषदाज्यं गृह्णाति, इयं वा इदं सर्पिश्चैव दधि च, इन्द्रं वै मिथुनं प्रजननं, मिथुनमेवैतत् प्रजननं क्रियते इति। तुल्यं दधि आज्येन उच्चार्यते। तस्मात् उभयमप्युपलक्षयितव्यं दधि च आज्यं चेति।

न वा परार्थत्वाद्यज्ञपतिवत् ॥५१॥ (प्र० पृ० सि०

न वा एतदेवं, दधि उपलक्षयितव्यमिति। कुतः?। परार्थत्वात्, परार्थं हि पातव्यं द्रव्यं, पातॄणामुपलक्षणं, तच्चाज्येन चेदुपलक्ष्यते, कृतोऽर्थः इति न पुनर्ईक्षा उपलक्षयितव्यम्, यज्ञपतिवत्, यथा, इमं यज्ञमवान्येव यज्ञपतिं वर्द्धान् इति यज्ञपतिर्मनुष्याणां होतॄणां प्रशंसार्थः, न स्वार्थं कीर्त्यते इति अविकारेण प्रयुज्यते, न सर्वान् यजमानान् प्रत्याहरः। एवमिहापि पातव्यं पातुर्लक्षणार्थं प्रयुज्यते, न स्वार्थम्। तच्चैकेनापि येन केनचिल्लक्षिताः पातार इति कृत्वा न द्वितीयः प्रयोक्तव्य इति।

स्याद्वा आवाहनस्य तादर्थ्यात् ॥ ५२ ॥ (आ०)

स्यात् दध्नः उपलक्षणं, न यज्ञपतिवत्स्यात्। यज्ञपति-शब्दो हि न स्वार्थम् उच्चार्यते, इड़ान्तुल्यर्थेन स उच्यते, आवाहनं पुनः स्मरणार्थं, तच्च पातापि कर्त्तव्यः, पेय-मपि। तस्माद्दोदकानुग्रहाय पेयान्तरम् उपलक्षयितव्य-मिति।

न वा संस्कारशब्दत्वात् ॥ ५३ ॥ (आ० नि०)

न वा दधि उपलक्षयितव्यं, संस्कारशब्दोऽत्र विद्यते आज्यस्य, पृषदाज्येनानुयाजान् यजति इति। पृषदाज्येन चित्रे चेत्यर्थः, संस्कारेण हि मिश्रणे संस्कृतं चित्रमाज्यं भवति। तां च चित्रतामस्य प्रत्यक्षतो दधि उत्पादयति। तस्मात् परार्थं चित्रतासम्पननार्थं न पातव्यम्, अतो नोप-लक्षयितव्यमिति।

स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥ (आ०)

स्याद्वा दधि उपलक्षणं, द्रव्यं हि दधि तुल्यमाज्येन, प्रधानभूतमुपदिश्यते, इत्युक्तमस्माभिः, अथ पृषदाज्यं गृह्णाति, इयं वा इदं सर्पिरेव दधि च, इन्द्रं वै मिथुनं प्रजननं, मिथुनमेवैतत् प्रजननं क्रियते इति। किं पृष-दाज्यं गृह्णते ?, सर्पिरेव दधि चेति, सर्पिषा दध्ना च याग: कर्त्तव्य इत्यर्थः। पृषदाज्यमिति न द्रव्यान्तरमुच्यते। तस्मात् दधि उपलक्षयितव्यमिति।

दध्नस्तु गुणभूतत्वादाज्यपा निगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५५ ॥ (सि०)

न चैतदस्ति, तुल्यं दधि आज्येन, प्रधानभूतमिति । ग्रहणे हि तत् तुल्यमाज्येन, न यागे, यागो हि आज्येन विशेष श्रूयते, तस्मात् श्रुतेराज्यप्रधानत्वात् यागं प्रति गुणभूतं दधि स्यात्, न हि, ग्रहणे श्रूयमाणं यागे श्रुतं भवति इति, दधि ग्रहणे श्रूयमाणं न यागार्थं भवति, तच्च श्रुत्या आज्यं करणं, दधि वाक्येनेति । किमर्थं तर्हि तच्च दधिग्रहणम् ? । स्तूयमानेन प्रत्यक्षतश्चित्तमाज्यं भवति इति । तस्मादाज्यपा निगमाः स्युर्न दध्न उपलक्षणं कर्त्तव्यमिति ।

दधि वा स्यात् प्रधानमाज्ये प्रथमान्वयसंयोगात् ॥ ५६ ॥ (हि० पू०)

न चैतदस्ति, आज्यपा निगमा भवेयुरिति न दध्न उपलक्षणं कर्त्तव्यम् इति, दधिपानिलेव कर्त्तव्यं, दधि एवात्र प्रधानम् । कुतः ? । आज्ये प्रथमान्वयसंयोगात्, प्रथमसंयोगः उपस्तरणम्, चान्वयसंयोगोऽभिघारणं, यद्धि च सर्वं यजेत द्विरुपस्तृणीयात् सकृदभिघारयेत् ओषधयो वै द्विरुक्ता ओषधिष्वेव पशून् प्रतिष्ठापयति इति । यद्धि प्राहुर्यि यजेत सकृदुपस्तृणीयात् द्विरभिघारयेत् द्वन्द्वेव पशून् अभिजिघर्त्ति इति, उपस्तरणमन्वयं तच्च निधापयितुं क्रियते, परार्थेन एव तच्च शब्दार्थः, न ग्रहणमात्रं,

ग्रहणेनान्यस्याधिकरणसंस्कारे उपस्तृणाति इति शब्दो वर्त्तते। तथा, अभिघारयति इति न ग्रहणमात्रम् अभिघारणम्, अन्यस्याभिमुखेनाभिघारयति इति गम्यते, सोऽत्र आज्यसंयुक्तः कथं स्यात् इति। तदुपस्तरणाभिघारणशब्दाभ्यां दधि प्रधानभूतं गम्यते, आज्यमपि तस्य गुणभूतम्। तस्मादत्र एवोपलक्षणं कर्त्तव्यं न आज्यस्येति।

अपि वाज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ॥५७॥ (द्वि० पू० नि०)

अपि वा नैतदेवं, दधि प्रधानं, तदुपलक्षयितव्यम् इति। आज्यमेव प्रधानं, तद्धि प्रयोजनवत् यागसम्बन्धात्, पृषदाज्येनानुयाजान् यजति इति, यत् तेनोपस्तीर्यते तच्च हवं निष्पद्यते, तच्चैवावत्तं भवति, दधि चोपस्तीर्णं, तच्च शब्दात् आधेयस्याधारसंस्कारोऽवगम्यते दधिसंस्कारः, न तु संस्कृतस्य प्रयोजनं दृष्टः, प्रत्यक्षा तु चिन्तता निर्वर्त्त्यमाना लक्ष्यते, तया च प्रयोजनं, दृषदि तदाज्यं श्रूयते। न च, यागे दधि करणं भवितुमर्हति वाक्यप्राप्तम् आज्ये श्रुतिप्राप्ते प्रत्यक्षिणि, तस्मादुपस्तरणमाज्यग्रहणार्थमेव, ततो दधिग्रहणं भविष्यतीति अर्थादाधेयाधारसम्बन्धे उपस्तरणमिव तद् भवतीति भाक्तं उपस्तृणातिः प्रयुक्तः, तथाभिघारयतिः। तस्मात् सकृद् हिरण्मिलस्य गुणस्यार्थे व्यपदेशे भक्त्या एव संस्कारशब्द उपस्तृणाति, अभिघारयति, ओषधिष्वेव पशुम् प्रतिष्ठापयति, दुग्ध्वैव पशूनभिजिघर्त्ति इति च। तस्मात् आज्यपा निगमा एव भवेयुरिति।

अपि वाऽऽज्यविकारत्वात् तेन स्यादुपलक्षणम् ॥ ५८ ॥ (१० पू०)

अपि वा इति पक्षव्यावृत्तिः, न आज्यपा निगमा भवेयुः, पृषदाज्यपानिति वक्तव्यम्। कुतः ?। आज्यविकार एव भवति, दधिसर्पिषोरेव संसर्गः क्रियते, तत्र यो गुणः उपजायते तद्युक्तस्य संसृष्टस्य आज्यविशेषो भवति पृषदाज्यम् इति, तथा रागः खाण्डवः सुरा इति। तत्र हि उपचरितमेकं शब्दं उपलक्षयामः। उपचाराच्च अभिधानाभिधेयसम्बन्धो मन्यते, तेन च यागनिवृत्तिः श्रूयते, पृषदाज्येनानुयाजान् यजति इति। तस्मादेवमुपलक्षयितव्यं, पृषदाज्यपानिति।

न वा स्यात् गुणशास्त्रत्वात् ॥ ५९ ॥ (१० पू० नि०)

नैतदेवं स्यात्, संसृष्टस्य रागवत् पृषदाज्यशब्दो वाचक उपचारादिति। सत्यमुपचरितोऽयं तत्र, स तूपचारो लोकादेवावगतः, स मुख आज्ये भवतीति गम्यते। कुतः ?। आज्यशब्दः सर्पिषो वाचकः। पृषच्छब्दः चित्रस्य, तथा हि पृषद्गुः पृषन्मयि पृषन्मृग इति। तयोरुपचरितयोश्चित्राज्याभिधानं गम्यते, तस्मात् तत्रैव स उपचार उपपन्नः। अतश्चाज्यस्यैव उपलक्षणं चित्रमचित्रं वा आज्यम् आज्यशब्देनाभिधीयत एवेति ॥ (१० । ४ । २६ अ०) ॥

इति भट्टश्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य चतुर्थः पादः ॥

मीमांसा-दर्शने

१० अध्याये ५ पादः ।

एकदेशग्रहणे प्राथमिकानामेव ग्रहणाधिकरणम् ।

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् ॥ १ ॥ (सि०)

द्यावापृथिवीयमेककपालम्, आग्नेयं द्विकपालं, वैष्णवं त्रिकपालम् इत्यादि एकदेशवचनम् । समस्तवचनमपि भवति, आग्नेयमष्टाकपालं निर्वपेत् इति । तथा द्विरात्रेण यजेत, त्रिरात्रेण यजेत, चतूरात्रेण यजेत, पञ्चरात्रेण यजेत, षड्रात्रेण यजेत, सप्तरात्रेण यजेत, अष्टरात्रेण यजेत, नवरात्रेण यजेत, दशरात्रेण यजेत, एकादशरात्रेण यजेत इत्येकदेशग्रहणम् । समस्तग्रहणमपि भवति, द्वादशाहेन प्रजाकामं याजयेत् । तथा, एकां सामिधेनीमन्वाह तिस्रः सामिधेनीरन्वाह इति एकदेशग्रहणम् । समस्तग्रहणमपि भवति, पञ्चदश सामिधेनीरन्वाह इति । तदत्र संशयः, किं सर्वेष्वेव आद्योपादानम् अन्त्यलोपश्च, उत विकल्पः ? इति । किं प्राप्तम् ? । आनुपूर्व्यवतां क्रमवताम् एकदेशग्रहणे ब्रूमः, अन्त्यलोपः आद्योपादानञ्च इति । किंकारणम् ? मुख्यमाद्यं, जघन्यम् अन्त्यं, मुख्यजघन्ययोः

रन्यतरस्मिन् लोप्ये जघन्ये लुप्येत, मुख्ये हि अनुग्रहीतव्यः। तदुक्तं, मुख्यं वापूर्वचोदनाश्लोकवत् इति। आगमवत् यथा, समाजेषु समाजेषु च ये आगन्तवो भवन्ति, ते पूर्वोपविष्टान् अनुपलभ्यैवनिविशन्ते, एवमिहापि द्रष्टव्यम्।

लिङ्गदर्शनाच्च ॥ २ ॥ (यु०)

इतश्च आद्योपादानमन्यलोपश्च इति। कुतः?। लिङ्गमप्येवं भवति, लुप्येत वा एतत् षष्ठमहो यत् पञ्चानुपयन्ति, लुप्येत वा एतत् षष्ठं कपालं यत् पञ्चकपालं निर्वपन्ति इति षष्ठस्य लोपं दर्शयति, न प्रथमस्य।

विकल्पो वा समत्वात् ॥ ३ ॥ (पू०)

नैतदस्ति, आद्योपादानम् इति, किन्तर्हि विकल्पः आद्यमन्त्यं वा उपादातव्यम् इति। कुतः?। समत्वात्, समो हि अन्त्यलोपः आद्यलोपेन, न हि आदिलोपे श्रुतिः, नो खल्वपि अन्त्यलोपे। मुख्ये जघन्ये वा उपादीयमाने प्राकृतमुपात्तं भवति, न हि विशेषश्रुतिरस्ति, मुख्यमुपादातव्यमिति तस्मादनियम इति।

क्रमादुपजनोऽन्ते स्यात् ॥ ४ ॥ (आ० नि०)

अथ यदुक्तं, समाजेषु समाजेषु चागन्तुर्जनो यथा वास्तव्यान् अनुपलभ्यैव निविशते एवमिहापि इति। युक्तं,

यद्यास्तच्चेराक्रान्ते देशे आगन्तुर्जनो असञ्चरादन्ते निविशते, इह तु अनाक्रान्ते चिन्त्यते, के प्रथममाक्रमेयुरिति। तेनात्र न कश्चिदपि क्रमो विरुद्ध इति।

लिङ्गमविशिष्टं सङ्ख्याया हि तत् वचनम् ॥५॥ (आ० नि०२)

अथ यल्लिङ्गमुक्तं, लुप्येत वा एतत् षष्ठमहः इति षष्ठस्य लोपं दर्शयति, नाद्यस्येति। तद् अविशिष्टं विकल्पेऽपि, सङ्ख्याया हि षष्ठमिति पूरणवचनं भवति, यस्मिन् कस्मिंश्चिदपगते येन प्रथमेन मध्येन अन्त्येन वा सङ्ख्या पूर्यते, तत् षष्ठम्। यथा षष्ठो भ्रातृणां न दृश्यते इति, कनीयसि ज्येष्ठे मध्ये वा अदृश्यमाने भवति, एवमिहापि द्रष्टव्यम्।

आदितो वा प्रवृत्तिः स्यादारभ्यस्य तदादित्वात् वचनादन्त्यविधिः स्यात् ॥६॥ (पू० नि०)

वाशब्दः पक्षं व्यावर्तयति, आदितः प्रवृत्तिः भवितुमर्हति। कुतः?। आरभ्यस्य तदादित्वात्, आरभ्यो हि तेषाम् आनुपूर्व्यवताम् आदितो न्याय्यः, पूर्वेण हि उपक्रान्तो द्वितीयादिः कर्त्तव्यः, स इह प्रथममेव क्रियमाणः अनुपक्रान्तः केनचित् क्रियेत, पूर्वो हि पदार्थः क्रियमाणः उत्तरं पदार्थमभिनियच्छति, यः पुनराद्यः पदार्थः सोऽनुपक्रान्त एवान्येन कर्त्तव्यः, तस्मिन्नेव प्रथममुपादीयमाने न अनुपक्रमदोषो भविष्यति। तस्मात् सर्वत्रैवं,

ये क्रमवन्तः आरब्धव्याः, ते प्रथमादुपक्रमितव्या इति।

अपि च, प्रथमस्य निमित्तमुपसंग्रहं, न च विरोधोऽस्ति तदादिषु क्रतुषु, अन्यानां निमित्तेऽपि प्राप्ते, परिपूर्णत्वात् पदार्थानां, लोपो न विद्यते। तस्मादाद्योपादानमन्यलोपस्य इति। अथैवं न्यायेन प्राप्ते, यच्च वचनं भवति, तदपनीय मध्यममपि, विधिर्भवति। यथा, अपवर्हिषः प्रयाजान् यजति। अपवर्हिषावनुयाजौ यजति इति। विना वचनेन, अन्यलोप एव न्याय्य इति॥ (१०।५।१ अ०)॥

एकविंशे चार्थे ऋचि गानाधिकरणम्।

एकविंशे ऋचादिषु माध्यन्दिने छन्दसां श्रुतिभूतत्वात्॥ ७॥ (पू०)

अस्ति एकविंशः क्रतुः, अत्रैष एकविंशः। तस्यैकस्यां वक्ष्यमाणं, तिसृषु स्तोतुराज्यम्। एकस्यां मैत्रावरुणस्य, तिसृषु ब्राह्मणाच्छंसिनः। एकस्यामच्छावाकस्य, तिसृषु माध्यन्दिनः पवमानः इति। तत्र माध्यन्दिने पवमाने संशयः, किं ऋचाद्यासु गानं कर्त्तव्यम्, उत आद्ये ऋचे? इति। किं प्राप्तम्?, एकविंशे क्रतौ माध्यन्दिने पवमाने ऋचाद्यासु स्तोत्रियासु गानं स्यात्। कुतः?। छन्दसां श्रुतिभूतत्वात्, श्रुतिभूतानि हि त्रीणि छन्दांसि प्रकृतौ, त्रिच्छन्दा वावैषः, माध्यन्दिनः पवमानः पञ्चसा-

मेति, तानि इह चोदकेनैव प्राप्तानि। तानि एवमुपसंहर्तुं शक्यन्ते, यदि ह्यचाद्यासु गानम्। तस्मात् ह्यचाद्यासु इति।

आदितो वा तन्न्यायत्वादितरस्यानुमानिकत्वात् ॥ ८ ॥ (सि०)

वावद्यः पक्षं व्यावर्त्तयति, आद्ये ह्यचे गानं कर्त्तव्यम्। एष हि न्यायः, क्रम एवम् अनुगृहीतो भवति। इतरस्य छन्दोऽनुग्रहस्य प्राकृतत्वादिह आनुमानिकत्वं भवति।

आह, ननु क्रमोऽपि प्राकृतत्वादानुमानिकः। उच्यते, उभयोरानुमानिकयोः क्रमानुग्रहो न्याय्यान् भवति। कथम्?। तत्र हि प्रथमे गायत्रे छन्दसि अभिनिर्वृत्ते द्वितीया स्तोत्रीया प्रारब्धा, प्रथमारब्धेन हि पदार्थः क्रियमाणः उत्तरं पदार्थमभिनियच्छति। अप्रवृत्ते कस्मिंश्चित् पदार्थे सर्वं वैकल्पिकं प्राप्नोति, न प्रवृत्ते। प्रवृत्ते हि ततोऽन्यदशक्तत्वादप्राप्तम्। प्रारब्धस्य च क्रिया प्राप्ता, तस्यामवस्थायां उभयप्राप्तभावादविकल्पः। अत्र किं तदेव प्रारब्धं परिसमाप्यताम्, अथान्यत् अप्राप्तमारभ्यताम् इति। तत् परिसमापयन् त्रुटं करोति, परित्यजन्, त्रुटं ह्रदाति इति प्रारब्धं परिसमापनीयं गम्यते। अथेदानीं तस्मिन् निर्वृत्ते वैकल्पिकं कृतार्थत्वादप्राप्तं, तस्मात् क्रमानुग्रहो न्याय्यो न छन्दोऽनुग्रह इति।

तत्राह, ननु गायत्रेण छन्दसा पूर्वं क्रियमाणेन उत्तरकालं त्रैष्टुभमभ्युपक्रान्तं भवति। उच्यते, सत्यमुपक्रान्तं

भवति, न तु द्वितीयां तृतीयामजत्वा। अथ तयोः पूर्वे तृचे नैव छन्दसां प्रयोजनम्। तस्मात् प्रत्यक्षत्वात् पूर्वया स्तोत्रीयया उत्तरयोः स्तोत्रीययोः क्रमस्य, क्रमानुग्रहो न्याय्य छन्दोऽनुग्रह इति।

यथानिवेशस्तु प्रकृतिवत् सङ्ख्यामात्रविकारत्वात्

॥ ९ ॥ (यु०)

इतश्चार्थे तृचे गेयम् इति। कुतः?। यथानिवेशं प्रकृतिवत् यच्छब्देन प्रासासु स्तोत्रीयासु तिसृषु माध्यन्दिनः इति सङ्ख्यामात्रस्य प्रत्याम्नायो न क्रमस्य। आह, ननु यथा क्रमस्य न प्रत्याम्नायः, एवं छन्दसामपि। उच्यते, सत्यम् एवम् एतत्, मुख्यस्तु क्रमानुग्रहः, जघन्यः छन्दसाम्। तस्मादपि आर्चे तृचे गातव्यमिति ॥(१०।५।२५०)॥

एकस्मादपि धूर्गानाधिकरणम्।

विकल्पे धुर्ग्ये स्यात् ॥ १० ॥ (पू०)

अस्ति एकविकः क्रतुः, अग्नेष एकविकः। तस्य एकस्यां वक्ष्यमाणं, तिसृषु स्तोत्रीयासु। एकस्यां मैत्रावरुणस्य, तिसृषु ब्राह्मणाच्छंसिनः। एकस्यामच्छावाकस्य तिसृषु माध्यन्दिनः पवमानः इति। सन्ति तु धुरि सामानि। तेषु संशयः, किं, तृचे गेयानि, उतै[illegible] इति। किं प्राप्तम? विकः स्तोमः तृचे

स्यात् धुरि सामस्तु। एवं ह्यचप्रायकचोदकोऽनुवर्त्तते। तस्मात् ह्यचे गेयमिति।

एकस्यां वा स्तोमस्याहृत्तिधर्मत्वात् ॥ ११ ॥ (सि०)

एकस्यां वा ऋचि गेयं, स्तोमस्य हि तत्राहृत्तिधर्मता भवति, वचनप्रामाण्यात्, इदं भवति वचनम् आहृत्तं धूर्षु स्तुवते, पुनराहृत्तं पृष्ठेऽपतिष्ठते इति। किमिव वचनं न कुर्य्यात्। तस्मात् धुरि सामस्तु एकस्यामृचि गेयमिति ॥ (१०।५।३ अ०)

हिरण्यादिषु दशरात्रस्य विध्यनानुष्ठानाधिकरणम्।

चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात् ॥ १२ ॥ (सि०)

सन्ति हिरण्यादयो ब्रह्मवर्णाः, हिरण्येन यजेत इत्येवमादयः। तेषु किं ऋतुक्रस्य दशरात्रस्य विध्यन्तः प्रवर्त्तते, उत प्रायणीयोदयनीयौ वर्जयित्वा दशरात्रस्य ? इति। किं प्राप्तम् ? अविशेषात् ऋतुक्रयेति।

एवं प्राप्ते ब्रूमः, चोदनासु तासु प्रायणीयोदयनीययोः पूर्वत्वेनासम्बन्धात् दशरात्रस्य विध्यन्तः प्रवर्त्तते। केन हेतुना ?। लिङ्गेन विध्यन्तो नियम्येत। किं लिङ्गं

तत् हतीयं जगतीमन्तर्यच्छति इति । एवं ज्ञापयति, यत् प्रथमं हिरावत, तत् हितीयं हादश्याहस्य मायवम् । यत् हितीयं हिरावत, तत् हतीयं त्रेष्टुभं जगतीमन्तर्यच्छति इति षड्हतीयं जागतम् अहः अन्तरीयमाणं दर्शयन् दशरात्रस्य प्रहृत्तिं दर्शयति । यत् प्रथमम् इति हिरावत्य वादः, प्रकरणात् । तत् हतीयम् इति हादश्याहस्य, हिरावे हतीयाभावात् । अपि चेदमपरं लिङ्गं, गायत्रं प्रथमम-हस्त्रैष्टुभं हितीयं जगतीमन्तर्गच्छति इति, अन्तरायये षड्ह-हतीयं जागतं दर्शयति । तस्मात् दशरात्रस्य प्रहृत्तिः ।

प्राग्निस्तु रात्रिशब्दस्यत्वात् ॥ १३ ॥ (उप०)

हिरात्रेण यजेत इति रात्रयवः, इहापि दशरात्रः इति स एव, तदेतस्मात् प्रकृतिलिङ्गात् दशरात्रस्य विध्यन्त इति प्राप्ते लिङ्गदर्शनम् ॥ (१० । ५ । ४ अ०) ॥

समभिराधुनोति इत्यानेनाग्नौ धूननाख्यायां मन्त्राणामनियमेनोपादानाधिकरणम् ।

अपूर्वासु तु सङ्ख्यासु विकल्पः स्यात् सर्वासा-मर्थवत्त्वात् ॥ १४ ॥

अग्नौ तु आधूननार्था मन्त्राः, वेद्यादीनां त्वापन्नवा-धूनोमि इत्येवमादयः, तान् प्रकृत्य श्रूयते, समभिराधूनोति इति । तथा अग्नौ वपनार्था मन्त्राः, या ओषधीः इत्येव-

तत्र संशयः, किमाद्योपादानम्, उत अनियमः ? इति । किं प्राप्तम् ?, आद्योपादानम्, आदिमो वा तन्त्रायत्वात् (८सू०) इति ।

एवं प्राप्ते ब्रूमः, अपूर्वासु तु सङ्ग्रासु अप्रकृतिपूर्विकासु त्वयमाद्यासु ब्रूमः, विकल्पः स्यात्, एवं सर्वासां सङ्ग्रानाम् अर्थवत्त्वं भविष्यति । आद्योपादाने हि केषाञ्चिन्मन्त्राणामुत्पत्तिरनर्थिकैव स्यात् । गम्यते च ताभिर्वपनं, प्रकरणात्, या हि प्रकृतिपूर्विका भवन्ति, तासां प्राकृतप्रयोगेणार्थवत्ता, आनर्थक्येन च कारणेन मुख्यातिक्रमः सङ्ग्रायाः ॥ (१० । ५ । ५ अ०) ॥

विरूढस्तोमकेऽप्राकृतानां साम्नामागमाधिकरणम् ।

स्तोमविरूढौ प्राकृतानामभ्यासेन सङ्ग्रापूरणमविकारात् सङ्ग्रायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् ॥ १५ ॥ (पू०)

इह विरूढस्तोमकाः क्रतव उदाहरणम्, एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेन ओजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम् इति । तत्रायं संशयः, किं प्राकृतानां साम्नामभ्यासेन सङ्ग्रा पूरयितव्या, उत अप्राकृतानामागमेन ? इति । किं प्राप्तम् ? अनियमः, अविशेषात् । इति प्राप्ते ब्रूमः, स्तोमविरूढौ अभ्यासेन सङ्ग्रा

पूर्यते, एवं हि प्रज्ञातपदत्वम्, इतरथा अप्रज्ञातमभिधेयेति। सङ्ख्या हि शास्त्रतात्पर्यभूतानां वाक्यानां गुणभावेनोच्यते, न प्राधान्येन। न चान्यत् सामर्थ्यमुक्त्वा विधीयते, तावांश्च श्रुतसङ्ख्यार्थस्तोमेषु दोषः, तावच्च श्रुतकल्पनायाम्। तस्मादभ्यसितव्यानि प्राज्ञातानि जलानि, यथा वृत्रि जानातीति।

आगमेन वाऽभ्यासस्याश्रुतित्वात् ॥ १६ ॥

(सि०)

वाशब्दः पक्षं व्यावर्त्तयति। अप्राज्ञतानां सङ्ख्यां आगमेन सङ्ख्या पूरयितव्या इति। कुतः? अभ्यासो न हि श्रूयते, एतावत श्रूयते, एकविंशेनातिरात्रेण प्रजाकामं याजयेत् इति, यावांश्च श्रुतस्तोमेषु दोषः, तावान् श्रुतकल्पनायाम्।

ननु आगमोऽपि न श्रूयते। उच्यते, उभयत्रापि न्यूयमाणे आगमो ज्यायः, एवमागमपूरिता सङ्ख्या समञ्जसा भविष्यति, इतरथा अभ्यासपूरिता असमञ्जसा स्यात्। तस्मादागमेन पूरयितव्येति।

सङ्ख्यायाश्च पृथक्त्वनिवेशात् ॥ १७ ॥ (यु०१)

श्रुतागमेनेति। कुतः?। पृथक्त्वनिवेशिनी हि सङ्ख्या, यथा षष्टी घटा इति, अभ्यासेनापृथक् स्यात्।

[illegible] इति।

पराक्छब्दत्वात् ॥ १८ ॥ (सु०२)

इतश्चागमेनेति । कुतः ? । पराक्छब्दो हि भवति, पराक् वक्ष्यमाणेन सुवन्ति इति । स च अतश्चार्थस्य वाचकः, यथा पराची: सामिधेनीरन्वाह इति अनभ्यस्ता इति गम्यते । तस्मादपि आगमः ।

उन्नावित्कारात्र ॥ १९ ॥ (सु०२)

इतश्चागमः, एवमुन्नावित्कारो भवति । किमिदम् अविकारः इति ? । अपुनर्वचनं, तच्च जानिनादीनां न भविष्यति, अभ्यासे हि स स्यात्, जानि वा एतद्यज्ञस्य क्रियते यदेकं भूयः क्रियेत इति ।

अश्रुतित्वान्नेति चेत् ॥ २० ॥ (आ०)

इति चेत्, इति पुनर्यदुक्तम् आगमोऽपि नैव श्रूयते इति, तत् परिहर्तव्यम् ।

स्यादर्थचोदितानां परिमाणशास्त्रम् ॥ २१ ॥ (आ०नि०)

अर्थेन सामानि चोद्यन्ते । कतमेनार्थेन ? । एकविंशेन अतिरात्रे च प्रजाकामं याजयेत् इत्येवमादीनां वाक्यानामर्थेन इति, न हि अनागम्यमानेषु सामसु एताः सङ्ख्या सामच्छब्देन सम्भवन्ति, तस्मात् अर्थचोदितानाम् इदं परिमाणशासनं कृत्वा कृतार्थः शब्दः एकविंशेन अतिरात्रे

प्रजाकामं याजयेत् इति यथेप्सितमागमं न शक्नोति वारयितुम्। तस्मादागमेन पूरयमिति।

आवापवचनं चाभ्यासे नोपपद्यते ॥ २२ ॥ (यु०४)

इतश्चागम इति पश्यामः, आवापवचनं हि भवति, त्रीणि ह वै यज्ञस्योदराणि गायत्री हृहती अनुष्टुप्, अत्र हि एवावपन्ति, अत एवोहपन्ति इति। एतत् अभ्यासे नावकल्पते। तस्मादप्यागम इति।

साम्नां चोत्पत्तिसामर्थ्यात् ॥२३॥ (यु०५)

इतश्चागमः। कुतः ?। साम्नां हि एवमुत्पत्तिरर्थवती भवति—

दश सामसहस्राणि शतानि च चतुर्दश।
साङ्गानि सरहस्यानि यानि गायन्ति सामगाः।
अशीतिशतमाग्नेयं पवमानं चतुःशतम्।
ऐन्द्रं स्यात् सप्तविंशानि यानि गायन्ति सामगाः॥ इति।

इतरेषां साम्नां उत्पत्तिरनर्थिका स्यात्। तस्मादपि आगमः इति॥

धूर्ये ष्वपीति चेत् ॥ २४ ॥ (आ०)

अथ यदुपवर्णितं, यथा धूरि-सामस्विति, तत् परिहर्त्तव्यम्।

नाहृत्तिधर्मत्वात् ॥ २५ ॥ (आ०नि०)

नैतदेवं युक्तं, धूरि सामसु आहृत्तिधर्मकाणि हि तानि,

वचनप्रामाण्यात् । इदं तत्र वचनम् आहृत्तं धूर्षु स्रुवते, पुनराहृत्तं पृष्ठैरुपतिष्ठते इति, वचनात् तत्र क्रियते । तदिह वचनं नास्ति, तस्माद् विषममेतदुपवर्णनम् । अत्र आगमेन सङ्ख्या पूरयितव्येति सम्पन्नमेतदिति ॥ (१० । ५ । ६ अ०) ॥

वह्निष्यमाणे ऋगागमाधिकरणम् ।

वह्निष्यमाणे तु ऋगागमः सामैकत्वात् ॥ २६ ॥

विहृद्धस्तोमकेषु क्रतुषु संशयः, वह्निष्यमाणे किं साम्नाम् आगमः, अभ्यासः ? इति । पूर्वेण न्यायेनागमः इति ।

एवं प्राप्ते ब्रूमः, वह्निष्यमाणे तु नैवम्, ऋगागमः तत्र इति । कुतः ? । सामैकत्वात् । कथम् ? । यत् उत्तरयोः एवमानयोस्तृचाय तृचाय हिङ्करोति । अथ कस्माद् वह्निष्यमाणे सकृदेव हिङ्करोतीति ? । एकं हि तत्र सामेति ब्रूयात्, स्वारमेव गायत्रम् इति वचनात्, सामैकत्वे ज्ञाते ऋगागमेन सङ्ख्या पूरयितव्येति, सामापि अभ्यसितव्यमिति ॥ (१० । ५ । ७ अ०) ॥

सामिधेनीष्ववशिष्टानामागमेन सङ्ख्यापूरणाधिकरणम् ।

अभ्यासेन तु सङ्ख्यापूरणं सामिधेनीष्वभ्यास-प्रकृतित्वात् ॥ २७ ॥ (पू०)

स्तो दर्शपूर्णमासौ, तत्र काम्याः सामिधेनीकल्पाः एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य, चतुर्विंशतिमनुब्रूयात् ब्रह्मवर्चसकामस्य, एकविंशतिश्चानुब्रूयात् अन्नकामस्य, द्वाविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य, षड्विंशतिमनुब्रूयात् पशुकामस्य इत्येवमादयः। तत्रायमर्थः सांग्रहिकः, किं सामिधेनीष्वागमेन सङ्ख्या पूरयितव्या, उत अभ्यासेन, उत यावदुक्तमभ्यस्य शेषमागमेन ? इति। किं प्राप्तम् ? पूर्वेण न्यायेनागम इति। अपि च अविशेषोऽर्थः, अभ्यासेन हि पूर्ण्यमाणा न सामञ्जस्येन स्यात्, तस्मादागम इति।

एवं प्राप्ते ब्रूमः, अभ्यासेन तु सङ्ख्यापूरणम् इति। तुग्रहः पञ्चव्यावर्त्तकः, नागमः किन्तर्हि अभ्यासः। कुतः ?। अभ्यासप्रकृतित्वात्, प्रकृतौ अभ्यासेन सङ्ख्या पूरिता, त्रिः प्रथमामन्वाह त्रिरुत्तमाम् इति। कथम् ?। पञ्चदश सामिधेन्यः इति श्रुतिः, एकादश च समाम्नाताः। तत्र अभ्यासेनागमेन वा सङ्ख्यायां पूरयितव्यायां अभ्यासः श्रुतः, त्रिः प्रथमामन्वाह, त्रिरुत्तमाम् इति, अनेन नियमेन प्रथमोत्तमयोरभ्यासः कर्त्तव्य इति, यावत्कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसङ्ख्या पूर्य्यते, तावत्कृत्वोऽभ्यसितव्यम्, इत्येतदभिप्रायं त्रित्वं, तथा हि दृष्टार्थता; त्रिसङ्ख्याभिप्राये अदृष्टं कल्पं स्यात्। तस्मादिहापि तत्प्रकृतित्वात् यावत्कृत्वोऽभ्यस्यमानयोर्यथोदिता सङ्ख्या पूर्य्यते, तावत्कृत्वोऽभ्यसितव्यम् इति।

अविशेषात् नेति चेत् ॥ २८ ॥ (आ०)

इति यदुक्तं तत् परिहर्त्तव्यम् ।

स्यात् तद्धर्मत्वात् प्रकृतिवदभ्यसेत आ सङ्ख्यापूरणात् ॥ २९ ॥ (आ० नि०)

स्यात् अभ्यासः । कुतः ? । प्रकृतिधर्मत्वं हि विकृतेः, तस्मात् आ सङ्ख्यापूरणात् अभ्यसितव्यम् । एवं प्रकृतिवत् कृतं भविष्यति, चोदकानुरोधेन अभ्यासमामञ्जस्यम् अभ्युपगन्तव्यम् । तस्मादभ्यास इति ।

यावदुक्तं वा कृतपरिमाणत्वात् ॥ ३० ॥ (मि०)

वाशब्दः पक्षं व्यावर्त्तयति । नैवम्, आ सङ्ख्यापूरणात् प्रथमोत्तमे अभ्यसितव्ये इति, यावदुक्तमभ्यस्य अवशिष्टानामागमेन पूरयितव्या सङ्ख्येति । कुतः ? । कृतपरिमाणत्वात् अभ्यासस्य, कृतं हि अभ्यासस्य परिमाणं, चिः प्रथमामन्वाह, चिरुत्तमाम् इति, चिसङ्ख्या चाभ्यासेन विवक्षिता, न पूरणी सङ्ख्या, तथा श्रुतिः परिच्छेत्री स्यात्, इतरथा लक्षणा ।

अथ यदुक्तं, दृष्टार्थता चैवं भवति इति । नैतदेवम्, आदर्त्तव्यो हि चित्यानुरोधः, द्विचतुष्कोणापि हि सङ्ख्या पूर्य्यते, तथापि प्रथमोत्तमयोश्चिरभ्यासोऽनुष्ठेयः, तेन सङ्ख्या पूरयितव्येति । इहापि तेनैव अभ्यासेन सङ्ख्या पूर्य्यते, भवति हि सोऽप्यत्र सङ्ख्यापूरणः, प्रकृतौ प्रथमोत्तमे च चिरभ्यस्ते, सङ्ख्या च पूरिता । इहापि तदेव कर्त्तव्यं, प्रथमोत्तमे च चिरभ्यसितव्ये, सङ्ख्या च पूरयितव्या, न

प्रकृतावेष शब्दार्थो गम्यते, अनेनाभ्यासेन सङ्ख्या पूरयितव्येति। अभ्यासः कर्त्तव्य इति वचनादवगम्यते, सङ्ख्या पूरयितव्येति सामर्थ्यात्। सा च प्रकृतौ अर्थादनेन पूरिता, यत्त्वार्थात् क्रतः, न स चोदनार्थः। तस्मात् न, अनेनाभ्यासेन सङ्ख्या पूरयितव्येति चोदक आह। एवं चेद् यावदुक्तम् अभ्यस्य अवशिष्टानामागम इति।

अधिकानाञ्च दर्शनात् ॥ ३१ ॥ (शु०)

इतश्चागम इति, अधिकदर्शनं हि भवति, न जगत्या परिदध्यात्, यज्जगत्या परिदध्यात् तच्छन्दांसि गमयेत्, त्रिष्टुभा परिदधाति इति, अभ्यासे च जगतीपरिधानाशङ्का नावकल्पते। तस्मादप्यागम इति।

कर्मस्वपीति चेत् ॥ ३२ ॥ (आ०)

इति चेत् पश्यसि, यावदुक्तमभ्यस्य अधिका आगमयेदिति, ध्रुवि सामकर्मस्वपि एवमेव स्यादिति।

न चोदितत्वात् ॥ ३३ ॥ (आ० नि०)

नैतदेवं, ध्रुवि-सामकर्मसु युक्तम्। चोदितस्त्वभ्यासः, आहृत्तं धूर्षु स्तुवते, पुनराहृत्तं पृष्ठैरुपतिष्ठते इति। इह तद्वचनं नास्ति, तस्माद्यावदुक्तम् अभ्यस्य अवशिष्टानामागमेन सङ्ख्या पूरयितव्येति ॥ (१०। ५। ८ अ०) ॥

षोडशिनां प्राकृतत्वाधिकरणम् ।

षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ॥

॥ ३४ ॥ (पू०)

अस्ति षोडशी, ज्योतिष्टोमं प्रकृत्याम्नातः, यं एवं विद्वानेतं षोडशिनं गृह्णाति, भवत्यात्मना, परास्य भ्रातृव्यो भवति इति । तत्र संशयः, किमेष प्राकृतः, वैकृतः ? इति ? कथम् ? । प्राकृतः, ज्योतिष्टोमं प्रकृत्य आम्नानात्, वैकृतो विकृतौ वचनात्, मध्यमेऽहंस्त्रिरात्रस्य गृह्णन्ति इति । प्रकृतावपि वचनमस्त्येवेत्याशङ्क्य, अग्निष्टोमे राजन्यस्य गृह्णीयादतिरात्रे ब्राह्मणस्य इति, विकृतावपि वचनसामर्थ्यात् विकृतौ अतिरात्रे स्यादित्याशङ्कते । प्रकृताविति आम्नानात्, प्रकृतौ च अतिरात्रस्य भावात् प्राकृतः इत्याशङ्का । तस्मात् संशयः ।

किं प्राप्तम् ? षोडशिनो वैकृतत्वं स्यात् । कुतः ? । तत्र कृत्स्नविधानात्, विकृतावसौ कृत्स्नो विधीयते । कथम् ? । य एवं विद्वानेतं षोडशिनं गृह्णीत इत्यभिधाय मध्यमेऽहं त्रिरात्रस्य गृह्णन्ति इति विधीयते । प्रकरणाच्च वाक्यं बलीयः । एवं वाक्येन प्रकरणे बाधिते, अतिरात्रे ब्राह्मणस्य इति वचनं वैकृते अतिरात्रे इति गम्यते, तेन यद्यपि ज्योतिष्टोमं प्रकृत्य विधानाद्विकृतावसौ न कृत्स्न आम्नातः, तथापि कृत्स्न एव विकृतौ विहितो भवति । तस्मात् विकृतिषु परिगणितासु षोडशी ग्रहीतव्यो न प्रकृताविति ।

प्रकृतौ चाभावदर्शनात् ॥ ३५ ॥ (यु० १)

इतश्च वैकृत इति । कुतः ? । प्रकृतौ अभावो दृश्यते । कथम् ? । हे संस्तावानां विराजमतिरिच्येते इति अभावे षोडशिनः, हे स्तोत्रीये विराजमतिरिच्येते इति वर्धिते द्वितीयेऽध्याये (२ । ४ । २६ सू०) । तस्मादपि वैकृतः षोडशीति ।

अयज्ञवचनाच्च ॥ ३६ ॥ (यु० २)

इतश्च वैकृतः स्यात्, एवं हि भवति वचनं, न षोडशी नाम यज्ञोऽस्तीत्याहुः इति । न तावत् नास्ति षोडशी ज्योतिष्टोमे प्रकृतौ, इदं भवति वचनं, यदि ज्योतिष्टोमे नास्ति, एवमुपपद्यते । तस्मादपि वैकृत इति गम्यते ।

प्रकृतौ वा शिष्टत्वात् ॥ ३७ ॥ (सि०)

वाशब्दः पक्षं व्यावर्तयति, नैतदस्ति वैकृतः षोडशीति, प्राकृतः स्यात् । कुतः ? । प्रकृत्यां हि ज्योतिष्टोमे आम्नातः, प्रकरणाच्च ज्योतिष्टोमेनैकवाक्यता स्यात्, सा विकृतावप्युच्यमानस्य नापैति । न चेदं वचनं प्रकृतौ प्रतिषेधकं, किन्तर्हि विकृतावुपदेशकम् । तस्मात् प्रकृतौ शिष्टाप्रतिषिद्धत्वात् षोडशी भवितुमर्हति इति ।

अपि च न केवलं प्रकरणमस्य साधकं, किन्तर्हि वाक्यमपि तत्रेति, अग्निष्टोमे राजन्यस्य गृह्णीयादतिरात्रे ब्राह्मणस्य इति । न चेदं प्रकृतौ सत्रवत् वैकृतेऽतिरात्रे [illegible] । तस्मात् प्राकृतः षोडशीति ।

प्रकृतिदर्शनाच्च ॥ ३८ ॥ (यु०)

प्रकृतौ भवति दर्शनमस्य षोढ़ग्रिनः, तिस्रः संस्तुतानां विराजमतिरिच्यन्ते इति, उक्तमेतत् षोढ़ग्रिनि ग्रहणमाधे तिस्रणां स्तोत्रीयाणां दर्शनमवकल्पत इति। तस्मात् प्राकृतः षोढ़ग्रीति।

आम्नातं परिसङ्ख्यार्थम् ॥ ३९ ॥ (आ० नि० १)

अथ यदुक्तं, वैकृतस्यैव क्रतूक्थविधानादिति, तदुक्तं, प्रकृतावप्रतिषेधकं तद्वचनमिति। अथ षोढ़केन प्राप्तौ किमर्थं पुनरुच्यते इति। अविशेषेण हि तद्वचनं प्रकृतावभिधाय अग्निष्टोमे राजन्यस्य, ब्राह्मणस्य चातिरात्रे इति वाक्येनोक्तं, तद्विकारार्थमेवं प्राप्नोति परिसङ्ख्यानं, तदर्थमुच्यते, अनतिरात्रेऽप्यनग्निष्टोमेऽपि कथं ग्रहणं स्यात्? मध्यमेऽहश्चिरात्रस्य ग्रहणं इति।

उक्तमभावदर्शनम् ॥ ४० ॥ (आ० नि० २)

अथ यदुक्तं, प्रकृतौ षोढ़शी न दृश्यते, ते संस्तुतानां विराजमतिरिच्येते इति, तदुक्तम्। अभावदर्शनात् वैकल्पिकः षोढ़शी, न विहितप्रतिषेधात् पञ्चेऽतिरेकः इति।

गुणादयश्चत्वम् ॥ ४१ ॥ (आ० नि० ३)

अथ यदुक्तम्, अयज्ञवचनात् न प्रकृतौ षोढ़शीति, तदुक्तं, श्रिष्टत्वात् प्रकृतौ ग्रहणं इति। कथं त्वयज्ञवच-

नम् ?। वैकल्पिकत्वात्, पक्षे सः यज्ञो नास्तीति भक्त्या अयज्ञ इत्युच्यते। तस्मात् प्राकृतः षोड़शीति। प्रयोजनं, पूर्वपक्षे प्रकृतौ न गृह्यते, गृह्यते सिद्धान्ते ॥ (१०।५।८अ०) ॥

आग्रयणादेव षोड़शिग्रहणाधिकरणम्।

तस्माग्रयणाद् ग्रहणम् ॥ ४२ ॥ (सि०)

अस्ति षोड़शी, य एवं विद्वानेतं षोड़शिनं गृह्णाति, भवत्यात्मना परास्य भ्रातव्यो भवति इति। तत्रायमर्थः समधिगतः, प्राकृतः षोड़शी इति। अथेदानीम् इदं सन्दिह्यते, किमसौ आग्रयणादुक्थ्याच्च ग्रहीतव्य इति, उत, आग्रयणादेव ? इति। किं प्राप्तम् ?। तस्माग्रयणात् ग्रहणम्। कुतः ?। वचनात्, आग्रयणात् गृह्णाति षोड़शिनम् इति।

उक्थ्याच्च वचनात् ॥ ४३ ॥ (पू०)

गृह्णीम एतत्, आग्रयणाद् ग्रहीतव्यः षोड़शी इति, किन्तु उक्थ्याच्च ग्रहीतव्यः। कुतः ?। वचनात् वचनमिदं भवति, उक्थ्यात् गृह्णाति षोड़शिनम् इति, किमिदं वचनं न कुर्यात्। तस्मादुक्थ्याग्रयणाभ्यां ग्रहीतव्य इति। (१०।५।१० अ० पू०)। तदेतत् अपर्य्यवसितं तिष्ठतु तावत्, अथ इदानीमेतच्चिन्त्यते,

---

तृतीयसवन एव षोड़शिग्रहणाधिकरणम्।

तृतीयसवने वचनात् स्यात् ॥ ४४ ॥

अस्ति ज्योतिष्टोमः, तत्र श्रूयते, यः षोड़शी गृह्यते इन्द्रियमेव वीर्यमात्मं धत्ते इति। तत्र संशयः, किं सवने-सवने ग्रहीतव्यः, उत, तृतीयसवने ? इति। किं प्राप्तम्। सवने सवने इति। कुतः ?। प्रतिसवनं हि श्रूयते, गृह्णाति षोड़शिनम् इति। शब्दलक्षणे च कर्मणि शब्दो प्रमाणम्। तस्मात् सवने-सवने षोड़शी गृह्यते इति।

एवं प्राप्ते ब्रूमः, तृतीयसवने स्यात् अस्य ग्रहणम् इति। कुतः ?। वचनात्, भवति हि वचनं, तृतीयसवने श्रयणात् गृह्णाति षोड़शिनम् इति, वचनं नः प्रमाणं, स्यात् तृतीयसवने ग्रहीतव्य इति। अथ यदुक्तं, प्रति-सवनं षोड़शिग्रहणम् इति, तृतीयसवनग्रहणस्तुत्यर्थं त्। कथम् ?। प्रातःसवने गृह्णः तेजो वै प्रातःसवनं, तेजस एव वज्रं निर्भिमीते। माध्यन्दिने सवने गृह्णः, तेजो वै माध्यन्दिनं सवनं, तेजस एव वज्रं निर्भिमीते। तृतीयसवने गृह्णः, पशवो वै तृतीयसवनं, पशुभ्य एव वज्रं निर्भिमीते। यत् प्रातःसवने गृह्णीयात् वज्रं उत्तरे सवने अतिरिच्येत। यन्माध्यन्दिने मध्यतः, वज्रं निहन्यात्। तृतीयसवने गृह्णः, तत् सर्वेषु सवनेषु गृह्णाति न पूर्वे सवने आर्त्तिं नीत इति ॥ (१०। ५। ११ अ०) ॥

अनभ्यासे पराक्शब्दस्य तादर्थ्यात् ॥ ४५ ॥ (१० अधि० पू० यु० १)

स्थितात् उच्यते, इतश्च पश्यामः, उक्थ्याच्च ग्रहीतव्य इति । कुतः ? । यत् पराञ्चमुक्थान्निर्गच्छति षोडशिनम् इति । उक्थान्निर्गच्छतीति सम्बन्धः, न उक्थात् पराञ्चम् इति । कुतः ? । अनभ्यासे पराक्शब्दो वर्त्तते । कुतः ? । तादर्थ्यात्, तादर्थ्यं हि अस्यावगम्यते, पराची: सामिधेनीरन्वाह, अनभ्यस्ताः सामिधेनीरन्वाहेति यथा, अनभ्यासवचनः सन् नोक्थ्येन सम्बध्यते, न हि भवति सम्बन्धः, उक्थ्यादनभ्यस्तमिति, कथन्तर्हि उक्थान्निर्गच्छति तमनभ्यस्तम् इति । तस्मादप्युक्थाग्रयणाभ्यां ग्रहीतव्य इति ।

उक्थ्यविच्छेदवचनत्वात् ॥ ४६ ॥ (१० अधि० पू० यु० २)

इतश्चोक्थ्यादपि ग्रहीतव्य इति । कुतः ? । उक्थ्य विच्छेदवचनं भवति, विच्छिन्दन्ति ह वा एतदुक्थ्यं यदुक्थानि षोडशिनश्च ततः प्रणयन्ति इति, प्रणयतिः सम्बन्धादिस्रष्टमपादानं दर्शयति । तस्मादप्युभाभ्यां ग्रहीतव्य इति ।

आग्रयणाद्वा पराक्शब्दस्य देशवाचित्वात् पुन

आग्रयणात् एव वा ग्रहीतव्यः, नोक्थ्यात्। कुतः ?। यदाग्रयणात् गृह्णाति षोड़शिनम् इति वचनात्, न ग्रक्थ्यः आग्रयणात् कृत्स्नो गृह्यमाण उक्थ्यात् गृहीतुम् इति। अगतिका क्षेषा गतिः, यत् कृत्स्नसंयोगे सति विकल्प-समुच्चयौ स्याताम्। सत्यां हि गतौ न तौ आग्रयणीयौ स्तः। अस्ति चात्र गतिः। कथम् ?। पराक्शब्दस्य देश-वाचित्वात्, दिग्देशकालवचनो हि पराक्शब्दो भवति, तथा सति उक्थ्यात् पराञ्चमिति सम्बन्धो भविष्यति, न कृत्स्नसंयोगो विरोत्स्यते। यथा, पराञ्चमग्न्याधेयात् पुनरादधाति इति कालसंयोगे पञ्चमी, नापादाने। एव-मिहापि द्रष्टव्यम्। तस्मादाग्रयणादेव ग्रहीतव्य इति।

विच्छेदः स्तोमसामान्यात् ॥४८॥ (आ०नि०)

अथ यदुक्तं, विच्छेदवचनादप्रादानदर्शनम् इति। नैतदेवं, विच्छेदः स्तोमसामान्यात् भवति, विच्छिन्दन्ति वा एतदुक्थ्यं यदुक्थ्यानि षोड़शिनञ्च ततः प्रणयन्ति इति, एकविंशस्तोमत्वादुक्थ्यविग्रह इव षोड़शी इति, तत्र पूर्वयोर्विच्छिन्न एवोच्यते, ततः प्रणयन्ति इति। इयमपि कालसम्बन्ध एव पञ्चमी, नापादाने। तस्माद् आग्रयणादेव ग्रहीतव्यः षोड़शी ॥ (१०।५।१० अधि० शेषः) ॥

षोड़शिग्रहस्य उक्थ्यशस्त्रताधिकरणम् ।

उक्थ्याग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात् सति हि संस्थान्यत्वम् ॥ ४९ ॥ (पू०)

षोड़शिनि प्रकृते इदमाम्नायते, अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्यः इति । तत्रायमर्थः सांशयिकः, किम् अस्तोत्रशस्त्रः षोड़शी, उत, सस्तोत्रशस्त्रः ? इति । किं प्राप्तम् ? अस्तोत्रशस्त्रः स्यात् । कुतः ? । उक्थ्याग्निष्टोमसंयोगात्, उक्थ्याग्निष्टोमसंयोगो भवति, अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्यः इति । अग्निष्टोमसंस्थे उक्थसंस्थे च षोड़शी ग्रहीतव्य इत्युच्यते । एवमग्निष्टोमसंस्थोऽसौ क्रतुर्भवति, यत्र स ग्रहो गृह्यते, यदि च न तत्र स्तोत्रं शस्त्रं वा क्रियते । सति हि स्तोत्रे शस्त्रे वा षोड़शिना स्तोमेन सन्तिष्ठेत । तत्राग्निष्टोमसंस्थो न स्यात्, उक्थ्यसंस्थश्च । तत्रेदं वचनम् उपकल्प्येत, अग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्यः इति ? । अग्निष्टोमविशिष्टे ज्योतिष्टोमे स उच्यते, अग्निष्टोमस्यैवाङ्गम् । न हि, यागः स्तुतशस्त्रयोरङ्गं भवति, फलवत्त्वात् यागस्य, अफलत्वाच्चेतरयोः । अग्निष्टोमश्चासौ ज्योतिष्टोमसंस्थो अनेन भवति, नान्यथा । तस्मादस्तोत्रशस्त्रः स्यात् इति ।

सस्तुतशस्त्रो वा तदङ्गत्वात् ॥ ५० ॥ (सि०)

सस्तुतशस्त्रो वा षोड़शी । कुतः ? । तदङ्गत्वात्

यागस्य हि स्तोत्रशस्त्रेऽङ्गभूते ग्रहग्रहणनिमित्ते। कथम्?। ग्रहं वा गृहीत्वा चमसं वौन्नीय स्तोत्रमुपाकरोति इत्युपसम्प्राप्ते निमित्ते भवितव्यं नैमित्तिकेन। तस्मात् सप्तत-शस्त्रः षोड़शी स्यात्।

लिङ्गदर्शनाच्च ॥ ५१ ॥ (षै०)

लिङ्गमध्येतमर्थं दर्शयति, सप्तशस्त्रः षोड़शी इति। कथम्? ऋत्विजो वा अन्ये यज्ञक्रतवः सन्तिष्ठन्ते तिर्यञ्चोऽन्ये, ये होतारमभिसन्तिष्ठन्ते, ते ऋत्विजः, ये वा अच्छावाकं, ते तिर्यञ्चः। कथं ज्ञात्वा एतल्लिङ्गम्?। एतदुक्तं भवति, इये एव यज्ञक्रतवो भवन्ति ये होतारमभिसन्तिष्ठन्ते ये चाच्छावाकम्। यदि सप्तशस्त्रः षोड़शीति तत एवं, अन्यथा अयं षोड़शी अध्वर्युमभिसन्तिष्ठेत। तस्मादपि सप्तशस्त्रः षोड़शी।

वचनात् संस्थान्यत्वम् ॥ ५२ ॥ (आ० नि०)

अथ यदुक्तं, सति हि संस्थान्यत्वम् इति। वचनादेवं भविष्यति। अग्निष्टोमान्तं यदुक्तं, तस्य वचनादयमन्योऽन्तो विधीयते। किमिव वचनं न कुर्यात्। तस्मादपि सप्तशस्त्र इति॥ (१०। ५। १२ प०)॥

अङ्गिरसां द्विरात्रे षोड़शिनः परिसंख्याधिकरणम्।

अभावादतिरात्रेऽपि गृह्यते ॥ ५३ ॥ (पू०)

अस्ति अङ्गिरसां हिरात्रः, तच्चेदमाम्नायते, वैखानसं पूर्वेद्युः साम भवति षोड़श्युत्तरे इति। तत्रायमर्थः सांशयिकः, किमत्र षोड़शिनो विधानम्, उत, प्राप्तस्य परिसङ्ख्यानम्? इति। किं प्राप्तम्? अप्राप्तस्य विधानम्, आनुमानिकस्योदकः, स विहितं न प्रापयति, विहितस्य उत्तरेऽहन् हिरात्रस्य गच्छते इत्यनेन वचनेन। तस्मात् षोदको न प्रापयतीति अप्राप्तस्य विधानमिति मन्यते।

अन्वयो वानारभ्यविधानात् ॥ ५४ ॥ (सि०)

अन्वयो वा षोड़शिनोऽप्यस्मिन् क्रतौ परिसङ्ख्यार्थमिदं अवश्यं, वैखानसं साम पूर्वेद्युर्भवति षोड़श्युत्तरे इति। कथम् अन्वयः?। अनारभ्यविधानात्। क्रतमोऽनारभ्यविधिः?। उत्तरेऽहन् हिरात्रस्य गच्छते इति, तेन प्राप्ते उपसंहारः क्रियते, यदेतत् हिरात्रस्योत्तरे गच्छते इति, एतदङ्गिरसां हिरात्रस्य गच्छते, नान्यत्र इति।

अथ वा एवं प्राप्तम्, अभावादतिरात्रेषु गच्छते इति, यदेतत् प्राक्तनमतिरात्रेषु षोड़शिग्रहणं, वैकल्पिकं तत् विकल्पेनैव सर्वेष्वतिरात्रेषु प्राप्तं नियम्येत, उत्तरेऽहन् हिरात्रस्य गच्छते इति, तस्योपसंहारे क्रतेऽन्यतिरात्रेषु अभावः, अभावादङ्गिरसां हिरात्रे नियतो गच्छते षोड़शी उत्तरे इति। अन्वयो वा अनारभ्यविधानात्, अन्वितानि षोड़शिना सर्वहिरात्रे भूतराणि अहानि, प्रत्यक्षश्रवणात् उत्तरेऽहन् हिरात्रस्य गच्छते इति अनारभ्यविधानेन।

ननु उपसंहारः परिसङ्ख्या वा षोड़शी उत्तरे इति। उच्यते, न शक्यं प्रत्यक्षश्रवणं परिसङ्ख्यातुं विशेषवचनेन। त्रयो हि दोषाः प्रादुःस्युः, श्रुत्यर्थं श्रवणं परार्थं कल्पना, प्राप्तबाधश्च। न चोपसंहारः, भिन्नत्वाद्वाक्ययोः। किमर्थं तर्हीदं षोड़श्युत्तरे। इति। नैवेतद्विधानं षोड़शिनः, किन्तर्हि वैखानसस्य साम्नः, वैखानसं तत् साम पूर्वेद्युर्भवति इति विधीयते, उत्तरे षोड़शीत्यनूद्यते, अनारभ्यविधानेन प्राप्तत्वात्। तस्मात् प्राप्तस्य षोड़शिनो ग्रहणम् इति॥ (१०।५।१३अ०)॥

नानाहीने षोड़शिग्रहग्रहणाधिकरणम्।

चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यत इत्यभ्यासेन प्रतीयेत भोजनवत्॥ ५५॥ (पू०)

षोड़शिनं प्रकृत्य आमनन्ति, चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्यते इति। अत्रैषोऽर्थः सांशयिकः, किमेकस्मिन्नहीने चतुर्थे दिवसे षोड़शी अभ्यसितव्यः, उत, एकस्मादहीनादहीनान्तरे चतुर्थेऽहनि गृह्यते इत्येवमभ्यसितव्यः। इति। किं प्राप्तम्। एकस्मिन्नभ्यसितव्यः इति। कुतः?। अहीनस्येकस्येत्युच्यते, नानाहीनेषु चेत् दृश्यते, सा लक्षणा भवति, अस्मिन् पक्षे श्रुतिः। अपि च वीप्सानर्थक्यं नानाहीनेषु चेत् स्यात्, चतुर्थेऽहनि अहीनस्येत्येतावतैव तत् सिद्धयति। एकस्मिंस्तु वीप्सा अर्थवती भवति

तस्मादेकस्मिन्हीने अभ्यसितव्यः, भोजनवत्, यथा चतुर्थे चतुर्थेऽहनि दैवदत्तो भुङ्क्ते इति चतुर्थे भुक्त्वा ततः चतुर्थे गम्यते एकस्मिन् पञ्च इति, एवमिहापि द्रष्टव्यम्। तस्मात् एकस्मिन्हीने इति।

अपि वा सङ्ख्यावत्त्वात् नानाहीनेषु गृह्यते पञ्चवदेकस्मिन् संख्यार्थभावात् ॥ ५६ ॥

(सि०)

नानाहीनेषु वा चतुर्थेऽहनि गृह्यते, एवं सङ्ख्यावत् ग्रहणं भवति, चतुर्थेऽहनि इति। एकस्मिन्हीने एकं चतुर्थमहः, अन्यदष्टमं भवति। यदुक्तं, श्रुतिशब्दो भविष्यतीति अहीनः इति। भवति सा हि श्रुतिः, न च तया श्रुत्या किञ्चित् सिध्यति, चतुर्थस्याभावात्। अस्त्यत्र लक्षणा, तया तु सिध्यति। अपि च, न लक्षया, सामान्याभिप्रायमेकवचनम्। यदुक्तं, वीप्सानर्थक्यम् इति। न, आनर्थक्यमापततीत्यशब्दार्थः कल्पनीयः। तस्मात् नानाहीनेषु ग्रहीतव्य इति, पञ्चवत्, यथा, पञ्चम्यां पञ्चम्यां भुङ्क्ते इति पञ्चान्तरं गम्यते, एवमिहापि द्रष्टव्यः। तस्मान्नानाहीनेषु ग्रहीतव्य इति।

भोजने तत्सङ्ख्या स्यात् ॥ ५७ ॥ (आ० नि०)

यत्तु भोजनवदित्युक्तम्, अर्थात् तत् तस्माच्चतुर्थादृध्वंश्चतुर्थं तच्च कल्प्यते। चतुर्थादारभ्य यान्यहानि, तेषां चतुर्थम अहीनस्य तत अष्टमम। शब्दलक्षणे कर्मणि

शब्दाभिहितं गम्यते, न लोकाभिप्रायः तस्मात् युक्तं भोजने लोकाभिप्रायानुष्ठानम्, अहोने तु शब्दाभिहितं गम्यते ॥ (१०।५।१४अ०) ॥

विकृतौ ग्रहणामायग्रहणायाः अधिकरणम् ।

(प्रथमवर्णकम्) ।

जगत्साम्नि सामाभावात् ऋक्तः साम तदाख्यं स्यात् ॥ ५८ ॥

ज्योतिष्टोमे श्रूयते, यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहात् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रान् इति । आग्रयणाग्रान् इत्येतदुदाहरणम् । तत्र संशयः, किम् आग्रयणाग्रतायाः प्रकृतौ निवेशः, उत विकृतौ ? इति । किं प्राप्तम् ? प्रकरणानुग्रहात् प्रकृतौ इति, यदि जगत्सामा इति ज्योतिष्टोम एवोच्यते, येन केनचिदभिसम्बन्धेन गुणेन क्रियया वा ।

एवं प्राप्ते ब्रूमः, जगत्साम्नि श्रूयमाणेऽपि ऋक्तः साम तदाख्यम् इति अध्यवसीयते । कुतः ? । सामाभावात् न हि, ऋत्वेऽपि सामवेदे जगत्साम सामास्ति, तस्माच्च जगत्यामुत्पन्नं साम स जगत्सामा, स विष्णुवान् । ननु शुक्राग्रो विष्णुवान् इत्युच्यते । नैष दोषः, स कामाय भविष्यति । तस्माद्विकृतौ विष्णुवति निवेश इति ।

एवं वा,

जगत्यग्नि सामाभावात् ऋक्तः साम तदाख्यं स्यात् ॥ ५८ ॥

यदि जगत्सामा आश्रयणाद्यान् ग्रहान् गृह्णीयात् इत्येतदेव उदाहरणम्। तत्र संशयः, किम् अन्यतरसामा जगत्सामा, रथन्तरसामा बृहत्सामा वा? किमुभयसामा जगत्सामा? किं रथन्तरसामा जगत्सामा? किं यत्र जगत्यामुत्पन्नं साम जगत्सामा? इति। किं प्राप्तम्? अन्यतरसामा इति। कुतः?। विशेषानवगमात्, ज्योतिष्टोमस्य प्रकृतत्वात्, तस्य च अन्यतरसामत्वात्, एवं प्राप्तम्। अथवा उभयसामा जगत्सामा, जगच्छब्दः क्रतुसंज्ञावाची, क्रतुसंज्ञत्वं च ज्योतिष्टोमे उभयसाम्नः, अन्यतरसामत्वे जगच्छब्दस्याविशेषणत्वात् अविवक्षः प्रसज्येत। तस्मादुभयसामा। अथ वा रथन्तरसामा जगत्सामा, तत्र हि ऋचि जगच्छब्दो विद्यते, ईयानमस्य जगतः खट्टयम् इति। यदि चोभयसामा जगत्सामा भवेत्, कृतकरो विधिरनर्थकः स्यात्। तेन नेतयोः समुच्चयः प्रकृतौ। तस्माद् रथन्तरसामैव जगत्सामा इति।

एवं प्राप्ते ब्रूमः, यत्र जगत्यामुत्पन्नं साम, स जगत्सामा इति। तथा हि श्रुतिः, इतरथा रथन्तरसामनि अध्यवसीयमाने ऋचा पदं लक्ष्यते, पदेन साम, सेषा

लक्षितलक्षणा स्यात्। तस्मात् जगत्यां यन्न साम, स जगत्सामा, ऋक्षः जगदाख्यं साम स्याद्विषुवति। ननु शुक्राग्नौ विषुवानित्युच्यते। नैष दोषः, स कामाय भविष्यति। तस्माद्विषुवति विकृतौ निवेश इति ॥ (१०। ५। १५ अ०) ॥

संसवे उपवत्यग्रियवत्योरभावाधिकरणम्।

उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात् स्यात् ॥ ५९ ॥ (१म पू०)

सन्ति उभयसामानः क्रतवः, संसव उभे कुर्य्यात अपचितावपि एकाहे श्रूयते, उभे बृहद्रथन्तरे कुर्य्या इति। तत्रास्ति रथन्तरनिमित्तकं बृहन्निमित्तकञ्च, उग्रवतौ रथन्तरपृष्ठस्य प्रतिपदं कुर्य्यादग्रियवतौ बृहत्पृष्ठ इति। तत्रैषोऽर्थः सांग्रयिकः, किं रथन्तरनिमित्तकं बृहन्निमित्तकं वा कार्य्यं, विकल्पः? अथ वा रथन्तरनिमित्तं कर्त्तव्यम्? अथ वा अन्यनिमित्तकमेव कर्त्तव्यम्?। प्राप्तम्?, अन्यतरनिमित्तकं कर्त्तव्यं, विकल्पः? इति कुतः?। समा प्राप्तिः, विरुद्धश्च समुच्चयः, न विनिगमनायां हेतुरस्ति, एवंनिमित्तकं कर्त्तव्यं, एवंनिमित्तकम् इति। न च, द्वे प्रतिपदौ शक्येते कर्त्तुं तस्माद्विकल्पः।

मुख्येन वा नियम्येत ॥ ६० ॥ (२य पू०)

यदुक्तं, समा प्राप्तिर्नास्ति विनिगमनायां हेतुरिति, अस्तीति ब्रूमः, मुख्यत्वं नाम रथन्तरस्य प्रथमाधीतत्वम्। तदुक्तं, मुख्यं वा पूर्वचोदनात् लोकवत् (१२।३।८सू०) इति।

निमित्तविघातात् वा क्रतुयुक्तस्य कर्म स्यात् ॥ ६१ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। इयोरपि निमित्तयोर्विघातः स्यात्, क्रतुनिमित्तमेवाश्रीयते, तथा सति नैतद्रथन्तरपृष्ठं, न बृहत्पृष्ठं बृहद्रथन्तराभ्यामुभाभ्यां तत्र पृष्ठनिर्वृत्तिः। तस्मात् नोपवती प्रतिपत्, नाश्वियवती, अन्येव क्रतुनिमित्ता भवितुमर्हति इति ॥ (१०।५।१६अ०) ॥

ऐन्द्रवायवस्य सर्वादावप्रतिकर्षाधिकरणम्।

ऐन्द्रवायवस्यायवचनादादितः प्रतिकर्षः स्यात् ॥ ६२ ॥ (पू०)

ज्योतिष्टोमे श्रूयते, वाक् वा ऐन्द्रवायवो यत् ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवावरुन्धे इति। तत्र संशयः, किम् ऐन्द्रवायवस्य सर्वादितः प्रतिकर्षः स्यात्, उपांशुयाज्यामाभ्यामपि पूर्वं ग्रहीतव्यः उत शुक्रामन्थिभ्यां पूर्वं ग्रहणम्? इति। किं प्राप्तम्?, ऐन्द्रवायवस्य सर्वादितः प्रतिकर्षः इति। कुतः?। अग्रवचनात्,

अग्रता अत्र विधीयते, ऐन्द्रवायवाग्रं गृह्णाति इति ऐन्द्रवायवमग्रे कुर्य्यादेषाम् इति। अविशेषात् सर्व एव ऐन्द्रवायवाग्राः कर्त्तव्याः, यदि आदितः प्रतिकर्षो न क्रियेत, उपांशुयाजार्थौ ऐन्द्रवायवाग्रौ न स्याताम्। आदितस्तु प्रतिकर्षे क्रियमाणे सर्वे ऐन्द्रवायवाग्रवाग्राः कृता भवन्ति। न चात्र ऐन्द्रवायवस्याग्रता विधीयते, यदि विधीयेत, यान् कांश्चित् प्रति ऐन्द्रवायवस्य अग्रतायां कृतं कर्त्तव्यं स्यात्। अथ पुनरन्येषां ग्रहाणामैन्द्रवायवाग्रता धर्म उच्यते, तस्मात् सर्वेषां धर्मः कर्त्तव्य इत्यादितः प्रतिकर्षः स्यात्। कथं पुनरवगम्यते, सर्वेषामेवायं धर्मः? इति। ऐन्द्रवायवाग्रान् कुर्य्यात् इति निर्देशात्, नात्र ग्रहस्य कर्त्तव्यता उच्यते, तदग्रा कर्त्तव्या इति श्रूयते। अग्रता परार्था न स्वार्था विज्ञायते। तस्मात् सर्वादितः प्रतिकर्षः स्यात्।

अपि वा धर्माविशेषात् तद्धर्माणां स्वस्थाने प्रकरणादग्रत्वमुच्यते ॥ ६३ ॥ (सि०)

अपि वा इति पक्षव्यावृत्तिः। न सर्वादितः प्रतिकर्षः स्यात्, किन्तर्हि स्वस्थानस्य ग्रहणम्। कुतः?। नात्र तदग्रता विधीयते, वाक्यं हि तदा अनुगृह्यते, किन्तर्हि तदग्राणां ग्रहणं विधीयते, तथा हि श्रुतिरनुगृहीता भवति, यदि रथन्तरसामा सोमः स्याद् ये ऐन्द्रवायवाग्रा ग्रहाः समाम्नातास्तेषामनेनानुपूर्व्येण ऐन्द्रवाय-

वादितया धर्मविशेषेण तद्धर्माणां प्रकृतानां ग्रहणं विधीयते, स्वे स्थाने ये ग्रहा ऐन्द्रवायवाग्याः, तान् प्रकृत्य ग्रहणविधिरिति न सर्वादितः प्रतिकर्ष इति ।

धारासंयोगाच्च ॥ ६४ ॥ (यु०)

अपि च, धारासंयोगो भवति ऐन्द्रवायवादिवाक्ये, अखा अव्यवच्छिन्नया धारया गृह्णाति इति, तस्माद्धारा-ग्रहास्ते, तद्यान् अधिकृत्य ग्रहणं विधीयते इति ॥ (१० । ५ । १७ अ०) ॥

कामसंयोगेऽपि ऐन्द्रवायवस्यादावप्रतिकर्षाधिकरणम् ।

कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात् ॥ ६५ ॥ (पू०)

अथ यत्र कामसंयोगे वचनं, ऐन्द्रवायवस्य ऐन्द्रवायवाग्यान् ग्रहान् गृह्णीयाद्, यः कामयेत यथापूर्वं प्रजाः प्रकल्पेरन् इति । तत्र किं, सर्वादितः स प्रतिकर्षः, उत तत्रापि स्वक्रमस्थस्य ग्रहणम् ? इति । किं प्राप्तम् ?, पूर्वेणाधिकरणेन स्वक्रमस्थस्य इति ।

तथा प्राप्ते ब्रूमः, कामसंयोगे तु सर्वादितः प्रतिकर्षः स्यात् । कुतः ? । वचनात्, वचनं हि भवति, ऐन्द्रवायवाग्यान् ग्रहान् गृह्णीयाद् यः कामयेत यथापूर्वं प्रजाः प्रकल्पेरन् इति । तत् सर्वादितः प्रतिकर्षेऽर्थवत् अग्रतायां

विधीयमानानाम्। अप्रवृत्तिविशेषकरं तत् ग्रहाणां ग्रहणे विधीयमाने। तस्मात् सर्वादितः प्रतिकर्ष इति।

तद्देशानां वाग्रसंयोगात् तद्युक्तं कामशास्त्वं स्यात् नित्यसंयोगात् ॥ ६६ ॥ (सि०)

न चैतदस्ति, यदुक्तं सर्वादितः प्रतिकर्ष इति। स्वक्रमस्थस्य ग्रहणे क्रमानुग्रहो भविष्यति, तस्मात् स्वक्रमस्थस्य इति। यदुक्तम्, अग्रताभिधानादादितः प्रतिकर्ष इति, तत्र, तद्देशानां धारादेशानाम् ऐन्द्रवायवाग्राणामग्रमुपदेशः, तद्युक्तानां तद्ग्राणां ग्रहणेन कामः साध्येत, श्रुतिरेवमनुगृह्यते, त्वत्पक्षे वाक्यं, श्रुतिश्च वाक्याद्बलीयसी। अथ यदुक्तम्, अप्रवृत्तिविशेषकरं ग्रहणविधौ इति। तत्र संयोगपृथक्त्वात्, एकोऽत्र नित्यस्य कामसंयोगः, ग्रहणेन कामं साधयेत्, अपरो नित्यसंयोगः, ये ऐन्द्रवायवाग्रा ग्रहास्तान् गृह्णीयादिति। तस्मादस्ति प्रवृत्तिविशेषः, अतस्तद्देशसंयुक्ते कामसाधनमेतत्। तस्मात् स्वक्रमस्थस्य ग्रहणम् इति ॥ (१०। ५। १८ अ०) ॥

आश्विनाद्यादीनां ग्रहाणां प्रतिकर्षाधिकरणम्।

परेषु चाग्रशब्दः पूर्ववत् स्यात् तदादिषु ॥६७॥ (सि०)

अस्ति ज्योतिष्टोमः, तत्र ऐन्द्रवायवात् परे ग्रहाः

कामाय शूयन्ते, आश्विनाग्यान् गृह्णीयादामयाविनः। शुक्राग्यान् गृह्णीयात् अभिचरतः। मन्थाग्यान् गृह्णीयादभिचर्थ्यमाणस्य इति। तत्र संशयः, किमेतेष्वपि स्वक्रमस्थानां ग्रहणम्, उत सर्वादितः प्रतिकर्षः कर्त्तव्यः? इति। किं प्राप्तं, परेषु च ऐन्द्रवायवात्, परेष्वेवमादिषु ग्रहणेषु अग्रशब्दः पूर्ववत् स्यात् स्वक्रमस्थग्रहणम् इति। यस्य यस्याग्रता श्रूयते, तदग्राणां कामसंयोग इति॥ (पू०)

प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात्॥ ॥ ६८॥ (सि०)

प्राक् ऐन्द्रवायवात्, प्रतिकर्षः स्यात्। कुतः?। न हि अत्र नित्यार्थेन कामस्य संयोगो भवति। यदि हि नित्ये कामो भवेत्, आश्विनाग्यान् मन्थाग्यान् इत्यग्रशब्दोऽस्य नोपपद्येत, न हि, तस्मिन् वचने सति प्रवृत्तेः कश्चिद्विशेष उपलभ्यते, प्रागैन्द्रवायवात् पुनः प्रतिकर्षेऽनमर्थवत् भवति। अपि च प्रकृतास्ते ग्रहाः, तेषामाश्विनाग्यता शुक्राग्यता विधीयते। तस्मात् आदितः प्रतिकर्षः इति।

प्रतिकर्षञ्च दर्शयति॥ ६९॥ (यु०)

धारयेयुस्तं यं कामाय गृह्णीयुः, ऐन्द्रवायवं गृहीत्वादयेत् तं यं कामाय गृह्णीयुः इति कामाय गृहीते धार्यमाणे ऐन्द्रवायवस्य ग्रहणं दर्शयति। तस्मात् सर्वादि प्रतिकृष्टस्य इति॥ (१०।५।१९ अ०)॥

आश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात् प्रतिकर्षाधिकरणम्।

पुरस्तादैन्द्रवायवस्याग्रस्य कृतदेशत्वात् ॥ ॥ ७० ॥ (सि०)

अस्ति ज्योतिष्टोमः, तत्रैन्द्रवायवात् परे ग्रहाः कामाय शूयन्ते, आश्विनाग्रान् गृह्णीयादामयाविनः। शुक्राग्रानभिचरतः। मन्थाग्रानभिचर्य्यमाणस्य इति। तेषां स्वक्रमस्थानां ग्रहणं, प्रतिकर्षे इति समधिगतमेतत्। अथेदानीमिदं सन्दिह्यते, किं सर्वादितः प्रतिकर्षः, यतः कुतश्चिदा, उत ऐन्द्रवायवस्य पुरस्तात् प्रतिकर्षः? इति। किं प्राप्तम्। नियमकारिणः शास्त्रस्य अभावादनियम इति।

एवं प्राप्ते ब्रूमः, पुरस्तादैन्द्रवायवस्य प्रतिकर्ष इति। कुतः?। अग्रस्य कृतदेशत्वात्, एषोऽग्रस्य देशो विज्ञातः, यत् उपांशुयाज्यार्थाभ्यामूर्ध्वं, पुरस्ताच्च ऐन्द्रवायवस्य। कथमिव कृत्वा?। पूर्वेण वचनेन ऐन्द्रवायवाग्राः ग्रहाः प्रकृताः, यदि रथन्तरसामा सोमःस्यात् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् इति, तत्रैन्द्रवायवाग्रानुद्दिश्य तेषां ग्रहणं विहितं, तेनैव विहितत्वात् न पुनराश्विनाग्रेषु शुक्राग्रेषु मन्थाग्रेषु च ग्रहणं विधीयते, अतो वाक्येन तदयता विधीयते। सा पुनरैन्द्रवायवाग्राणां प्रकृतत्वात् अभिचरतः शुक्राग्रान् किं कुर्यात्? गृह्णीयात् इति प्रकृतेनाभिसम्बध्यते। शुक्राग्रान् ग्रहानिति नास्ति सम्बन्धः ग्रहणशब्दाभावात्। केन तर्हि सम्बन्धः?। प्रकृतेनैन्

दृष्टं तत् अदृष्टार्थं भवेत्, न चेदमदृष्टार्थम्। तस्मादितरस्मिन् काले प्रदानं क्रियते, तत्र ग्रहणं कर्त्तव्यम्। एवं चेत्, यत्र ग्रहणं तत्र प्रदानमपि भवितुमर्हतीति सम्बन्धात्, सादनवत्, यथा ग्रहणे प्रतिक्रुध्यमाणे सादनं प्रतिक्रुध्यते, एवं प्रदानमपि इति।

न वा प्रधानत्वात् शेषत्वात् सादनं तथा ॥ ७६ ॥ (सि०)

न चैतदस्ति, प्रदानं प्रतिक्रुध्यत इति, प्रधानं हि तत्, न हि तत् ग्रहणस्योपकारकम्। तस्मान्न प्रतिक्रुध्यते। यदुक्तं, सादनवत् इति, शेषी हि सादनं, तस्मात् प्रतिक्रुध्यते ॥ (१०।५।२२ अ०) ॥

त्र्यनीकायामैन्द्रवायवाग्रतीत्रीः समानविध्यर्थताधिकरणम्।

त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥ ७७ ॥ (पू०)

अस्ति हादशाहे त्र्यनीका, ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ, दशमं चाह, अथेतरेषां नवानामङ्गानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् इति। तत्र प्रथमद्वितीय[illegible] शुक्राग्रता च श्रूयते। सा चोद

कैनैव तयोः प्राप्ता, रथन्तरसामत्वात् बृहत्सामत्वाच्च । तत्र सन्देहः, किम् उदितम् अनुवदितुं पुनः श्रूयते ? किम् अन्यत् परिसङ्ख्यातुम् ? उत अर्थवादार्थम् ? अथवा समानविध्यर्थम् ?। किं प्राप्तम् ? अर्थवादाय इति । कुतः ? । उदितम् अनुवदितुं हि उच्यमाने प्रवृत्तिविशेषक्रिया नास्ति । चिदोषा परिसङ्ख्या, तस्मादर्थवादाय इति । कः पुनरत्र गुणवादः ? । औचित्यमायायणाग्रत्वं हि तृतीयेऽहनि न्याय्यम् । कथमिव ? । प्रथम-द्वितीययोरङ्गारैन्द्रवायववाग्रता शुक्राग्रता च उदिता, न तृतीयेऽहनि, तत्र त्वायायणाग्रता न्याया इति ।

अपि वाहर्गणेष्वग्निवत् समानविधानं स्यात् ॥ ॥ ७८ ॥ (सि०)

अपि वेति पक्षव्यावृत्तिः, न गुणार्थं श्रवणं, समानविध्यर्थमिति । न शक्यं वदितुं चोदकेन प्राप्तं, तत्र पुनर्वचनमनर्थकं, तस्मात् तदन्यार्थं इति । कथन्तर्हि शक्यम् ? । वाक्येनेदं ज्योतिष्टोमे रथन्तरसाम्नि प्रवृत्तं चोदकेन प्राप्यते, तस्मात् समानविधिकं करिष्यामि इति पुनरुच्यते, अग्निवत्, यथा अथातोऽग्निष्टोमेनैवानुयजति, तमुक्थेन, तमतिरात्रेण, तं चतूरात्रेण, तं पञ्चरात्रेण, तं षडरात्रेण, तमष्टरात्रेण, तं नवरात्रेण, तं दशरात्रेण, तमेकादशरात्रेण इति । प्रयोजनं पक्षोक्तं, न परिसङ्ख्या भवतीति ॥ (१०।५।२३ अ०) ॥

व्यूढादग्याहस्य समूढविकारत्वाधिकरणम्।

दाद्ग्याहस्य व्यूढसमूढत्वं पृष्ठवत् समानविधानं स्यात् ॥ ७९ ॥ (पू०)

द्विविधो दाद्ग्याहः, व्यूढः समूढश्च। समूढस्तावत्, ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामङ्गानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम् इति। अथ व्यूढः, ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ, अथेतरेषां दशानां अङ्गानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ हे आग्रयणाग्रे, अथ ऐन्द्रवायवाग्रम्, अथ हे शुक्राग्रे, अथाग्रयणाग्रम्, अथ हे ऐन्द्रवायवाग्रे इति तत्र सन्देहः, किमुभयप्रकारमपि दाद्ग्याहं प्रकृत्य मा आम्नाताः, उत समूढं प्रकृत्य आम्नातास्तद्विकारो व्यूढः ? इति। किं प्राप्तम् ? दाद्ग्याहस्य व्यूढसमूढत्वं समानविधानं स्यात् ?। कुतः ?। उभयप्रकारस्य प्रकृतत्वात्, न गम्यते विशेषः, कस्य धर्म्माः, कस्य नेति। तस्मात् समानविधानौ। पृष्ठवत्, यथा हृद्ग्यन्तरे पृष्ठे प्रकरणस्य तुल्यत्वात् समानधर्म्मणी, एवं व्यूढसमूढं स्यात् इति।

व्यूढो वा लिङ्गदर्शनात् समूढविकारः ॥ ८० ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। न व्यूढसमूढौ समान-

विधानो, किन्तु व्यूढः समूढविकारः स्यात्। कुतः ?। लिङ्गदर्शनात् लिङ्गमिदं भवति, ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः इति व्यूढे ऽयूयते, न च व्यूढे चतुर्थेऽहनि ऐन्द्रवायवाग्रता, का तर्हि ? आग्रयणाग्रता। तत्र ऐन्द्रवायवस्य वा एतदायतनम् इति वचनं नावकल्पते। यदि व्यूढः समूढविकारः, ततः प्रकृतिमपेक्ष्योपपद्यते वादः, ऐन्द्रवायवस्य एतदायतनं प्राप्तं, तत्र आग्रयणस्योच्यते इति। तस्मात् लिङ्गदर्शनात् व्यूढः समूढविकारः इति।

कामसंयोगात् ॥ ८१ ॥ (यु०)

यः कामयेत बहुस्यां प्रजायेय इति काम्यो वा नैमित्तिको वा नित्यमर्थं विकृत्य निविशते, यथाऽऽमये मुद्गौदनभोजनं निवातशय्या चेति।

तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ ८२ ॥ (प्रयो०)

इदं प्रयोजनसूत्रम्। तस्य उभयप्रकारस्याहर्गणेषु प्रवृत्तिः अविशेषेण, ऐककर्म्यात् यथा पूर्वः पक्षः। यथा तर्हि सिद्धान्तः, यत्र वचनं लिङ्गं च तत्र व्यूढः प्रवर्त्तते, अन्यत्राविशेषेण समूढ इति ॥ (१० । ५ । २४ अ०) ॥

संवत्सरसत्रे इनीकानां विहङ्गाधिकरणम्।

एकादशिनवत् त्वानीका परिवृत्तिः स्यात् ॥ ८३ ॥ (पू०)

द्वादशाहे समाम्नायते, ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं चाहः, अथेतरेषां नवानामङ्गानामैन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथैन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथाग्रयणाग्रम्, अथ ऐन्द्रवायवाग्रम्, अथ शुक्राग्रम्, अथ आग्रयणाग्रम् इति, तत् गवामयने चोदकेन प्राप्तं, तत्र बह्वृनि चानीकानि परिवर्त्तयितव्यानि, तत्रार्थप्राप्तोऽभ्यासः। अथेदानीम् अभ्यासे सन्देहः, किं दण्डकलितवत् अभ्यासः कर्त्तव्यः उत स्वस्थानविवृद्धिः? इति। कथं दण्डकलितवत् स्यात् कथं वा स्वस्थानविवृद्धिः? इति। यदि अङ्गामधिकारस्तत आद्येषु नवसु अहःसु परिसमाप्तेषु शिष्टेष्वपि चानीकां चोदकः प्रापयतीति उपस्थितमिदं भवतीति, ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रम् इति। तेष्वपि नवसु परिसमाप्तेषु पुनरिदम् एवोपतिष्ठते, ऐन्द्रवायवाग्रं प्रथममहः इति। एवं दण्डकलितवदावृत्तिः। अथाहरधिकारो नास्ति, ततः प्रायणीयोदयनीययोरन्तरं नवभिरनीकैः पूरितमिति गवामयनेऽपि नवभिरनीकैः पूरयितव्यं स्यात्, तत्र पूर्णे पुनरावृत्तिर्नास्तीति दण्डकलितवत् न स्यात्, न च, बह्वृचा विना तदन्तरं पूर्य्यते इति स्वस्थानविवृद्धिः आगतेति।

किं पुनः प्राप्तम्? दण्डकलितवदावृत्तिरिति। तत्र एतदुच्यते, अहरधिकारोऽत्रेति। एवं हि आम्नायते, ऐन्द्रवायवाग्रं प्रथममहः अथ शुक्राग्रं, प्रकृतत्वादहरिति गम्यते, तस्मादहरधिकारः, अतोऽवगच्छामः, दण्डकलित-

वदाहृत्तिरिति । आहृत्तिन्यायानां दण्डकलितं न्याय्यं, तथा क्रमानुग्रहो भवति । तथथा, कश्चिदुच्यते अनुवाकः त्रिः पठ्यतामिति, दण्डकलितवदसौ पठ्यते, क्रमानुग्रहाय । एवमिहापि द्रष्टव्यम् । यथा अग्निर्वै देवानामयने एकादशिनी अभ्यस्यमाना दण्डकलितवदभ्यस्यते, न स्वस्थानविवृद्ध्यर्थेति ।

स्वस्थानविवृद्धिर्वा अङ्गाग्रप्रत्यक्षसङ्ख्यत्वात् ॥ ८४ ॥ (सि०)

स्वस्थानविवृद्धिर्वा, न दण्डकलितवदाहृत्तिः । तत्र इदं वर्ण्यते, नाहरधिकार इति । कुतः ? । अङ्गाग्रप्रत्यक्षसङ्ख्यत्वात्, अग्रत्यक्षा अङ्गा सङ्ख्या नवानामङ्गानामिति, ऐन्द्रवायवाग्रमिति च विधीयमानम् इति । कथं अहर्न विधीयते ? इति । वाक्यभेदप्रसङ्गात्, ऐन्द्रवायवाग्रं प्रथमं भवति, तच्च अहः, नाहःसङ्घात इति वाक्यं भिद्येत । तस्मादनुवादमात्रमहर्यहणम् । एवं चेत्, क्रमानुग्रहाय स्वस्थानविवृद्धिराग्रयणीया । आग्रयणाग्रान् कृत्वा ऐन्द्रवायवाग्रा कर्त्तव्या इति ।

पृष्ठाहृत्तौ चाग्रयणस्य दर्शनात् त्रयस्त्रिंशे परिवृत्तौ पुनरैन्द्रवायवः स्यात् ॥ ८५ ॥ (यु०)

इतश्च पश्यामः, स्वस्थानविवृद्धिः इति । कुतः ? । उत्तरस्मिन् पक्षे पृष्ठाहृत्तौ आग्रयणाग्रताया दर्शनं

भवति त्रयस्त्रिंशे ऽहनि । कथम् ? । जगतीं वै च्छन्दांसि प्रत्यवरोहन्ति आग्नेयं वै ग्रहाः, बृहत् पृष्ठानि, त्रयस्त्रिंशं स्तोमाः इति, तदेतत् स्वस्थानविहतावकल्पते, न दण्डकलितवदावृत्तौ । कथम् ? । पूर्वस्मिन् पञ्चसि त्रानीकानि परिवर्त्तते, तस्मिन्नावृत्तेष्व सा आग्नेयणाग्नेषु परिसमाप्यते, उत्तरमपि पञ्चो व्यावृत्तमिति कृत्वा आग्नेयणाग्नेषु आरभ्यते । तत्र प्रथमे नवमभागे त्रयस्त्रिंशमहरिति कृत्वा तदाग्नेयणाग्नं भवति, तत्रैतदग्नेनम् उपपद्यते । दण्डकलितवत् पुनरावृत्तौ सत्यां तत् ऐन्द्रवायवाग्नं स्यात् । कथम् ? । विहृत आरभ्य नवकैरङ्गैः सङ्ख्यमानेषु पूर्वस्मिन् पञ्चसि सत परिशिष्यन्ते, तत्र समने ऐन्द्रवायवायता, शुक्रामन्थौ विष्णुवान्, आग्नेयणाग्नः प्रथमः स्वरसामा, ततो विश्वजिदिति त्रानीका समाप्ता, त्रयस्त्रिंशमहरैन्द्रवायवाग्नं प्राप्नोति तत्रैतदग्नेनं विरुध्यते, तस्मात् स्वस्थानविहृतिः इति ।

वचनात् परिवृत्तिरैकादशिनेषु ॥ ८६ ॥

(आ० नि०)

अथ यदुक्तम्, ऐकादशिनवत् इति । युक्तं, यत् ऐकादशिनेषु दण्डकलितवदावृत्तिरिति, वचनं हि तद्भवति, बाह्यमन्ततः पुनः पर्य्यावृत्तेषु आग्नेयमेव प्रथमेऽहनि आलभेत इति वचनात् दण्डकलितवदावृत्तिः पुनःपर्य्यावृत्तेष्विति, सा हादशाहे असम्भवन्ती गवामयनं विशति । किमिव वचनं न कुर्य्यात्, न हि वचनस्यातिभारोऽस्ति ।

लिङ्गदर्शनात् ॥ ८७ ॥ (हे०)

लिङ्गं खलु अप्येवमर्थं दर्शयति, यथा दण्डकलितवत् ऐकादशिना आवर्त्तन्ते इति, प्राणा वा एकादशिना यदेकादशिनीभिरीयुरहानि अतिरिच्यन्ते पशवो वा इति। स्वस्थानविवृद्धौ नास्त्यतिरेकः, दण्डकलितवदावृत्तौ न्यूनता अतिरिक्तता वा भवति। तस्मादपि पश्यामः, ऐकादशिनेषु दण्डकलितवदावृत्तिरिति ॥ (१०।५।२५अ०) ॥

व्यूढे मन्त्राणां क्रन्दोव्यतिक्रमाविकरणम्।

क्रन्दोव्यतिक्रमात् व्यूढे भक्ष-पवमान-परिधि-कपालस्थ मन्त्राणां यथोत्पत्तिवचनमहवत् स्यात् ॥ ८८ ॥

अस्ति हादशाहः समूढो व्यूढश्च, तत्र व्यूढः, ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामङ्गाम् ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्रायम्, अथ हे आग्रयणाग्ने, तथैन्द्रवायवाग्रम्, अथ हे शुक्राग्ने, अथाग्रयणाग्रम्, अथ हे ऐन्द्रवायवाग्ने इति।

तत्र व्यूढे इदं समामनन्ति, छन्दांसि वाऽन्योन्यस्य लोकमभिध्यायन्ति गायत्री त्रिष्टुभः त्रिष्टुप् जगत्याः जगती गायत्र्याः इति। तत्र सन्ति भक्षपवमानपरिधिकपालानि, भक्षास्तावत् भक्षे हि मा विश दीर्घायुत्वाय अन्तमुत्वाय एहि वसो पुरोवसो प्रियो मे हृदये भवा-

श्विनोर्बाहुभ्यां सध्यासं वसुभङ्गणस्य रुद्रवत् गणस्यादित्यवत् गणस्य सोमदेवते मतिविदः प्रातःसवनस्य माध्यन्दिनसवनस्य तृतीयसवनस्य गायत्रच्छन्दस्त्रिष्टुप्छन्दसो जगतीच्छन्दसो अग्निहुत इन्द्रपीतस्य मधुमत उपहूत उपहूतस्य भक्षयामि इति। तथा पवमानः, श्येनोऽसि गायत्रच्छन्दाः सुपर्णोऽसि त्रिष्टुप्छन्दाः सखासि जगतीच्छन्दाः अनु त्वारभे स्वस्ति मासं पारय इति च?। तथा परिधयः, गायत्रो मध्यमः परिधिः त्रैष्टुभो दक्षिणो जागत उत्तरः इति। तथा कपालानि अष्टाकपालः प्रातःसवने एकादशकपालो माध्यन्दिनीयो द्वादशकपालस्तार्तीयसवनिकः इति। तत्र सन्देहः, किं छन्दोव्यतिक्रमे व्यतिक्रमो भक्षमन्त्राणां, भक्षणस्य च, पवमानमन्त्राणां पवमानस्य च, तथा परिधीनां कपालानाञ्च, अथवा मन्त्राणां छन्दोव्यतिक्रमः? इति। किं प्राप्तम्? मन्त्राणां मन्त्रार्थानाञ्च। कुतः?। अविशेषवचनात्, अविशेषेण भवति वचनं, छन्दांसि वा अन्योन्यस्य लोकमभिध्यायन्ति गायत्री त्रिष्टुभः त्रिष्टुप् जगत्याः जगती गायत्र्याः इति। न विशेषः श्रूयते मन्त्राणां व्यतिक्रमः इति। तस्मान्मन्त्राणां अर्थानाञ्च इति। अतो मध्यमः परिधिर्दक्षिणस्थाने स्थापयितव्यः, दक्षिण उत्तरस्य, उत्तरो मध्यमस्य इति। अष्टाकपालो माध्यन्दिनीयः कार्यः, एकादशकपालः तार्तीयसवनिकः द्वादशकपालः प्रातःसवनीय इति। तथा प्रातःसवनीयस्य भक्षो माध्यन्दिनस्य भक्षणस्य स्थाने भक्षयितव्यः, माध्-

न्दिनः तार्तीयसवनिकस्य, तार्तीयसवनः प्रातःसवनीयस्येति। तथा वहिष्यवमानो माध्यन्दिनस्य पवमानस्य लोके माध्यन्दिनः आर्भवस्य, आर्भवो वहिष्यवमानस्य इति।

एवं प्राप्ते ब्रूमः, नाविशेषेण छन्दसां व्यतिक्रमः स्यात्, मन्त्रगतो हि एष व्यतिक्रमः, मन्त्रगतान्येव व्यतिक्रमेयुः। किं कारणम्?। शक्यन्ते मन्त्रगतानि विपर्यासितुं भक्षादयः पुनर्विपर्यस्ता अपि त एव इति। माध्यन्दिनस्य भक्षस्य कालेऽपि प्रातःसवनीयो भक्षो भक्ष्यमाणो नैव त्रैष्टुभः कृतः स्यात्, एवं सर्वत्र। कथम्। स्वकालेऽपि हि असौ न गायत्रः, गायत्री हि त्रिष्टुभः स्थानमभ्येति नागायत्री। न भक्षादयो गायत्रादयः। तस्मादसम्भवो भक्षादीनां व्यतिक्रमणस्य। मन्त्रगतानि तु छन्दांसि शक्नुवन्ति अन्योन्यस्य लोकं व्यतिक्रमयितुम्। तस्मान्मन्त्रगतानां छन्दसां व्यतिक्रमः इति।

इति भट्टश्रीशबरस्वामिविरचिते मीमांसाभाष्ये दशमाध्यायस्य पञ्चमः पादः॥

मीमांसा-दर्शने

१० अध्याये ६ पादः।

---

*रथन्तरादीनां साम्नां हवि गानाधिकरणम्।

एकर्चस्थानि यत्र स्युः स्वाध्यायवत्॥१॥ (पृ०)

सामानि उदाहरणम्। रथन्तरं बृहत् वैरूपं वैराजं

शाक्वरं रैवतम् इति। तत्र संशयः, किमेकस्यामृचि गातव्यं वर्त्तव्यम्, उत, ऋचे? इति। किं प्राप्तम्?। एकार्चस्थानि यज्ञे स्युः, एकस्यामृचि गातव्यानि, एवं स्वाध्याये गीतानि, यथा स्वाध्याये गीतानि, तथा कर्मणि गातव्यानि। कर्मणि स्वाध्याये च अवैलक्षण्यं न्याय्यं, कर्माणि कर्तुं स्वाध्यायमभ्यस्यन्ति, अतो यथा अभ्यस्तं तत्र प्रयोक्तव्यम्। तस्मादेकस्याम् ऋचि गीयेरन्। एकर्चीत्यत्तीनि उदाहरणं, न ऋचोत्यत्तीनि, यथाह सिमा-सन्तनि-यतय-एवागपत्य शाक्वरवर्षम् इति।

ऋचे वा लिङ्गदर्शनात् ॥ २ ॥ (सि०)

न चैतदेवम्, एकस्यामेव गातव्यानि इति। कुतः?। लिङ्गदर्शनात्, लिङ्गं भवति, एवमाह, अष्टाक्षरेण प्रष्टव्या ऋचः प्रस्तौति द्व्यक्षरेण उत्तरयोः इति। न हि एकस्यामृचि प्रथमोत्तरासम्बन्धो भवति। तस्मात् ऋचे गातव्यानि इति। अथेदमपरं लिङ्गम्, ऋक् साम उवाच मिथुनीसम्भवावेति, सोऽब्रवीत् न वै त्वं ममालमसि जायात्वे वेदो मे महिमेति ते हे भूत्वा ऊचतुः, सोऽब्रवीच्चैव वां ममालं स्त्री जायात्वे वेदो मे महिमेति, तास्त्रिस्त्री भूत्वा ऊचुः, सोऽब्रवीत् सम्भवाम इति तस्मादेकं साम ऋचे क्रियते स्त्रीचीयम् इति।

आह, लिङ्गमिदं, प्राप्तिरुच्यताम् इति। तदभिधीयते, ऋक्ष्वपि ऋग्वेदे न प्रथमा नाम काचिदृगस्ति, तथा [illegible] प्रथमात्वम् उत्तरात्वम् इति प्रथ-

माया ऋचः-यष्टाक्षरेण प्रस्तोतव्यं, द्वाक्षरेण चोत्तरयोरिति तस्मिन् वचने सति ऋचक्षित्वमापद्यते । तथा, यद्यपि अनुवादस्वरूपोऽयं शब्दः, तस्मादेकं साम ऋचे क्रियते स्तोत्रीयम् इति, तथापि ऋक् साम उवाच इति पुरस्तादर्थवादप्ररोचनया विदधातीति गम्यते । तदुक्तं, वचनान्नित्वपूर्वत्वात् (३।५।२१ सू०) इति ॥ (१०।६।१अ०) ॥

स्वर्कशब्देन वीक्षणस्य कालार्थताधिकरणम् ।

स्वर्दृशं प्रति वीक्षणं कालमात्रं परार्थत्वात् ॥

॥ ३ ॥

ईक्षेरं वै रथन्तरमुद्गातुश्चक्षुः । प्रमथिता रथन्तरे प्रस्तूयमाने सम्मीलेत् स्वर्दृशं प्रति वीक्षेत । अत्र संशयः, किं स्वर्दृशं प्रति वीक्षणम् अङ्गप्रयोजनसम्बन्धः, उत कालार्थः संयोगः ? इति । तत एतावत् तावन्नः परीक्ष्यं, किं रथन्तरे प्रस्तूयमाने सम्मीलेत् इत्यस्य शेषः स्वर्दृशं प्रति वीक्षेत इति, उत, स्वर्दृशमित्येवमादि पृथग्वाक्यम् ? इति । किं प्राप्तम् ? अङ्गप्रयोजनसम्बन्ध इति पृथग्वाक्यम् इति । कुतः ? । भेदेनावगमात्, भिन्नमिदमुपलभ्यते, स्वर्दृशं प्रति वीक्षेत इति । ननु अभिन्नमपि लक्ष्यते, रथन्तरे प्रस्तूयमाने सम्मीलेत् इति विधाय, स्वर्दृशं प्रति वीक्षेत इत्यनुवदति इति । उच्यते, उभयावगतौ भेदो ग्रहीतव्यः, स भेदो गुणमात्रेण तेन विरुध्यते, अन्यतरगतिस्तु विध्यनुवादयोर्विरोधात्, तत्र विधिर्न्याय्यो अपूर्वत्वात्, वादमात्रं

हि अनर्थकम् (१।२।१९ सू०)। विध्यवगमाच्च, विधिश्चाव-गम्यते, वीक्षेत इति, श्रुतिश्चैवमनुगृह्यते, स्वर्दृशं प्रति वीक्षेत इति स्वर्दृक्शब्दं प्रति वीक्षणार्थो विधीयते, स्व-र्दृक्शब्देन सह वीक्षणस्य साक्षात्सम्बन्धः, इतरथा स्वर्दृक्-शब्दः कालं लक्षयेत्, श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या। तस्मात् अङ्गप्रयोजनसम्बन्धः।

अथ वा, स्वर्दृशं प्रति वीक्षेत इत्येवमङ्गप्रयोजनस-म्बन्धः, स्वर्दृक्शब्दो वीक्षणस्य साधनमिति, तथा लिङ्ग-मप्यनुगृहीतं भवति, स्वर्दृक्शब्दश्रवणात् वाक्यमपि। तस्मादङ्गप्रयोजनसम्बन्ध एवेति।

एवं प्राप्ते ब्रूमः, स्वर्दृशं प्रति वीक्षणं कालमात्रं स्यात् परार्थत्वात्, नैतदेवम् अङ्गप्रयोजनसम्बन्धः इति, किन्तर्हि स्वर्दृक्शब्देन वीक्षणस्य कालार्थः सम्बन्धः स्यात्। कुतः?। परार्थत्वात् साम्नः, रथन्तरं पृष्ठं भवति इति पृष्ठस्तुतौ हि साम विनियुज्यते, तच्च साम पदानां स्तुतिं निर्वर्त्तयति। संश्लेषादिभिर्विशेषैः स्तुतिपदाक्षराणि उपदर्शयत् स्तुति-मभिनिर्वर्त्तयतीत्युच्यते। एवं चेत् साम्नि स्तुतौ विनि-युज्यमाने यानि, तानि परस्परसव्यपेक्षाणि ऋक्पदानि स्तुतौ विनियुक्तानि सम्भवन्तीत्यतः स्वर्दृक्शब्दस्य तन्मध्य-पाठात् स्तुतौ विनियोग उक्तो भवतीत्यतः परार्थत्वादिह कालार्थः संयोग इति अध्यवसीयते।

ननु मन्त्रे समाम्नानमात्रं, रथन्तरोपदेशाच्च पदोप-देशमानुमानिकं बाधित्वा एतद्वाक्यं प्रत्यक्षमङ्गप्रयोजन-सम्बन्धमेव प्रकल्पयेदिति।

उच्यते, तद्धि बाधकं भवति, यद्बाधमानमप्रयोजनं भवति, न चैतद्बाधमानमनर्थकं, क्रियासु कालपरिच्छेदे-नार्थवत्त्वात् । मन्त्रे समाम्नानसामर्थ्यात्, सामोपदेशाच्च स्तुतिसम्बन्धः मात्रात्, वाक्यात् क्रियाकारकसम्बन्धः । उभयोः प्रमाणावगतत्वात् उभयसम्बन्धो न विरुध्यते इति यद्युच्येत । तत्र, यो हि मन्त्रवाक्याद् व्यवच्छिन्नस्य क्रिया-कारकसम्बन्धमवगच्छति, नामो मक्तदुच्चरितस्य स्तुतिसम्ब-न्धमप्यवगच्छति । यद्यवगच्छेत्, पुनरुच्चारयेत्, नान्यथा । तस्मात् तस्यामेव स्तुतौ क्रियासम्बन्धे कारकसम्बन्धः, न स्तुतिसम्बन्धे, कारकविशेषणाभावात् । तदेवं मन्त्रामा-नस्य सामोपदेशवाक्यस्य स्वर्दृशं प्रति वीक्षेत इत्यस्याविरोधे साधिते कालार्थः संयोग इति, अत उच्यते, कालार्थः संयोग इति ।

अथ यदुक्तं, भेदाभेदयोर्भेदो ग्रहीतव्यः, विध्यनुवा-दयोः विधिर्ज्यायान् विधिप्रत्ययदर्शनाच्चैवमेव अवगम्यते इति । अत्र ब्रूमः, सत्यं, विध्यनुवादयोर्विधिर्ज्यायान्, अपूर्वार्थप्रकल्पकत्वात् इति, यदि तु प्रमाणान्तरप्राप्तिर्ना-वगम्यते । यत्र तु पदान्तरादर्थाद्वा प्राप्तिरवगम्यतेऽर्थस्य, तत्र प्रमाणान्तरप्रतीतत्वात् शब्द उच्चरन् अनुवाद इत्यव-गम्यते । अत्र च स्वार्थप्रवृत्त्या पुरुषस्य दर्शनमस्ति, नाप-श्यन् पुरुषं क्रियासु व्यापारमुपगन्तुमुत्सहते, इत्यर्थप्राप्ते विधिप्रत्ययोऽप्यनुवाद इत्यवगम्यते । ननु रघन्तरे प्रस्तूय-माने सम्मीलेत् इति प्रत्यक्षवाक्यमर्थप्राप्तं पुरुषस्य दर्शनं बाधेत, यथा प्रजापतिव्रतानि पौरुषेयीं स्वेच्छाप्रवृत्तिं बाध-

नसामर्थ्यात् निरुध्यन्ति तद्वत् इति। नेत्यवगम्यते। कथम्?। क्रियाप्रारम्भसम्बन्धात् द्वयन्तरे प्रस्तूयमाने इत्युच्यते, तद्धीते प्रस्तावे वचनार्थस्य कृताधेत्वादर्थप्राप्तं न वारयितुमर्हति।

अथ यदुक्तं, स्वर्ट्कृशब्दवीक्षणयोर्वाक्येन सम्बन्धः इति, वाक्यार्थत्वात् दृशिप्रयोगाच्च लिङ्गात् दर्शनक्रियासामर्थ्यमस्ति इति। अत्र ब्रूमः, प्रतिशब्दः कर्मप्रवचनीयत्वात् स्वर्ट्कृशब्दस्य लक्षणतामाचष्टे श्रुत्येव, श्रुतिश्च लिङ्गवाक्ययोर्बाधिका समधिगतैव। अथ वा, नात्र वाक्यं बाध्येत, वाक्यं हि सम्बन्धप्रत्यायकं, यथासम्भवमनेकविधः सम्बन्धो वाक्यात् गम्यते, क्वचित् क्रियाकारकसम्बन्धः, क्वचिद्विशेषणविशेष्यसम्बन्धः, क्वचिल्लक्ष्यलक्षणसम्बन्धः, इत्येवम्प्रकाराः सम्बन्धविशेषा इति। तत्रेह लक्ष्यलक्षणसम्बन्धः प्रयोजनप्रयुक्त इति गृह्यत एव सम्बन्धविशेष इति, न वाक्यं बाध्यते। यथा लोके, वृत्तं प्रति विद्योतते इति न विद्योतनस्य वृत्तस्य च साध्यसाधनभावो गम्यते इति। अन्यतः प्रवृत्तस्य विद्योतनस्य वृत्तविशेषभावाय उपादीयते इति। तद्वदिहापि पुरुषार्थतया प्रवृत्तस्य दर्शनस्य स्वर्ट्कृशब्दो लक्षणतया उपादीयते इति न वाक्यानर्थक्यम्। न हि लक्ष्यलक्षणयोरनुच्चार्यमाणयोः सम्बन्धोऽवगम्यते इति।

यदपि, दृशिप्रयोगात् लिङ्गानुग्रह इति, तदपि न समर्थमिवेक्षितस्यार्थस्य पश्यामः, स्वार्थो हि दृशिः प्रयुज्यमानो दर्शनमवगमयेत् न परार्थः, स्वर्ट्कृशब्दे तु सोप-

पदो दृग्निः कर्तृत्वे गुणभूतोऽवगम्यते, कर्त्ता तु प्रधानभूतः। न च कर्त्ता प्रत्याय्यमानो वीक्षणलिङ्गत्वेन कल्प्यते, दृशेरन्यत्परतन्त्रात्, कर्त्रभिधानस्य सन् अयं नैव वीक्षतिनाऽङ्गाङ्गिसम्बन्धेन सम्बन्धमुपैति। यदि तावदयमर्थ उपदिश्यते, स्वर्दृशं वीक्षेत इति, कोऽसौ स्वर्दृक्, यं प्रति वीक्षणमुपदिष्टम्? इत्यविजानन्तो नैव क्रियामध्यवस्येम। अथायमर्थः, स्वर्दृशा वीक्षणं निर्वर्त्तयेत् इति, तथाप्यप्रज्ञानात् स एव दोषः। तदेवम्प्रकारे सम्बन्धे आङ्गेनाभ्युपगम्यमाने न लिङ्गं न च वाक्यम् अनुगृह्यते, लक्षणसम्बन्धेऽपीक्षणस्य एतदुच्चारणकाले वीक्षेत इति भवति कयाचित् युक्त्या सम्बन्धः, स्तुतिसम्बन्धस्य कर्त्रभिधानस्यापि सतो न विरुध्यते। सामानाधिकरण्यात् ईशानेन विशेषणविशेष्यभावसम्बन्धमभ्युपैति, ईशानं स्वर्दृशं तस्थुषः इति। अतो वदामः, स्तुत्यर्थस्य सतः स्वर्दृशं प्रति वीक्षेत इत्यत्र कालार्थः सम्बन्ध इति।

किं भवति प्रयोजनम्?। अङ्गाङ्गिसम्बन्धे सति, यदा, रथन्तरमुत्तरयोर्गायति इत्यतिदेशः, तदा एतदुपतिष्ठते, रथन्तरे प्रस्तूयमाने सञ्जीक्षेत् इति। उत्तरयोस्तु स्वर्दृक्शब्दाभावाद्दर्शनानियमः पूर्वपक्षे, सिद्धान्ते तु लक्षणसम्बन्धे सति तावति भागे कालाद्दानात् स्वर्दृशं प्रति वीक्षेत इति नियमः सिद्धो भवति॥ (१०।६।२अ०)॥

———

गवामयनिके पृष्ठ्यषड्हे बृहद्रथन्तरयोर्विभागाधिकरणम् ।

पृष्ठ्यस्य युगपद्विधिरेकाहवत् द्विसामत्वम् ॥ ४ ॥ (पू०)

इदमाम्नायते, पृष्ठ्यः षड्हो बृहद्रथन्तरसामा इति । तत्र अयमर्थः सांशयिकः, किमहरहर्द्विसामकं कर्त्तव्यम्, उत केषुचिदहःसु रथन्तरं केषुचिद् बृहत् ? इति । कुतः संशयः ? । यद्येते समस्ते सामनी, यदि विभक्ते, उभयथा पृष्ठ्यः षड्हो बृहद्रथन्तरसामा इति शब्दोऽवकल्पते । तत्रैष विचारः, किं द्वन्द्वगर्भो बहुव्रीहिरयं, बृहद्रथन्तरे सामनी यस्य इति, उत, अनेकपदो बहुव्रीहिः, बृहदस्य, रथन्तरमस्य ? इति । यदि द्वन्द्वगर्भो बहुव्रीहिः, प्रत्यहं समस्ते सामनी, अनेकपदे बहुव्रीहौ विभक्ते इति ।

किं तावत् प्राप्तम् ? समस्ते इति । तत्र एतद् वर्ण्यते, द्वन्द्वगर्भो बहुव्रीहिरिति । कुतः ? बृहद्रथन्तरशब्दयोरानन्तर्यात् द्वन्द्वपक्षस्याश्रितत्वात्, द्वन्द्वे च समासस्य नित्यत्वात् । द्वन्द्वे च स्वार्थाभिधानात् न्यूनाधिकयोरङ्गता च । इतरथा च उभयमपि बाध्येत । अतो द्वन्द्वगर्भो बहुव्रीहिः, एवं चेत्, प्रत्यहं समस्ते सामनी भवेताम् । कुतः ? । इतरेतरयोगद्वन्द्वस्य भावात्, यच्च रथन्तरं तच्च बृहत्सहितं, स एष युगपद्विधिर्यथेतरेतरयोगः, तस्मात् प्रत्यहं समस्ते इति । एकाहवत्, तथा ज्योगामयाविन उभे कुर्य्यात् संसवे उभे कुर्य्यात्, अपचितावपि एकाहे बृहद्रथन्तरे कुर्य्यात् इति ।

विभक्ते वा समस्तविधानात् तद्विभागे विप्रतिषिद्धम् ॥ ५ ॥ (सि०)

न चैतदस्ति, अहरहर्हि सामकम् इति, केषुचिदहःसु रथन्तरं केषुचित् बृहत्, न समस्ते सामनी विधीयेते । कुतः ? । यद्युभयोरपि पक्षयोर्बृहद्रथन्तरसामेतिशब्दोऽवकल्प्यते, विभक्ते सामनी इति न्याय्यम् । कुतः ? । प्रकृतावेकेन साम्ना पृष्ठं साधितं, विकृतावपि एकेन साधितव्यं षोढकानुग्रहाय, तथा च सति बृहद्विभिन्नं रथन्तरनिमित्तञ्च सकलमभिनिर्वर्त्तयिष्यते ।

अथबृहद्रथन्तरसमुदायः पृष्ठं साधयति, न बृहत्साधनं न रथन्तरं साधनमिति तद्विभिन्नं न प्रकल्पेत, तच्च षोढकोपरोधः स्यात् । न केवलं, तद्विभिन्नं न प्रकल्पते बृहत्पृष्ठतापि न प्रकल्पते, रथन्तरपृष्ठतापि, तच्च वैषम्यात् स्याद्व्यदेव प्रयोगान्तरम् ।

अपि च समस्तं पृष्ठमित्युपपन्नमाचं क्षत्रियं बृहत्पृष्ठं भवति, रथन्तरं पृष्ठं भवति इति, तत्समुदायाभिधाने लिङ्गम् । अपि च बृहत्शब्दः सामशब्देन सम्बन्धमपेक्षमाणो न रथन्तरशब्देन सम्बद्धः स्यात् । आनर्थक्यञ्च तुल्यं रथन्तरशब्दस्य सामशब्देन । अपि च हस्तिपक्षाश्वे सुतरां द्रव्यपदेन असामर्थ्यं, न चैव नियोगो हस्तिपक्षे नित्यः समास इति, विभावां हि स भगवान् पाणिनिरधीते । सामशब्दश्रुतिश्च बृहद्रथन्तरयोर्द्रव्यतामा-

चष्टे । तस्मादसमस्ते सामनी स्याताम् इति । एतच्चोक्तमेव विभागेऽपि साम्नोरविप्रतिसिद्धो ह्रहद्रथन्तरसामशब्द इति । यथा, मासं घृततैलाभ्यां देयदत्तो भोजयितव्यः इत्युक्तोऽर्धं मासं घृतेनार्धं मासं तैलेन, एवमपि शब्दोऽवकल्पते । एकाहे तु एकत्वादेव विभागासम्भवात् समस्ते ज्योगामयाविन उभे कुर्य्यात् इति ॥ (१० । ६ । ३ अ०) ॥

प्रायणीयोदयनीययोरैकादशिनानां विभागाधिकरणम् ।

समासस्त्वैकादशिनेषु तत्प्रकृतित्वात् ॥ ६ ॥

(पू०)

इदमाम्नायते, ऐकादशिनान् प्रायणीयोदयनीययोरतिरात्रयोरालभेत इति । तत्र संशयः, किमेकादश प्रायणीये पुनस्ते एव एकादश उदयनीये, आहोस्वित् केचित् पशवः प्रायणीये केचित् उदयनीये ? इति । समानत्वात् निर्देशस्य, संशयः । किं प्राप्तम् ? तुशब्दः संशयनिवृत्त्यर्थः, समासः एव ऐकादशिनेषु, सर्वे प्रायणीये, सर्वे पुनः उदयनीये भवितुमर्हन्ति । कुतः ? । तत्प्रकृतित्वात् प्रकृतौ ज्योतिष्टोमे समस्तानाम् ऐकादशिनानाम् आलम्भः, इहापि समासश्चोदकः प्रापयति । अपि च लक्षणत्वेन प्रायणीयमुदयनीयं वा अहः श्रूयते, तत्र प्रायणीये सर्वे विहिता भवन्ति, न गम्यते विशेषः, के

इह ऐकादशिनानां विहिताः ? इति, तथोदयनीये। तस्मात् समासस्तच।

विहारप्रतिषेधाच्च ॥ ७ ॥ (यु०)

विहारप्रतिषेधश्चायम्, ऐकादशिनान् प्रायणीयोदयनीययोरतिरात्रयोरालंभेरन् इति, अन्यहमेकैकमालभेत इति विहारः प्राप्तः। तत्र एकः पशुः प्रायणीये प्राप्त एव अन्येऽन्येषु अहःसु। ततोऽनेन किं क्रियते ? येऽन्येषु अहःसु, ते प्रतिषिध्यन्ते, प्रायणीये च ते सर्वे भवन्ति इति, तथोदयनीये। तस्मात् सर्वे प्रायणीये भवितुमर्हन्तीति।

श्रुतितो वा लोकवद्विभागः स्यात् ॥ ८ ॥ (सि०)

वाशब्देन पक्षं व्यावर्त्तयति, नैतदस्ति समास इति, विभागः स्यात्। कुतः ?। हित्वश्रुतितः, हित्वश्रुतिर्हि भवति, प्रायणीयोदयनीययोः इति। सा च इदानीमुपादेयत्वेन, न लक्षणतया। कुतः ?। एकादशिनीविधौ सन्निहिते वचनादेकादशिनीं विधाय पुनः श्रुत्या तां लक्षयित्वा प्रयोजनविधिलक्षया एतदभिधीयते, प्रायणीयोदयनीययोः इति, तत्र इन्द्रभाविनोः प्राधान्यात् सत्याम-पेक्षायां भवति समासः। समासे च इतरेतरयोगात् न एकादशिनी केवले प्रायणीये, सा उदयनीययुक्ते भवितुमर्हति, तद्वत् उदयनीयेऽपि। तस्मात् समुदाये वाक्यपरिसमाप्तिः। यदि पुनर्नोपादेयत्वेन अश्राव्येतां, तत्र इन्द्रभाविनोरप्राधान्यम्, अप्राधान्येऽसत्याम् आकाङ्क्षायां

न समासो भविष्यति। तत्र प्रत्येकं वाक्यपरिसमाप्तिः स्यात्, उपादेयत्वेन तु एतत् श्रूयते। तस्माद्विभाग इति। लोकवत् यथा, लोके यतं देवदत्तयज्ञदत्तयोः दीयताम् इत्युक्ते समासार्थो विधीयते, यदेतत् यतं, तदेतयोर्दीयतां इति। इन्द्रश्रुतिविधानसामर्थ्यात् यतं विभज्यते, एवमैकाद्शिन्यपि विभज्येत इति।

विहारप्रकृतित्वाच्च ॥ ९ ॥ (यु०)

इतश्च विभागः। कुतः?। विहारः प्रकृतः, एकादशिन्यामग्रहमेकैकमालभेत इति। तस्यैव विकारः, ऐकादशिनान् प्रायणीयोदयनीयवीरतिराचयोरालभेत इति। यावत्यश्च तावद्विहारस्यानुगृहीतव्यम्।

विशये च तदासक्तेः ॥ १० ॥ (आ० नि०)

इदं पदीत्तरं सूत्रम्, आह, यदि विहारोऽभिप्रेयते, तत्र एकत्र पञ्च आलभ्याः, एकत्र षट्, तत्रैकस्मिन्न निर्णीयते, किं प्रायणीये किमुदयनीये? इति। अनिर्णयेनानध्यवसानम्, अनध्यवस्यतोऽप्रवृत्तिः, तत्रोपदेश्यवैयर्थ्यं स्यात् इति। अत्रोच्यते, विषये एतस्मिन् संशये प्रकृत्यासक्तिः मुख्येनानुगृह्येत, तत्र प्रायणीये पञ्च आलभ्यन्ते, षट् उदयनीये इति अध्यवस्यामः।

अवस्थेति चेत् ॥ ११ ॥ (आ०)

इति चेत् पक्षसि प्रत्यासक्तिर्मुख्येनानुगृहीतव्या इति।

तस्मात् त्रय एव प्रायणीये आलभ्याः, यावत्सु बहुवचनमविरुद्धं भवतीति स्थितायां प्रतिज्ञायां सूत्रेण प्रतिचोदयति एवम्।

न समत्वात् प्रयाजवत् ॥ १२ ॥ (आ० नि०)

न एतदेवम्। कुतः ?। समत्वात्, यदा प्रायणीयोदयनीययोरितरेतरापेक्षयोरेकादशिना विधीयन्ते, न सर्वेऽन्यतरस्मिन् केवले कर्त्तव्यास्तदपेक्षया कात्स्न्यं बाधितं भवति। तत्र यावद्भिरन्यतरत्र भवद्भिरवश्यं बाधितव्यं तावद्भिरनुज्ञातो बाधः। अत एव साम्येनैव विभागः प्रयाजानामिव, यथा षड्भागत्वः प्रयाजाः प्रथमोत्तमयोर्विकारभूताः साम्येन प्रविभज्यन्ते, एवमिहापि यावत्सु साम्यं भवति, तावतः साम्येन विभज्य अभ्यधिक उदयनीये आलभ्यते प्रत्यासत्तिर्मुख्येनानुग्रहीष्यते इति तस्माददोषः ॥ (१० । ६ । ४ अ०) ॥

विश्वजित् सर्वपृष्ठः इत्यत्रैकस्यैव पृष्ठदेशे निवेशाधिकरणम्।

सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात् ॥ १३ ॥ (पू०)

इदमाम्नायते, विश्वजित् सर्वपृष्ठः इति। तत्रायमर्थः सांशयिकः, किं सर्वेषां पृष्ठदेशे निवेशः, उतैकस्य पृष्ठदेशे अन्येषामन्यत्र ? इति। किं प्राप्तम् ? सर्वपृष्ठे एतस्मिन् सर्वेषां साम्नां पृष्ठदेशे निवेशः। कः पुनः पृष्ठदेशः ?

ऊर्ध्वं माध्यन्दिनपवमानात्, प्राक् मैत्रावरुणसाम्नः, इदमन्तराले पृष्ठदेयः, स एवैको देयः स्यात् सर्वेषां साम्नाम्। कुतः ?। पृष्ठग्रहात्, पृष्ठकार्ये वर्त्तमानस्य वा अयं कृतो देयः। तस्मात् सर्वेषां पृष्ठदेये निवेशः।

विधेस्तु विप्रकर्षः स्यात् ॥ १४ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, एवं न्यायेन प्राप्तं वचनादन्यथा भवितुमर्हति। एकस्य पृष्ठकार्ये विधिरन्येषां परिसामकार्ये। कथम् ?। पवमाने रथन्तरं करोति आर्भवे बृहत् मध्ये इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसाम इति। एवमेकस्य पृष्ठकार्ये विधानमर्थवत् भविष्यति, गृहीतरेषां सामकार्ये निवेशः। इतरथा एकस्य पृष्ठकार्ये विधानं नोपपद्यते, यथा भूदित्यतः पश्यामः एकस्य पृष्ठकार्ये निवेशः, अन्येषां परिसामकार्ये इति ॥ (१०।६।५ अ०) ॥

वैरूपसामवैराजसाम्नोः पृष्ठकार्ये निवेशाधिकरणम्।

वैरूपसामा क्रतुसंयोगात् त्रिवृद्देकसामा स्यात् ॥ १५ ॥ (पू०)

अस्ति ज्योतिष्टोमः, तत्रोक्थ्यः षोडशी च संस्थाविशेषः। तत्र श्रूयते, उक्थ्यो वैरूपसामा एकविंशः षोडशी वैराजसामा इति। तत्रायमर्थः सांशयिकः, किं वैरूपं वै-

राजञ्च क्रतुञ्चे क्रतौ निविशेते, उत पृष्ठकार्य्ये ? इति । किं प्राप्तम् ? क्रतुञ्चे क्रतौ वैरूपमेकं साम स्यात्, षोडशिनि वैराजम्। कुतः ? । क्रतुञ्च क्रतुसंयोगात्, अविशेषेण क्रतुञ्चे क्रतौ वैरूपसाम विधीयते, वैराजञ्च, तत्र विशेषेऽवस्थातुमर्हति पृष्ठकार्य्ये, त्रिवृदत्, यथा, त्रिवृदग्निष्टोमः, त्रिवृत्स्तोमः क्रतुञ्चे क्रतौ भवति, एवमिमे अपि सामनी क्रतुस्थयोः क्रत्वोर्भवेताम्। यथा वा, धेनुरश्वेष भूर्वेश्वदेवः त्रिवृदेव सर्वस्तस्य विश्ववत्यः स्तोत्रिया धेनुर्दक्षिणा इति क्रतुस्थस्य क्रतुदाक्षिण्यस्य कार्य्ये धेनुः संयोगात्, एवमिमे अपि सामनी भवितुमर्हतः ।

पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् ॥१६॥ (सि०)

पृष्ठकार्य्ये वा सामनी विधीयते । कथम् ? । वैरूपसामा वैराजसामेति सामशब्देन प्रकृतिलिङ्गेन बहुव्रीहिरवगम्यते, न वैरूपं साम विधीयते वैराजञ्च, किन्तर्हि, वैरूपसामता वैराजसामता च क्रतोः । क्रतुसंयोगी हि भवति न स्तोत्रसंयोगः, एकस्मिन्नपि च स्तोत्रे वैरूपे वैराजे च भवति वैरूपसामता वैराजसामता च क्रतोः । कुतः ? । यदि हि स्तोत्रे साम विधीयते स्तोत्राविशेषात् सर्वस्तोत्रेषु भवेत् न त्वेतदेवं, तस्मादेकस्मिन् स्तोत्रे वैरूपे वैराजे च भवति, वैरूपसामता वैराजसामता च इति। यदेकस्मिंस्तदा पृष्ठकार्य्ये स्यातां, वैरूपसामता हि गुणो विधीयमानः, वैराजसामता च एवंजातीयकस्य गुणस्य कार्य्ये भवितुमर्हति, प्रकृतौ च बृहत्सामता रथन्तरसामता चैवं-

जातीयका। तदिह प्रकृतिलिङ्गसंयोगेन वैरूपसामतया वैराजसामतया च पृष्ठकार्ये द्वित्ववगम्यते यस्य लिङ्गमर्थ-संयोगादभिधानवत् इत्यनेन न्यायेन। तस्मादिमे सामनी पृष्ठकार्ये निविशेयातामिति।

त्रिवृद्वदिति चेत् ॥ १७ ॥ (आ०)

इति चेत् इति यदुक्तं, यथा त्रिवृदग्निष्टोमः इति त्रिवृत्त्वं क्रतुत्वे क्रतौ निविशते, एवमिहापीति। तत्परिहरणीयम्,

न प्रकृतावक्रतुत्वसंयोगात् ॥ १८ ॥ (आ०नि०

नैतदेवं, इह वैरूपवैराजयोः प्रकृतिलिङ्गेनाक्रतुत्व संयोगो गम्यते, नैवं त्रिवृतीति कश्चित् प्रकृतिलिङ्गेन संयोगोऽस्ति येनाक्रतुत्वता अवगम्येत। ततः विशेषस्त्रिवृतः सामभ्याम्।

विधित्वान्नेति चेत् ॥ १९ ॥ (आ०)

इति चेत् इति यदुक्तं, यथा धेनुविधिर्भुवि क्रतुस्थस्य क्रतुदाक्षिण्यस्य कार्ये भवति, एवं सामनी अपीति।

स्यात् विशये तन्न्यायत्वात् कर्माविभागात् ॥ ॥ २० ॥ (आ० नि०)

स्यात् धेनुः भुवि क्रतुस्थस्य क्रतुदाक्षिण्यस्य निवर्त्तयित्री, सा हि क्रतुस्थं क्रतुदाक्षिण्यं निवर्त्तयेत् किं वा न? इत्येतस्मिन् संशये एवं न्याय्यं क्रतुस्थं निवर्त्तयेत्। कुतः?। कर्माविभागात् अविभक्तं हि दक्षिणाकार्यं कात्स्न्र्येन वा दाक्षिण्येन क्रियेत धेन्वा वेति। दक्षिणा-

कार्ये हि धेनुः श्रूयते, धेनुर्दक्षिणा इति, अतस्तच्च युक्तम्, इह प्रकृतिविकृतसंयोग इत्यपदिष्टो हेतुः। तस्मादेतदपि विषमम्।

प्रकृतेश्चाविकारात् ॥ २१ ॥ (यु०)

इतश्च न क्रत्वङ्गक्रतुसंयोगः। कुतः?। प्रकृतेः अविकारात्। एवं बहु प्राकृतमविकृतं भविष्यति, तत्र चोदकोऽनुपपत्तीयते। अतोऽपि न क्रत्वङ्गक्रतुसंयोगः साङ्गोरिति ॥ (१०।६।६ अ०) ॥

त्रिवृदग्निष्टोमः इत्यत्र स्तोमसङ्ख्याविकाराधिकरणम्।

विवृति सङ्ख्यात्वेन सर्वसङ्ख्याविकारः स्यात् ॥ ॥ २२ ॥ (पू०)

एवं श्रूयते, त्रिवृदग्निष्टोमः इति। तत्र संशयः, किं त्रिवत्सङ्ख्या अग्निष्टोमस्य साधनमात्रे, उत स्तोमविषया नियम्यन्ते? इति। किं प्राप्तम्?। त्रिवत् भवतीति श्रूयमाणे सङ्ख्यामात्रविकारः स्यात्। कुतः?। त्रिवत्शब्दो लोके त्रित्वसम्बन्धे प्रयुक्तः, यथा त्रिवद्ग्लुञ्चितमपि रितिं, इहापि त्रिवदग्निष्टोमः इति त्रित्वसम्बन्धोऽग्निष्टोमः कार्य इत्युच्यते। तच्च त्रित्वमग्निष्टोमसाधनपरिच्छेदद्वारेण तत्सम्बन्धिमात्रं भवति, न साक्षात्, गुणत्वात् सङ्ख्यायाः। न चेह सङ्ख्येयविशेषः क्वचित् तद्दीय उपा-

जातीयका। तदिह प्रकृतिलिङ्गसंयोगेन वैरूपसामतया वैराजसामतया च पृष्ठकार्ये हृत्तिरवगम्यते यस्य लिङ्गमर्थ-संयोगादभिधानवत् इत्यनेन न्यायेन। तस्मादिमे सामनी पृष्ठकार्ये निविशेयातामिति।

त्रिवृद्वदिति चेत् ॥ १७ ॥ (आ०)

इति चेत् इति यदुक्तं, यथा त्रिवृदग्निष्टोमः इति त्रिवृत्त्वं क्रतुत्वे क्रतौ निविशते, एवमिहापीति। तत्परिहरणीयम्,

न प्रकृतावक्रतुत्वसंयोगात् ॥ १८ ॥ (आ०नि०)

नैतदेवं, इह वैरूपवैराजयोः प्रकृतिलिङ्गेनाक्रतुत्व संयोगो गम्यते, नैवं त्रिवृति कश्चित् प्रकृतिलिङ्गेन संयोगोऽस्ति येनाक्रतुत्वता अवगम्येत। ततः विशेषश्रुतेः सामभ्याम्।

विधित्वान्नेति चेत् ॥ १९ ॥ (आ०)

इति चेत् इति यदुक्तं, यथा धेनुविधिर्भुवि क्रतुत्वस्य क्रतुदाक्षिण्यस्य कार्ये भवति, एवं सामनी अपीति।

स्यात् विशये तन्न्यायत्वात् कर्माविभागात् ॥ २० ॥ (आ० नि०)

स्यात् धेनुः भुवि क्रतुत्वस्य क्रतुदाक्षिण्यस्य निवर्त्तयित्री, सा हि क्रतुत्वं क्रतुदाक्षिण्यं निवर्त्तयेत् किं वा न? इत्येतस्मिन् संशये एवं न्याय्यं क्रतुत्वं निवर्त्तयेत्। कुतः?। कर्माविभागात् अविभक्तं हि दक्षिणाकार्यं कात्स्न्र्येन वा दाक्षिण्येन क्रियेत धेन्वा वेति। दक्षिणा-

कार्ये हि धेनुः श्रूयते, धेनुर्दक्षिणा इति, अतस्तत्र युक्तम्, इह प्रकृतिलिङ्गसंयोग इत्यपदिष्टो हेतुः। तस्मादेतदपि विषमम्।

प्रकृतेश्चाविकारात् ॥ २१ ॥ (यु०)

इतश्च न क्रतूक्षक्रतुसंयोगः। कुतः ?। प्रकृतेः अविकारात्। एवं बहु प्राकृतमविकृतं भविष्यति, तत्र चोदकोऽनुग्रहीष्यते। अतोऽपि न क्रतूक्षक्रतुसंयोगः साङ्गोरिति ॥ (१०।६।६ अ०) ॥

त्रिवृदग्निष्टोमः इत्यत्र स्तोमसङ्ख्याविकाराधिकरणम्।

त्रिवृति सङ्ख्यात्वेन सर्वसङ्ख्याविकारः स्यात् ॥ ॥ २२ ॥ (पू०)

एवं श्रूयते, त्रिवृदग्निष्टोमः इति। तत्र संशयः, किं त्रिवत्सङ्ख्या अग्निष्टोमस्य साधनमात्रे, उत स्तोमविषया नियम्यन्ते ? इति। किं प्राप्तम् ?। त्रिवृत् भवतीति श्रूयमाणे सङ्ख्यामात्रविकारः स्यात्। कुतः ?। त्रिवृत्शब्दो लोके त्रित्वसम्बद्धे प्रयुक्तः, यथा त्रिवृद्रज्जुस्त्रिवृत्स्रुचिरिति, इहापि त्रिवृदग्निष्टोमः इति त्रित्वसम्बद्धोऽग्निष्टोमः कार्य इत्युच्यते। तत्र त्रित्वमग्निष्टोमसाधनपरिच्छेदद्वारेण तत्सम्बद्धमित्युक्तं भवति, न साक्षात्, गुणत्वात् सङ्ख्यायाः। न चेह सङ्ख्याविशेषः कश्चित् तद्दीय उपा-

दीयते। तदविशेषात् यावान् कश्चिदग्निष्टोमसम्बन्धः सङ्ख्यया परिच्छेत्तव्यः सर्वं परिसङ्ख्यातीह सङ्ख्यात्वेन सामान्येन तत्सङ्ख्यां विकुर्य्यात्। यथा दधिघृतयागादिभिर्देवदत्तो भोजयितव्यो देवदत्तवद् यज्ञदत्तस्तैलेनेत्युक्ते स्नेहनसामान्यात् तैलं स्नेहनकार्य्ये एव विनियुज्यते, न ओदनकार्य्ये। इत्येवं सङ्ख्यापि सङ्ख्याकार्य्ये एव विनियुज्यते।

स्तोमस्य वा तल्लिङ्गत्वात् ॥ २३ ॥ (सि०)

न चैतदस्ति सर्वसङ्ख्याविकार इति, किन्तर्हि स्तोमगतामेव सङ्ख्यां विकुर्य्यात्। कथम्?। स्तोमविषये त्रिवृच्छब्दस्यार्थस्य च दर्शनात्, यथा त्रिवृद्रथिष्यपवमानः इत्यत्र स्तोमविषयता परिच्छिन्ना, एवं त्रिवृदग्निष्टोमः इत्यत्रापि स एव शब्द उच्चरितस्तमेव सम्बन्धिनमनुमानात् बुद्धौ सन्निधापयेत्, अतः स्तोमलिङ्गत्वात् तद्गतामेव सङ्ख्यां विकुर्य्यात्।

अत्राभिधीयते, नैतद्युक्तं, सङ्ख्याशब्दा हि अनियतवृत्तयो भवन्ति ते हि येन येन सम्बध्यन्ते सङ्ख्येयेन तं तं परिसङ्ख्यन्ते। तथा चोपदर्शितमेव त्रिवृद्रथन्तरखित्रयाणीति। तस्माद्रथिष्यवमानेन सामानाधिकरण्यात् स्तोत्रं परिसङ्ख्येष्टं, अन्यत्रापि यो यः परिसङ्ख्यातव्यो भविष्यति, तं तं परिसङ्ख्यास्यतीत्यतः स्तोमलिङ्गत्वमप्यहेतुर्नियमस्य इति।

अत्राभिधीयते, अयमिह त्रिवृच्छब्दोऽतीत्य लौकिकमर्थं, विशिष्टसङ्ख्यासङ्ख्येये आचरितः, यथा त्रिवृद्रथिष्यव-

मानः इति स्तोमविषयिण्यां नवसङ्ख्यायां चिह्नदृष्ट्यैव मानः इत्यभिधाय नव स्तोत्रिया उच्यन्ते, तेन तासु वर्त्तत इति गम्यते, तथा परस्मिन्नपि दृश्यते, त्रयस्त्रिंशत्पालास्त्रिंशता स्तोमेन सम्मिता नव प्रकृतिरग्निष्टोमस्य इति नवानां कपालानां चिह्नता स्तोमेन सम्मानं वदन् चिह्नच्छब्दस्य तत्र प्रसिद्धिं दर्शयति इति, अतः प्रसिद्धेर्वदाचारात्, सामानाधिकरण्यदर्शनाच्च अयमस्यार्थ इति निश्चीयते, लोकेऽपि सामानाधिकरण्यप्रयोगाद्वा आचाराद्वा अर्थावसानं भवति, यथाऽयं देवदत्त इति। तस्मादयं चिह्नच्छब्दो विशिष्टसङ्ख्यासङ्ख्येयविषयोऽन्यत्र दृष्ट इहापि प्रयुज्यमानो यत्र दृष्टस्तमेव लिङ्गात् बुद्धौ सन्निधापयतीत्यत स्तोमविषयो नियम्येत। यदुक्तं, सङ्ख्या ह्यनियतविषया सर्वत्र सम्बन्धमुपयाति। एतत् अवयवार्थनिराकरणात् समुदायाङ्गीकरणाच्च परिहृतमेवेति। एवं अन्यगतानां सङ्ख्यानामनिवृत्तौ चोदकानुग्रहो भविष्यतीति ॥ (१०।६।७ अ०) ॥

उभयसामि द्वहद्वयन्तरयोः समुच्चयाधिकरणम्।

उभयसामि विप्लवजिद्विभागः स्यात् ॥ २४ ॥

(पू०)

सन्ति उभयसामानः क्रतवः, संशय उभे कुर्यादुपचितावप्येकाहे उभे कुर्यात् इति। तत्र संशयः, किं द्वहद्वयन्तरे विभक्ते भवतः, उत समस्ते ? इति। कुतः ? सम-

स्तुता अवगम्यते, कुतो वा अस्तुता ? इति । उच्यते, एतदेव वचनमुभयमर्थमुद्भासयति । कथम् ? । उभाभ्यां क्रतुः सम्बन्धितव्यः, ते यदि समस्ते अथ वा व्यस्ते भवतः, उभयथापि क्रतुस्ताभ्यां सम्बद्धो भवति । तत्रोभयथा प्रतिभाति वचने । किं युक्तम् ? । व्यस्ते इति । कुतः ? । प्रकृतो हि हृदयद्वयन्तराभ्यामन्यतरेण पृष्ठं साधितमिष्टापि प्रकृतिवद्धोदकानुग्रहायान्यतरेण साधयितव्यं अवगम्यते । एवञ्च पृष्ठसम्बन्धानां कर्मणां कार्त्स्न्येन प्रकृतौ धोदकोऽनुग्रहीष्यते, उभयोः पृष्ठं साधयतोरन्योन्येन विहितत्वात् प्रयोगान्तरमापद्येत, न रथन्तरं पृष्ठं न हृदयपृष्ठमिति उभयथापि वचनार्थोपपत्तौ न धोदकबाधायां कारणमस्ति, तस्मात् यद्वा न विभजिति हृदयादीनां सर्वेषामेकत्र निवेशः, एवमिष्टापीति ।

पृष्ठार्थे वा अतदर्थत्वात् ॥ २५ ॥ (सि०)

नैतदस्ति, विभक्ते इति, किन्तर्हि समस्ते सामनी स्याताम् । कुतः ? । प्रकृतौ हि हृदयद्वयन्तराभ्यां विकल्प्यमानाभ्यां पृष्ठं साधितम्, इह इदानीं विकृतौ तयोरधिगतदेशयोर्विकल्परूपेणैव प्राप्तयोः केवलमेतद्वचनं सामस्त्यविधानार्थम् उभे हृदयद्वन्तरे कुर्यात् इति, एवञ्च सामस्त्यं भवति, यदि ते सामनी परस्परं न जह्रीतः, उपादेयत्वेन चानयोः श्रुतत्वात् द्विस्तुतिः समासस्तुतिश्च विवक्षितैव, तेन यच्च हृदयम्, तच्च रथन्तरसहितं, न केवलम् इति ।

तच्चेतत् स्यात्, प्रधानक्रियापेक्षम् अनयोः साहित्यं,

तत्र व्यस्तयोरपि क्रियमाणयोः साहित्यं न विरुध्यते । यथा देवदत्तयज्ञदत्तयोः पाचेन समस्तयोरपि संयोगे उच्यमाने एकः किञ्चित्करोति अपरोऽपि किञ्चित्, न यदेकेन कृतं, तदेव अपरः करोति, तद्वदेकं साम किञ्चित् स्तोत्रमभिनिर्वर्त्तयिष्यति द्वितीयमप्यपरम् । प्रधानोपकारापेक्षं साहित्यमिति समस्तसंयोगो न विरोत्स्यते इति ।

तत्राभिधीयते, यत्र परस्परसव्यपेक्षयोर्योगो भवति, तत्रैतदेवं न्याय्यं, येन क्रियावयवेन आरब्धेन मध्येन अवसानेन वा योगः, तेन सहितयोर्न पृथक्त्वम् । कुतः ? । यद्येवानेन उपकर्त्तव्यमित्यवगम्यते, एवमितरसहितेनेति । यत्तु, लोके कारकसामस्त्येऽप्यभिहिते भेदेन व्यापारदर्शनमिति, अर्थासम्भवादसौ, न हि उखायामधिश्रीयमाणायां भूयोऽधिश्रयणं शक्यते कर्त्तुमित्यर्थविरोधात् न करोति, न तु शब्देनासौ तत्र न चोदितः । यद्यत् कर्त्तव्यं तत्तत्सहिताभ्यामेव नान्यथा । इह तु नासम्भवः, बहुद्रव्यत्वरयोर्हि ऋक्संस्कारत्वेन विनियोगात्, ते च शक्नुतः सहिते पृष्ठं संस्कर्त्तुमित्यतः तयोः साहित्यमेव युक्तम् । यदुक्तम्, उभयथा सम्भवे चोदकानुग्रहो न्याय्य इति धर्मकात्स्न्यं निमित्तविघातस्य न भविष्यति । तत्र प्रत्यक्षात् समस्तविधानात् चोदके बाध्यमाने न दोषो भवति ।

लिङ्गदर्शनाच्च ॥ २६ ॥ (यु०)

लिङ्गञ्च दर्शयति, यथा समस्तयोः प्रयोगो न व्यस्तयोरिति। किं लिङ्गम्?। एवमाह, महाव्रतो वै व्रतव्रतयन्तरे निधनेन समाप्येते यत् महाव्रतो समृच्छेते न ग्रह विभक्तं प्रभक्तम् इति निधनभेदवचनादेकस्यानता अवगम्यते। यदि भिन्नदेशे स्याताम् अर्थादेव तत्र निधनभेदः सिद्धः। अथ तु सहिते भवतः, ततो निधनभेदवचनमर्थवत् भवति। तस्मादप्यभेदः। तथा अपरं लिङ्गं पूर्वाह्णो वै रथन्तरम्, अपराह्णो व्रतव्रत् इति एकेनाङ्गा अभिसम्बन्धादेकस्यानतां दर्शयति। तस्मात् समस्तयो पृष्ठदेशे निवेश इति॥ (१०।६।८अ०)॥

सन्धानसृताग्रनयोः षड्हाल्लनुष्ठानाधिकरणम्।

पृष्ठे रसभोजनमाहृत्ते संस्थिते त्रयस्त्रिंशेऽहनि स्यात् तदानन्त्यर्थात् प्रकृतिवत् ॥२७॥ (पृ०)

क्वचित् कर्मविशेषे श्रूयते, पृष्ठाः षड्हस्त्रयस्त्रिंशा रथन्तरस्य इति। द्वादशाहे वचनं, संस्थिते पृष्ठ्ये षड्हे मधु आज्यस्येत् घृतं वा इति। तदिदं मध्वग्रनं घृताग्रनञ्च चोदकप्राप्तं सत् सन्दिह्यते, किं त्रयस्त्रिंशान्ते कर्त्तव्यम्, उत षड्हान्ते? इति। किं प्राप्तम्?। ततः सूत्रेणोपक्रमः, पृष्ठे रसभोजनमाहृत्ते षड्हे त्रयस्त्रिंशेऽहनि संस्थिते कार्य्यम्। कुतः?। तदानन्त्यर्थात्, प्रकृतौ

त्रयस्त्रिंशानन्तरं रसभोजनं हृस्वं, प्रकृतिवद्दिहापि कुर्वाणो यदि त्रयस्त्रिंशानन्तरं करोति, षोडशमनुरुद्धाति। अथ त्वन्यस्माद्भोजनानन्तरं कुर्यात्, षोडशं बाधेत। आनन्तर्यं हि क्रमः, स च विशेषसम्बन्धे कारणमिति समधिगम्। एतदानन्तर्यस्य रसभोजनस्य, त्रयस्त्रिंशेन सह दृष्टमित्यतः त्रयस्त्रिंशानन्तरं क्रियत इति।

अन्ते वा कृतकालत्वात् ॥ २८ ॥ (सि०)

न चैतदस्ति, त्रयस्त्रिंशानन्तरं रसभोजनम् इति, किन्तर्हि षड्हान्ते स्यात्। कुतः?। संस्थिते षड्हे इत्युच्यते, न, संस्थिते त्रयस्त्रिंशे इति। षड्हाभिगमलक्षिते पर्य्यवसाने, न त्रयस्त्रिंशाद्युपलक्षिते, षड्हस्य षड्हःसु पर्य्यवसितो भवति, न एकस्मिन् त्रयस्त्रिंशेऽहनि। यदुक्तं, त्रयस्त्रिंशानन्तर्यदर्शनात् प्रकृतिवद्दिहापि तदानन्तर्य एव भोजनेन भवितव्यमिति। नैतद्युक्तं, तत्र ह्यर्थात् त्रयस्त्रिंशानन्तर्यं हृस्वम्। कुतः?। तस्मिन्नहनि तत्र द्वादशाहे षड्हः पर्य्यवसित इहापि यत्र पर्य्यवस्यति तत्र भोजनं भविष्यति। ततः षड्हावसानलक्षितेन भोजनस्य सम्बन्धः, संस्थिते षड्हे इति। न, त्रयस्त्रिंशावसानलक्षितेन इति। यत्तु क्रमः कारणं विशेषसम्बन्धे इति। सत्यं कारणं न तु बलीयसा प्रमाणेन यत्र विरुध्यते। इह तु वाक्येन षड्हावसाने विधीयते इत्युक्तम्। तस्माद्वाक्येन विशेषसम्बन्धे

सति न आनन्तर्यमात्रं कारणम्। अतः षड्हान्ते भोजनं स्यादिति ॥ (१० । ६ । ८ अ०) ॥

षड्हाहत्यावपि मध्यग्रहतृताश्रनयोः सकृदनुष्ठानाधिकरणम्।

अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ॥ २९ ॥ (पू०)

आहृत्य पृष्ठ्यं षड्हमुपयन्ति इति श्रूयते तचैतत् षोडशिना प्राप्यते, संस्थिते पृष्ठ्ये षड्हे मध्याग्रयेत् घृतं वा इति, तत् सन्दिह्यते, किं षड्हाहृत्या आवर्त्तेत भोजनम् उत, षड्हान्ते सकृदेव क्रियेत ? इति। किं प्राप्तम् ?। षड्हाहृत्तौ सत्याम् आवर्त्तेत भोजनम्। कुतः ?। कर्मणः पुनः पुनः प्रयोगात् तद्धि कर्म पुनरावर्त्तते, तदाहृत्या यद्यपि तत्सम्बद्धं तदप्यावर्त्तेत, यथा स्रोचरणादि षड्हसम्बद्धमावर्त्तते, एवं षड्हसम्बन्धि भोजनमप्यावर्त्तेत इति।

अन्ते वा कृतकालत्वात् ॥ ३० ॥ (सि०)

न चैतदस्ति, यदुक्तं, षड्हाहृत्या भोजनमप्यावर्त्तेत इति, किन्तर्हि षड्हान्ते सकृदेवानुष्ठीयेत। कुतः ?। कृतकालत्वात्, कृतो हि भोजनस्य कालः, संस्थिते षड्हे इति। संस्थानं, धर्मावसानं, षड्हगतस्य व्यापारस्यापरमः, न च, पुनः षड्हं कुर्वाणः षड्हगताद् व्यापारा-

दुपरत इत्युच्यते, न च, अनुपरतौ कर्तुः, षड्हः सन्तिष्ठते । संस्था हि क्रियां प्रति औदासीन्यं, व्यापारान्तरकरणं वा, पूर्वस्मात् कर्मणः । न च पुनः षड्हं कुर्वाण औदासीन्यं भजते, न च व्यापारान्तरं करोति, तस्यैव कर्मण आहुत्तिं करोति । अतोऽपर्य्यवसितः । अपर्य्यवसिते च संस्थाभावात् अच्युतमेव प्राग्नमिति न क्रियते ।

यदुक्तं, यथा अन्ये षड्हधर्म्मा स्तोत्रशस्त्रादय आवर्त्तन्ते, तद्वत् प्राग्नमप्यावर्त्तेत इति । नैतद्युक्तं, तै हि अहःसम्बद्धाः, तेषाम् अङ्गामाहुत्तिरिति स्तोत्रादीनामाहुत्तिरिति युक्तं, न हि तेऽहःसु अवसानसंयोगेन चोद्यन्ते । इह तु अवसानसंयोगेन भोजनस्य चोदना इत्युक्तो हेतुः । तस्मान्न भोजनस्याहुत्तिर्युक्तेति ।

अपि च यद्येतत् भोजनं षड्हाङ्गं भवेत्, ततः प्रधानाहुत्या आवर्त्तेत, न चैतदङ्गम् । कुतः ? । अङ्गत्वप्रख्यापकस्य कारणस्याभावात्, प्रकरणादङ्गता स्यात्, वाक्यसंयोगाद्वा, प्रत्यक्षोपकारदर्शनाद्वा । एतेषाञ्च इह न किञ्चित् कारणं पश्यामः । प्रकरणं तावत् हादग्राहस्य, न षड्हस्य । वाक्यसंयोगोऽपि संस्थिते षड्हे इति षड्हस्य संस्थायां भोजनमावष्टे, संस्थितश्चैवं षड्हो भवति, यस्य न किञ्चिदपरम् अङ्गजातं परिग्रिह्यते । न च, मध्वशनघृताशने प्रत्यक्षेणोपकुरुतः षड्हस्य । कुतः ? । निवृत्तेः करणात्, कामं यया च यावत्या च तर्पणमात्रया कर्तृणां यानि पुरस्तात् कर्माणि वर्त्तन्ते, तेषां सामर्थ्योपजननेनोपकुर्य्यात् । नातिवृत्तस्य षड्हस्य इति । यान्यपि क्रमादीनि

कारणानि, तान्यपि प्रमाणान्तरसम्बन्धमुपादाय विशेष-सम्बन्धे कारणानि भवन्ति, न केवलानि। तस्मात् षड्हा-वसानलक्षिते काले पुरुषाणां भोजनक्रिया विधीयते इत्यतो नावर्त्तते भोजनम् इति ॥ (१०।६।१०अ०) ॥

गवामयने सप्तमषडहाद्यनन्तरीयाः प्रतिमासमावृत्त्यधिकरणम्।

आवृत्तिस्तु व्यवाये कालभेदात् स्यात् ॥ ३१ ॥

गवामयने श्रूयते, चत्वारोऽभिप्लवाः षड्हाः पृष्ठाः षड्हः स मासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमः। तचैतत् चोदकेन प्राप्तं, संस्थिते पृष्ठ्ये षड्हे मध्याग्रयेत् घृतं वा इति। तत्र सन्दिह्यते, किं प्रतिमास-मावर्त्तते रसभोजनम्, उत, सर्वान्ते सकृदेव कार्यम् इति। किं पुनर्युक्तम्?। उक्तेन न्यायेन सकृदिति। सर्वान्ते क्रमो षड्हगतात् व्यापारादुपरमते, न प्राक्, पर्वाङ्गसो कृत्वापि षड्हं, पुनः षड्हाय प्रयतत एव। न चासौ षड्हः संस्थितो भवति, यदि पुनस्तदर्थं प्रयतत एव। सर्वान्ते तु न पुनः प्रयतते, इत्यतः सर्वान्ते कुर्या-दित्येवं प्राप्तम्। एवं प्राप्ते ब्रूमः, आवृत्तिस्तु व्यवाये कालभेदात्स्यात्, आवृत्तिः रसभोजनस्य स्यात्, न सकृत् क्रिया। कुतः?। निमित्तावृत्तेः, षड्हसंस्था निमित्तं, स च षड्हः पुनरावर्त्तते, तस्मिन्नावर्त्तमाने संस्था निमित्त-मावर्त्तते इत्यत आवर्त्तेत।

यदुक्तं, सर्वान्ते हि असौ षड्हादुपरतो भवति, न प्राक्, क्रत्वाऽप्यसौ पुनः तदर्थं प्रयतत एव इति । अत्राभिधीयते, यद्यप्यसौ पुनः प्रवर्त्तते, तथापि तं परिसमाप्य पुनरारभते, पुनश्च परिसमापयति, न यथोक्ते षड्हे । तत्र ह्यनुपरतस्य पृष्ठस्याहुतिः । इह चतुर्भिरभिप्रवेर्ध्यवधीयते । तेनोत्तरक्रियान्तरव्यवधानात् पृष्ठागतो व्यापारः पर्य्यवसित इति गम्यते विशेषः । न च, तस्मिन्पर्य्यवसिते क्रियान्तरं शक्यं कर्त्तुम्, उभयप्रकारस्यान्तः क्रियायाः, क्रत्वा औदासीन्यं, क्रियान्तरव्यवधानस्येत्युक्तमेव । तस्मात् प्रतिमासं सव्यवधानः पृष्ठा आवर्त्तते, तस्मिन्नावर्त्तमाने संख्यानिमित्तं भोजनमप्यावर्त्तते इति, अतः प्रतिमासमावर्त्तत इति ॥ (१०।६।११ अ०) ॥

द्वादशाहे सवितृभिरपि मध्वग्रहणाधिकरणम् ।

मधु न दीक्षिता ब्रह्मचारित्वात् ॥ ३२ ॥ (पू०)

द्वादशाहे श्रूयते, संस्थिते पृष्ठे षड्हे मध्वाग्रयेत् घृतं वा इति । तत्र संशयः, किं सवितृभिर्मधु भक्षयितव्यं, न ? इति । किं प्राप्तम् ? । नेति । कुतः ? । दीक्षिताः हि ते ब्रह्मचारिणः, ब्रह्मचारिणाञ्च मधु प्रतिषिध्यते, मधु मांसञ्च वर्जयेत् इति । तस्माच्च प्राश्नीयुरिति । ननु एतदचनं, सामान्यं प्रतिषेधं बाधेत । न बाधते इति ब्रूमः । कथम् ? । यद्यबाधमानमेतत्, द्वादशाहेऽनर्थकं भवेत्, ततो बाधेत ।

न त्वनर्थकम्। कथम्?। उभयविधं हादग्राहम् अङ्गीकृत्योभयमश्नितव्यं घृतं मधु वा, तत्र सचिवां घृतप्राशनं भविष्यति, अङ्गीने मधुनः प्राशनम् ऋत्विजाम्, एवमुभयं हादग्राहसम्बद्धं भविष्यति विषयभेदेन। न च विरुद्धस्याचारो भविष्यतीति। तस्मान्न प्राश्नीयुरिति।

प्राश्नीयेत वा यज्ञार्थत्वात् ॥ ३३ ॥ (सि०)

न चैतदस्ति, सचिवैर्मधु न भक्षयितव्यमिति, किन्तर्हि भक्षयितव्यम्। कथम्?। अविशेषेण उच्यते कर्तृमात्रस्य, उभयप्रकारमङ्गीकृत्य हादग्राहं, संस्थिते पृष्ठ्ये षडहे मध्वाश्नीयेत् घृतं वा इति। उभयं विकल्पेन, न कर्तृव्यवस्थया। तस्मात् सचिवोऽपि मधु भक्षयेयुः।

यत्सूक्तं, विषयभेदेनार्थवत्त्वात् न बाधो न्याय्यः, हादग्राहाङ्गभावस्यैवं सति न विरोत्स्यते इति। अत्रोच्यते, षडहे अतिवृत्ते सत्रसम्बद्धेऽहीनसम्बद्धे वा अविशेषेण मध्वश्नने घृताश्ने चोच्यमानेऽत्र केन व्यवस्था ब्रूमः?। विरोधेनेति चेत्। न, विषयभेदेन विधिप्रतिषेधयोः समाम्नानात्, पुरुषार्थेन प्रतिषेधः, कर्माङ्गत्वेन विधानम्। यदि च प्रतिषेधबलीयस्त्वमिहाङ्गीक्रियते, वचनमनर्थकमेव स्यात्। पक्षेऽर्थवत्तेति चेत्। न। नानाविषयत्वात्, तुल्यार्थयोर्हि तुल्यविषयोर्विकल्पो भवति, न, नानार्थयोः, नानार्थता चेहाधिगम्यते कुतः?। विधेः कर्मसाङ्गुण्यप्रयोजनत्वात्। प्रतिषेधस्यापि नियमानुष्ठानात् पुरुषस्यादृष्टसिद्धिरिति। तस्मात् प्राश्नीयुरिति ॥ (१०। ६। १२ अ०) ॥

मानसस्य दशमदहराद्यतराधिकरणम्।

मानसमहरन्तरं स्यात् भेदव्यपदेशात् ॥ ३४ ॥

(पू०)

दादशाहे श्रूयते, अनया त्वा पात्रेण समुद्ररसया प्रजापतये युष्टं गृह्णामीति प्राजापत्यं मनो यद्वै गृह्णाति इति। तत्र संशयः, किं मानसमहर्दादशाहात् अहरन्तरम्, उत, अहरङ्गम् ? इति। तत्र इह कानिचित् भेदकारणानि प्रतिभान्ति, तानि निराचिकीर्षन् आचार्य उपन्यस्यति, मानसमहरन्तरं स्यात् इति। कुतः ?। भेदेन व्यपदेशात्, दादशाहात् भेदेन व्यपदिश्यते। कथम् ?। वाग्वै दादशाहो मनो मानसम् इति दादशाहनन्तर्भूतं मानसं व्यपदिश्यति। वाग्वै दादशाहः इति वाक्संस्तवात्, मनो मानसम् इति च मनःसंस्तवात्। यथा वाङ्मनसयोर्भेदो वस्तुतोऽवगम्यते, एवमेतयोरपि दादशाहमानसयोः, यतः पृथक्त्वे सति भेदेन व्यपदेशो भवति, नान्यथा अतो भिद्यते एतदहरिति व्यपदेशाद्गम्यते।

तेन च संस्तवात् ॥ ३५ ॥ (यु० १)

इतश्च अहरन्तरमिति। कुतः ?। तेन च मानसेनाङ्गा दादशाहः संस्तूयते। कथम् ?। विधूतानि ह वै दादशाहस्य गतरात्राणि छन्दांसि, तानि मानसेनैव पाप्मानमयन्ति इति, दादशाहस्य यानि गतरात्राणि छन्दांसि, तानि मानसेनाप्नुवन्ति इति ब्रुवन् भिन्नं दादशाहात् दर्शयति।

कथम् ? । संस्तवात्, न हि तेनैवात्मना तस्य संस्तुतिर्भवति । कुतः ? । अत्यन्तभेदात् स्तुतिस्तुत्ययोः, न हि देवदत्तो देवदत्तेन स्तूयते, भिन्नैः शिरःपाण्यादिभिः संस्तूयते । तद्वदिहापि द्वादशाहो मानवेन स्तूयत इति संस्तवात् भेदोऽधिगम्यते इति ।

अहरन्ताच्च परेण चोदना ॥ ३६ ॥ (यु०२)

इतश्च अहरन्तरमेवेति गम्यते । कुतः ? । द्वादशाहिकात् अहरन्तात् परेण चोद्यते, पत्नीः संयाज्य प्राङ्ग उदित्य मानसाय प्रसर्पन्ति इति । तथहि द्वादशाहिकस्याङ्गो गुणविधिर्भवेत् द्वादशाहिकी पत्नीसंयाजान्तता स्यात् । अथ त्वहरन्तरं भवति, ततो द्वादशाहिकानामयं धर्मो नान्यस्येति न दोषो भविष्यति, अतोऽपि वैलक्षण्यात् अहरन्तरसिद्धिरिति गम्यते ।

पक्षे सङ्ख्या सहस्रवत् ॥ ३७ ॥ (आ०नि०)

परिचोदनापरिहारोऽयम् । किमियं परिचोदना ? नन्वेवं द्वादशाहः इति त्रयोदशसु अहःसु नोपपद्यते । अथोच्यते, यदा प्रमाणान्तरेण ग्रन्थः एतावति अर्थे प्रयुक्तः इति गम्यते तदा सङ्ख्यासन्निकर्षात् त्रयोदशसु गुणत्वात् प्रयोगः वेत्स्यति । यथा अतिरात्रः सहस्रम् अहानि अतिरात्रेण सहस्रसाध्येन यजेत इति अधिकेऽपि सहस्रे सहस्रग्रन्थो दृष्टः, तद्वदिहापि अधिके भविष्यति । अथ वा कर्मवचनामधेयमेतत्, द्वादशाहः इति यावन्ति कर्माणि

अङ्गीकृत्य प्रयुक्तस्यावतां वाचक इति निश्चीयते। सर्वादि प्रकरणादङ्गीकृत्य प्रयोगात् सर्वेषां वाचको भविष्यतीति न दोषः।

अहरङ्गं वाऽशुक्रौदनाभावात् ॥ ३८ ॥ (सि०)

दशमस्याङ्गो गुणस्य विधिः स्यात्, न अहरन्तरचोदना। कुतः ?। अहरन्तरप्रकल्पकस्य वचनस्याभावात्। कथम्। ? एवं तावत् श्रूयते, अनया त्वा पाप्मेन समुद्रमया प्रजापतये जुष्टं गृह्णामीति प्राजापत्यं मनो गृह्णाति इति, दशममहरङ्गीकृत्य गृह्णोदनैवा, गृह्णाति इति संस्कारविधानात्, न च संस्कारभेदे कर्मभेदो भवति, अचोदकाश्च संस्कारा इत्युक्तं, यैस्तु द्रव्यं विकीर्यते गुणस्तच्च (२।१।३५०) कर्म न प्रधानम् इति। यद्वा अंशदाभ्यो विधीयमानो न कर्म भिन्नः, यस्मिन् कर्मणि भवतः तत्परो यङ्भावाविति विज्ञायेते न कर्मान्तरे इति। यदि च अहरङ्गमेतत् भवति, न कर्मान्तरम्, एवमप्यसौ एव अदृष्टानुमानप्रसङ्गकल्पना भविष्यति, प्रकृतसम्बन्धश्च, न अप्रकृतक्रियाक्रियान्तरस्य, अतो न अहरन्तरम्। दशमे एव अहनि गुणविधिरिति।

दशमविसर्गवचनाच्च ॥ ३९ ॥ (यु०१)

इतश्च न अहरन्तरे, तत्रैव गुणविधिः। कुतः ?। दशमविसर्गवचनात्, दशमविसर्गवचनं हि भवति, एष वै दशमस्याङ्गो विसर्गो यज्ञानसम् इति। एष दशमस्य वि-

सर्गोऽन्तो यजमानसंमिति ध्रुवम्, अन्तोऽयमन्तवतो दशमस्य, न स्वतन्त्रमेतत् कर्मेति दर्शयति। तस्मादपि दशमस्याङ्गं, नार्थान्तरमिति गम्यते।

दशमेऽहन्निति च तद्गुणशास्त्रात् ॥४०॥ (यु०२)

इतश्चाङ्गम्। कथम्? एवं गुणशास्त्रं युक्तं भविष्यति, दशमेऽहनि मानसाय प्रसर्पन्ति इति, दशमेऽहनि सार्पराज्ञीभिर्कृग्भिः स्तुवन्ति इति दशमस्याङ्गः प्रधानभावेन निर्देशात् ग्रहस्याधेयभावेन, तत्स्तोत्रस्य गुणोऽयं दशमस्य, नार्थान्तरमिति गम्यते।

सङ्ख्यासामञ्जस्यात् ॥ ४१ ॥ (यु०३)

यदि च गुणोऽयम्, एवं सङ्ख्या समञ्जसा भविष्यति, द्वादशाहः इति, इतरथा, त्रयोदशस्तु द्वादशाहः इत्यसमञ्जसं सङ्ख्यावचनं स्यात्, प्रधानत्वात्। यदुक्तं, गुणस्य ग्रहसंस्कारसाध्यवद् भविष्यतीति, तदनुपपन्नम्। कुतः?। तत्र हि प्रमाणान्तरेण सङ्ख्यायावगम्यात् अधिके ग्रहसंस्कारो गौण्या वृत्त्या प्रयुक्त इति निश्चीयते। न त्विह सङ्ख्यातिरिक्ते प्रमाणमस्ति, येन गौणीयं वृत्तिराश्रीयेत। यदप्येतत् अनया त्वा पात्रेण इति वचनं, तदपि ग्रहसंस्कारविधानात् दशमेऽहनि यागाभ्यासं विवक्षते, न कर्मान्तरम् इति समधिगतम्। एवञ्चेत्, न एतत् प्रत्यक्षवचनमङ्गरन्तरप्रकल्पकं, नान्यत् प्रमाणान्तरं प्रापकं, येन सङ्ख्येयेऽतिरिक्ते शब्दप्रयोग इत्यध्यवसामः। तस्मात् न इह गौण्या वृत्त्या प्रयोग इति।

यदपि, कर्मगचनामधेयत्वात् प्रकरणबलेन तावताम् प्रतीकरणात् नामधेयरूपेण चाहत्तिर्भविष्यतीति, तदपि न युक्तं, सत्यं, कर्मगचनामधेयमेतत्, न त्वयमर्थसमन्वयेन, यादग्येतानि कर्माणि अहीभिः परिमितानि एकत्र समाहतानि इत्यनेन रूपेण तत्कर्मगचस्य नामधेयं, न वर्षानुष्ठेयमात्रेण इति, तथा हि सर्वेष्वेव कर्मनामधेयेषु अर्थसमन्वयेनानुवादभूतो नामशब्दो वर्त्तते, न लौकिकार्थान्तरसंस्कारेण परिभाषामात्रेण हुङ्गिगुणवत्। यथा, अग्निष्टोमं, यजेत:, ज्योतिष्टोम: इति। एवं हादशाहः इत्यर्थायेन नामधेयं, न अर्थाभावेन इति। तस्मात् अपरिचोदितम्।

पशुव्यतिरेके चैकस्य भावात् ॥ ४२ ॥ (यु० ४)

इतश्चाहरङ्गमिति विज्ञायते। कुतः ?। पशुव्यतिरेकेण कस्य अतिरेकं दर्शयति, न हयोः। कथम् ?। यः पशुरतिरिच्येत स ऐन्द्राग्नः कार्य्यः इति एकादशिनीं हादशाहे विधाय विकृतायामेकस्यातिरेकं दर्शयति, तत्र तावदतिरिच्यते, एको न भवति। कथम् ?। एकादश पशवः, हादश अहानि, एकस्यातिरेकं ब्रुवन् हादशैतानि अहानीति गमयति। यदि चयोदश अहानि स्युर्हयोरभावः स्यात्, नैकस्येति। तस्मादप्यहरङ्गं न कर्मान्तरम् इति।

स्तुतिव्यपदेशमङ्गेन विप्रतिषिद्धं व्रतवत् ॥ ४३ ॥ (आ० नि० १)

अस्मिन् सूत्रे इडो: सूत्रयो: परिहार उच्यते। यदुक्तं, मानसमङ्गस्तरं भेदेन व्यपदेशात्, तेन च मानसेन संस्तवात् भेद:, न हि आत्मनैव आत्मा संस्तूयते इति। अत्राभिधीयते, नैतत् विप्रतिषिद्धम्, अङ्गेनापि समुदायस्य स्तुतिर्दृष्टा, यथा महाव्रतधर्मेण संवत्सरसत्रस्य, यन्ति वा एते मिथुनाद् ये संवत्सरमुपयन्ति। अन्तर्वेदि मिथुनौ सम्भवतस्तेनैव मिथुना न यन्ति इति समुदायदोषमभिधाय तदवयवभूतस्य महाव्रतस्य धर्मेणानुनिष्टुवन् समुदायस्य अवयवधर्मेण स्तुतिं दर्शयति। लोकेऽपि अवयवधर्मेणावयवी संस्तूयत एवेति, यथा दीर्घैः कैश्चैः शोभनो देवदत्त इति। तद्वदिहापि ह्रादग्राहः संस्ताविष्यते इति न दोषः।

वचनाद्तद्धर्मत्वम् ॥ ४४ ॥ (आ० नि०२)

यदुक्तं, यत्तद्धरन्तरमेतत्, एवं ह्रादग्राहधर्मवैलक्षण्यं मानसान्नता युक्ता भविष्यति, न तदङ्गत्वे, पत्नीसंयाजान्नता भवेत् इति। अत्र वदामः, वचनात् अतद्धर्मत्वं भविष्यति, ह्रादग्राहिकाणाम् अङ्गां सामान्येन पत्नीसंयाजान्नता, विशेषेण तु दशमस्याङ्गो मानसान्नता उच्यते, पत्नीः संयाज्य प्राङ्ग उदेत्य मानसाय प्रसर्पन्ति इति, नास्ति वचनस्यातिभारः। तस्मादप्यदोषः। अतो दशमस्याङ्गो मानसमङ्गं न स्वतन्त्रम् इति ॥ (१०।६।१३ अ०) ॥

सत्रस्य बहुकर्तृकत्वाधिकरणम्।

सत्रमेकः प्रकृतिवत् ॥ ४५ ॥ (पू०)

इह द्वादशाङ्गप्रश्नतीनि सन्नाणि उदाहरणम्। तत्र संशयः, किं सत्रमेकः प्रयुञ्जीत, उत बहवः ? । किं प्राप्तम् ? एकः। कुतः ? । प्रकृतिवत् ज्योतिष्टोमे एकः कर्त्ता, तत्प्रकृतित्वात् षोडशानुग्रहाय सत्रम् एक एव प्रयुञ्जीत इति। ननु बहवः श्रूयन्ते, य एवंविदांसः सत्रमासते, य एवंविदांसः सत्रमुपयन्ति इति। उच्यते। कामिनां सत्रं विधीयते, ते च परस्परनिरपेक्षा बहव एव, ते यद्येकैकस्मिन्नपि कुर्वन्ति तथापि सत्रक्रियामभिसमीक्ष्य बहव एव कुर्वन्तीति बहुवचनं भविष्यति। यथा लोके पृथङ्नानापि कुर्वाणानां बहुवचनं दृश्यते, देवदत्तं वर्षेत्, बहवः क्षपिं कुर्युः। सत्यं चेत् सम्भवेत्, बहवो ब्राह्मणा यजेरन् इति। तथा वेदेऽपि प्रयोगदर्शनं, सत्रादुदवसाय पृथगमनीवेन यजेरन् इति एवमप्यपि आसीरन् उपेयुः इति बहुवचनं भविष्यति इति।

वचनात् तु बहूनां स्यात् ॥ ४६ ॥ (सि०)

नैतदस्ति, एको यजेत, न बहवः इति। किन्तर्हि ? बहवो यजेरन्। कुतः ? । वचनात्, वचनमिदं भवति, आसीरन् उपेयुः इति, बहुत्वसम्बद्धः प्रयोगो विधीयते, स प्रत्यक्षवचनात् षोडशप्राप्तामेककर्तृकतां बाधेत इति।

अपदेशः स्यादिति चेत् ॥ ४७ ॥ (आ०)

यदुक्तं, सामान्यक्रियासम्बन्धमभिसमीक्ष्य लोकवत् बहुवचनशब्दप्रयोगो भविष्यति, यथा क्षपिं कुर्युरिति,

वेदेऽपि दर्शनं, पृष्ठ्यमनीयेन यजेरन् इति बहुवचनं भवति, एवमत्रापि इति। तत्परिहर्तव्यम्।

नैकव्यपदेशात् ॥ ४८ ॥ (आ० नि०)

नैतत् सत्ये उपपद्यते, एककर्तृकम् इति। कुतः ?। एकव्यपदेशात्। कथम् ?। एवमाह, एष वै कुणपमक्ति यः सत्ये प्रतिगृह्णाति। एक एव यजेत इति, सत्रमपोह्य अन्यत्रैककर्तृकतां विदधत् तस्य बहुकर्तृकतां गमयति। यत्तु लोकवदिति, तत्र युक्तं, लोकेऽन्यतः प्रवृत्तस्यार्थस्य ऽनुवादभूतः शब्द उच्चार्यमाणः सामान्यक्रियासम्बन्धाभिसमीक्षया उच्चरित इति गम्यते। यदपि उदवसानीयवदिति, तदपि उदवसानीये युक्तं, तत्र हि भिन्नानि उदवसानानि उपलक्ष्य क्रियामात्रं विधीयते, तद्बहुत्वस्य समानकर्तृकत्वादेव प्राप्तमनूद्यते इत्युक्तमेव। इह तु शब्दपूर्विका क्रियाप्रवृत्तिः, शब्दश्च बहुत्वविशिष्टं प्रयोगं स्वाश्रयैरभिसम्बन्धयति, अतः शब्दप्रामाण्यादुपादीयमानायां क्रियायां बहुत्वं विवक्षितमिति बहवः प्रयुञ्जीरन्निति।

सन्निवापञ्च दर्शयति ॥ ४९ ॥ (यु० १)

इतश्च बहव एव यजेरन् इति। कुतः ?। सन्निवापदर्शनात्, बह्वीनाम् अग्नीनाम् एकत्र सन्निवापमाह, यद्यभिः यद्भिर्यजमानः सन्निषेयेरन्, सान्निध्यादि होष्यन्तः सन्निषेयेरन् इति। यदि संहत्य कुर्वन्ति, एवमग्नीनां सन्निवाप उपपद्यते। यत्र तु एकैकशेन कुर्युः, सन्नि-

वापदर्शनं नोपपद्यते । तस्मादपि गम्यते बहूनां सत्र-मिति ।

बहूनामिति चैकस्मिन् विशेषवचनं व्यर्थम् ॥ ॥ ५० ॥ (यु० २)

इतश्च पश्यामः सम्भूय प्रयोग इति । कुतः ? । एवं श्रूयते, यो वै बहूनां यजमानानां गृहपतिः, स सत्रस्य प्रत्येता, स हि भूयिष्ठामृद्धिमाप्नोति इति, एकस्मिन् गृह-पतौ बहुभिर्यजमानैः सत्र प्रवृत्ते फलविशेषं द्योतयन् बहूनां सहप्रयोगं दर्शयति । इतरथा एकस्मिन् यजमाने कर्त्तु-रेकत्वात् फलैकत्वाच्च सामान्यविशेषभावानुपपत्तेः फल-विशेषवचनं व्यर्थं स्यात्, अस्ति तु फलविशेषवचनम् । तस्मादपि गम्यते बहव एव यजेरन्निति ॥ (१० । ६ । १४ अ०) ॥

अन्ये यजमानानामेव ऋत्विक्त्वाधिकरणम् ।

अन्ये स्युर्ऋत्विजः प्रकृतिवत् ॥ ५१ ॥ (पू०)

इह सत्राख्येवोदाहरणम् । तेषु बहवः कर्त्तार इत्यु-क्तम् । 'इदम् इदानीं सन्दिह्यते, किं त एव सत्रिण ऋत्विजः, उत, अन्ये उपादातव्या ? इति । किं प्राप्तम् ? । अन्ये उपादातव्या ऋत्विजः । कुतः ? । ज्योतिष्टोमे हि प्रकृतौ अन्ये कर्त्तार उपादेयाः समाम्नाताः, तद्वदिहापि

मत्रिभिः प्रकृतिवत् कुर्वाणैः चोदकानुग्रहाय अन्ये एवोपादेया इति। एवं प्रकृतिवत् कृतं भविष्यतीति।

अपि वा यजमानाः स्युर्ऋत्विजामभिधानसंयोगात् तेषां स्यात् यजमानत्वम् ॥५२॥ (सि०)

नैतदस्ति, अन्ये ऋत्विज इति, यजमानाः एव ऋत्विजः स्युः। कुतः?। ऋत्विजामभिधानसंयोगात्, यजमानसंस्कारो हि दीक्षापदार्थोऽध्वर्युादिसमाख्यासंयोगेन कर्मनिमित्तेन प्रसिद्धिरूपेणाभिधाय विधीयमानो यजमानानां तेषां आध्वर्यवादिसम्बन्धमवबोधयति। कथम्?। यदि ते तान् पदार्थान् कुर्वन्ति एवं ते नैमित्तिकीभिराख्याभिर्युज्यन्ते नान्यथेति, अतोऽवगम्यते अस्ति तैः पदार्थैरभिसम्बन्ध इति। किं तद्वचनम्?। अध्वर्युर्दीपयति दीक्षयित्वा ब्रह्माणं दीक्षयति ततो होतारं तत उद्गातारम् इत्युपक्रम्य सर्वर्त्विजः उपक्रान्ता दीक्षासम्बन्धेन। तस्माद्गम्यते यजमाना एव आर्त्विज्ये स्युर्नान्ये इति।

ऋत्संस्कारो वचनादाधात्ववदिति चेत् ॥ ॥५३॥ (पा०)

इति चेत् मन्यसे, यजमाना एव ऋत्विजः स्युरिति, तन्न युक्तं, प्रकृतौ हि यजमानादन्ये प्रकृतिवदिहापि यज[illegible] व्यपदिश्यते,

केवलं तु पूर्वोक्तस्य परिहारो वक्तव्यः, स उच्यते, कर्तृसंस्कारो वचनादाधानवत् भविष्यति । कथम् ? । एतावदेव श्रूयते, अध्वर्युर्दर्भपवित्रं दीक्षयित्वा ब्रह्माणं दीक्षयति इति, तत् यदि भिन्ना अपि कर्त्तारो भवन्ति तान् आत्मीयाभिः सञ्ज्ञाभिरुपलक्ष्य वचनसामर्थ्यात् दीक्षासंस्कारस्तेषां विधीयते इति नानुपपन्नं, आधानवत्, यथान्यत्राप्यृत्विजां संस्कारो विधीयते आधाने, यस्तं श्वोऽग्निमाधास्यत् स्यात् स एतां रात्रिं व्रतचरेत् इति, न मांसम् अश्नीयात् न स्त्रियमुपेयात् इति वचनादध्वर्योर्नियमो विधीयते, तथा ज्योतिष्टोमे सर्वत्रैव उपवसन्ति इति ऋत्विजामुपवासो विधीयते, तद्वदिहापि ऋत्विजामेष संस्कारो भविष्यति ।

स्याद्विशये तच्छायत्वात् प्रकृतिवत् ॥ ५४ ॥
(आ० नि०)

नैतदस्ति, अन्ये ऋत्विज इति, किन्तर्हि यजमाना एव ऋत्विजः स्युः । कुतः ? । एतस्मिन् संशये, त एव वा यजमाना ऋत्विजः, अन्ये वा भिन्नाः ? इति, त एवेति न्याय्यम्, उक्तोऽत्र न्यायः, अपि वा यजमानाः स्युर्ऋत्विजामभिधानसंयोगात् इति, अनेन न्यायेन पश्यामः, ते एवेति । यदुक्तम्, आधानवत्तत्संस्कार ऋत्विजां भविष्यति इति, तदनुपपन्नम् । कथम् ? । अप्राकृतप्रयोजना वा दीक्षा ऋत्विजां विधीयते, प्रकृतिवद्वा प्राकृतकार्यैका सती यजमानबहुत्वात् क्रमपरतया सङ्घो-

स्थैत। प्राम्नायाः सङ्कीर्त्तनं लघीयः, क्रममात्रविधानात्, ऋत्विक्संस्कारे सति अदृष्टकल्पना, अधिकारार्थविधानच्च। तस्मात् प्राम्नायाः चोदकेन सङ्कीर्त्तनं, न अप्राप्तविधानमिति। यत्तु, यथा ऋत्विजामुपवासविधानम्, आधातुश्च व्रतविधानं, तद्वदिहापि इति, तत्र युक्तं, विप्रतिषिद्धं वचनम्, ऋत्विज उपवसन्ति, स तां रात्रिं व्रतश्चरेत् इति। न च तत्र अपूर्वत्वात् प्राम्नायश्रद्धा। तस्मात् तत्र विधानम्।

स्वाम्याख्याः स्युर्गृहपतिवदिति चेत् ॥ ५५ ॥

(आ०)

परिचोदनासूत्रमेतत्। अथ कस्मात् न स्वाम्याख्याः एता अध्वर्यूणां भवन्ति गृहपतिवत्? इति। किमेवं भविष्यति?। एवं चोदकप्राप्ताऽन्यकर्तृकता न बाधिता भविष्यति। अध्वर्यूणाञ्च समाख्या गृहपतिवत् यजमानाभिधानतयाऽर्थवत्यो भविष्यन्तीति खिते अर्थे सूत्रेण परिचोदयति।

न प्रसिद्धयदृष्टत्वादसंयुक्तस्य तद्धर्मेण ॥ ५६ ॥

(आ० नि०)

नैतत् युक्तं, स्वाम्याख्या एता गृहपतिवत् इति। कुतः?। प्रसिद्धयदृष्टत्वात्, आध्वर्यवादि कर्म कुर्वाणेषु हि कर्तृषु कर्मनिमित्ता एता आख्याः प्रसिद्धाः, न यजमानं कुर्वाणेषु, यजमानानाम् आभिः क्रियाभिर-

संयुक्तानां भविष्यन्तीत्यनुपपन्नम्। कथं गृहपतिरित्याख्या?। उच्यते, असंयुक्तस्य ऋत्विग्धर्मेण स्वामिन एवाख्या गृहपतिरिति। अपि च अवयवप्रसिद्ध्यापि गृहपतियज्ञस्य पतिर्वाच्य इति यजमानाभिधेयता उपपद्यते। प्रकृतावपि स्वामिनि चायं प्रयुक्तः, गृहपतिर्यजेत इति। न त्वध्वर्युर्वा स्वामिनि केनचिदपि प्रकारेण तत्क्रियासंयुक्ता उपपद्यन्ते, इत्यन्यक्रियासम्बन्धात् ता भिद्यन्ते इति। बह्वनामिति च तुल्येषु विशेषवचनं नोपपद्यते।

इतश्च आर्त्विजेषु यजमाना एव। कुतः?। एवमाह, यो वै बह्वनां यजमानानां गृहपतिः सचस्व प्रत्येता स हि भूयिष्ठामृद्धिमाप्नोति इति एकस्मिन् गृहपतिरितिविशेषवचनम् ममभानत्वे सति उपपद्यते, नान्यथा, यदि सर्वे गृहपतिकर्म कुर्युर्न कर्मान्तरं, ततो विशेषाभावात् गृहपतौ विशेषवचनानुपपत्तिः स्यात्। अथ तु इतरे उभयं कुर्वन्ति, गृहपतिर्यजमानमेव, ततो विशेषवचनं युक्तं भवति। तस्माद्विशेषवचनात् ते एव ऋत्विज इति गम्यते।

दीक्षितादीक्षितव्यपदेशश्च नोपपद्यते अर्थयोर्नित्यभावित्वात् ॥ ५७ ॥ (सि० यु० १)

इतश्च स्वयंकर्तृकाणि ऋत्वाधीत्यवगम्यते। कुतः?। दीक्षितादीक्षितव्यपदेशात्, एवमाह, दीक्षिताः सर्वेयज्ञे अदीक्षिता अदीक्षैर्यजन्ति इति, एतौ च नियतावेवार्थौ, दीक्षिताः स्वार्थं यजन्ते, बाह्मणाय अपि अदी-

क्षिता याजयन्ति इति, अहीने सत्रे चेतयोरर्थयोर्विशेषाभावात् व्यपदेशानुपपत्तिः स्यात्। अथ तु सत्रे यावत्कार्यं तत्सर्वं दीक्षितेरेव क्रियते, अहीने त्वदीक्षितैः, ततो व्यपदेश उपपद्यते, नान्यथा। यतो व्यपदेशादवगच्छामः, अस्ति सत्रे स्वयंकर्तृत्वमिति।

अदक्षिणत्वाच्च ॥ ५८ ॥ (सि० यु० २)

इतश्च स्वयंकर्तृकं सत्रम्। कुतः ?। अदक्षिणत्वात् अदक्षिणानि सत्राणि आहुः, न ह्यत्र गौर्हीयते न वासो न हिरण्यमिति दक्षिणाभावदर्शनं स्वयंकर्तृकत्वे उपपद्यते, नान्यथा, परकर्तृकत्वे हि दक्षिणाभावो नोपपद्यते, न हि कश्चित्, ऋते स्वार्थात्, परार्थे परः प्रवर्तते। तस्मादपि गम्यते स्वयंकर्तृकाणि सत्राणीति ॥ (१० । ६ । १५ अ०) ॥

सत्राहीनयोर्विशेषाधिकरणम्।

द्वादशाहस्य सत्रत्वमासनोपाविचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् ॥ ५९ ॥ (सि०)

द्वादशाह एवोदाहरणम्। अत्रच पूर्वं सत्रमहीनश्च द्वादशाह इति। तत्रेदानीं द्विप्रकारस्य संशयमन्वाख्यायते, एवंलक्षणको द्वादशाहः सत्रम्, एवंलक्षणको

ऽहीन इति। तद्विवेकज्ञानार्थमिदमुच्यते, आसनोपायि-चोदनया यजमानबहुत्वेन च सत्रत्वमवगम्यते। एते चोदने आसते, उपयन्ति इति हि नित्यं सत्रसम्बन्धे दृष्टे, य एवं-विदांसः सत्रमासते, य एवं-विदांसः सत्रमुपयन्ति इति। यजमानबहुत्वेन च, चतुर्विंशतिपरमाः सप्तदशावराः सत्रमासीरन् इति। तत्सहचरितलिङ्गदर्शनात् सहचरिते प्रत्ययो भवतीति।

यजतिचोदनादहीनत्वं स्वामिनां चाऽस्थितपरिमाणत्वात् ॥ ६० ॥ (सि०)

अत्र किंलक्षणकोऽहीनः ? इति, तदुच्यते, यत्र यजतिचोदना, अनियतत्वं च कर्तृपरिमाणं तत्र अहीनः इति निश्चीयते। अहीनानां यजतिचोदनया विधानं, हिरण्येन यजेत इत्येवमादि। कर्तृपरिमाणत्वं एषामनियतं, सत्राणान्तु नियतं परिमाणं बहवः। एवंलक्षणस्य च लक्षणे लक्षितं प्रयोजनं नान्यमृग्यमिति ॥(१०।६।१६ अ०)॥

पौण्डरीके सकृदेव दक्षिणादानाधिकरणम्।

अहीने दक्षिणाशास्त्रं गुणत्वात् प्रत्यहं कर्म भेदः स्यात् ॥ ६१ ॥ (पू०)

अस्ति पौण्डरीक एकादशरात्रः, पौण्डरीकेण एकादशरात्रेण स्वाराज्यकामो यजेत इति। तत्र श्रूयते, शतं पौण्डरीके दद्यात् अश्वसहस्रमेकादशम् इति। तत्र

सन्दिह्यते, किं प्रत्यङ्गं अयुतम् अश्वसहस्रञ्च दातव्यम्, उत, एकमेवायुतमश्वसहस्रञ्च सकृत् ? इति किं प्राप्तम् ? अङ्गीने दक्षिणाशास्त्रं प्रत्यङ्गं भिद्येत । कुतः ? । गुणत्वात् दक्षिणायाः, प्रधानत्वाच्च अङ्गां, समुदायशब्देन समुदायीनि अङ्गानि उपलक्ष्य दक्षिणा गुणो विधीयमानः प्रतिप्रधानं भिद्येत, यथा गणाय स्थानम्, उपलेपनं वा विधीयमानं गणिनां भवति, एमचापि द्रष्टव्यम् । प्रतिकर्मावसायी च चोदक एवमनुग्रहीष्यते, दक्षिणाभूयस्त्वाच्च फलभूयस्त्वं भविष्यति । अतोऽवगम्यते भेद इति ।

सर्वस्य वैककर्म्यात् ॥ ६२ ॥ (१ आ०)

न चैतदस्ति, प्रत्यङ्गं दक्षिणाभेद इति, एकमेवायुतं सहस्रं च दीयते । कुतः ? । ऐककर्म्यात्, एकं हि दक्षिणानां कार्यम्, ऋत्विगानमनम् । आनतिश्च साङ्गक्रतुनिर्हृत्तये श्रुतेति अन्तरा न तया प्रयोजनमस्तीति न भूयः क्रियते । यत्तु, अङ्गभूयस्त्वेन फलभूयस्त्वमिति तत् अङ्गत्वे प्रज्ञाते भवति, नान्यथा । समुदायाङ्गञ्च दक्षिणा, न अवयवाङ्गमित्युक्तम् । अथ यदुक्तं, प्रतिकर्मावसायी चोदकः प्रतिकर्म प्रापयति, इति । प्रत्यक्षवचनात् समुदायाङ्गीकरणेन च दक्षिणानां विधानमिति चोदको बाधित इति न दोषः ।

पृषदाज्यवद्वाऽङ्गां गुणशास्त्रं स्यात् ॥ ६३ ॥ (१ आ० नि०)

न चैतत्, सकृदेव दातव्यमिति, किं तर्हि, भेदेन ।

कुतः ? । प्रत्यङ् दक्षिणानां प्राप्तानामयं विशेष उच्यमानः प्रत्यङ्गमेव भवितुमर्हतीति । घृतदाज्यवत्, यथा घृतदाज्ये नानुयाजान् यजति इति घृतस्य गुणो विधीयमानः प्रत्यनुयाजं भिद्यते, एवमत्रापि द्रष्टव्यमिति ।

ज्योतिष्टोमस्यतु दक्षिणाः सर्वासामेककर्मत्वात् प्रकृतिवत् तस्मान्नासां विकारः स्यात् ॥

६४ ॥ (२ आ०)

न चैतदस्ति, भेद इति, किन्तर्हि, तन्त्रेण सकृदेव । कथम् ? । ज्योतिष्टोमो हि दक्षिणाः साङ्गं कर्मराशिमङ्गीकृत्य दीयन्ते, तथाभूतानाञ्च तासां समुदायानर्थानां प्राप्तानामयं विशेष उच्यते, सहस्रमयुतम् इति, विशेष उच्यमानः, या इह दक्षिणा दीयन्ते, तासामयं विकार इति गमयति, एकत्वम् आनर्तेः, न वारयति । तस्मात्सकृत् दातव्यमिति । यत्तु, अनुयाजवत् इति, युक्तं, यत् अनुयाजेषु द्रव्यस्य भेद इति, यागे हि द्रव्यं गुणभूतं श्रूयते, तत् यागानां भेदादन्यस्य क्रियमाणं न अन्यस्य उपकरोतीति भिद्यते । इह त्वेका आनतिरित्युक्तम् । तस्मादिदमो दृष्टान्त इति ।

द्वादशाहे वचनात् प्रत्यहं दक्षिणाभेदस्तत्प्रकृतित्वात् परेषु तासां संख्याविकारः स्यात् ॥

६५ ॥ (२ आ० नि०)

न चैतदस्ति, सकृद्दातव्यमिति । प्रत्यक्षमयं विशेषो भिद्यते । कुतः ? । दाद्याहे हि प्रत्यक्षं वचनम्, अन्वहं दाद्यमयतं ददाति इति । पौष्करीकस्य दाद्याहप्रकृतिः, तस्मात् पौष्करीके प्रत्यक्षं चोदकप्राप्ता प्रसन्नानां दक्षिणानामयं विशेष उच्यमानः तस्यैव कर्मावयवसम्बन्धानां विकार इति गम्यते, ततो भेदेन दक्षिणानां विशेष इति ।

परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ॥ ॥ ६६ ॥ (सि०)

न चैतदस्ति, दक्षिणाभेद इति, किन्तर्हि, सकृदेव दक्षिणा दीयेतेति । कुतः ? । परिक्रयाविभागात्, समस्ता दक्षिणा विक्रियेरन्, क्रतवं हि क्रतुमङ्गीकृत्य दक्षिणा विधीयन्ते । कथम् ? । तावतः पुरुषार्थत्वात् । यत् फलवत्, तत् पुरुषस्य चिकीर्षितं, तच्च कुर्वाणस्य, सहायान् उपाददानस्य अयं विशेष उच्यते परिक्रयः । न चावयवः फलवान्, समुदायात् फलनिष्पत्तेः, समुदायं चाङ्गीकृत्य परिक्रयः क्रियमाणः, वा समुदायनिर्वृत्तेः, परिक्रयः क्रत इति अन्तरा न भूयः क्रियते ।

अपि च, पौष्करीकशब्दसंयोगेन परिक्रयविशेष उच्यमानः तच्छब्दवाच्यस्यैव भवतीति गम्यते, समुदायश्च पौष्करीकशब्दवाच्यो न अवयवः, स हि समुदायशब्देन लक्ष्यते, तत्र लक्षणैव दोषः । असम्भवे हि लक्षणा आश्रीयते, न च, इहासम्भवः । अतः समुदायमङ्गीकृत्य सकृदेव ऋत्विजो क्रियेरन्निति । तस्मात्सकृत्परिक्रय इति, सकृद्दाने च

प्रयोगवचनानुपपत्तेः, प्रयोगप्राङ्भावाच्च मन्त्रविषयता याज्ञ-
खेति, तस्मादप्येतदेव न्याय्यमिति।

भेदस्तु गुणसंयोगात् ॥ ६७ ॥ (आ० नि०)

यदुक्तं, दाक्षायणप्रकृतित्वात् पौण्डरीकस्य, तत्र च दाक्षायणे दधिचाभेदात् तदाभूताया एवेह विशेष उच्यते इति, तत् परिहर्तव्यम्। अत्रोच्यते, तदाप्येकत्वात् क्रतोः, एक एव परिक्रयः। भेदस्तु वचनात् सुत्या सम्बन्धप्रयोजनो दधिचासंस्कारप्रयोजनश्च, न तस्मिन् भिद्यमाने परिक्रयैकत्वं भिद्यत इति॥ (१०।६।१७ अ०)॥

पौण्डरीके सर्वासां दधिचानां विभज्य नयनाधिकरणम्।

प्रत्यङ्गं सर्वसंस्कारः प्रकृतिवत्सर्वासां सर्वशेषत्वात् ॥ ६८ ॥ (१ म पू०)

पौण्डरीक एवोदाहरणम्। तत्रेतत्समधिगतं, सकृदेव परिक्रय इति। अस्ति तु प्रकृतौ, माध्यन्दिने सवने दधिचा नीयन्ते इति। तत्र संशयः, किं सर्वासां कार्त्स्न्येन प्रत्यङ्गं नयनम्, उत, सञ्चयनम्, अथ वा प्रविभज्य नयनम्? इति। किं प्राप्तम्?, प्रत्यङ्गं सर्वासां संस्कारः स्यात्। कुतः?। प्रकृतिवत्। प्रकृतौ हि सकला दधिचा तस्मिन् काले संस्कृताः, इहापि तद्वदेव सकलाः संस्कर्तव्या इति। कथम्?। अङ्गात् प्राधान्यात्, तद्गुणभावाच्च दधि-

धानां, सर्वा एताः सर्वेषाम् अङ्गां शेषभूताः, शेषभूतस्य चार्थस्य यः संस्कारः, स तेन तेन अङ्गा प्रयुज्यते इति, तस्मात् प्रत्यङ्गं सर्वसंस्कारः।

एकार्थत्वान्नेति चेत् ॥ ६६ ॥ (२ य पू०)

न चेतदस्ति, प्रत्यङ्गं सर्वसंस्कारः इति, किन्तर्हि सकृदेव संस्कारः स्यात्। कुतः ?। एकार्थत्वात् दधिधानाम्, एकं कार्यम् आनमनं, तासाञ्च नयनादिसंस्कारसंस्कृतानां प्रत्यर्पणं कार्यम्, एकस्मिन्नपि च अहनि तत्संस्कारसंस्कृतासु दीयमानासु कृतः चोदनार्थं इति भूयः संस्कारेण प्रयोजनं नास्ति। तस्मात् सकृत् संस्क्रियेरन्निति।

स्यादुत्पत्तौ कालभेदात् ॥७०॥ (२ य पू० नि०)

नचैतदस्ति, सकृत्संस्कार इति, किन्तर्हि प्रत्यहम्। कुतः ?। उत्पत्तौ कालभेदात्, उत्पत्तौ दधिधानां विधिष्टकालसम्बन्धः श्रूयते, तस्मात् विष्टुभो लोके माध्यन्दिने सवने दधिधा नीयन्ते इति, सर्वाश्चैता सर्वेषाम् अङ्गां शेषभूताः, तेषाञ्चाङ्गां माध्यन्दिनानि सवनानि भिद्यन्ते, तत्र च अगम्यमानविशेषत्वात् यस्य माध्यन्दिने सवने न संस्क्रियेरन्, तस्यैव संस्कारलोपः स्यात्, प्रयोगभेदात्। न च अन्यतरच्च संस्क्रियमाणा अन्यच्च संस्कृता भवन्ति, तस्मात् भेदेन संस्क्रियेरन्निति।

विभज्य तु संस्कारवचनात् दाक्षायणवत् ॥७१॥ (२ य सि०)

न चैतदस्ति, समस्तानां प्रत्यङ्संस्कार इति, किन्तर्हि विभज्य संस्कुर्युरेवम्। कुतः?। वचनात्, द्वादशाहे प्रत्यङ्नयनादिसंस्कारो वचनात् क्रियते, अन्यङ् द्वादशाहं ददाति इति। पौष्करीकस्य द्वादशाहप्रकृतिः, न ज्योतिष्टोमप्रकृतिः, तस्मात् परिक्रियैकत्वेऽपि सति वचनात् भेदेन संस्कार इति॥ (१०। ६। १८ अ०)॥

मनोः [illegible]: इत्यनेन यावदर्थत्वमुपादानाधिकरणम्।

लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्यात् लिङ्गस्य सर्वगामित्वादाग्नेयवत्॥ ७२॥ (पृ०)

क्वचित् कर्मविशेषे श्रूयते, मनोः ऋचः सामिधेन्यो भवन्ति इति। तत्र संशयः, किं यावत्यो मनुलिङ्गा ऋचः, ताः सर्वा दाशतयीभ्यः आनीय सामिधेनीषु विनियोक्तव्याः, उत काश्चिदेव, न सर्वाः? इति। किं प्राप्तम्?, सर्वा एवंलिङ्गा उपादेयाः। कुतः?। लिङ्गस्य सर्वगामित्वात्, इदैतावत् श्रूयते मनोः ऋचः सामिधेन्यो भवन्ति इति। मनुशब्दसंयोगो हि लक्षणम् ऋचामुपादीयमानानां, मनुसम्बन्धेन च शब्द उपलक्षयन् यावतीषु सम्भवेत्, तावतीः अविशेषात् प्रकल्पति उपलक्षयितुम्, एतच्च वचनं लिङ्गमात्रसम्बन्धेन विनियोजकं, न इयत्तापरिच्छिन्नानां विशेषकम्। तस्मात् अविशेषात् सर्वास्तल्लिङ्गवत्यः उपादेयाः, आग्नेयवत्, यथा, ऋत्वीधाणामाग्नेयेन संवत्सर-

मुपधाने, आसीत सूक्तेन सूक्तस्य अविच्छेदाय इति आग्नेयेन सूक्तेनेत्युक्तं, यावन्ति आग्नेयानि सूक्तानि दाशतयानि, सर्वैरिष्टका उपधीयन्ते, एवमिहापि मन्त्रलिङ्गाभ्यां सामिधेनीकार्यं कर्त्तव्यमिति। यथा वा, अहर्गणे ऋजीषमश्नु प्राश्नाति इति, सर्वेषामङ्गां यत् ऋजीषम्, अविशेषात् तत् सर्वं प्राश्नाति, तद्वदिहापि अविशेषात् सर्वासामुपादानमिति।

यावदर्थं वा अर्थशेषत्वादल्पेन परिमाणं स्यात् तस्मिंश्च लिङ्गसामर्थ्यम् ॥ ७३ ॥ (सि०)

न चैतदस्ति, सर्वासां मन्त्रलिङ्गानां दाशतयीनामागम इति, किन्तर्हि यावदर्थम् उपादेया इति। कुतः ?। अर्थशेषत्वात्, कार्यशेषभावेन हि सामिधेनीनामुपादानं, तच्च कार्यम् अल्पाभिरपि सिध्यतीति, सिद्धत्वात्कार्यस्य यद्यपि लक्षिताः सन्ति अपरा ऋचः, तथापि प्रयोजनाभावात् नैवोपादीयन्ते इति।

ननु कार्यशेषभावः सर्वत्र वाचनिकः, इहापि प्रत्यक्षवचनात् लिङ्गपरिच्छिन्नाः सामिधेन्यो विधीयन्ते इति सर्वासां विधानं भविष्यति इति। अत्राभिधीयते, सत्यं सर्वत्र वाचनिकः शेषभावः, न त्विह सामिधेन्यो विधीयन्ते, किन्तर्हि चोदकप्राप्तानाम् इयत्तापरिच्छित्तये केवलमनेन विशेष उच्यते, मनोः ऋचः इति। सोऽयं विशेष उच्यमानो यावत्य उपलक्षिताः, ता एव विशेषलक्षितार्थत्वात् आवर्त्तन्ते, नापरा अपि तल्लिङ्गाः प्रसज्यन्ते।

तस्माल्लिङ्गवतीनां नियमेनानुपादानं न सर्वासाम् इति। न च, लिङ्गवतीनां बाधात् बुद्धानुरोधेन प्रधानाकृत्तिर्न्याय्या। एतच्च लाघवं प्रयोगप्राशुभावश्च भविष्यति इति। अपि च अस्मिन् पक्षे लिङ्गमपि समर्थमेव। कथम्?। लिङ्गं हि लक्षणत्वेन साभिधेनीनामुच्यते। तच्च यद्यपि न तल्लिङ्गाः सर्वा उपादीयन्ते, यास्विह प्रयुज्यन्ते ताः तल्लिङ्गा एव नान्यलिङ्गाः, तथापि लिङ्गमनुरुद्धीतमेव न बाधितमिति। तस्माद् यावदर्थमुपादानं न सर्वासामिति।

आग्नेये कृत्स्नविधिः ॥७४॥ (१ म आ० नि०)

यदुक्तं, यथा आग्नेयैः सूक्तैरिष्ट्वा उपदधाति इत्युक्ते सर्वाणि लिङ्गविशिष्टानि उपादीयन्ते, न कानिचित्, एवमत्रापि द्रष्टव्यम् इति, तत्परिहर्त्तव्यम्। अत्रोच्यते, युक्तम् आग्नेयेषु कृत्स्नविधानम्। कुतः?। इष्टकाबहुत्वात्, प्रतिसूक्तम् उपदधाति इति वचनात्, बह्वीनामुपधेयानां सूक्तात्पत्वात् कात्स्न्यनोपादानमविरुद्धम्, इह तु इयत्तापरिमितानां विशेष उच्यते, इत्युपदिष्टो हेतुः। तस्मादयम् इह अदृष्टान्त इति।

ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिः स्यात् ॥७५॥ (२ य आ० नि०)

यदप्युक्तम् अहर्गणे यथा ऋजीषस्य कृत्स्नस्य अग्नेः प्राग्रहणम्, एवमत्रापि अविशेषात् सर्वासामुपादानम् इति, तत् परिहर्त्तव्यम्। अत्रोच्यते, ऋजीषस्य प्रधानत्वात् युक्तम्, ऋजीषस्य अविशेषात् प्रतिपत्तिरियम् अभिधीयते,

सा सर्वस्य ऋजीषस्य स्यात्, यस्य न क्रियेत, तस्य संस्कार-परिलोपः स्यात्। तस्मात् सर्वेषामङ्गां यत् ऋजीषं, तत् सर्वं प्राप्यते। इह तु अर्थशेषत्वादित्युपदिष्टो हेतुः। तस्मात् विषमम् एतत् ऋजीषेणेति ॥ (१०।६।१६ अ०) ॥

वाससि मानोपावहरणयोरनुष्ठानाधिकरणम्।

वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात् ॥ ७६ ॥

ज्योतिष्टोमे मानोपावहरणे समाम्नाते। तत्र संशयः, किं यत्र क्वचित् मानं, येन केनचित् उपावहरणं कार्य्यम्, उत, वाससि मानं वाससा चोपावहरणम्? इति। किं प्राप्तम्?, अर्थात् यत्र क्वचिन्मानं, येन केनचिदुपावहरणं। एवञ्च अनियमे लाघवं प्रयोगप्राशुभावश्च भविष्यति इति।

एवं प्राप्ते ब्रूमः, वाससि मानं वाससा च उपावहरणञ्च कार्य्यम्। कुतः?। वचनात् वचनमिदं भवति, वाससि मिनोति, वाससा च उपावहरति इतिवचनस्य सामर्थ्यात् नियम्येत ॥ (१०।६।२० अ०) ॥

अथ वा, नैवात्र संशयः, वचनात् वाससि मानं वाससा चोपावहरणम्, एवं प्राप्तम् उत्तरविवक्षया कीर्त्यते, विशेषं चिन्तयितुम्। यच्च प्राप्तम् उत्तरविवक्षया कीर्त्यते, न तत्र पूर्वोत्तरपक्षाभ्यां प्रयोजनमिति।

Archive Collection

अहर्गणेऽपि वासीनरोत्पादनाधिकरणम् ।

तत्राहर्गणेऽर्थादासः प्रकृतिः स्यात् ॥ ७७ ॥

अस्ति ह्यादेशः, तत्र चोदकप्राप्तम् उपावहरणं, वाससा उपावहरति इति । तत्र संशयः, किमुपावहरणार्थम् अन्वहास उत्पाद्यम्, उत न ? इति । किं प्राप्तम् ?, नोत्पाद्यम् । कुतः ? । न वचनमस्ति, अन्यत् भेदेनोत्पाद्यमिति, वचनाद्धि न प्रतीमो भेदेन उत्पत्तिं तस्मात् न उत्पाद्यमिति ।

एवं प्राप्ते ब्रूमः, अहर्गणे अर्थादासः उत्पाद्यम् । कस्मात् ? । अहर्बहुत्वात्, बह्वनि अहानि, तत्र चोदकेनैतत् प्राप्यते, वाससा उपावहरति इति । भेदेन च अनुत्पाद्यमाने उपावहरणार्थं एव न सिध्येत् । तस्मात् उत्पादयितव्यमिति ॥ (१० । ६ २१ अ०) ॥

उपावहरणार्थमेव वासीनरोत्पादनाधिकरणम् ।

मानं प्रत्युत्पादयेत् प्रकृतौ तेन दर्शनादुपावहरणस्य ॥ ७८ ॥ (पू०)

तत्रैवाहर्गणे चिन्त्यते, उक्तमेतत्, अर्थात् वास उत्पाद्यम् इति । तत्र संशयः, किं मानं प्रति उत्पाद्यम्, उत उपावहरणं प्रति उत्पाद्यम् ? इति । किं प्राप्तम् ?, मानं प्रति उत्पाद्येत । कुतः ? । प्रकृतौ तेन दर्शनादुपावहरणस्य, ज्योतिष्टोमे यस्मिन् मीयते तेनैव उपावहरणं

क्रियते, प्रकृतिवच्च विकृतौ, चोदकानुग्रहाय, तस्मिन्नेव काले उत्पाद्यमिति।

हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ॥ ७९ ॥

(सि०)

न चेतदस्ति, मानं प्रति उत्पाद्यम् इति, किन्तर्हि, हरणं प्रति उत्पाद्यम्। कथम्? श्रुत्यसंयोगात्, न हि श्रूयते, मानं प्रति उत्पाद्यम् इति। श्रुत्यभावाच्च नैकान्ततोऽध्यवसीयते, अनेनेति। यस्य चार्थः प्रयोजकः, अप्रयोजनप्रयुक्तत्वात् तत्काल एव न्याय्यः, न अन्यकालः इति। हरणकाले चानेन प्रयोजनमिति हरणे एव न्याय्यम् उत्पादयितुमिति। यदुक्तं, प्रकृतौ माने यत् वाससस्तस्य हरणे दर्शनात्, इह चोदकानुग्रहाय तत्काल-मेवोत्पाद्यम् इति, तत्परिहर्त्तव्यम्, अभोच्यते, न श्रूयते, तेनैव वाससा उपावहरणं कर्त्तव्यमिति, किन्तु अर्थात् तेन क्रियते, एकत्वात् यज्ञः, न हि तदासोऽन्यत्र व्यापृत-मिति तेनैव क्रियते। यत्र अर्थात् कृतं, न तत् चोदकः प्रापयति, अवाचनिकत्वात्। न च, इह तदेव वास उभयार्थं सम्भवति, अहवेदुत्वात्। तस्मात् हरणकाले एव उत्पाद्यमिति ॥ (१०।६।२२अ०) ॥

इति भट्टश्रीयवरस्वामिविरचिते मीमांसाभाष्ये दशमा-ध्यायस्य षष्ठः पादः ॥

मीमांसा-दर्शने

१० अध्याये ७ पादः ।

ज्योतिष्टोमे प्रत्यङ्ङ् हविर्भेदाधिकरणम् ।

पशोरेकहविष्ट्वं समस्तचोदितत्वात् ॥१॥ (पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र संशयः, किं क्रतूक्तः पशुरेकं हविः, उत प्रत्यङ्ङ् हविर्भेदः ? इति । किं प्राप्तम् ? । क्रतूक्तः पशुरेकं हविः इति । कुतः ? । समस्तस्य चोदितत्वात्, समस्तो हि पशुरग्नीषोमौ प्रति चोद्यते, न पृथक् अङ्गानाम् अग्नीषोमीयता । तस्मात् पक्षाकृतित्वात् दृश्यात् अवदाय अग्नीषोमाभ्यां दातव्यम् । अङ्गहविष्ट्वे पशुयज्ञे लक्षणा स्यात् । तस्मात् क्रतूक्तः पशुरेकं हविः । तत्र दर्शयति, अथो खल्वाहुः कापेया दक्षिणस्य पूर्वं पदस्यावदेयं, तत्सर्वस्य पशोरवत्तं भवति इति । अथो खल्वाहुः गोपायना दक्षिणस्य पूर्वं पदस्यावदेयं, तत्सर्वस्य पशोरवत्तं भवति इति क्रतूक्तस्य पशोरवदानं दर्शयति । तस्मादपि क्रतूक्तः पशुरेकं हविरिति ।

प्रत्यङ्ङ् वा यहवदङ्गानां पृथक्प्रकल्पनत्वात् ॥२॥ (सि०)

वाग्यज्ञः पक्षं आवर्त्स्यति, नैतदस्ति, क्रतूक्तः पशुरेकं

हविः इति । किन्तर्हि, प्रत्यङ् हविर्भेदः । कुतः ? । पृथक्-प्रकल्पनत्वात्, पृथगङ्गानि प्रकल्पन्ते, हृदयस्याग्रेऽवद्यति जिह्वाया अवद्यति वक्षसोऽवद्यति दोष्णोरवद्यति पार्श्वयोरवद्यति गुदस्यावद्यति । हृदयाकृतिकादिभ्योऽवदानं श्रूयते, नैतत् अविग्रसिते पशौ सम्भवति । तस्मात् हृदयाद्यर्थेन विग्रसितव्यः पशुः, तस्मिंश्च विग्रस्यमाने पशाकृतिर्न भवति । तदेवम् आपतति, पशाकृत्या यागस्य क्रियमाणस्योपकुर्यात्, तां पशाकृतिम् अन्तर्धाय च न शक्यते साक्षात् यागद्रव्यं परिच्छेत्तुम् । तस्मात् प्रधाना सा आकृतिः उपकर्तुम् अर्हतीति पशाकृतिकस्य द्रव्यस्य हृदयादीनि यानि, तानि हवींषि, तेभ्योऽवदाय प्रदातव्यमिति, मघवत्, यजा, सोमे ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति । आश्विनं गृह्णाति इति पृथक्-कल्पनत्वात् सौमरसो हविः न सोमलता, एवम् अन्यापि द्रष्टव्यम् । समस्तचोदना तु अङ्गहविष्टेऽपि प्रधाना अवकल्पत एव । अथ यद्दर्शनमूलं, तत् सुतरामनेकहविष्टे उपपद्यते । कथम् ? । क्रतुश्च पशोरवदानम् अन्येन अनुजिघृक्षन् न क्रतुस्थ पशोरवदीयते इति दर्शयति ॥ (१०।७।१अ०) ॥

पशोर्हृदयादिभिरेवाङ्गविशेषैः प्रागाशुष्ठानाधिकरणम् ।

हविर्भेदात् कर्मणोऽभ्यासः तस्मात्तेभ्योऽवदानं स्यात् ॥ ३ ॥ (पू०)

प्रत्यङ् हविर्भेद इत्येतत् समधिगतम् । इदमिदानीं

मन्दिह्यते, किं, येन केनचिदङ्गेन हविषा यागो निर्वर्त्तयितव्यः, उत, सर्वेभ्योऽवदातव्यम्, अथ वा परिसङ्ख्या, केनचित् ? इति। किं प्राप्तम् ?। सर्वेभ्योऽवदातव्यम्, इत्यवदानकर्म अभ्यसितव्यम् इति। कुतः ?। हविर्भेदात्, भिन्नानि हवींषि हृदयादीनि यानि अवदाने सङ्कीर्त्तितानि, अवशिष्टानि च पश्वाकृत्या प्रणाड्या परिच्छिन्नानि, तेभ्यः सर्वेभ्योऽवदातव्यं, पश्वाकृत्या हि केचिद्विशेषाः परिच्छिद्यन्ते, तत् यदि एकस्मात् अङ्गात् अवदीयेत, न पश्वाकृतिपरिच्छिन्नाः सर्वे विशेषा उपसंगृह्येरन्, तत्र पश्वाकृत्या अङ्गभावो न कृतः स्यात्, अनेकविशेषणविशिष्टं हि मांसराशिं परिच्छिन्दती अङ्गभावं नीता भवति, नान्यथा। एकहविष्टे हि पश्वाकृतिपरिच्छिन्नाङ्गराशेः सर्वावदानानभ्यासेनैव यथाश्रुतादेव अवत्तं भवति। पृथक्प्रकल्पितेषु अङ्गेषु एकस्मादङ्गात् अवद्यन् कांश्चित् विशेषान् जह्यात्, अभ्यस्यंस्तु अवदानानि सर्वान् विशेषान् परिगृह्णाति। तस्मात् सर्वेभ्योऽवदातव्यमिति।

आह, ननु पश्वाकृतिपरिच्छिन्नानां विशेषाणां यागार्थत्वात् अन्यतमेन यागः सिध्येत। उच्यते, सिध्येदेव, यदि विशेषाणां यागसम्बन्धः श्रूयेत। पश्वाकृतेस्तु श्रूयते। तस्माद्विशेषेषु गृह्यमाणेषु अङ्गभावः कृतो भवतीति तदर्थं प्रयोगवचनेन विशेषा गृह्यन्ते, नावगम्यते विशेषः, को वा विशेषो गृहीतः को वा नेति, अतः सर्वे गृह्यन्ते प्रयोगवचनानुग्रहाय, यश्च विशेषो न गृहीतः तेन विनापि यथाश्रुतमेव

भवतीति कल्पमाने तस्य पक्षाकृत्वा परिच्छेदे न कश्चिदप्यधिकोऽर्थोऽङ्गीकृतो भवतीति अनादरस्तं प्रत्याश्रितः स्यात्। तस्मात् सर्वेभ्योऽवदेयं हृदयादिभ्योऽवशिष्टाचेति।

आज्यभागवद्वा निर्देशात् परिसङ्ख्या स्यात्॥ ४॥ (उ०)

हृदयादिभ्योऽवदातव्यं नावशिष्टात्। कुतः?। तेषां निर्देशात् निर्दिश्यन्ते हृदयादीनि, इकादश वैतानि पशोरवदानानि इति। तच्च प्राप्तत्वादेवैषामेष विधिर्न सम्भवति इति। आनर्थक्यात् नानुवादः। निर्गुणञ्च पुनःश्रवणमिति इतरेषामश्रुतानां परिसङ्ख्यायकं भवति। यथा, न गन्तव्यं न भोक्तव्यमिति च विसृष्टं प्रतिषेधः, एवमेव परिसङ्ख्यायां प्रतिषेधः क्रियते। आज्यभागवत्, यथा गृह्यमेधीये, पञ्चमे पञ्चे आज्यभागग्रहणं परिसङ्ख्यार्थमित्युक्तम्, एवमिहापि प्राप्नोति। तस्मात् परिसङ्ख्येति।

तेषां वा ह्यवदानत्वं विवक्षन्नभिनिर्दिशेत् पशोः पञ्चावदानत्वात्॥ ५॥ (पुनः पू०)

वाशब्दः पक्षं व्यावर्त्तयति, न चैतदस्ति, परिसङ्ख्येति, तच्च हि त्रयो दोषाः, स्वार्थप्रहाणं, परार्थकल्पना प्राप्तबाधश्च। यदुक्तं निर्देशादिति, नैतदेवं, तेषां हृदयादीनां ह्यवदानत्वं विवक्षन् अभिनिर्दिशेत्, नैवं वचनव्यक्तिर्भवति, एकादशैव पशोरवदानानि, नाभ्यधिकानि, यानि अवदानानि तानि हिङ्किरवयति

इति, कथन्तर्हि, एकादश हिहिरवद्यति इति। कुतः ?। नात्र अवदानम् अनूद्यते, अप्राप्तत्वात्। कथम् अप्राप्तिः ?। पद्भ्यः पञ्चावदानत्वात् पञ्चावदानत्वं हि पद्भ्यः अूयते। तस्मात् नानुवादः, एतानि हिहिरवद्यतीति। एतेषां हिरवदानं विधाय कृतार्थः शब्दो भवति, अवशिष्टानां त्यागं न वारयति। तस्मात् सर्वेभ्योऽवदेयमिति।

अंसशिरोनूकसक्थिप्रतिषेधश्च तदन्यपरिसङ्ख्यानेऽनर्थकः स्यात् प्रदानत्वात् तेषां निरवदानप्रतिषेधः स्यात् ॥ ६ ॥ (यु०)

इतश्च न परिसङ्ख्या। कुतः ?। अंसशिरोनूकसक्थिप्रतिषेधात्, एवमेतेषां प्रतिषेध उपपद्यते, यदि न परिसङ्ख्यानं भवति, भवति च सः। नांसयोरवद्यति न शिरसो नानूकस्य नापरसक्थ्योः इति। परिसङ्ख्याने अंसशिरोनूकसक्थ्यां प्रतिषेधोऽनर्थकः स्यात्। अथ तु न परिसङ्ख्या, ततः प्रदानत्वात् यानि अंसादीनि, तेषां निरवदानं प्रतिषिध्यते। किमिदं निरवदानम् ? इति। निष्कृत्य तस्मात् अङ्गात् अवदानं निरवदानं, हिरवद्यति इति तत् प्रतिषिध्यते इति, अतः अर्वैरेवाङ्गैः इज्या क्रियते इति।

अपि वा परिसङ्ख्या स्यादनवदानीयशब्दत्वात् ॥ ॥ ७ ॥ (सि०)

अपि वेति पक्षव्यावृत्तिः, परिसङ्ख्या एव स्यात्, नैव सर्वेभ्योऽवदातव्यम्। कुतः ? पुनःश्रवणस्यार्थवत्त्वात्। ननु

त्रिदोषा परिसङ्ख्येत्युक्तम्। उच्यते, नात्रायं दोषो भवति। कथम्?। अवदानं हि चोदकेन होमार्थं प्राप्नोति, इह तस्य हृदयादिभिः सम्बन्धः क्रियते। तेन हृदयादीनि वाक्येन होमसम्बन्धानि भवन्ति, नान्यानि अङ्गानि पश्वाकृतैर्देवतासम्बन्धीनि। न च, एतस्मिन् प्रत्यक्षे हृदयादिवाक्ये सति पश्वाकृतैर्देवतासम्बन्धोऽन्येषाम् अङ्गानां होमसाधनत्वे नोपपद्यते, हृदयादिष्वपि एवमाकृतिकात् गृह्यमाणेषु आकृतैर्देवतासम्बन्ध उपपद्यत एव। तस्मादन्यानि अङ्गानि परिसङ्ख्यायन्ते।

अपि च अनवदानीयशब्दो भवति, मारुत्यान् अनवदानीयान् सुराग्रहांश्च आजिसृत्भ्यो हरति इति। यदि परिसङ्ख्या, ततः किञ्चिदङ्गमनवदानीयं भवति, इतरथा सर्वम् अवदानीयं स्यात्, अनवदानीयशब्दो नोपपद्यते। तस्मात् परिसङ्ख्येति। ननु शृङ्गखुराभिप्रायमनवदानीयं भविष्यति। नैत्युच्यते, अनवदानीयं हि तत्, अनवदानीयहरणे आजिसृत्भ्यः इति चतुर्थी नोपपद्यते। न हि, शृङ्गखुरेण आजिसृतोऽभिप्रेयन्ते। स्यादेतत्, परिक्रयार्थं तत् भविष्यतीति। उक्तमेतत्, न देवताद्रव्येण स्वकार्याणि कर्त्तव्यानि इति। तस्मान्न शृङ्गखुराभिप्रायम्।

अब्राह्मणे च दर्शनात् ॥ ८ ॥ (यु० १)

इतश्च परिसङ्ख्येति। कुतः?। अब्राह्मणे हि भक्षं दर्शयति। कथम्? कङ्कुभो राजपुत्रः प्राश्नाति ध्रुवगोप इति कङ्कुभो भक्षं दर्शयति। इतरथा यागे प्रकृतत्वादर्शनं

स्यात्, सर्वप्रदानं भवेत्, निरवद्दानप्रतिषेधात्। तस्मादपि परिसङ्ख्येति।

शृताशृतोपदेशाच्च तेषामुत्सर्गवदयङ्गशेषत्वम् ॥ ॥ ९ ॥ (यु० २)

इतश्च परिसङ्ख्येति। कुतः ?। शृताशृतोपदेशात्, शृताशृतोपदेशो हि भवति, हृदयानि अङ्गानि अभिमृशति शृतानि अशृतानि च इति। यदि न परिसङ्ख्या, सर्वेषां अपणं स्यात्, अशृतदर्शनं नोपपद्येत। परिसङ्ख्याने तु सति हृदयादिभ्योऽन्येषाम् अयङ्गशेषत्वं, यथा पर्य्यग्निकृतं बाह्लीवतमुत्सृजन्ति इति। तेषां तत्र अपणं न स्यात्, अशृतदर्शनं चोपपद्यते। तस्मादपि परिसङ्ख्येति ॥ (१०। ७। २ अ०) ॥

ज्योतिष्टोमेऽनिज्याशेषेष्वाङ्गेषु स्विष्टकृदीमाधिकरणम्।

इज्याशेषात् स्विष्टकृदिज्येत प्रकृतिवत् ॥ १० ॥ (पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयं, यो दीक्षितो यदग्नीषोमीयं पशुमालभेत इति। अस्ति तत्र चोदकप्राप्तः स्विष्टकृत्। इदैवं श्रूयते, त्रयाङ्गैः स्विष्टकृतं यजति इति। तत्र संशयः, किम्, इज्याशेषेभ्यः त्रिभ्यः अङ्गेभ्यः स्विष्टकृता यष्टव्यं, उत, अनिज्याशेषेभ्यः ?। किं प्राप्तम् ?। इज्या-

शेषेभ्यः इति। कुतः?। एवं प्रकृतिवत् शब्दानुग्रहो भविष्यति, त्रीणि अङ्गानि यानि इज्याशेषभूतानि, तेभ्य इज्यायां क्रियमाणायां त्रिशब्दोऽनुगृहीतो भवति।

त्र्यङ्गैर्वा शरवत् विकारः स्यात् ॥ ११ ॥ सि.)

अनिज्याशेषैस्त्र्यङ्गैरिज्येत, एष विकारः स्यात्, न त्रीणि यानि कानिचिदङ्गानि। यदि यैः कैश्चित्त्रिभिरङ्गैरिज्या कर्तव्येत्यभ्युपगम्येत, तत्रत्र्यङ्गैरिति न विधीयेत, प्राप्तत्वादेव, त्रित्वार्थं विधानं स्यात्, त्रिभिरिज्येत इति, तत्र त्रिशब्दोऽङ्गशब्देनासमर्थ एव स्यात्, असामर्थ्ये समासो नोपपद्येत।

अपि च असत्यां त्रयाणाम् अङ्गानामेकस्यां साधारण्यां क्रियायाम् एकस्मिन् वा साधारणे गुणे त्रिशब्दस्याङ्गशब्देन विशेषणविशेष्यसम्बन्धाभावात् सामर्थ्यं न विद्यते, यानि त्रीणि अङ्गानि त्रित्वसम्बद्धानि तानि त्र्यङ्गानीति। [illegible]ते विशेषे व्यवहाराभावात् साकाङ्क्षं भवति, कतमानि त्र्यङ्गानीति। त्रित्वेऽपि कथम्?। तदुच्यते, समाहार एष समासः, येषां समाहार उक्त एकक्रियागुणसम्बन्धो वा, तानि त्र्यङ्गानि, एषाञ्च समाहार उच्यते, यत् द्रोणः पूर्वार्धदग्नये समवद्यति, गुदस्य मध्यतः, श्रोणा जघनतः इति। समवदानं समाहारः, एकेन अग्निना गुणेन सम्बन्धः, एकया च समवद्यतिक्रियया। तस्मात् एतानि त्र्यङ्गानि, एतानि चानिज्याशेषाणि। अतो वचनप्रामाण्यात् अनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृदिज्येतेति। शरवत्,

यथा, शरमयं बर्हिः इति वचनप्रामाण्यात् शरैः कुशा बाधन्ते, एवमिहापि इध्माग्नेषता बाधिष्यते इति।

आह, इध्माग्नेषाणां प्रतिपत्तिरेषा, न च, अन्येन इध्मार्थं क्रियमाणायामेतत् प्रतिपादितं भवति, तस्मात् इध्माग्नेषाणां कार्थं अवर्त्तमानानि न इध्माग्नेषविकारभूतानि भवितुमर्हन्ति इति। अत्रोच्यते, यद्यपि प्रतिपाद्यन्ते तथापि नान्यथा, तस्यां निर्वृत्तौ इध्माग्नेषैः कर्त्तव्यायामनिध्माग्नेषाणि विधीयन्ते, एतानि तत्र प्रतिपादयितव्यानि, एतान्यपि हि कृतकार्थ्यानि प्रतिपादयितव्यान्येव। यानि तु शेषभूतानि तानीह प्रतिषिद्धानि यथाकाममन्यत्र प्रतिपादयिष्यन्ते इति॥ (१०।७।३ अ०)॥

अध्यूध्नी इडाभक्षविकारताधिकरणम्।

अध्यूध्नी तु होतुः चाङ्गक्तं इडाभक्षविकारः स्यात्॥ १२॥ (पूर्वपक्षे पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्रेदमाम्नायते, अध्यूध्नीं होत्रे हरन्ति इति। तत्राथमर्थः सांशयिकः, किम्, अध्यूध्नी होत्रभक्षस्य विकारः, उत अविकारो होतुर्नियम्यते? इति। कथं विकारः स्यात्, कथं नियम्यते? इति। यदि अध्यूध्नी विधीयते, होत्रे हरन्ति इत्येतदनूद्यते, ततो विकारः। अथ अध्यूध्नीमुद्दिश्य होत्रे हरन्ति इति विधी-

यते, ततो नियमः। किं प्राप्तम्?। होतुः भक्षस्य विकारः स्यात्। कुतः?। अपूर्वा अध्वर्यो अदैवतशेषत्वात्, इड़ाभक्षे न प्राप्ता, सा न शक्या अनुवदितुम्, अतो विधीयते, होत्रभागहरणेऽध्वर्यो भवन्ती होत्रहरणे प्रत्यक्षा, आनुमानिकम् इड़ाभक्षं निवर्त्तयति इति। वाङ्गवत्, यथा अनिज्याशेषैस्त्राङ्गैः इज्याशेषाणि निवर्त्तन्ते, तद्वत्।

शेषे वा समवैति तस्माद्रथवन्नियमः स्यात्

॥ १३ ॥ (पूर्वपक्षे उ०)

वाशब्दः पक्षं व्यावर्त्तयति, इड़ाभक्षविकारः इति। कथं स्यादिड़ाभक्षविकारः, यद्यपूर्वा अध्वर्यो स्यात्?। सा हि इड़ायां समवैति। कथम्?। अनस्थिभिरिड़ां बध्नन्ति इति तस्याः हरणं प्राप्तं, होत्रसम्बन्धो न तः, स विधीयते, याम् इमाम् अध्वर्यो हरन्ति, होत्रे नान्यस्मै इति, होत्रे त्वन्य भक्षं कुर्वन्तीति। अपि च होत्रे हरन्ति इत्यानन्तर्यात् एकवाक्यता प्रत्यक्षा, इतरस्मिन् पक्षे, अध्वर्यो हरन्ति इति च होत्रशब्दव्यवधानात् कल्पयितव्या भवेत्। तस्मात् भागे नियमः, रथवत्, यथा, यजुर्युक्तं रथमध्वर्यवे ददाति इति रथस्य वाक्यान्तरेण प्राप्तत्वात् अव्यवधानाच्च अध्वर्युभागे नियमः, एवमिहापि होत्रभागे नियमः इति।

अशास्त्रत्वात्तु नैवं स्यात् ॥ १४ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति, न भागे नियमः, इड़ाभक्ष-

विकारः इति। कुतः?। नास्ति शास्त्रं, येन इडाभिन्ने अध्यूध्नी स्यात्, नन्विदम् उक्तम्, अनस्थिभिरिडां वर्द्धयन्ति इति। उच्यते, अनुवादस्वरूपत्वादस्य, प्राप्तत्वाच्च अनस्थिकानां वचनान्तरेण, अथ यद्यप्यरिष्यिते तत्समवत्त धान्याम् आनयति तत् हृदयं प्राप्नोति जिह्वां वत्तस्तनिममतस्तेस्तेया? वनिष्टुम् इति, अनुवाद इति गम्यते, न चात्र अध्यूध्नी कीर्त्यते। तस्मादप्राप्ता। अप्राप्ता चेत् होत्रहरणमुद्दिश्य विधीयते। यत्तु, व्यवधानात् अप्राप्तेव एकवाक्यता कल्पयितव्या इति। अपूर्वत्वात् अध्यूध्ना अनुवादाभावेऽनर्थकत्वपरिहाराय कल्पयिष्यामः। एवञ्च स्वपदगतं हरणं विहितं भविष्यति इति। इतरथा तु होत्रेऽध्यूध्नीसम्बन्धो विधीयते, न स्वपदगतहरणम्। तस्मादपि भक्षविकारः।

अपि वा दानमात्रं स्यात् भक्षशब्दानभिसम्बन्धात् ॥ १५ ॥ (हि० पू०)

अपि वा इति पक्षव्यावृत्तिः। यदा एवं, न वचनान्तरेण इडाभक्षेऽध्यूध्नी प्राप्ता, साऽपूर्वा हर्त्तव्या विधीयते, न तर्हि भक्षविकारः। दानमात्रमेतत् होत्रे अध्यूध्नीं हरन्ति इति। नात्र भक्षशब्देन अभिसंयोगो विधीयते। तस्मान्न भक्षविकार इति।

दातुस्त्वविद्यमानत्वादिडाभक्षविकारः स्यात् शेषं प्रत्यविशिष्टत्वात् ॥ १६ ॥ (उ०)

• तुशब्दः पक्षं व्यावर्त्तयति, 'दानमात्रमेतत् न भक्षविकारः इति। नैतदानं, दातुः अभावात्, पशुर्हि एवं संकल्पितः, यागं वर्जयित्वा नान्यत् स्वकार्य्यम् धनेन कार्य्यमिति। तेन स्वाम्यभावात् दानं नास्ति। कथं स्वाम्यभावः ?। शेषं प्रत्यविशिष्टत्वात्, शेषं प्रति यथा यजमानस्तथा होता, उभावपि न प्रभवतो द्रव्यस्येति नास्ति दानम्। अथ कथं भक्षशब्दानभिसंयोगे भक्षः ?। चतुर्थी तादर्थ्ये भवति, होत्रर्था अध्वर्धी, तया होता अभिप्रेयते, होत्रे सा होतुरुपकरोति, सा भक्षमाणा सामर्थ्यजननस्य दृष्टस्य लाभाय यया च यावत्या च मात्रया उपकारिणी भवति, तत्र चतुर्थीश्रुतिरनुगृह्यते, इतरथा हि अदृष्टयमाने उपकारे चतुर्थीश्रुतिर्बाध्येत। तस्मादिडाभक्षविकारः इति ॥ (१० । ७ । ४ अ०) ॥

वनिष्ठुर्भक्षविकाराधिकरणम्।

अग्नीधश्च वनिष्ठुरध्वर्धीवत् ॥ १७ ॥

तत्रैवाग्नीषोमीये पशौ श्रूयते, वनिष्ठुरग्नीधे इति। तत्र अधिकरणप्रदेशः, तत्र यः संशयः, स इहापि। किं वनिष्ठुरग्नीधे, विकारो भक्षस्य, उत तस्य भागनियमः ? इति। ततः स एव पूर्वपक्षः, अपूर्वत्वात् विधीयते, तस्माद्विकारः इति। तस्य तदेव उत्तरं, वचनान्तरेण प्राप्तत्वात् भागनियमः इति। ततस्तदेवोच्यते, अनग्नेभि-

रिड़ां बर्हयन्ति इति अनुपात्तत्वात् अप्राप्तो वनिष्ठुर्विधीयते, इति ।

अत्राह, ननु वनिष्ठुरपि तत्र सङ्कीर्त्तनात् प्राप्त एव इति । अत्रोच्यते, वनिष्ठुः प्राप्यति इत्येतावत्तत्र, तेन इड़ायां प्राशनमात्रं तस्य विधीयते इड़ासंस्कारार्थेन । नासौ इड़ा न तस्य भक्षशब्दसंयोगः । तस्मात् प्राशनकार्यं, न तस्य भक्षे प्राप्तिः । पूर्वस्मिन् वचने न चतुर्थीसम्बन्धः, तस्यैतदग्नीधे इति । चतुर्थीसम्बन्धेन भक्षणं विधीयते । तस्मात् पूर्वेण अधिकरणेन अतुल्याशङ्कायां तुल्यता सूचेणातिदिश्यते, सर्वेष्वेव अधिकरणप्रदेशेषु अतुल्याशङ्का निवर्त्तते ॥ (१० । ७ । ५ अ०) ॥

मैत्रावरुणस्यापि शेषभक्षास्तित्वाधिकरणम् ।

अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ॥ १८ ॥

(पृ०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । अस्ति तत्र मैत्रावरुण ऋत्विक्, तं प्रति सन्देहः, किं तस्य चोदकप्राप्तः शेषभक्षोऽस्ति, न ? इति । किं प्राप्तम् ? । अप्राकृतोऽसौ, न तस्य भक्षे क्रियमाणे प्रकृतिवत् कृतं भवति । तस्मात् अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ।

स्याद्वा होत्रध्वर्य्युविकारत्वात्तयोः कर्माभिसम्बन्धात् ॥ १९ ॥ (सि०)

स्याद्वा मैत्रावरुणभक्षः, प्रेषेषु असौ अध्वर्य्युविकारः, अनुवचनेषु होतुः, तस्मान्मैत्रावरुणः प्रेषति चानु चाह इति, अतस्तस्य तयोः कर्माभिसम्बन्धात् अर्थापत्त्या भक्षं लभते। तस्मात् सभक्षः स्यादिति ॥ (१०।७।६ अ०) ॥

मैत्रावरुणस्यैकभागतार्थिकरणम् ।

द्विभागः स्यात् द्विकर्मत्वात् ॥ २० ॥ (पू०)

अथेदानीं मैत्रावरुणमेव प्रति भवति सन्देहः, किं द्विभागो मैत्रावरुणः, उत एकभागः ? इति। किं प्राप्तम् ? । द्विभागः स्यात्, अध्वर्य्युविकारत्वादध्वर्य्युभागं प्राप्नोति, होत्रविकारत्वात् होत्रभागं प्राप्नोति। तस्माद् द्विभागः स्यात् इति।

एकत्वाद्वैकभागः स्यात् भागस्याश्रुतिभूतत्वात् ॥ २१ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति, न द्विभागः स्यात्, एकभागो भवेदिति। कुतः ? । भागस्याश्रुतिभूतत्वात् इति, न इह अध्वर्य्युभागो मैत्रावरुणस्य श्रूयते, नापि होत्रभागः। यदि हि उभौ श्रूयेयातां, एकेन भागेन कृतेऽपि संस्कारे द्वितीयोऽपि वचनप्राप्तत्वात् स्यात्, चोदकेन

तयोः प्राप्तिर्गम्यते, तच्चैकत्वान्नैवावरुणस्य, एकेनैव भागेन यावती प्राकृती शक्तिः, सा कृतेति द्वितीयभागं चोदको न प्रापयति। तस्मात् एकभागः स्यात् इति ॥ (१०। ७। ७ अ०) ॥

प्रतिप्रस्थातुर्भक्षाभावाधिकरणम्।

प्रतिप्रस्थातुश्च वपाश्रपणात् ॥ २२ ॥ (पू०)

अग्नीषोमीये एव पशौ प्रतिप्रस्थाता नाम ऋत्विक् श्रूयते। तं प्रति सन्देहः, किं तस्य शेषभक्षो भवेत्, न ? इति। किं प्राप्तम् ?। भवेदिति। कुतः ?। वपां हि श्रपयन्नध्वर्यु कर्म करोति, प्रतिप्रस्थाता वपां श्रपयति इति। तस्मात् स्यादस्य भक्षः इति।

अभक्षो वा कर्मभेदात्तस्याः सर्वप्रदानत्वात् ॥ २३ ॥ (सि०)

अभक्षः स्यात् प्रतिप्रस्थाता। कुतः ?। यस्मिन् यागे स अध्वर्योर्विकारः, तस्य द्रव्यशेषो नास्ति, वपामसौ श्रपयति, तस्याः सर्वप्रदानत्वं, तत्र शेषाभावात् किं भक्षयेत् ? यत्र शेषोऽस्ति हृदयादिषु अंशेषु, न तत्र असौ अध्वर्योर्विकारः। अन्यत्रि वपापूर्वम् अङ्गपूर्वात्, चोदकेन च यस्य अपूर्वस्य शेषः प्रतिपाद्यते, तस्य तत्कर्मकरे भक्षः, एवं हि तस्योपकारको भवति इति। अन्यकर्मकरे भक्ष-

यति तदुपकाराभावादनङ्गं स्यात्। तस्मात् न अन्य-कर्मणि भक्षणं चोदकः प्रापयति इति।

ननु अङ्गेष्वपि प्रतिप्रस्थाता अध्वर्यु विकारः, स हि अवदानं करोति, दक्षिणतो निधाय प्रतिप्रस्थाता अवद्यति इति। यस्यां शाखायामेतन्नास्ति, तत्रैषा विचारणा। अथ वा अन्यकार्थम् एतत् अवदानम्, अन्यकार्थकं प्राकृतम्। तत्र प्रकृतौ यजतिशब्देन प्रदानारम्भोऽवदाने गृहीते हिंसङ्गा केवला श्रूयते, नावद्यत्यर्थः। इह पुनः प्रतिप्रस्थातुरवदानं चोद्यते, नारम्भः, यदवावदानं भविष्यति, स प्रदानारम्भः। तत्र प्रकृतौ प्रदाने चिकीर्षिते अर्थाद् अध्वर्यु रचोदितोऽवदानं निर्वर्त्तयति, तेन वा अन्येन वा तत् कर्त्तव्यं, सन्निधानात् अध्वर्युरेव करोति, न नियोगतस्तत् तत्राध्वर्युकर्म। यच्चार्थात् क्रतं, न तत् चोदकः प्रापयति। अर्थादेव तत् इहाध्वर्युणा अन्येन वा कार्य्यं, प्रतिप्रस्थातुर्वचनं नियमार्थम्। तस्मात् न अवद्यन्नपि प्रतिप्रस्थाता अध्वर्युकर्मणि वर्त्तते इति न अस्याङ्गेषु भक्षः स्यात्। (१०।७।८ अ०)॥

आज्यभागौ यजति इत्यनेन अपूर्वगृहमेधीयविधानाधिकरणम्।

विकृतौ प्राकृतस्य विधेर्ग्रहणात् पुनःश्रुतिरनर्थिका स्यात्॥ २४॥ (१म पू०)

चातुर्मास्येषु श्रूयते, मरुद्भ्यो गृहमेधिभ्यः सर्वासां

ध्ये सायमोदने इति। तत्रेदं समामनन्ति, आज्यभागौ यजति इति। तत्र संशयः, किं चोदकेन प्राप्तयोराज्यभागयोरनुवादमात्रमेतत्, किं वा, चोदकेन अनेन च द्वाभ्यामेकं कर्म चोद्यते, किं वा, अर्थवादार्थं ग्रहणम्, उत अधिकयोः कर्मान्तरयोरुत्पत्तिः, अथ परिसङ्ख्यार्थं, अथ वा आज्यभागौ वर्जयित्वा अन्यचोदकः प्रापयति, अथ वा चोदकेन आज्यभागावेव प्राप्येते, चोदक एव वा नास्ति, अपूर्वो ग्रहमेधीयः? इति। किं प्राप्तम्? विकृतौ एतस्यां प्राकृतयोराज्यभागयोः प्राप्तयोर्गृह्यमाणयोः पुनःश्रवणम् अनर्थान्तरं स्यात्, अनुवादमात्रमेव सुहृद्भूत्वा आचार्य उपदिशति स्म, न अर्थान्तरशङ्कया खेदितव्यं मनः, ज्ञातमेतत् अनुवादमात्रमेतदित्यन्यच्चिन्त्यतामिति। कथम्?। तद्धि गम्यते, अन्यच्च नावगम्यते इति। यथा अस्मिन् गृहे ये ब्राह्मणास्ते आनीयन्तां, देवदत्तो यज्ञदत्तो विष्णुमित्र इति भवन्ति लोकेऽनुवादमात्रस्य वक्तारः, एवमेतदपीति।

अपिवाग्नेयवत् द्विशब्दत्वं स्यात् ॥२५॥ (२य पू०)

यदि हि एतावदेवास्य सामर्थ्यं गम्येत उदितमनुवदितुं, ततोऽस्य नान्योऽर्थः स्यात्, अथ तु अन्यदपि कर्तुमस्य सामर्थ्यमस्ति, ततः कथमर्थान्तरशङ्का न भवति इति। अस्ति च सामर्थ्यं, चोदकेन अनेन च द्वाभ्यां संहत्यैकोऽर्थ उच्यते, गृहमेधीयो हि भवति प्रकृतिवत्। किं तत् सादृश्यम्?। आज्यभागौ यजति इति, प्रकृता-

विहं श्रूयते, आज्यभागौ यजति, एवं प्राकृतेन यागेन स्वकार्यं करोति इति, इह पुनः आज्यभागौ यजति इति स प्रकारोऽतिदिश्यते, एवमनेन प्रकारेण यागः स्वकार्यं करोति, यथा द्वाभ्यां शब्दाभ्याम् एकोऽर्थ उच्यते। आग्नेयवत्, आवाहने अग्निमग्न आवह इति य एवं सम्बोध्यते, स एवोच्यते, आत्मानमावह इति। यथा वा, एष दण्डः, दण्डेन प्रहर इति द्वाभ्यामेक एव दण्ड उच्यते। एवमिहापि प्राकृतौ, आज्यभागौ यजति इति विकृतावपरेण आज्यभागवचनेन तदङ्गं गृहमेधीयं करोति इति वाक्यं पूर्यते, न यागान्तरं चोद्यते, नापि चोदकप्राप्तस्य अनुवादमात्रमिति।

न वा शब्दपृथक्त्वात् ॥२६॥ (३य पू०)

वाशब्दः पक्षं व्यावर्त्तयति। नैतत् आग्नेयावाहनेन तुल्यं, तत्र हि अग्ने आवह इत्येतावता आवोढा अग्निरुक्तः, अग्निमावह इत्येतावता वोढव्योऽग्निरुच्यते, न ताभ्यामेकोऽर्थः क्रियते। इह तु प्रकृतिवत् इत्येकेनैव वचनेन आज्यभागवत्ता अवगम्यते। पुनः आज्यभागौ यजति इति कृतकरं शास्त्रमनर्थकं स्यात्। तस्मादनुवादमात्रमित्यध्यवसातव्यम्। ननु अनुवादोऽनर्थकः। नैत्युच्यते, अर्थवादार्थेन भविष्यति, आज्यभागौ यजति यज्ञतायाः इति, यदेतत् प्रकृतिवत् करोति, तथा कुर्वन् आज्यभागौ पश्यति, तत्र यज्ञता सम्पद्यते इति।

अधिकं वार्थवत्त्वात् स्यादर्थवादगुणाभावे वचनाद्विकारे तेषु हि तादर्थ्यं स्यादपूर्वत्वात् ॥ २७ ॥ (४थं पू०)

अथवा अधिकयोः कर्मान्तरशेषत्वात्, न, अनुवाद इति, आज्यभागावत्र क्रियेते एवेति, किन्तर्हि उपदिश्यते यागावत्र कर्त्तव्याविति। कुतः ?। अनुवादमात्रं हि अनर्थकं, शब्दपृथक्त्वात्र द्वाभ्यामेकं कर्मोच्यते। अथ कस्मात् न, अर्थवादार्थता गुणार्थता विकारार्थता वा भवति ? इति। उच्यते, अर्थवादासङ्कीर्त्तनात् नार्थवादार्थता। नन्वत्र यज्ञतायाः इत्यर्थवादः सङ्कीर्त्यते। उच्यते, न वाक्यान्तरेण विहितेऽर्थे वाक्यान्तरेण अर्थवादेन किञ्चित् प्रयोजनमस्ति। तस्माद्यागान्तरविधानार्थ एवायं नार्थवादः। ननु यागान्तरं नास्ति आज्यभागसंज्ञकम्। उच्यते, आज्यभागधर्मकं भविष्यति। न च, गुणसङ्कीर्त्तनमस्ति, यथा अग्निमन्तौ आज्यभागौ यजति इति। नचान्यो वचनप्रकारोऽस्ति, यथा नान्यामाहुतिं पुरस्तात् जुहुयात् इति प्रतिषिद्धप्रसवार्थं यदन्यामाहुतिं पुरस्तात् जुहुयात् इति निन्दित्वा स्तुत्यर्थमाधारयति इति वचनम्। तेषु हि सत्सु एवमर्थवत्ता स्यात्। तस्मात् कर्मान्तरवचनम्, अपूर्वत्वात्, एवमपूर्वमर्थं करिष्यति, इतरथा न विशिष्टोत्पत्तिः स्यात्, किं पुनरत्र कर्मान्तरे लक्षणमिति ?। एकस्यैव पुनःश्रुतिरविशेषादनर्थकं हि स्यात् इति। अतः क्रमेण प्रधान-

यागादृष्टादिष्टादपरो यागो आज्यभागधर्मको विधीयेत अज्ञातो ज्ञाप्येत इत्यर्थः।

प्रतिषेधः स्यादिति चेत् ॥ २८ ॥ (५म पू०)

इति चेत् पश्यसि, कर्मान्तरचोदनेति। तत्र, तस्य आज्यभागो इति नामसङ्कीर्त्तने सति अनाज्यभागो न शक्यो प्रतिपत्तुम्। तद्धर्मकत्वे सति लक्षणशब्दः, आज्यभागो इति विशेषस्य अविवक्षा स्यात्, तस्मात् न कर्मान्तरवचनं, किन्तु परिसङ्ख्यया प्रतिषेधः स्यात्, यथा पञ्च पञ्चनखा भक्ष्याः इति शशादीनां पञ्चानां कीर्त्तनात् अन्येषां भक्षणं प्रतिषिध्यते इत्ययमर्थो वाक्येन गम्यत इति, एवमिहापि अन्येषामङ्गानां प्रतिषेधो भविष्यति इति।

नाश्रुतत्वात् ॥ २९ ॥ (५म पू० नि०)

न हि अत्र प्रतिषेधवाचि किञ्चित्पदं श्रूयते, नापि इतराङ्गवचनं, न च असम्प्रतिपन्नपदार्थको वाक्यार्थः प्रमाणं भवति, पदार्थो हि वाक्यार्थस्य मूलं, नास्य पृथक् सिद्धिरस्तीति। तदुक्तं, तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् (१। १। २५। सू०) इति। तस्मान्न प्रतिषेधः, तत्र हि त्रयो दोषाः, अस्वार्थ्यग्रहणं, परार्थकल्पना, प्रामाण्यबाधश्च। तस्मात् कर्मान्तरवचनमेतदिति।

अग्रहणादिति चेत् ॥ ३० ॥ (६ष्ठ पू०)

इति चेत् पश्यसि, कर्मान्तरचोदनेति उक्तस्त्वत्र।

दोषः, स एवं महान्। तस्मात् किं भवतु ? आज्यभागयोः स्वग्रब्देन ग्रहणम्, अन्येषां अङ्गानां चोदकेन। स्वग्रब्देनाज्यभागौ गृहीतौ दृष्ट्वा चोदकस्तौ न प्रापयति, अन्यानि अङ्गानि अगृहीतानि प्रापयिष्यति इति। किमेवं भविष्यति ? इति। संहत्यकारिता न कल्पयिष्यते, चोदकप्राप्तयोर्वाक्यान्तरेणार्थवादवचनमनर्थकं न प्रतिज्ञातं भविष्यति। विस्पष्टं सञ्ज्ञाग्रहणेन पुनः श्रुतिरित्येतत्र कर्मान्तरं कल्पयिष्यते। यथा देवदत्तोऽत्र तिष्ठतीत्युक्ते न तिष्ठन्नेव तिष्ठतीत्युक्तः, एतावता देवदत्ताख्योऽयमभिधीयत इति गम्यते। न च परिसङ्ख्या चिदोषा सती कल्पिता भविष्यति। तस्मात् चोदकेन अगृहीतावाज्यभागौ गृहीताविति।

आह, कस्मादिदं गौरवमाश्रितम्। यदि हि प्रत्यक्षमाज्यभागौ न गृहीतौ स्यातां, चोदक एष तौ शक्नुयात् ग्रहीतुं, प्रत्यक्षवचनेन चोदकग्रहणाशक्तौ गौरवे किं प्रयोजनम् ? इति। उच्यते, न गौरवस्य किञ्चित् साधु प्रयोजनं, न तु गौरवेण यत् कृतं तत्र कृतं भवति। गौरवस्य तु दोषोऽस्ति, न तु दोषोऽपि सति चोदके आज्यभागौ गृह्णाति, यः परिहारेण पथा ग्रामं गच्छति, परिहारदोषमसौ प्राप्नोति, न तु ग्रामगमनं न भवति। तस्मात् अग्रहणात् आज्यभागयोर्ग्रहणमिति।

न तुल्यत्वात् ॥ ३१ ॥ (६४ पृ० नि०)

नैतदेवम्। यदि हि चोदकः पृथक् पृथक् प्राकृतान्

दार्थान् अपेक्षेत, तत्र आज्यभागौ गृहीताविति कृत्वा तौ नापेक्षेत, अन्यांश्च गृह्णीयात्, न त्वसौ पृथक् पृथक् पदार्थानपेक्षते किन्तु प्राकृतमपूर्वम् अपेक्षते यद्वत् तेन, तद्वदनेनेति, तस्मिन्नपेक्ष्यमाणे आज्यभागवत्तापि अपेक्षिता भवति। तत्रैतदेवमागच्छति, कृतकरं शास्त्रमनर्थकं भवतीति। तस्मादन्यैरङ्गैः तुल्यत्वात् न चोदकेनागृहीतयोराज्यभागयोर्ग्रहणमिति।

तथा तद्ग्रहणे स्यात् ॥ ३२ ॥ (७म पू० एवं तस्य नि०)

अथ यद्युच्येत, आज्यभागावेव चोदकेन गृहीतौ प्रकृतिवत् गृहमेधीयौ भवति। कथमाज्यभागौ यजति? एवमिति। यथा सामदृश सामिधेन्यो भवन्ति अध्वरकल्पादिषु इतिवाक्यशेषात् न अन्यासु इष्टिषु सामदृश्य यथा शिंशपामानय हृत्तम् इति नान्योऽपि हृत्त आनीयते, शिंशपेव हृत्तशब्देन गृहीता भवति। एवमिहापि चोदकेनाज्यभागावेव गृहीताविति द्रष्टव्यम्। एवं प्राप्ते ब्रूमः, तथा तद्ग्रहणे स्यात्, तुल्यमग्रहणेन तत् ग्रहणं, पृथक्पदार्थापेक्षिणि चोदके स्यात् अग्रहणमन्येषामङ्गानां, प्राकृता पूर्वापेक्षिणि तु नैतदुपपद्यत इति।

अपूर्वतान्तु दर्शयेत् ग्रहणस्यार्थित्वात् ॥ ३३ ॥ (सि०)

एवं तर्ह्यपूर्वौ गृहमेधीयः। कुतः?। ग्रहणस्य

अर्थवत्त्वात्, एवं ग्रहणम् आज्यभागौ यजति इति अर्थवद्विधिति, पूर्ववत्त्वे तत् अनर्थकं स्यात्, आज्यभागाभ्यां प्रत्यक्षभूताभ्यां ग्रहमेधीयो निराकाङ्क्षो न चोदकेन अन्यानि अङ्गानि गृह्णातीति, यस्यान्तु विकृतावपूर्वं किञ्चिदङ्गमुक्तं, न तेन सह एकवाक्यतामगत्वा प्राकृतानि अङ्गानि गृह्णातीति । कुतः ? । केन प्रकारेण कुर्यादिति तस्याकाङ्क्षा न किं कुर्यादिति, प्रकृतौ चाङ्गवत्ता नाम प्रकारो विदितः प्रयोगवचनेन च आकाङ्क्ष्यते, न तु विकृतावङ्गवत्ता क्लृप्ता, सा कल्पयित्वा आकाङ्क्षिता भवति, न च क्लृप्तामुझित्वा कल्पनीयसम्बन्धो न्याय्यः, तस्मात् तत्रापि चोदकेन अङ्गानि गृह्णन्त इति । गृहीतेषु च प्राकृतेषु वैकृतानामङ्गानां विधानमनर्थकं मा भूदिति तेषामङ्गानां कल्पयित्वा सर्वाङ्गोपसंहारिणा प्रयोगवचनेन संग्रहः क्रियत एवेति ॥ (१०।७।८अ०) ॥

गृहमेधीये स्विष्टकृदादयनुष्ठानाधिकरणम् ।

ततोऽपि यावदुक्तं स्यात् ॥ ३४ ॥

गृहमेधीय एवोदाहरणम् । तत्रैषोऽर्थः समधिगतः, आज्यभागाभ्यामेतत् निराकाङ्क्षम् अन्यानि न गृह्णाति इति । तदुच्यते, किमेष एवोत्सर्गः, सर्वेष्वेवान्यानि अङ्गानि न गृह्णाति इति ? । एवं खलु प्राप्ते, उच्यते, ततोऽपि यावदुक्तं स्यात्, ततः एवमुक्तं, अङ्गानि

मान्यानि गृह्णाति इति अगम्यमाने विशेषे न गृह्णीयात्। गम्यते चात्र विशेषः प्रत्यक्षविहितत्वादाज्यभागयोरिति। अतो यस्य यस्य प्रत्यक्षवचनः सर्वेषु तेषु पुनर्गम्यते विशेषस्तस्मात् यावदुक्तं स्यात्, यथा अग्नये समवद्यति इति, ईडामुपक्रामयति इति ॥ (१०।७।१७अ०) ॥

[गृहमेधीये प्राग्निवादिभक्षणाभावाधिकरणम्।

स्विष्टकृद्ग्रहप्रतिषेधः स्यात् तुल्यकारणत्वात् ॥ ३५ ॥ (सि०)

अस्ति गृहमेधीयः, तत्रैषोऽर्थः समधिगतः, अपूर्वो गृहमेधीय इति। तत्रेदमामनन्ति, अग्निं स्विष्टकृतं यजति इति। तत्रेदं सन्दिह्यते, किमन्येषां शेषकार्याणां भक्षणस्य च परिसङ्ख्यायकः स्विष्टकृच्छब्दः, उत न? इति।

आह, ननु अपूर्वत्वाद्गृहमेधीयस्य नैव शेषभक्षा विद्यन्ते। अत्रोच्यते, पूर्ववान् गृहमेधीय इति कृत्वा चिन्तेयम्। पूर्वस्य अधिकरणस्य प्रयोजनं चिन्त्यते, यदि परिसङ्ख्या भवेत्, आज्यभागाभ्यां यागाः परिसङ्ख्यायेरन् नान्ये इति। इदमपि प्रयोजनं भवति, स्विष्टकृच्छ्रवणेन शेषभक्षाः परिसङ्ख्यायन्ते, न? इति। किं प्राप्तम्? स्विष्टकृति श्रूयमाणे परिसङ्ख्या स्याद्भक्षाणाम्। कुतः? तुल्यकारणत्वात्, तुल्यं हि कारणं स्विष्टकृतो भक्षाणाञ्च। उभयमपि शेषसंस्कारार्थं तत्र वचनादयं शेषसंस्कारो भवति अन्ना इति प्रतिषिध्येरन् भक्षाः।

अप्रतिषेधो वा दर्शनादिडायां स्यात् ॥३६॥

(पू०)

यद्येव खिष्टकृत्श्रवणेऽन्येषां शेषकार्य्याणामदर्शनमिति शेषभक्षा न सन्तीति उच्यते, एवं भक्षणदर्शनात् भक्षाः सन्तीति गम्यते। दर्शनादर्शनयोश्च दर्शनं प्रमाणम्। किं तद्दर्शनम्?। इडामुपपन्नयति इति उपक्षानं ह्यनुज्ञापनं, तत् सति भक्षणे भवति, नासति। तस्मात् न प्रतिषेधः।

प्रतिषेधो वा विधिपूर्वस्य दर्शनात् ॥ ३७ ॥

(उ०)

प्रतिषेधो वा, तुल्यकारणेन हि प्रत्यक्षश्रुतिन आनुमानिकं बाध्यते। अथ यद्दर्शनमुक्तं, तद्विधिपूर्वस्य भक्षस्य भविष्यति, एवं ह्याम्नायते, अथ इडामेवावद्यति न प्राग्निक्षमुपक्षय प्राश्नति इति तस्य दर्शनम्। कृत्वा चिन्तायाः प्रयोजनं न वक्तव्यं, पूर्वाधिकरणस्य हि तत् प्रयोजनं, न च प्रयोजनस्य प्रयोजनमुच्यते यत् प्रयोक्तव्यं तच्च पूर्वाधिकरणम् ॥ (१०। ७। ११ अ०) ॥

प्रायणीयातिथ्ययोः शंयुडान्तत्वानियमाधिकरणम्।

शंयुडान्तत्वे विकल्पः स्यात् परेषु पत्नानुयाज-प्रतिषेधोऽनर्थकः स्यात् ॥ ३८ ॥ (पू०)

ज्योतिष्टोमे श्रूयते, शंयुक्ता प्रायणीया सन्तिष्ठते न

पत्नीः संयाजयन्ति इति। इडान्ता आतिथ्या सन्तिष्ठते नानुयाजान् यजति इति। तत्र संशयः, प्रायणीया किं ग्रंयुन्ता क्रतुसंस्था वा, उत ग्रंयुन्तैव? तथा आतिथ्या किम् इडान्ता क्रतुसंस्था वा, उत इडान्तैव। किं प्राप्तम्?, ग्रंयुडान्तत्वे विकल्पः स्यात् इति। कुतः?। पत्न्यनुयाजस्य प्रतिषेधात्। ग्रंयुन्ता सन्तिष्ठते इति तावत् व्यक्तमेव वचनम्, अपरमपि वचनं न पत्नीः संयाजयन्ति इति। यदि ग्रंयुन्तैव नित्यं, पत्न्यनुयाजप्रतिषेधोऽनर्थकः स्यात् तस्मात् पत्न्यनुयाजप्रतिषेधेन क्रतुसंस्थानमुच्यते। कथम्?। प्रायणीयायां पत्नीसंयाजान् केवलान् न करोति, नान्यं न करोति इति। तथा आतिथ्यायामनुयाजान् केवलान् न करोति, नान्यं न करोति इति, अकर्त्तव्यपरिसङ्ख्यानार्थमेवेदं भिन्नमेव वाक्यद्वयं पूर्वाभ्यां वाक्याभ्यामिति।

नित्यानुवादो वा कर्मणः स्याद्शब्दत्वात् ॥३९॥

(सि०)

न त्वेतदस्ति, विकल्प इति, एक एव कल्पः ग्रंयुडान्तत्वम्। तत्र हि विशिष्टं वचनं, द्वितीयः कल्पो नास्त्येव। न हि तस्य वचनमस्ति। न च पत्न्यनुयाजप्रतिषेधकं क्रतुसंस्थानवाचकं, किन्तर्हि तन्नित्यानुवादः, नित्यप्राप्तं अनुवदति, यथा, नान्तरिक्षे न दिवि अग्निः चेतव्यः इति पूर्वाभ्यां सहैकवाक्यतैव अनयोः ग्रंयुन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयन्ति इति तथा

इडान्ता आतिथ्या सन्तिष्ठते नानुयाजान् यजन्ति इति। अत्र यत्नलाघवेन स्तुतिः। ननु प्रतिषेधवचनः क्रत्वङ्गसंस्थानं वदेत्। य एव हि श्रुतस्यार्थस्योत्सर्गे दोषः स एवाश्रुतकल्पनायाम्। तस्मात् शंयुडान्तैव स्यादिति॥ (१०। ७। १२ अ०)॥

प्रायणीयातिथ्ययोः पूर्वाभ्यामेव संयुड्भ्यां संस्थाधिकरणम्।

प्रतिषेधार्थवत्त्वात् चोत्तरस्य परस्मात् प्रतिषेधः स्यात्॥ ४०॥ (पू०)

इदमेवोदाहरणं, शंयुवन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयन्ति इति, इडान्ता आतिथ्या सन्तिष्ठते नानुजान् यजति इति। तत्र हौ शंयू हे इडे इति। तत्रायमर्थः सांशयिकः, किं परेण शंयुना शंयुवन्ता सन्तिष्ठते, उत पूर्वेण?। एवं, किं परया इडया इडान्ता सन्तिष्ठते, उत पूर्वया? इति। किं प्राप्तम्?। पूर्वाभ्यां शंयुडाभ्याम् इति। कुतः?। पूर्वाभ्यामपि संस्थापयता श्रुत्यर्थः कृतो भवति इति। कृते च शब्दार्थे कस्मादुत्तरान् पदार्थान् कुर्यात्? इति। उच्यते, उत्तराभ्यामपि संस्थापयन् शब्दार्थमेव करोति, तत्र नियमात् पूर्वाभ्यां संस्थापयन्न शब्दार्थं परिच्छिन्द्यात्, शब्दार्थं परिच्छेत्स्यामः, यदि उत्तराभ्यामपि संस्थापनं शब्दो वक्ष्यति, ततस्ताभ्यां

संस्थापयन् भूयांसमुपकारं लभते तस्मादनियमः, पूर्वाभ्यामुत्तराभ्यां वेति ।

एवं प्राप्ते ब्रूमः, उत्तराभ्यामिति । कुतः ? । निषेधार्थवत्त्वात्, [तदेव पत्नीसंयाजस्यानुयाजस्य च प्रतिषेधोऽर्थवान् भवति, यदि उत्तराभ्यां न संस्याप्येत, नैव पत्नीसंयाजानुयाजौ प्राप्नुतः, तस्मादुत्तराभ्याम् इति । ननु च प्रतिषेधस्य नित्यानुवादत्वमुक्तम् । उच्यते, न सत्यां गतौ न्याय्यं, तस्मान्न पूर्वाभ्यामिति । उच्यते, लिङ्गमेतदुपदिष्टं, न च लिङ्गं साधकं भवति, प्राप्तिरुच्यताम् ? इति, पत्नेऽपि हि लिङ्गस्य अर्थवत्ता स्यात्, अत्रोच्यते, इयं प्राप्तिः, यदा विशेषो नावगम्यते, ग्रंथुरन्ते यस्या अङ्करीतेः, सा ग्रंथुन्ता, एवम् ईडान्ता । सैषा अङ्करीतिर्विधीयते ग्रंथन्ता ईडान्ता च । सा च विधीयमाना अन्यानि अङ्गानि परिमृज्यते । कथम् ? । ग्रंथुन्तया अङ्करीत्या ईडान्तया च सङ्कीर्त्यमानया ग्रंथिडान्ततायां सत्याम् अन्यानि अङ्गानि न आकाङ्क्षान्ते अनाकाङ्क्ष्यमाणानि च नैकवाक्यतां यान्ति, अतोऽप्राप्तानीति गम्यते । नन्वेवं सति पूर्वाभ्यां ग्रंथिडान्तता न कञ्चिदर्थमधिकं साधयति इति । उच्यते, नैष दोषः, न हि तस्यार्थे पृथग्वाक्यं यस्य आनर्थक्यं परिजिहीर्ष्यते, अस्य वाक्यस्योत्तरान्तता प्रयोजनं, तस्मात् उत्तराभ्यां संस्था स्यादिति ।

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ॥ ४१ ॥

(मि०)

नैतदस्ति, उत्तराभ्यां शंयुडाभ्यां सन्तिष्ठते इति । पूर्वाभ्यामेव । कुतः ? । नेह शंयुवाल्लाया अङ्गरीतिर्भावो विधीयते, इडान्तायाश्च । किन्तर्हि संख्या विधीयते, शंयुडान्ता सन्तिष्ठते, प्रवर्त्तमाना शंयुडान्ता च जाता सन्तिष्ठते, न प्रवर्त्तते । तिष्ठत्खेव कर्त्तृषु सन्तिष्ठतीत्युच्यते । तत्र पूर्वाभ्यामुत्तराभ्यामिति विशेषे अनवगम्यमाने पूर्वाभ्याञ्च न प्रवर्त्तेत उत्तराभ्याञ्च । तदेव तत्र पूर्वाभ्यामेव संख्याने कृतं भवति । प्रतिषेधस्य नित्यानुवाद इत्युक्तम् ।

प्रतिषेधस्य त्वरायुक्तत्वात् तस्य च नान्यदेशत्वम्

॥ ४२ ॥ (यु०)

इतश्च पूर्वाभ्यां परं न कर्त्तव्यमिति । कुतः ? । त्वरायुक्तो हि प्रतिषेधोऽयं कृतः । कथम् ? । देवासुराः सत्यमभजन्त, अर्द्धं देवाः सत्यस्याभजन्त अर्द्धमसुराः, तदसुरैः सत्यमनूच्यमानं देवान् अपाक्रामत् ते प्रायणीयं निरवपन् तच्छंयुन्तमासीत् । अथ असुरा यज्ञमायंस्ततो यज्ञः तत्वर इति तमेवं कृत्वा त्वरितमाद्रियन्ते इति । तथा आतिथ्यं निरवदंस्तदिडान्तमासीदथा सुरा यज्ञमायंस्ततो यज्ञः तत्वरः इति तदिडान्तमेव कृत्वा त्वरितमाद्रियन्ते इति । त्वराकृतश्च पूर्वमपेक्षन्ते, नोत्तरम् । तस्मात् नान्यो देशः प्रतिषेधस्य । तस्माच्च पूर्वाभ्यामेव शंयुडाभ्यां परं न कर्त्तव्यमिति ॥ (१० । ७ । १३ अ०) ॥

षड्उपसद उपसादयन्ते इत्यादिना अपूर्वोपसत्कर्मविधानाधिकरणम् ।

उपसत्सु यावदुक्तमकर्म स्यात् ॥४३॥

(१म पू०)

अस्ति ज्योतिष्टोमः, तत्रेदमाम्नायते, षड्उपसद उपसादयन्ते इति, ताः प्रकृत्य आमनन्ति, अप्रयाजास्ता अननुयाजाः इति । तत्र संशयः, किं यावत् प्रतिषिद्धं तावन्न कर्त्तव्यम्, अन्यत्सर्वं कर्त्तव्यम् । अथ यावत् उपदिष्टं तावत् कर्त्तव्यम्, अन्यत् सर्वं न कर्त्तव्यम् । अथ अपूर्वा उपसदः ? इति । किं प्राप्तम् ?, उपसत्सु यावदुक्तं न कर्त्तव्यं, अप्रयाजास्ताः अननुयाजाः इति प्रयाजानुयाजानां प्रतिषेधं कृत्वा कृतार्थः यद्दोऽविशिष्टांशोदकप्राप्तान न वारयति । तस्मादविशिष्टं सर्वं कर्त्तव्यम् इति ।

स्रौवेण वा गुणत्वात् शेषप्रतिषेधः स्यात् ॥४४॥

(२य पू०)

न चैतदस्ति, प्रतिषिद्धं वर्जयित्वा सर्वं कर्त्तव्यमिति, यावदुपदिष्टं कर्त्तव्यम् । स्रौवेण आधारेण सर्वमन्यत् परिसङ्ख्यायते, अविशिष्टो ह्यसौ स्रौव आधारः पुनराम्नायते, न तत्र कश्चित् गुणो विशिष्टः श्रूयते, तस्मात्तेन तत् परिसङ्ख्यायते ।

अप्रतिषिद्धं वा प्रतिषिध्यप्रतिसवात् ॥ ४५ ॥

(२य पू० नि०)

न चैतदस्ति, यावदुक्तं कर्त्तव्यम्, अवशिष्टं नेति, किन्तर्हि सर्वं कर्त्तव्यं प्रतिषिद्धं वर्जयित्वा इति । एवं हि श्रूयते, अप्रयाजास्ता अननुयाजास्ताः इति, एवं प्रतिषेधं कृत्वा कृतार्थः शब्दो नान्यस्य बाधको भवितुमर्हति । यदुक्तं, निर्गुणं स्रोवाघारश्रवणमिति, प्रतिप्रसवोऽयं न परिमङ्क्षा । एवं श्रूयते, नान्यामाहुतिं पुरस्तात् जुहुयात् यदन्यामाहुतिं पुरस्तात् जुहुयादन्यन्मुखं कुर्यात् सुवेणाघारमाघारयतीति, नान्यामाहुतिं पुरस्तात् जुहुयात् प्राकृतिकीभ्यः । एता हि आघारादिका आहुतयः सर्वेष्टीनां मुखं, यदन्यामाहुतिम् औपसदीम् अग्न्यादिकां जुहुयादन्यन्मुखं कुर्यात् तस्मात् सुवेणाघारयति इति । आघारादिकान्याहुतीर्जुहोति इत्याघारादीनाम् अभावमाशङ्क्य पुनः प्रतिप्रसवोऽयम् आघारमाघारयति इति, नान्यत् करोति, किन्तर्हि आघारयति, न नाघारयतीति । तस्मान्न परिमङ्क्षा, प्रतिषिद्धं वर्जयित्वा सर्वं कर्त्तव्यम इति ।

अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ॥

॥ ४६ ॥ (सि०)

अथ वा अपूर्वा उपसदः, अनिज्या प्राकृतस्य शेषस्य, नित्यानुवादोऽयम्, अप्रयाजास्ता अननुयाजाः इति । मुख्यदेवतामनभीज्याम् उपदिश्य प्रधानदेवता विधीयन्ते, नान्यामाहुतिं पुरस्तात् जुहुयात् आग्नेय्या अग्निर्हि मुखम् इत्यभिधाय, यदन्यामाहुतिं पुरस्तात् जुहुयात् वैकृतीमन्यत् मुखं कुर्यादाग्नेय्या अग्निर्हि मुखं सुवेण आघारमाघा-

रयति नान्यं यजति अग्निमनीकं सोमं गल्यं विष्णुं जनम इति। तदेतदाघारेण निराकाङ्क्षीकृतं नान्येन प्रकृताङ्गेन सह एकवाक्यतामिति। अतः प्राप्ता मुख्यदेवता अनभीज्या अत्रोपदिश्यन्ते नान्यं यजति, तस्मादग्निः प्रथम इज्यते इति। (१०। ७। १४ अ०)।

वाक्यभेदेनैककपालेन इत्यादिना अपूर्वस्य अवश्यस्य विधानाधिकरणम्।

अवभृथे बर्हिषः प्रतिषेधात् शेषकर्म स्यात्॥

॥ ४७ ॥ (१म पृ०)

अस्ति ज्योतिष्टोमेऽवभृथः, वारुणैनैककपालेनाभृथमभ्यवयन्ति इति। तत्रैतदाम्नायते, अपबर्हिषः प्रयाजान् यजति। अपबर्हिषो अनुयाजो यजति इति। तत्रैषोऽर्थः सांशयिकः, किं, बर्हिर्मात्रं वर्जयित्वा अन्यत्सर्वं कर्त्तव्यम्, उत, आज्यभागाभ्यामन्यत् परिसङ्ख्यायते। अथवा अपूर्वोऽवभृथः? इति। किं प्राप्तम्? बर्हिर्मात्रं वर्जयित्वा शेषकर्म स्यात्। कुतः? बर्हिःप्रतिषेधात्, अपबर्हिषो अनुयाजो यजति इति बर्हिर्मात्रं प्रतिषिध्य कृतार्थः यष्टोऽन्यत् चोदकप्राप्तं न शक्नोति वारयितुं, तस्मादन्यत् स्यादिति। ननु आज्यभागौ यजति इति परिसङ्ख्यार्थं ग्रहणम्, अप्रसक्ताविज्यभागौ यजति इति। गुणार्थं तदन्यते स्म।

आज्यभागयोर्वा गुणत्वात् शेषप्रतिषेधः स्यात् ॥ ॥ ४८ ॥ (२य पू०)

न चैतदस्ति, शेषकर्म कर्त्तव्यमिति, किन्तर्हि शेषप्रतिषेधः स्यात् । कुतः ? । आज्यभागयोः श्रवणात्, अग्न, मन्तावाज्यभागौ यजति इति । ननु अग्न,मत्तागुणकविधानार्थं तत् इत्युक्तम् । नेत्याह, लिङ्गक्रमाभ्यां प्राप्तावेव अग्न,मन्तौ, अग्नय मधिष्टव अस, मे सोमो अब्रवीत् इति, ताभ्यामेतौ आज्यभागौ अग्न,मन्तावेव, निर्गुणमेवेदं वचनम इतरेषामङ्गानां परिमङ्गायकं भवितुमर्हति । यत्तु, अपबर्हिषः प्रयाजान् अपबर्हिषो अनुयाजौ यजति इति, परिमङ्गातानां प्रयाजानाम् अनुयाजयोश्च विधानार्थं भवतीति । तस्मात् शेषाणामेवाङ्गानां परिमङ्गेति ।

प्रयाजानां त्वङ्गशेषप्रतिषेधात् वाक्यशेषत्वं तस्मान्नित्यानुवादः स्यात् ॥४९॥ (२य पू० नि०)

तुशब्दः पक्षं व्यावर्त्तयति, न चैतदस्ति, परिमङ्गेति । त्रिर्दोषा परिमङ्गा इत्युक्तम् । किञ्च अपबर्हिषः प्रयाजान् यजति इति वाक्यशेषो नोपकल्पते, यदि प्रयाजान् यजति इत्येष विधिस्तदा बर्हिःप्रयाजोऽपि प्राप्नोति, तत्र अपबर्हिषः इत्येतत् नोपपद्यते । अथ बर्हिषः प्रतिषेधः, प्रयाजानां विधिर्नोपकल्पते, तचापाप्तस्य बर्हिषः प्रतिषेधोऽनुपपन्नः । उभयविधानं वाक्यमिष्यते, वाक्यशेषो नोपपद्यते, एकञ्चेदं वाक्यम् । तस्मान्न शेषपरिमङ्गा

आज्यभागयोर्ग्रहणं नित्यानुवादो गृह्यमेधीयवत् स्यात् ॥ ५० ॥ (सि०)

अथ वा अपूर्वोऽवभृथः, यद्वत् गृह्यमेधीयः, तद्वत् स्यात्। आज्यभागाभ्यां प्रत्यक्षश्रुताभ्यामेकवाक्यतामित्व निराकाङ्क्षो नान्यैः प्राकृतैरेकवाक्यतामेति। तस्मादपूर्वोऽवभृथः इति ॥ (१०। ७। १५ अ०) ॥

वाजपेयादौ यूपादीनां खादिरत्वादिनियमाधिकरणम्।

विरोधिनामेकश्रुतौ नियमः स्यात् ग्रहणस्यार्थवत्त्वात् शरवच्च श्रुतितो विशिष्टत्वात् ॥५१॥ (सि०)

अस्ति वाजपेयः, यदि वाजपेयेन स्वाराज्यकामं यजेत इति। अत्र श्रूयते, खादिरो यूपो भवति इति। तत्र संशयः, किं, खादिरो वा पालाशो वा रौहितको वा, उत, खादिर एव ? इति। तथा अन्यत्र श्रूयते, बृहत पृष्ठं भवति इति। तत्र संशयः, किं बृहद्वा पृष्ठं, रथन्तरं वा, उत, बृहदेव ? इति। चैधानव्यायां श्रूयते, यवमयो मध्यमः इति। तत्र संशयः, किं यवमयो वा व्रीहिमयो वा, उत, यवमय एव ? इति। सर्वेष्वेषु किं प्राप्तं, विरोधिनाम् अन्यतमस्मिन् श्रूयमाणे नियमः स्यात्, खादिर एव यूपः, बृहदेव पृष्ठं, यवमय एव मध्यम इति। कुतः ?।

ग्रहणस्यार्थवत्त्वात्, एवं हृहत्खदिरयवानां ग्रहणमर्थवद्भविष्यति, इतरथा। प्राप्तानुवादमात्रमनर्थकं स्यात्। युत्या विशिष्टाः खदिरादयः चोदकप्राप्तान् पलाशादीन् बाधेरन्, शरवत्, यथा शरमयं बर्हिर्भवति इति शरेषु स्रुतेषु कुशा निवर्त्तन्ते, एवमिहापीति।

उभयप्रदेशान्नेति चेत् ॥ ५२ ॥ (पू०)

इति चेत् पश्यसि, उभयं हि प्रदिशति चोदकः, खादिरं पालाशञ्च, हृहत् रथन्तरञ्च, व्रीहीन् यवांश्च। केन इदानीं, चोदकेन तुल्ये प्रदेशे सति पलाशादयो निवर्त्तिताः? खदिरग्रहणम् अशक्यं परिसङ्ख्यातुं, चिदोषत्वात् परिसङ्ख्याया इत्युक्तम्। तस्मान्न नियमो विकल्प एवेति।

शरेष्वपीति चेत् ॥ ५३ ॥ (आ०)

यद्युभयप्रदेशादुभयं भवतीति अध्यवसीयते, शरेष्वपि स्रुतेषु कुशा नैव निवर्त्तेरन्। इति स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति स्म।

विरोध्यग्रहणात्तथा, शरेष्विति चेत् ॥ ५४ ॥ (आ० नि०)

इति चेत् पश्यसि, एष न्याय उच्यमानः शरेषु अपि दोषं प्रसञ्जयति इति। न शरेषु किञ्चन दोक्ष्यति, तत्र कुशा निवर्त्तन्त इति तथा स्यात्। कुतः?। विरोध्यग्रहणात्, न हि विरोधिषु शरेषु अङ्गीक्रियमाणेषु कुशाः शक्या अङ्गत्वे नोपादातुम्। तस्मात् कुशा निवर्त्तन्ते इति।

तथेतरस्मिन् ॥ ५५ ॥ (पुनः आ०)

तथा इतरस्मिन् अपि खदिरादौ विरोधिनि अङ्गीक्रियमाणे न शक्याः पलाशादयोऽङ्गत्वेनोपादातुं, तस्मान्निवर्त्तिष्यन्त इति।

श्रुत्यानर्थक्यमिति चेत् ॥ ५६ ॥ (आ० नि०)

इति चेत् पश्यसि, विरोध्यग्रहणात् पलाशादीनां निर्हृत्तिर्भविष्यति इति। खोदकश्रुतेरानर्थक्यं स्यात्, प्रापयति हि खोदकः पलाशादीनि। स हि तुल्यः खदिरादिषु पलाशादिषु वा। तदुक्तम, अग्रहणादिति चेत्। न तुल्यत्वात्०१) । ७। ३०—३१ सू०) इति। न च शक्यं वक्तुं, खदिरादिभिः प्रयोगवचन एकवाक्यतामेतीति बध्नाति। प्रयोगवचनेन हि स श्रूयते, स श्रूयमाणः परम्परया पशुयागं यास्यतीति। अथेदानीं यागप्रयोगवचनं तद्विशिष्टान् यागान् यास्यति, तेषु पलाशादयो विशेषाः खोदकप्राप्ता न खदिरादिभिर्निवर्त्तिताः। तस्माद्विकल्प इति।

ग्रहणस्यार्थवत्त्वादुभयोरप्रतिपत्तिः स्यात् ॥ ५७ ॥ (उ०)

बध्नाति, प्रयोगवचनो हि प्रत्यक्षश्रुतेन खदिरैकवाक्यतामेति, तस्मिन् निराकाङ्क्षे न पलाशः प्रवर्त्तिष्यते, तस्मात् खदिरविशिष्टः पशुयागो यागप्रयोगवचनेन गृहीतो न पलाशविशिष्टः, तस्मात् खदिरस्यैव वृत्तिर्नोभयोः। एवं

रथन्तरे यवमये च । तस्मात् खदिरादीनां नियमः, नैष पलाशादिभिर्विकल्पः इति ॥ (१० । ७ । १६ अ०) ॥

काम्येष्टिषु प्राकृतद्रव्यदेवतस्य निवर्त्त्यधिकरणम् ।

सर्वासाञ्च गुणानामर्थवत्त्वात् ग्रहणमप्रवृत्तं स्यात् ॥ ५८ ॥ (सि०)

काम्या इष्टयः श्रूयन्ते, आग्नेयमष्टाकपालं निर्वपेद् कामः, अग्नीषोमीयमेकादशकपालं निर्वपेत् श्यामाकं ब्रह्मवर्चसकामः, ऐन्द्रमेकादशकपालं निर्वपेत् प्रजाकामः इति । तत्रैतेषु यागेषु अयमर्थः सांग्रहिकः, किं प्राकृतं द्रव्यदेवतं निवर्त्तते, उत, न निवर्त्तते ? इति । सर्वासाम एवंजातीयकानां चोदनानामुत्पन्नानां द्रव्यदेवतेनैव सहोत्पत्तिः, तस्योत्तरकालं चोदकः । तस्मादगृहीतद्रव्यदेवतं चोदकेन, विधिनैव प्राप्ते द्रव्यदेवतं प्रति निराकाङ्क्षे यागे अवशिष्टानि अङ्गानि चोदकः प्रापयिष्यति इति । अथ यदुक्तम् अग्रहणात् ग्रहणम् (१० । ७ । ३० सू० भा०) इति, तदिह सिद्धम् ।

अधिकं स्यादिति चेत् ॥ ५९ ॥ (पू०)

इति चेत् पश्यसि, विधिना प्राप्तत्वादवशिष्टानि चोदकः प्रापयिष्यति इति । नैतदेवम्, अधिकं स्यात् । उक्तमेतत् (१० । ७ । ६१ सू० भा०) तुल्यश्चोदकः सर्वेषु अङ्गेषु,

न हि स पदार्थमाकाङ्क्षति, अदृष्टार्थकृतं प्रकारमाकाङ्क्षति, तस्मात् द्रव्यदेवतमपि चोदकः प्रापयति। प्राप्ते वचनप्रामाण्यात् अधिकं भविष्यति, एकं वचनप्रापितम्, अन्यत् चोदकेनेति।

नार्थाभावात् ॥ ६० ॥ (उ०)

न एतदेवम्, अधिकं कर्त्तव्यमिति। कुतः ?। अर्थाभावात्, प्रयोजनाभावादित्यर्थः। सत्यं, चोदकप्राप्तं प्रत्यक्षश्रुत्या न प्रतिषिद्धं द्रव्यदेवतं, किन्तु परार्थं तत् यागनिर्वृत्तये, स च याग एकेनैव द्रव्येण एकया देवतया निर्वर्त्तयितव्यः श्रूयते, आग्नेयमष्टाकपालं निर्वपेदुक्षामः इत्येवमादि। तस्मिन् सहायापेक्षे कल्प्यमाने निर्देशो बाध्येत। अथ तेन निर्वर्त्तते, चोदकप्रापितस्य न किञ्चिदस्ति प्रयोजनमिति तत् श्रुतमपि सिद्धत्वात् प्रयोजनस्य, न करिष्यते ॥ (१० । ७ । १७ अ०) ॥

सीमापीणपशौ खादिरयूपस्य नियमाधिकरणम्।

तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ॥ ६२ ॥ (सि०)

क्वचित् कर्मविशेषे श्रूयते, औदुम्बरो यूपो भवति। तत्र संशयः, किं प्राकृतमत्र यूपद्रव्यं बाध्यते, उत प्राप्यते ? इति। किं प्राप्तम् ?, एकार्थविकारे अस्मिन् औदुम्बरे,

एकार्थत्वात् खदिरादिभिः, विकारश्च,तत्र प्राकृतस्य खदिरादेः अप्रवृत्तिः, यथा प्राकृतस्य द्रव्यदेवतस्य पूर्वस्मिन् अधिकरणे, तथा अस्मिन् खादिरस्य यूपद्रव्यस्य अप्रवृत्तिः । प्रवृत्तौ हि तस्य विषमनिष्ठा विकल्पः स्यात् चोदकप्राप्तस्य प्रत्यक्षश्रुतस्य च, न चैष न्यायः । तस्मात् अप्रवृत्तिः ।

यावच्छ्रुतीति चेत् ॥ ६२ ॥ (पू०)

इति चेत् पश्यसि, विकल्पः सदोष इति । समुच्चयो भवतु, उभयस्मिन् सह नियुज्यतां पक्षः, तदा चोदकात् ग्रहो भविष्यति ।

न प्रकृतावशब्दत्वात् ॥ ६३ ॥ (उ०)

न एतदेवं, केवले हि औदुम्बरे नियोजनं युज्यते, केवले खादिरे प्रकृतौ, खादिरे बध्नाति इति । उभयस्मिंश्च बध्नद्रव्ये न प्राकृतं वाक्यं, न च प्रत्यक्षश्रुतं, तेन समुच्चयस्य प्रमाणमेव नास्ति, अतः प्राकृतं यूपद्रव्यं निवर्त्तते इति ॥ (१० । ७ । १८ अ०) ॥

बध्नवचेलकामेर्वीहिभिर्यजेत यागाधिकरणम्

विकृतौ त्वनियमः स्यात् पृषदाज्यवत् ग्रहणस्य गुणार्थत्वात् उभयोश्च प्रदिष्टत्वात् गुणशास्त्रं यदेति स्यात् ॥ ६४ ॥ (पू०)

सौमारौद्रं घृते चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकामः, सौमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणाम् अभिचरन्, नैर्ऋतं चरुं निर्वपेत् कृष्णानां व्रीहीणां, सौर्यं चरुं निर्वपेत् शुक्लानां व्रीहीणाम् इति। तत्र संशयः, किं व्रीहिभिर्यवैर्वा यष्टव्यम्, उत व्रीहिभिरेव ?। किं प्राप्तम् ?, विकृतौ तु विरोधिनामन्यतमस्मिन् गृह्यमाणे अनियमः स्यात्, व्रीहिभिर्यवैर्वा इति। कुतः ?। यवस्य गुणार्थत्वात्, तस्य हि व्रीहिर्यवश्च गुणार्थं, न यागसम्बन्धार्थं, शुक्ला व्रीहयो भवन्ति, यागस्तु उभाभ्यामपीति। यथा पृषदाज्येनानुयाजान् यजति इति आज्यं पृषत्तासम्बन्धार्थं भवति, एवमिहापि व्रीहयः शुक्लगुणसम्बन्धार्थाः, न यागसम्बन्धेन अन्यपरिसङ्ख्यानार्थाः। तथा यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्या दृश्येतत् श्रवणमुपपद्यते, यदि एवंजातीयकेन प्राकृतं न निवर्त्येत, ततः पञ्चावत्तेन चतुरवत्तेऽनिवर्त्तिते यद्यपि चतुरवत्ती इति दर्शनं युक्तं भवति। न चानर्थको गुणोपदेशो भवति, उभयोः प्रदिष्टत्वात् उभये व्रीहियवाः चोदकेन प्राप्ताः विकल्प्यन्ते। यदा व्रीहयः, तदा गुणश्रुतम्। अव्रीहिपक्षे असम्भवादर्थात् निवर्त्तते। तस्माद्विकल्पः इति।

ऐकार्थ्याद्वा नियम्येत श्रुतितो विशिष्टत्वात् ॥ ६५ ॥ (सि०)

एकार्था हि व्रीहियवाः, तत्र व्रीहीणां श्रुतत्वात् यवा

नेव प्राप्नुवन्ति। ननूक्तं गुणसम्बन्धार्था हि व्रीहयः इति। नैतदेवं, यदि गुणसम्बन्धार्था भवेयुस्ततो न नियमः स्यात्, न तु गुणसम्बन्धार्थाः, विकारसम्बन्धे हि षष्ठी भवेत् अतिरिक्ते प्रातिपदिकार्थे, तेन विकारविशेषणं श्रुत्या भवति, गुणविशेषणं वाक्येन, श्रुतिश्च वाक्यादलीयसीति, तस्मात् श्रुत्या व्रीहयो यागेन सम्बध्यमानाः समानार्थान् यवानिवर्त्तयेयुः।

विरोधित्वाच्च लोकवत् ॥ ६६ ॥ (यु०)

विरोधिनश्चैते। कथम्?। ये हि एकस्मिन् कार्य्ये विकल्पेन साधकाः श्रूयन्ते, ते परस्परेण विरोधिनो भवन्ति, विरोधिनाश्च न सह प्रवृत्तिः, लोकवत्, यथा, मत्स्यान् न पयसा समश्नीयात् इति यद्यपि सगुणा मत्स्या भवन्ति तथापि पयसा सह न समश्नन्ते। तस्मात् सगुणा अपि व्रीहयो यवानिवर्त्तयन्त्येव।

क्रतोश्च तद्गुणत्वात् ॥ ६७ ॥ (आ० नि०)

यदि व्रीहीणां विकारेण सम्बन्धः, कथम् एषां गुणेनापि सम्बन्धो भविष्यति? इति। अत्रोच्यते, नैवेषां गुणेन सम्बन्धः श्रुत्या वाक्येन वा, नापि गुणस्य व्रीहिभिः, कथं तर्हि? क्रतोः तद्गुणत्वात्, क्रतुरयं शुक्लगुणः श्रूयते क्रष्णगुणश्च, तच्चैकवाक्यत्वात् एकस्मिन् क्रतावर्थेन द्रव्यगुणौ सम्बध्येते, तेनार्थभेदोऽपि परिहृतो भवति।

विरोधिनाश्च तत्श्रुतावशब्दत्वात् विकल्पः स्यात् ॥ ६८ ॥ (२यु०)

विरोधिनाञ्च अन्यतमस्मिन् प्रत्यक्षे श्रूयमाणे अन्यस्मिंश्च चोदकप्राप्ते अप्रत्यक्षत्वात् प्रत्यक्षे विरोधिनि सति चोदकस्य अन्याय्यो विकल्पः स्यात्। तस्मादपि नियमः।

पृषदाज्ये समुच्चयात् ग्रहणस्य गुणार्थत्वम्॥

॥ ६९ ॥ (आ० नि०)

पृषदाज्ये तु युक्तं, न हि तत्र केनचिद्विरोध आज्यस्य, तेन न पार्श्विकमाज्यं, ततस्तत्र दध्ना आज्यसमुच्चयः। यतः पृषत्तासञ्जननार्थं दधि, तेन न पार्श्विकं दधि आज्येन च समुच्चय इति।

यद्यपि चतुरवत्तीति तु नियमे नोपपद्यते॥

॥ ७० ॥ (आ०)

अथ यदुक्तं, यत्रैवंजातीयकेषु नियमो भवेत्, यद्यपि चतुरवत्ती इति चतुरवत्तदर्शनं नोपपद्यते इति, तत्परिहर्त्तव्यमिति।

क्रत्वन्तरे वा तच्छायत्वात् कर्मभेदात्॥ ७१॥

(आ० नि०)

क्रत्वन्तरे एव वा, दर्शपूर्णमासयोश्चतुरवत्तदर्शनं भविष्यति। यद्यपि दर्शपूर्णमासयोश्चतुरवत्ती यजमानः, तद्यापि पञ्चावत्तैव वपा भवति इति, अन्यस्मिन् कर्मणि चतुरवत्तम्, अन्यस्मिन् पञ्चावत्तं, यत्रैवंजातीयकेषु नियमस्तत्रापि चतुरवत्तदर्शनमुपपद्यत इति। (१०।७। १८ अ०)।

पश्चावत्तैव वपा कार्य्येत्यनेनाङ्गेऽपि पश्चावत्तविधानाधिकरणम् ।

यथाश्रुतीति चेत् ॥ ७२ ॥ (पू०)

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यत् अग्नीषोमीयं पशुमालभते इति । तचेदमाम्नायते, यद्यपि चतुरवत्तो यजमानः पश्चावत्तैव वपा कार्य्या इति । तचेषोऽर्थः सांग्रयिकः, किं वपायां श्रूयमाणं पश्चावत्तम् अङ्गापूर्वं चतुरवत्तं निवर्त्तयति, उत न ? इति । किं प्राप्तम् ? इति चेत् संशयः, न इति । कुतः ? । यस्मिन् श्रूयते पश्चावत्तं, तचैव चतुरवत्तं निवर्त्तयति, नान्यत्र । यथा क्रत्वन्तरे न निवर्त्तयति, एवमङ्गापूर्वेष्वपि पश्चावत्तश्रुतिर्न निवर्त्तयितुमर्हति ।

न चोदनैकत्वात् ॥ ७३ ॥ (सि०)

नैतदेवम्, एका होषा चोदना यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तच्च प्रकरणे पश्चावत्तं श्रुतम्, अतः प्रकरणादङ्गापूर्वं भविष्यति । आह, ननु वाक्याद्वपायां भवितुमर्हति इति । न इत्युच्यते, वपा हि द्रव्यं, न तत्सम्बन्धे प्रयोजनमस्तीति । उच्यते, पश्चावत्तां वपाप्रयोगवचन उपसंहरिष्यति, तथा च दोषो भविष्यति इति । अथोच्यते, एवं सत्यपि अङ्गापूर्वं पश्चावत्तं सिध्येत् । कथम् ? । एका हि सा चोदना, अङ्गयागो वपायागश्च, तेन चेत् पश्चावत्तं सम्बध्यते, तदा अङ्गेष्वपि भवितुमर्हति । ननु च वपासम्बन्धात् वपैव पश्चावत्ता न अङ्गानीति ।

उच्यते, नैतदेवं वचनं, वपैव पश्चावत्तेति, कथन्तर्हि पश्चावत्तेव वपेति, यत एवकारकरणं ततोऽन्यत्रावधारणं, न चाविशेषेण या पश्चावत्तप्राप्तिः, सा शक्या वपासम्बन्धेन निवर्त्तयितुं, निवर्त्तकस्य शब्दस्याभावात्। तस्मादङ्गेषु न चतुरवत्तम्।

अपि च, एवंजातीयकेषु अङ्गेषु पश्चावत्ते जाते ततोऽवरा चोदना, तानि हिङ्हिरवद्यति इति, वपाग्रहणं तत्र हविर्लक्षणार्थं, प्राधम्यात् अवमरप्राप्तं श्रूयते, विधित्सिते हि तस्मिन् वाक्यभेदप्रसङ्गः। तस्मादङ्गेष्वपि पश्चावत्तमेवेति।

इति श्रीभट्टशबरस्वामिविरचिते मीमांसाभाष्ये दशम स्याध्यायस्य सप्तमः पादः॥

मीमांसा-दर्शने

दशमे अध्याये अष्टमः पादः।

प्रदेशानारभ्य विधानमर्थानिषेधस्य पर्युदासताधिकरणम्।

प्रतिषेधः प्रदेशेऽनारभ्य विधाने च प्राप्तप्रतिषिद्धत्वात् विकल्पः स्यात्॥ १॥ (पृ०)

प्रतिषेधः श्रूयते चोदकेन प्रदिष्टे धर्मे, क्वचिदनारभ्य वाक्येन प्राप्ते। चोदकेन प्रदिष्टे महापितृयज्ञे न होतारं

वृणीते नार्षेयम् इति । तथा, अनारभ्य-वादेन प्राप्ते, आश्रावयेति चतुरक्षरम् अस्तु, औषंडिति चतुरक्षरं, यजेति द्व्यक्षरं, ये यजामहे इति पञ्चाक्षरम् । द्व्यक्षरो वषट्कारः, एष वै प्रजापतिः समदर्शो यज्ञेषु अन्वायत्ते इति । ततो नानुयाजेषु ये यजामहं करोति इति । तत्रायमर्थः सांप्रयिकः, किं प्रदेशानारभ्य वादयोः प्रतिषेधः स च विकल्पः, उत, पर्य्युदासः ? इति । किं प्राप्तम् ? विकल्पः इति, प्राप्तिप्रतिषेधयोः प्रमाणवत्त्वात्, उभौ हि प्राप्तिप्रतिषेधौ प्रमाणवन्तौ प्राप्तिस्तावत् प्रमाणवती, महापितृयज्ञेन यजेत प्रकृतिवत् इति । तथा, एष वै प्रजापतिः समदर्शो यज्ञेष्वन्वायत्ते इति भवति वाक्यं प्राप्तेः, प्रतिषेधमनपेक्ष्यमाणं प्रमाणभूतम् । तथा, प्रतिषेधः प्रमाणवान्, न होतारं वृणीते नार्षेयं, मृत्योर्वै नानृत्सृजति इति । तथा, नानुयाजेषु ये यजामहं करोति इति । सर्वेषु यजिषु ये यजामहक्रिया प्राप्ता, न करोत्यनुयाजेषु इति प्रतिषिध्यते । ये यजामहः कर्त्तव्य इतिवचनात् स ये यजामहकः पर्य्यायः फलवानिति गम्यते, न कर्त्तव्यो ये यजामहे इति वचनात् अ ये यजामहकः प्रत्यायः फलवानिति गम्यते । उभयोः प्रामाण्यादुभयथापि फलमिति गम्यते, तस्माद् विकल्पः । एवं होत्रार्षेयवरणेऽपि । तस्मात् प्राप्तप्रतिषिद्धत्वात् विकल्पः स्यात् ।

अर्थप्राप्तवदिति चेत् ॥ २ ॥ (आ०)

इति चेत् अवगम्यते, विकल्पः स्यादिति, तत्र अर्थ-

प्राप्तवत् स्यात्, तद्यथा लोके, अर्थप्राप्ते यत्र प्रतिषेधो भवति, न विषं भक्षयितव्यं, न सर्पाय अङ्गुलिर्देया, न कण्टकः पादेनाधिष्ठेयः इति, अक्रियैव तस्यार्थस्य भवति, न विकल्पः, तेन मन्यामहे, विधिप्रतिषेधयोः प्रतिषेधो बलीयानिति, प्राप्ते हि विधौ प्रतिषेधो भवति, येन च नाम प्राप्ते यदुच्यते, तत् तस्य बाधकं भवति। तस्माद् क्रियैव अनुयाजेषु ये यजामहस्य, महापित्वयज्ञे च होत्रा-र्षेयवरणस्येति।

न, तुल्यहेतुत्वादुभयं शब्दलक्षणम्॥ ३॥

(आ० नि०)

नैतदेवं, तुल्यो हि हेतुरिह प्राप्तेः प्रतिषेधस्य च. उभयं शब्दलक्षणं, प्राप्तिरपि प्रतिषेधोऽपि, प्राप्तिरपि प्रतिषेधे प्राप्ते, प्रतिषेधोऽपि प्राप्ते प्राप्तायाम्। लोके पुनरयम् अर्थलक्षणं प्रत्यक्षतो गम्यमानं गुणदोषकरं, तत्र विधिप्रतिषेधयोर्यतरो गुणवान् सोऽनुष्ठीयते। न तु शब्दलक्षणे गुणदोषौ शक्येते अवगन्तुम्। तस्मात् यथात् वाक्येन प्राप्तं, तत्तदुभयमवधार्येत, उभौ च प्राप्तिप्रतिषेधौ प्राप्नुतः। तस्मात् विकल्पस्तत्र नेति।

अपि तु वाक्यशेषः स्यादन्याय्यत्वादिकल्पस्य विधीनामेकदेशः स्यात्॥ ४॥ (मि०)

अपि तु इति पक्षव्यावृत्तिः। वाक्यशेषः प्रतिषेधः

प्रदेशानारभ्यवादयोः। नैवम् अभिसम्बन्धः, अनुयाजेषु ये यजामहे न कर्त्तव्याः इति. कथन्तर्हि, नानुयाजेषु इति, नञश्चोऽनुयाजशब्देन सम्बध्यते, न करोतिना। किमतः, यद्येवम् १। नानुयाजेष्वित्येतावत् अपरिपूर्णं वाक्यं तत्साकाङ्क्षं पूर्ववाक्यैकदेशेन सम्बध्यते, यदेतत् ये यजामहं करोतीत्युक्तं, तत् न अनुयाजेषु, यावदुक्तं स्यात्, अनुयाजवर्जितेषु यजतिषु ये यजामहं करोति इति। तस्माद् विधिरेव पर्य्युदस्तानुयाजकः, नास्ति प्रतिषेध इति न विकल्पो भविष्यति। महापित्रयज्ञेऽपि प्रकृतिवत् इतिवचनात् ह्रीवार्षेयवरणमिह कर्त्तव्यं प्राप्तम। तदुच्यते, प्रकृतिवत् कर्त्तव्यं, वरणं वर्जयित्वेति, नञश्चोऽत्र क्रियतेऽर्थेन सम्बध्यते, प्रत्ययार्थस्तु अनुवादः, यदत्र प्रकृतिवत् कर्त्तव्यं तद्वरणं वर्जयित्वेति।

किमर्थं पुनरनुयाजैर्हविर्धात्वर्थेन च नञश्चः सम्बध्यते? इति। उच्यते, अन्याय्यत्वादिकल्पस्य, अन्याय्यो हि विकल्पः। कथम्? इह यजतिषु ये यजामहं करोति इत्युच्यते, यद्येवम् अवगम्यते, न शक्यः स विना ये यजामहेन यजतिरभिनिर्वर्त्तयितुं, तत्र प्रतिषेधवचनमनर्थकं, प्रतिषेधेऽपि विज्ञाते विधिवचनमनर्थकम्। तस्मादन्याय्यो विकल्पः। ननु अन्यतरस्य विधेरानर्थक्यप्रसङ्गादिकल्प आश्रयणीयो भवति। उच्यते, यत्रान्यतरत् आनर्थक्यमापद्यते, कल्पेतापि तत्र विकल्पः, यत्र न केनचिदपि प्रकारेणार्थवत्ता सम्भवति। इह तु अनुयाजसम्बन्धपर्य्युदासेनार्थवत्ता, तस्मान्न विकल्पः।

आह, ननु अनुयाजसम्बन्धे नञ्शब्दस्य समासः प्राप्नोति, नित्यो हि अस्य नञ्शब्दस्य सुबन्तसम्बन्धे न समास इति वार्त्तिककारो भगवान् कात्यायनो मन्यते स्म, वाक्यनानर्थक्यञ्च स्वभावसिद्धत्वात् इति। नैवं, भगवान् पाणिनिः, स हि विभाषा (२।१।११ सू०) इति प्रकृत्य इदमं समाममुक्तवान्, सदादित्वाच्च पाणिनेर्वचनं प्रमाणम्, असदादित्वाच्च कात्यायनस्य। असदादौ हि विद्यमानमपि अनुपलभ्य ब्रूयात्। तस्मात् पर्य्युदास इति॥ (१०।८।१ अ०)॥

न तौ पशौ करीतीत्यादिनिषेधस्यार्थवादताधिकरणम्।

अपूर्वे चार्थवादः स्यात्॥ ५॥

स्तो दर्शपूर्णमासौ, तत्राज्यभागौ प्रकृत्य समामनन्ति न तौ पशौ करोति न सोमे इति। तत्रायमर्थः सांशयिकः, किं पर्य्युदासः, उत, प्रतिषेधः, अथ वा अर्थवादः? इति। किं प्राप्तम्? यथा पूर्वत्र पर्य्युदासस्तथा तावत् पर्य्युदासो नावकल्पते। कस्मात्? दर्शपूर्णमासयोरेतत् श्रूयते, तत्र कः प्रसङ्गो यत् सोमे स्यात्, यदि सोमः पर्य्युदस्येत, सम्बन्ध एव न स्यात्, सोमवर्जितयोर्दर्शपूर्णमासयोः इति, तस्माच्चोदकप्राप्तयोः सोमे प्रतिषेधः। ननु अपूर्वः सोमः, नैव तत्र चोदकेनाज्यभागौ प्राप्तः। उच्यते, लक्षणार्थः सोमशब्दो भविष्यति, सोमिकेषु दीक्षणीयादिषु पशुबन्धमात्रे च न कर्त्तव्यौ इति।

एवं प्राप्ते ब्रूमः, अपूर्वे चार्थवादः स्यात् इति, अपूर्वे सोमे नैव आज्यभागौ प्राप्नुतस्तस्माच्च प्रतिषेधः। अथ दीक्षणीयादीन् सोमशब्दो लक्षयति। तत्रायमेव दोषो भवति यल्लक्षणा। अपि च प्रागप्रतिषिद्धत्वाद्दीक्षणीयादिषु विकल्पः प्राप्नोति, विकल्पश्चान्याय्य इत्युक्तं, तस्मादसम्भवति अस्मिन् विकल्पो भविष्यति, सम्भवति चायं, तौ न पशौ करोति इत्यस्यार्थवादत्वेन। कः पुनरत्र ?। प्रशंसार्थः, सोमे आज्यभागौ न क्रियेते पशावपीति, तद्यथा आदित्यो यूपः इति यज्ञे क्रते तेजःसामान्यादुच्यते, एवमिहापि पशौ आज्यभागौ कथं न क्रियेयाताम् ? इति तदर्था प्रशंसा इति ॥ (१०। ८। २ अ०)॥

नातिरात्रे ग्रहाति षोडशिनमित्यादिनिषेधस्य विकल्पकल्पतायधिकरणम्।

शिष्ट्वा तु प्रतिषेधः स्यात् ॥ ६ ॥

आह, प्रथमेऽधिकरणे नञ्शब्दः पर्य्युदासार्थः, द्वितीये तु अर्थवादार्थः। अथ किंलक्षणकः प्रतिषेधः ? इति, लक्षणमुच्यते, शिष्ट्वा तु प्रतिषेधः स्यात्, यथा नातिरात्रे ग्रहाति षोडशिनम् इति, न तत्र शक्यं वक्तुं, पर्य्युदास इति, सम्बन्ध एव हि न स्यात्, अतिरात्रवर्जितातिरात्रे ग्रहाति षोडशिनमिति। नापि कस्यचिदर्थवादत्वेन सम्भवति, तस्मात् न ग्रहातीत्यत्र सम्बन्धः।

ननु परस्परं विरुद्धौ विधिप्रतिषेधौ न सम्भवतः उच्यते, वचनप्रामाण्यात् प्रतिषेधो विधिं बाधित्वा भविष्यति, विधिरपि प्रतिषेधं, न अन्या गतिरस्तीति पक्षे मिथ्याप्रत्ययः कल्पयिष्यते, तदा विधिर्यदा न प्रतिषेधः, तदा प्रतिषेधो यदा न विधिरिति । ननु सर्वदा विधिः प्रतिषेधश्च प्राप्नोति । उच्यते, उक्तमेतत् वचनप्रामाण्यात् विरोधाच्च मिथ्याप्रत्ययः प्रयोगवचनं एकं कल्पं गृहीत्वा न द्वितीयमपि गृह्णातीति, तस्मादन्यतरेण कल्पेन सिध्यतीति । ननु कल्पान्तराभावे वैगुण्यम् । अत्रोच्यते, सत्यं वैगुण्यं, वैगुण्येऽपि तल्लिङ्गेनैव वाक्यात् प्रमाणादवगम्यते । तस्माददोषः । यत्र पुनरन्या वचनव्यक्तिरस्ति वाक्यस्य, तत्र न विकल्पो भवति, यथा नानुयाजेषु ये यजामह करोति इति । (१० । ८ । ३ अ०) ।

अनाहुतिर्वै जर्तिलाश्वेत्यादिनिषेधस्यार्थवादत्वाधिकरणम् ॥

न चैतन्यं प्रकल्पयेत् प्रकृत्यावर्थवादः स्यादानर्थक्यात् परसामर्थ्याच्च ॥ ७ ॥

इदं समाम्नायते अग्निहोत्रे, जर्तिलयवाग्वा वा जुहुयात् गवेधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति न आरण्यान् इति । अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च, गवेधुकाश्च पयसा अग्निहोत्रं जुहुयात् इति ।

अत्र सन्देहः, किं जर्त्तिलयवाग्वा गवेधुकयवाग्वा वा जुहोति इति विधिः, अनाहुतिर्वै जर्त्तिलाश्च गवेधुकाश्च इति प्रतिषेधः। अथ वा उभौ एतौ अर्थवादार्थौ, पयसा अग्निहोत्रं जुहोति इति विधिः? इति। किं प्राप्तम्?, जर्त्तिलयवाग्वेति विधिः, विधिशब्दस्य प्रत्यक्षत्वात्, अनाहुतिरित्यपि प्रतिषेधः प्रत्यक्षः। पयसा अग्निहोत्रं जुहोतीति अपरो विधिः, प्रत्यक्षत्वादेव। एवं सति विकल्पः, जर्त्तिलयवाग्वा गवेधुकयवाग्वा वा होतव्यं, न वा ताभ्यां, पयसा होतव्यम् इति। न चात्र पर्य्युदासोऽवकल्पते, न हि नञ्शब्दस्य जर्त्तिलयवाग्वा गवेधुकयवाग्वा वा सामर्थ्यमस्ति, आहुतिशब्देन सह समस्तत्वात्, कल्प्यमाने वा सामर्थ्ये सम्बन्ध एव न स्यात्, अजर्त्तिलयवाग्वा जर्त्तिलयवाग्वा जुहोति इति, अनर्थकस्य पर्य्युदासे विधिर्भवेत्, कृत्स्नस्य पर्य्युदस्तत्वात्। क्षीरविधाने च पर्य्युदासानर्थक्यं जर्त्तिलगवेधुकानाम् अप्राप्तत्वात् तस्माद्विकल्प इति।

एवं प्राप्ते ब्रूमः, भवेदयं प्रतिषेधेन विकल्पः, न चेदन्यं विधिं प्रकल्पयेत्। पयसा अग्निहोत्रं जुहोति इत्यस्य विधेः प्रकृतौ गवेधुकहोमवचनमनाहुतिवचनमप्यर्थवादार्थं स्यात्, आनर्थक्यात्, अनर्थको हि भवति तदा प्रतिषेधः, यदा हि पयसा जुहोति। अर्थादेव तदा अनाहुतिर्जर्त्तिला गवेधुकाश्च भवन्ति। अथ कथम् असावनाहुतिः, या यज्ञे श्रूयते?। परसामर्थ्यात्, परेण च पयसा अग्नि

होत्रं जुहोति इत्यनेन विधिना सामर्थ्यं जर्त्तिलगवेधुक-विधेः प्रतिषेधस्य च भवति, तस्मात् सर्वमेकं वाक्यम्। कथम्?। जर्त्तिलयवाग्वा जुहुयात् गवेधुकयवाग्वा वा इति साक्षात्निन्दावचनेनैवैतत् सम्बध्यते, अनाहुतिर्वै जर्त्तिलाश्च गवेधूकाश्चेति या च तत्रिन्दा, सा पयोविधि-प्रशंसार्था। कथम्?। जर्त्तिलगवेधुकाहुतिर्गुणवती, न तत्र ग्राम्याः पशवो हिंस्यन्ते, न आरण्याः। एवमपि गुणवती पयोहोमं प्रति अनाहुतिरेव, एवं पयोहोमो गुणवत्तर इति। जर्त्तिलयवाग्वा जुहुयात् इति न कर्त्तव्यार्थं कीर्त्यते, किन्तर्हि प्रतिषेद्धुं, कर्त्तव्योपदेशे हि कल्पनीयं किञ्चित्, प्रतिषेधसम्बन्धे प्रत्यक्षनिन्दया इतर-स्तुतिः, आनर्थक्यानुपपत्तेश्च, यथा, विषं भक्षयितव्यं न कदाचित् इति विषभक्षस्य कर्त्तव्यता प्रतिषेधसम्बन्धार्थं कीर्त्यते, नानुष्ठानाय। एवमिहापि द्रष्टव्यमिति॥ (१० ८। ४ अ०)॥

तैयव्वकादावभिधारणानभिधारणादीनामर्थवादताधिकरणम्॥

पूर्वेषु तुल्यकालत्वात्॥ ८॥

चातुर्मास्येषु तैयव्वकानधिकृत्य समामनन्ति, अभिधार्याः नाभिधार्याः इति मीमांसन्ते, यदभिधारयेत् कद्रायास्ते पशूनभिदध्यात्, यन्नाभिधारयेत्र कद्रायास्ते पशूनभिदध्यात्। अग्नौ खल्वादुरभिधार्यो एव, न हि हविरनभिघृतमस्ति इति। तथा, होतव्यमग्निहोत्रं न होत-

ष्यमिति मीमांसन्ते ब्रह्मवादिनः, यदि जुहुयात् यजा पूर्वमाहुतीर्जुहुयात्, यत्र जुहुयादग्निः परापतेत्, तूष्णीमेव होतव्यं, यथापूर्वमाहुतीर्जुहोति, नाग्निः परापतति इति। अस्त्यागमर्थः सांयत्रिकः, किमभिधारयितव्या स्रुच्यस्रुचाः उत नाभिधारयितव्याः? इति, होतव्यम् अग्निहोत्रम्। न होतव्यं वा? विधिप्रतिषेधावेतौ इह, नार्थवादार्थम् एतयोः सङ्कीर्त्तनम्? इति। किन्तावत् प्राप्तम्?। विधिप्रतिषेधाविति ब्रूमः, तद्रूपत्वात्, विधिप्रतिषेधयोर्हि प्रत्यक्षं रूपमुपलभ्यते। श्रुत्या चानुष्ठानार्थता प्रतिषेधार्थता च अवगम्यते, वाक्यादर्थवादार्थता, श्रुतिश्च वाक्यादबलीयसी। न च, पर्य्युदासोऽवकल्पते। तस्मात्, अग्निहोत्रं होतव्यं न होतव्यं वा, यदा होतव्यं, तदा तूष्णीं स्रुच्यस्रुचा अभिधारयितव्याः, न वाभिधारयितव्याः। यदा पुनरभिधारयितव्याः, तदा अभिधारयितव्यवचनमर्थवादार्थं, प्रतिषेधसङ्कीर्त्तनादभावाच्चह्यां पुनरुच्यते इति।

एवं प्राप्ते ब्रूमः, पूर्वाधिकरणोदाहरणैस्तुल्यकालानि इमानि उदाहरणानि। का तुल्यकालता?। पूर्वं विधिप्रतिषेधावभिधाय उत्तरेण तयोरभिसम्बन्धः क्रियते इति, तदेतत् पूर्वाधिकरणेनैव तुल्यं, यो विधिप्रतिषेधौ श्रूयेते, न तौ अनुष्ठातुं वर्जयितुं वा। किन्तर्हि मीमांसितुं, एवं याच्, अभिधार्याः नाभिधार्याः इति मीमांसन्ते, तथा होतव्यमग्निहोत्रं न होतव्यमिति मीमांसन्ते ब्रह्मवादिन इति। मीमांसा च इतरविधिप्रयंसार्था, तथा

प्रत्यक्षः शब्दार्थेन सम्बन्धः, न किञ्चित् कल्पनीयम्। विधि प्रतिषेधयोर्हि किञ्चित् कल्पनीयं स्यात्, यदभिधारयेन् रुद्रायास्ये पशूनभिदध्यादिति। इदमभिधारणं गुणवत्तरं यत् ईदृशेऽपि दोषो नाद्रियत इति, तथा यत् जुहुयात् यथापूर्वमाहुतीर्जुहुयात्, यश्च जुहुयादग्निः परापतेदिति तत्यं तूष्णीं होमः प्रशस्तः, यदस्मिन् क्रियमाणे उभावपि दोषौ परिहृतौ भवत इति ॥ (१०। ८। ५ अ०) ॥

आधानं उपवादस्य विकल्पताधिकरणम् ॥

उपवादश्च तद्वत् ॥ ६ ॥ (मि०)

अस्त्याधानं, तत्रेदमामनन्ति, य एवं विद्वान् वार्वन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति, एवं विद्वान् वामदेव्यं गायति इति। तत्रेदमाम्नायते उपवीता वा एतस्यारण्यो भवन्ति यस्याग्न्याधेये ब्रह्मा सामानि गायति इति। तत्रायमर्थः सांशयिकः, किमयमुपवादः प्रतिषेधार्थः, उत पर्य्युदासार्थः, उत, अर्थवादार्थः? इति। किं प्राप्तम्? न पर्य्युदासः, ब्रह्मणः अप्राप्तत्वात्। असतो वचनमर्थवादार्थं भवति, यथा प्रजापतिर्वा एक आसीत् स आत्मनो वपामुदखिदत् इति।

एवं प्राप्ते ब्रूमः, न ब्रह्मण उपवादः कस्यचिदर्थवादः सम्भवति। न च, वाक्यान्तरस्थेनार्थवादेन किञ्चिदपि प्रयोजनमस्ति। तस्मात् उपवादस्तद्वत् स्यात्। किञ्च

तत्?। यथा अतिरात्रे गृह्णाति षोडशिनम् इति, विधाय प्रतिषेधार्थं स्यात्। कथम्?। ब्रह्मणो गानं नैव प्राप्तमिति ब्रह्मगानप्रतिषेधार्थं वचनं नावकल्पते, तस्मात् ब्रह्मग्रहणमविवक्षितं, सामगानप्रतिषेध एवैष स्यात्। ब्रह्मशब्दः प्रमादपाठ इति चेत्। न एतदेवम्। ब्राह्मणवाचित्वादुद्गात्रभिधानं भविष्यति।

प्रतिषेधादकर्मेति चेत् ॥ १० ॥ (आ०)

इति चेत् दृश्यते, सामगानस्यैव निन्देति, अकर्म सामगानस्य, न हि निन्दितं कर्त्तव्यं भवतीति।

न शब्दपूर्वत्वात् ॥ ११ ॥ (आ० नि०)

नैतदेवं, यथैव हि निन्द्या न कर्त्तव्यमिति गम्यते, एवमुपादेयतया कर्त्तव्यमिति गम्यते। न चान्यत् कर्त्तव्यमिति कश्चित् विधिः प्रकल्पते, यस्य प्रयोगार्थं निन्देत। तस्मादनुष्ठातुं विधिः, वर्जयितुमुपवादः इति। (१०। ८। ६ अ०)।

दीक्षितो न ददातीत्यादिनिषेधस्य पर्य्युदासताधिकरणम्।

दीक्षितस्य दानहोमपाकप्रतिषेधोऽविशेषात् सर्वदानहोमपाकप्रतिषेधः स्यात् ॥ १२ ॥ (१ म पू०)

ज्योतिष्टोमे श्रूयते, दीक्षितो न ददाति न जुहोति

न पचति इति। अत्रैषोऽर्थः सांग्रयिकः, किं सर्वदानहोमपाकानां प्रतिषेधः, उत अक्रतुयुक्तानाम्। अथ वा क्रतुयुक्तानामपि चोदकप्राप्तानां प्रतिषेधः। अथ वा पर्य्युदासः? इति। किं प्राप्तम्?, सर्वदानहोमपाकानां प्रतिषेधः। कुतः?। अविशेषात् नास्ति विशेषवचनः शब्दः। तस्मात् सर्वेषां प्रतिषेध इति।

अक्रतुयुक्तानां वा धर्मः स्यात् क्रतोः प्रत्यक्ष शिष्टत्वात् ॥ १३ ॥ (२ य पू०)

वाशब्दः पक्षं व्यावर्त्तयति, न सर्वेषां प्रतिषेधः। केषां तर्हि?, अक्रतुयुक्तानां धर्मः स्यात्। कुतः?। क्रतोः प्रत्यक्षशिष्टत्वात्, प्रत्यक्षं हि श्रुतौ दानादीनां शासनमस्ति, तस्मात् प्रत्यक्षं वर्जयित्वा प्रतिषेधः स्यात्।

तस्य वाप्यानुमानिकमविशेषात् ॥ १४ ॥ (३ य पू०)

अपि वा तस्य क्रतोर्यत् प्रानुमानिकं चोदकप्राप्तं, तत् प्रतिषिध्यते, आनुमानिकं हि तत् न प्रत्यक्षम्। प्रत्यक्षश्रुतश्च प्रतिषेधः।

अपि तु वाक्यशेषत्वादितरपर्य्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् ॥ १५ ॥ (सि०)

तुशब्दोऽवधारणायाम्। वाक्यशेषः स्यात् प्रतिषेधः, उक्तानाम् अविशेषेण दानादीनां ज्योतिष्टोमिके पर्य्युदा-

मेन प्रतिषेधो वाक्यशेषः स्यात्, अहरहर्दर्शात इत्यस्य शेषो न दीक्षितः इति। एवं होमपाकवाक्ययोरपि। अमति पर्युदासे प्रतिषेधे विकल्पः स्यात्, स चान्याय्य इत्युक्तम। तस्मात् पर्युदास इति। (१०।८।७ अ०)।

वर्म होमादिभिराहवनीयस्य बाधाधिकरणम्।

अविशेषेण यत् शास्त्रमन्याय्यत्वात् विकल्पस्य तत् सन्दिग्धमारादिशेषशिष्टं स्यात् ॥ १६ ॥

इदं समामनन्ति ज्योतिष्टोमे, वर्मनि जुहोति इति। राजसूये, वल्मीकवपामुपरुच्य जुहुयात् इति। इदमपि श्रूयते, यत् आहवनीये जुह्वति तेन सोऽस्याभीष्टः प्रीतो भवति इति। तत्रैषोऽर्थः सांग्रयिकः, किं ज्योतिष्टोमे वर्मनि होतव्यं, राजसूये वल्मीकवपायाम्, उत, विकल्पः एतयोः आहवनीयेन? इति। किं प्राप्तम्? होमार्थत्वात् तावद्वर्मवल्मीकवपयोः, समुच्चयो न प्राप्तः, अन्यतरेण होमनिर्वृत्तेः कृतत्वात्, होमार्थता चैतयोः प्रतिभायेत। कुतः?। भूतभव्यसमुच्चारणे भूतं भव्यार्थं भवति, न च, बाधोऽत्यन्तमेव वर्मविषयः, आहवनीयहोमोऽपकृतो भवति, विकल्पे, पक्षे तावदनुगृह्यत इति।

एवं प्राप्ते ब्रूमः, अविशेषेण यत् शास्त्रं तस्य आरादिशेषगिष्टं स्यात्, यत् विशेषेण गिर्यते, तदस्य दूरं स्यात्, असम्बद्धमित्यर्थः। सन्दिग्धं हि तत्। कथमिव?। यदि

सामान्यं विशेषलक्षणार्थं, ततो विशेषेऽपि प्राप्तम्। अथ न लक्षणार्थं, ततो न प्राप्तम्, एवं सन्दिग्धम्। अथ वा सामान्यं विशेषेण विरुध्यत इति एवं सन्दिग्धम्। अथ वा, सामान्यं तस्मिंश्च विशेषे अन्यस्मिंश्चेति, एवं सन्दिग्धम। तत् सामान्यविधानं विशेषविधौ न स्यात्। किं कारणम्?। अन्याय्यत्वात् विकल्पस्य। कथमन्याय्यो विकल्पः?। अर्थोच्यते, यदि वर्म्माद्यधिकरणता एषु होमेषु श्रूयते, स पक्षे न भवतीति विकल्पमाश्रयता प्रमाणापेता कल्पयितव्या। अथ वर्म्माद्यधिकरणता एषु न श्रूयते, ततः पक्षे सा भवतीति प्रमाणापेतैव। वर्म्मग्रहणञ्च श्रूयमाणमविवक्षितं स्यात्। अर्थोच्यते, अर्थात् पक्षे भावः, स चार्थो होमनिर्वृत्तिराहवनीयेनेति। तत्र, यदि होमनिर्वृत्तिमात्रं कर्त्तव्यं तत आहवनीयेनाप्यर्थात् सिध्येत। इह तु वर्म्माद्यधिकरणतापि विधीयते, स आहवनीये उपादीयमाने नोपसंक्रियेत। अनुपसंहारे च प्रयोगवचनो बाध्येत।

अत्रोच्यते, यद्यपि वर्म्माद्यधिकरणतापि विधीयते, होमे गुणभूतत्वाद्धोमं समीचीनं करोति इति तत्रानुपसंहारोऽपि न दोषः, अधिकरणान्तरेण समीचीनो भविष्यति इति तस्मादिकल्प एव इति। नेत्युच्यते, वर्म्मादिहोमसम्बन्धोऽत्र विधीयते, स च प्रधानभूतः, न होमः तस्मिन् अनुपसंक्रियमाणे न यज्ञायुतं कृतं स्यात्।

अथोच्यते, सम्बन्धोऽपि विधीयमाने इयं विधीयते, एवं साध्यम्, एकं साधनं, यत् साध्यं, तत् प्रधानं, स

होमः। तस्मात् विकल्पः, सम्भवेऽपि च श्रूयमाणेऽवश्यो-पादातव्यो भवति होमः, होमश्चेत् आहवनीयः प्राप्नोत्येव इति। तत्र, आहवनीयस्यानङ्कृत्वात्। कथम् अनङ्कृत्वम ?। विशेषेषु अप्राप्तेः। कथमप्राप्तिः ?। वर्म्माद्यधिकरणतायां सत्याम् आहवनीयाधिकरणताया ज्ञानं करणं च प्रत्यस्तमयात्, यदि वर्म्माद्यधिकरणमिति ज्ञायते, न तत् आहवनीयाधिकरणं शक्यं ज्ञातुं कर्तुं वा।

आह, यथा शक्यते तथा कर्त्तव्यम्, इत्याख्यातार्थो भविष्यति, तस्माद्वर्म्मादि बाधित्वा आहवनीयो भविष्यति इति। उच्यते, स्यादेतदेवं, यदि वर्म्मादिबाधामन्तरेण आहवनीयोपदेशो नावकल्पेत, हेधा हि शक्यते कर्तुं, वर्म्मादि बाधित्वा परिहृत्य वा। अत्र बाधायां वर्म्मनि इति प्रत्ययोऽपक्षीतव्यो भवति, तस्मात् परिहारः श्रेया-निति। आह, परीहारेऽपि आहवनीयो भवति इति प्रत्ययोऽपक्षीयेत। अपक्षीयामहे, भवत्याहवनीयप्रत्ययः, अशक्योऽसौ कर्त्तुमित्यपि किं न भवति, अशक्यं न करिष्यते। आह, योऽयं सामान्यप्रत्यय उच्यते, स सर्वेषु विशेषेषु कार्य्यम् आमनन्ति, एवं चेद्वर्म्मादिहोमेषु च अन्यत्र च नैनाहवनीयो विहितः, तत्र, यो वर्म्मादिहोमे आहवनीय-प्रत्ययः स न शक्यः परिहर्तुमतो वर्म्मादिहोमं बाधित्वा अवतिष्ठेत इति। अत्रोच्यते, नैतदेवं, न हि सामान्य-वाची शब्दो विशेषान् अभिवदति, यदि चाभिवदेत, अन्य-ज्ञाने सति नावकल्पेत, पूर्वदर्शनाभावात्। सामान्ये तु दृष्टपूर्वत्वादवकल्पते। तस्मान्न सामान्यं विशेषान्

अभिवदति, तस्माद्व वर्ग्यादिहोमे आहवनीयप्रत्ययः। अभिवदन् वा न मुख्यया वृत्त्या अभिवदेत्, कथं तर्हि लक्षणया, लक्षणा च श्रुत्या बाध्येत। तस्माद् वर्ग्यादिहोमे श्रुत्या वर्ग्यादिषु प्राप्तेषु अशक्य आहवनीयो विधातुं कर्तुं चेति।

आह, ननु विपरीतमप्येतत् स्यात्, आहवनीये प्राप्ते वर्ग्यादिप्रत्ययो न शक्यः इति। भवेदेवं, किन्तु विशेषे वर्ग्यादिप्रत्ययः श्रौतः, आहवनीयप्रत्ययो लक्षणया। तत्र श्रुतिप्रत्ययो बलीयान् इत्युक्तम्। ननु सामान्येऽप्याहवनीयप्रत्ययः श्रौतः। उच्यते, वर्ग्यादिप्रत्ययोऽपि सामान्ये श्रौतः, होमे हि स विशिष्टे विधीयते, न अहोमे एतद्विशेषयति। तस्माद्वर्ग्यादिहोमं वर्जयित्वा अन्येषु होमेषु आहवनीयः करिष्यते इति॥ (१०।७ दश०)॥

वैश्वदेवादिषु सामदृश्यविधेर्वाक्यशेषताधिकरणम्।

अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणमविकृत-माज्यभागवत् प्राकृतप्रतिषेधार्थम्॥ १७॥

(पू०)

अनारभ्य किञ्चिदाम्नायते, सामदृश्य सामिधेनीरनु ब्रूयात् इति। तत् प्रकृता विशेषविहितेन पाञ्चदृश्येन बाधित सर्वविकृतीरनुप्राप्तं कासुचित् विकृतिषु पुनः श्रूयते, वैश्वदेऽश्वरकल्पायां पशौ चातुर्मास्येषु मित्रविन्दायां

वैधातव्यायाम् आयवयेष्टम् इति। तासु विकृतिषु अस्य श्रवणं किमर्थमिति विचार्यते, किं प्राप्तम्?, अप्रकरणे यच्छ्रुतम् प्राकृतं विकृतिविशेषे पुनरविकृतं श्रूयते, तत्, प्राकृतमङ्गजातं प्रतिषेद्धुं, वैसृष्टादिषु समदग्र सामिधेनीरनुब्रूयात् इति, नान्यत् प्राकृतं कुर्यादिति। न चैवं विज्ञायते, वैसृष्टादिष्वेव समदग्रं, नान्यासु विकृतिष्विति, तासु तत् प्रत्यक्षेण वाक्येन श्रुतं न शक्यं बाधितुम्।

विकारे तु तदर्थं स्यात् ॥ १८ ॥ (यु०)

यदि तु सामिधेनीनां विकारः कश्चित् श्रूयेत, ततो विकारार्थमाम्नातमिति गम्यते, न तु विकारः श्रूयते। तस्मात् प्राकृतप्रतिषेधार्थमेवेति।

वाक्यशेषो वा क्रतुना ग्रहणात् स्यादनारभ्य-विधानस्य ॥ १९ ॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। वाक्यशेषोऽयं वैसृष्टादिषु अनारभ्य-विधानस्य, समदग्र सामिधेनीरनुब्रूयात् एतासु विकृतिष्विति, तेन अन्यासु विकृतिषु न स्यात्। ननु प्रत्यक्षश्रुतम् अन्यासु विकृतिषु तत् न शक्यं बाधितुम्। उच्यते, सत्यं प्रत्यक्षश्रुतं सामिधेनीषु, न तु तत् क्रतुना ग्रह्यते। क्रतुसम्बन्धाभावात्, प्रयोगवचनोऽपि न ग्रहाति, सति वैसृष्टादिसम्बन्धकरे वाक्ये। यदेतत् सामदग्र्यम् अनारभ्योक्तं, तत् वैसृष्टादीनामङ्गमिति प्रत्यक्षं वाक्यं,

तस्मात्तान्या विकृतयः तत् गच्छन्ति । अकृतयज्ञेषु च सति सामिधेनीनां सामदृश्यं निष्फलत्वान्न क्रियेत, तस्मादनारभ्य विधेः वैसृधादिषु वाक्यशेषः । आह, ननु वाक्यभेदो भवति, सामिधेन्यः सामदृश्य भवन्ति, ताश्च वैसृधादिषु इति । उच्यते, हे एते वाक्ये, पूर्वेण वाक्येन योऽर्थ उक्तः, तस्यैव विशेषः परेण वाक्येन विधीयते इति वाक्यशेष इत्युच्यते इति ॥ (१० । ७ । ६ अ०) ॥

पृथिव्यै स्वाहा इत्यादिविधिना अविहितस्वाहाकारेषु प्रदानेषु स्वाहाकार विधानाधिकरणम् ।

मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात्प्राप्तं ॥ २० ॥

(सि०)

दर्विहोमं प्रकृत्य श्रूयते, पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा वायवे स्वाहा इति । अस्ति च अनारभ्य वचनं, वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते इति । तत्र सन्देहः, किं तस्यायं वाक्यशेषः, स्वाहाकारेण अन्नं प्रदीयते देवेभ्यः इत्येतस्मिन् दर्विहोमे पृथिव्यै स्वाहा अन्तरिक्षाय स्वाहा इति, उत नायं वाक्यशेषः, शेषेषु प्रदानेषु स्वाहाकारो नाम्नातस्तेष्वपि स्वाहाकारः ? इति । किं प्राप्तम् ?, अनन्तरत्वेनाधिकरणेन वाक्यशेष इति ।

एवं प्राप्ते ब्रूमः, मन्त्रेषु वाक्यशेषत्वं, न स्यात्, न हि विधायकाविधायकवाक्ययोः एकवाक्यत्वं भवति, विधा

यकं ब्राह्मणम्, अविधायको मन्त्रः। अपि च, अनन्तरा-विकरणे न क्रतुसम्बन्धोऽस्ति इह तु सम्बन्धो गम्यते, वषट्कारेण स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते इति, प्रदानं नाम प्रधानकर्म। अपि च, गुणोपदेशो भवति, तस्मिन् दर्विहोमे पृथिव्यै स्वाहा इत्येवं समुच्चारणं भवति, न स्वाहा पृथिव्यै इति। तस्मादन्येष्वपि दर्विहोमेषु स्वाहा-कारोऽस्तीति।

अनाम्नाते च दर्शनात् ॥ २१ ॥ (यु० १)

यद्यपि दर्विहोमे न आम्नायते स्वाहाकारः, तथापि क्वचिद्दृश्यते, पृथेन द्यावापृथिवी आपृणेथामिति औदु-म्बर्य्यां विग्राखे जुहोति आम्नान् अवस्रावयति भूमिप्राप्ते स्वाहा करोति इति प्राप्त स्वाहाकारं दर्शयति।

प्रतिषेधाच्च ॥ २२ ॥ (यु० २)

क्वचिच्च प्रतिषेधो भवति, न स्वाहेति वचनं करोति मन्त्रं च नाह इति। प्राप्तिपूर्वकः प्रतिषेधो भवतीति अवाक्यशेषता अध्यवसीयते ॥ (१०। ७। १० अ०) ॥

अग्न्यतियाचास्य विकृतावुपदेशाधिकरणम्।

अग्न्यतियाचास्य विकृतावुपदेशादप्रवृत्तिः स्यात्

॥ २३ ॥ (पू०)

इदमाम्नायते, य एवंविद्वानग्निं चिनुते इति, तथा

उपदृष्टमनं वा एतद्यज्ञस्य यदतियाज्या इति। तत्र सन्देहः, किं अन्यातियाज्यं विकृतौ चोदकः प्रापयति, उत न? इति। किं प्राप्तम्, अन्यातियाज्यस्य विकृतौ अप्रवृत्तिः इति, अग्निष्टातियाज्याया अन्यातियाज्यं, तत् विकृतौ न प्रवर्तते। कुतः?। विकृतावुपदेशात्, विकृतौ हि तत् उपदिश्यते, अथातोऽग्निमग्निष्टोमेनानुयजति, तमुक्थेन तमतिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण तं षड्रात्रेण तं सप्तरात्रेण तमष्टरात्रेण तं नवरात्रेण तं दशरात्रेण इति। तत्रा यत् पृष्ठेति गृह्णीयात् प्राप्तं यज्ञं पृष्ठानि संगृह्णीयुः, यदुक्थेति गृह्णीयात् इति न नूनमन्यातियाज्यां चोदकः प्रापयति, यत् सामान्यस्यान्वित् विकृतौ चोद्यते इति।

मासि-ग्रहणञ्च तद्वत् ॥ २४ ॥ (यु०)

इदञ्च आम्नायते, मासि-मासि अतियाज्या गृह्यन्ते इति। यदि चोदकः प्रापयेत्, न, मासि-मास्यतिगृह्यन्ते इत्युपदेशः स्यात्।

ग्रहणं वा तुल्यत्वात् ॥ २५ ॥ (सि०)

गृह्यते वा चोदकेन अन्यातियाज्या, न हि अस्य अन्येरङ्गैरस्ति विशेषः, अन्यानि अङ्गानि गृह्यन्ति एतत् न गृह्यतीति नैतदवकल्पते।

लिङ्गदर्शनाच्च ॥ २६ ॥ (यु०)

लिङ्गं खल्वपि दृश्यते, कञ्चितं चिन्वीत ग्रीष्मंचितं

चिन्वीत यः कामयेत अमुष्मिन् लोके सञ्जयेयम् इति । तथा पञ्च ऐन्द्रान् अतियाज्यान् यजति इति कङ्काकारताम् ऐन्द्रताञ्च विशेषं ब्रुवन्नतियाज्यस्य विकृतौ प्राप्तिं दर्शयति ।

ग्रहणं समानविधानं स्यात् ॥२७॥ (१ आ० नि०)

अथ यदुक्तं, विकृतावुपदिश्यते इति, तत्परिहर्त्तव्यम् । अत्रोच्यते, यस्यां विकृतावुपदिश्यते, तस्यां प्रकृतौ च समानः स विधिः । अवशिष्टासु विकृतिषु चोदकः प्रापयतीति ।

मासि-ग्रहणमभ्यासप्रतिषेधार्थम् ॥ २८ ॥

(२ आ० नि०)

अथ मासि-ग्रहणं कथम् ? इति । तद् अभ्यासप्रतिषेधार्थं, न, अहन्यहनि यजन्ते मासि-मासि यजन्ते इति । (१० । ७ । ११ अ०) ।

उपसदश्चाभिचारकाम्यां सहैव चतुरवदानाधिकरणम् ।

उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधानस्य होमसंयोगात् अधिकमाज्यमतुलात्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् ॥ २९ ॥ (पू०)

दर्शपूर्णमासयोरामायते, चतुरवत्तं जुहोति इति ।

तत्र अयमर्थः आग्नेयिकः, किं प्रहोपस्तरणाभिघारणाभ्यां चतुरवत्तम्, उत प्रधानद्रव्यादेव चतुरवदातव्यम्, अधिकमुपस्तरणमभिघारणञ्च ? इति। किं प्राप्तम् ? प्रधानद्रव्यादेव चतुरवदातव्यम्। कुतः ?। उत्पत्तिताद्र्थ्यात् पुरोडाशोत्पत्तेर्हौमार्थता भवति, यदाग्नेयोऽष्टाकपालो अमावास्यायां पौर्णमास्याञ्च श्रूयते भवति इति। यज्ञ होति तत् चतुरवत्तं कर्त्तव्यं, पुरोडाशश्च होमार्थो नोपस्तरणाभिघारणे। तस्मात् पुरोडाशस्य चतुरवदातव्यमिति। अधिकमाज्यं स्यात्, अतुल्यं हि तत् पुरोडाशेन। पुरोडाशे होमार्थे तत् ग्रहभूतम् आज्यम्, तेन यद्यपि सह आज्येन षड्वत्तं भवति, तथापि होमे चतुरवत्तमेव कृतं, यथा लोके, प्रस्थभुग्दे वदत्तः इत्युच्यते, यद्यपि सूपशाकादिभिरधिकः प्रस्थो भवति, तथापि भुजौ प्रस्थो निर्दिश्यते, व्यञ्जनानि ओदनार्थानि।

तत्संस्कारश्रुतेश्च ॥ ३० ॥ (यु०)

प्रधानावदानसंस्कारार्थेन च उपस्तरणाभिघारणे श्रूयेते, यदुपस्तृणाति अभिघारयति अमृतादेवैनां करोति इति, तेनोपस्तरणाभिघारणसंयुक्तं प्रधानद्रव्या चतुरवत्तं द्योतयमिति गम्यते।

ताभ्यां वा सह लिष्टकृतः सकृत्तु द्विरभिघारणेन तदाग्निवचनात् ॥ ३१ ॥ (सि०)

ताभ्यां वा सह द्विर्विधोऽवदाय चतुरवत्तं कर्त्तव्यम्।

कृतः १। स्विष्टकृतः सकृत्त्वे हिरभिधारणेन तदाभिधानं भवति, सकृदपस्तृणाति सकृदवद्यति हिरभिधारयति चतुरवत्तस्यामेव इति, हिरभिधारणेन चतुरवत्तं पूर्णं दर्शयति, इतरथा षडवत्तं तेन पूर्येत। आह, दर्शनमेतत्, प्राप्तिरुच्यताम् इति। अत्रोच्यते, चतुरवत्ते होमे श्रूयते, चतुरवत्तं जुहोति इति, न होमार्थे पुरोडाशे मान्त्राग्ये वा, नैवं श्रूयते, यत् होमार्थं द्रव्यं तच्चतुरवत्तं कुर्यादिति, चतुरवत्तं श्रूयमाणं होमेन असम्बध्यमानम् अनर्थकं स्यात्।

अर्थोच्यते, प्रयोगवचनग्रहणादर्थवत् भविष्यति। तच्च, साक्षात्होमसम्बन्धे वचने सति चतुरवत्तं जुहोति इति नान्यत् प्रयोगवचनग्रहणं कल्पते। अस्मिंश्च साक्षाद्वचने तदर्थात् अवत्तं, न अतदर्थात् इति न विशेषः श्रूयते, तदर्थात् अतदर्थाद्वा चतुरवत्तसंयुक्तं द्रव्यं होतव्यम्, एवञ्च श्रुतिः परिरक्षिता, इतरस्मिन् पक्षे वाक्यं परिरक्षितं, द्विरभिधारणेऽवद्यति इति च विकल्पः स्यात्, यदि हि चतुरवत्तं दीयेत, तथा इदमपि श्रवणम् अमदनुवादभूतं स्यात् चतुरवत्तं वा विकल्पयेत्, अभावाच्च पक्षे विकल्पो न न्याय्यः स्यात्। तस्मात् सकृदपस्तृणाभिधारणाभ्यां चतुरवत्तमिति।

तुल्यवच्चाभिधाय सर्वेषु भानुक्रमणात् ॥३२॥

(यु०)

चत्वारि वा एतानि देवदधानि अवदानानि यदुप-

स्तृणाति तदनुवाक्याये यत् पूर्वमवदानन्तत्याज्याये यदुत्तरं तद्देवतायै यत् अभिधारयति तद्वषट्काराय इति चतुरवत्तस्य चत्वारि अवदानानि संकीर्त्य अनुवाक्यादिभिः अङ्गिवाक्येन अवयवशः संकीर्त्तयन् उपस्तरणादीनि दर्शयति, तस्मात् सहोपस्तरणाभिधारणाभ्यां चतुरवत्तमिति। दधग्शब्दो भागधेयवचनः, तद्यथा कङ्कटकाय दधं, नापिताय दधम् इति, देवदधानि देवभागा इत्यर्थः॥ (१०। ७। १२ अ०)॥

उपांशुयाजेऽपि चतुरवत्तस्यावश्यकताधिकरणम्।

सामदृश्यवन्नियम्येत॥ ३३॥ (पू०)

दर्शपूर्णमासयोरुपांशुयाजोऽस्ति, तत्र चतुरवत्तं जुहोति इति। तत्र संशयः, किमुपांशुयाजे चतुरवत्तं कर्त्तव्यम्, उत न? इति। किं प्राप्तम्?, सामदृश्यवन्नियम्येत, यथा सामदृश्यम् अनारभ्याधीतं परिगणितासु विकृतिषु पुनः श्रूयमाणं वाक्यशेषात्तासु नियम्यते, एवमिदमपि चतुरवत्तम् उपस्तरणाभिधारणाश्रयत्वात् यत्र ते, तत्रैव नियम्येत औदधसावाय्ययोः, उपांशुयाजे न स्यादिति।

इविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात्॥ ३४॥ (सि०)

वाशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, नोपांशुयाजे

चतुरवत्तमिति, होमे चतुरवत्तं गुणो विधीयते, स उपांशुयाजेऽपि स्यात्, अतोऽपि चतुरवदातव्यम्। अथ यदुक्तम्, औषधसाम्नाय्ययोरेव चतुरवत्तम् उपस्तरणाभिघारणाश्रयत्वात् इति। न उपस्तरणाभिघारणवचनं चतुरवत्तस्य वाक्यशेषभूतं, यथा समदृग्यमामधेनीरनुब्रूयात् इति मित्रविन्दादिषु, समदृग्यानुक्रमादिति। नैवमिह चतुरवद्येत्, कथमुपस्तृणीयात्, अभिघारयेच्चेति, कथं तर्हि ?, चतुरवदानसंयुक्तं द्रव्यं जुहुयात् हविष्यो पस्तृणीयात्, अभिघारयेच्चेति, यत्र हविषि उपस्तीर्यमाणेऽभिघार्यमाणे च चतुरवत्तयुक्तं प्रदानं भवति तत्र न प्रधानद्रव्याच्चतुरवदातव्यम्। यत्र पुनः प्रधानद्रव्याच्चतुरवखण्डनमन्तरेण न चतुरवत्तं भवति, तत्र प्रधानद्रव्याच्चतुरवदातव्यम्। चतुरवत्तमूतमिह होतव्यं विवक्ष्यते, न इतस्ततो वा चतुरवदातव्यमिति। तस्मादुपांशुयाजेऽपि चतुरवत्तं कर्त्तव्यमिति॥ (१०।८। १३ अ०)॥

दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादताधिकरणम्।

पुरोडाशाभ्यामित्यधिक्रतानां पुरोडाशयोरुपदेशस्तत्श्रुतित्वाद्वैश्यस्तोमवत् ॥३५॥ (१म पु०)

दर्शपूर्णमासयोरिदमाम्नायते, पुरोडाशाभ्यामेवासोमयाजिनं याजयेत् यावेतावाग्नेयश्चैन्द्राग्नश्च इति। तत्रैष

संशयः, किमधिकारश्रुतिवाक्यशेषोऽयं, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्याभ्यां पुरोडाशाभ्यामसोमयाजीति। अथ किमधिकयोः कर्मान्तरयोरुत्पत्तिः, अपराभ्यामेव ज्ञातीयकाभ्यां पुरोडाशाभ्यां यजेत इति। अथ वा, अङ्गकर्त्तृरुपदेशः, आभ्यां पुरोडाशाभ्यामृत्विक् याजयेत् इति। अथ वा, असोमयागकाले आभ्यां यजेतेति कालोपदेशः। उत ऐन्द्राग्नस्य विधिः, आग्नेयस्य चानुवादः। अथ वा उभयोरनुवादः। इति एते पक्षाः।

किं तावत् प्राप्तम्?, अधिकारशेषः इति। यदेतत् स्वर्गकामो यजेत इति, तस्य शेषः, आभ्यां पुरोडाशाभ्याम् असोमयाजी स्वर्गकामो यजेतेति। कुतः?। तत्श्रुतित्वात्, तत्श्रुतिमन्तो हि पुरोडाशौ शब्देनानूद्येते। तेन नाभ्यधिकौ। असोमयाजिनश्च कर्त्तृव्यापार आभ्यां सम्बध्यते श्रुत्या, न कालः, स हि लक्ष्येत, श्रुतिश्च लक्षणाया गरीयसी। तत्र सोमयाजिनौ वा न पुरोडाशौ, असोमयाजिनौ वा न सान्नाय्यम्। यदि पुरोडाशावधिकृत्य असोमयाजी विधीयते, ततो नासोमयाजी सान्नाय्ये, तच्चैवकारः समर्थितो भवति, पुरोडाशाभ्यां केवलाभ्यामसोमयाजी, न सान्नाय्येनेति। अथासोमयाजिनमधिकृत्य पुरोडाशौ विधीयेत, तथा न सोमयाजिनः पुरोडाशौ, तच्चास्थाने एवशब्दो भवति, पुरोडाशाभ्यामसोमयाजिनमेवेति। यथा—

यमेव विद्याः शुचिमप्रमत्तं

[illegible]

यस्ते न दृह्येत् कतमच्चनाह
तस्मै मां ब्रूया: निधिपाय ब्रह्मन् इति ॥

यं शुचिमेव विद्या: इति वक्तव्ये यमेव विद्या: शुचिमिति । 'एवमचापि । तदुभयोरपि वचनव्यत्ययोरधिकारश्रुतिवाक्यशेष इति उभयथा अयं पूर्वपक्षो भवति । यथा वैश्यस्तोमेऽधिकारश्रुतिशेष:, वैश्यो वैश्यस्तोमेन यजेत इति, तद्वदत्राप्यधिकारश्रुतिशेष एवेति ।

नत्वनित्याधिकारोऽस्ति विधौ नित्येन सम्बन्धस्तस्माद्वाक्यशेषत्वम् ॥ ३६ ॥ (२य पृ०)

तुशब्द: पक्षं व्यावर्त्तयति । नैतदेवम्, अधिकारवाक्यशेष इति, नित्यो हि दर्शपूर्णमासौ, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इति, नित्यौ च तत्रेमौ पुरोडाशौ फलं प्रति सहकारिणौ । तौ अनित्यसोमयाजिनं प्रति विधीयेते इत्यनुपपन्नम् । कथम् ? । नित्यौ हि दर्शपूर्णमासयोर्भविष्यत:, यस्सोमयाजी तस्येापकरिष्यत इति नोपपद्येत, पुरोडाशविधे: नित्येन दर्शपूर्णमासमम्नायेन सम्बन्ध: तस्मात् न असोमयाज्यधिकारश्रुतिवाक्यशेष:. किन्तर्हि, अधिकयो: कर्मान्तरयोरुत्पत्तिरिति । नैवमभिसम्बन्ध: क्रियते, यावेतौ पुरोडाशौ दर्शपूर्णमासयोर्विहितौ, तौ प्रति असोमयाजी विधीयते इति, कथन्तर्हि. असोमयाजी य: स्वर्गकाम: स आग्नेयं कुर्य्यादैन्द्राग्नमेत्येते कर्मणी विधीयेते, विधीयेते चेत् पूर्वाभ्यां कर्मान्तरे ।

एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा इति। एवशब्दश्च पुनरित्यस्यार्थे भविष्यति। यथा, क्षीरेण भुक्त्वा देवदत्तः क्षीरेणैव भुञ्जीत इति, भुक्त्वा देवदत्तः भुञ्जीतैवेति पुनरिति गम्यते, एवमिहापि सोमयाजिनश्चा-सोमयाजिनश्च दर्शपूर्णमासविधानेन विहितौ पुरोडाशौ पुनरसोमयाजिनस्तौ विधीयेते, पुरोडाशाभ्यामेवासोमया-जिनं याजयेदिति तदङ्गकाभ्यामिति गम्यते।

सति च नैकदेशेन कर्तुः प्रधानभूतत्वात् ॥३७॥ (यु०)

सति च अधिकारशेषे पुरोडाशयोरसोमयाजिकर्तृ-सम्बन्धो नोपपद्यते, अधिकारशेषे हि प्रधानभूतः कर्त्ता निर्दिश्यते, न चासति फले प्रधानभाव उपपद्यते, न च दर्शपूर्णमासैकदेशभूतौ पुरोडाशौ फलस्य साधकौ भवतः। न च, वचनप्रामाण्यात् फलं कल्पयिष्यते, वचनव्यक्त्यन्तरस्य भावात्। तस्मादपि नास्त्यधिकारशेष इति।

कृत्स्नत्वात्तु तया स्तोमे ॥ ३८ ॥ (आ० नि०)

यदुपवर्णितं, वैश्यस्तोमवत् इति, युक्तं वैश्यस्तोमे, कृत्स्नो वैश्यस्तोमो न कस्यचिदेकदेशः, तत्र फलं सम्भवति, न चात्र फलं सम्भवति, न चात्र किञ्चिदेकं नित्यमनित्येन सम्बध्यते। तस्मादैषम्यं वैश्यस्तोमेन।

इति चेत् मन्यसे, नाधिकारस्तुतिशेषोऽवकल्पते इति। उच्यते, कर्मान्तरयोरुत्पत्तिर्नावकल्पते, यावेतौ इति प्रयोगावचनं लक्षणया कल्पेत। कथं तर्हीदमिति ?। अङ्गकर्त्तुरुपदेशः, अङ्गे यः कर्त्ता, न प्रधाने। याजयेदिति ऋत्विक्कर्त्तुरेवैतत् प्रत्यक्षं वचनं, लक्षणया यजेः कर्त्तुः। यदपि च नित्यानित्ययोर्विरुद्धः सम्बन्धोऽभ्युपगतो न भविष्यति। न चैकदेशस्य फलं कल्पयिष्यते, असोमयाजी पुरोडाशाभ्यां याजयितव्य इति याजयितुरुपदेशोऽभ्युदयाय भविष्यति।

न गुणार्थत्वात् प्राप्ते च नोपदेशार्थः ॥ ४० ॥
(३य पू० नि०)

नैतदेवम्, अङ्गकर्त्तुरुपदेश इति, अङ्गकर्त्ता हि प्रधानकर्त्तुरेव क्रियोपदेशेन गुणभूतः प्राप्नोति। न चास्य फलं श्रूयते। न च कल्पयितुं शक्यमुपग्रहविशेषात्। न च, प्राप्तस्य पुनरुपदेशे किञ्चिदस्ति प्रयोजनम्, अर्थप्राप्तस्य त्वनुवादः पुरोडाशयोर्यागं विधातुम्। न च, परिसंख्या, तद्दोषत्वात्। सोमयाजिनश्च विना अङ्गकर्त्रा, असम्भवात्। तस्मात् कर्मान्तरयोरुत्पत्तिरिति।

कर्मणोस्तु प्रकरणे तन्त्रायत्वात् गुणानां लिङ्गं न कालशास्त्रं स्यात् ॥ ४१ ॥ (४र्थ पू०)

योरुत्पत्तिरिति, एतयोः कर्मणोः प्रकरणे काल उच्यते, न असोमयाजिनं कर्त्तारं प्रति पुरोडाशौ विधीयेयाताम्। कुतः ?। तन्न्यायत्वात्, स हि न्यायः, योऽसंवृक्तः, अपि वा कालमात्रं स्यात् अदर्शनादिशेषस्य (४। ४। ६ सू०) इति, इहापि स एव न्यायः, असोमयागकाले दर्शपूर्णमासयोरेतौ पुरोडाशौ भवत इति। किमेवं भविष्यति ?। फलकल्पनादोषो न भविष्यति, यदा समुदाये व्यापरिष्यते तदा सर्वेषां संहतानां फलं भविष्यति। शक्यते च असोमयागेन विशेषलिङ्गेन कालो लक्षयितुम्, तस्मिन् काले पुरोडाशाभ्यामेव यजेत न सान्नाय्येन इति।

यदि तु सान्नाय्यं सोमयाजिनो न ताभ्यां समवायोऽस्ति विभक्तकालत्वात् ॥ ४२ ॥

(४थं पू० नि०)

तुग्रस्थः पक्षं व्यावर्त्तयति। यदि सान्नाय्यं सोमयाजिनः न कालार्थं श्रवणं भवितुमर्हति। सान्नाय्यं च सोमयाजिन एव, अनाशङ्कते तस्मिन्नाशङ्कितवचनं, यथा, आस्थापि चेत् प्रमाणं स्युर्गतास्ते परमाङ्गतिम् इति।

एवं हि श्रूयते, नासोमयाजी सन्नयेत् इति। एवं सति न कालार्थं श्रवणम्। कथम् ?। नैव ताभ्यां पुरोडाशाभ्यां सान्नाय्यस्य समवायः प्राप्तः, विभक्तकालत्वात्, प्राक् सोमयागात् पुरोडाशौ, ऊर्ध्वं सान्नाय्यं प्राप्तमेव, न

विभक्तकालार्थं

अपि वा विहितत्वात् गुणार्थायां पुनःश्रुतौ सन्देहे श्रुतिर्हि देवतार्था स्यात् यथानभिप्रेतः तथाग्नेयो दर्शनादेकदेशे ॥४३॥ (५म पू०)

अपि वेति पक्षव्याहत्तिः । नैतत् कर्मान्तरबोदनेति, अनुवादः आग्नेयस्य, विहितत्वात्, विहितो हि असावुभयत्र यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाधृतो भवति इति । ऐन्द्राग्नस्य भवति विधिः, उभयत्राविहितत्वात् । स यत्र न प्राप्नोति, पौर्णमास्याम् ऐन्द्राग्नविधानार्था एषा श्रुतिः । यथानभिप्रेतस्तथाग्नेय उच्चरितः, विधानं चोभयत्र, तस्य दर्शनं च, आग्नेयं चतुर्हा करोति इति । तथा साकंप्रस्थाये आज्यभागाभ्यां प्रचर्य आग्नेयेन पुरोडाशेन इति ।

विधिं तु बादरायणः ॥ ४४ ॥ (५म पू० नि०)

तुशब्दः एतमपि पक्षं व्यावर्त्तयति । नैतदेवम्, आग्नेयोऽनुवादः, ऐन्द्राग्ने विधिः इति । उभयोः कालविधिः स्यात् । कुतः ? । बादरायणः आचार्यो मन्यते स्म, प्रागपि सोमयागात् साक्राय्यविधिरिति, असोमयाजिनोऽपि साक्राय्यं श्रूयते, तदु सं नयेत् इति । तथा तथेह स्माहुर्गोपायनाः साक्राय्यमेवासोमयाजिनः, तस्मात्, कालार्थः संयोग इति ।

प्रतिषिद्धविज्ञानाद्वा ॥ ४५ ॥ (सि०)

वाग्शब्दः पक्षं आवर्त्तयति। नैतदस्ति, कालविधिरिति, नाप्यधिकयोः कर्मणोरुत्पत्तिः, न वा आग्नेयस्यानुवादः, ऐन्द्राग्नस्य विधिः, किन्तर्हि उभयोरनुवादः। कथम्?। सोमयाजिनः सान्नाय्यविधानार्थमेतदाख्यम्, अतो नैन्द्राग्नस्यापि विधिः, भिद्येत हि तदा वाक्यम्, एवमभिसम्बन्धः क्रियते, असोमयाजिनः पुरोडाशावेतौ यौ प्राप्तौ, सोमयाजिनः सान्नाय्यमपरमपीति, पुरोडाशाभ्यामेवासोमयाजिनं याजयेत्, यौ एतौ आग्नेयश्च ऐन्द्राग्नश्च, सान्नाय्येन सोमयाजिनम् इति एवमेकेन वाक्येन सोमयाजिनः सान्नाय्यं विधीयते, अपरेणापि वाक्येनासोमयाजिनः। यस्मादुभयोरप्यनुवाद इति।

तया चान्यार्थदर्शनम् ॥ ४६ ॥ (यु०)

अन्यार्थोऽपि चैतमर्थं दर्शयति, न कर्मान्तरे इति। कथम्?। चतुर्ईश पौर्णमास्यामाहुतयो हूयन्ते चयोदश्यामावास्यायाम् इति। कर्मान्तरोत्पत्तावभ्यधिका आहुतयो भवेयुरिति। (१०। ८। १४ भा०)।

उपांशुयाजस्य द्रौव्यद्रव्यताधिकरणम्।

उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वात् यथाकामी प्रतीयेत ॥ ४७ ॥ (पू०)

दर्शपूर्णमासयोरामायते, उपांशुयाजमन्तरा यजति इति। तत्र द्रव्यं प्रति सन्देहः, किम्, अनियमः, उत

नियतं किञ्चिद्द्रव्यम् ? इति। किं प्राप्तम् ?, न किञ्चित् हवीरूपं श्रूयते, तस्मात् यथाकामी प्रतीयेत। तत्र उच्यते, श्रूयते हवीरूपम्, आज्यस्थेव नावुपांशु पौर्णमास्यां यजन् इति, तस्मादाज्यद्रव्यकं स्यात्। उच्यते, एवमप्यनियमः, यत्किञ्चित् आज्यं गृहीत्वा इज्येतेति।

ध्रौवाद्या सर्वसंयोगात् ॥ ४८ ॥ (सि०)

ध्रौवाद्या आज्यादिज्येत, न यतः कुतश्चित्। कुतः ?। सर्वसंयोगात्, सर्वयजतिभिर्हि सम्बद्धं, सर्वस्मै वा एतद्यज्ञाय गृह्यते यदध्रुवायामाज्यम्। तस्मात् ध्रौवाज्यात् यजेतेति ॥ (१० । ८ । १५ अ०) ॥

उपांशुयागस्य प्रकृतदेवतानियमाधिकरणम्।

तद्वच्च देवतायां स्यात् ॥ ४९ ॥ (पू०)

देवतां प्रति उपांशुयागस्य संशयः, किम् अनियमः, नियमः ? इति। किं प्राप्तम् ?, यद्यत् द्रव्यं प्रति अनियमः पूर्वाधिकरणपूर्वपक्षे, तद्यत् देवतायाम् अनियमः। ननु अग्नीषोमौ विधीयेते। उच्यते, पुराकल्परूपोऽयं न विधिसरूपः। इमाः तर्हि विष्णुरुपांशु यष्टव्यः इत्येवमादिना देवता विधीयन्ते। उच्यते, उक्तमजामिकरणवचनार्था एते अर्थवादा इति, तस्मादनियमः।

तान्त्रीणां प्रकरणात् ॥ ५० ॥ (सि०)

न हि देवतामन्तरेण यागो भवति, न च वचनमन्त-

रेण देवता, न च, अन्यस्य विहिता देवता, अन्यस्य अवकल्पते। तस्मात् प्रकृतानां तद्भवानाम अन्यतमया देवतया प्रकृतत्वात् एकवाक्यतां कृत्वा देवताम् अवगमिष्यामः। एकया च कृतार्थत्वात् यां काञ्चित् देवतामिति॥ (१०।८।१६ प०)॥

उपांशुयाजस्य विष्ण्वादिदेवताकत्वपौर्णमासीकर्तृकत्वयोरधिकरणम्।

धर्माद्वा स्यात् प्रजापतिः॥ ५१॥ (१म पू०)

तान्द्रीषामन्यतमा देवतेत्युक्तम्। तत्र सन्देहः, किं तान्द्रीष्वनियमः, अथ वा प्रजापतिः, अथ वा अग्निः, अथ वा विष्णुः, अमावास्यायां चोपांशुयाजः। अथ वा पौर्णमास्यामुपांशुयाजः, विष्णुर्देवता। अथ वा उभयत्रोपांशुयाजः, देवताविकल्पश्च इति। अथ वा पौर्णमास्यामेव उपांशुयाजः, तत्रैव विष्ण्वाद्या देवताः? इति पक्षाः। किं तावत् प्राप्तम्। प्रजापतिः देवता। कुतः?। धर्म्यात्, तस्य हि उपांशुत्वं धर्म्यः, तस्मात् यत्किञ्चित् प्राजापत्यं यज्ञे क्रियते, उपांशवेव तत् क्रियते इति। उपांशुयाजनामकत्वाच्च अस्य कर्मणः इदम् अवगम्यते, न्यूनमस्य उपांशुत्वं धर्म इति, आत्मनि साधनेषु च न उच्चैस्त्वेन अस्य सम्बन्ध इति, तेन प्रजापतिरिति गम्यते, स हि अनुच्चैर्धर्मकः। अन्यस्यां सत्यामुच्चैस्त्वेनास्य सम्बन्धो भवेदिति।

देवतायास्त्वनिर्वचनं तत्रशब्दस्येह मृदुत्वं तस्मादिहाधिकारेण ॥ ५२ ॥ (२य पू०)

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, प्रजापतिर्देवतेति । तैन्द्रीणां मुख्योऽग्निर्देवता स्यात् प्रजापतेः देवतायाः अनिर्वचनं धर्मः तूष्णींभावः, प्रजापतिं मनसा यजेत् इति । ननु उपांशुत्वं प्रजापतेर्धर्मः, तस्मात् यत्किञ्चित् प्राजापत्यं क्रियते, उपांश्वेव तत् क्रियते इति । उच्यते, अनुवादसरूपत्वात् अर्थवाद एष प्रजापतिं मनसा यजेत् इत्यस्य विधेः । इह पुनरुपांशुयाजे तत्रशब्दस्य मृदुत्वम् । तस्मान्न प्रजापतेः, अधिकृतानां मुख्योऽग्निः स्यादिति ।

विष्णुर्वा स्याद्धौत्रान्नानादमावास्याहविश्च स्यात् हौत्रस्य तत्र दर्शनात् ॥ ५३ ॥ (३य पू०)

वाशब्दात् पक्षो निवर्त्तते । नैतदेवम्, अग्निः स्यादिति, कथन्तर्हि ? विष्णुः देवता स्यात्, हौत्रान्नानात्, अमावास्यां प्रकृत्य वैष्णवं हौत्रमाम्नायते, इदं विष्णुर्वि चक्रमे इतिविष्णुः सुवते वीर्य्येण इति, तदेवमर्थवत् भवति, यदि विष्णुदेवत्य उपांशुयाजः । एवममावास्यायामान्नानमर्थवत् भवति, यदि अमावास्यायामुपांशुयाजः । तस्मादमावास्यायामुपांशुयाजः स्यादिति ।

अपि वा पौर्णमास्यां स्यात् प्रधानशब्दसंयोगात् गुणत्वान्मन्त्रो यथाप्रधानं स्यात् ॥५४॥ (४र्थ पू०)

यदुक्तं विष्णुर्देवतेति तत् गृह्यते, न त्वमावास्याया-मुपांशुयाज इति। विधायको हि तस्य शब्दः पौर्णमा-स्याम्, आज्यस्थेव नो उपांशु पौर्णमास्यां यजन् इति. तं मन्त्रान्नानं न शक्नोति अमावास्यायामाक्रष्टुम। उपांशुयाजे मन्त्रस्य विधानात, यत्रोपांशुयाजः तत्र मन्त्र इति गम्यते, न, यत्र मन्त्रस्तत्रोपांशुयाज इति, उपांशु-याजस्य हि मन्त्रो विधीयते, न मन्त्रस्योपांशुयाजः।

आनन्तर्य्यञ्च सान्नाय्यस्य पुरोडाशेन दर्शयति अमावास्याविकारे ॥५५॥ (४थं पू०यु०)

इतश्च न अमावास्यायामुपांशुयाजः, अमावास्याविकारे हि साकंप्रस्थाप्ये सान्नाय्यस्यानन्तर्य्यं पुरोडाशेन दृश्यते। कथम्?। आज्यभागाभ्यां प्रचर्य्याग्नेयेन च पुरोडाशे-नाग्नीधे स्रुचौ प्रदाय सहकुक्षीभिरभिक्रामन्वाह इत्या-ग्नेयादानन्तर्य्यं सान्नाय्यस्य दर्शयति, न उपांशुयाजस्य तस्मान्नामावास्यायामुपांशुयाज इति।

अग्नीषोमविधानात्तु पौर्णमास्यामुभयत्र विधी-यते ॥ ५६ ॥ (५म पू०)

तुशब्दः पक्षं व्यावर्त्तयति। नैतदेवं, पौर्णमास्यामेवो-पांशुयाज इति। उभयत्र स्यात्, देवताविकल्पस्य। कुतः?। अविशेषेण हि उपांशुयाजः श्रूयते, उपांशुयाजमन्तरा यजति इति, यदेतत् आज्यस्थेव नो उपांशु पौर्णमास्यां यजेरन् इति, देवताविधानमेतत् पौर्णमास्याम्। तस्मा-

दग्नीषोमदेवत्यः पौर्णमास्यामुपांशुयाजः, मन्त्रसामान्यात् वैष्णवोऽमावास्यायामिति देवताविकल्पः स्यात् ।

प्रतिषिद्धविधानात् वा विष्णुः समानदेशः स्यात् ॥ ५७ ॥ (सि०)

न चैतदस्ति, यदुक्तमुभयत्र उपांशुयाजः देवताविकल्पश्च इति, किन्तर्हि पौर्णमास्यामेवोपांशुयाजस्तत्रैव च विष्णुर्या देवता इति । कुतः ।? प्रतिषिद्धविधानात् । किमिदं प्रतिषिद्धविधानात् ? इति । अमावास्यां वर्जयित्वा पौर्णमास्यां विधानात् इति । कथम् ? । आज्यस्यैव नौ उपांशु पौर्णमास्यां यजन् इति प्रकृत्य, समाम्नायते, जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशु याजमन्तरा यजति इति, पौर्णमास्यामिति गम्यते, तत्रैव चेदं वचनं विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमौ उपांशु यष्टव्यावजामित्वाय इति । तत्र पौर्णमास्यामेवोपांशुयाजस्तत्रैव च विष्णुर्या देवता इति ।

तथा चान्यार्थदर्शनम् ॥ ५८ ॥ (यु० १)

इतश्च न अमावास्यायामुपांशुयाजः । कुतः ? । अन्यार्थोऽप्येतमर्थं दर्शयति । कथम् ? । चतुर्दश पौर्णमास्याहुतयो ह्यन्ते, त्रयोदशामावास्यायाम् इति चतुर्दश भवेयुः, त्रयोदशेति नोपपद्यते, तस्मान्नामावास्यायामुपांशुयाज इति ।

न चानङ्गं सकृच्छ्रुतावुभयत्र विधीयेतासम्बन्धात् ॥ ५९ ॥ (यु० २)

इतश्च न अमावास्यायां, न हि सकृत् श्रूयमाणम् अनङ्गम् उभयत्र भवति, अङ्गं हि प्रधानार्थत्वादुभयत्र स्यात्, प्रधानञ्चेदं, नाङ्गं, तस्मात् पौर्णमास्यां श्रूयमाणं नामावास्यायां भवेत्, असम्बन्धात्, न हि प्रधानं प्रधानेन सम्बन्धं याति इति ।

गुणानां च परार्थत्वात्, प्रकृतौ विधिलिङ्गानि दर्शयति ॥ ६० ॥ (यु० ३)

गुणानां च परार्थत्वात् प्रधानेषु प्रकृतौ विधिलिङ्गानि दर्शयति, न प्रधानानामपरार्थत्वात् । कथम् ? । अग्न, मन्त्रावाज्यभागौ यजति इति एकादश प्रयाजान् यजत्येकादशानुयाजान् इति । तस्मादपि उपांशुयाजो नामावास्यायामिति ।

विकारे चाश्रुतित्वात् ॥ ६१ ॥ (यु० ४)

अमावास्याविकारे च साकं प्रस्थाप्ये उपांशुयाजो न श्रूयते । कथम् ? । आज्यभागाभ्यां प्रचर्य्याग्नेयेन च पुरोडाशेनाग्नीधे सुचौ प्रदाय सहकुम्भीभिरभिक्रामन्नाह इति आग्नेयादनन्तरं साकाय्यं दर्शयति, नोपांशुयाजम् । तस्मादपि न अमावास्यायामुपांशुयाज इति ॥ (१० । ८ । १७ अ०) ॥

एकपुरोडाशायामप्युपांशुयाजाधिकरणम्।

द्विपुरोडाशायां स्यादन्तरार्थत्वात् ॥ ६२ ॥ (पू०)

दर्शपूर्णमासयोरिदमामनन्ति, उपांशुयाजमन्तरा यजति इति. तत्रायमर्थः समधिगतः, पौर्णमास्यामुपांशुयाजः, तत्र च विष्णवादा देवताः इति। अस्ति चोर्ध्वं सोमात्, द्विपुरोडाशा पौर्णमासी। प्राक् सोमात्, एकपुरोडाशा। तत्रायमर्थः सांशयिकः। किं द्विपुरोडाशायामेव उपांशुयाजः, उत, द्विपुरोडाशायामेकपुरोडाशायाञ्च? इति। किं प्राप्तम्? द्विपुरोडाशायां स्यात्। कुतः?। अन्तरार्थत्वात्, अन्तरासंयोगेन हि श्रूयते उपांशुयाजमन्तरा यजति इति प्राक् पुरोडाशसंकीर्त्तनात्, पुरोडाशौ अन्तरेति गम्यते, द्विपुरोडाशायामन्तरा प्रक्रमं कर्त्तुं, न एकपुरोडाशायां, तत्र क्रियमाणम् अयथाश्रुतं स्यात्। तस्मात् द्विपुरोडाशायामेवेति।

अजामिकरणार्थत्वाच्च ॥ ६३ ॥ (उ०)

इतश्च द्विपुरोडाशायामेवेति। कुतः?। अजामिकरणार्थत्वमत्र श्रूयते, जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति। विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वाय इति. जामि सादृश्यमिति। पुरोडाशयोश्च सादृश्यदोष उच्यते, जामि वा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ पुरोडाशं

कृत्वा पुनरनूचीनः पुरोडाश एवेति, यच्च दोषस्तच्च दोष-विघातार्थेन भवितव्यम्। तस्मात् द्विपुरोडाशायामेवेति।

तदर्थमिति चेन्न तत्प्रधानत्वात् ॥ ६४ ॥ (आ०)

इति चेत्पश्यसि, तदर्थत्वात् अन्तरार्थत्वात् द्विपुरोडाशायामेव भविष्यति इति, तन्न, तत्प्रधानत्वात्. पौर्णमासी प्रधानतः, अन्तरार्थो गुणतः, उपांशुयाजः पौर्णमासस्यवयवो विधीयते, उपांशुयाजस्याप्यन्तरालं गुणः, एकपुरोडाशापि भवत्येव पौर्णमासी, तस्यामुपांशुयाजः केन न स्यात्, अन्तरालं गुणोऽसम्भवान्न भविष्यति इति। तस्मादसति अन्तराले एकपुरोडाशायामुपांशुयाजः कर्त्तव्य इति।

अशिष्टेन च सम्बन्धात् ॥ ६५ ॥ (यु०)

अशिष्टेन च अशुतेन अन्तरालार्थेन उपांशुयाजस्य सम्बन्धः कर्त्तव्यः स्यात् अन्तरालगुणक उपांशुयाज इति। न हि अन्तरालं गुणत्वेन विधीयमानं पश्यामः। तस्मात् एकपुरोडाशायामपि उपांशुयाजः कर्त्तव्यः इति।

उपपत्तेस्तु निवेशः स्याद्गुणस्यानुपरोधेनार्थस्य विद्यमानत्वात् विधानादन्तरार्थस्य नैमित्तिकत्वात् तदभावेऽश्रुतौ स्यात् ॥ ६६ ॥ (आ०नि०)

तुशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, गुणत्वेनान्तरालं न श्रूयते इति, तस्मिन्नसति नैवोपांशुयाजोऽन्तराले

निविशते, अन्तरालमस्य गुण उत्पत्तिवाक्येन श्रूयते, उपांशुयाजमन्तरा यजति इति। तस्मात् अस्य गुणस्य अनुपरोधेन गुणी निविशेत, न एकपुरोडाशायां स्यात्, नैकपुरोडाशायामक्रियमाणोऽनर्थको भवति, अन्तरालार्थो हि द्विपुरोडाशायां विधीयते। तदभावे अन्तरालार्थस्य अभावे, श्रुतौ यदि द्विपुरोडाशा न श्रूयेत, ततः स्यादेकपुरोडाशायामुपांशुयाजः, अस्ति त्वनर्थकः द्विपुरोडाशा पौर्णमासी। तस्मात् एकपुरोडाशायां न स्यादिति।

उभयोस्तु विधानात् ॥ ६७ ॥ (सि०)

तुशब्दः पक्षं व्यावर्त्तयति। उभयोः पौर्णमास्योरुपांशुयाजः, एकपुरोडाशायामपि स्यादित्यर्थः। कुतः ?। विधानात्, विधीयते हि स एकपुरोडाशायामपि, सापि हि पौर्णमासी, आज्यस्यैव ना उपांशु पौर्णमास्यां यजन् इति पौर्णमासीशब्द एकपुरोडाशां वर्जयन् उपलक्ष्यते। तस्मात् एकपुरोडाशायामपि स्यात्।

गुणानाञ्च परार्थत्वादुपवेषवदेति स्यात् ॥ ६८ ॥ (यु०)

गुणस्यान्तरालं प्रधानार्थं श्रूयते उपांशुयाजार्थेन, अन्तरालेन उपांशुयाजस्योपकर्त्तव्यमिति। नासौ एकपुरोडाशायामुपांशुयाजं निवर्त्तयितुमर्हति, पौर्णमास्यां श्रूयमाण उपांशुयाज एकपुरोडाशाया अपि पौर्णमासीत्वात् तत्र प्राप्नोति, अन्तराले च श्रुतत्वादन्तरालेऽपि प्राप्नोति।

एकपुरोडाशायामन्तरालाभावात् न अन्तराले स्यात्। तस्मादन्तरालस्य गुणस्य शास्त्रं यदा पौर्णमासी तदेति स्यात्, उपवेषवत्, यदा उपवेषेण कपालान्युपदधाति इति यदोपवेषस्तदा तेनेति गम्यते, एवमिहापि यदा अन्तरालं, तदा अन्तराले भविष्यति। तस्मात् एकपुरोडाशायामपि स्यादिति।

अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ॥ ६६ ॥ (आ० नि०)

उच्यते, ननु अन्तरालगुणक उपांशुयाजः श्रूयमाणोऽन्तरालाभावादुच्यमानोऽपि पौर्णमास्यां एकपुरोडाशायां वैगुण्यात् फलस्यासाधक इति न क्रियेत, न हि, पौर्णमासीविशेषे यच्चान्तरालमिति अन्तरालगुणता विधीयते, अविशेषेण हि द्विपुरोडाशायाम् एकपुरोडाशायां च तद्विधानं तस्मात् एकपुरोडाशायां प्रयोजनाभावान्न करिष्यते इति। आह, एवं सति उपांशुयाजाभावादेकपुरोडाशा नैव कर्त्तव्या। अत्रोच्यते, नैष दोषः, फलवती हि सा भविष्यति, यदि द्विपुरोडाशा सम्भविष्यति इति। अत्रोच्यते, यद्येकपुरोडाशायां वैगुण्यं उपांशुयाजस्य स्यात्, ततो न क्रियेत, न तु वैगुण्यमस्ति, न ह्यन्तरालं गुणतः श्रूयते, किन्तर्हि कालं लक्षयितुं, यौ पुरोडाशौ तयोर्मध्ये इति। कथम् ?। अनूद्य हि तौ पुरोडाशौ एतद्विधीयते, जामि वा एतदयज्ञस्य क्रियते, यदत्वजौ पुरोडाशौ उपांशुयाजमन्तरा यजति इति, यौ तावनूदितौ यथा व्यवहितौ भवतः,

तथोपांशुयाजः कर्त्तव्यः तस्मिन् काल इति गम्यते, अनपायश्च तस्य कालस्य एकपुरोडाशायामपि। कथम्?। यो हि द्वयोः पुरोडाशयोर्मध्य इति कालोऽवगम्यते, स एव पूर्वस्मादुत्तर इति। एवं चेत् यद्यप्येकपुरोडाशायां द्वौ पुरोडाशौ न स्तः, तथापि स पूर्व आग्नेयोऽस्ति, तस्मादुत्तरः स एव कालः, योऽसावन्तरालेन लक्षितः। यथा, नागवेलायामागन्तव्यं, गङ्गवेलायामागन्तव्यं, पटहवेलायामागन्तव्यमिति, यस्मिन् ग्रामे न नागाः न गङ्गाः न पटहस्तस्मिन्नपि स एव कालः, तत्र हि आगमनं क्रियते। एवमिहापि द्रष्टव्यम्। तस्मात् एकपुरोडाशायाम् उपांशुयाजः कर्त्तव्य इति।

प्रशंसार्थमजामित्वम् ॥ ७० ॥ (आ० नि०)

अथ यदुक्तम्, अजामिकरणार्थत्वात् इति, तत् परिहर्त्तव्यम्, अत्रोच्यते, प्रशंसा एषा उपांशुयाजस्य, वैचित्र्येण, न त्वेतदेवात्र फलं विधीयते, यदजामित्वमिति। कुतः?। विहितस्य हि प्रयोजनं विधीयते। न चैवं सति उपांशुयाजो विहितः स्यात् विधाने चार्थद्वयविधानं दोषः। न च, अजामिकरणं नाम किञ्चिदिष्टं फलम्। तस्मात् प्रशंसैषा, यथोपस्तरणाभिघारणयोरमृतार्थत्वम्, अमृतं वा आज्यं मर्त्यं हविर्यदुपास्तृणात्यभिघारयत्यमृता इतिमेवैनां करोति इति। तस्मात् एकपुरोडाशायामप्युपांशुयाजः कर्त्तव्य एवेति ॥ (१०। ८। १८ अ०) ॥

इति श्रीमच्छबरस्वामिकृतौ मीमांसाभाष्ये दशमस्याध्यायस्याष्टमः पादः समाप्तः ॥

मीमांसा-दर्शने

११ अध्याये १ पादः ।

आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वाधिकरणम् ।

प्रयोजनाभिसम्बन्धात् पृथक्सतां ततः स्यादैक-कर्म्यमेकशब्दाभिसंयोगात् ॥ १ ॥

दशमेऽध्याये बाधाभ्युच्चयलक्षणं वृत्तम् । इदानीमेकादशे तन्त्रावापलक्षणं निर्वर्त्तयिष्यामः । तत्र यत्प्रकृतं बहूनामुपकरोति तत् तन्त्रमित्युच्यते, यथा, बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपः । यस्तु आवृत्त्या उप करोति स आवापः । यथा तेषामेव ब्राह्मणानामनुलेपनम् । श्लोकमुदाहरन्ति,—

साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजकः ।

एवमेव प्रसङ्गः स्याद्विद्यमाने सकृे विधौ ॥ इति

साधारणं भवेत्तन्त्रमित्युक्तार्थम् । परार्थे त्वप्रयोजकः इति, यः परार्थमुत्पन्नः तदर्थमेव चानुष्ठीयमानः परस्योपकरोति, स परः तस्याप्रयोजकः । यथा, पशुलम्भो यागार्थमुत्पन्न स्तदर्थमेव चानुष्ठीयमानो लोहितसक्तत्कर्मणोरप्युपकरोतीति । एवमेव प्रसङ्गः स्यात्, अयं तु विशेषः, विद्यमाने —ऽ सिद्धे इति । यदाप्यस्य अन्यो विधिर्विद्यते परावि-

वोदकेन प्राप्ताः पशुपुरोडाशस्यापि, पशवर्था एव तु कृताः पशुपुरोडाशस्योपकुर्वन्तीतिं न पुनस्तदर्थं क्रियन्ते।

प्रकृतमिदानीमुच्यते, तन्त्रावापसञ्चयं प्रतिज्ञातं, तदुच्यते, दर्शपूर्णमासयोः प्रधानानि आग्नेयादीनि, तेषां स्वर्गः फलं श्रूयते, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति। स किं तेषां तन्त्रेण भवति, उत भेदेन? इति। एवं चातुर्मास्यादिष्वपि द्रष्टव्यम्।

ननु च नैवाच स्वर्गः फलं श्रूयते, स्वर्गकामपदेन तावत् पुरुषोऽभिधीयते, यजेतेत्यनेनापि यागनिर्वृत्तिः, तयोर्वाक्येन सम्बन्धः, केनेदानीं फलमुच्यते?। अनेनैव स्वर्गकामपदेनेत्याह। ननु पुरुषस्य अयं वक्ता। न खलु कश्चित् पुरुषः स्वर्गकामो नामास्ति। ननु च यस्य स्वर्गे कामः स स्वर्गकाम इति। एतदेव न जानीमः कस्य स्वर्गे काम इति, य एव हि स्वर्गकामः स एवास्वर्गकामो भवति इति। एवं तर्हि कालोपदेशोऽयं भवति, यदा स्वर्गकामस्तदा यजेत इति। अथापि न कश्चित् कालविशेषोऽस्ति, यस्मिन्नियमेन स्वर्गकामः स्यात्, सर्वेषु कालेषु सर्वे कामा अनियमेन उत्पद्यन्ते। तत्र न कश्चित् कालविशेषोऽनेन शक्यते व्यपदेष्टुम्। एवं तर्हि नेदायं पुरुषोपदेशो नापि कालोपदेशः, किं खलु, फलकामो निमित्तं, स्वर्गविषये कामे उत्पन्ने यजेत इति, यथा कपाले नष्टे यजेत इति। अस्य पक्षस्य सूत्रेणैव परिहार उक्तः, फलकामो निमित्तमिति चेत् (६।२।९)। न नित्यत्वात् (६।२।१०) इति। नित्यानि अग्निहोत्रादीनि कर्माणि, तानि यदि

निमित्ते विधीयन्ते, नित्यत्वमेषां विहन्येत। तत्र नित्यचोदना यावज्जीविकाद्या अपरुध्यन्ते, लिङ्गानि च अप वा एष स्वर्गाल्लोकात् च्यवते यो दर्शपूर्णमासयाजी सन् पौर्णमासीम् अमावास्यां वाऽतिपातयेत् इत्येवमादीनि।

परिशेषात् फलसंयोग एवायम्। कथं पुनरनेन शक्यते फलं विधातुम्। तदुच्यते, ? स्वर्गकामो यजेत इति यदि वा स्वर्गकामो यागायोपदिश्यते यथा लोहितोष्णीषाः। यदि वा यागः स्वर्गकामाय, यथा मलिनः स्नायात्, बभुक्षितोऽश्नीयात् इति। तत्र यदि स्वर्गकामः कर्मणि उपदिश्यते, उपदिष्टोऽपि न प्रवर्त्तेत, को हि परार्थं प्रयाममातिष्ठेत् ? तथा कर्मचोदनाऽनर्थिकैव भवति। अथ यागः स्वर्गकामार्थः, ततोऽसौ पुरुषस्योपकरोति, तं पुरुषः स्वार्थेन करोति इति। तथा कर्मचोदना अर्थवती भवति। अपि च यागविधौ श्रुत्यर्थः परिगृहीतो भवति, स्वर्गकामविधौ वाक्यार्थः। तस्माद्यागः स्वर्गकामस्योपकारकः। स्वर्गकामस्य अनेकपुत्रपशुग्रामाद्यादिलाभकरः स यदि पुत्राद्यादीनामन्यतमं करोति, ततः स्वर्गकामशब्दोऽविवक्षितार्थः पुरुषमात्रवचनो भवति। तथा च आनर्थक्यमेव, अन्तरेणापि हि तद्वचनं पुरुषमात्रमाख्यातादेव गम्यते। तस्माद् यागात् स्वर्गो भवति।

तत्रानेककर्मसन्निपाते दर्शपूर्णमासादिषु भवति संशयः, किं तत्समेषां फलम्, उत, भेदेन ? इति। किं प्राप्तम् ? भेदेन इति। किं कारणम् ?। इमानि आग्ने-

तानि उत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति। तत् सन्निधौ स्वर्गादि फलं श्रूयमाणं भेदेनाकाङ्क्षितत्वाद् भेदेनैव सम्बध्यते। तस्मात् प्रतिप्रधानं फलभेद इत्येवं प्राप्तम्।

एवं प्राप्ते इदमारभ्यते, प्रयोजनाभिसम्बन्धात् पृथक्कृतां ततः स्यादेककर्म्यमेकशब्दाभिसंयोगात् पृथग्भूतानामपि एतेषामाग्नेयादीनां ततः स्यादेककर्म्यम्। कुतः?। प्रयोजनाभिसंयोगात्, प्रयोजनं फलं, तत् प्रति एषां समेतानां सम्बन्धात् संयोगादित्यर्थः। एककर्म्यमिति, कर्मशब्देनाच फलम् उच्यते, क्रियत इति। तत् येषामेकं, तानि एककर्माणि, तेषां भाव ऐककर्म्यम्, ऐकफल्यमित्यर्थः। कथं पुनर्ज्ञायते, समेतानामाग्नेयादीनां फलेन योगः इति?। एकशब्दाभिसंयोगात्, य एषां समुदितानामेकः शब्दो वाचकः, तेन एतानि अभिधाय फलसम्बन्धः कृतः दर्शपूर्णमासाभ्यां स्वर्गकामः इति। अतः समुदितेभ्यः फलं गम्यते, न भेदेन। यथा ग्रामेणोदपानः खेयः, ग्रामेण तडागः खेय इति, ग्रामशब्देन समुदायवचनेन संयुज्य कूपो विधीयमानः समुदितैः पुरुषैरेकः खन्यते, न प्रतिपुरुषं कूपभेदः। एवमिहापि।

शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत ॥ २ ॥

(आ०)

नायमेकान्तः, यत् समुदायशब्देन संयोज्योच्यते, तत् समुदितानामेव भवति इति, भेदेनापि किञ्चिद्भवति। यथा, गणाय स्नानं, गणाय अनुलेपनम् इति अनुलेपनादि-

शेषो गणशब्देन समुदायवचनेनापि संयोज्योक्तो न समुदायेन सम्बध्यते, केन तर्हि, समुदायिभिः। प्रतिपुरुषं हि ज्ञानादि आवर्त्तते। अतः शेषवद्वा फलं भिद्येत, कूपवद्वा तन्त्रं स्यात् इति अवैशेषिकोऽयं हेतुः समुदायशब्दसंयोगः। तस्मात् हेत्वन्तरं वक्तव्यं, अवैष विशेष इति। सोऽयमुच्यते,

अविधानात्तु नैवं स्यात् ॥ ३ ॥ (सि०)

नात्र यागमुद्दिश्य फलं विधीयते, स्वर्गेण यागं कुर्य्यात् इति, किन्तर्हि, फलमुद्दिश्य यागो विधीयते, स्वर्गं यागेन कुर्य्यात् इति। किं कारणम्?। यत्र विधायिका विभक्तिः यजेत इति, सा यागं श्रुत्या विदधाति, फलं वाक्येन विदध्यात्। न च श्रुत्यर्थे सम्भवति वाक्यार्थो याह्यः, श्रुत्यर्थस्य मुख्यत्वात्। किं पुनः स्याद् यदि फलं विधीयते?। फले विधीयमाने यजत्यर्थोऽनूद्येत, न हि द्वयोर्विधीयमानयोः सम्बन्धोऽस्ति। अनुवादश्च सन्निहितानाम् आग्नेयादीनां स्यात्। तानि च परस्परानपेक्षाणि भिन्नो विभक्तानि उत्पन्नानि इति विभागेनैव तैः फलं सम्बध्यते। अथ पुनः यजत्यर्थे विधीयमाने आग्नेयादयो यागाः शब्देन समुदायवचनेन फलनिर्वृत्तावुपादेयत्वेन चोद्यन्ते, चोदितानां समुदितत्वं गुणः सन्निधानविशेषात् दो गम्यते स विवक्षितो भवति, अविवक्षायां कारणाभावात्।

यदि यागा विधीयन्ते, दर्शपूर्णमासशब्देन विशेष्टुं न

शक्यते, न हि विधीयमानस्य विशेषणं भवति, यत्कारणं विशेषणमप्यविधीयमानं न भवति, न च द्वयोर्विधीयमानयोः परस्परसम्बन्धो भवति। किं पुनरत्र विशेषणेन कार्यम्? यावता रूपवतामाग्नेयादीनां सन्निधौ अरूपो दर्शपूर्णमासाभ्यां यजेत इति यजतिशब्दः समुदायवचन इति। किमर्थं तर्हि दर्शपूर्णमासशब्दः?। अनर्थकस्य नित्यानुवादमात्रं, यथा, इन्द्रेण देवेन दृष्टं, दृष्टान्तो तिथा मन्तिष्ठते, नानुयाजान् यजति इति। अथ वा, वाक्यार्थस्येवात्र विधानं स्याद्यं, श्रुत्यर्थं हि विधीयमाने दर्शपूर्णमासशब्दः अनर्थक एवापद्यते, वाक्यार्थे तु दर्शपूर्णमासशब्दो विशेषणेनार्थवान्। यजतिरपि भावनाविधानार्थं प्राप्तोऽपि पुनः श्रूयते। प्राप्तिश्च दर्शपूर्णमासशब्दस्य यागवचनत्वात् इति न किञ्चिदनर्थकम्। तस्मादेष पक्षो न्याय्यान्।

शेषस्य हि परार्थत्वाद्विधानात् प्रतिप्रधानभावः स्यात् ॥ ४ ॥ (आ० नि०)

यत्तु शेषवत् इति, शेषस्य अनुलेपनादेः परार्थेन विधानं पुरुषसंस्कारकत्वेन, एवं दृष्टोऽर्थो भवति, अन्यथा अदृष्टं कल्पयितव्यं स्यात्, तत्र गुणः पुरुषलक्षणार्थो भवति। शक्नोति च सम्बन्धात् पुरुषान् लक्षयितुम्। अदृष्टं वा कल्पातां लक्षणा वेति दृष्टा लक्षणा कल्पयितुं न्याय्या, तस्मात् पुरुषलक्षणार्थो गुणः, न च, लक्षणं कार्येण सम्बध्यते, किन्तर्हि लक्षितः। तद्यथा शुक्लवाससमानय इति, यदा तु शुक्ले वाससी पुरुषलक्षणार्थम्

उच्यते, न तदा आनयनेन सम्बध्येते इति। एवमिहापि न गुणः कार्येण सम्बध्यते, किन्तु पुरुषा एव कार्येण सम्बध्यन्ते। तस्मादनुलेपनादि प्रतिप्रधानं भिद्यते॥ (११।१।१ अ०)॥

अङ्गानामेककार्याधिकरणम्।

अङ्गेष्विदानीं चिन्ता, किम् अङ्गानि सभूय कार्यं कुर्वन्ति, उत, भेदेन? इति। तत्रेदमुच्यते,

अङ्गानान्तु शब्दभेदात् क्रतुवत् स्यात् फलान्यत्वम्॥ ५॥ (पू०)

यथा प्रधानानां समेतानामेकं फलं नैवमङ्गानाम्, अङ्गानां पृथक् प्रयोजनम्, अङ्गस्याङ्गस्य पृथक् फलम् किं कारणम्?। शब्दभेदात्, चोदनाभेदादित्यर्थः। समिधो यजति, तनूनपातं यजति, इत्येवमादिभिः परस्परानपेक्षाभिश्चोदनाभिः पृथक्त्वेनाङ्गानि चोद्यन्ते, तानि पृथगेव प्रयोजनानि आकाङ्क्षन्ति, न साहित्येन, साहित्यस्यानुक्तत्वात्। अतस्तेषां पृथगेव प्रयोजनैरभिसम्बन्धो विज्ञायते, क्रतुवत्, यथा क्रतुषु पृथक्त्वेन चोदितेषु पृथगेव फलसम्बन्धो भवति।

अर्थभेदस्तु तत्रार्थैकार्थ्यादैककर्म्यम्॥६॥(सि०)

युक्तं, यत् क्रतुषु फलभेदः। शब्देन तत्र भिद्यानि

फलानि उक्तानि, सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः इति। इह ऐकार्थ्यं, सर्वेषामङ्गानाम् एकोऽर्थः प्रधानेषु उपकारः। उपकारोपेक्षायां हि अङ्गानि श्रूयन्ते, तानि सर्वाणि एकार्थानि भवन्ति। नन्वेवं सति एकार्थत्वादेषां विकल्पः प्राप्नोति। वक्ष्यते तत्परिहारः, विधिषु एकश्रुतित्वात् (१७ सू०) इत्यत्र यथा विकल्पो न भवति। अत ऐकार्थ्यात् अङ्गानामेकं कार्यम् इति।

शब्दभेदान्नेति चेत् ॥ ७ ॥ (आ०)

अथ यदुक्तं, चोदनाभेदादङ्गानामर्थभेदो न्याय्य इति, तत् परिहर्तव्यम्। परिहृतं तत् एकार्थत्वेन। न परिक्रियते, सर्वाणि च प्रधानस्योपकुर्युः भिन्नानि च कार्याणि कुर्युः, तद्यथा कारकाणि कर्त्रादीनि सर्वाणि तावत् क्रियाया उपकुर्वन्ति, अथ च प्रतिकारकं कार्यभेदः। इदं तर्हि परिक्रियते, यदि समिदादिभिर्वाक्यैरङ्गानां प्रयोग उच्यते, समिद्याजिः प्रयोक्तव्यः, तनूनपाद्याजिः प्रयोक्तव्य इति, ततः स्यात् प्रयोजनाकाङ्क्षा। सा च भवन्ती भेदेन स्यात्, न त्वत्र प्रयोग उच्यते, किन्तर्हि रूपमात्रमाख्यायते, एवं लक्षणको याग इह भवति इति। तत् कस्य हेतोः?। प्रयोगवचनस्य प्रत्ययस्याभावात्, अन्येन च प्रयोगस्योक्तत्वात्। क्व पुनरेषां प्रयोग उक्तः? उत्तरसूत्रे दर्शयिष्यामः। न चेदत्र प्रयोजनाकाङ्क्षा, कुतः प्रयोजनं [illegible]

कर्मार्थत्वात् प्रयोगे तच्छब्दः स्यात् तदर्थत्वात् ॥ ८ ॥ (आ० नि०)

प्रधानानां प्रयोगे उच्यमाने अङ्गानामपि तच्छब्दः स्यात् प्रयोगस्य, तेनैव प्रधानप्रयोगवचनेनैव शब्देन अङ्गानामपि प्रयोग उच्यते, दर्शपूर्णमासाभ्यां यजेत इति। कुतः ?। कर्मार्थत्वात्, क्रियार्थत्वादित्यर्थः। फलस्य क्रियार्थो दर्शपूर्णमासौ श्रूयेते, दर्शपूर्णमासाभ्यां स्वर्गं कुर्यात् इति। तत्र आकाङ्क्षा भवति, कथम् ? इति। सा समिदादिभिश्चोदनाभिर्निवर्त्यते, समिधो यजति, तनूनपातं यजति इत्येवम् इति। तत् कस्य हेतोः ?। तदर्थत्वात्, तदर्था एताः समिदादिचोदनाः, तेनाकाङ्क्षितत्वात्, अफलत्वात्, फलवत्सन्निधानाच्च। सैषा दर्शपूर्णमासयोः फलं साधयतोः इतिकर्त्तव्यता, न च, इति कर्त्तव्यतामन्तरेण कर्मचोदना अर्थवती भवति। तस्मात् सेतिकर्त्तव्यताकः कर्मणः प्रयोगश्चोद्यते। तथा च मिश्रमेतत् प्रधानप्रयोगवचनेनैव शब्देन अङ्गानां प्रयोगः चोद्यत इति, एवं च सति एकशब्दचोदितान्येव अङ्गानि। तत्र यथा प्रधानानाम् एकशब्दाभिसंयोगात् फलैक्यम् एवमङ्गानामपीति।

अत्राह, न एतद्युक्तम्। कुतः ?।

कर्त्तृविधेर्नानार्थत्वाद्गुणप्रधानेषु ॥ ९ ॥ (आ०)

कर्त्तुर्यत्र प्रधाने विधिः दर्शपूर्णमासाभ्यां यजेत इति,

विधिः फलार्थः अङ्गविधिः प्रधानार्थः। तत्र प्रधानानि फलं प्रति विधातव्यानि, अङ्गानि प्रति अनूद्यानि, न च विध्यनुवादौ युगपत् सम्भवतः। तस्मात् नैकेन वाक्येन प्रधानानि, तेषाञ्च इतिकर्त्तव्यता शक्या विधातुम्। अतो न प्रधानचोदनागृहीतानि अङ्गानि।

तत्राह, नैतदयुक्तं, युक्तमेतत्। कुतः?।

आरम्भस्य शब्दपूर्वत्वात् ॥ १० ॥ (आ०नि०)

आरम्भो व्यापारः क्रियेत्यनर्थान्तरम्। यागेन इह स्वर्गस्य क्रिया उच्यते, यजेत यागेन स्वर्गं कुर्य्यात्, स्वर्गार्थं व्याप्रियेत इत्यर्थः। इदं तु न ज्ञायते कोऽसौ व्यापारः? इति, तत्सन्निधौ च अन्यत्वाधानादि श्रूयते। तस्मिन् आकाङ्क्षितत्वात् सन्निधानाच्च एतद्भवति, अयमस्मिन् व्यापारः, येन यागः स्वर्गं करोति इति। तस्मिन् विधीयमाने नास्ति वाक्यभेदः।

अथ वा, प्रधानानां फलं प्रति, अङ्गानाञ्च प्रधानानि प्रति, विधिरविरुद्धः। कथं कृत्वा?। दर्शपूर्णमासाभ्यां स्वर्गसाधनमपूर्वम् उच्यते, तस्य सविशेषस्य वचनं प्रयुज्यते। यथा, एतस्यैव रेवतीषु वारवन्तीयम् अग्निष्टोमसाम कृत्वा पशुकामो यजेत इति। तस्मात् प्रधानप्रयोगवचनेनैव अङ्गानां प्रयोगो विधीयत इति ॥ (११।१।२ अ०) ॥

——

दर्शपूर्णमासादिकाम्यकर्मणां सर्वाङ्गोपसंहाराधिकरणम्।

इदं विचार्यते, किम् अग्निहोत्रादीनां कर्मणामेकदेशाङ्गयुक्तानामपि प्रयोगः, अथ वा सर्वाङ्गोपसंहारेणैव ? इति। अथ तत्र किं युक्तम् ?। सर्वत्रको प्रवृत्तिः स्यात् (६। ३। १ सू०) इति। तत्र नैयमिकमारभ्यं प्रति चिन्ता कृता, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इत्यनया चोदनया योऽयं यावज्जीविकः प्रयोगनियम उच्यते, किं तत्र सर्वाङ्गोपसंहारः, उत, न ? इति। इह इदानीं फलार्थे प्रयोगे चिन्ता, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्यनया चोदनया योऽयं स्वर्गार्थं आरम्भः, तत्रापि किं नैयमिकवदेव प्रयोगः, उत, सर्वाङ्गोपसंहारः ? इति। किं तावत् प्राप्तम्,—

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत् स्यात् ॥ ११ ॥ (पू०)

एकदेशेनापि अङ्गानां, समाप्येत, कर्म प्रयुञ्ज्येतेत्यर्थः। कुतः ?। कृतार्थत्वात्, यो असौ, दर्शपूर्णमासाभ्यां स्वर्गार्थं व्याप्रियेत इत्युक्ते कथं व्यापारितव्यमित्याकाङ्क्षा, सा एकेनापि अङ्गेन कृतार्था भवति, समिधो यजति एवं व्यापारितव्यं, तथा अङ्गद्वयेन अङ्गत्रयेण च। यो यावन्ति अङ्गानि करिष्यति, स तावत्कृतमुपकारं प्राप्नोति। यथा क्रत्वन्तरेषु सौर्य्यार्थ्यमणप्राजापत्यनैर्ऋतादिषु यो यावन्ति कर्माणि करोति, स तावद्वः फलमश्नुते। न तु तत्सन्नि-

[illegible] प्राप्तेषु चोत्तरावत्

स्यात्, तद्यथा, वाग्यतः तिस्रो दोहयित्वा विसृष्टवाग् अनन्वारभ्य तूष्णीमुत्तरा दोहयति इति, यस्य यावत्यो गावः स तावतीर्दोहयति इति, तावतीष्वपि कृतार्थ उत्तरशब्दः।" एवमिहापि यो यावन्ति अङ्गानि उत्सहते स तावन्ति करिष्यति।

फलाभावान्नेति चेत् ॥ १२ ॥ (आ०)

इति चेत् भवान् पश्यति, एकदेशाङ्गायुक्तानामनियतानां कर्मणां प्रयोग इति। तत्र। कुतः?। फलाभावात्, यावच्छ्रुतं स्वर्गकामस्य, स्वर्गकामेनेदं कर्त्तव्यमिति, तत्साकल्येनाकुर्वतः फलाभावः स्यात्, सर्वं चेदं श्रुतं स्वर्गकामो यजेत इत्युक्ता सर्वस्य अग्न्याधानादेः कर्मकलापस्यानानात्।

न, कर्मसंयोगात् प्रयोजनमशब्ददोषं स्यात् ॥ ॥ १३ ॥ (आ० नि०)

नैतदेवम्, अङ्गवैकल्ये फलाभाव इति। कुतः?। कर्मसंयोगात्, प्रधानकर्मणा हि फलं संयुक्तं, दर्शपूर्णमासाभ्यां स्वर्गकामः इति, न अङ्गैः अङ्गानि तु तदाकाङ्क्षया गृह्यन्ते, सा चाकाङ्क्षा एकेनापि कृतार्था भवतीत्युक्तम्। एवं चेत् प्रयोजनम् अङ्गकृत उपकारः, फलं च स्वर्गादि अशब्ददोषं स्यात्, दर्शपूर्णमासयोः फलार्थत्वे दर्शपूर्णमासाभ्यां स्वर्गकामः इत्येवंशब्दो न दुष्येत्, तस्य-

विधौ चाङ्गानां विधायका ये समिदादयः, ते च तदुपकारित्वे न दृष्टेयुः। तस्मात्काङ्क्षाभावे फलाभावः।

ऐकशब्द्यादिति चेत् ॥ १४ ॥ (आ०)

इति चेत् पश्यसि, दर्शपूर्णमासाभ्यां तत् फलं न समिदादिभ्य इति, नेतद्युक्तम्। किं कारणम्?। ऐकशब्द्यात्, एकः शब्द उपदेशकः प्रयोगस्य दर्शपूर्णमासयोः, समिदादीनाञ्च, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति, तेन च फलसम्बन्धः कृतः। तच्च कुतः एतत् दर्शपूर्णमासतः फलं, नेतरेभ्यः इति।

न सर्वाणि फलसंयुक्तानि इति, किन्तर्हि दर्शपूर्णमासाविव। कथं ज्ञायते?। दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति दर्शपूर्णमासयोरेव स्वर्गं प्रति करणत्वं श्रु , न समिदादीनाम्। आकाङ्क्षया हि तेषां ग्रहणं, सा च कथंभावस्याकाङ्क्षा कथं कुर्यादिति, न कारकस्य, केन कुर्यादिति तस्य निर्दिष्टत्वात् दर्शपूर्णमासाभ्यामिति। तस्मान्न समिदादीनां फलेन संयोगः यदि च संयुञ्ज्यरन् न समानि आग्नेयादिभिः स्युः।

समत्वाच्च गुणत्वं तत्र यदुच्यते एकदेशाङ्गयुक्तानामपि प्रयोग इत्येतदेव नास्ति ये त्वैककर्म्यादिति सूत्रं पठन्ति तेषामयमर्थः इति चेत् पश्यसि प्रधानानामङ्गवत्तया अङ्गानि क्रियन्ते इति। तस्मादैककर्म्यं भवतु एकमेवाङ्गं प्रयुज्यता

नार्थं पृथक्त्वात्मत्वादगुणत्वम् ॥१५॥ (आ०नि०)

नेतदेवं कस्मादर्थपृथक्त्वादर्थपृथक्त्वं भवति उपकारपृथक्त्वमेकेनाङ्गेनार्थवत्तायामल्पं उपकारो बहुभिर्महान् कथं ज्ञायते संख्यात्वादगुणत्वं यद्येकेन बहुभिश्च समः उपकारः स्यात्। तत्र एकस्यैवाङ्गत्वं भवेत् अन्येषामगुणत्वं स्यात्। अनङ्गत्वमित्यर्थः। तत्र बहूनामाम्नानमनर्थकं स्यात्। न चैषां विकल्प इत्युक्तं विधेरेकश्रुतित्वादित्यत्र तस्मादङ्गभूयस्त्वे फलभूयस्त्वमिति।

विधेस्त्वेकश्रुतित्वादपर्य्यायविधानात् नित्यवच्छ्रुत-
भूताभिसंयोगात् अर्थेन युगपत् प्राप्तेर्यथा-
प्राप्तं स्वशब्दो निवीतवत् सर्वप्रयोगे
प्रवृत्तिः स्यात् ॥ १६ ॥ (सि०)

नन्वेतदेवमेकदेशेनाप्यङ्गानां प्रयोग इति। कथं तर्हि सर्वाङ्गोपसंहारेण, कुतः विधेरेकश्रुतित्वात्। एकेन शब्देनाङ्गानां प्रयोगो विधीयते दर्शपूर्णमासाभ्यां यजेतेति सर्वापेक्षयेत्युक्तम्। सा त्वपेक्षा कृत्स्ने वाक्यव्याधानादिव्यापारे तदेकदेशे वा। तत्रैकदेशापेक्षा न युक्ता। कस्मात् अपर्य्यायविधानात्। इमान्यङ्गानि न पर्य्यायेण विधीयन्ते, कदाचित् समिधो यजति कदाचित् तनूनपातमिति। कथं तर्हि नित्यवद्यथाभूतानि च श्रुतानि तथा भूतान्यपेक्षयाभिसम्बध्यन्ते अर्थाच्चेत नित्यवत् श्रुतानामपि

मतामेकदेशोऽपेक्षिष्यत इति। नैतद्युक्तं कुतः? अर्थेन युगपत् प्राप्तेः। अर्थेन प्रधानोपकारेण खलेकपोतवद्युपगच्छन्ति पतन्त्यङ्गानि। तत्र श्रूयते विशेषः इदं प्राप्यते। इदं नेति अतः सर्वाणि प्राप्यन्ते। यथाप्राप्तं च स्वशब्दार्थो निर्वीतवत्, यथा "निर्वीता ऋत्विजः प्रवरन्तीति" ऋत्विग्विशेषाभावात् सर्वेषां च सन्निधानात् सर्वऋत्विजो निर्वीता भवन्ति। एवमिहापि सर्वप्रयोगे प्रवृत्तिः स्यात्।

तथा कर्मोपदेशत्वात् ॥ १७ ॥ (है०)

तथा च क्रत्वा चतुर्दश्यां पौर्णमास्यामाहुतयो हूयन्ते त्रयोदश्यामावास्यायामिति आहुतिसंख्या पाक्षिकी न भविष्यति।

क्रत्वन्तरेषु पुनर्वचनम् ॥ १८ ॥ (पू० आ० नि०)

तत्र यदुक्तं यथा क्रत्वन्तरेष्विति, युक्तं तथा क्रत्वन्तरेषु पार्थक्यं "सौर्य्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्युक्त्वा पुनरुच्यते। "ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" इति। किमतः। अतस्तेषां परस्परानपेक्षाणां कार्य्यं न सम्भूयेति गम्यते। परिसमाप्ते हि पूर्वस्य विधाने उत्तरः पृथक्त्वेन विधीयते। अथेह विधेस्त्वेकश्रुतित्वादित्यनेन न्यायेन सम्भूयकार्य्यमङ्गानां युक्तं तस्माद्वैषम्यं क्रतुभिः।

उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात् सन्दोहे यथा कामी प्रतीयेत ॥ १९ ॥ (पू०आ०नि०)

यद्यप्राप्ते चोत्तरावत् स्यादिति यदुक्तं तत्र युक्तं यदुत्तरासु यावत्स्वं दोहनमश्रुतित्वात्। नात्रोत्तराणां दोहनं विधीयते। किं तर्हि अनूद्यते। किं कारणम्?। विशेषाणां वाग्विसर्जनादीनां विधाने कृतार्थं तदाक्यं नोत्तराणां दोहनं विधातुमुत्सहते। विधीयमानेऽर्थहेयी, भिद्येत वाक्यम्। अनुवादश्च प्राप्तस्यार्थस्य भवति। अर्थाच्च यावत्स्वं दोहनं प्राप्तम्। अर्थादस्वा न दोह्याः स्वासु सर्वाः कथं न दोह्याः। उपरिष्टादेतद्वक्ष्यामः। तथा पयः प्रतिषेधः कुमाराणामित्यत्र तस्माद्यथा कामी प्रतीयेत यावत्यो गावः स तावतीर्दोहयति।

काम्यकर्मणः फलाधिक्यायासकृदनुष्ठानाधिकरणम्॥

काम्येषु कर्मसु चिन्ता। किं काम्यं कर्म सकृदेव प्रयोक्तव्यम् अथ वा फलस्य भूयस्त्वमिच्छता भूयोऽभ्यसितव्यमिति। किं प्राप्तम्?

कर्मण्यारभ्यभाव्यत्वात् कृषिवत् प्रत्यारभ्यं फलानि स्युः॥ २०॥ (पृ०)

काम्ये कर्मणि प्रतिप्रयोगं फलभेदः आरभ्यभाव्यत्वात् कर्मप्रयोगेण फलं भाव्यते। कथं ज्ञायते। प्राक्कृतात् कर्मणः फलं नास्ति यदि भवेत्कर्मानर्थक्यं स्यात्। कर्मोत्तरकाले चास्तीति श्रुतितो गम्यते। यच्च प्राक्कर्मणो नास्ति कर्मोत्तरकाले च भवति तत्तेन कर्मणा भाव्यते

क्रतुवत् यथा कर्षणेन धान्यममङ्गाव्यते । पुनरपि धान्यवदेतद्भविष्यति ।

अधिकारस्य सर्वेषां कार्य्यत्वादुपपद्यते विशेषः ॥ २१ ॥ (पू० यु०)

एवं च कृत्वा सर्वेषां कर्मणां पुनः पुनः क्रियमाणानामधिकारो भविष्यति । तत्रेमानि दर्शनान्युपलभ्यन्ते "तेषां ये प्रथमं यजेरन् तेषां गौरतिरात्रो ये द्वितीयं तेषामायुरिति" । प्रथमं यजेरन् द्वितीयं यजेरन् एतदभ्यासे सति । तस्माद्यावदिच्छमभ्यासः ।

सकृत्तु स्यात् कृतार्थत्वादङ्गवत् ॥२२॥ (पू०आ०)

सकृदेव तु काम्यं कर्म प्रयोक्तव्यं कुतः कृतार्थत्वात् । सकृत् कृतेन कृतयोदनार्थः । न च कृते पुनः कर्त्तव्यमस्ति कः पुनर्योदनार्थो, यागस्य कर्तुः फलं होमस्य कर्तुः फलमिति कथं कृत्वा तदुच्यते इह यजेज्जुहुयादिति धातुना क्रियोच्यते प्रत्ययेन कर्त्ता तयोः कर्त्ता प्रधानभूतः उपसर्जनभूता क्रिया "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" अनुप्रयोगश्च कर्तृप्रधान्य एव भवति पचति देवदत्त इति । तेन होतुर्यष्टुश्च फलमुच्यते । सकृद्धुतेन सकृदिष्टेन वासौ होता यष्टा च जातः । तत्र द्वितीयादिप्रयोगोऽनर्थकः स्यात् कृतार्थत्वादङ्गवत् । तद्यथा प्रधानस्य साङ्गत्वोपपादनायाङ्गानि क्रियन्ते सकृत् कृतेश्च तदुपपादितमिति नाभ्यस्यन्ते तद्वत ।

शब्दार्थश्च तथा लोके ॥ २३ ॥ (निद०)

लोकेऽपि तथैव शब्दार्थोभवति काष्ठान्याहरेत्युक्तः सकृदाहरति न पुनः पुनः ।

अपि वा संप्रयोगे यथाकामो प्रतीयेताश्रुतित्वाद्विधिषु वचनानि स्युः ॥ २४ ॥ (सि०)

अपि वा नैवं स्यादस्मिन्नर्थिनः कर्मणश्च संयोगे सकृदेवार्थो कर्मप्रयोगे वर्त्तेतेति कथं तर्हि यथाकामी प्रतीयेत सकृद्वा बहुकृत्वो वा फलभूमार्थी बहुकृत्वः सन्तुष्टः सकृत्, कुतः ? अश्रुतित्वात् । नाच यष्टुर्हातुः फलं श्रूयते यत्तु प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति तत्कर्मनिमित्तेषु नामपदेषु पाचको लावक इत्येवमादिषु । आख्याते तु न कर्त्ता क्रियाप्रधानतः, किं तर्हि भावप्रधानमाख्यातं, भावना च न कस्यचिच्छ्रूयते । भावनाप्रयुक्तस्य साधनयामस्यापेक्षितत्वाद्यजेत केन किमर्थं कथमिति, कर्त्तृप्राधान्ये कार्य्याभावान्न साधनाकाङ्क्षया भवितव्यम् । न हि भवति पाचकः केन किमर्थं कथमिति । भावना च फलस्योच्यते न क्रियायाः । तृतीयानिर्देशात् "उद्भिदा यजेत" "बलभिदा यजेतेति" भाव्यत्वे हि द्वितीयाया निरपेक्ष्यत्वं स्वर्गस्वीप्सितः कामसंयोगात् स्वर्गकाम इति । तदेतदेवमापद्यते स्वर्गकामो यागेन स्वर्गं भावयेदिति यच्च भाव्यते तदशक्तमसत्यतो हि भावो नोपपाद्यते । असच्चेत्कर्मणा भाव्यते पुनः पुनरपि भावयिष्यति ऋषिवत् तस्मात् फला-

र्थिना काम्यं यावदिच्छमभ्यसितव्यमिति। यदि च नियोगतः सकृदेव कर्त्तव्यं भवेत् ततस्तेषां प्रथमं यजेरन्निल्येवमादिषु गवादिविधिषु वचनान्येतानि कल्पेरन्नहितीयं यजेरन्निति तथा च वाक्यानि भिद्येरन् ये च द्वितीयं यजेरन् तेषां गौरतिरात्र इति।

ऐकशब्द्यात् तथाङ्गेषु ॥ २५ ॥ (पू० आ० नि०)

यत् तु अङ्गवदिति। युक्तं यदङ्गानां सकृत् प्रयोगः। ऐकशब्द्यात् एकस्तवाङ्गानां प्रधानानां वोपदेशकः शब्दः सर्वाङ्गान्यपेक्षया गङ्गातीत्युक्तं सा चापेक्षा सकृदेवैष्वङ्गेषु भवति कृतार्था। तस्मात् तच्च पुनः पुनः क्रियाया हेतुर्नास्ति इह त्वमतः फलस्य कर्मोत्पादकं तस्य प्रतिप्रयोगमन्यस्यान्यस्योत्पत्तिरदिह्वेत्येवमपदिष्टो हेतुः। तस्मादिषमत्वमङ्गैः।

लोके कर्मार्थलक्षणम् ॥ २६ ॥ (निद०)

यच्च लोकवदिति लोके कर्मार्थप्रधानं कार्यवशात् सकृदप्युक्तोऽसकृदाहरति असकृदप्युक्तः सकृदाहरति नाहरति वा। अथेह शब्दलक्षणे कर्मणि यथाशब्दार्थं प्रवृत्तिस्तस्माल्लोकवदिति दृष्टान्तः।

अङ्गस्यानभ्यासाधिकरणम्।

क्रियासामर्थ्यशेषत्वात् प्रत्यक्षतस्तन्निर्वृत्त्याऽपवर्गः स्यात् ॥ २७ ॥ (पू०)

व्रीहीनवहन्ति तण्डुलान् पिनष्टि इत्येवमादीनां दृष्ट-प्रयोजनानां क्रियाणामातण्डुलनिर्वृत्तेः प्रयोगः स्यात्। कुतः एतासां प्रयोगे प्रत्यक्षोऽर्थो निर्वर्त्यते। अवहतास्त-ण्डुलाः पिष्टाय, तैयेह प्रयोजनं पुरोडाशस्य कार्यत्वात्। तस्मादेतासां तदर्थ एव प्रयोगो विज्ञायते यदि सकृदेव मुसलस्योद्यमननिपातने कृत्वोत्सृज्येत उपलाया वा प्रक-र्षणाप्रकर्षणे, यदेषां कार्यं तत्रैव निर्वर्त्येत अत आमां तन्निर्वृत्त्या अपवर्गः स्यात्। आतण्डुलनिर्वृत्तेराच्च पिष्ट-निर्वृत्तेरभ्यास इति।

धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥ २८ ॥ (सि०)

यत्र तु दृष्टं कार्यं तन्निवर्त्यते। यथा "अग्निचित्यामो-दुम्बरमुलूखलं सर्वौषधस्य पूरयित्वा वहत्यत्र तदुपदधाति" इति। तत्र तण्डुलनिर्वृत्त्या नास्ति प्रयोजनम्। तण्डुल-कार्यस्य पुरोडाशादेरर्थादितत्वात् तस्मात् तत्र सकृत् क्रियया कृतः शब्दार्थ इति न स्यादभ्यासः। येषां तु तण्डुलफल एव मुसलस्योद्यमननिपातनकर्मण्यवहन्ति शब्दः प्रवर्तते इत्यपगमस्तेषामातण्डुलनिर्वृत्तेरेवाभ्यासः प्राप्नोति। स तु मन्द एवाभ्युपगमः। यत् कारणं

विनापि तण्डुलैः प्रयोगो दृश्यते कषायमवहन्ति किंच मवहन्तीति न चासौ गौणः प्रयोगो विशेषाभावात् अवयवप्रसिद्धया चावघातमात्रवचन एव प्रतीयते न च समुदायोऽवान्तरे प्रसिद्धः। तण्डुलव्यापारस्य तु प्रायोवृत्तो तत्र प्रयोगप्राचुर्यमतोऽयं व्यामोहः।

प्रयाजाद्यङ्गस्य सकृदनुष्ठानाधिकरणम्।

प्रयाजादीन्युदाहृत्य चिन्त्यते किं सकृत् प्रयोग एव उताभ्युताभ्यासोऽपिकर्त्तव्य इति तत्र धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यादित्यनेन न्यायेन सकृत् प्रयोगे प्राप्ते एवमुच्यते।

क्रतुवच्चानुमानेनाभ्यासे फलभूमा स्यात् ॥ २९ ॥ (पू०)

अभ्यासः कार्य्यः कुतः यतोऽभ्यासे भूमा स्यात् कथं ज्ञायते अनुमानेन, किं तदनुमानम्। प्रागङ्गप्रयोगः प्रधानोपकारो नासीदूर्द्धं ततो भवति तेन विज्ञायते नूनमङ्गेन क्रियत इति क्रियते चेत् पुनः पुनरपि करिष्यते क्रतुवत्। यद्यथा कर्मसु सौर्य्यादिषु फलं कर्मणा क्रियत इति कर्माभ्यासे फलभूयस्त्वमेवमिहापि।

सकृद्वा कारणैकत्वात् ॥ ३० ॥ (सि०)

सकृदङ्गं प्रयोक्तव्यं नाभ्यस्या। कुतः कारणैकत्वात्। एकं कारणमङ्गानां प्रधानेषु उपकारः कः पुनरसौ। येन प्रधानानि फलं ददति। तच्चेत् सकृत् प्रयुक्तो नाङ्गेन कृतं, जातानि प्रधानानि फलवन्तीति पुनः सकृत्प्रयोगः। अथ न कृतं पुनराप्रयोगः येन सकृत्

कृतेन नोपकृतं स पुनः क्रियमाण उपकरिष्यतीति का आशा।

परिमाणं चानियमेन स्यात् ॥ ३१ ॥ (यु०)

यदि चानियमः सकृदसकृद्वा प्रयोगः ततः चतुर्दश-पौर्णमास्याद्वृतयो ह्रयन्ते त्रयोदशामावास्यायामिति योऽयं नित्यवदाहुतिपरिमाणानुवादः स न स्यात्। स तावद्वचनां पाक्षिकः कल्प्येत तथास्य रूपं बाध्येत तस्मादनभ्यासः।

फलस्यारम्भनिर्वृत्तेः क्रतुषु स्यात् फलान्यत्वम् ॥ ३२ ॥ (पू० आ० नि०)

यत्तु क्रतुवदिति युक्तं यत् क्रतुष्वभ्यासः। फलस्यारम्भनिष्पत्तेः। कर्मारम्भेण तत्र फलं निष्पद्यते आरम्भान्तरेण परं निष्पत्स्यत इति। अङ्गस्य पुनरुक्तपरिणामफलं प्रधानम। फलवत्तासम्पादनं तच्चेत् सकृत् कृतेन कृतं न भूयः क्रियास्त्विति एवमपदिष्टो हेतुस्तस्मादनुपन्यासः।

अर्थवतस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात् प्रधाने च क्रियार्थत्वादनियमः स्यात् ॥ ३३ ॥ (आ०)

यदत्र सकृत्कृतेनाङ्गेन कृतत्वादर्थस्यानर्थकोऽभ्यासः इत्यत्र ब्रूमः। अर्थवांस्तु अभ्यासो ग्राह्यो नानर्थकोऽभ्यासः। कथं ह्यत्वा एकत्वादभ्यासः स्यादनर्थकः, यद्येक-

मेवार्थमभ्यस्यमानमपि अङ्गं कुर्यात् तत्राभ्यासोऽनर्थकः स्यात्। यथा भोजनमेकस्मिन् काले ऽभ्यस्यमानमेकफलं तृप्तिं करोतीति नाभ्यस्यते। अथेदार्थस्यापरिमाणत्वे इयन्तमुपकारं करोत्यङ्गमिति ज्ञायते। ननु यावता प्रधानं फलवद्भवति तावत् करोतीति गम्यते। सत्यमेवं किन्तु प्रधाने क्रियार्थत्वादनियमः स्यात्। प्रधानस्य फलक्रियार्थमङ्गम्। तत्तु प्रधानफलमपरिमितम्। तदङ्गोपकारस्य भूयस्त्वे भूयो भविष्यति अल्पत्वे अल्पम्। अभ्यासे चासंशयं भूयानुपकारः स्यात् कार्यत्वात् तस्य। तस्मादनियमः स्यात् सकृद्वा प्रयोगोऽभ्यासो वेति।

पृथक्त्वादिधितः परिमाणं स्यात् ॥३४॥ (आ० नि०)

यत्तु आहुतिसंख्याविरुध्यत इति पृथक्त्वादुपकारस्याभ्यासे न्यायप्राप्तेयमाहुतिसंख्याऽनुवादः स्यात् स हि नः स्यादाहुतिविधीनभिप्रेत्य चतुर्दश्यपौर्णमास्याहुतिविधयस्त्रयोदशामावास्यायामिति। न ह्याहुतिसंख्या युज्येत आहुतिविधिसंख्यातु लक्षणयोपपद्यते।

अनभ्यासो वा प्रयोगवचनैकत्वात् सर्वस्य युगपच्छास्त्रादफलत्वाच्च कर्मणः स्यात् क्रियार्थत्वात् ॥ ३५ ॥ (मि० नि०)

अनभ्यासो वाङ्गानां कुतः प्रयोगवचनैकत्वात्। एकः प्रयोगवचनोऽङ्गानां प्रधानानां च। तस्यैकत्वात् सर्वस्य

युगपच्छासनमनेन कर्मणा साङ्गेन यजेतेति। सकृत् कृतेषाङ्गेष्वङ्गानां जातमिति न पुनः क्रियायां हेतुरस्ति। नन्वपकारभूयस्त्वं भविष्यति। यथाङ्गान्यदृष्टस्योपकारं कुर्युः, एवमेतदभ्यासे उपकारभूयस्त्वमनुमीयेत दृष्टमेव स्वर्गसाधनानि कुर्वन्ति प्रधानस्याङ्गवत्तान्। सा चाभ्यासेऽपि तावत्येवाङ्गवत्ता साचेह फलमस्यहा साङ्गेन यजेतेति नाङ्गानि। अङ्गानि तस्मादनेनार्थवन्ति। नन्वेवमयुक्तमिव यदादि प्रयाजा न तदा प्रधानयज्ञिपूर्वं वा यदा च यज्ञिपूर्वं च न तदा प्रयाजाः, तदेवमदृष्टरहिते समिदादिमात्रे सत्यङ्गवत्तैव नास्ति कुत उपकारः। अपि च यदि यज्ञिमात्रमेवाङ्गेषु नापूर्वफलम् अस्ति ततः सोमाङ्गभूतानामिष्टिपशुबन्धानां चोदकं पर्व नार्हति। असति त्वपूर्वं इतिकर्तव्यताकाङ्क्षा नास्ति यजतेः, प्रयजतेतिकर्तव्यताकत्वादितिकर्तव्यतां चोदको नातिदिशेत् तर्हि तानि दर्शानि सोपपत्तीरन् तस्मैकयतं प्रयाजानुयाजाः न च समिष्ट यजूंषि जुहोति प्रहृत्य परिधीन् जुहोति द्वारियोजनमिति। तस्मादियमन्या व्याख्या।

अनभ्यासो वाङ्गानां प्रयोगवचनैकत्वात्। एकप्रयोगवचनेऽङ्गानां प्रधानानां च तस्मैकत्वात् सर्वस्याङ्गप्रधानकलापस्य युगपच्छासनप्रधानानामनभ्यासः। कस्य हेतोः। सकृत्कृतैः प्रधानैः कृतः श्रुत्यर्थो दर्शपूर्वमासाभ्यां स्वर्गकामो यजेतेति कृते श्रुत्यर्थे यच्छास्त्रविहितं फलं तदस्यमिति न पुनः क्रियायां हेतुरस्ति

[illegible] ग्रहणेषु [illegible] ग्रहणानां ग्रापकं शास्त्रं तस्यार्थः [illegible] [illegible] ग्रहे उच्चाद्यधिगतमाङ्गफलं तद्वत्यनि-[illegible] [illegible]। तथा च सत्यभ्यासोऽनर्थकः। यत्तु सकृच्छ्रुतस्य भविष्यतीति तदसत् दर्शपूर्णमासयोर्यत्-फलं तद्गुणानामाश्रयकारं उपयुज्यते नापूर्वस्य फलस्यो-त्पत्तौ यद्यपूर्वफलम् अङ्गं स्यात्तदाङ्गफलमेव तत् स्यात्। न चाङ्गानि फलवन्ति प्रधानानां स्वकार्यं साधयतामङ्गं उपकारकाणि। किञ्चैषां सकृत्कृतेषामसौ कृतः तस्मादाङ्गा-हृतौ फलसूयत्वमस्ति।

अभ्यासो वा क्रियासंमार्गावदानेषु वचनात्सकृत्-श्रुत्व ॥ ३६ ॥ (आर्च०)

अभ्यासो वाङ्गानाम्। कुतः?। पिण्डयज्ञे हि श्रूयते, सकृदाच्छिन्नं बर्हिर्भवतीति यथानुयाजे सकृदार-धीन् समाप्तीति। क्रियतीति वाक्यशेषात् सकृदवद्यतीति तथा सकृच्छ्रुतानां प्रयोगस्तत एतानि वचनान्युपपद्यन्ते। तस्मादभ्यासः।

अनभ्यासस्तु वाच्यत्वात् ॥ ३७ ॥ (आ०नि०)

अनभ्यासस्त्वङ्गानां यद्योगेन न्यायेन वस्तु छेदनादिषु वचनात् सकृत्सत्यान्यभ्यासो विधीयत इति। अत्र ब्रूमः, यद्यप्यङ्गानामभ्यासस्तथापि छेदनादिषु वाच्यं सकृत्त्वं दर्शपूर्णमासयोरकृदाच्छिन्नं बर्हिर्भवतीति वचनात् तत्-[illegible]

वाच्यम् एवं प्रयाजेषु चिःसंमार्ग उक्तः सानुयाजेषु पुनरावर्त्तते तत्रापि चित्वे प्राप्ते सकृत्त्वं विधातव्यं तथा हिर्हविषोऽवद्यतीत्यविशेषेणोक्ते खिष्टकृत्यपि हित्वं प्राप्तं तत्र सकृत्त्वं विधीयते तस्माच्छेदनादिषु सकृद्वचनान्नान्याभ्यासो विघातुं न्याय्य इति।

कपिञ्जलाधिकरणम्।

वसन्ताय कपिञ्जलानालभेत इति श्रूयते तत्र विचार्य्यते, किं तत्र त्रयश्चत्वारः पञ्च वा विकल्पेनालब्धव्या अथ वा त्रय एवेति। किं प्राप्तम्?।

बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् ॥ ३८ ॥

विकल्पेनालब्धव्याः कस्मात् सर्वप्राप्तेः सर्वे एते संख्याविशेषा बहुवचनेन प्राप्यन्ते। सर्वे तस्य वाच्याः सर्वत्र प्रयोगात्। न च समुच्चयेन सम्भवस्त्रयाणत्वात्। तस्माद्विकल्पः। ननु एवं सत्येकस्य शब्दस्यानेकार्थता आश्रिता भवति। न चैष न्याय्यः। उच्यते सत्यमेवमगत्या आश्रीयते सत्यां गतौ नाश्रयितव्यः। अस्ति तु इयं गतिर्यत् चित्वं बहुवचनस्यार्थः स्यात्। तथोगाच्चतुरादिष्वपि वर्त्तते सर्वेषु तेषु चित्वमस्तीति। नैतद्युक्तम् यदि बहुवचनस्य चित्वमर्थः स्यात् ततश्चत्वारो ब्राह्मणा इति समानाधिकरणं नोपपद्यते ब्राह्मणा इत्यस्य त्रयोऽर्थः। चत्वार इत्यस्य चत्वारस्त्रयोः समानाधिकरणं न प्राप्नोति। न हि भवति चत्वारस्त्रय इति एवं सर्वत्र लक्षणया भविष्यति

यथा न्यग्रोधः क्षेत्रमिति। त्रित्वं हि चतुष्टादीनि साहचर्यात् लक्षयति लक्षयितुं, सिद्धयति लक्षणा त्रित्वता भवति। किं त्रित्वतामगत्वा आश्रीयते। सत्यां गतौ नाश्रयितव्यम्। अस्ति चेयं गतिर्यद् बहुत्वं बहुवचनस्यार्थः स्यात्। सर्वेऽपि ते बहव इति त्रुट्येव सामानाधिकरण्यं यदि बहुत्वं विज्ञायते किं तद् बहुत्वमित्युच्यते। बहुत्वं हृद्धिः उपचयः आधिक्यमित्यर्थः। कथं कृत्वा इंहतिरयं वृद्ध्यर्थः। तस्योपादिक उकारः प्रत्ययः इंहेर्नलोपश्चेति। तस्य रूपं बंहिति बहु हृद्धमधिकमित्यर्थः। सर्वे चैते त्रयादयोऽधिकास्तस्मात् सर्वे बहुशब्दवाच्याः। नन्वापेक्षिकमेतद् बहु अधिकमिति। यदेव हि बहु तदेवान्यापेक्षयाबहु भवति, सत्यमेवं यत्तु यदपेक्ष्य बहु न तदेवान्यदपेक्षयाबहु, तद्यथा उत्तराः कुरवो दक्षिणान् कुरूनपेक्ष्योत्तरा इत्युच्यते न च ततोऽन्ये उत्तरादेशा न सन्ति। अथ च नियतापेक्षत्वादुत्तरत्वं न जहति। एवं त्रिप्रभृतयो त्रित्वमपेक्ष्य बहुत्वं लभन्ते न च ते क्वचिद्बहवः। कथं पुनर्ज्ञायते त्रित्वापेक्षं त्रिप्रभृतीनां बहुत्वमित्युच्यते अपेक्षा तावत् समानजातीयेषु भवति यथा बलवान् देवदत्त इति न क्षत्रियं सिंहं वा अपेक्ष्य भवति। किं तर्हि समानजातीयान् पुरुषानपेक्ष्य। एवं संख्यापि संख्यानेवापेक्ष्य बहुत्वं लब्धमर्हति। तच्चैकत्वं तावदापेक्षते द्वयोर्बहुवचनस्यादर्शनात्। त्रयादिषु च सर्वेषु दृश्यते तेन विज्ञायते त्रित्वापेक्षमिति। तच्च बहुवचनेनोपलभ्यते। कुतः तद्भावे भावात् तदभावे तदभावात्। त्रित्वादिषु भवति।

तदभावे च द्वयोरेकस्मिंश्च न भवति एवं बहुवचनम् इति समाख्यानवर्था भवति अभियुक्तवचनं च बहुवचनमिति यदि चित्वं बहुवचनस्यार्थः स्यात्। चिषु वचनमित्येव तद् ब्रूयात्। लाघवादसन्देहात् तस्माद् द्वित्वमपेक्ष्यते बहवः। अंतोऽवस्थितं चयादीनां बहुत्वमेवं च सति नैकः शब्दोऽनेकार्थो भवति। सर्वेषां च बहुत्वात् क्वचित् लक्षणया प्रयोगः। अथोच्यते चिषु निरुपपदं प्रयुज्यते चतुरादिषु तु सोपपदं चत्वारो ब्राह्मणा इति तच्च मिथ्या चिष्वपि सोपपदं प्रयुज्यते यथा त्रयो लोकास्त्रयो वेदा इति। यदि च निरुपपदं च चित्वं प्रत्यापयेत्। ततो वसन्ताय कपिञ्जलानित्युक्ते विचार एवायं न प्रवर्तेत। यथा अथैव न विचार्यते किं कपिञ्जला आलभ्या उत मयूराः कपोता वेति कस्य हेतोः यतः कपिञ्जलशब्दस्य न मयूराः कपोता वा वाच्याः। इहापि यदि बहुवचनस्य चित्वमेव वाच्यं स्यात् नेतरा संख्या। पूर्ववद्विचार एवायं स्यात्।

दृष्टः प्रयोग इति चेत् ॥ ३९ ॥ (पू० आ०)

अथोच्येत दृष्टो बहुवचनस्य प्रयोगश्चतुरादिषु चत्वारो ब्राह्मणा इति। ततो विचार इति। तथेह। इहापि कपिञ्जलशब्दस्य दृष्टः प्रयोगः कपोते मयूरे च। महान् कपोत उच्यते कपिञ्जलोऽयं न पोत इति। तथाल्पो मयूरः कपिञ्जलोऽयं न मयूर इति।

भक्तेति चेत् ॥ ४० ॥ (आ० नि०)

[illegible] प्रयुज्यते । न च भाष्ये [illegible]

तद्वैतदविद्वत् ॥ ४१ ॥ (पू० आ०)

[illegible] ब्राह्मणा इति लक्षणया प्रयुज्यत इत्युक्तम् । न च लक्षणा प्रयोगे शब्दार्थमात्रा भवति । अपि च प्रातिपदिकार्थश्च वा संख्या सा च अनेनाभिधीयते यथा ब्राह्मणा इति । प्रातिपदिकार्थ एव वा यथा द्रविक इति । न च लिङ्गं प्रातिपदिकस्यार्थो न तत्संख्या इति । तस्मात् चत्वार इति बहुवचनं न प्राप्नोति । अथोच्यते । अस्ति चतुर्षु अवयवभूतं लिङ्गं तदपेक्षं बहुवचनमिति । लिङ्गमपि तत्रास्ति । एकत्वं च आममनेनैव लिङ्गवचनमेकवचनं चोत्पद्येत तस्मात् न लिङ्गयोगाच्चतुर्षु बहुवचनप्रयोगः बहुत्वादेव तेषां बहुवचनमतः सर्वे ब्राह्मणाः परार्थमर्थवता बहुवचनस्यार्थः सर्वे चेदृषयः ऋषिज्ञानं लभेत इति सर्वे प्राप्नुयुस्तस्माद्विकल्पः ।

प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् ॥ ४२ ॥ (सि०)

प्रथमं वा बहुत्वम् । लिङ्गं नियम्येत किं कारणम् । न हि कश्चित् चतुर उपाददानो न वीनुपादत्ते । यत् कारणमनुगताख्यवयवेषु वोपात्तेषु श्रुतः शब्दार्थो बहुना लभेतेति श्रुतं भाक्तव्याच्च बहवः । एवं सति कारणादतिक्रमः स्यात् । यदि च यथाश्रुतानुपादाने किञ्चिदन्यत्

कारणं चित्यातिक्रमे स्यात् ततोऽतिक्रमः । न तदस्ति तस्मात् चित्यं नियमेन । नन्वु फलभूयस्त्वं कारणं भविष्यतीति नैतदस्ति । यत्र बहवः कल्पाः श्रूयन्ते तेषां कश्चित् लघुः कश्चिद् गुरुः तत्र गुरोः कल्पस्यानुष्ठानाज्ज्ञानसामर्थ्यात् तदनुष्ठानात् फलभूयस्त्वमनुमीयते यथा एका देया बहवेया द्वादश देया चतुर्विंशतिर्देया इति दृष्टं तु एकएव कल्पो बहूनामालम्भः स त्रिभिश्चतुरादिभिस्तुल्यः । अतस्तत्र यो लघुमुत्सृज्य गुरुकल्पमातिष्ठेत तस्य फलभूयस्त्वं न भवितुमर्हति ।

श्रुत्यर्थाविशेषात् ॥ ४३ ॥ (यु०)

यथा पशुमालभेतेति श्रुतयो महान्तं महार्घं वा पशुमालभेत न तस्य फलभूयस्त्वं भवति । यस्तु मांसीयं ग्रिष्टमतिक्रामेत् स यदि तावदैदिकीषु हिंसासु प्रत्यवायभ्रान्तः प्रत्यवेयात् । अथाप्रत्यवायस्तथापि ग्रिष्टविगर्हणं च लभेत् । श्रुते श्रुत्यर्थे मांसीयान् पशून् हन्तीति । तस्मात् त्रयः कपिञ्जला आलब्धव्याः ।

तथा चान्यार्थदर्शनम् ॥ ४४ ॥ (निद०)

अन्यार्थोऽपि चैतमर्थं दर्शयति यथा न्याय उपदिष्टः । यथा "ऐन्द्राग्ना याग्या अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः तेषामैन्द्राग्नो दध्न" इति यदि च त्रय एते चित्या एवं नियोगत ऐन्द्राग्नो दध्नः सम्पद्यते । इतरथा पाचिकः स्यात् । तस्मात् चित्यनियमः ।

प्रकृत्या च पूर्ववत् तदासक्तेः ॥ ४५ ॥ (यु०)

प्रकृत्याग्नीषोमीयेषैकत्वं प्राप्यते तस्योत्पत्तिर्भविष्यति नित्व उपादीयमाने, इतरथा विप्रकर्षः स्यात्। इदं वापि लिङ्गं यदयमेधीये श्रूयते यौदनानुहरतीति तच्च मध्यमस्येति यथाद्यां निरूपपदं भवति। अन्यच्च सोपपदं पञ्चानां मध्यमः। अष्टानां मध्यम इति।

उत्तरादोहनानुवादाधिकरणम्।

उत्तरासु यावत्स्वमपूर्वत्वात् ॥ ४६ ॥ (पू०)

साक्षाय्ये दोहनं प्रकृत्य श्रूयते। वाग्यतस्त्रिरो दोहयित्वा विसृष्टवागनड्वाहमभ्युत्तरा दोहयतीति किमयं विधिरनुवाद इति। किं प्राप्तम्?, अपूर्वार्थत्वात् विधिरिति। अनुवादो ह्यनर्थकः स्यादिति प्राप्ते उच्यते।

यावत्स्वं वानाविधानेनानुवादः स्यात् ॥ ४७ ॥ (सि०)

अनुवादः स्यात् नायं विधिः उत्तरा दोहयतीति यस्मादत्र विधिरसृष्टवागनड्वानभ्येति। यद्येवोऽपि विधिः स्यादाद्यं भिद्येत उत्तरा दोहयति तावानड्वाहमभ्येति अथ कृतः प्राप्ते अनुवादः।

साकल्यविधानात् ॥ ४८ ॥ (सि०)

साकमश्वेन विधीयते गवाम्दोग्ध्यानां नाश्नेतां रात्रिं पयसाग्निहोत्रं जुहुयात्कुमाराव न पयो अश्नेरन्। ननु कुमाराणां पयोदानप्रतिषेधो या न हि पयः प्रतिषेधे किञ्चिदृष्टमस्ति। अदृष्टं कल्पयितव्यम्। नन्वितरत्रापि लक्षणात्रयस्यैषा वाठम् दृष्टार्थाच्छब्द सर्वधीयसीति। तस्मात् साकल्यविधिर्गवां पयः प्रतिषेधं नायं लक्षणया। ततः प्राप्तेऽनुवादः।

बहुर्थत्वाच्च ॥ ४९ ॥ (हे०)

बहुदुग्धीम्हाय देवेभ्यो हविरिति च मन्त्रस्य सर्वासु दुह्यमानासूपपत्तिरत्वं भविष्यति। बहुत्वं च प्रत्यक्षेपेण।

अग्निहोत्रे चाशेषवद्यवागूनियमः प्रतिषेधः कुमाराणाम् ॥ ५० ॥ (हे०)

अग्निहोत्रे च श्रूयते। "नाश्नेतां रात्रिं पयसाग्निहोत्रं जुहुयाद् यवाग्वस्ये देवताये हुयात् तादृक् तस्मात् यवाग्वा जुहुयादिति"। सर्वत्र पयसः साध्यार्थतां दर्शयति। तथा पयःप्रतिषेधः कुमाराणामितिव्याख्यातम्।

सर्वप्राधिणापि लिङ्गेन संयुज्यते देवताभिसंयोगात् ॥ ५१ ॥ (हे०)

यस्येश्वर एवा एता मनुष्येभ्यश्च पुराव्यापयस्ते अश्नेतृर्हि देवेभ्य एवेता व्याप्यापयन्ति"सर्वप्राणेरेतल्लिङ्गं लक्षम्।

यावज्जीवं मनुष्येण पुराध्यापयन्ते [illegible]त् सर्व-प्राप्ते रेतद्विधिरम् अतो यावज्जीवसंसरासु दीक्षनं स्यात्।

आधारादीनामङ्गानां सन्निधिकरणम्।

दर्शपूर्णमासयोः प्रधानान्याग्नेयादीनि तेषामङ्गान्याधारादीनि तेषु चिन्त्यते किं तस्य तस्य प्रधानस्य भेदेनाङ्गानां प्रयोगः अथ वा सर्वेषां तत्रैवेति अथ तत्र किं हतं क्रतुवत्त्वानुमानेनाभ्यासे फलभूमा स्यादिति तत्र क्रतवो दर्शपूर्णमासावुद्दिश्य कथा हता इह तु तत्तत्प्रधानं प्रति चिन्त्यते किं प्राप्तम्।

प्रधानक्रमार्थत्वादङ्गानां तद्भेदात्कर्मभेदः

प्रयोगे स्यात् ॥ ५२ ॥ (पू०)

अङ्गानां प्रयोगे कर्मभेदः स्यात् क्रियाभेदः तस्य तस्य प्रधानस्य भेदेनाङ्गानां प्रयोगः कुतः। प्रधानक्रमार्थत्वात् प्रधानार्थत्वादित्यर्थः। प्रधानार्थेन ह्यङ्गान्युपदिश्यन्ते अङ्गवन्ति प्रधानानि कथं स्युरिति। अङ्गसम्बन्धे च प्रधानार्थं अङ्गानां सङ्घत्वं न विवक्षते। न हि तत्र प्रधानानि विधीयन्ते। किं तर्हि अङ्गानि चाविधीयमानस्यार्थस्य शुद्धो विवक्षितो भवति। यथा यदं संमार्ष्टीत्येकलमेषं चेदेकैकस्य प्रधानस्याङ्गैः सम्बन्धः कर्त्तव्यः तानि यदि सङ्घत् क्रियेरन् न विभागेन सम्बन्धेरन् यथा प्रायणीयोदयनीययोरादित्यानां नामतोऽपि सम्बन्धः कर्त्तव्य इत्युक्तं विधेयैकवचनिन्यादित्यत्र तच्छब्दतिप्रधानभङ्गभेदः।

क्रमकोपश्च यौगपद्यात् स्यात् ॥ ५३ ॥ (पा०)

प्रधानानि च क्रमवन्ति तानि च यथाक्रमं साङ्गानि कर्त्तव्यानि तत्र यदि तन्त्रम् अङ्गानि स्यु; ततोऽक्रत्वाग्नेयं साङ्गमग्निषोमीयः प्रक्रान्तः स्यात् तथा च प्रधानानां क्रमकोपः स्यात्। अथ तु भेदस्थतः साङ्गमाग्नेयमपकृत्याग्नीषोमीयः साङ्गः प्रक्रान्तः क्रियत इति नास्ति क्रमकोपः। अपर आह यदि तन्त्रं भवेयुः अङ्गानि ततो यावत्तन्त्रनिपादाग्नेयस्योपकरोति तावत्तमिधाग्नीषोमीयस्योपकर्त्तव्यं न एष उपकार क्रमकोपः। अपि च अङ्गारपोङ्खनादीनि संस्थार्थानि प्रतिप्रधानं भिद्यन्ते तैषाधारादीनामवैलक्षण्यं भविष्यति।

तुल्यानां तु यौगपद्यमेकशब्दोपदेशात् स्याद्विशेषाग्रहणात् ॥ ५४ ॥ (सि०)

तुशब्दः पक्षान्तरं परिजघाङ्कनचैव पक्षः श्रेयान् भेद इति किं तर्हि यौगपद्यं सकृत् प्रयोगः स्यात्। सकृदेव प्रयुक्तान्यङ्गानि सर्वैः प्रधानैर्युगपत् सम्बध्यन्ते तुल्यानामेकशब्दोपदिष्टानां चेदमर्थं प्रति विशेषाग्रहणात्। इमानि कर्त्तव्यानि देशतः कालतश्च तुल्यानि दर्शपूर्णमासयोः यद्यकत्वोक्तत्वात् ऋत्विजः समे। दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्यां यजेतामावास्यामामावास्यया यजेतेति। प्रधानैश्च सङ्गानाम् एकदेशकालकर्तृकत्वं दृश्यते। अङ्गानि तु विधात्वात् प्रधानेनोपदिश्यैरवि-

यत्र दर्शेन च प्रकृतेन प्रधानानि फलं प्रत्युपदिष्टानि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। किमतः, अतस्तेषां फले सञ्चूयकारित्वं, तेन स्वर्गकामस्य सर्वेषां युगपच्छिक्षीर्षा नैकग्र्यं। सर्वशिक्षीर्षया त्वाधारादीनां क्रियमाणानां तुल्यकर्तृकादीनां न लुप्यते विशेषः अस्त्येतान्यस्मै यस्यानीवानीयस्य देति सर्वेषां च युज्यन्ते तस्मात् सर्वार्थानि भवन्ति। तस्मादनावृत्तिः।

ऐकार्थ्यादव्यवायः स्यात् ॥ ५४ ॥ (आ० नि०)

यच्च क्रमकोपश्च योगपद्ये स्यादिति तत्र ब्रूमः ऐकार्थ्यादव्यवायः स्यात्। न क्रमकोपः कुतः ऐकार्थ्यात् सञ्चूयकारीण्येतानीत्युक्तं तेषां सङ्घ क्रिया नैकग्र्यं। न हि तत्रैकेन कृतेन कश्चिदर्थः। एकसम्बन्धक्रियायामानुपूर्व्यं स्यात्तस्यां तेषां प्रयोगे क्रमः कुतः क्रमकोप इति। यद्युपकारि क्रमकोप इति तथापि नाधारः कृतमाच एव प्रधानेषूपकरोति यत्कारणं तस्मिन्काले प्रधानान्येव न सन्ति। यदा तु सर्वाण्यङ्गानि कृतानि तदा तत्कार्यपूर्वाणि सञ्चूय प्रधानेषूपकुर्वन्ति अङ्गानामपि हि सञ्चूयकारित्वमुक्तम् षष्ठेऽकार्थादैककर्म्यमिति तस्मादुपकारेऽपि नास्ति क्रमकोपः।

तथा चान्यार्थदर्शनं कामुकायनः ॥ ५५ ॥ (यु०)

तथा चान्यार्थदर्शनं भवति यथा न्याय उपदिष्ट इति कामुकायन आचार्यो मन्यते स्म। किं पुनस्तत् कृतकर्म-

पौर्वमास्यामाहुतयो हूयन्ते चयोदश्यामाश्वाश्वामिति यदाहुतिः स्याच्च चयोदश्यं चतुर्दश्यं वा अवतिष्ठेरन् यच्च मन्त्रार्थवदाराद्प्युपकारिणामप्याहुतिरस्तीति तच्च ब्रूमः।

तन्त्र्यायत्वादशक्तेरानुपूर्व्यं स्यात्संस्कारस्य तदर्थत्वात् ॥ ५६ ॥ (मी० नि०)

सहि न्यायः सन्नूयकारिणां सङ्क्रियेति सर्वत्रैव सङ्क्रियायामङ्गेषु धर्मसंस्कार्येष्वानुपूर्व्यं स्यात् भेदेन क्रिया। न गम्यते एकस्याङ्गारोपोद्वनेन सर्वेषां पाकः कर्तुं, न चैकस्मिन् पुरोडाशे अपिते सर्वे अपिता भवन्ति संस्कारस्य तदर्थत्वात् संस्कारोऽयं पाकार्थो विधीयते। तत एव प्रत्यङ्गोपकारिणः प्रतिप्रधानमाहुतिः स्यात् अन्यथा याग एव न संवर्त्तेत।

असंसृष्टोऽपि तादर्थ्यात् ॥ ५७ ॥ (यु०)

असंसृष्टोऽप्याधारादिः प्रतिप्रधानमावर्त्तते कुतः तादर्थ्यात्। यस्य समीपे श्रुतस्तदर्थं इति गम्यते विशेषः। आधारादीन्याज्यभागान्तान्याग्नेयस्य स्विष्टकृदादीन्यग्नीषोमीयस्येति यदुक्तमासे विशेषे भेदः। तस्मादुपांशुयाजादीनां समीपे प्रायाजादीनि सर्वं स्विष्टकृदादीनि वर्त्तव्यानि एवं च संस्कार्यैरितरेषां सर्वेषामस्य भविष्यति।

विभवाद्वा प्रदीपवत् ॥ ५८ ॥ (नि॰)

यदुक्तं यस्य सन्निधौ प्रयुज्यमानि तस्येमानीति यज्यते इति विशेषः तस्मादाहुत्तिरिति नेतदयुक्तं कुतः, विभवात्। विभवित्वस्यैतान्येकस्यापि सन्निधौ क्रियमाणानि सर्वेषामुपकर्तुं प्रदीपवत्। तद्यथा प्रदीप एकस्मिन् प्रदेशे भुञ्जानानां ब्राह्मणानामेकस्य सन्निधौ क्रियमाणः सर्वेषामुपकारं करोति तस्मादाहुत्तिः।

अर्थात् लोके विधितः प्रतिप्रधानं स्यात् ॥ ५९ ॥ (आ॰ नि॰)

उपवर्णनापरिहारः पूर्वं न ज्ञात इति स तावद्वर्ण्यते। यदुपवर्णितं प्रदीपवदिति तदयुक्तम् अर्थाल्लोके प्रदीपस्य सकृदसकृद्वा क्रिया। यदि सकृत्कृतः सर्वं प्रकाशयति सकृत् क्रियते अथ न प्रकाशयति ततोऽसकृत्। ततश्चास्य प्रत्यक्षसामर्थ्यम् अकेन विधित उपकारोऽनुपकारो वा गम्यते न प्रत्यक्षेण। न चास्ति विधानमस्योपकरोतीति सन्निधानात् विशेषग्रहणाद्गम्यते यस्य सन्निधौ प्रयुज्यमानस्योपकरोतीति तस्मादाहुत्तिः।

सकृद्दिध्यां कामुकायनः परिमाणविरोधात् ॥ ६० ॥ (आ॰)

अथ यदुक्तं सकृद्दिध्यां कामुकायन आचार्यो मन्यते।

नैवं चतुर्दश्यवदेत्याकृतिपरिमाणस्य विरोधः स्यादिति तस्य कः परिहारः। आभाषार्थं सूत्रम्।

विधेस्त्वितरार्थत्वात् सकृदिज्या श्रुतिव्यतिक्रमः स्यात् ॥ ६१ ॥ (भा० सि०)

विधीयत इति यद्धि विधिशब्देनोच्यते अङ्गस्येतरार्थत्वात्। यदेतत् स्थितं यत्प्रविधौ यत्कृतं तदर्थमेव तदिति तदाहृत्याङ्गानां प्रयोगः। तत्र चतुर्दश्यां चयोदश्यामित्याकृतिसंख्या नोपपद्यते। आकृतिविधयस्तु चतुर्दश्यां चयोदश्यां तेषां लक्षणया वचनमुपपद्यते चतुर्दश्यपौर्णमास्याकृतिविधयः। चयोदशामावास्यायामिति। नैतत् संख्याविधानं प्रत्यक्षेणैव संख्यायाः प्राप्तत्वात् यत्तु वादरायणस्य मतुवादस्य लक्षणयोपपद्यते। विहितस्य स भवति। आकृति विधानां चेयं संख्या विहिता आकृतीनां तत्प्राप्तेषामनुवादः।

विधिवत् प्रकरणाविभागे प्रयोगं बादरायणः। ॥ ६२ ॥ (सि०)

तत्रैव प्रयोगं बादरायणो मन्यते स कुतः। प्रकरणाविभागात्। सर्वेषां प्रधानानामविशेषा प्रक्रिया सम्भूयकारित्वादित्युक्तं तथैदमर्थं प्रति न कश्चन विशेषः। यत्तु खविधिप्रयोगेण विशेषदर्शनमुक्तं तदयुक्तं किं कारणं यथैवो यः खविधिक्रमः स प्रकरणेन बाध्यते विधिवत्।

यथा विधौ तुल्यत्वात् प्रकरणस्य सर्वार्थाङ्गानि विप्रा यन्ते न यस्य सन्निधौ तदर्थानि क्रमस्य प्रकरणेन बाधित त्वात्।

अपि चैकेन सन्निधानमविशेषको हेतुः ॥ ६३ ।

(शे०)

यद्यपि सर्वार्थाः तदाप्येकस्य कस्यचिदवश्यं सन्निधे कर्त्तव्या। तस्माच्च विशेषः सन्निधेरेकान्ततः यस्य अवधार यितुमतस्तस्मिन्नेव प्रयोगः। बादरायणग्रहणं कीर्त्यर्थं नैकी यमतार्थम्।

क्वचित् विधानान्नेति चेत् ॥ ६४ ॥ (आ०)

नैतयुक्तं सकृत् क्रियेति। कुतः क्वचित् सकृत्वमा कृत्य विधीयते सकृ। यजन्ति सकृ पिबन्ति तदनाकृतौ सर्वतः प्राप्तायां परिसंख्यार्थं भवति इहैव सकृत्वमान्य नेत्युच्यते।

न विधेस्तोदितत्वात् ॥ ६५ ॥ (आ० नि०)

न तत्र परिसंख्या युज्यते प्राप्तस्य पुनर्वचनं परि संख्यार्थं भवति न चेह सकृत्वं प्राप्तं कुतः भेदेन निर्वा पस्य चोदितत्वात्। आग्नेयाग्नीषोमीयपशोर्भेदेन निर्वा पस्तु सकृः तत्रोभेदेनैवावघातनपेक्षे प्राप्तु तस्तत्रावश्यं

विधेयं महत्वन्तस्माच्च क्वचित् महत्वविधानादन्यत्र भेदेन क्रिया विधायेतेति ।

क्रष्णग्रीवस्य भेदेन ग्रहणाधिकरणम् ।

क्वचिच्छ्रूयते आग्नेयं क्रष्णग्रीवमालभेत सौम्यं बभ्रु-माग्नेयं क्रष्णग्रीवं पुरोडाशं स्वर्दमान इति तत्र विचार्य्यते । किं क्रष्णग्रीवस्य प्रथमस्य तृतीयस्य सह प्रदानं कर्त्तव्यमथवा भेदेनेति किं प्राप्तम् ।

व्याख्यातं तुल्यानां यौगपद्यमप्यमाख्यविशेषाणाम् ॥ ६६ ॥ (पू०)

व्याख्यातं प्रयोगे यौगपद्यमिति तुल्यानां तु यौगपद्य-मेकशब्दोपदेशात् स्यादिति इह तु क्रष्णग्रीवयोरेकदेवतत्वात् सह प्रयोगे क्रियमाणे न गडुने विशेषः सह क्रिया चैक-फलत्वात् प्राप्ता तस्मात् सह प्रदानम् ।

भेदस्तु कालभेदाच्चोदनाव्यवायात् स्यादिशिष्टानां विधिः प्रधानकालत्वात् ॥ ६७ ॥ (सि०)

भेदस्तु प्रदानस्य युक्तो न तन्नता कुतः कालभेदात् कथं कालभेदः चोदनाव्यवायात् । सौम्यचोदनया व्यवहिते क्रष्णग्रीवचोदने तत्र पाठक्रमादेकस्य पुरस्तात् सौम्यस्य प्रयोगः प्राप्त एकस्योत्तरत्र तत्कार्यदि सह प्रदानं क्रियेत क्रम उपहन्यत अन्यतरस्य पुरस्तात् क्रिया-यानुत्तरस्योपरिष्टात् पूर्वस्य तस्मात्क्रमेण प्रयोगः ।

तथा चान्याथैदर्शनम् ॥ ६८ ॥ (निद०)

पशिष्टः शौक्लमाख्ये भी अपत इति ।

विधिरिति चेत् न वर्त्तमानापदेशात् ॥ ६९ ॥

(आ० नि०)

अत्र विश्वभिप्रायं ज्ञात्वेत स्तुत्यर्थमुक्त्वा लक्षणार्थः परिच्छेदीतः स्यात् तस्मात् प्रदानभेदः ।

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादश-स्याध्यायस्य प्रथमः पादः ॥ १ ॥

अथ एकादशाध्यायस्य द्वितीयः पादः ॥

आग्नेयादीनां न देशकालादितन्त्राधिकरणम् ।

एकदेशकालकर्तृत्वं मुख्यानामेकशब्दो-पदेशात् ॥ १ ॥ (पू०)

दर्शपूर्णमासयोराग्नेयादीनि प्रधानानि तत्र देशकाल-कर्तारः "अग्नेर्दर्शपूर्णमासाभ्यां यजेत" पौर्णमासं पौर्णमासाभ्यां यजेत "अमावास्यायाममावास्यया यजेत" । दर्शपूर्णमासयो-र्यत्रकालोऽवधार्यते तत्रैव इति । तथा चातुर्मास्ये प्राचीन-

प्रवर्ते वैश्वदेवेन यजेत, वसन्ते वैश्वदेवेन यजेत। चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विज इति। तत्र विचार्यते किम् आग्नेयादीनां प्रधानानां तन्त्रं देशकालकर्तॄणां, अथवा भेद एवेति। तत्र एतावत्तु परीक्ष्यं किं? चोदनाविधिशेषा देशादयो यद्याग्नेयोऽष्टाकपाल इत्येवमादय आग्नेयादिचोदनाविधिवच्छेषाभिमे समादिविधयः शेषाः। आग्नेयोऽष्टाकपालः एवं भवति एवं सर्वत्र अथवा "प्रयोगाङ्गं देशादयः" य एषामाग्नेयादीनां प्रयोगः फलसाधनार्थस्तदङ्गानामिति" किञ्च, यतः? यदि प्रयोगाङ्गं ततस्तन्त्रम् अथ चोदनाविधिशेषास्ततो भेदेनेति। किं प्राप्तम् एकदेशकालकर्तृत्वं मुख्यानां तन्त्रमित्येषा प्रतिज्ञा तत्र एवं तावद्दर्शयति। प्रयोगाङ्गं देशादय इति कुतः?। न तावद्धते देशकालकर्तृभ्यः प्रयोगो भवति। यच्च येन विना न भवति तत्तदङ्गमित्यवगम्यते तस्मात् प्रयोगाङ्गं देशादयः। यदा प्रयोगाङ्गं तदा तन्त्रभावः। कस्मात् एकदेशोपदेशात्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति एकयज्ञोपदेशादेकं फलं एकफलानामङ्गप्रयोगः। तत्र न दृष्टेत विशेषो देशादीनामेदमर्थं प्रति। अदृष्टभावे विशेषे तन्त्रभावो युक्तः तस्मात् तन्त्रं देशादयः।

अविधिस्थेत् कर्मणामभिसम्बन्धः प्रतीयेत तच्चतुर्थार्थाभिसंयोगाविधित्वाच्चेतरेषां प्रति प्रधानभावः स्यात् ॥ २ ॥ (सि०)

अविधिस्येत् यदि चोदनाविशेषो न स्यात् देवादि-विधिस्ततः समेवाग्नेयादीनां भेदेन देवादिरभिसम्बन्धो न प्रतीयेत । चोदनाविशेषस्त्वयैवं कारणम् इष्ट समे दर्श-पूर्णमासाभ्यामित्येवमादिभिर्वाक्यैः देवादयो विधीयन्ते अपायसात् ते चेह्विधीयन्ते आग्नेयादीनां दर्शपूर्णमास-शब्देनानुवादयितव्यम् । अन्यथा अनेकार्थत्वेऽभिधानमेकस्मिन् वाक्ये भवतीति। अनुवादे च तेषां सहत्वं विवक्षते । वि-वक्षायां वाक्यभेदो भवति आग्नेयादिना देवादयः तेषां च सहितानामिति । कथम् ? समे दर्शपूर्णमासाभ्यामित्येव-मादिभिर्वाक्यैराग्नेयादिषु देवादयो न विधातुं शक्यन्ते लक्षणार्थाभिसंयोगात् लक्षणार्थेनाभिसंयोगो विज्ञायते दर्शपूर्णमासशब्दः समुदायोऽयं समुदायश्च समुदायि-लक्षणार्थः शक्नोति साहचर्यात् समुदायिनो लक्षयितुं न त्वेवमपि लक्षणाश्रितो भवति । वरं लक्षणा नैकवाक्यता-नेकार्थत्वम् । अनेकार्थत्वेऽगमकत्वम् । लक्षणानुगमिका लौकिकत्वात् । अपि च श्रुत्या समुदाये देवादयो विधी-येरन् । न च समुदायस्य देवादिभिः सम्बन्धोऽस्ति । कारकं हि समवः कारकस्य कर्मणा सम्बन्धो न कर्मगुणेन तस्मादपि लक्षणा । यद्वा पौर्णमासीमभिसम्पादयेदिति इवि-र्लक्षणा चोदनाविधित्वाच्चेतरेषां देवादीनां प्रतिप्रधान-भावः स्यात् यज्ञमात्रविशेषत्वात् । अत्र केन समादय आग्नेयादिषु विधीयन्ते ? । समे यजेत पौर्णमासीं यजेत्य-नेनाख्यातेन । यत्र हि धातुना यागसामान्य विवक्षया तेषु समादीनां विधिः, कर्तारोऽपि, यज्ञेषां यागानां रूपविधा-

नार्थो भवति अच्युतो भवतीति तेन विधीयते। अत्र वा अस्मिन्भवतीतिपरः प्रथमपुरुषे प्रयुज्यमानोऽप्यस्तीति।

अङ्गानां प्रधानदेशादिनियमाधिकरणम्।

एवं क्रियतमपर्यवसितं भवत्यतोऽनन्तरा चिन्तान्तरं क्रियते किम्? पुनः कारणमेतत्क्रियतपर्यवसिते चिन्तान्तरमारभ्यते एतस्मिन् न्याये क्रियते तस्माच्चिन्तायाः पूर्वपक्ष उच्यिष्यति यतः असौ एतस्मादनन्तरमुच्यते।

अङ्गेषु च तद्भावः प्रधानं प्रति निर्देशात् ॥ ३ ॥ (पू०)

अङ्गेषु इदानीं विचार्यन्ते किं तेषां समुदाय एव देशकालकर्तारः अवयवाऽनियम इति किं प्राप्तम्। अङ्गेषु च तद्भावः कुतः प्रधानं प्रति निर्देशात् चोदनाविधियेयत्वेनाग्नेयादीनि प्रधानानि प्रति समाद्यो निर्दिष्टा नान्यच्च भवन्ति। तस्मादनियमः। यद्वा दृष्टदेवतं यत् प्रधानेषु न तदङ्गेषु। एवं देशादयोऽपि स्थितादुत्तरम्।

यदि तु कर्मणो विधिसम्बन्धः स्यादैकशब्द्यात् प्रधानार्थाभिधानसंयोगात् ॥ ४ ॥ (सि०)

यदि आग्नेयादेः कर्मणः समाद्विसम्बन्धः स्यात् ततः स्याच्चोदनाविधिशेषत्वं भेदेन च समाद्यः। नतु तदस्ति

कुतः ऐकशब्दात् प्रधानार्थाभिधानसंयोगात् यद्वा-दाग्नेयादीनां समस्तानामेकमन्त्रो वाचकस्तेन समादी-नामभिसंयोगः सर्वे दर्शपूर्णमासाभ्यां यजेतेति । न ये व्यस्तानां वाचकाः यदाग्नेयोऽष्टाकपाल इत्येवमादयः । तत्र प्रत्यक्षं समस्तसंयोगमपेक्ष्य परोक्षो व्यस्तसंयोगः कल्प्यः । सोऽपि कथञ्चित् यत्र तु प्रधानानामभिसंयोगः क्रियते तत्र उभयमपि परिक्षतं भवति । कः पुनः प्रधा-नार्थः । प्रधानं फलं तत्साध्यात् प्रधानार्थो यो व्यापारः । कथासौ आग्नेयादीनां प्रयोजनः । कथं तेनाभिसंयोगः समादीनां विधीयते । उच्यते । दर्शपूर्णमासाभ्यां स्वर्ग-कामो यजेतेत्यनेन समस्तानामाग्नेयादीनां फलसाध-नार्थः प्रयोग उक्तस्तस्य च यदि पुनः श्रुत्या समादयो विधीयन्ते साभ्यामेताभ्यां दर्शपूर्णमासाभ्यां यजेत ताभ्यां सर्वे यजेतेति ततो न परोक्षो व्यस्तसम्बन्धः कल्पितो भवति । न च लक्षणा तस्मात् प्रयोगे विधिरेतेषां स च सर्वेषां प्रधानानां साधारणः तत्रेदमर्थं प्रतिपद्यते विशेषः । तस्मात् तन्त्रं देशकालकर्तारः ।

तथा चान्यार्थदर्शनम् ॥ ५ ॥ (नि.द्व०)

यस्यार्थोऽनेतमेवार्थं दर्शयति । उद्भाविष्ट वा एतानि वीराणि सर्वाणि यदमावास्यायां सन्धियन्ते आग्नेयं प्रथ-मेनेष्ट्वा वत्सरे इति । उत्तरत्र वीर्यापत्यं चेत्यवगम्यते उप-पद्यते तस्मादपि तन्त्रम् ।

श्रुतिश्शेषां प्रधानवत् कर्मश्रुतेः परार्थत्वात् ॥ ६ ॥ (शे०)

इतश्च प्रयोगचोदना पुनः श्रुतिरियं, श्रुतः श्रुतिश्शेषां समादीनां प्रधानानामिव, कथं ज्ञात्वा कर्मश्रुतेः परार्थत्वात् । यावत् कर्म श्रुतिः दर्शपूर्णमासाभ्यामिति सा परार्था द्वतीयार्थत्वात् तया सामानाधिकरण्यात् यजेतेति यद्यपि परार्थं एव तदेतदेवमापद्यते दर्शपूर्णमासयागेनाप्यत् किमपि कुर्यादिति ।

कर्मचोऽश्रुतत्वाच्च ॥ ७ ॥ (शे०)

कर्म च न श्रुतं, कार्यं न श्रुतं, प्रधानं न श्रुतमित्यर्थः । तच्च ख्याने समादीनि श्रूयन्ते प्रधानख्याने श्रुतत्वात् । श्रुतिरेषां प्रधानवदित्युच्यते । न च तानि प्रधानानि तच्च यदि आग्नेयादिवाक्यानां पुनः श्रुतिरियं कस्मात् गुणभावानुवादो भवेत् न हि तत्र तेषां गुणभाव उक्तः उत्पत्तिमाचाख्यानानि तानि च किञ्चित् कार्यं निर्देष्टुं यदपेक्षानुक्तोऽपि गुणभावोऽर्थप्राप्तोऽनूद्येत प्रयोगचोदनायां तु गुणभाव उक्तः । कार्यमपि फलं तस्मात् तस्माः पुनः श्रुतिरियं तस्मा च तन्नभावः सिद्धः ।

अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन् तस्मात् स्यादेकदेशत्वम् ॥ ८ ॥ (सि०)

पक्षे तु सिद्धान्तरं यस्मा प्रयोगाङ्ग देशाद्यः तस्य-

पत्वं तदाश्रयत्वात् पत्वं उत्तिष्ठति तस्मात् ततोऽनन्तर-
मुच्यते यदुक्तम् अङ्गेषु देवादीनामनियम इति तत्र अङ्गेषु
समादिनियम इति । शेषः यतोऽङ्गान्यपि प्रधानेन फल-
श्रुतावुद्दिश्यमानेन सहोपदिश्यन्ते कथं विधानत्वात्
प्रधानानां कथं चाश्रयतो विधानमेतदुपेताङ्गप्रयोगो
विधानवशेन इतिकर्त्तव्यतेत्यर्थः । यतो दर्शपूर्णमासाभ्यां
स्वर्गकामो यजेतेत्याङ्गवान् प्रयोगः प्रधानानां युक्तः यथा
विधिस्तथाङ्गशेषाविधिन पुनः श्रुत्या समादीनां विधिः ।
अतोऽङ्गानामपि प्रधानैः सहैकदेशकालकर्त्तृत्वं स्यात् ।

द्रव्यदेवतं तथेति चेत् ॥ ९ ॥ (आ०)

अथ यदुक्तं यथा द्रव्यदेवतं प्रधानानामङ्गानां च
भेदेन भवति एवं देवादयोऽपि स्युरिति तत्परिहर्त्तव्यम
आभाषात्वं सूत्रम् ।

न चोदनाविधिशेषत्वात् नियमार्थो विशेषः ॥
१० ॥ (आ० नि०)

नैतदेवं कुतः चोदनाविधिशेषत्वात् । चोदनाविधि-
शेषो हि द्रव्यदेवताविधिः । तेन प्रधानेषु द्रव्यदेवत-
विशेषो नियतः । दक्षाग्निः पुरोडाशश्च दक्षाग्नमग्नी-
षोमौ वेति तत्राङ्गेष्वपि आश्रयेण प्रयोगात् यजति शेषात्
विशेषतं यजतीति न चान्यच निर्दिष्टोऽन्यत्र भवति तत्रैव
प्रयोगाङ्गत्वात् देवादीनां तत्र च प्रयोगस्य चाधारत्वात्
[illegible] तदाश्रितेन तदादिनियमं तद्देवतेन ।

तेषु समवेतानां समवायात्तत्समवायिनि भेदस्तद्भेदात् कर्मभेदः प्रयोगे स्यात् तेषां प्रधानशब्दत्वात्तथा चान्यार्थदर्शनम् ॥ ११ ॥ (पे०)

यदि च समानं द्रव्यदेवतमङ्गानां प्रधानानां च स्यात् ततस्तेषु द्रव्यदेवतेषु समानेषु समवेतानामङ्गानां प्रधानानां च समवायात् तद्वत्खोदविभेद इति तत्प्रक्रिया स्याद्भेदस्तद्भेदात् । अथ तु भेदो द्रव्यदेवतस्य ततस्तद्भेदात् कर्मभेदः प्रयोगे स्यात् । द्रव्यकर्मभेदः प्रयोगविशेषश्चाङ्गभेदः स्यात् । तथा चान्यार्थदर्शनं युक्तं भविष्यति चतुर्दश पौर्णमासीमाहुतयो हूयन्ते चतुरोदर्शमासाज्याभिति तस्मादपि द्रव्यदेवतस्य भेदः ।

राजसूयादावङ्गानेष्वपि विचारः ।

दर्शपूर्णमासेष्वां हौ समुदायौ दर्शः पूर्णमासश्च । तथा राजसूयेऽनुमत्यादयः इष्टयः पवित्रादयः सोमाः चातुर्मास्येष्वपि पर्वाणि वैश्वदेवादीनि तत्र विचार्यते किं दर्शस्य पूर्णमासस्य च तन्त्रेणाङ्गानां प्रयोगः तथा राजसूयेष्टीनां सोमानां च चातुर्मास्येषु च पर्वाणामुत तन्त्रभेदेनेति किं प्राप्तम् ।

दृष्टिं राजसूयचातुर्मास्येष्वैकधर्म्यादङ्गानां तन्त्रभावः स्यात् ॥ १२ ॥ (पू०)

तत्र राजसूयेन प्रयोगः सुतः ऐकधर्म्यात् एकपद-

[illegible] (हे०)

[illegible] प्रकृते यज्ञोदधामावा-
[illegible] चतुर्दयाङ्गुलयः खुरा-
[illegible] तदेतत् प्रकृतमेव भवति तस्मादेदः ।

[illegible] ॥ १७ ॥ (सू०)

[illegible] कार्यकृदाश्वमेधिकाश्वयज्ञेषु देशकालभेदात्
तत्रैतेषु यत्र चतुर्मौक्षाश्वमेधयोरनीश्वरत्वं सान्तपनीयवो-
[illegible] कार्यकृदाश्वमेधिकाश्वमेधयोरनीश्वरत्वं यदानीश्वरतोवर्द्धिस्यत्
[illegible] इतरथा विधेयात् तदनर्थकं स्यात्
तस्मादयमेव भेदः ।

[illegible] तु षोडशैकाला चतुरश्रं विप्रकर्षं स्यात् ॥
१८ ॥ (सू० भा० सि०)

वपाश्रं पशवदिति क्रमः । प्रकृतो यज्ञो यज्ञ-
क्षानां विधा । तत्र ज्योतिष्मत्यं शेषवं, प्रचारश्च श्वनाभि-
विप्रकर्षं । तद्वत्सु षोडशैकालात् । एका तत्र षोडशा
श्रावित्रं यज्ञं यद्वीला चिक्षसा वपां परिवीयाग्नेयं श्वपनीयं
पशुमुपाकरोतीति । चर्मषोडशायां यज्ञानां यज्ञं च प्र-
चारषोडशायां तदेव हि प्रधानं विप्रकृष्टकालेन प्रचारक-
लेन निर्दिष्टं । तदर्थानि च ज्ञतान्यङ्गानि । पैवां पुनः
क्रियायां [illegible] तस्मादिदमुपपन्नम् ।

तथा स्याद्ध्वरकल्पेष्टौ विशेषस्यैककालत्वात् ॥

१६ ॥ (पू०)

इदं श्रूयते आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेत्, सारस्वतं चरुं वार्हस्पत्यं चरुमाग्नावैष्णवमेकादशकपालं माध्यन्दिने, सारस्वतं चरुं वार्हस्पत्यं चरुमाग्नावैष्णवं द्वादशकपालमपराह्णे सारस्वतं चरुं वार्हस्पत्यं चरुं, यस्य भ्रातव्यः सोमेन यजेतेति। तत्र चिन्त्यते किं चितु कालेषु युज्यमानानामेतेषां कर्मसमुदायानां तन्त्रेणानुष्ठानां क्रिया उत सेटेनेति। किं प्राप्तम्। तथा स्याद्ध्वरकल्पायां यत्रैते पशो तन्त्रमनुष्ठानां प्रयोगः। कुतः?। विशेषस्यैककालत्वात्। अनुविशेषः कश्चिदेषां भिन्नकालानां समुदायानाम् एककालः श्रूयते "पुरोवाचः प्रवदितो निर्वपेदिति" कथं पुनर्ज्ञायते सर्वेषां निर्वापकालमयं कालविधिरिति। सर्वेषां ह्येषामेकफलत्वादेकप्रकरणं सेषाध्वरकल्पेष्टिः यत्रमेवैतया प्राप्नोतीति चैकशब्देन युगपत् फलं प्रति विधानात्। तस्मात् नैककाले क्रियमाणे उत्तरकालयोः समुदाययोर्निर्वापः प्रतिक्षेत। स प्रतिक्षणमाचक्षतः प्राक्भाविनामङ्गानां प्रतिकर्षे वर्तेत तदादिवाभिसंबन्धात् तदङ्गमपकर्षे स्यादिति तानि प्रतिक्षिप्तानि सर्वेषां तन्त्रं भवन्ति। तेषु तन्त्रेणुत्तरेषामपि तन्त्रभावोपपन्नः कुतः? यदि सर्वाणि तन्त्रं क्रियन्ते नास्ति

तन्त्रभावे क्रममेदः...क्रमस्तूक्तक्रमेणैव ततः पूर्वत्र सर्वं सुच-
रितमपहन्तीत्यरक्षोघ्नमेव अधिश्रयम्। तथा निर्वाया-
न्तेषु प्रतिक्रमणादिषु क्रममेदो भवति। न तत्पूर्वत्र प्रो-
क्षणादीनि क्रियन्ते यावदुत्तरत्र निर्वायान्तानि न ह्यतानि
अपि च सङ्घोपक्रमे युगपदधिकीर्षा तस्मा च त्वां यद्यदा-
पतति तत्तदङ्गक्रमाधिक्येषत्वात् साधारणं भवति।

दृष्टिरिति चैकवच्छ्रुतिः ॥ २० ॥ (पू० यु०)

सेषाध्वरक्षसेदृष्टिरिति चैकवत् प्रयोगः। तत्र तावदेकैवेदृष्टिः बहव एते याज्याः। यदि तु सह क्रियन्ते
ततः सैकसम्बन्धे यतीभावः पर्यवसितो भवतीति एकवदुप-
चार उपपद्यते। तस्मात्तन्त्रम्।

नैतदेवं तन्त्रमङ्गानीति। किन्तर्हि भेदेन श्रुतेः?।

अपि वा कर्मपृथक्त्वात्तेषां च तन्त्रविधानात्
साङ्गानामुपदेशः स्यात् ॥ २१ ॥ (सि०)

कर्मभेदे तावदेतान्याम्नायन्ते याज्यादीनि पृथग्भूतानि
तेषां तन्त्रविधानं नानाशास्त्रेषु प्रातर्मध्यन्दिनेऽपराह्ण
इति। तत्र तत्रैषां साङ्गानामुपदेशः स्यादतः क्रमभेदा-
दङ्गानां भवति विशेषः। तस्मादेदः। यत्तु विशेषश्चैकक्रि-
यत्वादिति तत्र ब्रूमः।

प्रथमस्य वा क्रियावचनम् ॥ २२ ॥ (पू०मी०)

प्रथमस्य कर्मणो यो निर्वपणादेस्तस्यायं क्रियावचनम्।

पुरा वाचः प्रवदितोरिति । यतु प्रकरणात् सर्वेषां प्राप्तौ । न प्रकरणे कर्मणां विनियोजकम् । किन्तर्हि विनियोजकम् । इदमत्र अवघातोक्तेन प्रकरणस्य सामर्थ्यं नाम्नेदं तच्छेदमिति । यद्यपां च निर्वापाणां क्रमप्राप्तस्य पूर्वस्येव विज्ञायते । तस्मादस्ति विशेषस्यैककालत्वम् । कर्मणां च तत्र भेदः कालभेदादिति ।

फलैकत्वादिष्टिशब्दो यथान्यत्र ॥ २३ ॥ (पू० मी० नि०)

यत्खिष्टिरिति भिन्नानामपि कर्मणाम् एकफलानां फलस्यैकत्वमपेक्ष्यैकवचनं भवति फलान्तरत्वादीक्षायाः । यथा सर्वपृष्टेष्टिर्दर्गारेष्टिः सुमनसामेष्टिरिति ।

वसाहोमे भेदेनानुष्ठानाधिकरणम् ।

वसाहोमस्तन्त्वम् एकदेवतेषु स्यात् प्रदानस्यैककालत्वात् ॥ २४ ॥ (पू०)

एकदेवताः पशव उदाहरणं यत्तदस्य प्राप्तावप्यात् पशूनामभूत्-इति यद्यपि तु प्रकृतावग्नीषोमीयपशो वसाहोमः कर्त्तव्यः । वाज्याहुतीर्वा वसा जुहोतीति च इह चोदकेन प्राप्यते तत्र विधीयते किं भेदेन वसाहोमः कर्त्तव्यः अथ वा तन्त्रमिति किं प्राप्तं वसाहोमस्तन्त्वमनेकदेवतेषु स्यात् प्रदानस्यैककालत्वात् । वसाहोमः खल्वपि एकदेवतेषु

[illegible]

यागभेदात्तद्वृत्तिर्देवताभेदे ॥ २५ ॥ (सि०)

देवतानिर्देशेनैकादशिनेषु भिन्नप्रदानेषु भिन्ना याज्यानुवाक्याः। तेषु यद्यपि विधिर्यस्य प्रदानस्य याज्यानुवाक्या, अतः स तद्धर्म इति। तस्मात् तद्भेदः।

यूपाहुतौ तत्संख्याविचारप्रकरणम्।

अन्ते यूपाहुतिस्तद्वत् ॥ २६ ॥ (पू०)

ज्योतिष्टोमे यूपैकादशिनी एकादश यूपान् छिनत्ती त्याम्नाता। अस्ति तु प्रकृताबन्धीयामीये पशौ यूपाहुतिः सा किं भेदेन कर्तव्या उत तन्त्रमिति किं प्राप्तम्। अन्ते यूपाहुतिः तद्वत् बबधानादेवतेषु वसाहोमः भेदेन तद्वदिहापि भेदेन कर्तव्या इति। कुतः ?। यूपस्थान्विकेऽग्नि सहिता यूपाहुतिः श्रूयतीति न्यूयते। बहूनां च यूपानां भिन्नदेवत्यानां यदि च यूपस्थान्विके न श्रूयेत तथैव तेन तन्त्रेण कर्तव्या स्यात्। तस्मादेवं कर्तव्यम्।

[illegible]

वक्षात्। [illegible]

[illegible]

[illegible]

[

[illegible] [illegible]

यमाद्यवरुद्धाश्च देशानाम् ॥ २८ ॥ (यु०)

[illegible]

[illegible]

यावद्भवे प्रधानेऽग्निविकारः स्यान्न हि सर्वहेतुरग्नि-संयोगः ॥ २९ ॥ (यु०)

[illegible]

वनीवे सुतोमीति। सोमवरुणविधिवैशिष्ट्यात्। यद्वा प्रधाने तत्राङ्गेषु वारुणत्वं वर्षाभ्ये वैष्णवे विधितः। यजुर्वैष्णवेन परस्मीति। यजुरवयवस्तो हि प्रवरदेवतासोमवरुणद्रव्यस्य वारुणस्य वाचकः। तदुपनिबन्धाच्च तत्सामानाधिकरण्येनैकवचनेनाम्नायते वारुणीति। न चात्र यजमानं विधीयते। यत्र श्रुतिस्तत्र तदस्तु प्रकारप्रवणात्। न चाध्वर्यो नाम कश्चिदेवोऽस्ति यं वारुणेनैकवचनेन गच्छेयुः। न च वारुण एकवचनोऽस्ति येन गमनमुच्येत तत्रादिकवचनस्य देवतासम्बन्धकरणमेवान्नीयते। न च वारुणस्तद्वचनोऽपभृद्यजुस्तत्रिधायी विहितः। तासामङ्गेषु वः प्रसङ्गः द्रव्यदेवतवशेन द्रव्यमेवैकवचने वरुणस्य देवता प्रधाने विहितत्वात्तत्राङ्गेषु भवतः एवमापोऽपि।

साङ्गो वा प्रयोगवचनैकत्वात् ॥ ३० ॥ (सि०)

साङ्गो वावभृथोऽस्तु प्रवर्त्तेत। कुतः। प्रयोगवचनैकत्वात्। आम्नायेऽवभृथे श्रूयन्ते। क्वचिदपि प्रयोगे। न ह्येतद्वचनमप्सु वरुणस्य इति। क्वचित्तर्हि अप्सु वरुणेनेति। हे अपि पदे वारुणवचने। न च विप्रेषव विप्रेषता। उभयोश्चरन्तीति क्रियया सम्बन्धो न भिन्नश्चरन्तीति प्रयोग उच्यते तस्मात् प्रयोगाम्नायः। चोदितप्रकाशाङ्गप्रधानानां प्रयोग इत्युक्तमङ्गानि तु विधानत्वात् प्रधानेनोपदिष्टेषु तत्र तत्र तत्तत्साङ्गोऽवभृथोऽप्यूहिष्टो न दोषः। यतोऽङ्गान्यपि सन्ति कर्माणि।

[illegible]

किञ्च दृतप्रथं दृंहति चषु ह्वय प्राप्याधारयतीति यथेतानामन्ते होमः स्यादुभयं विधीयेत । चषु प्राधारयति ह्वय प्राप्नोतीति च तदाक्षमेदोषः स्यात् । अथ यद्योन्यायप्राप्तिस्थानत्व ह्वयप्रासनं केवलं विधीयत इति नास्ति दोषः । अथ यदुपवर्णितं द्रव्यदेवतवदिति तत्र ब्रूमः ।

शब्दविभागाच्च देवता नयः ॥३२॥ (पू०यु०नि०)

विभक्तशब्दः प्रधानस्यावयव इति वाचकः चक्षाना मादायादयः शब्दाः । अवद्यवयवसंयुक्त च द्रव्यदेवतं वाक्येनैकवाक्यत्वेनावद्य यन्तीति । तस्माच्च तदङ्गेषु भवति चषुषु यद्योमाङ्गमित्येवमपदिष्टो होमः । अतोऽनुपपन्नमेतत् ।

वदत्यप्रधानादिषु विचाराधिकरणम् ।

वदत्यप्रधानेषु विचारपृथक्त्वमाम्नातं पृथगग्नौ प्रणयतः पृथक्छेदो द्रुपत इति । सत्र भूयसे षष्टावध्वर्यु द्वत्तरे विचारे सर्वौषाधारयति मार्जयतीमेव प्रतिप्रस्थाता दक्षिणमभिनीति । इह विचार्यते । किं मेदेन दक्षिणविचारेऽपि कर्तव्यानि अथ वा वान्येषूत्तरे कृतानि तान्येवोत्तरत्रानुपकर्तव्यानीति किं प्राप्तम् ? ।

दक्षिणविचारे वदत्यप्रधानेषु देयमेदात् सर्वं क्रियते ॥ ३३ ॥ (पू०)

भेदेनाङ्गानि [illegible] देवतादेवत्। देवोऽपि मियते दर्शिव [illegible] इति। यानुत्तरे विहारे प्रधानेऽपि तेषां तदेवाग्नेयत्वाद्युपकुर्वन्त्यङ्गानि तुल्यविधानत्वात् प्रधानोपदिष्टेन् तस्मात् सादेवतादेवत्वमिति सादेवतायाः मात्मनः। तस्मात् तदर्थं दर्शिवे विहारे भेदेन कर्त्तव्यानीति।

अचोदनेति चेत् ॥ २४ ॥ (आ०)

एवं चेत् पञ्चस्वि देवतादेवतानां पृथक् क्रियेति नैतद् युक्तम्। यत् सादेवतमचोदनाच मात्मनः। सर्व खलु कर्म प्रति चोद्यते तत्राङ्गानि व्याप्नुवन्ति। न चेत् मात्मनः कर्म प्रति चोदना। अ तर्हि चातुर्मास्यैः स्वर्गकामो यजेतेति। नचेदिह कर्म चोद्यते अङ्गानां प्रातिरेव नास्ति कुतो भेदस्तस्यता वा।

स्यात् पौर्णमासीवत् ॥ २५ ॥ (आ० नि०)

स्यादङ्गानां प्राप्तिः पौर्णमासीवत् यथा पौर्णमास्यां यजेतेति न तावत्कर्मफलं चोद्यते। अथवैव तचोदितं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। अथ वा साङ्गप्रधानं पौर्णमास्यां क्रियत इत्येवमिहापि भविष्यति।

प्रयोगचोदनेति चेत् ॥ २६ ॥ (आ०)

अचोदित प्रयोगस्तत्र पौर्णमास्यां चोद्यते यजेतेत्या-

प्रयोगे। प्रयोगशब्दश्चायमाज्ञायां निरूढिलक्षणः। प्रयोगाङ्गं च खलु आसादनं तत्र स्वार्थं मासादनं नोपदिश्यते किन्तु प्रयोगार्थमिति तत्र सूत्रम्। सवेद॥

कृष्णापि मासत्वाः प्रयोगशेषत्वते ॥३७॥ (आ०नि०)

आसादवतीत्यनेनाऽऽख्यातेन। यद्यपि च खलु प्रयोगाङ्गमेवं देशोऽपि तथापि मासत्वपि याज्ञा दर्शपिण्डिचारे वर्तते। ननु न आसादवतिशब्देन याज्ञ उच्यते। कथं तत्र प्रयोगं वक्ष्यति। आह यावार्थेनोदाहरणं यथा प्रवृत्तो। तथा हृष्टार्थं भवति। इतरथाऽहृष्टार्थः स्यात्। यावार्थं चेत् तत्र यावोदनस्य कार्यः तेन सत्यपि यावत्वोदने अहनि यथा यौगं पयं निर्वपेत् योग्यं वस्तु मासमेतेति। तस्माद्विहृष्टापि मासत्वाः प्रयोगशेषते। तथा च प्रामाण्यमज्ञानां भेदेन स्थितं।

आसादनमिति चेत् ॥ ३८ ॥ (आ०)

आह आसादयतिशब्देन याज्ञ उच्यते किमर्थं आसादनम्। ननु खलुचया यागं वक्ष्यति। न श्रुतिमुत्सृज्य खलुचाश्रयणीया। आसादनञ्च हृष्टार्थत्वे साधीयते। आनीयेत यथासादनं हृष्टार्थं भवति यदि दृष्टिभेदस्यो मासत्वाः शेषः स्यात्तत्समीपे नयनं हृष्टार्थं भवेत् न तु क्रियेत। नाहृष्टार्थता श्रुत्यते श्रुत्यर्थं एव याज्ञः। तस्मादासादनमासादयतिशब्देनोच्यते न याज्ञः।

नोत्तरैर्वेषयाभावत्वात् ॥ ३९ ॥ (आ० नि०)

नेतदृष्टार्थमाधानम् । कुतः ॥ अपरदेवताप्राप्तत्वात् । यदृष्टार्थेऽपरे विधयः कर्तव्यं चाधातयति सर्वेणोत्तरविहारयजमानेन यदग्नयेऽग्नीषोमीयमेकादशकपालं निर्वपति प्रतिप्रयाता दक्षिणविलेतक्षिणेऽग्नयेऽग्नीषोमीयमेकादशकपालं निर्वपति यद्या नाधादनमदृष्टार्थमिदम् । तत् कथं ज्ञाता ? । आहवनीयदृष्टे प्रत्यक्षतया दृष्टिर्भवति । प्रसक्तादनुविधानादाधादनमपि तत्रैव प्राप्तम् । तच्च प्रत्यक्षाभावमनेन लिखति । यद्या प्राप्तत्व च वसोर्धोभाव च प्राप्तं भवदृष्टार्थ । तस्माद्धोमार्थमाधादनम् । अपर आहैकस्मिन् वाक्य एवं एवायमासादयतिशब्द उभयोर्विहारयोराधादनमाह । उत्तरस्मिंश्च प्रत्यक्षहोमार्थं तस्मिन्नेवोत्तरयो दक्षिणे होमार्थं न भविष्यतीति एतदोपपद्यते । तस्मादुभयत्र होमार्थम् । यद्येवमाधादनमेवेदं विधीयते । यतो दृष्टार्थं भवति तत्र दृष्टार्थं यत्र न प्रत्यक्षति तत्राहृष्टार्थमिति । तत्र न विध्युद्देशयोर्भिन्नपक्षत्वात् । यत्र दृष्टार्थं तत्रानूद्यते प्रकृतितः प्राप्तत्वात् । यत्राहृष्टार्थं तत्र विधीयते । तदुभयं युगपत्र प्रत्यक्षति । तस्मादसुसमेतत् । यत्र होमार्थत्वे सति यस्मात् कारणादुना क्रियते नाधादनमाज्यमेवेत्याह होमसाधनमेति । नेवम् । आधादनं हि होमार्थं भवति नान्यथा साधनमात्रमज्ञ होमार्थं भविष्यति । यदि च ।

अवाच्यत्वात् ॥ ४० ॥ (३०)

न च होमार्थमाधादनं वक्तव्यं सति होमे प्रकृतित एव प्राप्नोति कारणस्य वक्तव्यः । न च सति होमे प्रकृते

[illegible]

[illegible]

चाङ्गायवचनं तद्वत् ॥ ४१ ॥ (यु०)

वेदिश्रवणं तद्वद् दुष्टं भविष्यति यद्वाक्यमेवमुपदिष्टः। यदेवाज्यमं; अदोऽति तत् यतिष्यतेत्र करोतीति। तथा यज्ञियेव होमसंयुक्ते कूपे देवतायजनमिति दर्शिते ऽपि विचारे देवतायागं दर्शयति तद् ज्ञातव्यं चाङ्गादयति यद्वो युक्तमते तस्मादमीषम्।

कर्तृभेदतन्त्राधिकरणम्।

कर्तृभेदतन्त्रेति चेत् ॥ ४२ ॥ (पू०)

तत्रैव विचरते [illegible] कर्तारो भेदेन न तत्र तन्त्रमिति। चि प्रातम्। कर्तृभेदतन्त्रा यथाशब्दः। पदार्था दर्शिता वाक्यानां कर्तृभिस्तरे विचारे प्रचरितव्यमित्यर्थः। इत्र यजमानेषु वाक्यानि प्रधानानि ऋत्विजां भवन्ति। वैगुण्यतरदर्शनाद्धि कर्तारो दृष्टमाधिक्यमा दर्शिते विचारे मोक्षुर्यन्ति तस्मात् कर्तृभेदेनैवितव्यम्।

न समवायात् ॥ ४३ ॥ (सि०)

[illegible] कर्तृभेदतन्त्रेति। विचारे तत्रैव कर्तारः स्युः कुतः। समवायात्। यजमाने हि कर्तारः समवय-

अत्र । चातुर्मास्यानां सप्तसप्तानां प्रकृतित्वं इति । यद्यु-दायसम्बन्धेऽपि सप्तवयवा एकैकशब्दैभिः सप्तभ्यन्ते प्रकृत्य-प्राधायमानाश्च तदवयवत्वात् पञ्चभिरभिसम्बन्धोऽस्तु प्रयुज्यते एकस्यां पूर्वप्राधासानां प्रयोगः एककालत्वात् समानोप क्रमोपसंहाराच्च तत् यावदर्थमं तावदेवाभ्यासेन कर्त्तव्यं नान्यदपि । न च कर्तृणां भेद इति । तस्मात् तत्रैव भव-न्तीति । तचैतत् स्यात् प्रधानभेद इत्यङ्गानां भेदोऽभ्यु-पगम्यते कुतः ? । अङ्गानां प्रधानसामित्वात् यत्रैव हि प्रया जादीनां मावत्या भेदाद्भेदेन क्रिया एवमङ्गभूतत्वात् कर्तृणां प्रयाजादिवत्कर्त्रभेदोऽध्यवसीयत इति । तथो-च्यते । अङ्गत्वाविशेषेऽपि सति अन्यप्रयाजातीयोपकारोऽन्य-प्रयाजातीयोऽन्यस्य प्रयाजादीनि यत दृष्टे नोपकारसम्बन्धे नोप कुर्वन्ति । बर्हिरादीनि यागदृव्यधारत्वेन अपराङ्गविकरण-संस्कारहारीव तानि यागदेशाधिकरणभेदाद्भिद्यते कर्त्तारस्तु क्रियानिर्हर्त्तयोपकुर्वन्ति तेन ते देशभेदेऽपि सति प्राक्-तोपकारि प्रत्यभिज्ञानत्वेन क्रियानिर्हर्त्तिं प्रकुर्वन्ति कर्तुं-मिति । न भिद्यन्ते कः पुनः प्राकृत उपकारः ? इति । होता तावद्यतो गार्हपत्यस्य पश्चादाहवनीयादवस्थितो याज्यानुवाक्यावचनेन संबोधयन् यागस्य कर्त्तेत्युच्यते प्रकरोति तद्देशावस्थित एव सामीप्यात् तस्मैव क्रमप्राप्तं यागं कुर्वाणमध्वर्यु यत् प्रतिप्रस्थातारमपि सम्बोधयितुमित्यतो न भिद्यते । तथाग्नीध्रः समानत्वादुत्तरदेशस्थ, तत्रावस्थित एव पत्नीसंयाजयोर्होतारमनुमन्त्रयितुम् । अतोऽत्रापि न भिद्यते । तथा ब्रह्मा दक्षिणतोऽवस्थित उभयोरारभ-

नीवयोः समानत्वादेवम्। न च यज्ञोत्तरत्व दक्षिणः स एव दक्षिणत्व दक्षिण इति तयोर्भिन्नः अतोऽतिमत्वभेदेन नानुष्ठानभेदेन च यज्ञोभयभावपि भवितुम्। अतस्तस्याभेदः। अन्यत्र प्रतिप्रस्थादीनां यजनाद्भेदः उक्त एवेत्यदोषः तस्मात् कर्तृसंस्तरैर्भवितव्यम्।

लिङ्दर्शनाच्च ॥ ४४ ॥ (वै०)

लिङ् चैतमर्थं दर्शयति। प्रवयसयजमं दक्षिणां ददातीति दक्षिणेत्यमाह। तदेवमर्थुत्वे नोपपद्यते। यस्मच दक्षिणाभावात्र याजयेयुः। मन्त्रवाह्मणेन याजयिष्यन्ति। न चायते ब्राह्मणार्थः कर्मण इति विप्रेषायवचादुभयकर्मणः। उपादेयत्वेन चोदितत्वेनैक्यं विज्ञायितम् तस्मात् दक्षिणैक्यम्। तथा च तत्र कर्तारः।

वैदिसंयोगादिति चेत् ॥ ४५ ॥ (पा०)

अथोच्येत वैदिसंयोगो हेतुः यूयते यजमैक्यम्। यादोपोतुर्भवति दक्षिणैक्यम इति एवच हेतुःयाद् उभयलोपकर्तृमसमर्थत्वात् कर्तृभेदः।

न देशमात्रत्वात् ॥ ४६ ॥ (पा०नि०)

नैतदेवं यस्मात् देशमात्रत्वात् नाम हेतुः यादो वैदेपचारार्थत्वे नोदक्षिणाते क्रियते देशमात्रमेतद्विधीयते तस्मिन्ने होता ब्राह्मणं वृणीते यादोत्तरैर्हि भवति दक्षिणैक्यम इति। शेषः।

एकवाक्यत्वात् ॥ ४७ ॥ (उ०)

एकमिदं वाक्यं युक्तं सन्निध्युपग्रहात् एकार्थत्वाच्च यदि च धातुः पादोवेत्यङ्गत्वे नोपदिश्येत एकस्मिन्वैदिनिहिते श्रुतेः श्रुत्यर्थं इति द्वितीयस्यानियमः स्यात्। सोऽपि विधातव्यो यद्विर्वैदेत्यन्य इति। कथं पुनरेकोऽन्यवैदीत्युक्ते द्वितीयोऽपि तत्र प्रसज्येत अप्रतिषिद्धत्वात्। यदि ह्यौरन्यवैदेत्युच्यत प्राप्तिः स्यात्त एकस्य वचनं द्वितीयनिवृत्त्यर्थं न चास्ति प्राप्तिः तस्मादस्ति प्रसङ्गः तथा च वाक्यभेदः। अथ तु देशविभेदविधानार्थमेतत्तत्तस्यादेताभ्यामुभाभ्यां सम्भूय क्रियत इत्येकार्थत्वादेकवाक्यत्वमुपपद्यं तस्माच्च हेतुं पादो वैदेरयकारकः नोभयत्र विधेयः।

अपराग्नितन्त्रताभावाधिकरणम्।

एकाग्नित्वादपरेषु तन्त्रं स्यात् ॥ ४८ ॥ (पू०)

इदमपरं तत्रैव चिन्त्यते किमापराग्निका दोमाश्चान्त्यौ उत भेदेनेति। किं प्राप्तं तत्रभिति कुतः एकाग्नित्वात् दोर्भिन्नाग्नामग्निभेदात् भेदं उक्तः इह च हेतुरिति एकाग्नित्वादितिना तस्माद्रैते तन्त्रं भवेयुः।

नाना वा कर्तृभेदात् ॥ ४९ ॥ (सि०)

नाना भवेयुः। कुतः कर्तृभेदात्। प्राधान्या वाक्य-

ज्ञानि तानि प्रतिप्रस्थातुः कर्माणि इतरस्यानर्थक्यात्। तत्र भावेऽन्यतरेषां कर्तृकर्तं वैगुण्यं स्यात्। तस्माद्भेदः।

पर्य्यग्निकृतीष्ट्यधिकरणम्।

पर्य्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः। श्रुतिसामान्यादारण्यवत्तस्माद्ब्रह्मसाक्षि चोदनापृथक्त्वं स्यात् ॥ ५० ॥ (पू०)

वाजपेये प्राजापत्यान् पशून् प्रकृत्य श्रूयते तान् पर्य्यग्निकृतानुत्सृजन्ति ब्रह्मसाक्षा वमन्त इति तत्र विचार्य्यते तान् पर्य्यग्निकृतानुत्सृजन्तीति किमयं 'कर्मशेषप्रतिषेधो ब्रह्मसाक्षा वमत इति कर्मान्तरचोदना। अथ वा पूर्वः पर्य्यग्निकरणात् परेषां संस्काराणां प्रतिषेधार्थः स्वरस्य तेषामेव कालान्तरे प्रतिप्रसवार्थ इति। किं प्राप्तम्? कर्मोत्सर्गः, कर्मशेषप्रतिषेध इत्यर्थः श्रुतिसामान्यादारण्यवत् यथा 'पर्य्यग्निकृतानारण्यानुत्सृजन्तीत्ययं कर्मशेषप्रतिषेध इत्युक्तं शेषप्रतिषेधो वार्त्राघ्नावादिकान्तवदिति तथा श्रुत्वा तुल्येयं श्रुतिः। किमनयोरुक्तं तत्र कर्माणि चोदितानि यजमानस्य ऋत्विजामाज्यभेद इति। तेषु कर्मसु प्राजापत्यानां प्राप्तिः। तेषु प्राप्तेषु पर्य्यग्निकरणात् पूर्वकालं पुनः श्रुतं पर्य्यग्निकृतानुत्सृजन्तीति निर्दुष्टं पुनर्वचनमितरपरिसंख्यायकं भवतीति कर्म-

शेषस्य प्रतिषेधे सति ब्रह्मसाक्षात्कारः प्रयोजनमिति चोदितानां कर्मणां तस्मिन्नेव सर्वस्मिन् प्राप्तेषु दृष्टे पर्यग्निकरणात्मनः शुश्रूषाकरस्य निर्वृत्तं पुनर्दृष्टं कर्मशेषस्य निवर्त्तकं ब्रह्मसाक्षात्कारं तत्कामयते ब्रह्मसाक्षात् कामयत इति कर्मान्तरचोदना स्यात् पूर्वोपेक्षया ब्रह्मसाक्षात् कामयते सत्रदृश प्राजापत्यानिति।

संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् ॥ ५१ ॥ (सि०)

न वा कर्मशेषप्रतिषेध इति किं तर्हि संस्काराणां प्राप्तावसराणाम् तस्मादवसरात् प्रतिषिद्धब्रह्मसाक्षि प्रति प्रसवः। किं कारणम्?।

वाक्यैकत्वे क्रतुसामान्यात् ॥ ५२ ॥ (वि०)

एकस्मिन् वाक्ये तान् पर्यग्निकृतानुपजनयन्ति ब्रह्मसाक्षात् कामयत इति। कथं ज्ञायते? आत्मेत्यत इति दृष्टदेवतसम्बन्धात्। समाने च भवति वाक्यैकत्वं भवति। तथा हि केवल आत्मेति ब्रह्मणो दृष्टदेवतसम्बन्धात्। अथ वाक्यभेदः स्यात्। ततः पूर्वेण कर्मशेषः प्रतिषिद्धेन परेण कर्मान्तरं चोदितं सत् दृष्टदेवतं ब्रह्मसाक्षात्। अथ पूर्वान्ते यजेतेति। तत्रापेक्षितं सत् ब्रह्मसाक्षात्कारादिकं न यजेत। तस्मादेकं वाक्यं नञ्योगविज्ञानेन ज्ञातो पूर्वेण संस्काराः प्रतिषिद्धयन्ते परेण विधीयन्ते इति। कर्मशेषादात्मनेप इति एवं भवति। न हि ब्रह्मसाक्षात् कामयत्वेन कर्मशेष

पत्नीभिरनुष्ठानम् अस्तीति चेत् न, अविशेषात् । समानमूषाखण्डः वैतत् प्रयुङ्क्तेऽग्नीति चाग्नि अनुधानमात्रे दर्शनात् ।

वपानां चानभिधारकत्वं दर्शनात् ॥ ५२ ॥ (सु०)

यद्यपि एतर्हि वपा अदहनभिघृता अग्नौ वै ब्रह्मसाम यद्ब्रह्मसाम्नाऽभ्यते तेनाऽसंस्कारेणाभिघृता इति यदि संस्कारप्रतिषेधः ततो बुद्धाः श्रवणीयप्रधानेषु चिरत्वात् प्रधानवेषो नास्ति तद्भावादनभिघृतत्वं बुध्यते । अथ कर्मप्रतिषेधस्ततो ब्रह्मसाम्नाऽभ्यः कर्मान्तरे तत्र प्रधानाः पुनरिष्यन्ते तेषां वेषोऽस्ति तेनाभिधारकं स्यात् अनभिधारकत्वदर्शनं नोपपद्येत । तस्मादपि संस्कारप्रतिषेधः ।

पशुधारणीवेषविचारः ।

अस्ति पशुधारणीवेषोऽग्नीषोमाद्यतीः पशुधारणीवो यः कामयेत बहु स्यामिति स एतेन यजेतेति तत्र श्रुते वैगुण्यात्प्रधानावाप्तावां सप्तदश मानवीभिर्यजेत पशवो वपाकरोतीति सप्तदश प्रकृतिवत्त्वात् पर्यग्नि कृतान् प्रोक्षणेनाभिघारा आलभन्ते नेतरानुत्सृजन्तीति ततः संस्कारे सतीह आलभ्यान् सर्वेषोऽवत्त्वात् पर्यग्निकृतानभिघारा आलभन्ते नेतरानुत्सृजन्तीति तत्र वेष विद्या विनियुक्तानुवादं चारभ्यमानं कर्मवेषप्रतिषेधः । अथवा सामान्यतया संस्कारप्रतिषेधः तेषां च पुनरग्न प्रतिपत्तेः वेषोऽस्ति अनेनाभिघारकत्वमाश्रयते प्रधानत्वादिति । यदि कर्मवेषप्रतिषेधः प्रतिपत्तिकर्म अभावः अथ संस्कारप्रतिषेधः सामान्यं यत्र पशुधर्मानुषज्यन्ते पुनः

पुनः संस्कृत्यते अध्याहृत्याम्नायत इति किं तत्र प्राप्तम् ? ।

पञ्चग्रामदीक्षास्वेति चेत् ॥ ५४ ॥ (पू०)

इति चेत् पञ्चसु अयं पञ्च ग्रामदीक्षा इति । पञ्च ग्रामदीक्षासु यथानन्तराः । प्राजापत्यसंस्कारप्रतिषेध इत्यर्थः । एवं प्रकृतप्रत्ययो भवति स एवमनुग्रहीष्यते । इतरथा प्रकृतज्ञानमप्रकृतेप्रत्ययश्च भवेत् । एवञ्जातीयो ऽत्र इत्यपेक्षावचनं युक्तं भविष्यतीति । प्रकृतविज्ञविधानं च यदि कूटः साधो वा भवेत् वाङ्मात्रं चयं निर्वपेत् । यदि प्रापरीक्षाव्यं चयं, अथवधीदेवं हतं चयमिति निवधानानीतानि निमित्तान्युत्पद्येरन् । तस्मात् संस्कारप्रतिषेधः ।

न चोदनैकवाक्यत्वात् ॥ ५५ ॥ (सि०)

नेतदेवं संस्कारप्रतिषेध इति । कथं तर्हि अर्थप्रेम-प्रतिषेधः । कुतः ? । चोदनैकवाक्यत्वात् । उत्तरस्य माधवीः इत्तीयपाक्षरीतीति- अत्रैचोदनेवा इत्यनेनैतस्य सम्बन्धात् । तत्रैकवाक्यतेतत् । उत्तरस्य इत्तीयस्य इति । कथं प्राप्यते ? उत्तरस्य इत्तीयस्य इत्येतावदपरिमाणं सम्पूर्णविधया परिसमाप्यते माधवीमाधवस्य इति । एवं सत्यनुग्रहोऽयं भवति । तत्र च उत्तरस्य माधवीः इत्तीयस्य चोदनैकवाक्यत्वादिति । यदि, अथवधीदेवी मतीयी तमिति-यद्वः । अथवं तत्र, तत्र एकवाक्यत्वात् इदं तत्र नैवमे-

[illegible] यत्तदङ्गं तत्तदङ्गं प्रति [illegible] यावद्-भावम्, तत्रोपसदो [illegible] च [illegible] च [illegible]। समदम्य च [illegible] इति चार्थो न लक्ष्यः प्रकरणादेव गम्येत। तत्प्रकरणेऽनेन [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]

दशपेयाधिकरणम्।

राजसूयेऽभिषेचनीयदशपेयावेकाङ्गौ। [तत्र] चिन्त्यते किं तयोस्तन्त्रप्रयोगः, अथ वा भेदेनेति। किं प्राप्तम्?।

दशपेये क्रयप्रतिकर्षात् प्रतिकर्षः ततः प्राङ्-न्यक्षमानं तन्त्रं स्यात् ॥ ५८ ॥ (पू०)

समानं तन्त्रमनयोः। कुतः?। दशपेयस्य क्रयः प्रतिक्रयते सह सोमं क्रीयात्यभिषेचनीय दशपेययोरिति। अभिषेचनीयस्य पूर्वकालीनत्वात् क्रयकाले दशपेयक्रयस्य प्रतिकर्षः। स प्रतिक्रयमाणस्तत: प्राग्भाविन: पदार्थान् प्रतिकर्षति। तदादि वाभिषव्यन्यातदन्तमपिकर्षे स्यादिति। अतस्तयोरेकाङ्गयोस्तन्त्रं क्रमः। तन्त्रक्रमान्तयोः प्रवृत्तिस्तन्त्रमेव समाप्तिर्वा। तस्मात् समानतन्त्रौ।

समानवचनं तद्वत् ॥ ५९ ॥ (पू० सि०)

समानौ वा एव यज्ञौ यदग्नेयवाभिषेचनीयश्चेति तन्त्रस्य समानत्वाद् यज्ञयोः समानत्वमाम्नानाभिन्नत्वात्।

अप्रतिकर्षौ वाऽर्थहेतुत्वात् ॥ ६० ॥ (सि०)

सहत्वं विधीयते। न वा प्रतिकर्षः क्रयस्य कुतः?। अर्थहेतुत्वात्। द्वाविमौ क्रयौ एकोऽर्थहेतुकः अन्यः शब्दहेतुकः। यत् प्राक् क्रतुप्रवृत्तेर्यज्ञसाधनोपार्जनकाले सोमविक्रयिणा सह संवादः सोमस्य परिक्रयणं मूल्यपरिच्छेदः

सोऽर्वादपवर्ग्यं कारयीत: । तस्मिन्नसति क्रतोरेव प्रवृत्तिर्न युक्ता । कुत: ? क्रतुप्रवृत्तौ यदि सोमो न स्यात् विक्रेता वास्य नार्पेच वा दद्यात् तथा क्रतुरेव न संवर्त्तेत तस्मादेतत् सङ्गत्वमुच्यते । किं कारणम् ? मुख्यत्वात् तत्रैव च क्रयो निर्वृत्तकल्पो मूल्यार्पणमात्रं परिशिष्टम् । यदन्यत् तत्र कथ्यते क्रीत्वामीत्येवमादि तदर्थमात्रं परतन्त्रत्वादेव विक्रेतु: एवं च सति भिन्नकालयोर्यथाकालमेवाङ्गानि भविष्यन्ति । दृष्टश्च तस्मिन्नुपसंवादे क्रयार्थे क्रीणाते: प्रयोगो देवदत्तेन सङ्गत्याभिधानं क्रीतं उपसंहृता इति । अतस्यास्य वाद: । स च बहि: क्रतोर्वर्त्तते । तस्मात्तास्ति प्रतिकर्ष: । कालभेदाद् यथोक्त एव तन्त्रभेद: ।

पूर्वस्मिंस्तावभृथस्य दर्शनात् ॥ ६१ ॥ (हे०)

पूर्वस्मिंस्ताभिषेचनीये अवभृथदर्शनं भवति । कथं समानं वा एतद्यज्ञं विच्छिन्दन्ति यदभिषेचनीयस्तावभृथमभ्यवयन्तीति तदेवमवभृथदर्शनं पूर्वस्मिन्नुपपद्येत यदि भेदेन तन्त्रप्रवृत्तिरितरथा दर्शपेयाग्नेोऽवभृथ: स्यात् । दीक्षायां चोत्तरस्य दर्शपेयस्य च पृथग्दीक्षायां दर्शनं तथाभिषेचनीयस्य दीक्षा वर्षेयुर्यथा दर्शमेऽह्नि दर्शपेय: सम्पद्यते सद्यो दीक्षयति सद्य: सोमं क्रीणातीति । इतरत्राभिषेचनीये य एव दर्शपेयस्यापि दीक्षा: स्यु: तत्रैव दर्शनं नोपपद्यते । यत्तु समानवचनं तदपि इति ब्रूम: ।

समान: कालसामान्यात् ॥ ६२ ॥ (पू०मी०सि०)

एकस्मिन् ऋतायेसो सोमे वर्तेते तत्र उत्तरे संयजनात् अर्धमेतत् कालसामान्यम् अपेक्ष्य तत्सामान्यवचनं नाम्नोपपद्यत इति । तस्मात्तद्भेदः ।

वरुणप्राघासेष्वधर्याधिकरणम् ।

वरुणप्राघासेषु श्रूयते बाह्वया निष्कासेन तुषैर्वाऽवभृथमभ्यवयन्तीति तत्र विचार्यते । किं प्रदानं विप्रकर्षोऽयमुत कर्मान्तरचोदनेति । किं प्राप्तम् ? ।

निष्कासस्याऽवभृथे तदेकदेशत्वात् पशुवत् प्रदानविप्रकर्षः स्यात् ॥ ६३ ॥ (पू०)

प्रदानविप्रकर्षोऽयम् । कुतः तदेकदेशत्वात् ? । वरुणं प्रत्याभिक्षीत्यत्वा मारुत्यामिक्षा बाह्वयाभिक्षेति । सा द्विधा प्रतीयमाना दृश्यते एकदेशोऽस्या आवापस्थाने, एकदेशः समिष्टयजुरूपेण उभयत्रापि वरुणदेवता तेन प्रदानविप्रकर्षो विज्ञायते पशुवद् यथा सवनीयस्य पशोर्वपया प्रातःसवने चरन्ति, पुरोडाशेन मध्यन्दिने अङ्गे, स्तृतीयसवन इति । अवभृथशब्द इदानीं किमर्थः मन्त्रानुवादमात्रं देवतासामान्यात् देवतासामान्याच्च । अथ धर्मातिदेशकोऽग्निहोत्रपदवदेव कस्मान्न भवति अयज्ञत्वात् । अनेनैव प्रदानविप्रकर्षोऽनेनैव धर्मातिदेश इत्यप्रयोजकत्व वाक्यस्य । प्रदानविप्रकर्षं कृत्वा श्रुतार्थस्य धर्मानतिदेष्टुं न शक्नोतीति ।

अपशयो वा प्रसिद्धे नाभिसंयोगात् ॥ ६४ ॥ (सि०)

न चायं प्रकाशनिमित्तकः किन्तर्हि क्रमवतो विज्ञा-
नस्य पूर्वक्षणैः क्रमोपनीतैः हि कारकं प्रक्षिप्यमा-
भिर्संयोगात्। प्रक्षिप्तेन त्वाद्यक्षणेनावस्थाप्यमानेन संयो-
गात् निष्क्रायेनावभृथमवयन्तीति। यत्तु माक्षोऽयमनुवाद-
मात्रमित्युक्तमनुवादः सत्यप्रवृत्तिव्यतिरेकेऽनर्थकः आदृतिदेश्यस्तु
अर्थवान्। ननु तत्रापि सत्यथा भवति। अस्तु सत्यथापि
हि प्रवृत्तिविशेषकरत्वादर्थवती। यथाऽग्नौ तिष्ठत्यवटे
तिष्ठति। अनेकार्थता तर्हि दोषो भवति। पूर्वकर्म-
चोदनायामसौ दोषः। अग्नेतस्यैव रैवतीषु वारवन्तीयम-
ग्निष्टोमसाम हत्वा यज्ञकामो ब्रह्मौदनं पचेदिति। कथं पुन-
रनेन अक्रियते अपूर्वं कर्म चोदयितुम्। उच्यते। वारव्या
निष्क्रायेन तुल्येनावभृथमपोऽभ्यवयन्तीति अयमेव नावभृथः
अक्रियतेऽभ्येतु तत्रैव विज्ञायते निष्क्रायेन तुल्येनाव-
भृथं कर्तुमपोऽभ्यवयन्तीति यथा घाटकं कर्तुं सूत्राणि
वयन्तीति सत्यथा यथा य एवं विद्वांसः यजमुपय-
न्तीति।

प्रतिपत्तिरिति चेन्न कर्मसंयोगात् ॥ ६२ ॥

(आ० नि०)

अक्रियमाणत्वान्निष्क्रायस्यावभृथगमनं प्रतिपत्तिर्भवे-
दिति। तन्न युक्तम्? कर्मसंयोगादर्थकर्मणा ह्यत्र
गुणभूतस्य संयोगो विज्ञायते तृतीयाश्रवणात्। प्रति-
पत्तौ हि मुख्यत्वात् द्वितीयया निरदेक्षेत। यथा

वाताङ्गे ऋक्त्विधाङ्गे प्राप्नतीति। अत्र वावशब्दश्चेन्नाम्नः कर्मणा संयोगात् तद्धि च प्रतिपत्तिः स्यात्तस्मादेवभूतशब्दोऽनर्थक एव भवेत्। अवश्यमेवभूतशब्दो धर्मनीतिदिग्येत्। न च प्रतिपत्तौ प्रधानकर्मणो धर्मो प्रकाशं प्रतिदेष्टुम् वैषम्यात् तथा हि वावशब्देन प्रतिपाद्यतीत्युक्तं स्यात्। न वावशब्देन किञ्चित् प्रतिपादितं यद्दीप्तिदिग्येत।

उद्यनीयाधिकरणम्।

उद्यनीये च तद्वत् ॥ ६६ ॥ (१पू०)

ज्योतिष्टोमे श्रूयते। प्रायणीयस्य निष्काद्ये उद्यनीयमनुनिर्वपतीति। तत्राप्यवश्यवक्तव्यनिष्कासो गुणतः स्यात्। तथापि क्षुद्यनीयशब्देन प्रधानकर्मणा संयोगो भवति। प्रायणीयस्य निष्काद्य उद्यनीयमनुनिर्वपतीति। न च श्रूयते उद्यनीयो निर्वपेत्मतस्तत्रेदापि सम्बन्धो विधीयते निष्कादो नोद्यनीयं कर्तुं क्वचिद्यं निर्वपतीति। वचनवया वा पूर्ववत्। अपि च द्वितीयासंयोगात् कर्मत्वः प्राधान्यं विज्ञायते निष्कादस्य सप्तमीयोगात् गुणभावः प्रतिपत्तौ तु कर्मगुणता स्यात् निष्कादप्रधानता। तत्र कर्मणि द्वितीयासम्बन्धः भवेत् निष्कादो द्वितीयासम्बन्धः ननु प्रधानभूतेऽपि सप्तमी भवति यथा आगारे गावो वासयन्तीं प्रावारे कुसुमानीति। भवति चैवमनाधान्तरेण द्रव्यं प्रधानं विदितम्। किन्तु तु शब्दस्य एवार्थस्तत्र गुण-

भावो युक्तः। यत्कारणं कारकविभक्तिनिमित्तम्। कारकं च क्रियार्थं भूतं भवत्, दृष्टार्थत्वे पुनर्भूतं अप्यर्थं भवति दृष्टार्थत्वात्। भवेच्च तु भूतार्थत्वे दृष्टार्थता कस्या स्यात् न तु दृष्टं अत्यद्भुतकल्पना सम्भवति।

प्रतिपत्तिर्वाऽकर्मसंयोगात् ॥ ६७ ॥ (२पू०)

प्रतिपत्तिर्वा उदयनीयः स्यात् निष्कायस्य न गुणभावः कुतः?। अकर्मसंयोगात्। नाम निष्कासम्बोदयनीयकर्मणा संयोगः। केन तर्हि निर्वापेण निष्काग्ने निर्वपतीति। ननु मुख्यत्वादुदयनीयस्येतेन सम्बन्धो न्याय्यः। न हि मुख्यसम्बन्धे साकाङ्क्षमेतद्भवति निष्काय उदयनीयं किं करोति तदावश्यं निर्वपतीत्यनेन परिसमापयितव्यम् उदयनीयं निर्वपतीति। न चोदयनीयस्य निर्वापेण सह सम्बन्धोऽस्तीत्युक्तम्। तदेतदवद्यं तवैवापद्यते। उदयनीयं कर्तुं प्रायणीयस्य निष्काग्ने हविष्यं निर्वपतीति। निष्कार्थः प्रायणीयेषः। निष्कायमुद्दिश्य प्रेषवचन एव यदुक्तार्थं सम्बन्धं तदनेनोच्यते। प्रेषस्य चार्थान्तरगमनं प्रतिपत्तिः। तच्च सामवायिकमङ्गं भवति तच्च प्रधानेन दृष्टसम्बन्धमारादुपकारकत्वेऽनुमेयसम्बन्धं सप्तमी च विभक्तिः प्राधान्ये न दृष्टा तस्मात् प्रतिपत्तिः। नन्वेवमपि कर्मान्तरचोदनावश्यत्वं प्राप्नोति। भवेदेवं न चोदितं कर्म भवेत् चोदितमुदयनीय आदित्यः प्रायणीयवत्कर्मत्वादित्य उदयनीयो दिवा यजामा इति यं वयं प्रायणीयनिष्काग्ने निर्वपेदिति तमेव प्रत्यायते। तस्मान्न कर्मान्तरचोदनीयम्।

पर्यग्निकर्म वा शेषत्वात्कर्तृसंयोगपृथक्त्वदर्शनं विधानात् ॥ ६८ ॥ (३।३।६)

पर्यग्निकर्म वा निष्काये निर्वापो न प्रतिषिध्यते। कुतः शेषत्वात्। निर्वापं प्रति शेषभूतो निष्कायः गुणभूत इत्यर्थः। कथं गम्यते तद्दर्शनं विधानात्। तद्दर्शनं शब्देन संज्ञया विभक्त्या विधानात्। अग्नौ हि विभक्तिराधारे भवति आधारश्च क्रियायास्तत्कारणानां च विशिष्टानां धारणे वर्त्तते। तस्मान्न पर्याग्निभूतः सन्नु निष्कायो धारणेऽसमर्थः। स्थाल्येव तत्र धारणं करोति। पात्रीवदेतदृष्टव्यम्। तद्यथा पात्र्योदनं धारयति पात्रीं भूमिः। न च पात्री नाधारः। तथैतत् स्यात् न दृष्टमुपकारं करोतीति। पात्र्यपि तथा। अपि च कविधा उदवनीयनिहत्या प्रयोजनवन्तो यदि निष्कायेन संस्क्रियन्ते निष्कायोऽपि प्रयोजनवान् भवति। अथ तु निष्कायः संस्क्रियते न च तेन कविदर्थः। न हि तेन किञ्चित् करिष्यते। नन्वु तेनापि प्रायणीयो निर्वर्त्तितः तदर्थस्यापि संस्कारोऽर्थवान् भविष्यति नैवमुपयुज्यमानसंस्कारो गरीयानुपयुक्तसंस्कारादपि च निष्कायसंस्कारोऽर्थं भवन् प्रायणीयस्यात् स्यात् तदादनीयस्यविधिर्वाध्येत। तस्मादुदनीयस्यविधानाय निष्कायसंस्कर्मेत्यादृष्टं उपकारः क्रियते अग्निवत्। तद्यथा पक्वेन मेषावयवेन श्रीणाति यागाग्निर्वैरोजनमिति अग्नेः सोमस्य। (निष्कायशब्दो दग्धस्थोऽपि)।

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये एकादशाध्यायस्य द्वितीयः पादः ॥

अथ एकादशाधिकरणस्य प्रतीकः पादः ।

विधानानां प्रधानकालविधेयकालत्वाविशेषस्य ।

अङ्गानां मुख्यकालत्वाद्वचनादनाकालत्वम् ॥ १ ॥ (पू० सि०)

अङ्गानां मुख्यकालत्वं मुख्यदेशत्वं मुख्यकर्तृत्वं चोक्तम् । अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन् तस्मात् स्यादेकदेशत्वमिति एवं च सर्वत्र प्राप्तम् । वचनादन्यकालत्वं यत्र वचनं तत्राप्यकालत्वमन्यदेशत्वमन्यकर्तृत्वमपि भवति । यथा पूर्वेद्युरमावास्यां वेदिं करोति अपूपभृतेन चरन्ति । अन्यो दीक्षामन्त्रां दधिघानेदादन्यकर्तृत्वं विज्ञायते वत्सा दधिषेति ।

आधानादेरन्यतोविधेयम् ।

द्रव्यस्य कर्मकालनिमित्तैः प्रयोगः सर्वार्थः स्यात् स्वकालत्वात् ॥ २ ॥ (पू० सि०)

वचनेन ब्राह्मणोऽग्निमादधीत दीक्षे दाक्षायः अवदि वेश इति श्रूयते पशवश्च । तत्रार्थेऽग्निमुपसमः किं आरब्धसंस्कारत्वात् । आहवनीये जुहोति दार्शपूर्णमासे दर्वीमि चपतति दधिघानामावास्यार्थमवदाति करोतीति तेषामन्यतो कर्मसु प्रयोगः । तत्र विचार्यते

किं तस्य कर्मणोऽर्थेन प्रेदेभावाद्नं कर्तव्यमथ वा सर्वेषा-मेष्टिकपाशुकसौमिकदार्विहोमिकानां कर्मणां तत्प्र-मिति। किं प्राप्तम्? द्रव्यसाधनोरसर्जनावविशेषः वक्ष्यते पीथे मरदीति प्रयोजः। आधानं सर्वार्थं स्यात्। कुतः?। अकालत्वात् खोऽस्य कालो वसन्तादिः न अक्ष-चित् कर्मणः कालं श्रूयते। तत्र न श्रूयते विशेषोऽस्मै कर्मण इदमाधानमिति नाऽऽ इत्यश्रुतमाश्रविशेष-त्वाच्च तत्प्रभावोन्याय्यः। नन्वाधानानन्तरं यस्य कर्मणः प्रयोगस्तदर्थं तदाधानमिति इति श्रूयते विशेषः सत्यम् श्रूयते विशेषः किन्तु आनन्तर्यमकारणम्। यदापि सर्वार्थं तदाग्नेयत्वं कस्मिंश्चित् कर्मणः पूर्वप्रयोगो यौग पद्यासम्भवात्तदेकेनानन्तर्ये सति हेतुः सर्वार्थत्वे च एकार्थत्वे च समत्वादहेतुर्भवति न वाऽऽधानेन क्रमोऽनुप-क्रम्यते यथा प्रयाजेन। यद्युपक्रम्येरन् ततो यदनन्तरं कर्म तस्योपक्रमो विज्ञायेत नोत्तरेषां तेन श्रवहितत्वात्त-दपवर्गे वापदृश्येत प्रयाजवत्। न ह्यनेन किञ्चित् कर्म प्रक्रम्यते अप्रयोक्तृत्वात्। अत उत्तरकाला हि कर्म श्रुतयः किन्तर्हि अनेन क्रियते द्रव्यमन्त्रैऽस्मिन्विशेषः। यथा कश्चिद्धोतृ श्रुवं बार्हतेदनेन स्वाधीनेन यथोपपदं कर्म करिष्यामीति। स तेन यथाकालमिष्टं दार्शादि करोति। एवमयमग्निर्विशेषमर्हति अनेन स्वाधीनेन यथोपपदं कर्म करिष्यामीति। तत्र न श्रूयते विशेषोऽस्मै कर्मण इदमर्थितम् अस्मैनेति। सर्वेभ्यश्च युक्यते। तस्मात् सर्वार्थम्। अपि च नित्यकाम्यनैमित्तिकानि कर्माणि

यथोपपत्तिकालानि। तेषां यज्ञानां आहितेनाग्निना कार्यत्वम्। न चाग्न्यग्निमतो यज्ञो यज्ञस्तेऽग्निरावातुम्। सोऽयमसंयोगी भवति भेदेनाधाने। अथ तु सर्वकर्मणामर्थे तत्समाधानं नैव निरीक्षो भवति। तस्मादपि तन्नम्।

अग्नीषोमीयादिपशौ यूपतन्त्राधिकरणम्।

यूपस्याकर्मकालत्वात् ॥ ३ ॥ (पू० सि०)

ज्योतिष्टोमे पशवः अग्नीषोमीयसवनीयानुबन्ध्यास्तेषां यूपः खादिरे बध्नाति पालाशे बध्नाति रौहितके बध्नातीति श्रुतेः। तत्र विचार्यते किं सर्वेषां यज्ञवन्तानां भेदेन यूपः अथ वा तन्त्रमिति। किं प्राप्तम्? भेदेनेति किं कारणम्? अग्नीषोमीये तावत् प्रयोगवचनेन गृह्यते यूपः। उत्तरयोरपि चोदकेन प्राप्यते। कर्मशेषावसायिनः चोदकप्रयोगवचनाद्भेदेन यूपं प्रापयति। तस्माद्भेदः एवं प्राप्ते उच्यते यूपस्तन्त्रं भवेत्। अकर्मकालत्वात्। नास्य पशुकर्मकालः उत्पत्तिः। किं तर्हि? इष्टयाज्ये दीक्षासु यूपं छिनत्ति क्रीते वा राजनीति। तत्रोत्पद्यमानस्य न गृह्यते विशेषोऽयं पशुबन्धाय यूपोऽयमस्मै नेति। सर्वेभ्यः प्रयुज्यते। तस्मात् तन्त्रं भवति।

एकयूपं च दर्शयति ॥ ४ ॥ (सि०)

एवं सर्वं यज्ञकालमपि पशूनां साधारणं दर्शयति

मवनीये यथो चिह्नता यूपं परिधीयेति चिह्नता परिधानं विदधाति। यदि नामायूपा अभेष्यन्तः पूर्वस्य यूपस्यापवर्गायूपान्तरे चोदनैवेव प्राप्ते चिह्नता परिधानं न विधातव्यं भवेत्। अथ तत्र यूपे ततः संस्कारा अपि तत्रमित्यग्नीषोमीय एव परिवीतस्य कृतार्थत्वात् पुनः मवनीयपरिधानं न प्राप्नोति तद्विधातव्यं भवति। विधीयते च तस्मादपि तत्रम्।

यूपसंस्कारतन्त्रताधिकरणम्।

संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ॥ ५ ॥ (पू०)

यूपसंस्कारा ये पशु तन्त्रमध्ये क्रियन्ते यथा प्रोक्षण-मन्त्रनसुक्षरणं परिधानं च तेषु विद्यते। किं तस्य तस्य पशोर्भेदेन कर्तव्या अथ वा तन्त्रमिति किं प्राप्तम्? संस्कारास्त्वावर्तेरन् यूपस्य न तथा यूपाख्यत्वं यथा स्युः। किं कारणम्। अर्थकालत्वात्। अर्थः पशोर्नियोजनं तत्कालाः एते संस्काराः तच्च घटते विशेषः यस्य पशोर्नि-योजनकाले कृतास्तदर्था इति। इतरयोश्च पशोरप्राप्त-कालत्वात्तदर्थेन नास्ति प्रयोगः तस्मादावर्तेरन् यथाग्नेः संमार्जनम्।

तत्कालस्तु यूपधर्मत्वात्तस्य धर्मविधानात् सर्वार्थानां च वचनादनाकालत्वम् ॥ ६ ॥ (सि०)

सत्यमावर्तेरन् यद्येते नियोजनकाला भवेयुः तस्मा-

स्कन्दते दीक्षाकालाः। यज्ञ आयती? यूपधर्मत्वात्। नेत्। निर्वीजत्वात्। यूपवते। स्त्रियां यूपी निर्वीजनाथः। स च दीक्षासु कर्तव्यः दीक्षासु यूपं छिनत्तीति वचनात्। संस्कारैव स म्रियते। तस्माद्दीक्षाकालाः एवैते संस्काराः। न छेदनमात्रं तत्र यूपस्य यूयते। न यूपक्रिया उच्यते। न किञ्चिद्दृश्यं यूपाख्यमस्ति यस्य छेदनमुच्येत। तदेतदेवं ज्ञायते। दीक्षासु छेदनाभियूपं करोतीति। छेदग्रहणं च मुख्यत्वात् प्रदर्शनार्थं वत्कारणं नासौ छेदनेन विनेन यूपो भवतीति। एवं चेहीक्षाकाला एवैते संस्काराः। सर्वार्थानां वक्ष्यतां वचनात् केषाञ्चिदन्यकालत्वं ज्ञातं यथाग्निमारुतादृश्यमनुवाजेश्वरमीति। तस्माद्यूपधर्मा संस्कारा अपि तत्त्वम्। यूपधर्मत्वादित्यस्यापराख्या। यूपधर्मं तथा एते संस्काराः छेदनाद्याः। यूपोऽयमेवं क्रियते तक्षणादिव्यापारैश्च। अश्वो वाजपेयेन सत्राट् इत्यत्र क्रतवेतस्य पुनः क्रिया निरर्थिका। तस्माद्दीक्षासंस्कारा नत्वेवं सति निरूढपशावपि वाक्यं स एव यूपः कर्तव्यो भवेत्। वाढं भवेयदि निर्दिष्टेन वाक्यप्रतिषेधो न स्यात् यष्टि तु स प्रतिषेधः। तस्मान्न भवति। यथा न शैरेव दर्भैः प्रयोजनान्तरमपि क्रियते। अथ वा यदर्थं स यूपः क्रतुसंस्कारपक्षे तत्रापवर्गे यूपोऽप्यपवृक्तः।

सङ्ख्यानं च दर्शयति ॥ ७ ॥ (दे०)

त्रिवृता यूपं परिवीय सवनीयं पशुमुपाकरोति इति परिव्याप्तेन यूपधर्मानुक्रममाहः सङ्ख्यातं ज्ञातं यूपं

दर्शयति । इतरथा मुख्यत्वात् नाङ्गेषूपसंहारः । आमनन्तीत्यर्थमिति चेत् । न प्रयोजनतः विशेषात् । तस्मादपि तन्त्रं संस्कारात् ।

अवयवताविचारणम् ।

यद्धि खलु यूपस्य खदं (शूकलम्) करोतीति श्रुतः स किं सर्वयज्ञानां तन्त्रं भेदेन वेति किं प्राप्तम् ?

खरुस्तत्कालापवर्गः स्यादङ्गकालत्वात् ॥ ८ ॥ (पू०)

खदः खलु तत्र तत्र उपक्षीयते अङ्गकालत्वात् नास्य कालः श्रुत्यादिः । अङ्गकालेऽवघातीयते अवघातविधिना वा पशुं समवद्यतीति । अस्य पशोः समवद्यनकाल उपात्तखदसंस्कारविनियुक्तखदेन विशेषः । तस्मात् भेदः । ननु यूपस्य खदं करोतीति खकारोत्पत्तिः । न खदेनोपक्षयः प्रयोजनम् । अपि च कार्यवचनोऽयं खदयन्तः खदं करोति खदकार्यं करोति । खदकार्यं खरुर्न ज्ञायते खदकार्यं तु ज्ञायते पशोरवद्यनम् । ननु क्रत्वन्ते खरोः प्रतिपत्तिर्दृश्यते संस्थिते वामि प्रस्थरं प्रहरति खदं वा अत्रैवमवायेति । सत्यमस्ति दर्शनम् तत्तु खदमात्रस्य । न तु खदविशेषस्य । तथाऽपीतीवीयं उपात्तस्य तन्त्रतया प्रकृतस्य दर्शनम् वीप्सायां ज्ञात् । अथ वा नीवकमात्रसंस्कारानुरूपसंस्कारयोगेति संशये किं न्याय्यं खदनुरूपसंस्कारस्य खरोर्न भवेत् तन्त्रतया प्रकृतस्येति । श्रुतः । यत्र खलु न्यायः खरुस्तत्कालापवर्गः ।

स्यात् अप्रत्यायकत्वादिति। न च दर्शनं नैवंजं साधनं भवति। यथाश्रवणे तु दर्शनं ज्ञापकं भवेत् यथा प्रदीपस्यानुपलब्धावपि दर्शनं तस्य सद्भावे भवति।

साधारणे वानुनिष्पत्तिस्तस्य साधारणत्वात्॥ ८॥ (सि०)

नैतदस्ति प्रतितन्त्रं खल्वेते इति। किं तर्हि साधारणः स्यात्। कुतः? यतोऽयमनुनिष्पद्यते यूपः साधारणः सर्वयूपानां तस्य साधारणत्वात् अयमपि साधारण एव स्यात्। यद्येवं एव यूपः सर्वयूपानां साधारणः एवमयज्ञक्रतुमात्रविशेषत्वात् साधारणो भविष्यति नैतद् युक्तम्। यज्ञप्रकर्षवचनादयज्ञक्रतुमात्रविशेषत्वात् यूपस्य साधारणमुपपद्यते न तु स्रुचः प्रति यैः किञ्चन वचनमस्ति यता यज्ञक्रतुमात्रविशेषत्वादस्यापि साधारणमुपपद्येत। यदेतत् यूपस्य स्रुवं करोतीति तदस्तःप्रयोगसम्बद्धं स्रुवकार्यमस्रुचं कर्तुं यमुपादत्ते तं यूपादिति। न चान्यस्य साधारणं युक्तम्। सम्भवति ह्येवमपि बहवः प्रकल्पा इति। चोदकप्रयोगवचनाच्च विद्यमानस्य यज्ञःप्रयोगसम्बद्धमङ्गमात्रीयं प्रतितन्त्रं प्राप्नवन्ति यज्ञक्रतुमात्रविशेषादिति। नैतद् एवं युक्त इति। तत्रोच्यते। प्रकरणस्य नास्ति प्रतिकर्मैवचनं प्रत्यक्षम्। न चान्यस्मिन् प्रतिज्ञायमाने ऽन्यस्य प्रतिकर्म इति। नैतद्युक्तम् अप्रत्यक्षयोर्हि तटैव भवति न सम्बन्धयोः। अयं च प्रकल्पो

यूपमनुनिष्पद्यते तदस्य यूपप्रतिसर्वादेव सिद्धः प्रतिसर्वः । अतो यत्र यूपस्तत्रायमपि । यत्रं यूपस्य खदं करोतीत्यतः-प्रयोगसम्बन्धा श्रुतिरिति । तदपि नेवम् । द्वौ हि कालौ दृश्यस्य एकः उपादानकालः एव उपादानस्य प्रयोगकालः । यद्धि उपादातव्यं न हि तदनुपादाय क्वचित् प्रयोगमारभते । न ह्यनुपादाय व्रीहीन् प्रलुत्य प्रयोगं व्रीहीन् यजति एवं कुर्वाणस्य प्रयोग एव न संवर्त्तेत । अयं च यूपं क्रियमाणमनुनिष्पद्यते । अतो यत्र छेदनं तत्रायमपि । यद्यप्येकस्यापि यूपस्य बहवः खरवः सम्भवन्तीति । आदेयं यदि प्राधान्यविशिष्टस्य नोपादानं भवेत् विशिष्टं तूपादानमुक्तं ततो यः प्रथमः प्रक्षरः परापतेत् स खरः आर्ष्टि इति वचनादृक्षणां च प्राधान्याभावाद् बहवो न सम्भवन्ति । तस्मादेक एव साधारणः खरुरिति ।

सीमान्ते च प्रतिपत्तिदर्शनात् ॥ १० ॥ (पू०)

सीमान्ते चास्य प्रतिपत्तिर्दृश्यते । संक्षिप्ते सीमिऽन्यो प्रस्तरं प्रहरति खदं वा यत्रवेशस्यायेति । तस्माधारण्य एवोपपद्यते । तस्मात्पर्वणि ऋग्वीयोमीयाग्न एव स्यात् । तस्मादपि साधारणः । तस्मात्तो वा प्रस्तरवदिति यद्युक्तं तत्परिहर्त्तव्यम् ।

न चोत्पत्तिवाक्यत्वात् प्रदेशात् प्रस्तरे तथा ॥ ११ ॥ (पू० आ० नि०)

नास्य नूनं दर्शपूर्णमासस्य खरोः प्रहरणम् । किं

कारणम् ?। इदमेव प्रहरणस्योत्पत्तिवाक्यम्। सोमाग्ने प्रस्तरं प्रहरति अग्नेः वा अग्नेयभागवैश्वे। अनेन क्रमादग्नीषोमीयस्यानन्तरं प्रहरणं श्रूयते। स यदि साधारणं स्यात्, अग्नेयशूनां क्रतावङ्गभूते अग्नौ अग्नेयात्तरो प्रहरणस्य दर्शनमुपपद्यते। अथ तु पृथक् स्वाम्नातोऽग्नीषोमीयस्यान्त एव इष्येत। अथ वचनमिदं कस्मात् भवति ?। अग्नीषोमीयान्ते प्राप्तस्य सोमान्ते वचनात्। नैतदेवं वचनेन ह्यावृत्तधर्मस्य विशेषावुच्येयातां अग्नौ च प्रहरणं सोमान्ते च तथा च वाक्यभेदः स्यात्। तस्मादेतदवनं यत्तु प्रस्तरवदिति। प्रदेशात् प्रस्तरे तथा। प्रस्तरस्य दर्शपूर्णमासयोः अग्नेयसौम्ययोर्भिः प्रस्तरं प्रहरतीति। चोदकेन प्रतिषिद्धः प्राप्यते। तस्मादुभयाभावात्तस्य दर्शनं युज्यते न स्वप्रहरणस्येतदस्ति। तस्मादिमयोरङ्गयोरुपधाथः।

अथ विधाप्राप्तस्यापि विकल्पः

ज्योतिष्टोमे दीक्षितव्रतमारभते अग्नेर्विधाय कण्डूयतीति। तत्रैव च पुनः श्रुतं नीतासु चात्वाले अग्नेर्विधां प्राप्नोतीति। तदुभयं हादशाहे दीक्षणेन प्राप्तम्। तत्र विचार्यते। किमस्ति प्रथमे वाहनि अग्नेर्विधायाः प्राप्तं कर्तव्यम् अथ वास्य एवेति। किं प्राप्तम् ?

अहर्गणे विधायाप्राप्तं धर्मविप्रतिषेधाद्वा प्रथमे वाहनि विकल्पः स्यात् ॥२२॥ (२पू०)

विकल्पः कर्तव्यः। कस्मै प्रथमे वाहनि प्राप्तं श्रुतः ?

धर्मविप्रतिषेधात्। यदि प्रथमेऽपि क्रियते। उत्तरेऽपि प्राग्दिशीयानयनादूर्ध्वं ये पदार्थास्तेषां विषाणाकण्डूयनं धर्मो बाधते। अथान्ते ततः पूर्वेषामर्थाय दक्षिणानयनादूर्ध्वं ये पदार्थास्तेषां दक्षकण्डूयनं बाधेत स एष धर्मविप्रतिषेधः। तस्मादिकल्पः।

पाणेस्त्वश्रुतिभूतत्वादविषाणानियमः स्यात् प्रातःसवनमध्यत्वाच्छिष्टे चाभिप्रहृतत्वात् ॥ १३ ॥ (२ यू०)

नैतदेवं स्यादिकल्प इति किं तर्हि विषाणानियमः स्यात्। विषाणाकण्डूयनं सर्वस्मिन्कर्मणि नियम्येत। अन्तेऽपि प्राशनं स्यात्। कस्मात्। प्रातःसवन मध्यत्वात् यद्यपि प्रातःसवनान्त्यत्वात्कर्मणश्च मध्ये। तेषां विषाणाकण्डूयनं धर्मोऽनुष्ठीतो भविष्यति। मध्यितरयोः सवनयोर्दक्षकण्डूयनं धर्मः स बाधिष्यते नैतदेवः। नैवं श्रूयते पाणिना कण्डूयितव्यमिति। अर्थात् प्रत्यासत्त्या क्रियते। यथार्थादेवो न स चोदनार्थः। एवमध्वरयोः प्रत्यासत्त्या दक्ष एव प्राग्नीतीत्यत्र ब्रूमः।

शिष्टे चाभिप्रहृतत्वात् ॥ १४ ॥ (सि०)

प्रातःसवनशेषे कण्डूयनस्य शिष्टत्वादुत्तरयोरपि विषाणाकण्डूयनमेव नियम्येत अभिप्रहृतत्वात् अभिप्रहृतस्य नियमश्लोकार्थे आचारविरोधः स्यात्। अत्र

प्रकृतौ क्रयसम्बन्धः विधायाया अभावात्। अन्या विधाया अन्यात् कर्मफलार्थेन नोत्पद्यते। पूर्वविधायाः प्राप्तत्वं धारयत्, तस्मिन्नर्थे इष्टं तद् यस्मात् विधाया आनीयेत तस्मात् धारणसङ्कल्पार्थं तस्या अदृष्टोर्थः क्रयविधेयः स्यात्। इह तूत्तरभावित्वेन धारयितव्या विधाया तस्यां सत्यां नास्ति नियमोत्सर्गे कारणम्। तस्मादाद्यस्याङ्गः दक्षिणानयनकालादूर्ध्वं विधाक्रमकक्रयनमेव स्यात्।

वाग्विसर्गाधिकरणम्।

वाग्विसर्गो हविष्कृता वीजभेदे तथा स्यात्॥

॥ १५ ॥ (पू०)

वीजसूये नानावीजिकेष्टिः आग्नेये गृहपतये धा... नामष्टाकपालं निर्वपेत्। सोमाय वनस्पतये श्यामाकं चरुं सवित्रे प्रसवित्रे सतीनानामष्टाकपालमिति नानावीजेष्वसकृच्छ्रुते विभागादिति युक्तम्। अतस्तस्यां क्रमेणाव घ्रान्तिः क्रियते। प्रकृतौ च श्रूयते अपः प्रणेष्यन् वाचं यच्छति तां सह हविष्कृता विसृजतीति हविष्कृद्वचनं च लक्षणार्थमित्युक्तम्।

यथाज्ञानमपीति चेत्॥ १६ ॥ (सि०)

न कालविधिचोदितत्वादिति। इहाग्नेयो हविष्कृदाज्ञानकालः। तत्र पूर्वेद्य विचारचा विनीते प्रणे-

वा इविष्कृत्काले वाग्विसर्गः अथ वाक्य एवेति। तस्मिन्न च पूर्वः पक्षः प्राग्यविष्कृत्कालाद्ये पदार्थास्तेषां वाग्धर्मो-धर्मः स बाध्येत यदि पूर्वस्मिन् वाग्विसर्गः क्रियते। पक्षोत्तरस्मिंस्तु इविष्कृत्कालादूर्ध्वं ये पदार्थास्तेषां व्याभाषणकरणं धर्मस्तदाध्येत। तस्मिन्न चोत्तरः पक्षो व्याभाषणस्याश्रुतत्वाच्छिष्टे च वाग्धर्मस्याभिप्रेतत्वा-दिति अधिकरणप्रदेशोऽयम्।

पशुपुरोडाश्योस्तुल्यताधिकरणम्।

पशौ च पुरोडाशे समानतन्त्रं भवेत्॥ १७॥ (सि०)

अग्नीषोमीये पशौ पशुः पुरोडाशश्च। तयोः पाशुकं पौरोडाशिकं च तन्त्रम्। अत्रापि सैव चिन्ता किं पाशुक-कर्मार्थं इविष्कृदाज्ञानकाले वाग्विसर्गः कर्त्तव्यः उत पौरोडाशिककर्मार्थं इति तस्मिन्न पूर्वोत्तरपक्षौ योज्यौ अय-मप्यधिकरणप्रदेश एव। ननु नैव पशौ इविष्कृदस्ति ओषध्यर्थत्वात्। सर्वार्थैस्त्वेवं ज्ञात्वा विध्यते ज्ञात्वा चिन्ते-यम्।

अग्नीषोमीयाधिकरणम्।

अग्नीषोमौ यजते। अग्निं सुनवामि सवना सूतेनेति अभि-तिअग्निमेवैतत्सुनोतीति पुनरिमं स्तनं मधुमन्तमूर्जया-

मीत्यग्निविमोकं युञ्जीतीति। तत्र विचार्यते। किमङ्ग प्रधानार्थो योगः सर्वापवर्गे विमोकः कर्त्तव्य उत प्रधानार्थो योगः प्रधानापवर्गे विमोक इति किं प्राप्तम्?। अग्नियोगः सोमकार्ये तदर्थत्वात् संस्कृतकर्मणः परेषु साङ्गस्य तस्मात् सर्वापवर्गे विमोकः स्यात्।

अङ्गप्रधानार्थो योगः सर्वापवर्गे च विमोकः स्यात् ॥ १८ ॥ (पू०)

किं कारणम्?। अविशेषेण श्रूयते। अग्निं युनज्मि शवसा घृतेनेति युञ्जीत्यग्निमेवैतद्युनक्तीति। न च श्रूयते। तस्मै यज्ञे वा कर्मणे इति अविशेषात्सर्वार्थं इति विज्ञायते। अपि च तस्मिन् युक्तेऽन्यावद्यानि प्रधानानि च क्रियन्ते। तस्मादपि सर्वार्थं चेत् सर्वापवर्गे विमोकः कर्त्तव्यः। तदा हि योगकार्यमवसितं भवति सर्वापवर्गाङ्गं च विमोकः।

प्रधानापवर्गे वा तदर्थत्वात् ॥ १९ ॥ (सि०)

न वा सर्वापवर्गे विमोकः स्यात्। किं तर्हि प्रधानापवर्ग एव प्रधानसंयोगेन हि श्रूयते। यच्चाभियुनक्ति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमाप्नवत इति यज्ञप्राप्त्यर्थं युनक्तीति विज्ञायते। तस्मात् प्रधानार्थो योगः प्रधानार्थं चेत्तदपवर्गे योगकार्यमवसितं भवति। तस्मात्तत्र विमोकः। अविशेषविधानं यज्ञसंयोगेन विशेषेण युञ्जमानं विशेषार्थं भवति।

अवभृथे च तद्वत् प्रधानार्थस्य प्रतिषेधोऽपहत्वार्थत्वात् ॥ २० ॥ (१ ह०)

एवं च कृत्वा अवभृथे दार्वैणवरणस्य दौढवरणस्य च प्रतिषेधो युक्तो भविष्यति न दोतारं वृणीते दार्वैणमिति यथान्यायोपदिष्टः। सोमार्थे हि दौढवरणं श्रुतं यद्दोतारं वृणीते जगत्यां तद्वृणीते इति। एतस्मिन्नाये प्राप्ते तदप्यङ्गप्रधानार्थमिति अवभृथेऽपि प्रसज्येत। तत्र कृतार्थत्वात् प्राप्ते दौढवरणं नैव प्राप्नोति। तस्य प्रतिषेधोऽनर्थकः। सति त्वेतस्मिन्नाये तदपि प्रधानार्थमेव तथापि हि यज्ञसंयोगो यदङ्गत्वा अपद् कुर्युः भ्रातृव्यं यज्ञस्वामीगच्छेत् बहुता वपद् कुर्वन्ति एकधा तद् यजमाने यज्ञस्वामीः प्रतिहरतीति। प्रधानार्थं चेत्तदपवर्गे तत्कार्यमवस्थितमिति अवस्थे प्राप्तं दौढवरणं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। उच्यते च। तस्मात् प्रधानार्थो योगः प्रधानापवर्गे विमोक इति।

अङ्गवर्गे च प्रत्यहं स्यात् तदर्थत्वात् ॥ २१ ॥ (२ ह०)

अङ्गवर्गे च दार्वैणार्थं प्रत्यहं योगविमोकौ दर्शयति। न वा अङ्गवर्गे नित्यं अङ्गवर्गविधुक्तीति। तदुपपद्यते यदि प्रधानार्थो योगः। इतरथा आर्थेऽपि योगः स्यात् अन्ते विमोकः। तद् हि सर्वोपवर्गे इति।

दृढव्याख्यानाधिकरणम्।

दार्वैणार्थे उपसत्त्वाङ्गे दृढव्याख्यानं प्रति चिन्त्यते।

किं भेदेन कर्तव्यमन्ते वा तत्रेति। कर्मभेदादेवेति प्राप्ते उच्यते।

सुब्रह्मण्या तु तत्स्यं दीक्षावदनाकालत्वात् ॥ २२ ॥ (पू०)

सुब्रह्मण्या तु तत्स्यात्। कुतः? अन्यकालत्वात्। कर्मभेदात् पृथक्कालेयम्। तत्र न यद्यते स विशेषः। अयत्नमाणे विशेषे तत्स्वभावो युक्तो दीक्षावत्। तद् यथा दीक्षा पृथक्कालत्वात्तत्स्यं भवति तद्वेयमपि।

तत्कालत्वादावर्तेत प्रयोगतोविशेषसंयोगात् ॥ २३ ॥ (सि०)

तस्मिन्नेव ह्यादधाति तत्काला वा सुब्रह्मण्या स्यात्। आवर्तेत सेदेन स्यात्। कुतः प्रयोगं प्रति तस्या विशेषसंयोगो भवति यत्र सुत्यामागच्छेति। प्रयोक्तुश्च यः परस्तो वेति नोक्तो भवति। तत्रापि प्रकृतसदृशं ग्राह्यम्। तस्मादावर्तेत।

अप्रयोगाङ्गमिति चेत् ॥ २४ ॥ (आ०)

इति चेत् यत्तदिति यच्चेति विशेषसंयोगादङ्गमिति चेत्। नैतदस्ति कुतः? यतोऽप्रयोगाङ्गमेतद् यदुच्यते यत्तत्स्यम् इह हि प्रकृतौ एकत्वादृष्टेऽविवक्षितसंख्येति विशेषादृष्टीकरणात् चोदनेन न प्राप्येत। यावदुक्तं स्यात् सुत्यामागच्छेति तावदेवमिति। सुत्यात्वं सर्वेषा

प्रयोगनिर्ह्रादात् कर्तृभेदवत् ॥२५॥ (२ आ० नि०)

स्याद्भेदः प्रयोगनिर्ह्रादात्। यथाध्वर्यवशब्दार्थो न विवक्षितस्तथापि वक्ष्यिष्यति प्रयुज्यते तत्कीलकस्य प्रधानस्योपकारोति। तथाज्ञानस्य कर्तृभेदवत्। तद् यथाध्वर्यवशब्दस्तत्रे विचारे दर्वीआसादयति। मावतोमेव प्रतिप्रस्थाता दक्षिणविलोत्तरवेदारिकाज्ञानि देवभेदाभावत्वा नोपकुर्वन्ति। यथा तानि देवभेदाभोपकुर्वन्ति। एवमिदमपि कालभेदादज्ञानस्य नोपकरिष्यन्ति। तस्मादावर्तेत।

तद्भूतस्य ज्ञानादग्निवदिति चेत् तदपवर्गस्तदर्थत्वात् ॥ २६ ॥ (२ आ० नि०)

यद्युच्येत। एकस्मिन्नज्ञाने देवता ज्ञानात संस्कृता भवति। एक एवासौ तस्याः पुनरज्ञानमनर्थकमग्निवद् यथाग्नेः सकृदाधाने संस्कृतस्य न पुनः कर्मणि संस्कारः एकस्य क्रियत इति। तदायुक्तम्। तत्कारणं प्रतिकर्मापवर्गः। यस्मिन् कर्मण्याज्ञानं क्रियते तदर्थं तद्भवति तस्य कर्मान्ते अपवर्गो यथाग्नेर्या सुत्याकालानां संस्काराणामग्निसंभारादीनाम्। तस्मादावृत्तिः।

अग्निवदिति चेत् ॥ २७ ॥ (२ आ०)

इति यदुक्तं यथाग्नेराधाने सर्वकर्मणि तत्र भवति एवमिदमपि दृष्टेतत्र कः परिहारः आधानवत् सूत्रम्।

न प्रदेशसाधारण्यात् ॥ २८ ॥ (आ० नि०)

नैतदाज्ञानेन तुषसाधारण्यं अक्षाकत्वात्। अक्षाकं हि तत् क्रियते तत्र नैष्टमत्रे विशेषः। इह पुनः कर्मज्ञान-माज्ञानं तद्यत्र कर्मणः काले क्रियते तदर्थमिति यद्य-माणविशेषं तत्काले तदाज्ञानेन तुषम्।

लिङ्दर्शनाच्च ॥ २९ ॥ (वै०)

लिङ् चैतमर्थं दर्शयति प्रत्यङ्गं तुषाक्ष्याज्ञानमिति। एवं ह्याह संस्थिते संस्थितेऽङ्ग्याज्यौ)ग्नावाज्यं प्रविश्य तुष-क्ष्णो तुषक्ष्णामाज्येति प्रेषयतीति प्रेषणमाज्ञानक्रियार्थम्। तस्मादपि प्रत्यङ्गमाज्ञानम्।

तद्धि तथेति चेत् ॥ ३० ॥ (इ० आ०)

तद्धित्यनेन यूपाहुति प्रतिनिर्दिशति। तद्धि यूपा-हुतिवर्त्म यथा यूपेकादशिन्यां तत्र भवति। तथा इह-मपि भविष्यति। किं तत्र वाक्ष्यं न साङ्गम् तत् क्रिय-माणमवश्यं कस्यांचित् यूपख्यात्तिके भवति सर्वसाधारण-ख्यातिमत्त्व दुर्लभत्वात्। यथा तदा कस्यांचिद् यूपख्यातिके क्रियमाणे सर्वे यूपार्थे भवति। एवमिहापीकस्य कस्य-चित् षोडशे कर्मण्याज्यिके क्रियमाणे सर्वार्थं भव तीति।

नाशिष्टत्वादिसरन्यायत्वात् ॥ ३१ ॥ (आ० नि०)

नैतन्न यस्मात्। अशिष्टत्वात् नाम यूपाज्यिके

ङीम: श्रियते। यत्रिनिमित्तमस्तियत्रापङ्क्तीयमस्तिप्रेषा-
र्थमेतदिष्यते। इतरथाहि ङी ङ्यापोः संज्ञाछन्दसोर्बहुलम्
इति इतरत्राप्यलाप: स्यात् इह त्वितरोऽपि लक्षणभेदाद्
यत्रमात्रनिमित्तमस्तीयस्तत्रास्ति यत्रास्तिमात्रं तत्रास्तीयम-
पप्यास:।

विध्येकत्वादिति चेत् ॥ ३२ ॥ (भा०)

अथ कश्चिद् ब्रूयाद् इह वाक्यान्विती विधि: तत्र-
स्थो वसतीवरीप्रभृतीनामङ्गत्वादिवत्स्यमपि च शब्दान्वि-
तो विधि: तावद्भ्यामङ्गेभ्योऽपि तत्र यत्रास्तिमात्रमिति।

न कृत्स्नस्य पुनः प्रयोगात् प्रधानवत् ॥ ३३ ॥ (भा० सि०)

तत्र कृत्स्न:। कृत्स्नस्य पुन: प्रयोगात्। कृत्स्नोऽयं
विधि: पुनः प्रयुज्यते अग्निमवपन्नग्नेयमष्टाकपालं निर्व-
पत्यादि:। प्रधानवत् तद् यथा प्रधानानि यत्रास्तं नियन्ते
तथा तत्र वसतीवरीवदा कल्पत्वं स्यात् क्षीरादिवद्वा
बहुलत्व: छन्दं स्यात्। तत्र बहुलत्व: छन्दमिति न्यायम्।
तथा चैवाह्युपपन्नमिति यत्र कृत्स्नं तु यत्र नियते तत्रैव
कालभेदाद्यत्नभेदाच्च। तथादर्शनम्।

कौत्सिवे तु ब्रह्मचारिणो संस्कारस्यर्थलोपात् ॥

२४ ॥ (पू० सि०)

१८ कौत्सिवार्या उदाहरणं यथा देयः समे वर्णपूर्वभाषाभ्यां स्वरे। वर्णात्। वर्णपूर्वभाषयोः यकारवोत्वार ऋलिखः। खुगादीनि च पाणानि तेषु विचारः किं प्रतिप्रवेशमन्यान्युपादेयानि उत तानि वा अन्यानि वा उपादाय प्रयोग इति किं प्राप्तम् अन्यान्युपादेयानीति। किं कारणम्?। निरिष्टवेन पुनः किंवा शिष्टाचरणमिति पूर्वेण पक्षे। कौत्सिवेषु ब्रह्मचारिणो तानि वाऽन्यानि वा अनियमः। कुतः?। संस्कारानर्थलोपात्। न खलित् पूर्वखित् प्रयोगे वर्णादीनां संस्कारः कृतो व्याख्यानादाने सुखेत। नामधर्मयोः अनेकेऽपि हि शब्दाः प्रयोगः कर्तुं तस्मादनियमः। अत्र यदुक्तं निरिष्टिवेन शिष्टाचारं नाश्रयन्तीति। एतेराश्रयन्तीति। तस्मान्न दोषः। अथ खलिगाचार्यो नास्तिपरिवाजकानिति आश्रयन्तीति। पुरुषधर्मो लोकसमवेतः वर्णसंयोगाभावात् प्रकरणाभावाच्च। शेषेण वर्णेषु च सर्वपरिषत् साधुत्वेन कथा करिष्यते।

यजादयश्च धार्येरन् प्रतिपत्तिविधानाद्वचनप्रामाण्यात् ॥ २५ ॥ (१ पू०)

यजनयाजनानि तु ब्राह्मणाराधितस्यापि कुतः प्रति-

पत्तिविधानात् । प्रतिपत्तिर्वा अग्निहोत्रादौ कर्मणि विधीयते । अग्निहोत्रमग्निमिर्हूयते इति यजमानवेदेन तदर्थः । अङ्गीवत् । — तद्यथा अङ्गमर्थे कर्मसाधनम् अङ्गीभोऽवयवे प्रतिपादनार्थं धार्यते अङ्गीवत्यु, तद्वदिति भूयते ।

यजमानसंस्कारो वा तदर्थः श्रूयते तत्र यथाकामी तदर्थत्वात् ॥ ३६ ॥ (२ पू०)

न वेयं पात्राणां प्रतिपत्तिः किं तर्हि यजमानसंस्कारोऽयम् । तदर्थत्वेन पात्राणामयं श्रूयते । अर्थं प्रायते तेषां क्रतुद्वारा निर्वर्त्यात् यजमानश्च क्रतुद्वारा । तत्र यथाकामी स्यात् । तेषामन्येषां वा प्राधान्यम् तदर्थत्वात् । अर्थकर्मत्वात् पात्राणां दैः कैश्चिदर्थैः क्रियतेति ।

मुख्यधारणं वा मरणसंनियतत्वात् ॥ ३७ ॥ (२ सि०)

मुख्यानां वा पात्राणां पात्राणां धारणं मरणसंनियतम् । कुतः मरणसंनियतत्वात् । संनियतत्वाच्च मरणम् । कदाचित्तानि पात्राणि क्षुद्राणि भवेयुः मरणं चापद्येत । तत्र यजमानशरीरसंस्कारशेषः स्यात् । एवमपि तावद्दारसंनियतत्वानि यावदन्यः प्रथमः परतः तदीयैः पात्रैरेव कर्म क्रियते । पूर्वेषु विद्यमानेषु उत्तरादानमन्येषामनर्थकम् । तस्मान्मुख्यधारणमेव स्यात् ।

यो वा यजनीये क्रियेत सोऽधिक्षेतः क्षात्तुपवेषवत् ॥ ३८ ॥ (पू०)

अथ यो मनुष्यत्वा आत्मनो ब्रह्मत्वमेवैतमि विवेद् अहमेवास्मि ब्रह्मेति तस्मात्तत्सर्वमभवत्। तस्य यानि एवानि देवानि तथेतरेषाम्। अथर्वेषमत्र। यथा साधारणेन प्रयोगेणैवमेवैषा विद्याविद्वत्प्रयोगेण। अविद्वित इति।

न प्रत्यक्षत्वात् ॥ ४८ ॥ (२सि०)

तदेतत्पूर्वपक्षयते। किं कारणं प्राङ्गत्वं तत् भवति यद्वा प्राङ्गत्वाविशिष्ट एवोपदेशो ब्राह्मणेति। तत्र हि ब्राह्मणार्थो यागो ज्ञानमुत्पिपादयिषन् प्रवेश स्वया यज्ञाङ्गत्वविशिष्टोऽवभवः। अवेक्षमतिप्रयत्नसंस्कारविधानं यजतीत्ये याङ्गानि भवन्ति प्राङ्गारम्भविधानादाहिताग्निमग्निर्दहतीति यज्ञपात्रेषेति। न ब्राह्मणविषयेण यज्ञपात्राद्यानुपपेक्षवदवभवः। शक्यते हि द्वारेण सम्पादयितुम्। तस्मादुपदेशोऽदृष्टार्थः।

उत्पत्तिर्वा प्रयोजकत्वादाग्निवत् ॥४०॥ (२सि०)

अथवाप्राङ्गारम्भं किं तर्हि संस्कारार्थानि भवन्ति यानि यावन्ति यज्ञाङ्गानि प्रयोजकत्वात् संस्कारस्य आग्निवत्। यथा खल्वपि होतृत्वं अग्नेः सति प्रयोजकत्वादग्नेः प्रत्युद्देश्यत्वं भवत्यग्नये प्रत्युद्देश्यायाग्नि पुनीति सूत्रे। आग्निवत्यं भवत्योऽपि प्रत्यक्षं भवत्।

शब्दाप्राप्तत्वमिति चेत् ॥ ४१ ॥ (पा०)

अथ यज्ञाङ्गेषं यति यज्ञपात्राद्यन्योऽप्रत्यक्षो भवति।

यज्ञसम्बन्धेन हि पात्राणि भवन्ति । न च अवागां यज्ञसम्बन्धोऽस्तीति ।

तथाधिरेऽपि ॥ ४२ ॥ (प्रा० लि०)

वाक्यशेषा नोत्पादीयते या यज्ञसम्बन्धं अनुभूय भवति । तत्र शब्दस्वाभाव्यमेव यदि तत्राप्या नोरिक्तान्यानि पात्राणि अधिश्रयन्ति । यज्ञो वा विशेष इति । अयमुच्यते ।

शास्त्रात् विप्रयोगस्तैवाद्रव्यचिकीर्षा प्रकृतावपेक्षा-पूर्वार्थवत् भूतोपदेशः ॥ ४३ ॥ (इ०)

शास्त्रात् विप्रयोगस्तस्य शास्त्रेण तत्र शब्दस्वाभाव्यं व्रतदुहो विप्रयोगः श्रुतः श्रुतव्रतो भवत इति । एवद्रव्य चिकीर्षायां यजमानस्य व्रतयुक्तामाभिरे दुहन्तीति श्रुतपूर्वे चोदकेन प्राप्यते तथास्वभावविवर्त्तेत । आभिरेव मां प्रयुङ्क्ते । तत्रात्र शब्दस्वाभाव्यमनुबध्यते । अनेकार्थोऽयं नात्मतः प्राप्यते । यज्ञपात्रेण हाग्नौ अधिश्रेणेन प्रत्यक्षतः । सन्ति च तेषां सम्बन्धं धारयेन । तस्मादिहापि अधिश्रयं शब्दस्वाभाव्यमवयवं भवतीति धारयेन आत्माभावेन विप्रसम्बन्धवर्जितम् ।

अपरः चिन्तान्तरं क्रियते । यज्ञसम्बन्धि धारयितव्यानीत्युक्तं तत्र किमयं विधिः श्रौतेभ्यस्तावत् धारयितव्यानुतानुमानिकेभ्यो नीति । किं कामम् ?

प्रकरणाधिकरणम्।

प्रकृतत्वात्तु यौर्वभाव्यानि विधेरन् ॥४४॥ (पू०)

यौर्वभाव्या धारयन्ति धारयितव्यानीति कुतः प्रकृतत्वात्। इतानि यौर्वाणि प्रकारभेदात्पौर्वभाव्यानि। तत्र वाक्यादयति: संयत्तिप्रयति, च धारयम्। तस्मात् यौर्वभाव्या धारयन्ति धारयितव्यानि।

अन्यार्थे वा विप्रतिषेधात्तानि धारयेन्मरुत्वत्स्वनिमित्तत्वात् ॥ ४५ ॥ (सि०)

न वा यौर्वभाव्या धारयन्ति किं तर्ह्यन्यार्थेभ्यात्। कुतोऽविप्रतिषेधात्। यद्यपि यौर्वभाव्यानि विहितानि चोदनया, यद्यप्यनर्थकानि तत्र यद्यतिधार्यमरुत्वत्स्वनिमित्तानि भवति मरुत्वत्स्वनिमित्तत्वात्। यौर्वभाव्यानि यदि मरुत्वान्पर्वत यजमानशरीरसंस्कारशेषो भवति। आधानाधारयन्ति धारयन्ति यौर्वभाव्यविप्रतिषेधो भवति तस्मादाधानाद्धारयन्ति धारयन्ति।

प्रतिपत्तिकर्मशास्त्रेषात् ॥ ४६ ॥ (सि०)

विप्रतिषेधात्। यद्यपि यावन्तो विहिता यजमानस्य संस्काराः सर्वे। अत्र विहितानि प्रतिपत्तिकर्मशास्त्रेषात्। प्रतिपत्तिकर्मशास्त्रेषात्। प्रतिपत्तिकर्मशास्त्रेषात्।

यज्ञ तत्रैव। तस्मान्नेहापि प्रतिपत्तिः। यत्तु प्रतीदा-
संशोम इत्यत्र विधिः। न. यस्तु. उपवासवारि-
ज्ञीनां पाक्षायां च निषेधः प्रतिपदि तत्रोपवासादि-
तात्पर्येण, न प्रतीदा तत्र नैवं कुत्रापि यज्ञ तत्रैव तत्
साधते। निषेधे तु दितीयेऽपि यज्ञ दर्शमे कालो मुख्य
मावादवाप्ति।

सोमप्रचाराधिकरणम्।

उपरिष्टात् सोमानां प्राजापत्यैश्चरन्तीति ॥ ४८ ॥ (पू० सि०)

तत्र सर्वेषामविशेषादयाज्ञो हि प्रकृतिकालः। याज-
पेये प्राजापत्यात् पशून् प्रकृत्य श्रूयते उपरिष्टात् सोमानां
प्राजापत्यैश्चरन्तीति। तत्र विचार्यते किमार्धमासे
प्रचरितव्यमुत प्रकृतवतां सोमानामुपरिष्टादुत विकारकाले
प्रकृत्य सर्वसोमानामुपरिष्टादिति किं प्राप्तमाधमासक
इति कुतः? प्रकृतावार्धमासके प्रचरते इतः प्रकृति-
वद्विकारेऽपि तत्रैव कर्तव्यः। एवं च पशुनियमोऽपि न कृतो
भवति। यदि सर्वसोमानामुपरिष्टात् प्रचरेत् तत
आग्नेयकालपूर्णमासयोरैन्द्राग्नमेकादशकपालं पुरोडा-
शादिसोमयागेषु तत्प्रकृतिभूते दर्शपूर्णमासयोरपि सोमयाग-
दूर्ध्वमनुयाजेषु। दृश्यते च दर्शादिषु पशुः
प्रक्षिप्तेषु सोमप्रकृतयो विकृतयो भिन्न एवेष्टि भिद्येत।

यत्र त्वार्थवत्वाभावे प्रधारणमात्रं नैव दोषो भवति। एवं प्राप्ते प्रचक्षते अपरिहार्यान् दोषान् अप्रधानलोपकरणीयेषु सर्वसोमावयवेषु प्रधर्षेत। कुतः अविशेषात्। सोमावयवत्वेषु सर्वेषामप्रधानत्वविशेषवचनात् प्रतीयते। प्रधानार्थत्वमेषां प्रक्षालितः प्राप्नुत इति वाक्यं हि प्रकृतिवाक्यशेषत्वेनैव प्रामाण्यं विधिः क्षतकरोऽनर्थकः स्यात् तस्मात् सर्वसोमावयवेषु परिहारः प्रधारः।

अङ्गविपर्यासो विनावचनादिति चेत् ॥ ४८ ॥

(भा०)

अथ यदुक्तमेवं क्रमक्रमविपर्यासो विना वचनेन कृतो भविष्यतीति तत्र कः परिहार इत्यत्राह सूत्रम्।

उत्कर्षः संयोगात् कालमात्रमितरच्च ॥ ४९ ॥

(भा० नि०)

नैष दोषो यदुक्तमङ्गविपर्यास इति। कथं कृत्वा। पञ्चप्रधारे तावदुभयत्र सवनयागानां परिधिप्रधरणस्य दोषवतो न्यायः संयोगात्। तावद्धि पञ्चप्रधारेण क्रमतः संयुक्तानि न चाग्निमारुतक्रमानुरोधेन प्रक्षालनपरिवोक्षणस्य वा परिधिप्रधरणेन क्रमो विरुध्यते। न हि परिधिप्रधरणम्। प्रक्षालनपरिवोक्षणस्य परिधिप्रधरणस्य तयोर्वा वाक्यशेषत्वेन प्रधानत्वम्। एवमाग्निमारुतक्रमानुरोधेन। यदि परप्रधारणाङ्गभूतानि

भवेयुः एकत्र वा प्रधानस्य अतः सर्वेषां सोमानामुपरिष्टात् प्रचार इति विविक्षितः क्रमः स्यात् । यत्र पुनः यथाश्रुतमनुष्ठानं आग्निमारुतं सौम्यम् अथवा अतिरात्रसंस्थं यत्रैतत् द्वादशधा सौमिकानां स्तोत्राणां प्रयोगः । तत्राद्विविक्षितः । यावन्मात्रमतिरात्रे यावन्मात्रमनूच्यं तावदेवस्यन्तीति परिशेषात् परिधीन् सुवतीति द्वादशधा मिति एतस्मिन् काले इति सवनप्रमाणमात्रं परिधिप्रहरणं च । अनपेतत्व सवनकालवेलाया यत्राग्निहोत्रवेलायामागन्तव्यमिति यत्राग्निहोत्रं नास्ति तत्राप्यनपेता वेला न चेत् सवनं भवति । न हि काल एवेह श्रुतार्थः । स्तुतावपि तावत् पूर्वकाल एव कर्तव्ये । सौमन्तोऽपि देयं कालं वा ब्रूयात् । देवता सम्बन्धात् कालार्थो विज्ञायते ।

प्रकृतिकालासत्तेः सवनवतामिति चेत् ॥५०॥ (चा०)

इति चेत् पश्यसि सर्वसोमानामुपरिष्टात् प्रचार इति नेतदुच्यम् । सवनवतां सोमानामुपरिष्टात् प्रचारो युक्तः । कुतः । प्रकृतिकालासत्तेः एवं प्राकृतसवनकालाः क्रमः प्रचारो भविष्यति यद्यविवक्षितः सवनकालः स्तुतौ भविष्यति । यत्र चेतरोऽपि कालः तत्रैवंविधमेवेदं देवतासम्बन्धकृतं वचनम् ।

न श्रुतिप्रतिषेधात् ॥ ५१ ॥ (चा०नि०)

एवं सत्युपरिष्टात् सोमानामनियमेन श्रुतिर्विहन्यते विधानं चेदानीं सोमानामवयवार्थं यौगपद्यं क्रमस्तु न चोदना शास्त्रः कार्यो भवति ।

विकारस्थानि इति चेत् ॥ ५२ ॥ (भा०)

इति चेत् यद्यपि प्रकृतावपूर्वं प्रयाजोऽङ्गं इति विकारस्थानि भवतु । अतस्तत्र विकारस्थानं उक्तयाज्याः संस्था चेत्यविशेषेणावा निवारः तासां अतु स्थानमिष्टोऽग्नयारापूर्वं तत्र प्रयाजो भवतु अर्थं सर्वेषामाग्नेयानां प्रयाजानां स्थानम् । अथमपि दोषवत्तः । तस्मादयमपि तत्रैव भवति ।

न चोदनापृथक्त्वात् ॥ ५३ ॥(भा०नि०)

नैतदेव यस्मात् चोदनाद्रव्यात् अर्थद्रव्यादित्यर्थः । पृथगेते धर्मौ यद्य सौमिकं अङ्गं याज्यानां सौमिकानां प्रयाजाप्यमेतत् स्थानं न याज्यानाम् । तस्मादेतस्य वचनात् सर्वसोमानामुपरिष्टात् स्थानम् ।

प्रकृताधिकरणम् ।

उत्पत्तौ सूक्तवाकस्य न सौमदेवतावाक्यत्वम्-पञ्चमहत्वाद्यथानिष्पत्तौ नाम्नयः ॥ ५४ ॥ (पू०)

प्रकृतावग्नेय उक्तधर्माणां सूक्तवाकस्यानुवर्तनम् । तत्र सप्तमीश्रुतौ इतरेषामाग्नेयानां देवतायां सौमीमेषां सूक्तविशेषविरहिदेवतानां सूक्त एव तत्प्रतिपादनाय । तस्मात्

न यवनीवदेवतामात्रस्यैव [illegible]। [illegible]। इत्यत्राऽपि पथ्योरक्षसूक्तस्थयोरपि यवनीवदेवतयोः न दोषाय दोषाय च यवनीवदेवतयोः। तस्मात् वादोऽनुत्थेयः। यदा निम्रोचेऽन्यत्र। यदा दोषेऽन्यासां सूक्तवाक्यप्रयोगे पूर्वमाशीर्देवतानां निम्रोचेऽन्याया देवतायामन्वयः। इतरत्र चेतरासाम्। तत् कस्य हेतोः इतरेतरस्थानत्वात् तदर्हिभावनुत्थेयः।

वाक्यसंयोगाद् वोत्थेयः समानतन्त्रत्वादर्थलोपाद्वन्वयः ॥ १३ ॥ (सि०)

अत्र वा उत्थेयं यत्र स्यात्। कुतः? वाक्यसंयोगात्। सूक्तवाक्यशेषदेवभूतानि दीनिचदेवता संबोधनानि मन्त्रलिङ्गानि इरिवती यदा सूक्त एव ते वरणं वरणातीव ते परिवापम् इत्यं यजमानं इति यजमाने। तथा इन्द्राय इरिवते शाकाभिः सूत एव ते वरणेन वरणातीवते परिवापेण सूक्तवाक्य एव हेतौ यजमानेऽन्यदिति यजमाने। तान्येतानि सूक्तवाक्यशेषे सर्वत्र वाक्यसंयोगाच्चोत्थेयानि निम्रोचेऽन्यार्थानि। तेषामाशीर्वादानि यानि [illegible]। न च यवनीवदेवतां सूक्तवाक्योक्ति वचेतासूत्तरार्थेन्द्र। यद्यत्र एव सूक्तवाक्यशेषो वरणक्रियः। वाक्यसंयोगेन देवतायां दोषोऽनं युक्तं च चेतन्तु तथा वाक्यसंयोगमुत्थेयं यत्र वैकल्पः परीक्षते। कथं पुनः निम्रोचेऽन्यत्र इति यजमानस्यार्थशेषत्वात्। [illegible]। [illegible]। तत्रैः वाक्यार्थं सूक्तवाक्यशेषं यजमाने निम्रोचेऽन्यत्र।

[illegible]

इति श्री भवस्वामिनः कृतौ मीमांसाभाष्ये एकादशाधिकरणं तृतीयः पादः ।

अथ मीमांसा-दर्शने

एकादशाधिकरणं चतुर्थः पादः ।

पदार्थसंख्याधिकरणम् ।

पदानेकत्वाद्वाक्यस्यानुक्तदोषाभावो समवायात्सङ्घातानाम् ॥ १ ॥ (२ पू०)

[illegible]

प्रतिदधिषं वा अहं सम्बन्धादिहैवास्तु त्वाम्नुदायो वि तन्निष्ठं वा तदेवास्तदेव शब्दोपदेशः स्यात् ॥ २ ॥ (सि०)

न चैतदेवं तत्त्वमङ्गानीति । किं तर्हि भेदेन श्रुतः ? प्रतिदधिषं अहं सम्बन्धात् । एतेषु कर्मसु दधिभेदः श्रूयते "वामनावेवाग्र एकादशकपाल ऐन्द्रवैष्णवश्चरुः वैष्णवस्त्रिकपालो वामनो दधिघा । सोमायोघा एकादशकपालः ऐन्द्रापौष्णश्चरुः पौष्णश्चरुः श्यामो दधिघेति" दधिभेदात् प्रतिदधिषं अहं सम्बन्धी भवति । वामनक्रीताः पूर्वस्य त्रिसंयुक्तस्य वचनात् वचनमुत्तरस्य त्रिसंयुक्तस्य श्यामशब्दोक्तात् वचनस्य त्रिसंयुक्तो भागस्तेऽस्त्वहं पूर्ववाक्यात् अहंभेदादङ्गभेदः । दधित्वं तावत् सोमक्रयाङ्गत्वात्तत्र वाक्यभेदात् ? एवमेकस्मिन्नपि एवमिहापि अहंभेदस्य वचनस्य । तथादेव अर्थवादगीतिः । अस्तु तावदेकत्वानुग्रहपरत्वमपि वस्तुतो विरुध्यत इति उच्यते (वस्तुतस्तो वि तन्निष्ठं वा) वस्तुतः वस्तुनिष्ठता विधिनिष्ठः तदेवत्वात् प्रकृतित्वात् अङ्गवचनं न प्रधानैकत्वादिहितम् । तथा हि पूर्वपूर्वावयवे प्रधानभेदेऽपि फलैकत्वात् प्रधानवचनं पूर्वपूर्वावयवा अर्थवादा यथेति ।

तथा चान्यार्थदर्शनम् ॥ ३ ॥ (वि०)

अथार्थोऽयमेतस्य वर्णयति पूर्वं त्रिसंयुक्तस्य वि-

संयुक्तमिति । अथ मैवं स्यात् । अर्थैकत्वे ऽपि प्रकारभेदेन भेदोपपत्तेः अनेक । नैवमिहास्ति प्रकारभेदस्तु विप्रावदे ब्राह्मणोः प्रकारान्तरेणैतत्तयोरर्थमिति । एवं ब्राह्मणं वस्तूर्वं विसंयुक्तं क्षीरजननं तथादुत्तरं विसंयुक्तं पशुजननं तस्मिति । यद्यप्रमाणमेव ब्राह्मणं भवति न वेदस्यार्थावबोधनमेवेतत् ।

उपक्रमे उक्तं वेदं निरस्याधिकरणम् ।

अनियमः स्यादिति चेत् ॥ ४ ॥ (पू०)

अत्रेह निरस्यते विसंयुक्ते ये ब्राह्मणैरक्ता एवाद्यादयः अनियता वैकल्पे प्राप्ते । किं प्राप्तम् ? अनियमः स्यादिति चेत् । इति चेत् अत्रेति सप्तम्यन्तं पदमध्याहृत्य वर्तयितव्यम् इति अनियमः अनियतपदनिवेशनिमित्तानि यानि पदानि ब्राह्मणे श्रूयन्ते अनियतानि अनियतानि अनेकप्रकाराणि; उत्तरे वर्तन्ते यथा ज्योतिरग्नयो वा इतः प्रजापतेरनियमः ॥

नोपदिष्टत्वात् ॥ ५ ॥ (सि०)

नैतदेवं यूयमनियम इति चेत् तदिह न ह्यत्र प्रकारे तत्र ब्राह्मणे प्रजापतिरुपदिष्टत्वात् । यद्यादावेव वरुणकामे यजमानेन तेनोपदिष्टं यजेत यां राजसूयसंज्ञेन कर्मणेष्टवादेन यास्यतीति । वरुणश्च प्राक् कर्मणेष्टेः तदनन्तरमाभिषेचनीयात् [illegible] अर्थतो भवति ।

पविधसुहिश्य ततो न सर्वार्थोपकारकत्वं, एवं सत्यपि, किं पुनरत्र युक्तम् । समुदायसुद्दिश्येति । तथा हि अविद्वान् कर्तुः कर्म निर्वर्तते । इतरथा पविद्वान्ते उत्तरस्मिन् कर्मणि न एव ज्ञाता न संप्रयोक्तारम् अर्थे च ज्ञातारो मोपपद्येरन् कर्मविधेः स्यात् ज्ञातातिपत्तिश्च । एवं च सति लाघवं भवति इतरथा प्रतिकर्मोपादानं तद्गुणः स्यात् । ऋत्विग्याज्यौद्गात्रभिचारो धर्मेणत्वात् समुदायसुद्दिश्य क्रियन्ते तथा च तन्त्रम् ।

प्रयोजनैकत्वात् ॥ ६ ॥ (पू०)

एकस्य प्रयोजनस्यावयवसद्भिधानात्रपि समुदायसम्पत्तिः न ह्यवयवेन चेतसेन क्रतोन अविद्वत्कर्मोपयोगः समुदायः सम्यग्विद्वांसश्च ऋत्विजो भवन्ती परिशीलिते । तेषां समुदायसम्पत्तौ ज्ञातार्थत्वम् । तस्मात् न एव कर्मणः ज्ञातारः, अत्र यदि समुदायसम्पत्तये अवयवाः परिगृह्यन्ते सर्वदेव कर्मणः विद्वत्कर्तृत्वं सुलभं भवति ।

अविशेषाच्च पुनः श्रुतिः ॥ ७ ॥ (पू०)

उभयथा परिग्रहे प्राप्ते यद्यत्र प्रत्यवयवं वा परिग्रहविशेषो विवक्ष्यते प्रत्यवयवं कर्तृत्वः श्रुतिसंज्ञानियमेन च वामनो दृष्टिवा, बहुतमजिवेचनीये दक्षादीनेवं त्रिमाधमसमुदायान्वादि भवतीति ।

अवेष्टौ वैकल्पिकी लिङ्गदर्शनात्

वचनात् कामसंयोगेन ॥ ८ ॥ (पू०)

तस्मिन्नेव राजसूये अवेष्टिः आग्नेयोऽष्टाकपालो द्विरात्रं दक्षिणा वाश्वलायनः। त्रिरात्रोऽष्टौ दक्षिणेत्याश्मरथ्यः। तस्यां विकल्पते किमङ्गानां भेदोऽथ तन्त्रभाव इति। किं प्राप्तम्?। अवेष्टौ वैकल्पिकी स्यात्। तन्त्रता-लिङ्गदर्शनात्। लिङ्गं हि तन्त्रभावस्य सूचकं इष्यते यदि ह्यङ्गानां अवेष्टेः वार्श्वलाय मध्ये निधानाद्दर्शं पूर्णमासवत्, आश्मरथ्य मध्ये निधानमुपपद्यते। ऐकमत्यं च सामान्यं तन्त्रभावेऽवतिष्ठते। अतु लिङ्गमुपदिश्यते कुतः प्राप्तिः। यद्यपि चोदनया प्राप्तिः अवेष्टेः विधानवेष्टिव्यः इमं वा अग्न इति कोऽसौ मुख्यपक्षोपलक्षीति। अवेष्टिरिति वैकल्पिकः। एतदेवाकाङ्क्षायां आग्नेयेति वचनात् कामसंयोगेन। न वा तन्त्रभावः। कुतः। लक्षणा न्यायः मुख्यदर्शिनं वा बहुलक्षणः स्यादिति। लिङ्गदर्शनादिति बहुव्रीहिः। तत्र हेत्वर्थः। वचनादिति कामसंयोगे-नापि युज्यते। एतदेवाकाङ्क्षायां आग्नेयेति तत्रैतदर्थनं न च तत्र इष्टिपशवोदो न हि राजसूयिनां मुख्यपक्षाप्राप्तत्वे। एतदेवाकाङ्क्षायां आग्नेयेति वचनात्-योगेन अवेष्टेः कथं प्राप्तिर्नित्यं कुतः इत्यादि एव तत्रैतदर्थनं

क्रत्वर्थाच्चेतिचेन्न पुरुषबहुत्वात् ॥ ८ ॥

(शा० वि०)

यत्र यत्रेति क्रत्वर्थाच्चेतदर्थं अस्तु एवं सतीत्येवं अविधीतीति। तत्र न, कुतः। पुरुषबहुत्वात्। यदि ब्राह्मणो व्रजेत यदि वैश्य इति। न च क्षत्रो ब्राह्मण वैश्यो स्तः राजन्यश्चेव राजसूयः राजा राजसूयेनेति वचनात्। तस्मात्क्रत्वर्थाच्चेतदर्थम्।

ज्योतिष्टोमाधिकरणम्।

पवमानसविःप्रैषैकत्वात् प्रधानवचनैकत्वात् ॥ १० ॥ (पू०)

आधाने पवमानेष्टयः। अग्नये पवमानाष्टाकपालं निर्वपति। अग्नये पावकायाग्नये शुचय इति तत्र विचार्यते किमाज्यानेकत्वात् भेदो वा इति सिद्धं प्राप्तम्। पवमानसविःप्रैषैकत्वात् स्यात्। कुतः प्रधानवचनैकत्वात्। एत्र स्यात् प्रधानवचनः अग्नीनिष्टवानीति। प्रधानवचनैकत्वात् एकप्रयोगः। तत्र न यद्यपि विशेषः तस्मादेकतन्त्रम्।

लिङ्गदर्शनात् ॥ ११ ॥ (वि०)

लिङ्गं च एत्र प्रयोगं दर्शयति अग्नाग्नयेवि यदन्तीति। अनुग्राहीत्वम्।

वर्तमानापदेशाच्चवचनात् तन्त्रभेदः स्यात् ॥

न चैवमर्थो स्यात् । [illegible] तच्छेषः । न च भवत्येवं प्रथमायां सिद्धः क्रत्वर्थोऽयं सप्तमात् वचनात् वचनलिङ्गं भवति यद्य आमन्त्रयते वर्षीयान् मे भवान् स्वामिति तस्मात्त्वये क्रयमाणाय निरूप्य यव पावकाय शुचये चोसरे दक्षिणे कपालेऽग्नी निर्वपेत्तस्मिन्नग्नीत्तेन स उत्तरं वर्षीयान् मे भवान् भवतीति । किमिव वचनं न कुर्यादिति वचनप्रातिभाद्यः । तस्मादेवं कर्त्तव्यम् । अथ यदुक्तं प्रयोगवचनैकत्वादिति । तत्र कः परिहारः । नासौ प्रयोगवचनः आम्नायवचनोऽसावग्नीन्निरूप्याणीति तस्मादृक्षु न भवति ।

संहत्ये नित्यानुवादः स्यात् ॥१२॥ (आ० नि०)

यद्यपि समानवद्वि भवतीति समानप्रयोगं दर्शयतीति तत्र भ्रमः संहत्य नित्यानुवादः स्यात् । इदमपरं सूत्रं या ब्रह्मवर्चसकामः स्यात् तस्य सर्वाणि सर्वाणि निरूप्याणीति । तत्र सह प्रयोगो भवति तस्मिन् संहत्ये नित्यानुवादार्थं स्यात् समानवद्वि भवतीति किं पुनर्निरूप्याणीत्युक्ते सहप्रयोगो गम्यते निरूप्याणीति बहुत्व युक्तः प्रयोगो विज्ञायते । तत्र बहुत्वमुपादेयत्वेन चोदितानां विवक्षितं न चैकैकः प्रयोगो बहुत्वयुक्तः प्रयोगो भवति । तस्मात् सहप्रयोगो विज्ञायते ।

द्वादशादौ दीक्षाधिकारः ।

द्वादशाहेन प्रजाकामं याजयेदिति श्रुतौ तत्र निश्चा-

[illegible] सम्भाव्य

पथ वा अकुर्वते श्रीचायनाय, पथश्च अकुरुते इत्यादि, पथ वा स्वप्नतानां दीर्घोपसदमहां विहरितिति किं प्राप्तं तत् सूत्रेणेवमुक्तम् ।

द्वादशाहे तु प्रकृतित्वादेकैकमहरपसद्यत कर्म-पृथक्त्वात् ॥१४॥ (२५०)

एकैकं सदीर्घोपसदमहरहरपसद्येत द्वादश पञ्चविंशतिरात्राः कर्तव्याः । कुतः । तत्प्रकृतित्वात् । सदीर्घोपसदमहरपसद्यते ज्योतिष्टोमे यतस्तत् प्रकृतीभूतानि द्वादशाहानि पृथग्भूतानि कर्माणि पृथक्त्वेनैव धर्मानाकाङ्क्षन्ति तस्मात् ज्योतिष्टोमवत् सदीर्घोपसदमेकैकमहः कर्तव्यमिति ।

अङ्गं वा श्रुतिभूतत्वात् तच्च साङ्गं क्रियेत यथा माध्यन्दिने ॥१५॥ (२५०)

न चेतदस्ति यद्वयं द्वादश पञ्चविंशतिरात्राः कर्तव्या इति । किं तर्हि द्वादश साद्यक्राः कार्याः किं कारणम् अङ्गं श्रुतिभूतत्वात् द्वादशाहेनेति द्वादशसंख्याङ्गं प्रत्यक्षश्रुता वा स्याद्यत यदि द्वादश पञ्चविंशतिरात्राः क्रियेरन् । तस्माद् द्वादशाहस्यैकैकं प्रधानं भवेत् । प्रधानकालत्वाच्चैषां तत्कार्यं तदीयं दीर्घोपसदं यथा माध्यन्दिने । तथा द्वादशानामेव माध्यन्दिने निरूपणं इति कृत्वा माध्यन्दिनवाक्यशेषाद्वादशानि अवगम्यन्ते- [illegible] माध्यन्दिनाः कर्तव्याः ।

अपि वा फलकर्तृसम्बन्धात् सङ्ख्याप्रयोगः स्यादाग्नेयाग्नीषोमीयवत् ॥१६॥ (३य०)

अपि च नैवं स्याद् द्वादश दाक्षायणा इति कथं तर्हि सङ्ख्याप्रयोगः स्यात्। चतुरहे दीक्षाचतुरहे उपसदचतुरहे सुत्याः। कुतः? फलकर्तृसम्बन्धात्। फले कर्तरि चैतेषां प्रधानकर्मणां समेतानां सम्बन्धो द्वादशाहशब्देन समुदायरूपेण संख्यानात् फले सम्बन्धः फलं स्वर्गकर्तृत्वाद्धविः च इत्यविशेषात् कर्तरि चैकफलत्वादेककर्तृत्वाच्च सङ्ख्याप्रयोगो भवति आग्नेयाग्नीषोमीयवत्। यथाग्नेयाग्नीषोमीययोरेकफलत्वादेककर्तृत्वाच्च सङ्ख्याप्रयोगो भवति। सङ्ख्याप्रयोगे च विप्रतिषेधात्सत्रं दीक्षोपसद्वद्द्वादशाहस्तुतिवदुपपन्नं। तदुभयमेवमुपपादितं भवति सङ्ख्याप्रयोगोऽङ्गसंख्या च तस्मादेव बलवान्।

साङ्गफलस्तुतित्वाद्वा सङ्ख्यानानां विकारः स्यात् ॥ १७॥ (सि०)

अथ चैतदपि न युक्तं कुतः साङ्गफलस्तुतित्वात्। यथैव प्रधानानामेव फलस्तुतिः स्यात्फलाङ्गानां तत एवं स्यात्। अथ तु खल्वङ्गानां फलतः स्तुतो द्वादश दीक्षा द्वादशोपसद इति दीक्षोपसदां च द्वयं द्वयं फलतः स्तुतः। यदि चतुरहे विप्रेत, ततो बाधेत। तस्मात् सङ्ख्यानानां विहितिः। तदपेक्षं च द्वादशत्वं। दीक्षोपसदस्तुत्यपेक्षं प्रथमं दीक्षाणां तदपेक्षं द्वादशत्वं तत

उपसदश्चाज्ञायि तद्देवानामधिज्ञानं कृत्वा तथा यजि तत् स्थानाया इव दृष्टिः । तदर्थं दादशत्वम् ।

दीक्षोपसदां च संख्या पृथक् पृथक् प्रत्यक्षसंयोगात् ॥१८॥ (६०)

यदि च दादशादेव प्रजाकामं याजयेदित्युक्ता त्रिरुदाहित्वयुक्तानि । तस्मादपि तदपेक्षा दादशसंख्या ।

वसतीवरीपर्य्यन्तानि पूर्वाणि तन्त्रमनपाकालत्वादवभृथादोन्युत्तराणि दीक्षाविसर्गार्थत्वात् ॥१९॥ (६०)

एवं वसतीवरीपर्य्यन्तानि पूर्वाणि तन्त्रमनपाकालत्वादवभृथ माप विशेषाणि तन्त्रं भवति अवभृथादीनि पोत्तराणि तस्मादवश्यं दीक्षाविसर्गार्थत्वात् । स हि दीक्षाकोपनार्थः । इदं खलु वयं दीक्षां प्रवेशयित्वा देवाः खर्गलोकमायन् यदध्वानि तानेव दीक्षामालभते अथ यदपोऽवभृथमभ्यवयन्ति तानेव दीक्षां पुनरप्सु प्रवेशयन्तीति तस्मं च दीक्षोत्पत्ता सा तन्त्रमेवोच्यते विशेषाणपक्षत्वात् ।

तथा चान्यार्थदर्शनम् ॥२०॥ (७६०)

एवं च सत्यन्यार्थदर्शनम् इदं सूत्रं भविष्यति यद्यपि यदपो वा एव इत्यादि इति ।

चोदनाभूयस्त्वे तदेकतन्त्रं समवेतानां कालसंयोगात् ॥२१॥ (पू०मी०सि०)

यज्ञाग्नेयाग्नीषोमीयवदिति। यथा यज्ञाग्नेयाग्नीषोमीयवदोदनपचनक्रियाकारकसंबन्धेन प्रयोगः कृतः क्रमवेतानां कालसंयोगात् क्रमवेतानां पदार्थानां कालसंयोगात् पौर्वमासी पौर्वमासी यजेत सामवेति। तस्मात्तत्र पौर्वमास्यामेवाङ्गानि च प्रधानानि च क्रियन्ते। इह पुनः साङ्गकालस्मृतित्वादित्येवमवस्थितो हेतुः। तस्मादेव बादरायणः प्रधानानि पौर्वमासी यत् सह कार्याणि।

प्रतिमासप्रवृत्तानां भेदेनानुष्ठानविधानम्।

यत्र यानि प्रधानेरहस्सहायानि तेषु चिन्त्यते 'किं तान्यपि सकृत्'। अथ वा भेदेनेति। किं प्राप्तम्?। तत्रातिदिशति। किं कारणम्? यदं सकृत्त्वं प्रधानवचनोऽनुवर्तमाने बादरायणेन प्रधानानां सहप्रयोगेति। तदुक्तं विधिरत्न प्रकरणाधिकरणे प्रयोगं बादरायण इत्येवं ग्राह्यम्।

भेदस्तु तद्भेदात् कर्मभेदः प्रयोगे स्यात् तेषां प्रधानशब्दत्वात् ॥२२॥ (सि०)

भेदस्तु स्यात् कुतः तद्भेदात्। तदित्यनेन पूर्वसूत्रनिर्दिष्टः कालः प्रतिनिर्दिश्यते। कालभेदात् काले भिद्यमाने तन्त्रभेदो भवति यथा दर्शे पूर्वमामेऽपि। इहापि कालभेदः पर्वणः परत्र इति। तत इहापि कर्मभेदः स्यात् तत्रभेद इति। अथ पुनरङ्गानां कालभेदः

भेदो विद्यायते । तेषां [illegible] । ग्रहीतान्यङ्गानि यत्र प्रधानं तत्र विद्यायते । बहुप्रधानं तत्प्रायकाण्यङ्गानि । यत् प्रधानं [illegible] तत्राङ्गैः ।

तथा चान्यार्थदर्शनम् ॥२२॥ (३०)

पत्नीसंयाजान्तान्यङ्गानि प्रधिष्ठन इति भेदेनाङ्गा पत्नीसंयाजान्तता दर्शयति ।

प्रकाशुत्वा वचनं तद्वत् ॥२३॥ (उद्दा०)

संस्थिते संस्थिते आवदनीदक्षिणाद्वारं प्रविश्य उत्तमाग्रे कुशस्तम्बमाहरेति प्रेषणीति संस्थिते संस्थित इति शीघ्रवचनात् कुशस्तम्बभेदं दर्शयति ।

पञ्चतिरिक्तवच्च ॥२४॥ (३१०)

पञ्चतिरिक्तवच्च क्रियते यथा पञ्चदशिरिक्तेन शिल्पाभ्यः कार्यः । न तावदतिरिच्यते एको न भवति एकादशेति पञ्चवा दादशाङ्गानि । तत्पञ्चानां भेद उपपद्यते । तत्प्रभावे सकृदेवैकादशिनानाभवेत तस्मादपि भेदः ।

अथेदं प्रकरणाधिकरणम् ।

सुत्याविद्यौ सुतस्तुत्यावर्तेषामुपसदश्च प्रकृतत्वात्तदाधानवत् ॥२५॥ (३२०)

उपसदश्च कुशस्तम्बाहारि चतुरः कुशानाहरेति भवतीति । द्वादशाहे षोडशेन द्वादशे । तयेदं विधा

यैते। दादयाङ्गे ब्रह्मणाभ्युपलक्षयितव्यानि उताविभा-
रेणैव प्रयोगः कर्तव्य इति। किं प्राप्तम्?। कृत्स्नाविशेषा-
देतेषां सर्वेषामङ्गानां प्रयोगः कर्तव्य इति?। प्रकृत्य-
न्वयात्। प्रकृतो सोऽयमङ्गोपलक्षयितम्। सर्वाणि चैतानि
तत्प्रकृतीनि। अतः सर्वाण्युपलक्षणीयानि। नन्वेवमसौ
देवता इन्द्रः सकृदुपलक्षणेन संस्कृतः संस्कृत एव। तस्य
पुनरुपलक्षणमनर्थकमित्युच्यते। आशोपलक्षणसंस्कृतः सं-
स्कारः सोऽयमतस्य प्रधानस्याङ्गम्। तस्मादुत्तरार्थं पुनः
पुनरुपलक्षयितव्यः। आशाशब्दवत्, तद् यथाग्नेयं क्षण-
यीवमालभेत सौम्यं वब्रुमाग्नेयं क्षणयीवं पुरीषायव-
मैमान इति एकस्येऽग्नेरैन्द्राग्नस्य आशाशब्देनाङ्गानि
क्रियन्ते। एवमिहापि॥

अपि वेन्द्राभिधानत्वात् सकृत् स्यादुपलक्षणं
आशया तत्परार्थत्वात् ॥२७॥ (वि०)

अपि वा न स्यात् सर्वेषामुपलक्षणम् अधिकारिणैव
प्रयोगः स्यात्। कुतः? इन्द्राभिधानात्। इन्द्रोऽपोपलक्ष-
णेन संस्कृतो स सकृत् संस्कृतः संस्कृत एव न पुनः सं-
स्कर्तव्यः। ननु चतुरहेऽसौ संस्कृतश्चतुरहे कृत्स्नायाश्चेति
वचनात्। अविवक्षितोऽप आशा इन्द्र आशाशब्देनावदेव
विवक्षितम्। विवक्षिते सति आशे आशां मिमीते आशाश-
ब्दवत् चतुरह आशाशब्देति उपलक्षणविशेषणशब्देन विभक्ति-
श्रुती तत्तन्त्रौ न भक्षयतीति वक्तुम्। यद्यप्याशाशब्दस्य मन-
स्तन्त्रो विवक्षितौ न पुनः आशाभिधानम्। आशाश-

अवधिति प्रत्यक्षः संबोधः । चतुरङ्ग आगच्छेति परोक्षः तुल्यप्रत्ययेन व्यवधानात् । नन्वेवं च मुख्यालाभेऽपि स विवक्षितो भवतु नैवं अविद्विरोधः । मुख्यत्वव्यविशेषात् । ननु चतुरङ्ग इति मुख्याविशेषोऽवगम्यते । न खलु, किं चारत्वं वाजस्य अचर्थत्वात् । चतुरङ्गवाक्येऽपि मुख्यत्वव्यर्थः चतुरङ्गादिमुख्यामागच्छेति । यस्मादर्थं नाथ देवतामागच्छति यजती तृहेतेन केवलमसौ भवति । स यजतावङ्गभावोऽयमुपलक्ष्यते । सर्वमुख्यासु चाङ्गो तुल्यः । तथ चतुरङ्गवचनं प्रदर्शनं मुख्यत्वात् मुख्येन हि प्रदर्शनं भवति यथा इन्द्रान्तातिथा संतिष्ठते मानुषाणान् यजतीति ।

अविभागाच्च ॥२८॥ (वे०)

अत्र यदुक्तमाचार्यैनवधिति तत्र मूलः विभक्तः आत्मः लक्ष्यलक्षणयोः सौम्येन व्यवधानात् तथ व्यवधौ विभेदः । पूर्वत्र लक्ष्यलक्षणदेवतात्मानमर्थं नोत्तरत्रेति । अत्रेह विभक्तिभाजः मुख्या अध्वर्यवः वेनचित्तास्तु न एवंते विशेषः । चतुरङ्गवचनं वा विशेषवचनिमत्युक्तम् । तस्मादविभागेन प्रयोजः ।

पत्नी कृष्णादीनां तत्रताधिकरणम् ।

पशुगवे कृष्णीगुणवपात्रपत्नीनां प्रभुत्वात् तत्सम्बन्धः स्यात् ॥ २९ ॥ (पू०)

वाजपेये वाजायनेषु पशुषु कुल्माषः श्रूयते वपायपुरोडाशं तन्त्रमस्ति वा न वा इति विचारणा। किमस्त्येवा कुल्मी सर्वपशूनामवदानानां वपायै। सूक्ष्मं ह्रदयानां, वपात्र यवी वपानाम्। तत्रान्तत्वं स्युः।

भेदस्तु सन्देहादेवतान्तरे स्यात् ॥३०॥ (२५०)

एकादशिनेषु तु भेदेन कुल्माषादीनि स्युः। सन्देहात्। एकस्यां कुल्माषं पशूनां सन्देहः स्यात्। कस्य पशोः काण्यवदानानीति। एवं ह्रदयादीनां वपानां च।

अथवा लिङ्गकर्म स्यात् ॥३१॥ (३५०)

अथ वा न स्यान्नेदः। कुतः?। सर्व प्रयोगात्, यत्तु सन्देहादिति अर्थाधिक्ं किञ्चित् करिष्यते तेन विशेष पक्षं अधिगमिति॥

प्रतिपाद्यत्वादङ्गानां भेदः स्यात् स्वयाज्याप्रदानत्वात् ॥३२॥ (४५०)

कुल्माषान्तत्वभावो न घटते याज्यान्तत्वादङ्गानाम्। याज्यादेर्वान्ते वसां जुहोतीति श्रुतं प्रकृतौ तत्र स्वयाज्यादेर्वान्ते वसा हुता दृष्टापि तत्रैव होतव्या। न च वसानां लिङ्गं कर्तुं शक्यम्॥

अपि वा प्रतिपत्तित्वात् तन्त्रं स्यात् स्वत्वस्मृतिभूतत्वात् ॥३३॥ (सि०)

अपि वा सर्वं कुर्यात् प्रतिपत्तिलाघवात् । तेनैवमुक्ता यवाग्वामिति प्रतिपत्तिः प्रतिपत्तिः कर्म । न चैवमेति कुतः तद्वारत्वाय प्राधान्यं फलसम्बन्धाय तथात्वाः स्वयाज्याईचान्त एव हुता भवन्ति । ननु परयाज्याईचान्तेऽपि प्रसज्यन्ते । उच्यते स्वलक्षान्नुतिभूतत्वात् आह च श्रुते स्वयाज्याईचान्ते होतव्या न परयाज्याईचान्त इति । तस्मात् परत्र होमो न दोषाय नाभ्युदयाय अतस्तत्रमेव कुर्याः स्यात् ॥

सकृदिति चेत् ॥ ३४ ॥ (आ०)

इति चेत् पश्यसि सकृत्वं न श्रुतमिति तेन तर्हि सकृदेव होमः प्रथमे याज्याईचान्ते भवत्येवं सकृत्वं चानुयद्दीष्यते याज्याईचान्ते च हुतं भविष्यति । स्थितायां प्रतिज्ञायां सूत्रेण परिचोदयति ॥

न कालभेदात् ॥३५॥ (आ० नि०)

नैतदेवं प्रथमेऽईचान्त इति । किं तर्हि प्रत्यईचान्ते होतव्याः । कुतः कालभेदात् । भिन्ना याज्याईचान्ताः निमित्तसमवी चैवं याज्याईचान्त इति अधिकरणस्वात्वात् । निमित्ताद्धि चैवं नैमित्तिकाद्धि सर्वया भिन्ने भुङ्क्तीति । तस्मात् सर्वयाज्याईचान्तेषु होमः ॥

याज्यानुवाक्याभेदात् सवानां याज्यानुवाक्याधिकरणम् ।

पक्षिभेदात् कुल्माषशुक्लयवागूनां भेदः स्यात्

॥ २६ ॥ (पू०)

यत्ति सौत्रामण्यां तत्राग्निनो यो धूम्रः सारस्वतो यो मेषः ऐन्द्रं चरुम् ऐन्द्रस्येवंविधाः पशवः सन्ति । तेष्वपि तन्नाभ्यः प्रभुत्वात् प्राप्तोऽपोद्यते । सौत्रामण्यामेवंजातीयेषु ॥

व्याख्यन्तरेषु भेदः स्यात् पक्षिवैषम्यात् ॥

२६ ॥ (सि०)

एवादग्निनेषु तु नानाजातीयेषु कुल्माषादीनां भेदः स्यात् पक्षिवैषम्यात् । विषमा हि पक्षिः आत्मानामाविष्कानाच्च मांसानाम् । यावता कालेनात्मानि ध्वस्ते तावतावित्कानि विलीयन्ते तथाचदानसंभेदो भवति । तस्मात् पात्रभेदः स्यात् ॥

दृष्टिदर्शनाच्च ॥ २८ ॥ (हे०)

दृष्टिश्च सौत्रामण्यां शूलगवोऽवाविषु दृश्यते शूलेषु आचरेच्च वपासद्यमभ्यवद्यन्तीति । तस्मादपि भेदः ।

वपाजभेदाधिकरणम् ।

वपाजानि च कुल्माषशुक्लसंस्थानाम् ॥

२८ ॥ (पू०)

यावत्प्रतिग्रहेष्वां वाक्यशेषत्वसम्भवात्। पुरोडाशा यावत्संख्याः श्रूयन्ते तावतीष्वाज्यं प्रतिग्रहीष्यन् यावत्सु कपालेषु पुरोडाशानवद्यति तावत्सु कपालेष्वाज्यमवद्यतीति तत्र विचार्यते किं दर्शेषु कपालेषु सर्वेषां ग्रहणं कर्तव्यम् उत यत्र प्रतिपुरोडाशं कपालचतुष्कभेद इति, किं प्राप्तं कपालानि कुम्भीवत् यथा प्राजापत्येषु कुम्भी तन्त्रम् एवं तुषसंस्थानां पुरोडाशानां कपालानि तन्त्रमित्यर्थः। किं कारणमेवं कल्पते नानुपपद्यते। सर्वेषु चतुर्षु कपालेषु संस्कृता भविष्यन्ति॥

प्रतिप्रधानं वा प्रकृतिवत्॥ ४०॥ (सि०)

प्रतिपुरोडाशं कपालचतुष्कभेदः एवं यथाप्रकृति कृतं भवति। प्रकृतौ दर्शपूर्णमासयोः प्रतिपुरोडाशं कपालानि भिन्नानि दृष्टानि तद्वदेव भेत्तव्यानि चोदकानुग्रहात्। अथि च यदि कपालानि तन्त्रं भवेयुः। नैकोऽपि पुरोडाशश्चतुष्कपालेषु संस्कृतः स्यात् स वै कपालावयवेषु व्याप्तो भवेयुः। तत्र कपालशब्दो बाध्येत। तस्माद्भेदः॥

सर्वेषां वाभिप्रथमं स्यात्॥ ४१॥ (यु०)

इदं च श्रूयते यावत्कपालं पुरोडाशं प्रथयतीति तत्रावयवं तन्त्रभावे सम्भवयितुम्। तस्मादपि भेदः।

अवघातार्थत्वाच्चा तत्संस्कारवत्त्वम्।

दर्शपूर्णमासयोः श्रूयते व्रीहीनवहन्तीति तत्र मन्त्रः अवरुन्धे दिवः सपत्नं बध्नामीति। तत्रेदं विचार्यते।

किं प्रतिप्रहारं मन्त्र उत सकृदेवादाविति। किं प्राप्तम्। प्रतिप्रहारमिति। कुतः। प्रहारात् प्रहारः कर्मान्तरापत्तेः पर्यवसानं कर्मभेदे च सति श्रूयते विशेषः येन कर्मणा सविमतिर्मन्त्रस्तद्वत् इति। श्रूयमाणे च विशेषे भेदो ह्रस्वः। तस्मात् प्रतिप्रहारं मन्त्र इत्येवं प्राप्ते उच्यते।

एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वात् ॥ ४२ ॥ (सि०)

तस्मिन्मन्त्रार्थनानात्वादाहुत्तौ मन्त्रस्य सकृत् प्रयोगः स्यात्। एकस्मिन् द्रव्ये प्रोक्षादौ संस्काराणामवहन्त्यादीनां व्याख्यातमेककर्मत्वम् आतण्डुलनिर्वृत्तेरेकमिदं कर्मेति सर्वेषां त्वेककर्म्यादितेषां च तद्गुणत्वादिति। ननु प्रतिप्रहारं कर्मभेद इत्युक्तमेकस्यैव कर्मणोऽयमभ्यासः फलस्याभ्यासासाध्यत्वात् सोमयजिवत् तस्मिन् मन्त्रार्थनानात्वादाहुत्तौ मन्त्रस्य सकृत्प्रयोगः। यत्र मन्त्रार्थस्य नानात्वं तत्राहुत्तिर्भवति। यथाग्नौ लोकम्पृणायाः। यत्र पुनरेक एव मन्त्रार्थस्तत्राहुत्तिरनर्थिका। इह चैको मन्त्रार्थः। कथं ज्ञायते करणोऽयं मन्त्रः। करणस्य कर्त्तव्यस्य वस्तुतोऽभिधानार्थः समधिगतः। समस्ताश्चैते प्रहाराः कर्त्तव्याः। समस्ता हि कार्यं साधयन्ति न व्यस्ताः। समानां व्रीहीणां तण्डुलविवेचनं यत्सञ्चिकीर्षितं तदभिसन्धातव्यम्। तस्मात् सर्वप्रहाराणां क्रिया मन्त्रेणाभिसंहिता। तत्राहुत्तिरनर्थिका तस्मान्मन्त्रस्य सकृत्प्रयोगः स्यात्।

नानावीजेष्टिषु मन्त्रसंख्यादिविकल्पः ।

द्रव्यान्तरे हृतार्थत्वात् तस्य पुनः प्रयोगान्यत्वस्य च तद्गुणत्वात् पुनः प्रयोगः स्यात्तदर्थं न विधानात् ॥ ४३ ॥ (पू० सि०)

राजसूये नानावीजेष्टिः अग्नये गृहपतये द्वादशकपालं निर्वपेत् सोमाय वनस्पतये द्वादशकपालमित्येवमादि । तस्याग्नेयहविषः समन्त्रकस्योदकेन प्राप्तौ सत्यामपि पूर्वेण न्यायेन सञ्जघन्यस्य प्रयोगः प्राप्तः । सर्ववीजानां विप्रुषीकरणं चिकीर्षितं तदभिमन्यीयत इति । तथा प्राप्ते उच्यते द्रव्यान्तरे वीजान्तरे पुनः प्रयोगः स्याद्यन्यस्य । कुतः ? कृतार्थत्वात् पूर्वस्मिन् बीजे योऽवदानेः स कृतार्थः । सन्निपत्योपकारी हि सः स च येन वीजेन सन्निपतितस्तदेव संस्करोति । तदेव चेत् संस्करोति उत्तरसंस्कारार्थं पुनः प्रयोक्तव्यः । तस्य पुनः प्रयोगाद्यन्यस्यापि पुनः प्रयोगः तद्गुणत्वात् । तस्यापि वीजान्तरे, तस्यावदानेः स मन्त्रो गुणस्तदर्थेन विधानात्तस्याप्यसौ प्रतिकर्मावसायिना चोदकेन विहितस्तस्मात् प्रतिवीजं मन्त्रस्यावृत्तिः ।

निर्वापादिषु मन्त्रभेदाविकरणम् ।

निर्वपणलवनस्तरणाज्यग्रहणेषु चैकद्रव्यवत् प्रयोजनैकत्वात् ॥ ४४ ॥ (पू०)

दर्शपूर्णमासयोश्चतुरो मुष्टीन्निर्वपतीति तत्र मन्त्रो देवस्य त्वेति। तत्रैव च प्रयाजानां सवनमध्यः बर्हिर्देवसदनं दामीति। तथा स्रुचमध्यः अर्थाभ्यदमुन्वास्तृणामीति। आज्यग्रहणमन्त्रः धामनामासीति, तेषु सन्देहः किं मन्त्रस्य सकृत् प्रयोगः अथ वा प्रतिसृष्टि प्रतिदानं प्रतिधातं प्रतिग्रहणम्। किं प्राप्तं निर्वपणसवनस्रुचाज्यग्रहणेषु वैकद्रव्यवत् प्रयोजनैकत्वात्। निर्वपणादिषु एकद्रव्यत्वात् सकृत् प्रयोग इत्यर्थः कुतः प्रयोजनैकत्वात्। तत्र तत्रैकं प्रयोजनं निर्वपणे तावद्विधाधामावापनम्। सवने बर्हिःस्रुचोश्च बर्हिषः उपवादनं, स्रुचे वेधाधादानम्। आज्यग्रहणे यानयोग्यस्याज्यस्योपादानम्। यावता प्रयोजनं तच्चिकीर्षितं तदर्थो मन्त्र इत्युक्तम्।

द्रव्यान्तरवद्वा स्यात् तत्संस्कारात्।

४५ ॥ (सि०)

द्रव्यान्तरवद्वा स्यात् नैकद्रव्यवद्भेदः स्यादित्यर्थः। कुतः तत्संस्कारात् ये व्रीहय एकेन सृष्टिना निवपनाख्ये संस्कृताः सन्निपत्योपकारित्वात् निर्वाप्याः। द्वितीयो सृष्टिरन्यान् व्रीहीन् संस्करोति। तत्र यदि मन्त्रो न प्रयुज्येत मन्त्रलक्षणेन संस्कारेण तेषां वर्जनं स्यादेवं सवने तस्मात् तत्र तत्र मन्त्रस्यावृत्तिः।

[illegible]

वैदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ॥ ४६ ॥ (पू०)

वेदिप्रोक्षणं व्याख्यातं प्रोक्षतीति। तत्र मन्त्रो वेदिरसि बर्हिषे त्वेति। तत्र किञ्चाते किं मन्त्राभ्यास इति मन्त्रोऽयमा खनदेवेति। किं प्राप्तम्? वेदिप्रोक्षणे मन्त्राभ्यासः कुतः कर्मणः पुनः प्रयोगात्। यस्मिन् कर्मप्रयोग उक्तो मन्त्रस्तदर्थोऽयमिति यद्भवते विधेयस्यादावृत्तिः।

एकस्य वा शुचिविधेः द्रव्यैकत्वात् तत्कृत् सकृत्प्रयोगः स्यात् ॥ ४७ ॥ (सि०)

सकृदेव प्रयोगः कुतः द्रव्यैकत्वात्। एवं तर्हि द्रव्यं सकृदुक्तेन मन्त्रेण संस्कृतं तत्र भूयो मन्त्रकार्यं नास्ति। ननु कर्मवदेव मन्त्रो द्रव्यं संस्करोति तत्र कर्म भिन्नम्। उच्यते। नैतदस्ति मन्त्रस्तिष्ठन्न युष्यः। क्रियाभ्यावृत्तौ हि क्रियासमवायैः प्रत्ययः न क्रियाभेदे तन्मन्त्रवदावृत्तिः तत्र कर्तव्यम्। सकृदुक्तेन मन्त्रेण मन्त्रवत् कृतमावृत्तिस्मादनार्था पुनः क्रियां तत्कृत् सकृत्प्रयोगः।

[illegible]

काण्डद्वयेन प्रत्यक्षं कर्मभेदात् स्यात् ॥४८॥ (पू०)

ज्योतिष्टोमे कण्डूयनादौ कण्डः कण्डिश्च शब्द इति यद्यनेकत्रिशब्दे पुनरुक्तमनुवादकत्वे तदा किमा। किं प्रत्यक्षं मन्त्रादृष्टिः शब्द वा अनेकेन प्रयोग इति। किं प्राप्तं प्रत्यक्षं मन्त्र इति कुतः कर्मभेदात्। अङ्गे कण्डूयनं कर्म भिन्नं यतः पश्चिवचनात् शब्दतो विशेषः तस्मादावृत्तिः।

अपि वा चोदनैककालमेककर्म्यं स्यात्।

४८ ॥ (सि०)

अपि वा नैवं स्यात्। न शब्द कण्डूयनं चोद्यते। अर्थात् खिलते कण्डूयनमर्थम्। किमतः यदि चोद्यते पदृष्टार्थं स्यात्। अमाप्ते शास्त्रमर्थवदिति। प्रतिप्रधानं चाङ्गभेदात् कर्मनानात्वं भवेत् तथा शब्दतो विशेषः अथ पुनरर्थवदिति कण्डूयने यावतोत्पन्ना कण्डूयनीयं तावच्चिकीर्षितम्। तत्र विशेषो न शब्दतो। ननु यस्याङ्गस्य निष्कर्षणं श्रुतं तत् संस्कृतमङ्गान्तरे पुनः कर्तव्यम्। उच्यते। नाङ्गनिष्कर्षणार्थोऽयं शब्दः किं तर्हि कण्डूयनार्थः। सा च कण्डूयनस्य न शरीरस्य। तत्र न शब्दतो विशेषः। तस्मात् सकृदेव प्रयोगः।

स्वप्नदीतरचाभिवर्णकामेध्यप्रतिमन्त्रेषु

स्वप्नदीतरचाभिवर्णकामेध्यप्रतिमन्त्रेषु चैवम् ॥ ५० ॥ (सि०)

[illegible]

[illegible] भिहुटस्य उच्चतीरोक्तो यत्ने । [illegible]
पदत्वं वक्तव्यम् । स यदा पुनः प्रतिबुद्धः [illegible] स्रोतसं वा नदीश्वरति, मन्त्रानेव यजमानेऽग्नौ वा मेध्यमेकैकाक्षरं पठति तत्र किं मन्त्रलोपादि- [illegible] क्तदेव प्रयोग इति । तत्र विधेयापरुपादानेन बाधाभावा- मुच्यते । स्वप्नादिषु दैवं यथा कल्पयेत् [illegible] इत्यर्थः । कृत्स्नो राशिमन्त्रावृत्तिश्च स्वप्नस्य प्रसुप्तस्य नैकाग्र्यात् । तथा सर्वस्तोमादि तितौः [illegible] वर्षादि सर्वमेध्यानि च युगपत् सर्वमन्त्रसमाप्तौ मन्त्र न यज्ञते विधेयः । तस्मादनाहुतिमन्त्रकः ।

प्रयाजे मन्त्रसमाप्तावित्यधिकरणम् ।

प्रयाजे स्वार्थनिष्ठ ते. ॥ ५१ ॥ (सि०)

दीक्षितस्य प्रक्षितस्य प्रयाजमन्त्रः । अग्नादग्निमेव प्रेषीति । तत्र विचार्यते किं विधानेन पुनः पुनः प्रतिष्ठ नागो मन्त्रं प्रबुध्यते सकृदेवादाविति । विधेयापरुपत्वात् प्रतिप्रस्थानमिति प्राप्त उच्यते प्रयाजे स्वार्थनिष्ठेः पदं मन्त्रावृत्तिश्च प्रतिहते स्वार्थनिष्ठतेस्तुच्छ प्रस्थानाभिधानमन्त्रः । तस्मात् सकृदेव प्रयोक्तव्यः ।

उपरवमन्त्रः सकृत् स्यादाशीर्वचनवत् ॥ ५२ ॥ (अ०)

ज्योतिष्टोमे उपरवमन्त्रः रथोऽक्षो वसमङ्गो वेष्णवान् खनामीति। तत्र सन्देहः किं सर्वोपरवेषु सकृदेव मन्त्रः प्रयोक्तव्यः उत प्रत्युपरवमिति। किं प्राप्तम् उपरवमन्त्रस्सकृत् स्यात् सकृदेव प्रयोक्तव्यः कुतः बहुवचनात् बहुवचनान्तोऽयं वेष्णवान् खनामीति। यदि प्रत्युपरवं प्रयुञ्जीत एकस्मिन् बहुवचनान्ताभिधानं न साधयेल्लोकवत् यूना स्थविरे एकस्मिन्वर्थे बहुवचनं न प्रयुज्यते। अपि च सकृदुक्त एकः प्रज्ञाति सर्वोपरवानभिधातुम्। प्रज्ञाति वेदाङ्गस्थितिरनर्थिका। तस्मात् सकृदेव प्रयोक्तव्यः। (पीठपादचतुष्टयाकारोवाङ्मात्रो मन्त्रमेद उपरवः।)

न सन्निपातित्वादसन्निपातिकर्मणां विशेषारम्भे कालैकत्वात् ॥ ५३ ॥ (सि०)

नैव तन्त्रं स्यात्। कुतः सन्निपातित्वात्। सन्निपातिखननकर्मणा यैवोपरवेष सन्निपतितं तदर्थमेव विज्ञायते। मन्त्रोऽपि चार्थसन्निपाती मन्त्रान्तेन कर्मादिसन्निपातादतो यस्योपरवस्यार्थं मन्त्रः सन्निपतितस्यैव मन्त्रकारितः संस्कारो न सर्वेषाम्। अतो न सकृत् प्रयोक्तव्यः। असन्निपातिकर्मणां विशेषारम्भे कालैकत्वात् सकृदुक्ते ये त्वसन्निपातिकर्मणां मन्त्राः

यदा सूत्रब्राह्मणे [illegible] तेषामिकाकालत्वात् [illegible] स्यात् । वस्तु न [illegible] प्रातिपदिकोपात्तमिङ्गितो [illegible] मार्थः शेषत्वे नाभिधितः [illegible] धात्वर्थस्य शब्दस्यासम्भवात् । एवमेव [illegible] वचनम् । तस्मादविरोधः ।

हविष्कृदादिमन्त्रेषाधिकरणम् ।

हविष्कृदध्रिगुपुरोऽनुवाक्यामनोतस्तद्वादिः कालभेदात् स्यात् ॥ ५४ ॥ (पूर्व०)

इदं सूत्रं पूर्वसूत्रमुदाहृत्यार्थं कालेऽवादिति विभक्तं हविष्कृदध्रिगुपुरोऽनुवाक्यामनोतस्तद्वादिः कालभेदात् स्यादिति । अथ हविष्कृदादिमन्त्रम् । ज्योतिष्टोमे प्रतिसवनं सवनीयाः पुरोडाशाश्चेत्र हविष्कृदाह्वानम् । वाजपेये सप्तदशवदः प्राजापत्यत्वात् सदाध्रिगुप्रेषः । सवनीयाः पुरोडाशाश्चेत्र हविष्कृदाह्वानम् च । तेषु विषये किं तत्र सूत्रं स्यात् वयोः पूर्व वाऽनुक्तेति । यदत्रानुपपन्नं तत्परीक्षते । आवृत्तिः स्यादिति । हविषः प्रयोजनात् । तत्र प्रयोजने यद्धविष्कृदाह्वानमध्रिगुप्रेषश्च तत्र प्रयोजनाभेदे यद्यपि विशेषः प्रातःसवनीयानां पुरोडाशानां पौर्णमासीवत्सूनां अध्रिगुरिति । तत्र सवनीयाः शेषेण सवन-

[illegible]

[illegible] ॥ ५४ ॥ (३०)

[illegible]

वारिष्यवचनात् ॥ ५५ ॥ (३०)

[illegible]

अथ द्वादशाध्यायस्य प्रथमः पादः।

पशुपुरोडाशाधिकरणम्।

एकादशेऽध्याये तन्त्रावापलक्षणं व्याख्यातम्। अधुना प्रसङ्गलक्षणं द्वादशे व्याख्यायते। प्रसङ्गशब्दार्थोऽन्येषाम्। एवमेव प्रसङ्गः स्यात् विद्यमाने स्वके विधाविति। अन्यस्य कृतस्याप्यन्यत्रासक्तिः प्रसङ्गः। यथा प्रदीपस्य प्रासादे कृतस्य राजमार्गेऽप्यालोककरणम्। तदिह प्रसङ्ग एवादौ विचिन्त्यते। अग्नीषोमीयपशौ पुरोडाशः। अग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालन्निर्वपेदिति। किं तस्य पृथक्त्वेनाङ्गानि कर्त्तव्यानि उत यानि पशौ कृतानि तस्याप्युपकुर्वन्तीति ततः सूत्रेणैवोपक्रमः।

तन्त्रिसमवाये चोदनातः समानानामैकतन्त्यमतुल्येषु तु भेदः स्यात् विधिप्रक्रमतादर्थात् श्रुतिकालनिर्देशात् ॥ १ ॥ (पू०)

तन्त्रं साधारणो धर्म्मग्रामः। यथा दर्शपूर्णमासयोः राज्यभागादिः पूर्वः। खिष्टकृदादिरुत्तरः। स येषां प्रधानानां तानि तन्त्रीणि प्रधानानि तेषां तु समवाय एकदेशकालकर्तृत्वे चोदनातः समानानामेकवाक्यचोदितानामैकतन्त्यत्वं भवति। यथा दर्शपूर्णमासयोर्यद्या च चित्रायामिष्टौ। अतुल्येषु तु भेदः स्यात्।

यानि तु चोदनातो न तुल्यानि। नाना वा वाक्यैरुदितानि तेषु तु भेदः स्यात् तन्त्रस्य। यथाऽत्रैवाग्नीषो-

मीयं पशुमालभेत अग्नीषोमीयं पशुपुरोडाशमेकादश-कपालं निर्वपतीति। किं कारणम्। विधिप्रक्रमतादर्थ्यात्। विधिर्विधानं तदङ्गानां प्रयोगः। तस्य प्रक्रमः तदर्था प्रवृत्तिः। विधिप्रक्रमतादर्थ्यं विज्ञायते। अयं पश्वर्थो विधिप्रक्रमो न पुरोडाशार्थ इति। कथं पुनः पश्वर्थत्वं विधिप्रक्रमस्य तादर्थ्यं? श्रुतिकालनिर्देशात्। श्रुत्या तत्र कालो निर्दिश्यते। अग्नीषोमीयप्रणयनादनन्तरं पशोः कालः। तत्र तस्य चोदना। वपाप्रचारादूर्ध्वं पुरोडाशस्य कालः। पशोरवसरे यो विधिप्रक्रमः स केवलः पश्वर्थो विज्ञायते पुरोडाशस्याप्राप्तत्वात्। अतस्तस्य पृथक्तन्त्रं कर्त्तव्यम्। लिङ्गञ्च पश्वर्थतां तन्त्रस्य दर्शयति। यदेकादश प्रयाजान् यजति पशुमेव तत् प्रयजति। यदेकादशानुयाजान् यजति पशुमेव तदनुयजतीति एवकारकरणादवधारणं विज्ञायते पशुमेव न पुरोडाशमिति।

गुणकालविकाराच्च तन्त्रभेदः स्यात् ॥२॥ (आ०)

अपि च पशुकाः प्रयाजानुयाजा गुणतः कालतश्च विकृताः एकादशसंख्याः। पशावुभये वा पञ्चभिश्च प्रयाजैस्त्रिभिरनुयाजैः पुरोडाशस्य कार्त्स्न्यम्। तथाष्टपदाज्येनानुयाजाः पशोरिज्यन्ते केवलेनाज्येन च पुरोडाशस्यार्थे कालविकारेऽपि चासति हविषि पौरोडाशिकैः प्रयाजैर्भवितव्यम्। पशुकासु तिष्ठति पशौ वर्त्तन्ते। तिष्ठन्त मेव प्रयजन्तीति वचनात्। उभयेऽपि पुरोडाशस्य पृथक्तन्त्रे

वा क्रियमाणा यथा सम्पादिता भवेयुः। तस्मादपि तन्त्रभेदः।

तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्वाविशिष्टत्वात् ॥ ३ ॥ (सि०)

अथ वा नैव भेदेन पुरोडाशस्य तन्त्रं कर्त्तव्यम्। किं तर्हि मुख्यतन्त्रेण सिद्धिः स्यात्। पशुकमेव तन्त्रं पुरोडाशस्योपकुर्य्यात्। किं कारणं तन्त्रमध्ये विधानात्। पशुकस्य तन्त्रस्य मध्ये पुरोडाशो विहितः। अग्नीषोमीयस्य वपया प्रचर्य्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालन्निर्वपतीति। किमतस्तन्त्रार्थस्वाविशिष्टत्वं भवतीति तन्त्रस्थार्थस्तन्त्रार्थः। अङ्गकृत उपकारः। सोऽत्रावशिष्टः पुरोडाशस्य च सन्निधानाविशेषात् पशावपि क्रियमाणान्यङ्गानि पुरोडाशस्य सन्निहितानि। सन्निधानाच्च पशोरप्युपकुर्वन्ति प्रदीपवद् यथा प्रासादे कृतः प्रदीपः सन्निधानाद्राजमार्गेऽप्युपकरोति। विषम उपन्यासः। स खलु प्रत्यक्षेण ज्ञायते। अयं पुनरप्रत्यक्षोऽङ्गोपकारः कथं शक्यो विज्ञातुमिति। अयमपि शास्त्रदृश्यः। शास्त्रप्रत्यायनीयते। शास्त्रं चेदृदर्शपूर्णमासवत् कर्त्तव्यानीति। तद्यद्येवं कृतानि किमिति नोपकरिष्यन्ति। दर्शपूर्णमासयोः स्वप्रधानैरेकदेशकालकर्तृकाणि क्रियमाणान्युपकृतवन्ति। इहापि तथाविधान्येव क्रियन्ते तस्मादिहापि तद्वदेवोपकुर्वन्तीति विज्ञायते। आह नेह तद्विधानानि दर्शपूर्णमासयोः स्वप्रधानान्युद्दिश्य कृतान्यङ्गानि। इहापि तद्वदेव कर्त्तव्यानि।

न च पुरोडाशमुद्दिश्य कृतान्यङ्गानि इहापि तद्वदेव कर्त्तव्यानि। न च पुरोडाशमुद्दिश्येह क्रियन्ते किं तर्हि यज्ञम्। तस्मात् पुरोडाशस्य न प्रकृतिवत् विकृतानि भवन्तीत्युच्यते। प्रकृतौ न शब्द उपदेशः न हि तत्र श्रूयते। प्रधानान्युद्दिश्याङ्गानि कर्त्तव्यानीति। किं तर्हि अर्थात् क्रियन्ते तेषां तत्र चिकीर्षितत्वात्। न चार्थात् कृतं चोदकेन प्राप्यते यत्कारणं विध्यन्तरम्। तत्राचोद्यात् कृतान्यङ्गानि इहापि तद्वदेव कर्त्तव्यानि न च पुरोडाशमुद्दिश्य तेन समुचितं तत्प्राप्यते न पाठात् बाह्यम्। तस्मात् त्वमुद्दिश्यापि क्रियमाणानि प्रकृतिवत् कृतानि भवन्ति। एवं सिद्धा प्रसङ्गादुपकारनिवृत्तिः। नन्वेवं सति तत्र लक्षणविशिष्टमेव भवति न खलु तन्त्राङ्गमेव साधारणम् इह त्वङ्गकृत एवोपकारः सोऽपि न साधारणः अन्यकृतोऽन्यस्य भवति।

विकाराच्च न भेदः स्यादर्थस्य विकृतत्वात् ॥४॥
(पू० आ० नि०)

अथ यदुक्तं गुणकालविकाराच्च तन्त्रभेदः स्यादिति। तत्र ब्रूमः। विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् अन्याङ्गजनित उपकारः स न विकृतयोर्दर्शपूर्णमासयोः स एव कथं ज्ञायते तदुच्यते। प्रयाजानुयाजास्तावदेते दार्शपौर्णमासिकाः। तत्र प्रयाजानुयाजशब्दौ प्रज्ञायेते तौ च चोदकेनेह प्राप्ताः सन्निहिताः विद्यन्ते। प्रकृतिगामित्वं च शब्दस्य न्याय्यं न चैकः शब्दोऽनेकार्थो युक्तः। तस्मा-

दार्शपौर्णमासिकौ ह्येतदुपकारोऽप्येषां दार्शपौर्णमासिक एव स हि तेषां प्रज्ञातः। यदि च प्रकृतादुपकारादुपकारान्तरं प्रकुर्युः। ततोऽप्राकृतकार्यत्वानैव चोदकेन प्राप्नुयुः। अपूर्वा भवेयुः यथा सर्वे गौर्गुलवादिभिरभ्यञ्जनम्। अप्राप्तो वाऽनेनैव प्रयाजा विधीयन्ते। अनेनैव प्राप्नुयुः। तत्र हिकरः शब्दः स्यात् न च सकृदुच्चरितः शक्तो द्वार्थद्वयं विधातुम्। अपूर्वत्वे चैतेषां अकृता अपि चोदकेन प्राप्नुयुः। तत्र वैष्णवेवे विंशत् सम्पत्तिराहुतीनां न युज्यन्ते। न च प्रयाजात् न चानुयाजाद्धाज्यभागौ अष्टौ हवींषि अग्नये समवद्यति वाजिनो यजत्याहुतीनां सम्पत्ते विंशत्त्वायेति। तस्माद् गुणविकारोऽप्यविकृतः प्राकृतोऽङ्गोपकारः। तत्कृता एव पुरोडाशस्याप्युपकुर्वन्तीति न गुणकालविकारं तन्त्रभेदः। तदानीं तमुभौ प्रार्थयेते पशुः पुरोडाशश्च उभयोश्च प्रकृतिवत् क्रियन्तेऽङ्गानि। तस्मात् सकृत्कृतान्येवोभयोरुपकुर्वन्ति। विकार इदानीं किमर्थः पशवर्थः। पशुकर्मसु हि प्रयाजानुयाजेषु श्रूयन्ते न तु पशोः पुरोडाशस्य च। न चासाधारणान्यङ्गानि पशुकान्येव सन्निधानात् पुरोडाशस्याप्युपकुर्वन्तीत्युक्तम्। अपि च। पृथक्त्वेनापीड्यमाना अनुयाजा आज्येनेष्टा भवन्ति। न हि पृथक्त्वे आज्यत्वं नाशयति यस्य क्षीरेण भोजनमुदितं भवति। यदि तस्मै सशर्करं दीयते न कश्चिद्विरोधो भवति। सशर्करमपि पय एवेति। तथा य एकादश प्रयाजान् यजतीति। असौ तदन्तर्गतान् प्राकृतान् पञ्च वेष्वौषधिकाः षट् च तैरिध्यमानैः पञ्च प्राकृता नष्टा भवन्ति। एवं तिष्ठत्यपि

यद्यौ क्रियमाणाः प्रयाजाः कृता एव पुरोडाश्यस्य भवन्ति। क्रमस्तेषां प्राकृतो ह्यापितो गुणमात्रञ्च क्रमो न च गुणानुग्रहार्थं प्रधानस्याऽवृत्तिर्युक्ता न त्र गुणवशवर्ति प्रधानं कामं क्रमविपर्यासनिमित्तं प्रायश्चित्तं भवेत्। नाऽवृत्तिः। प्रायश्चित्तं तर्त्तर्हि कर्त्तव्यम्। क्रियते यो ह्याग्नौ सति सर्वं प्रायश्चित्तं जुहोतीति प्रासङ्गिकत्वाद्वा प्रायश्चित्ताभावः। तस्मादविरोधः।

एकेषां वा शक्यत्वात् ॥ ५ ॥ (आ०)

एकेषां वा शक्यभेदेन क्रिया। यथा वेदेरन्युद्धरणस्य व्रतोपायनस्येति। वेदिः कृता नवधृक्ता तिष्ठति न शक्या कर्तुम्। न ह्यर्थः कृतः सन् कर्तुं शक्यते। अर्थोच्यते। अन्यां करिष्यतीति।

आहोपुरोषकं स्यात् ॥ ६ ॥ (आ० नि०)

तिर्यक् चासौ भवेत्तच दिक् संयुज्येत। विहार पृथक्त्वे वाऽभ्युतमापद्येत। तत्रैकदेशकालकर्तृकत्वमङ्गप्रधानानामिति स्थितो न्यायः प्रत्युद्रियेत एवमप्युद्धरणं तदाहवनीयनिहत्त्यर्थम्। सकृदुद्धरणेन च निवर्त्तितोऽसौ। न च निवर्त्तिते शक्यो निवर्त्तयितुम्। यथा कृतः कर्तुं न अथोच्यते। अन्यं निवर्त्तयिष्यतीति। न तस्मिन्नुपरते द्वितीयस्तत्राहवनीयोऽस्ति। यत्कारणं गार्हपत्याहवनीयावुभावेकाग्नी आहवनीयेऽपपातिते परिशिष्टो गार्हपत्यो भवति। यथा सर्वसाधारणश्रौवादाच्चादुपांशुयाजार्थेषु

पातिते परिशिष्टमन्यदेव तदर्थं भवति। विहार पृथक्त्वं च पूर्ववदापद्यते। तत्र पूर्वोक्ता एव दोषाः। तथा व्रतं यदृष्टहीतं न तत् पुनरुत्सृष्टं शक्यते ग्रहीतुम्। अनुत्सृष्टञ्च तत् आप्रधानापवर्गात्।

एकाग्निवच्च दर्शनम् ॥ ७ ॥ (षै०)

एकाग्निं पशोः पुरोडाशस्य च दर्शयति। मध्येऽग्नेराज्याहुतीर्जुहोति पुरोडाशाहुतीः पश्वाहुतीश्चेति नाग्न्युद्धरणस्य भेदः। तस्मात् पाशुकं तन्त्रं पुरोडाशे प्रयुज्यत इति

पशुपुरोडाशे आज्यभागाधिकरणम्।

जैमिनेः परतन्त्रत्वापत्तेः स्वतन्त्रः प्रतिषेधः स्यात् ॥ ८ ॥ (पू० षि०)

तस्मिन्नेव पशुपुरोडाशे चिन्ता किमाज्यभागौ कर्तव्यावुत नेति आह तत एतत् तावत् परीक्ष्यं किं प्रसङ्गेन चोदको बाध्यते। उत प्रयोगवचन इति। यदि चोदको बाध्यते। ततो न कर्त्तव्यावज्य प्रयोगवचनः ततः कर्त्तव्याविति। किं पुनरत्र युक्तम्। चोदको बाध्यत इति किं कारणम् आनुमानिकश्चोदकः। प्रत्यक्षः प्रयोगवचनः। प्रत्यक्षं चानुमानाद्बलीयः। दुर्बलस्य च बाधो न्याय्यः। न च बलीयसः। एवं चेन्न कर्त्तव्यौ चोदकेन हि तौ प्राप्येवाताम्। स चेह बाधितत्वान्नास्तीति। एवं प्राप्त उच्यते। जैमिनेराचार्यस्य मतं कर्त्तव्यावाज्यभागाविति। कुतः यतः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात्। यस्य स्वस्य

तन्त्रस्य कार्ये परतन्त्रमापद्यते तस्य प्रतिषेधः स्यात्। यथा पौरोडाशिकानां पाशुकं यस्य तु न किञ्चित् परकीयं कार्यमापद्यते तत्प्रतिषेधो न युक्तः। यथा देवदत्ते यज्ञदत्तयानमारूढे देवदत्तयानं निवर्त्तते। न वस्त्रालङ्कारः। न चेहाज्यभागयोः कार्यं श्रूयते। न च किञ्चित् पाशुकमङ्गमापद्यते। तस्मात्तयोरनुवृत्तिः यत्तु प्रयोगवचन इति। नैवात्र प्रयोगवचनस्य प्रवृत्तिः सा ह्यङ्गान्यप्रतिगृह्णीयात् पाशुकैरेव चाङ्गैः पुरोडाशोऽङ्गवान् प्रत्यक्षो ह्ययं नाज्यभागौ गृह्णाति। प्रकरणसन्निहितमङ्गं प्रयोगवचनेन गृह्यते न च पत्नी आज्यभागौ विद्येते। प्रतिषिद्धत्वात्। तौ न सौम्येऽध्वरे न पशाविति। अपि च क्रमे तत्प्रयोगवच उत्पन्नानाम् अङ्गानां ग्राहकत्वात् चोदको ग्राहकश्च तस्मात् स बलवान्।

सोमे वेद्यभेदाधिकरणम्।

नानार्थत्वात् सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात्॥ ६॥ (पू०)

सोमे यानि दर्शपूर्णमासप्रकृतीनि कर्माणि महावेद्यां वर्त्तन्ते तेषु चिन्त्या तेषां वेदिर्भेदेन कर्तव्या उत नेति किं प्राप्तं भेदेन कर्तव्या किं कारणं चोदकं प्रापयति। एवं चोदकानुग्रहो भवति ननु सौमिके च प्रसङ्गात् कार्यं साधयेत्। अत्रोच्यते न साधयेत्। कस्मात्। नानार्थत्वात्। नानार्थे एते वेदी दार्शपूर्णमासिकी हविषामासादनार्था। सौमिकी प्रधानार्था। तत्र प्रसङ्ग उपपद्यते।

यत् तन्त्रिणोऽङ्गमध्यपात्यङ्गं न कार्यं तत् प्रसज्यते। यथा पात्नीवताः प्रयाजाः पौरोडाशिकेषु नत्विह तथा तस्माद्वेदिः कर्त्तव्या।

अकर्म वा कृतदूषा स्यात् ॥ १० ॥ (सि०)

न वा कर्त्तव्या दार्शिकी वेदिः। कुतः। कृतदूषा स्यात्। सा क्रियमाणा केवलं सोमिक्यादेः कृतायां दूषणं स्यात्। न किञ्चित् स्वार्थं साधयति। नन्वु हविषामासादनं तत् करिष्यते शक्यं तु तन्महावेद्यामपि कर्त्तुम्। नन्वन्यार्था सेत्युक्तम्। अन्यार्थापि सती हविषामासादने अधिकरणं भवितुं प्रभवति। वेद्यां हविषामासादनं श्रुतम् इयमपि च वेदिः न तत्र तदर्थायामतदर्थायां वेद्यामेष विशेषः श्रूयते। तस्मान्न कर्त्तव्या।

दार्शिकपात्राधिकरणम्।

पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् ॥११॥ (पू०)

सोम एव यानि दर्शपूर्णमासप्रकृतीनि ग्रहचमसे प्रयुक्ते वर्त्तन्ते। यथा सातताः पशवः सावनाः पुरोडाशाः सोम्यश्वरिति तेषु विचार्यते किं तेषां ग्रहैश्चमसैर्वा होमः कर्त्तव्यः। अथ वा दार्शिकैः स्रुचादिभिः पात्रैरिति। तत्रोच्यते पात्रेषु च प्रसङ्गः स्यात् कुतः होमार्थत्वात्। होमार्थानि तानि पात्राणि स च होमो ग्रहचमसैनापि निर्वर्त्त्यते सोमतन्त्रमध्यपतितानि कर्माणि। तेषु ग्रहैश्चमसैर्वा होमः कर्त्तव्यः।

न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् ॥ १२ ॥ (षि०)

न्याय्यानि वा दार्शपूर्णमासिकानि स्युः तैर्होमः क्रियते। कुतः प्रयुक्तत्वात्। प्रयुक्तानि तानि विद्यन्ते यद्ग्रहीत्वाज्यान्यासादयन्ति न यजमानमुपहन्तीति प्रथमं तावत्तेषां प्रयोगः प्रोक्षणं सम्मार्जनं च ततः आज्यग्रहणं तान्येवाज्यप्रयुक्तानि विद्यन्ते अप्रयुक्ते प्रसङ्गः स्यात्। यच्चाध्वपातिनोऽङ्गं न प्रयुक्तं तत्कार्यं तन्त्रिणोऽङ्गं प्रसज्यते। स्वस्याभावे हि परकीयमुपजीव्यते। असन्निहितेऽपि स्वस्मिन् याने देवदत्तो यज्ञदत्तयानमारोहति सन्निहिते तु स्वयानेनैव हि याति। तत्र हि तस्य यादृग्यं स्वातन्त्र्येण गमनसुखं न तादृग्यं परयाने। पुरोडाशानामपि दार्शिकैः पात्रैर्यादृग्यं सादृगुण्यं तादृग्यं ग्रहचमसैर्न। न तत्र प्राकृत्यो ह्रचजातयः प्रोक्षणादयश्च संस्कारा लभ्यन्ते। ग्रहचमसे तेषामभावेऽपि सौमिकास्तैः पुरोडाशानामसम्बन्धः। यदि पुनर्दार्शिकान्यप्रयुक्तानि भवेयुः। कं ग्रहचमसं प्रसज्येत। नेति ब्रूमः। दार्शिकान्येव प्रसज्येरन्। तत्र तन्त्रिणोऽङ्गं क्रियमाणमितरस्यापि कृतं भवति। तत्र प्रसङ्गो यथा पाशुकेषु प्रयाजेषु क्रियमाणेषु पुरोडाशिकाः। इह तु ग्रहचमसे प्रयुक्ते नेतराणि प्रयुक्तानि भवन्ति। न हि सोमे हूयमाने पुरोडाशा हूयन्ते। नादरस्य प्रसङ्गः। किं तर्हि इदमुच्यते। अप्रयुक्ते प्रसङ्गः स्यादिति यदि प्रयोग एषां नोपपद्यते। प्रतिषिध्येत

तावतः प्रसङ्गः स्यादित्यर्थः । अपि च व्याख्यानि दर्शपूर्णमासिकानि न ग्रहचमसं किं तेषां व्याख्यत्वं दर्शपूर्णमासयोस्तानि शब्देनोक्तानि ततश्चोदकेन पुरोडाशे अतिदिश्यन्ते । अस्ति शब्दसंस्पर्शः । ग्रहचमसेन न तु हविर्येन क्वचिदोमः श्रुतः अर्थात् क्रियते । असति शब्दोक्तेऽर्थक्रिया भवति । दर्शयति च । एतानि पात्राणि युनज्मि ते पृथिवीं ज्योतिषा सहेति । ध्रुवामभिमृशति । युनज्मि वाचमन्तरिक्षेण ते सहेत्युपभृतं युनज्मि वाचं सह दिवा सूर्येणेति जुहूमिति । तस्मादेतैर्होमः कर्त्तव्यः ।

ग्रामित्वे पशुपुरोडाशाधिकरणम् ।

ग्रामित्वे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् ॥ १३ ॥ (सि०)

पुरोडाश एव चिन्त्या । किमेतस्य ग्रामित्रेऽग्नौ श्रपणं कर्तव्यमुत ग्रालासुखीय इति । तत्र स एव न्यायः । इतरस्य प्रयुक्तत्वादिति । गार्हपत्ये च हविषां श्रपणं श्रुतं स च प्रयुक्तो विद्यते ग्रालासुखीय एषोऽत ऊर्द्धं गार्हपत्यो भवतीति । तस्मात्तत्र श्रपणं कर्त्तव्यम् ।

प्राजहिते श्रपणाधिकरणम् ।

श्रपणं वाऽग्निहोत्रस्य ग्रालासुखीयेन स्यात् प्राजहितस्य विद्यमानत्वात् ॥ १४ ॥ (सि०)

कौण्डपायिनामयने अग्निहोत्रे चिन्त्यते किं तदीयस्य

द्रव्यस्य शालामुखीये अपणमयवा प्राजहित इति। प्राजहित इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा। अत्रापि स एव न्यायः। गार्हपत्ये अपणं श्रुतं स एव प्रयुक्तो विद्यते। अप्रयुक्ते च प्रसङ्गः स्यादिति। भूयांसात्र परिहारः चोदकेन शालामुखीयः प्राप्यते ज्योतिष्टोमे हि तस्य गार्हपत्यत्वं श्रुतं तच्च चोदकपरम्परया क्रौण्डपायिनामयनमागतं नामधेयेन तु प्राजहिते अपणं प्राप्यते चोदकाच्च नामधेयशब्दो बलवत्तरः। तस्मात्तत्र अपणं कर्त्तव्यमिति।

हविर्द्धानयोर्निर्वापाधिकरणम्।

हविर्द्धाने निर्वपणार्थं साधयतां प्रयुक्तत्वात् ॥ १५ ॥ (पू०)

क्रतौ हविर्द्धाने यान्योषधगुणकान्येष्टकानि कर्माणि वर्त्तन्ते यथा पशुपुरोडाशः सवनीयाः पुरोडाशाः सोम्यश्चरुः। तेषु विचार्यते। किं तेषां निर्वापो हविर्द्धाने कर्त्तव्यः। अथवा नान्तरमुपादेयमिति किं प्राप्तं हविर्द्धाने निर्वपणार्थं साधयेयाताम्। एकं वा कुतः। प्रयुक्तत्वात्। प्रयुक्तमस्ति शक्नोति च तेषां निर्वापं साधयितुम्। अन्यस्योपादाने केवलमनर्थको व्यापार आपद्यते। तस्मात्तयोरन्यतरेण निर्वापः कर्त्तव्यः।

असिद्धिर्वाऽन्यदेशत्वात् प्रधानवैगुण्याद्वैगुण्ये प्रसङ्गः स्यात् ॥ १६ ॥ (सि०)

असिद्धिर्वा हविर्द्धानाभ्यां निर्वापस्य न ताभ्यां साधयितव्य

तः ? प्रधानाद्वैगुण्यात् । निर्वापस्य देयः । अपरेद्यु गार्हपत्यं प्रणीय मनोवाच्छितं भवति । तस्य दधिघर्मस्यावद्य नक्षोपाधि निर्वपतीति । यदि हविर्(र्दा)धानेन निर्वापः क्रियते तद्देयं तत्सीयेत । तदा प्रधानं सोमकार्यं विगुणं भवेत् । हविर्(र्दा)धानयोर्मन्त्रवच्च नियमवच्च प्रवर्तनं च श्रुतं तत्सर्वं मनर्थकं स्यात् । अथ च पुनः क्रियेते तदाप्यावृत्तिरनुतानुष्ठीयेत । अवैगुण्ये च प्रधानस्य प्रसवो युक्तः । यत्कारणं प्रधानस्य यो धर्मस्तमितरे न यथायुतमुपजीवन्तीति । परवशत्वात् यदि यथायुतेनास्य कार्यं न सिद्धतीति ततः कामं कार्यद्वयो भवेत् । स्वं वा साधनं प्रयुञ्जीत न शक्नुयात्प्रधानकार्यं व्यावहृत्य स्वार्थं साधयितुम् । अथ कस्माद्दधिर्(र्दा)धाने देये निर्वापो न क्रियते । एवमपि तेषां कर्मणा वैगुण्यं भवेत् । सक्तुस्तरतण्डोपजीव्यैस्तानि यथावस्थितं परतन्त्रमुपजीवितुमर्हन्ति । यथा पाङ्क्तात् प्रयाजानन्यत्रालानपि पङ्क्तपुरोडाश उपजीवन्ति । उच्यते । उक्तं तत्र प्रकृतासौ प्रयाजाः । न च श्रुतस्य क्रमानुपपत्तार्थं पुनः क्रिया न्याय्या यदं पुनः करिष्यमाणो निर्वापः शक्नुते कर्तुम् । स यदि सक्तुभिः शक्नुते कर्तुम् । तदा सक्तुभिः कर्तव्यः शक्नुते चानीतरमुपादेयं तस्माच्च दधिर्(र्दा)धानयोर्निर्वापः ।

अनीतराधिकरणम् ।

अनक्षाच्च दूषणात् ॥ १७ ॥ (सि०)

अक्षो यद्वक्षश्च दूषते । अनक्षि प्रवर्तनीति तस्मात्तदनीतेऽक्षवक्षदेशे इति ।

दीक्षाप्रकरणेऽधिकारसूत्रम्।

तद्दृष्टत्वच्च कालभेदात् ॥ १८ ॥ (पू० मि०)।

सोमदीक्षाप्रकरणादधिकारसूत्रमाम्नातम्। यां यजमानो दीक्षितो रात्रिं जागर्ति। तया सत्रेण चरन्ति इति। दर्शपूर्णमासयोरप्युपवसथेऽह्नि वसाज्ञातं तत्प्रायणीयादिषु चोदकेन प्राप्यते तेषां तत्र मध्यपातिदीक्षाकालेनेव जागरणेन प्रसङ्गात् कार्यसिद्धौ प्रामाण्यमिदमुच्यते। तदयुक्तञ्च दीक्षायुक्तञ्च जागरणं नेतरेषु प्रसज्येत। कुतः कालभेदात्। यदि तावद् यज्ञाङ्गानां रक्षणाद्यप्रसादार्थं ततो दीक्षाकालेषु रक्षितेषु नेतराणि रक्षितानि भवन्ति। इति तद्रक्षणार्थं प्रायणीयादिष्वपवसथकाले मैदेन कर्त्तव्यम् भवाप्यदृष्टार्थम्। तथाप्युपवसथो रात्रिस्तस्य निमित्तं निमित्तप्राप्तौ नैमित्तिकं कर्त्तव्यम्। तस्माद्वैदेन कर्त्तव्यम्।

विचारप्रकरणे तन्त्रावापाधिकरणम्।

मन्त्राश्च सन्निपातित्वात् ॥ १९ ॥

रक्षणप्रयोगेषु विचारप्रकरणे सति ये मन्त्राः सन्निपातिनो दृष्टाश्चयदहः प्रोक्षणेऽभिमर्शने तेषां किं तन्त्रेण प्रयोगः। अथ वा मैदेनेति तन्त्रावापचिन्तेयं न प्रसङ्गचिन्ता तत्र प्रयोगवचनानुग्रहाय तन्त्रभावे प्राप्ते उच्यते। मन्त्राश्चाध्वर्यवादयो मैदेन कर्त्तव्याः। कुतः? सन्निपातित्वात्। सन्निपातोपकारिण एते मन्त्राः उपस्थितं कर्माभिद्योतयन्ति एवकर्षाश्चाध्वर्युप्रतिपत्तावतन्त्रतामुपलक्षयन्ति।

[illegible]त् पृथक् [illegible]।
[illegible] कर्मादिविधिपार्थं [illegible]।
[illegible]त् तत्र कर्मादिविधानात् [illegible]
[illegible]दिति। तथा चाह जैमिनः कर्मणा [illegible]
[illegible]दर्वोऽस्यामिति यद्यते विधेः। तस्मादप्यङ्गमिति।

सोमेऽग्न्याधानाधिकरणम्।

धारणार्थत्वात् सोमेऽग्न्याधानं न विद्यते ॥ २० ॥ (सि०)

सोमे दीक्षणीयादिष्टिपर्यन्तेषु कर्मसु चोदकप्राप्तमग्न्याधानं किं कर्त्तव्यमुत नेति। कर्त्तव्यम् एवं चोदकोऽनुगृहीतो भविष्यति। एवं प्राप्ते उच्यते। न कर्त्तव्यं तत्? धारणार्थत्वात्। विकृतस्याग्नेर्धारणार्थं तत् सोमार्थेन च विकृतस्य तत्कृतम्। तेन कृतोऽग्निः। न च तस्य धारणकार्यमस्ति। नन्वमन्त्रकं तत्। सत्यमन्त्रकमपि तु तत्कृतं न च कृतस्य मन्त्रार्थं पुनराहन्ति। तस्माच्च कर्त्तव्यम्।

दार्शपौर्णमासिकव्रताधिकरणम्।

तथा व्रतमुपेतत्वात् ॥ २१ ॥ (सि०)

तत्रैव दार्शपौर्णमासिकं व्रतं चोदकप्राप्तं तत्रैव न क्रियते यस्मान्नाधानमुपेतत्वात्। न ह्युपेतमनपहृतं शक्यमुपेतुम्। अप्राप्तस्य हि प्राप्तयेऽनुपगमनं तत्प्राप्तस्य [illegible]

[illegible] ([illegible])

[illegible] [illegible] [illegible] [

तासवी: सूयते सवार्य वर्षो: सिञ्चमेघसिति पूर्णमग्निं दक्षाति देवता एव तत्पूर्णेषुपूर्णाता: सो सूते यजते इति। तत्र यत्रेति भारद्वाजं लौकिकेन प्रसङ्गादेत्य शिष्यति। देवतापरिग्रहार्थं दार्शपौर्णमासिकमैष्टिकेषु कर्त्तव्यम्। आह मैतद् युक्तम्। देवतापरिग्रहार्थं नहि प्रसङ्गादेव सिध्यति। कुत:। दृष्टादर्शत्वात्। दीक्षणीयेऽपि दीक्षणीयेष्टिदैवतपरिग्रहार्थो श्रूयते। आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपेद्दीक्षिष्यमाणोऽग्निः। यज्ञमो देवतानां विष्णु: परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवास्य तदुभयत: परिगृह्य दीक्षयन्ति एवि सैव देवता परिग्रहणार्था प्रसङ्गादैष्टिकानां साधयिष्यतीति।

शेषवदिति चेन्न वैश्वदेवो हि स्याद् व्यपदेशात् ॥ २६ ॥ (आ०)

उच्यते न सिध्यति दीक्षणीया न देवतापरिग्रहे वर्त्तते शेषास्त्वङ्गानाम् देवता अपरिगृहीतास्तत्परिग्रहार्थं दार्शपौर्णमासिकमैष्टिकेषु कर्त्तव्यमिति चेन्न कर्त्तव्यम्। दीक्षणीयेव प्रसङ्गादेवता परिग्रहार्था: वेत्स्यति। ननु प्रधानदेवतापरिग्रहार्था दीक्षणीयेत्युक्तम्। प्रधानदेवतार्था सती अङ्गदेवतां ग्रहीष्यति कथं वैश्वदेवो हि। अस्ति शेषी वैश्वदेवो यज्ञ:। तत्र सर्वदेवता गुणत्व तत्रापि चाङ्गदेवता अपि। तत्रापि: परिगृहीता:। अनेन तत्परिग्रहार्थमैष्टिकेनाङ्ग-

आनेन व्यपदेशेन गत्वा विश्वे देवा यजेयुः। आवाहं वैष्टिके नान्यत्र व्यपदेशात्। [illegible] विश्वे देवा यजेरन्निति परिक्रीतो। न हि तत्र सर्वे देवता इष्यन्ते। किं तर्हि विशिष्टदेवतागणः। यथा ब्राह्मणवसो यजेत इति। यत्र आम्रे। व्यपदेशात् आम्रदेवो भवति। अग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः इहस्पतिर्विश्वे देवैरिति वस्वादिभ्योऽन्तरभूतान् विश्वे देवान् दर्शयति। यदि च सर्वे देवा उच्येरन् विश्वे देवशब्देन तेभ्योऽर्थान्तरभूता न स्युः। तस्माद्विश्वे देवशब्दो गणवचन एव। एवं वेदपरिगृहीता अन्यदेवतास्तदर्थमैष्टिकमन्वाधानं कर्तव्यम्।

न गुणार्थत्वात् ॥ २७ ॥ (वै०) (न्या०नि०)

आनेन व्यपदेशेन गत्वा विश्वे देवाः यजेयुः। गुणार्थोऽयं व्यपदेशो इहस्पतिप्रसूतानां अन्यादयो वस्वादिभिः। केवलैः समेताः इहस्पतिप्रसूतसर्वदेवान्येवेति। यथा सेनापतिभृत्यबलेन सहागतः। समाहर्ता निजेन बलेन राजा तु सर्वैर्बलैस्तेवान्येवेति। अपि च। वैश्वदेवो गणः कार्यः। सर्वे तु देवाः शब्दादेवावगम्यन्ते। तथाच दीक्षणीयागदेवतापरिग्रहेऽपि प्रसङ्गात् सिद्धातीति न कर्तव्यम् इत्यं पौर्णमासिकमैष्टिकेष्वन्वाधानम्।

यजीयवङ्गनाधिकरणम्।

यजेत वङ्गनाधिकरणम् इहस्पतित्वात् ॥ २८ ॥ (वि०)

[illegible]

[illegible] यज्ञक्रतौरपि [illegible]

[illegible] अपि च [illegible]

[illegible] सौमार्थं [illegible]

संनयति । वैश्वदेवा दीक्षितो मिथुनत्वायेति । [illegible]

सवनस्थं च वासस्तो धारयार्थं सवार्थं मरीमिरेवेति सवनं

पवमानात् । प्रसङ्गेन सिद्धवतीति ।

आरण्यभोजनाधिकरणम् ।

अन्यविधानादारण्यभोजनं न स्वादुमयं दृष्टयर्थम् ॥ २९ ॥ (पू० नि०)

दर्शपूर्णमासयोरारण्यभोजनमाम्नातम् । यदारण्यनाति तेनारण्यानवो इन्द्रियमेवात्मनो धत्ते इति तत्राव-पीयादिषु चोदकेन प्राप्यते प्राप्तमपि सत्र कर्त्तव्यम् । किं कारणम् । अन्यविधानात् । यदर्शपूर्णमासयोरारण्य-भोजनं तदृष्टयर्थम् । सोमेऽप्येतदाम्नातं पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति । तदपि दृष्ट-कार्थत्वाद् दृष्टयर्थमेव तयोः सौमिकं प्रधानं श्रुतत्वात् प्राधान्याच्च अवश्यं कार्यं तेन हृतौ प्रसङ्गात् सिद्धायां-मितरविवर्त्तते ।

मेषभक्षाधिकरणम् ।

मेषभक्षास्तथेति चेत् नान्यार्थत्वात् ॥३०॥ (पू० नि०)

दर्शपूर्णमासयोः मेषभक्ष [illegible]

पौरुषेयात्; पौरुषेयेण प्रतेनारब्धत्वन्निवर्त्तन्त इति चेत्। न। अजात्। न हि पुरुषार्थैः। न ह्यन्यं पुरुषार्थं संस्कारार्थौ; पुरुषगुणैर्वत्वात् भवतीति हि-तीयानिर्देशाच्च यजमान यजमानाद्विज इदां प्रत्ययतीति तस्मात् कर्त्तव्यम्।

परिक्रयाधिकरणम्।

श्रुतत्वाच्च परिक्रयः ॥ ३१ ॥ (सि०)

दर्शपूर्णमासयोः परिक्रयोऽन्वाहार्य आम्नातः इह चोदनेन प्राप्तः सन्न कर्त्तव्यः। कुतः। श्रुतत्वात्। श्रुता-स्वाङ्गत्विकः सोमार्थेन परिक्रयेण तस्य क्रादयत्यं दक्षि-णेति। एकदेशकालकर्तृत्वं चाङ्गप्रधानाम्। तस्मात्तै-रेवाङ्गानि कर्त्तव्यानि। अतो न पृथगङ्गानां परिक्रयः तस्मादन्वाहार्यो निवर्त्तते।

शेषभक्षास्तेति चेत् ॥ ३२ ॥ (आ०)

अथ शेषभक्षा अपि तदा निवर्त्तेरन् यदा अन्वाहार्य इति चेत् परिक्रयार्थः प्रक्षीयते।

न कर्मसंयोगात् ॥ ३३ ॥ (आ० नि०)

नेति निवर्त्तेरन्। नक्षेते परिक्रयार्थाः। अन्वा-हार्येण खिलकैमानतानां निर्वृत्तिर्भूविष्ठे कर्मक्षेते। न चाक्षमानमानाय। तस्मात्क्षेते परिक्रयार्थाः। किन्तु संस्कारार्थाः भवत्यर्थं कर्त्तव्याः।

प्रदत्तवरत्वात् प्रतिदत्तवरत्वात् प्रतिदत्तवरत्वं होतुः क्रियेत ॥ ३४ ॥ (पू० चि०)

दर्शपूर्णमासयोर्होतुर्वरत्वमाम्नातम् । अग्निर्दैवो देव्यो होता देवान्यक्षदिति । तयोरिष्टिकेषु कर्मसु सोमाङ्गभूतेषु चोद्यते । अस्ति तु सोमेऽपि होतुर्वरणम् अग्निर्होता स मे होता होतस्वं मे होताऽसीति । होतारं वृणीत इति । तत्र विचार्यते । किमिष्टिकेषु कर्मसु दार्शपौर्णमासिकं होतुर्वरणं कर्त्तव्यम् उत नेति । किं प्राप्तं न कर्त्तव्यमिति चेत् । वरणं तावदानर्थक्यं सोमिकेन च वरणेनानति होतुः । साङ्गस्य सोमस्य वरणेन चानतस्यानमनकार्यमस्ति । तस्मान्न कर्त्तव्यम् । एवं प्राप्ते ब्रूमः । प्रदत्तवरणात् प्रतिदत्तं वरणं होतुः क्रियते । नैतदस्ति सोमिकं वरणं प्रसङ्गात् दर्शपूर्णमासिकस्य कार्यं साधयिष्यतीति । प्रदत्ते वरणात् प्रदत्ते कर्मणीति दार्शपौर्णमासिकं वरणं क्रियेत । अतस्तदानर्थक्यं किं तर्हि कर्ममात्रं न चेत् क्रियेत तेन शुचि वेशुक्यं स्यात् । तस्मात् प्रतिकर्ममेदेन कर्त्तव्यम् ।

अङ्गापीति चेत् ॥ ३५ ॥ (आ०)

इति चेत् पक्षयति प्रदत्तवरणाद्धोतुर्वरणं प्रति कर्म कर्त्तव्यमिति । अङ्गापि प्रदत्ते कर्मणि क्रियते प्रयोगप्रवचनवाक्ये तथात्वाच्च वरणं प्रसर्गार्थम् । अतस्तदपि प्रतिकर्म कर्त्तव्यम् । अङ्गाच्च विशेषः ।

न प्राङ् नियमात्तदर्थं हि ॥ २६ ॥ (आ०नि०)

न ब्रह्मवरणं कर्मार्थं किं तर्हि प्राङ्नियमात् प्राग्वरणादित्यर्थः सत्यम् प्रकृते कर्मणि ब्रह्मणो वरणं प्राग्वरणाच्च किञ्चित् । ब्रह्मत्वमस्ति वरणादुत्तरकालं ब्रह्मणः कर्म तदर्थं वरणं कर्मार्थम् । तस्मान्न धर्मभावनम् । किमर्थं तर्हि आनत्यर्थमेव सौमित्रेण वरणेनानतः तस्माद् ब्रह्मवरणं न कर्मार्थम् ।

निर्दिष्टस्येति चेत् ॥ २७ ॥ (आ०)

अयोच्यते । अस्त्यमावास्यायामौपवसथ्येऽहनि वेदिं कर्म निर्दिष्टं पूर्वेद्युरमावास्यायां वेदिं करोतीति तत्र वेदि परियन्ते प्रसवो ब्रह्मणा क्रियते तेन ब्रह्मापि वरणस्य इति ।

नाश्रुतत्वात् ॥ २८ ॥ (आ० नि०)

पूर्वेद्युरमावास्यायां वेदिकरणं श्रुतं न परियहणम् अश्रुतत्वात् । यथाकालमेव हते ब्रह्मणि परियहः क्रियते वरणस्य कर्मार्थत्वात् । न प्राग् वेदिकरणात् पूर्वं परियहः तत्रापि ब्रह्मणा प्रसवो दातव्यः । वाढम् अर्थं तर्ह्यस्य परिहारः दर्शपूर्णमासप्रकरणे इविरासधिवासनापूर्वं वेदिकरणमाम्नातम् । ब्रह्मवरणमपि प्रयोक्तारप्रयत्नकाले प्राक् ब्रह्मत्वप्रवृत्तेः इष्टार्थत्वादानत्यर्थम् । एवं सिद्धे अमावास्यायां वेदिकरणवचनेनोपदिष्टं तस्मिन्नहनि परियहोत्पत्तेः प्रसवोऽपि ब्रह्मवरणमपि प्रधानदेशकालत्वाद् ब्रह्मणाम् । एवं सति पौर्णमास्यां

प्रवर्तनाभावे ब्रह्मवरणमभावाद्वा पूर्वपुरुषसंस्कारवत्
ब्रह्मत्वे तस्मादुभयसंयोगार्थम्। यदि न प्रतिनिधौ ब्रह्म-
वरणं कर्त्तव्यम्। सौमिकेनैव वरणेनागतत्वात् ब्रह्मणः।

होतुस्त्वेति चेत् ॥ ३९ ॥ (आ०)

इति चेत् पक्षसि। यद्यपि प्रहृत्ते कर्मणि ब्रह्मणो
वरणं न च वरणात् प्राक् किंचिद् ब्रह्मणः कर्मास्ति
तस्माच्च प्रहृत्तवरणे ब्रह्मेति। होतुस्त्वा होतुरपि प्राग्-
वरणाच्च किंचित् कर्मास्ति तस्मादपि वरणं न कर्मसंयोगम्।

न कर्मसंयोगात् ॥ ४० ॥ (आ० सि०)

अस्ति होतुः प्राग्वरणात् सामिधेनीकर्मणा संयोगः
प्रहृत्तः सामिधेनीरन्वाहेति। तस्माद्धोतृवरणमदृष्टार्थम्।
तदैष्टिकेषु कर्मसु दीक्षादिषु कर्त्तव्यम्। ब्रह्मवरणं तु
दृष्टार्थम्। तत्सौमिकेनैव कृतत्वात् न कर्त्तव्यमिति।

बर्हिः प्रोक्षणादिवरणम्।

यज्ञोत्पन्नपदेशे विहितकर्मप्रयोगभेदात्
प्रतितन्त्रं क्रियेत ॥ ४१ ॥ (सू० सि०)

सोमे श्रूयते। यदतिरात्रो बर्हिस्तदुपसदां तदग्नी-
षोमीयस्येति। तत्र यद्विहितस्य बर्हिषो लूनस्य क्रियते
तत्र प्रोक्षणमपाकरणमयपातनं सूलाग्रमवच्छेदनं तत्
किमातिरात्रादिप्रयोगभेदेन कर्त्तव्यम्। अथ वा यदति-
रात्रे कृतं तदेवेतरत्र प्रसज्यते। किं प्राप्तं यज्ञोत्पन्न-
देशे एकस्मिन् यदतिरात्रादौ [illegible]

[illegible] [illegible] [illegible] [

[illegible] उच्यते । [illegible] देशभेदात् । [illegible] । [illegible] । [illegible] ।

सन्नहनहरणे तथेति चेत् ॥ ४३ ॥ (पू०)

अग्नीषोमीय एव देशान्तरं नीयमानस्य बर्हिषः सन्नहनहरणमन्त्रो प्रयोक्तव्यो वा नेति चिन्त्यते । तत्राह सन्नहनहरणमन्त्रो तथा यथा स्तरणमन्त्रः भेदेन प्रयोक्तव्यो वित्यर्थः । कुतः । उक्तो न्यायः । सन्नहनहरणमन्त्रो कर्माङ्गे ते च कर्मणि आवर्त्तते । अतो मन्त्रयोराहृत्तिर्न्याय्या तत्राह इः ।

नान्यार्थत्वात् ॥ ४४ ॥ (सि०)

नैतदुक्तम् कुतः अन्यार्थत्वात् सूनस्य बर्हिषो ये सन्नहनहरणे ते उपादानार्थे । तत्राहि [illegible] । [illegible] ।

[illegible] आहवनीयदेशं प्रोक्ष्य वि
[illegible] तद्वदत्रापि प्रयुज्यते एवमिहापि।

इति श्रीमद्वरस्वामिनः कृतौ मीमांसाभाष्ये
द्वादशाध्यायस्य प्रथमः पादः।

विहारे लौकिकाग्न्यप्रतिषेधाधिकरणम्।

विहारो लौकिकानामर्थं साधयेत् प्रभुत्वात् ॥ १ ॥ (पू०)

विहार इति गार्हपत्यादिरग्निरुच्यते विहरणात्। स लौकिकानां कर्मणां पर्वणां स्थालीपाकादीनामन्येषां वाग्निसाध्यानां पचनदहनप्रकाशनानामर्थं साधयेत् निर्वर्त्तिं कुर्यात् प्रभुत्वात्। प्रभवति ह्याहुतिप्रक्षेपणे पाकादौ च संयुक्तं च केनचित्प्रयोजनेनाग्निद्रव्यमुत्पन्नं वसन्तेऽग्नीनादधीतेति तत्सामर्थ्याद् यत्र यत्रोपयुज्यते तत्र तत्रोपयुज्यते एवं तस्योत्पत्तिरर्थवती भवति।

मांसपाकप्रतिषेधश्च तद्वत् ॥ २ ॥ (उ०)

मांसपाकप्रतिषेधो भवति तद्वत्। यद्वत् न्यायोपदिष्टः मांसं न पचेयुः। यस्मिन्नग्नौ ये च पचेयुः। काम्यादिं कुर्युरिति। लौकिके हि याज्ये मांसपक्षो न वैदिके शामित्रे मांसपाकम्।

निर्देशाद् वा वैदिकानां स्यात् ॥३॥ (पि०)

वैदिकानां वा कर्मणां विहारोऽर्थं साधयेच्च लौकिकानां कृतः. निर्देशात् निर्दिश्यते गार्हपत्यादीनां कार्यं यदाहवनीये जुहोति तेन सोऽस्यामीष्टः प्रीतो भवतीत्येव मादिभिर्वाक्यैर्यासावुत्पन्ना काङ्क्षाकाङ्क्षा सा एतैर्वचनैर्निवर्त्तिता एवमर्थवैषामुत्पत्तिः। तस्माच्च लौकिकेषु प्रसज्येरन् माठरादीनामयं परिहारो न स्थालीपाकादीनां तेषामप्याहवनीय एव होमः प्राप्नोति नैष दोषः यदाहवनीये जुहोतीति नियमार्थ एष वादः। अन्तरेणापि हि वचनमाहवनीये होमोऽन्यत्र च प्राप्तः। तदेतत् नियमशासनं यत्रानियमप्रसङ्गस्तद्विषयो विज्ञायते। वैदिकेषु चानियमप्रसङ्ग आगत आयतनत्वान्निर्दिष्टत्वात्। लौकिकानां तु निर्दिष्टमायतनं औपासनोऽग्निः। तस्माच्च तान्याहवनीये प्रसज्येरन्।

सति चोपासनस्य दर्शनात् ॥ ४ ॥ (हे०)

सति च विहारे औपासनोऽग्निर्दृश्यते यः कामयेत राष्ट्रमस्मै प्रजायै स्यादिति। तस्यौपासने प्रतिहृतमन्वा जुहुयादिति। राजसूये प्रकृते कर्मणि एतद्वचनं तस्मिंश्च काले विहारोऽस्ति यदि च तत्रैव लौकिकानां कार्यं साधयेत्। यदि च सत्यामस्यां नोपासनकार्यभावात् स्यात्।

अभावदर्शनाच्च ॥ ५ ॥ (हे०)

औपासनस्य च वैहारिकेऽग्नावभावं दर्शयति। यो सौ

यति वा व्रतस्थाहुतस्थाग्नयो यजमानस्य ते यजमानमेव ध्यायन्ति। यजमानं संस्कुर्वन्ति पचन्ति ह वा अन्ये-ष्वग्निषु हुतामांसमन्ये तेषां नातोऽन्या मांसाया विद्यते। अन्यत्र पशुबन्धान्मांसस्यायजमेव वैखानिकाग्नामग्नीनां परिहरति तस्मादपि न लौकिकेषु विचारप्रसङ्गः।

मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात् ॥ ६ ॥(आ०नि०)

यत्तु मांसपाकप्रतिषेधस्य तद्विहितप्रतिषेधः स्यात्। आहवनीये वपायाः श्रपणं विहितं तस्यायं प्रतिषेधः। कस्मात् प्राप्तत्वात्। आहुतिसंयोगाच्च। तस्माद्यो मांसं पचति यश्चिदाहुतीर्जुहोति। संयोग-वाक्यशेषे श्रूयते। आहवनीये चाहुतयो श्रूयन्तेऽस्मा-दपाश्रपणस्यायं प्रतिषेधः।

वाक्यशेषो वा दक्षिणस्मिन्ननारम्भस्य विधानस्य ॥ ७ ॥ (आ०नि०)

अथवाऽयमन्यः परिहारः दक्षिणाग्नौ व्रतस्थपचनवाक्य-स्यायं विशेषः। अन्यच्च मांसादिति। या सरस्वतीदेव-मतीति पशुपुरोडाशो न स्यात्। न कर्त्तव्यः। कुतः छिद्रापिधानार्थत्वात्। योऽसौ दक्षिणाग्नौ होमः तत्रै-तत् श्रूयते तस्माद्दक्षिणाग्न्यभिप्रायं विज्ञायते।

पशुपुरोडाशाधिकरणम् ।

सवनीये छिद्रपिधानमर्थवत्त्वात् पशुपुरोडाशे न स्वाद्न्येषामेवमर्थत्वात् ॥ ८ ॥ (वि०)

पशुपुरोडाशो न कर्त्तव्यः । कुतः छिद्रापिधानार्थत्वात् । पशोः छिद्रापिधानार्थः प्रत्यक्षविरोधादर्थवादमात्रं तत् पुरोडाशापिधानार्थं वादमात्रं सवनीयेऽस्मिन्न स्यात् । तस्मादुक्तन्यायात् पशुपुरोडाशो न कर्त्तव्यः ।

क्रिया वा देवतार्थत्वात् ॥ ९ ॥ (वि०)

कर्त्तव्यो वा पशुपुरोडाशः । कुतः ? देवतार्थत्वात् । देवतासंस्कारार्थोऽयमित्थे तदुक्तम् अपि वा शेषभूतत्वात् संस्कारः प्रतीयेत स्नाक्षाकारवदङ्गानामर्थसंबन्धीनीति । न च पुरोडाशः छिद्रापिधानार्थः प्रत्यक्षविरोधादर्थवादमात्रं तत् पुरोडाशापिधानार्थं वादमात्रं सवनीयेऽस्मिन्न स्यादिति । तस्मादुक्तन्यायात् कर्त्तव्यः पुरोडाशः ।

लिङ्गदर्शनाच्च ॥ १० ॥ (वि०)

यथा प्राप्तः सवनीयः सवनीयेऽस्मिन् पुरोडाशेन संस्कर्त्तव्यो भवतीति । तत्संस्कारार्थोऽयं मन्त्रः पुरोडाशं दर्शयति । तस्मादपि कर्त्तव्यः ।

चित् कर्मणो मध्ये श्रूयते तच्च सर्वं प्रकीर्यते न तत्सात्

कार्यैक्यमेदाद्भेद एव तत्सम्भेदः स्यात् ॥२१॥(सि०)

कालभेदाद् वाक्यभेदस्तावदमावास्यायां रात्रौ निगि यज्ञः प्रतिपच्चतुर्थमावास्या कालभेदेन वैगुण्यामावास्यास्थो निगि यज्ञशेषवत् वर्तते अथ तर्हि पाशुका प्रयाजास्तिष्ठति पत्नी ह्रियमाणा सन्तस्तस्य पुरोडाशशेषकुर्वन्ति तस्मात्र ह्यायो न ह्रतस्य शुचानुयद्दार्थमाहुस्तिरश्चीति। इह पुनरन्यतामावास्या तस्मादवेशुण्याय ह्रतस्यं कर्त्तव्यम्। वाक्यभेदाच्च भिन्नदेशे चैकवाक्ये चमावास्यायां यजेत अमावास्यायां निगि यज्ञेतेति एवं दर्शपूर्णमासप्रकरणे। एवं काम्येष्टिषु। किमतः। यदि समानदेशे स्यातां ततः अमावास्यायां यजेतेति आमावास्ये कर्मणि आज्यं उपात्तस्तस्मिन्नेव च निगि यज्ञशोदित इति सम्भेत तत्रामावास्यमध्य एव विहितः स्यात्। यदा त्वनर्देशभेदे सति यदामावास्यायां यजेतेत्येवं दर्शपूर्णमासप्रकरणे, एवं काम्येष्टिषु अनुपादेयत्वेन श्रोयते एवमिहापि। न तुल्यकालत्वे प्रसङ्गो भवति। यदा त्विज्ञता दृष्टो दर्शपूर्णमासाभ्यां तुल्यकाला अपि सन्तो न दार्शपौर्णमासिकं तत्त्वमुपजीवन्ति तस्मात्तत्सम्भेदः।

वैगुण्यनाशिकरणम्।

वैगुण्यनाशनव्रतं विप्रतिषेधात्तदेव स्यात् ॥२२॥(पू०)

किमेष एवोत्सर्गः सर्वतन्त्रं भिद्यत । न खलु वैगुण्यनयनं व्रतं तदेव तदर्थाय चोदितमनं व्रतं तेनोद्वासावाः पुनरुद्वसनमेव हि किञ्चित्कार्य्यमस्ति केवलं व्रतदूषणं भवेत् । व्रतं चोपेतमुत्सृष्टं पुनरुपेतमप्यनुपेयमानञ्च पिष्टपेषणवदकिञ्चित्करं स्यात् । तस्मादेतदुभयमपि तदेव प्रसज्यते ।

तन्त्रमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् ॥१७ (सि०)

तत्तन्त्रा वा निशीष्टिः स्यात् । अमावास्यातन्त्रेयं न स्वतन्त्रा कुतः ? तन्त्रमध्ये विधानात् । अमावास्यातन्त्रमध्ये इयं विहिता अमावस्यायां निशि निर्वपेदिति न तु कालवचनोऽमावास्याशब्दो न कर्मवचन इत्युक्तं सत्यं कालवचनः स तु कालस्तन्त्रमध्ये तच्च विधीयमानत्वात् तन्त्रमध्ये विहिता भवति सवनीयवत् । तद्यथा सवनीयाः पुरोडाशा न तावत् पशुकर्मोद्दिश्य विधीयन्ते अथ च पशुतन्त्रमध्ये विहिता भवन्ति यस्मिन् स्थाने विहिता तत्स्थाने पशुतन्त्रा इयमपि तन्त्रमध्ये पतिता सवनीयभेदे च न स्वतन्त्रा भवितुमर्हति ।

दृष्यवर्हिरधिकरणम् ।

वैगुण्यादिध्मबर्हिर्न साध्येदन्यन्नाधानं च यदि देवतार्थम् ॥१८॥ (पू०सि०)

अत्राह किमेष एवोत्सर्गः सर्वमिमावास्यातन्त्रनिष्पा-

ध्यर्थं साधयतीति न खलु द्रव्यावृत्तिं साधयेत् कुतः। वैगुण्यात्। द्रव्यो नामाग्निसमिक्षब्दार्थः स प्रतिपत्तोदितः समाम्नायाद्यां तिमि वर्तमानस्य त्रिषि यज्ञक्रान्नि समिन्धनं साधयेदृष्टिरपि वेदिस्तरणार्थम्। सै यदि प्रसज्येयातां विगुणो विक्रियेत: स्यात्। तस्माद्वेन ते कर्त्तव्ये॥

देवतार्थाग्न्यन्वाधानाधिकरणम्।

अग्न्यन्वाधानञ्च यदि देवतार्थम् ॥१९॥ (पू०)

यदि देवतापरिग्रहार्थमग्न्यन्वाधानं तदपि भेदेन कर्त्तव्यम्। प्राकृतेनाग्न्यन्वाधानेनामावास्यादेवताः परिगृहीताः न च रक्षोघ्नोऽग्निः तत्परिग्रहार्थमग्निधारणार्थं ततः प्राकृतेनैव धारितत्वादनेन कर्त्तव्यं देवतापरिग्रहार्थता वाक्यशेषे श्रूयते ममाग्ने वर्चोविहवेष्वस्वति पूर्वमग्निं परिगृह्णाति देवता एव तत्पूर्वेषु: परिगृहीताः। भो भूते हि यजत इति भवाग्रहते।

आरभणीयाधिकरणम्।

आरभणीया विकृतौ न स्यात् प्रकृतिकालमध्यत्वात् कृता पुनस्तदर्थेन ॥२०॥(पू०)

वैकृतेषु कर्मसु दार्शपौर्णमासिकारभणीया कर्त्तव्या उत नेति विचारेय कर्त्तव्येत्युच्यते। किं कारणं प्रकृतिकालमध्यत्वात्। प्रकृते दर्शपूर्णमासयोर्यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति तन्मध्ये वैकृतानि कर्माणि यत्र कृता पुनस्तदर्थेन कृतस्य यावज्जीवविकस्य प्रयोगसार्थेन आदौ कृतारभणीया।

सकृदारम्भसंयोगात् ॥२१॥ [हे०]

एकः पुनरारम्भो यावज्जीवप्रयोगादित्युक्तम्। एवं सेव तेषां प्रसङ्गात् कार्यं साधयिष्यतीति तस्माद तेषु भेदः स्यात्।

स्याद्वा कालशेषभूतत्वात् ॥२२॥(सि०)

स्याद्वा विकृतिष्वारभणीया कुतः? चोदकेन प्राप्यत इति न तु प्रकृतिकालमध्यपातात् प्रसज्यत इत्युक्तं न यावज्जीवकालः। प्रकृतेः शेषभूतत्वात् कर्त्तर्धर्मोऽसावित्युक्तं कर्त्तुर्वा युतिसंयोगादिति योऽसौ कर्त्तर्धर्मोनियमः। तस्याकालः प्रकृतेस्तु दर्शपूर्णमासः स्वकालः तस्मात्र दर्शपूर्णमासप्रयोगस्य तन्मध्ये प्रतीमा विकृतयः यतो न स्वारभणीया प्रसज्यते। अन्यथा कृत्वा दोष उक्तोऽन्यथा परिहारः दार्शपूर्णमासिके यावज्जीवं काल इति कृत्वादोष उक्तः॥ नैयमिक इति परिहारः पक्षान्तरैरपि परिहारा भवन्ति॥

आरम्भविभागाच्च ॥२३॥ (हे०)

विभक्तः प्रकृतिविकृत्योरारभ्यस्तदा प्रकृतिरुत्पन्नस्यैव हि कालेन निमित्तेन वा चोद्यते। अतस्तस्याः प्रकृत्यारम्भे आरम्भः आरम्भेदाच्च तन्निमित्ताया आरभणीयाया भेदः स्यात्। तस्माद्विकृतिष्वारभणीया।

विप्रतिषिद्धधर्माणां समवाये भूयसां धर्मकालाधिकरणम्।

यच्चदशरात्रे अग्निष्टुदेकाहः प्रथममहः। ततोऽग्नि-

गौरावुचिति अङ्गः। अतिशिष्टे च आदृत्यादिको धर्मः कर्तव्य उताग्निष्टुत इति नतु सिद्धमेतत् कोदकनामधेययोर्बलाबल परीक्षायामेकादिको धर्मः कर्तव्य इति। न च क्रत्वभिधानादधिकानामङ्गत्वमिति तथा सिद्ध्या-शास्त्ररेषाक्रियते। अथवा शास्त्रमेव मिश्रयिष्यति।

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मकत्वम् ॥२४॥[सि०]

विप्रतिषिद्धधर्माणामेषामग्निष्टुतश्चैकादशानां चाङ्गां समवाय एतस्मिन् पञ्चदशरात्रे भूयसामेकादशानामङ्गां सधर्मकत्वं स्यात्। तदीयो धर्मः कर्तव्यः को हेतुः भूयस्त्वमेव। बहुषु गुणसम्बन्धेषु महत्फलं भवति। एकस्मिन्नल्पं फलम्। एष लोके दृष्टान्तः। लोके एकादशसु प्रदीपेषु तैलवर्त्तिसम्बन्धे एकस्मिन् गृहे महान् प्रकाशो भवति। विपर्यये अल्पः। किं पुनरिहोदाहरणम्। सुवस्रुक्षाग्निष्टुत्याग्नेयी इतरेष्वहःस्वैन्द्री-तत्रैन्द्री कर्तव्या॥

तत्रैव संख्यानां मुख्यधर्मप्रकृत्यधिकरणम्।

मुख्यं वा पूर्ववोदनाल्लोकवत् ॥२५॥ सि०

यत्र मुख्यसंख्यानां प्रधानानां धर्मविप्रतिषेधः। तत्र मुख्यधर्मः कर्तव्यः यथाग्नावैष्णवमेकादशकपालं निर्वपेत् संग्रामे। सारस्वतीं मेधीं वानस्पत्ये इति तत्र मुख्य-स्याग्नावैष्णवस्य कल्पो भवति कुतः? पूर्ववोदनात्।

पूर्वचोदितवत्। पाठक्रमेणापूर्वमनावेक्षयः कर्त्तव्यः। तस्य धर्मा अप्रत्यनीकाः प्राङ्वत्सि उत्तरस्य तु पूर्वेण विरुद्धाः तदुत्तरकाला हि तस्य प्राप्तिः। तद्धर्माणाच्च पूर्वस्य क्रमे क्रमे उत्तरस्य तेनैव कृतार्थत्वात्।* स्वकर्मो निवर्त्तते। एकाधिकरणं चैके मन्यन्ते। तेषां पक्षदशरात्रेऽपि मुख्यधर्मानुग्रहणं वा।

तथा चान्यार्थदर्शनम् ॥ २६ ॥ (उदा०)

अन्यार्थोऽपि पूर्वं प्राप्तस्य बलीयस्त्वं दर्शयति। षड्रात्रस्येव पूर्वमथाग्नेयीज्यते रूपापित्त्वेव कर्मवदग्निकर्मेति इदं चापि यथा वै पूर्वावसायिनो जघन्यावसायिनं नीचीयन्ते नावसास्यन्तीत्येवमेवेतदिति।

ज्योतिष्टोमे दीक्षणीयाधिकरणम्।

अङ्गगुणविरोधे च तादर्थ्यात् ॥२७॥ (पू०सि०)

ज्योतिष्टोमे दीक्षणीया प्राग्नावैष्णवमेकादशकपालान्निर्वपेत् दीक्षिष्यमाण इति तत्रैव। स सोम्यमहः तत्रोः पूर्वकालः य इष्ट्वा पशुना सोमेनाग्रयणेन वा यजेत सोममावास्यायां पौर्णमास्यां वा यजेतेति वचनात्। यदा एका दीक्षा तिस्र उपसद इत्येवमादयः क्रमाक्षतादविरोधः। तत्र चिन्ता किं दीक्षा पर्वणि कर्त्तव्या। अपर्वणि श्रुत्या उत विपर्यय इति मुख्यत्वाद्दीक्षा कार्येति प्राप्त उच्यते। अङ्गगुणेन प्रधानगुणस्य विरोध एतस्मिन्न युक्तो बाधितुं। कुतः तादर्थ्यात्। अङ्गगुणवत् क्रि-

वते प्रधानं संयुक्तं स्यात् इति चेदुच्यते गुणवति क्रियमाणे विगुणमाधीयते क्रीऽर्थोऽङ्गेनागुणवता कृतेन। तस्मात्पर्वणि युक्ता कर्त्तव्या अपर्वणि दीक्षा।

परिध्यधिकरणम्।

परिधेर्द्वयर्थत्वादुभयधर्मा स्यात् ॥ २८ ॥ (पू०)

पशुमन्तु चातुर्मास्येषु श्रूयन्ते। परिधौ पशुं नियुञ्जन्तीति स परिधिरुभयधर्मा स्यात्। परिधर्मा यूपधर्मा च कस्मात् द्वयर्थत्वात् स करोति अग्नेश्च परिधानं पशोश्च प्रागुत्पादमर्थप्रयुक्ताश्च धर्मास्तस्मादुभये कर्त्तव्याः। अविरुद्धाश्च ये यज्ञा यवमतीभिरद्भिः प्रोक्षणमञ्जनं परिव्ययणमिति यूपधर्माः। दृषत्सवहनं समानं जुह्वा वसुरसीत्येवमादिभिरञ्जनमभ्यात्रावणमिति परिधिधर्माः।

यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात् ॥२९॥(पू०)

विरोधे तु सति यूपधर्माः कस्मान्मुख्यानन्तर्यात्। मुख्यः पशुः स हि यज्ञं निर्वर्त्तयति। तस्यानन्तरो यूपः संनिधानात्। तेन सोऽन्तरङ्गः परिधिस्त्वनेन सम्बध्यते। अग्निर्हविषा स बहिरङ्गः। अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः। तत् कस्य हेतोः। अथ हि पूर्वं प्रयोगो भवेत्। इमे वयं चपूर्वाभ्यां। तदनादरपूर्वेणानर्थक्यापत्तेः तद्हेतु विज्ञायते यत्तदेव तुदिरपूर्वसम्बन्धेन निर्वर्त्तमानेषु प्रयोगेषु प्रयुज्यमानान्तरङ्गे तावदापद्यते ततो ऽग्नेर्बहिरङ्गो बर्हिरङ्गे च यज्ञे पूर्वमाधीयते। तत्रैव हि प्रकृतिवदेव कारयाभ्यासात्। तस्मात्परिधेरर्थे ये

धर्मास्ते कर्त्तव्याः। कः पुनरसौ तत्त्वमुच्यत्वं नियमनमिति।

इतरो वा तस्य तत्र विधानात् उभयोश्चाङ्गसंयोगः ॥ ३० ॥ (सि०)

इतरो वा यूपधर्मो वाऽविरोधी कर्त्तव्यः कुतः? तस्य तत्र विधानात्तस्य यूपकार्थस्य पशुनियोजनस्य तत्र परिधौ विधानात्। परिधौ पशुं नियुञ्जन्ति अवस्थाप्य परिधित्वं नियोजनमुच्यते। तस्य परिधित्वानुपमर्देन विज्ञायते। तथाभूतोपदेशात्। यथा खले वालीयूपो भवतीति। यद्युच्येत तच्चेद्धा परिधित्वमेव व्याहन्येत सत्योक्तोऽसावुपमर्द्य तत्र परिधौ पशुं नियुञ्जन्तीत्येतदेव वाऽयथार्थं स्यात्। उभयोश्च पक्षयोरङ्गेनैव धर्मस्य संयोगः उभयोर्वाङ्गसंयोगः न ह्यविप्रधानेन प्रत्यासत्तिरिति यश्च खलोपकारविशेषः तस्मादकरणं वा अतः परिधिधर्मः कर्त्तव्यः।

सवनीयपुरोडाशाधिकरणम्।

पशुसवनीयेषु विकल्पः स्यात् वैकृतश्चेद्धि उभयोरश्रुतिभूतत्वात् ॥ ३१ ॥ (पू०)

सवनीये धर्मो सवनीयेषु पुरोडाशेषु पुरोडाशे प्रकृते वैकल्पः स्यात् पाशुकं वा तन्त्रं सवनीयेषु प्रसज्यते। सवनीयतन्त्रं वा पशोः कुतः? विधिशेषभावात्। सवनीयपुरोडाशाः पशुतन्त्रे विधीयन्ते। न पशुपुरोडाशतन्त्रे उभयोः स्वतन्त्रम् चाश्रित्य यद्यं दर्शपूर्णमासाभ्यां हविषा यूपं परि-

वीताग्नेर्यं सवनीयं पशुमुपाकरोति तमनुसवनं सवनीयाः पुरोडाशा निरूप्यन्त इति तत्र यदि कस्यचित् प्रत्यक्षशिष्टं स्यात्। कस्यचिदानुमानिकं तदा यस्य प्रत्यक्षशिष्टं सतन्त्वं स्यादितरत्र प्रसङ्गभाक् उभयोश्चाश्रुतभूतत्वं पशुरपि वैकृतः पुरोडाशा अपि तेनाथमपि विशेषो नास्ति अत उभयोः सुखप्राप्तेरन्यतरेण कृतार्थत्वाद्विकल्पः। ननु वैकृत एवायं पशुः तत्र वैकृतस्येति संशयवचनं न युक्तम्। अत्रोच्यते। असंशयितेऽपि संशयवादो भवति। यथा इहामावस्यां बहुभिर्ब्राह्मणावेदपारगाः। ग्राह्याणि चेत्यमाणं सुवर्गस्य परमा गतिः।

पाशुकं वा वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ॥ २२ ॥ (सि०)

पाशुकं वा तन्त्रं पुरोडाशेषु प्रसज्यते। न विकल्पः स्यात् कुतः? तत्र वैशेषिकाम्नानात् पशोर्वैशेषिको धर्मः तथाम्नातः सूत्रवाक्यं प्रेषः अग्निमग्नेति तदाम्नातमनर्थकं विकल्पे सति स्यादन्तरेणापि ह्याम्नानं पक्षे भवत्येव सः अतः आम्नातस्यामर्थात्वित्योऽसौ न च पौरोडाशिके तन्त्रे प्रसज्यते स हि नैमावदर्थेन प्रेषो वक्तव्यः। न च तत्र नैमावदर्थोऽस्ति दर्शपूर्णमासयोश्चत्वार ऋत्विज इति नियमात् पशौ तु न सोऽस्ति पशुतन्त्रे प्रसज्यमाने न किञ्चिदैगुण्यं पुरोडाशतन्त्रे सति ऋत्विक्संख्या वा वर्जयितव्या अमेचावदर्थेन वायं प्रेषो वक्तव्यः। उभयथाप्रकृतिविरोधः। तस्मात् नियमेन पाशुकं तन्त्रं प्रसज्यते।

पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात्

॥ ३२ ॥ (कि०)

अपि च पशोस्तन्त्रस्य विप्रकर्षो वपया प्रातः सवनेन वरन्ति पुरोडाशेन मध्यन्दिने सवने अङ्गैस्तृतीयसवन इति । तस्य विप्रकृष्टत्वात् तन्त्रमध्ये पुरोडाशानां विधानं युज्यते प्रातःसवनीयानां तु पुरोडाशानां तन्त्रं प्रातः सवन एवापहन्यते । अनुसवनं सवनीयाः पुरोडाशा निरूप्यन्त इति वचनात् । तन्मध्ये पशोः पातो न घटते पुरोडाशाङ्गप्रचारयोर्व्यतिरेकात् । इह च प्रातः सवनीयैरेव सह पशोः सन्देहः इतरे पुनः पुरोडाशा असंशयं पशोः प्रातः सवनीयानां वा तन्त्रमध्ये पतिताः । ननु अश्विमारुताद्यैर्मनुवाजैश्चरन्तीति अनुवाजानामुत्कर्षात् पौरोडाशिकमपि तन्त्रं प्रवर्तते । सत्यम् । अयमपि पाशुकानामनुवाजानामुत्कर्षः कथं प्राप्यते सोमान्तेष्वरोः प्रतिप्रस्थातेक्षते संस्थिते यूपे प्रस्तरं प्रासयति । चतुर्भवत्यध्वर्यवे तिसृभ्य पञ्चानुवाजेभ्य उत्कृष्टस्य युज्यते न पौरोडाशिकेभ्यस्तस्योत्कर्षो न प्राप्नोति प्रासङ्गिकस्य सोमार्धेदसंयोगादिति । तेषां हि हविःप्रचारादूर्ध्वमवसरः तद्ग्रहण उत्कर्षवादः प्रातःसवनीयानान्तु ये अनुवाजा न ते तद्ग्रहणाः । अतो न तेषामुत्कर्षः । तस्मात् पाशुकं तन्त्रम् । अथ वचनमिदं कस्मान्न भवति । परिकृतमेतद्विकारवाक्यं स्यात् । प्रतिपत्तिविशेषं कालं च विदधत् । तस्मात्पाशुकं तन्त्रं पुरोडाशेषु प्रसज्यते । न विकल्पते इति ।

समानतन्त्रयोः प्रकृतिविकृत्योर्विकृतिनिमित्तता विकल्पश्च ।

अपूर्वं च प्रकृतौ समानतन्त्रा चेदनित्यत्वादनर्थक्यं हि स्यात् ॥ ३४ ॥ (पू०मि०)

यदा प्रकृतिर्विकृत्या समानतन्त्रा तदा किं प्राकृतं तन्त्रं कर्तव्यम् । उत वैकृतं नन्वेव प्रकृतिर्विकृत्या समानतन्त्रा ऽस्ति । समानतन्त्रा चेदित्येवं ज्ञात्वा चिन्तेयं किं प्राप्तम् । यदि पूर्वं प्रकृतिः प्रयुज्यते । तत्प्राकृतम् अथ विकृतिस्तदा वैकृतं किं पुनः अत्र युक्तं प्रकृतिरिति नित्या प्रकृतिरागन्तुर्विकृतिरिति कामे वा निमित्ते वोत्पत्तौ आगच्छति पूर्वावसायिनश्च बलीयां सो जघन्यावसायिभ्यस्तस्मात् प्रकृतिः पूर्वं प्रयुज्यते तस्य तन्त्रं कर्तव्यं प्राप्तकालत्वात् । तस्मात् प्राकृतं तन्त्रं कर्तव्यमित्येवं प्राप्तमेवं प्राप्ते ब्रूमः । अपूर्वे च वैकृतं तन्त्रं प्रकृतेः प्रसज्यते समानतन्त्रा चेदनित्यत्वाद्विकृतेः कामे वा उत्पत्तौ निमित्ते सा ऽवाप्नोति नैमित्तिकी चिकीर्षा तस्याः चिकीर्षां बाधते । सत्यां हि नित्यायां सा भवति ततस्तामबाधमाना नैवोत्पद्यते यदि न बाध्येत, अनर्थकं स्यादैकृतं विधानं तस्माद्वैकृतं तत्र प्रकृतौ प्रसज्यत इति ।

पक्षद्वयनिरूपणम् ।

आश्रयत्वे चावाद्यविशेष एकवचनात् स नैकस्मिन्नेकवचनान्तप्रकृतिप्रत्ययस्य धर्मः प्रयुक्तं बर्हिरितरेषां प्रयुक्तमप्रयुक्तं वा तत्र किमनियम उत प्रयुक्तमेवेतिविचारः । आश्रयत्वे तु ऐन्द्राग्नस्य सुब्धत्वादनियमे प्राप्ते उच्यते ।

अधिकश्च गुणः साधारणे विरोधात् कांस्य-भोजिवदमुख्येऽपि ॥ ३५ ॥ (पू०)

साधारण एतस्मिन् दार्शपौर्णमासिके आग्नेये-द्यादीनां योऽयमधिको गुणः द्यावापृथिवीयस्य वैश्वे-षिकः सोऽपि मुख्येऽपि सति द्यावापृथिवीये नियम्येत। अविरोधात्। कांस्यभोजिवत्। तद्यथा मिश्रस्य कांस्य-पात्रभोजित्वनियम उपाध्यायस्य न नियमः। यदि तयो-रेकस्मिन् पात्रे भोजनमापद्यते। अमुख्यस्यापि मिश्रधर्मो नियम्येत मांभूदस्मलोप इति एवमिहापि तस्मान्न नियमः।

तत्प्रवृत्ता तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तवाकेन ॥ ३६ ॥ (पू०)

तस्य प्रसूनस्य प्रवृत्ता वैश्वदेविकं तन्त्रं सूक्तवा-कस्य प्रेषेण वैश्वेषिकेण नियतम्।

न वाऽविरोधात् ॥ ३७ ॥ (सि०)

न वा नियम्यते कुत अविरोधात्। अविरुद्धोऽयं धर्म इतरेषामपि इविषान्ते न न वैश्वेषिकः। अवैश्वेषिकत्वाच्च ततोऽन्यतरन्नियन्तु शक्नोति वैश्वेषिकस्तु सूक्तवाकस्तस्मात् सोऽन्यतरं नियन्तुमुत्सहते किं च।

शास्त्रलक्षणत्वाच्च ॥ ३८ ॥ (हे०)

न च शास्त्रविहिताः प्रसूनाः किं तर्हि चोदकप्राप्ताः

किमतः यदि शास्त्रविहिता भवेयुः। ततस्तेन प्रकृतिविहितेन वैश्वदेविकं तन्त्रं नियम्येत एवं द्यावापृथिवीयधर्मत्वात् प्राप्तानामिव प्रसृतानां पुनर्वचनमानर्थक्यपरिहारलक्षणं वा वैश्वदेविकस्य तन्त्रस्य विधानं विज्ञायते। प्रसृताद्यितन्त्रं भवतीति न तच्छास्त्रलक्षणं तस्मान्नास्ति तन्त्रस्य नियम इति।

इत्याचार्य श्रीशवरस्वामिनः कृतौ मीमांसाभाष्ये द्वादशाध्यायस्य द्वितीयः पादः॥

अथ द्वादशाध्यायस्य तृतीयः पादः।

विश्वजिति वत्सत्वगधिकरणम्।

विश्वजिति वत्सत्वग्नामधेयाऽहृतमितरथा तन्त्रं भूयस्त्वादहृतं स्यात्॥ १॥ (पू०)

अग्निष्टोमस्योऽहीनस्य विश्वजिदभिजितावग्निष्टोमावजित उभयतो ज्योतिरभ्ये षड्हः पशुकामो ज्योतिषा यजेतेति। विश्वजित्येकाहवत्सत्वगग्नेयधाद्देशे तस्य परिधानार्थमाम्नातो वत्सत्वं परिधत्त इति ज्योतिष्टोमे अग्नेयं वासः षड्हराभे उभयं प्राप्यते। तयोः परिधानवीरेवार्थत्वादिकस्य प्राप्त उच्यते। वत्सत्वक् स्यात् वि-

ऋत्यः । नामधेयेन वत्सत्वम् प्राप्यते । चोदनाहतं चोदकाच्च नामधेयशब्दो बलवत्तर इत्यृक्षम् । अपिच बलवद्विधानादधिकानामशब्दत्वमिति यद्धि नामधेयतः प्राप्तिर्न स्यात्ततो भूयस्त्वेन ज्योतिष्टोमप्रकृतीनामङ्गानामहतं स्याद्यि त्वसौ तस्मान्नाहतं भवति । नन्वभिजिज्ज्योतिरिति ज्योतिष्टोमिकधर्मग्राहीण्येतानि नामधेयानि सन्ति तथापि मुख्यत्वाद्विश्वजित एव बलवत्वम् ।

अविरोधो वा उपरिवासो हि वत्सत्वक् ॥२॥ (सि०

न वा नियमः वत्सत्वगेवेतिकिं तर्हि समुच्चयः सर्वाङ्गोपसंहारी प्रयोगवचनोऽनुगृह्यते । ननु नामधेयस्य बलवत्वादहतं बोध्यते । विरोधे सति बाध्येतेतिविरोधाभावयोः कथमुपरिवासस्य कार्यं वत्सत्वमभविष्यति । वासो ह्यं पुरुषस्यांचारतः प्राप्यते ननूपरिवाससि परिधत्त इति न भवति नैतदेवमुपरिवासस्यापि भवति यथा केवलं परिधत्ते दीर्घं परिधत्त इति तस्मात् समुच्चयः ।

अनुनिर्वाप्याधिकरणम् ।

अनुनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्यात् शिष्टकृदर्शनाच्च ॥३॥ (पू०)

अग्नौ भूयते अग्नीषोमीयस्य पुरोडाशमनुदेवतां इवीँषि निर्वपतीति । अनुवन्ध्यायामपि देविकाश्चीँषि तत्र भूयस्त्वेन तन्त्रं नियच्छेत । अनुनिर्वाप्याणां बहुत्वात् । ततश्च पशुपुरोडाशे प्रसज्येत । किञ्च यत्रिष्टस्यच्छन्दसं

स्विष्टकृते वपनं क्रियते यद्यपुरोडाशस्य ऐडिकाहविष आग्नये स्विष्टकृते समवत्तीति। तदनुनिर्वाप्यार्था तत्र उपपद्यते। यदा तु पशुपुरोडाशतन्त्रं तदा स्विष्टकृच्छब्दस्य आत्मलाभनित्यत्वादाग्नेयत्वाद्वा तथा।

आगन्तुकत्वाद्वा स्वधर्मा स्यात् श्रुतिविशेषादितरस्य च मुख्यत्वात् ॥ ४ ॥ (सि०)

आगन्तवोऽनुनिर्वाप्या श्रुतिविशेषात् एवं हि श्रूयते पशुपुरोडाशमनुनिर्वपतीति एवं श्रुते पूर्वं पशुपुरोडाशः पश्चादनुनिर्वाप्या भवन्तीति स मुख्य इतरे तु जघन्या यतस्तेषामाशयत्वात् इतरस्य च मुख्यत्वात् पशुपुरोडाशः स्वधर्मा स्यात्।

स्वस्थानत्वाच्च ॥ ५ ॥ (हे०)

अपि च पशुपुरोडाशस्थानं यदपाप्रचारात् परतः अङ्गैरपि तस्य तत्स्थानेरेव भवितव्यं प्रधानदेशस्थास्तेषां यथानुनिर्वाप्यार्था तन्त्रं स्यात्। ततस्तस्मिन् स्थाने तदङ्गानि क्रियेरन् पशुपुरोडाशाङ्गान्यन्य स्थानानि भवेयुः। तेषां स्वस्थानाय पशुपुरोडाशस्य तन्त्रं स्यात् वर्तध्वम्।

स्विष्टकृच्छब्दपक्षान्नेति चेद् विकारः पवमानवत् ॥ ६ ॥ (आ०नि०)

स्विष्टकृच्छब्दपक्षे चेद् इति यदुक्तं तत्परिहरन्नाह विकारः पवमानवदेव च यद्यपुरोडाशस्य तन्त्रेण स्विष्टकृति प्राप्तो विकारो यद्यपि

विधत्वाज्ञये स्विष्टकृति समवद्यति स स्विष्टकृच्छब्दः
वनं कर्तव्यमिति यवाज्ञये पवमानाय निर्वपतीति
वनात् पवमानशब्दको निर्वापः क्रियते एवमिहापि।

अविकारो वा प्रकृतिवच्चोदनां प्रतिभावाच्च

॥ ७ ॥ (सि०)

अविकारः अस्विष्टकृच्छब्दकं वचनं कर्तव्यं प्रकृति-
वदतिदेशात्तवचनादिति नाय विकारो विधीयते। किं
तर्हि समवदानं देविकाहविषां यज्ञये स्विष्टकृते समवद्य-
तीति। तत्र विकारोऽन्यस्मिन् विधीयमाने वाक्यं भिद्यते।
कथं तर्हि स्विष्टकृद्वचनम्। चोदनां प्रतिभावाच्च।

दर्शपूर्णमासयोर्यास्ति स्विष्टकृच्चोदना सा स्विष्टकृच्छ-
ब्दिका तत्प्रत्यं तद्वचनं तदुपलक्षणाय तच्छब्दस्य याज्यो
पेषभावितया तदुक्तं स्यात्तावदज्ञये स्विष्टकृत इति यथा
यरमयं बर्हिर्भवतीति नवनीतमाज्यमिति प्राकृते कार्ये
श्रुते प्रकृतिलिङ्गेन द्रव्यशब्देन एवमिहापि स्विष्टकृच्छब्देन
प्राकृती लक्षणया देवतानूद्यते।

आधारे ऋत्वादिवत्तद्वयाधिकरणम्।

एककर्मणि शिष्टत्वाद् गुणानां सर्वकर्म स्यात्

॥ ८ ॥ (सि०)

य एकस्मिन् कर्मणि गुणा वचनः शिष्यन्ते तेषां
र्वेषां क्रियार्थं स्यात्। अनुग्रह एव सर्वेषां प्रयोजनमर्थवद्
भविष्यति। सर्वोपकारी च प्रधीयमानोऽनुग्रहो

यथाचारे ऋतुमाचारयति सन्ततमाचारयति प्रायश्चि-
यति च।

विकल्पाधिकरणम्।

एकार्थास्तु विकल्प्येरन् समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य ॥ ९ ॥(सि०)

ये त्वेकार्था एककार्यार्थाः ते विकल्प्येरन् यथा व्रीहि यवौ यथा खादिरादीनि यूपद्रव्याणि दृढद्रव्यान्तरे ते वि कल्प्येरन्। तस्मात् समुच्चये ह्यावृत्तिः स्यात् प्रधानस्य एकेन कार्ये कृते यदि द्वितीय उपादीयते। आवृत्तिः प्रधानस्य भवेत् सा चायुक्ता किं कारणं प्रधानं हि फलाय वा क्रियते फलवदुपकाराय वा नाङ्गं सकृत्कृतेन च कृतं कार्यं तस्य निरर्थिका आवृत्तिः।

अभ्यस्येतार्थवत्त्वादिति चेत् ॥१०॥(आ०)

इति चेत्पश्यसि अनर्थकोऽभ्यास इति नानार्थको गुणा-न्तरं स तस्यार्थवत्त्वायाभ्यस्येत।

नाश्रुतत्वात् विकल्पवच्च दर्शयति कालान्तरेऽर्थवत्त्वं स्यात् ॥ ११ ॥ [आ०नि०]

नेत्युच्यते। कुतः ? अश्रुतत्वात्। अश्रुतोऽभ्यासः तस्य प्रमाणं नास्ति केन करिष्यति गुणान्तरशासन-स्यार्थवत्त्वं वक्ष्यति। कालान्तरे अर्थवत्त्वं स्यादिति। यथान्यत्रापि [illegible] उभे कुर्यात्। पौर्णमासे उभे कुर्यात्। अभिचित्यवत्यो काम्ये कूर्यते उभे [illegible] कुर्यादिति तत् समुच्चये कृते न स्यात्

[illegible]दपि च विकल्पवच्च दर्शयति विल्वेन वा खादिरो वा पालाशो वा [illegible]
[illegible]ति वेल्वो वा खादिरो वा पालाशो वा [illegible]
प्रकृतीनां यूपा भवन्ति तत्रेतरत्र खादिर एव कार्य
ति वाजपेये खादिरं नियच्छन् अन्यत्र विकल्प
[illegible]यदति तस्मादपि विकल्पः कालान्तरे अर्थतत्त्वं स्यात्।
[illegible]व गुणान्तरयासनस्यावश्यकमिति कालान्तरे प्रदीना-
[illegible]तरेऽर्थवत्त्वं तस्यापि भविष्यति तस्मिन्नर्थवति नाभ्यासस्य
प्रमाणम्। ननु विकल्पस्यापि नास्ति प्रमाणं विकल्पेन
किञ्चिदश्रुतं क्रियते व्रीहिभिर्यजेतेति श्रुतैरिज्यते। यवै-
र्यजेतेत्यपि श्रुतम्। तैरपीज्यते। एकस्मिन् प्रयोगे कार्य्या
भावाभ्यामिज्यते। अथ कस्मान्न मिश्रीयते तेन।
तदुक्तम् एकैकस्य निरपेक्षस्य साधकत्वं श्रुतं तस्मिन् मिश्री-
भावे बाध्येत। तस्मादिकल्पः।

प्रायश्चित्ताधिकरणम्।

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयो-
गस्तस्मात् सर्वस्य निर्घातः ॥ १२ ॥ (पू०)

प्रायश्चित्तानि द्विःप्रकाराणि कानिचिद्वै गुरुस्व
प्रमादादापतितस्य समाधानार्थानि कानिचिन्नित्यं
कर्माङ्गानि। तत्र समाधानार्थानि यावार्थं करोतीत्यत्र
पार्थिवित्वात् भूः काङ्क्षेति ताक्षपत्ने गुरुस्वस्य यदि
नष्टो दक्षिणाग्नौ गुरुः काङ्क्षेति, यदि स्मरत्य-
काङ्क्षेत्यादयश्च। नित्यानि नियताधिकारमित्य-

दित्यर्थः। कः पुनरयमस्य विनाशः विष्टस्याक्रिया प्रतिषिद्धसेवनं च कथं पुनर्ज्ञायते विनष्टस्य समाधानार्थं तत्प्रायश्चित्तमिति वाक्यसंयोगात्। यथाग्निमियादिदं कुर्यात्। यदि तस्मिन् कृते यदि नष्टमेव कोऽर्थस्तेन कृतेन। यस्तु अत्र ब्रूते आर्त्तौ निमित्ते कर्माङ्गं प्रायश्चित्तमिति स च वक्तव्यः। अङ्गं नाम तत् यत् प्रधानं फलवत् करोति प्रधानविनाशादफलत्वमापन्नं यदि तदनेन फलवत् क्रियते तत एतदङ्गं यच्चेदं फलं प्रयुक्तमेतेन फलवत् क्रियते हन्त तर्हि जातस्य विनष्टस्य समाधानार्थमथ न क्रियते न तर्हि कर्माङ्गं तत्र यदुच्यते निमित्ते कर्माङ्गमिति तदेवनास्ति। अपि च तत्र तत्र समाधानमेव वाक्यशेषे श्रूयते। अग्निर्वै देवानां यदि कृतः स्वेन भागधेयेनोपासीरन् स एवं यजमानमपि नयति स एवं व्रतमालभयतीति तस्मादेते दोषनिर्घातार्थाः तेषां विकल्पः स्यात् कुतः? ऐकार्थ्यात्। कथमेकार्थ्यमेतेषां निष्यवेन दोषेण केवलस्य तस्य तस्याभिसंयोगो यद्युक्तो यत्र आर्त्तिमिधात् मूः स्वाहेति जुहुयादिति। तस्मात् सर्वस्य दोषस्यैकेन निर्घातः। एकेन चेदिष्टतो दोषो द्वितीयादीनि प्रयोगान्तरार्थानि भवन्ति एवं आर्त्तेष्वपि द्रष्टव्यम्।

समुच्चयस्तु दोषार्थः ॥१३॥ (सि०)

यानि तु दोषनिर्घातानि तेषु समुच्चयः कानि पुनस्तानि यानि भुक्तस्याक्रियया प्रतिषिद्धादि वा तानि उच्यन्ते। यथा अश्नाद्भुक्तमनिर्दशं सूर्य्योऽभ्युदयाच्चेत् अयं निर्व-

येत् सौर्यमेककपालं यस्याहुतमग्निहोत्रं सूर्योऽभ्युदयादित्यादि। अग्निं समाधास्यन्वाचं यत्वा दम्पती सर्वाहुतिमुपासीयातामिति। तत्र दोषो न दृश्यते दोषस्याभावाद्विधातार्थता नास्ति। केवलमभ्युदये निमित्ते कर्म विधीयते तच्च नित्यं कर्मणः प्रकरणस्थत्वात् कर्माङ्गं विज्ञायते यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन यद्यन्ते तेषां समुच्चयः।

अनध्याये मन्त्रपाठाधिकरणम्।

मन्त्राणां कर्मसंयोगः स्वधर्मेण प्रयोगः स्यात् धर्मस्य तन्निमित्तत्वात्॥ १४॥ (पू०)

कर्मणि प्रयुज्यमानानां स्वधर्मेण प्रयोगः स्यात्। य एवां ग्रहणकाले धर्मः पर्वणि नाध्येयं वाते नाध्येयं स्तनयित्नौ नाध्येयमित्यादयः धर्मस्य तन्निमित्तत्वात् धर्मोऽयं मन्त्रप्रयोगनिमित्तः अयमपि च मन्त्रप्रयोगः। तस्मादत्रापि न भवितव्यम्।

स्यात् प्रति विधानाद्वा सर्वकारणं प्रयोगः स्यात् कर्मार्थत्वात् प्रयोगस्य॥ १५॥ (सि०)

अध्याये ऽनध्याये ऽपि कुतः। विध्यर्थोऽयं प्रयोगः। प्रत्येतव्यं विधानं स एव ग्रहणस्य धर्मः तस्मादयं गुणवत् करोति कः पुनरर्थ इत्यस्य गुणः। अविघ्नेन निर्वृत्तिः कथं पुनर्ज्ञायते। ग्रहणार्थोऽयं धर्म इति ग्रहणकाले श्रूयते न कर्मकाले। मा भूत् कर्मधर्मो मन्त्रधर्मो

भविष्यति। अन्यधर्मश्च स यत्र मन्त्रस्तत्र प्राप्नोति। उच्यते न धर्मो मन्त्रेषु विधीयते। किं तर्हि यद्यपि एवमभिनिर्वर्त्यते तेनैव मन्त्रो भवति। तस्माद्यद्यन्यधर्मो न च कर्मणि यद्यर्थः प्रयोगः किं तर्हि कर्मार्थः तस्मात्तच् धर्मस्याप्राप्तिः अपि च पर्वणि चाध्ययनस्य प्रतिषेधः यद्यमन्त्रं कर्म क्रियते प्रयोगानर्थक्यम्। अथापर्वणि तथापि स एव स्मृत्यनुरोधेन प्रयोगः प्राप्नोति स्मृत्यनुरोधेनाप्रयोगः श्रुतिश्च स्मृतितो बलीयसी तस्माच्छ्रुत्यः प्रयोगनियमः।

मन्त्रस्वराधिकरणम्।

भाषास्वरोपदेशे ऐरवत्प्रायवचनप्रतिषेधः स्यात् ॥ १६ ॥ (पू०)

भाषिकेण स्वरेण केचिन्मन्त्रा ब्राह्मण उपदिष्टाः मन्त्रसमाम्नाये वैस्वर्येण पठिताः। यथा इमामग्नभ्नाखित्यग्नमेधे। कः पुनर्भाषिकः स्वर उच्यते। छन्दोगा ब्रह्मचार्येव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते। इति तेषु मन्त्रेषु प्रायवचनस्य स्वरस्य प्रतिषेधः स्यान्निवृत्तिः कस्मात् स्वरान्तरोपदेशात् ऐरवत् अथा इरापदस्योपदेशात् कर्मकाले गिरापदेशस्य निवृत्तिः अथ पुनर्न्यायते स्वरस्यायमुपदेशो न मन्त्रस्येति मन्त्रो नोपदेष्टव्यः। रूपादेव प्राप्नोति स्वरस्त्वनुपदिष्टो न प्राप्नोति तस्मात्तस्योपदेशः।

मन्त्रोपदेशो वा न भाषिकस्य प्रायोपपत्ते-र्भाषिकश्रुतिः ॥ १७ ॥ (सि०)

मन्त्रस्य वायमुपदेशो न स्वरस्येति कथं ज्ञायते मन्त्रोपदेशरूपोऽयं शब्दः किमस्य तत्सारूप्यम् इत्यज्ञाभिज्ञानमादत्त इत्याह मन्त्रेण वा साभिधीयते। न भाषिकेण स्वरेण मन्त्रोपादानं प्रत्याययति नेतरस्य कस्मात्तर्ह्युच्चार्यते प्रायोपपत्तेर्भाषिकश्रुतिः। भाषास्वरो ब्राह्मणे प्रवृत्तः। तस्मिंश्चेद् यदि प्रवचनेन पठ्यते। भाषिकस्वरसन्तानो विच्छिद्येत तत्परिहारार्थं भाषिकेणोपदेशः। यथा गायना गीतवस्तुकानि यानि गीतकेषु प्रक्षिपन्ति तान्यपि तेनैव गीतिस्वरेणैवोच्चारयन्ति मा भूत् स्वरसन्तानस्य विच्छेद इति तस्माच्च भाषिकस्वरोपदेश इति।

विकारः कारणाग्रहणे तन्न्यायत्वादृष्टेऽप्येवम् ॥ १८ ॥ (पू०)

इरापदेन तु गिरापदस्य विकारो युक्तः। कारणाग्रहणात्। यथा भाषिकस्यानुपदेशेन कारणेनोक्तेनैव गिरापदस्यानुपदेशो किञ्चित्कारणं गृह्यते। तस्मात्तस्योपदेशः। स कर्मकाले विधानात् समाम्नाये प्राप्तं गिरापदं बाधते तस्मात्तच्च विकारः। तन्न्यायत्वाद् दृष्टेऽप्येवम्। यो मन्त्रो मन्त्रसमाम्नाये वैस्वर्येण दृष्टः तस्य तथैव प्रयोगः। यस्तु न दृष्टो ब्राह्मणेन च भाषिकेणोपदिष्टः। यथा तं प्रोक्षेदानस्त्वोऽसीति। तत्र का प्रतिपत्तिरुच्यते। तन्न्याय-

स्यात्। अदृष्टेऽपि योऽसौ व्याप्त्या लक्षणः। मन्त्रोपदेशोऽयं तद्रूपत्वात् प्रवक्ष्यतीति। तेनैव न्यायेनादृष्टेऽपि मन्त्रोपदेश एव न भाषिकोपदेशः। तस्मात् तस्यापि प्रवचनेनैव स्वरेण प्रयोगः।

तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् ॥१९॥ (सि०)

तदुत्पत्तेर्वा मन्त्रस्य भाषिकेण प्रयोगः स्यात् प्रवचनलक्षणत्वात्। प्रवचनं मन्त्राणां लक्षणं यथा प्रोक्ष्यते तथाविधा विज्ञायन्ते ते च भाषिकस्येत्यपरा व्याख्या इमामग्भ्यवर्षीदिति नैतस्योपदेशः। किं तर्हि आग्नेन प्रतीकेन लक्षणेनासौ यथोत्पन्नो लक्ष्यते प्रावचनेन स्वरेणोत्पन्ना तस्मात्तद्विधाया उपदेशः। यस्तु ब्राह्मणोत्पत्तिरेव मन्त्रस्तत्र लक्षणस्याभावात् न लक्षणा अतस्तत्र यथास्तुतिप्रयोगः।

कर्म च मन्त्रकरणप्रयोगाधिकरणम्।

मन्त्राणां करणार्थत्वात् मन्त्रान्तेन कर्मादिसन्निपातः स्यात् सर्वस्य वचनार्थत्वात् ॥ ॥२०॥ (सि०)

पदार्थकरणा मन्त्राः। यथा इषे त्वेति छिनत्ति, देवस्य त्वा सवितुः प्रसवे इत्यादत्त इति। तेषां मन्त्रान्ते न कर्मादिसन्निपातः यस्मिन् कर्मण्युपयुज्यते किं कारणं सर्वस्य वचनार्थत्वात्। सर्वो मन्त्रः समस्तं वचनार्थं करोति कः पुनर्मन्त्रस्य वचनार्थः प्रयोगकाले पदार्थस्योपस्थानं मन्त्रे-

योपस्थितः पदार्थः कर्त्तव्यः विधीयते सङ्कल्पेन आक्षेपेण आख्यानसामर्थ्याद् वचनाच्च ऋषिरिति भाष्यकारो लिखितवतीति मन्वाने तच्चोपस्थानम् उपस्थितः प्रधानो वाक्यैक भाग इति तस्मादन्वान्तेन कर्मादिः सन्निपातव्यत्र-मन्त्रेषु ।

वसुधाराधिकरणम् ।

सन्ततवचनाद्धारायामादि संयोगः ॥२१॥(पू०)

श्रूयते सन्ततं वसोर्धारां जुहोतीति । अथापि पूर्वोक्तेन न्यायेन तथैव प्राप्त उच्यते । धारायामादिसंयोगः कर्मादिमन्त्रादिश्च सन्निपत्यो सन्ततवचनात् । समित्येकीभावः । ततोऽतिविस्तारहयोर्यत्र संहतनं भवति तत्र संपूर्वस्तनोऽपि वर्त्तते । इह कर्मवन्त्रश्च सन्निपात्यः तस्मात्तयोः संहतननमुच्यते । तच्चाद्योः सन्निपाते भवति तस्मादादिसंयोगः ।

कर्मसन्तानो वा नानाकर्मत्वादितरस्याप्रत्यत्वात् ॥ २२ ॥ (सि०)

कर्मणां वा सन्तानोऽयं सन्ततं जुहोति इति हि होमस्य केवलस्य हि सन्तान उच्यते नाम मन्त्रसंकीर्त्तनमस्ति न तु हयोः संयोगे संगम्यो भवति एवञ्च होम उच्येतेति नैष दोषः नानाकर्मत्वात् । बह्वीनीमानि कर्माणि तेषामनुपरमेण क्रियासन्तानो भवति कर्मनानात्वं बहुत्वात् द्वादश द्वादशानि जुहोतीति । न तु हुमसंस्थे यागे

आह नाम द्रव्यसहितमस्ति होमोऽत्र संख्यया युज्यते। द्वादश द्वादशानि जुहोतीति एवंसंख्यान् होमान् करोतीति। किञ्च इतरस्य च मन्त्रकर्मणोः सन्तानस्याश्रयत्वात् क्षणिकं कर्म न मन्त्रेण सहतनितुं शक्यते तदपि कर्मादिसन्निपात एव।

आधाराधिकरणम्।

आघारे च दीर्घधारत्वात् ॥ २३ ॥ (सि०)

दर्शपूर्णमासयोराघारं प्रकृत्य श्रूयते। सन्ततमाघार्यतीति तत्रापि क्षणिकत्वान्मन्त्रेण कर्मणः सहतननं घटते। एकत्वात् कर्मसन्तानो नास्ति तस्मात् व्याभिप्रायः सन्तानशब्दः। सन्ततं धारयतीति दीर्घधारया जुहोतीति दीर्घपरत्वात् सन्ततशब्दः।

मन्त्रसन्निपाते विकल्पाधिकरणम्।

मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यात् ॥ २४ ॥ (सि०)

ये मन्त्रा एककार्थाः यथा पुरोडाशविभागार्थाः पूषा वां विभजतु। भगो वां विभजतु। अर्यमा वां विभजत्वित्येवमादयः। तेषां विकल्पः कृतः। सन्निपातित्वात् करणा एते करणानां च मन्त्रास्तेन कर्मादिसन्निपातः उक्तो मन्त्राणां करणार्थत्वात् मन्त्रास्तेन कर्मादिसन्निपातः स्यादिति न च विकल्पमन्तरेण सर्वेषामन्ते कर्मादिसन्निपातः कर्तुं शक्यः। किं वचनमेतत् न हि न्यायः सर्वस्य वचनार्थ-

ादिति यथैवं समुच्चयेऽपि स मन्त्रो उच्यते। अथवा
ाधनार्थः सिद्धवति। एवेन तु क्रते कर्मणि सिद्धवति
योगोऽनर्थकः। तदेतत् कार्यक्ते भवति तस्मादेकार्थत्वा-
दकल्पः तत्र पूर्वमेवोक्तम् एकार्थासु विकल्पेरन्निति। तत-
स्तस्मिन्सूत्रमिदम् उत्तरचिन्तार्थम्।

मन्त्रसमुच्चयाधिकरणम्।

संख्याविहितेषु समुच्चयो सन्निपातित्वात्॥ २५॥ (सि०)

संख्यया ये विधीयन्ते मन्त्रा यथान्नौ चतुर्भिराहुतीर्
भ्यां खनति षड्भिराहरति तेषु समुच्चय आहु...वि
ारणं संख्या शब्देनोच्यते साङ्गीकर्तव्या न च समुच्चयाङ्गी
ा शक्याङ्गीकर्तुम्। आह समुच्चयेऽपि यः कर्मणो सन्नि-
ातः तेन तत् कर्म क्रतं भवति ये व्यवहिताः न ते:
ह असन्निपातात्। तथा सति न संख्या कर्मसन्निहिता
वति। नैष दोषः। अर्थाभिधानेन मन्त्रोऽङ्गीक्रत इति।
देवैते तमर्थमभिदधति। अनन्तरेण रूपं क्रियते इत्ये
वपदद्दष्टार्था भवन्ति। उच्यते नाद्दष्टार्था भविष्यन्ति।
सर्वं तदेव कर्म सक्रदभिधास्यन्ति भवति हि कादाचित्कस्य
मन्त्रस्यासक्रत्प्रयोगः यथा क्रुरु क्रुरु कादवाणीति तत्र यथा
भिधानार्थस्य मन्त्रस्याज्ञानसामर्थ्यादभिक्षितमभ्युदयकरं
भवति। एवं चतुर्भिरादत्त इति वचनात्तुरभिक्षितं
क्रतमभ्युदयकारि भवतीति तस्मात् समुच्चयेऽपि नाद्दष्टार्थ
ता समुच्चयस्य सिद्धः।

उक्तप्रसङ्गे वि मन्त्रे विकल्पाधिकरणम् ।

ब्राह्मणविहितेषु च संख्यावत् सर्वेषामुपदिष्टत्वात् ॥ २६ ॥ (पू०)

ब्राह्मणे च ये मन्त्रा विधीयन्ते यथा उक्तप्रयो उक्तप्रय खेति पुरोडाशे प्रथयन्तीति । तेषु च समुच्चयः स्यात् । सर्वेषामुपदिष्टत्वात् । न प्रयुज्यते तस्योपदेशो बोध्यते सर्वोपसंहारी च प्रयोगवचनोऽनुग्रहीष्यते । संख्याविहितवच्च सर्वेषामसकृदभिधानेनार्थवत्ता भविष्यति तस्मात् समुच्चयः ।

याज्यावषट्कारयोश्च समुच्चयदर्शनं तद्वत् ॥ २७ ॥ (नि०)

समुच्चय एव याज्यावषट्कारयोः समुच्चयोऽवगन्तव्यः समुच्चयवत् दर्शनं भवति । याज्याया अधिकरोतीति समुच्चये हि पौर्वापर्यं भवति तस्मादपि समुच्चयः ।

विकल्पो वा समुच्चयस्याश्रुतित्वात् ॥२८॥ सि०

विकल्पो वैष मन्त्राणां न समुच्चयः । कुतः ? उक्तो न्यायः । मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यादिति । न तु संख्याविहितवदेकार्था अपि सन्तो सकृदभिधानेन समुच्चेष्यन्ते नैतद्युक्तं कुतः ? समुच्चयस्याश्रुतित्वात् । यथा तत्र संख्यास्रवणात् । कृतकरणमध्य सकृदभिधानमाश्रितम् नैवं समुच्चयस्रवणमस्ति तस्मादथा न्यायमेकार्थत्वादिकल्पः ।

गुणार्थत्वादुपदेशस्य ॥ २९ ॥ (हे०)

यश्च सर्वेषामुपदेशोऽर्थवान् भविष्यति। अहेतुः स गुणार्थत्वादुपदेशस्य नैवासौ मन्त्रप्राप्त्यर्थं उपदेशः। किं तर्हि गुणार्थः अर्थवादो गुणं विधास्यतीति तदुक्तं गुणार्थेन पुनः श्रुतिः परिसंख्या अर्थवादो वेति यदि तर्हि नैवायं मन्त्रोपदेशः। किमिदमुच्यते सर्वेषामुपदिष्टत्वात्। एवं तर्हि कृत्वा चिन्त्येयं मन्त्रोपदेश इति कृत्वा चिन्त्यते अथवा उदाहरणान्तरं द्रष्टव्यम्।

वषट्कारे समुच्चयाधिकरणम्।

वषट्कारे नानार्थत्वात् समुच्चयः होत्रास्तु विकल्प्येरन्नेकार्थत्वात् ॥ ३० ॥ (पू०)

वषट्कारः प्रदानार्थो याज्या देवतोपलक्षणार्था तयोर्नानार्थत्वात् समुच्चयः सर्वोपदेशात्। होत्रास्तु विकल्प्येरन्नेकार्थत्वात्। होत्रास्तु ये मन्त्रा यूपोच्छ्रयणीया वा उच्छ्रयस्व वनस्पते इति यूपपरिव्याणार्था वा युवा सुवासा वा इति ते विकल्प्येरन्। कुतः एकार्थत्वात्। एकार्था एते उच्छ्रयणस्य परिव्याणस्य वाभिधायका एकैकत्र तेषामितरानपेक्षस्तदभिदधाति। तस्माद्विकल्पः।

क्रियमाणानुवादित्वात् समुच्चयो वा होत्राणाम् ॥ ३१ ॥ (सि०)

क्रियमाणानुवादित्वात्। कर्मणां विधाय उक्तः न चैते कर्मणः क्रियमाणानुवादिन एवं कर्त्तव्यमिति अन्न

[illegible] उच्यते। अध्वर्योस्तावत्करोमीत्येतेन प्रत्ययेनार्थः अवति क्षेतरस्मिन् क्रियेव च प्रवर्त्तते। एव प्रत्ययः यति पूर्वस्मिन् प्रत्यये अवति। यो हि ब्रूयतीदं मया कर्त्तव्यमिति स तत्करोति क्रियमाणानुवादिनश्चाध्वर्युणा क्रियमाणमर्थमनुवदन्ति युञ्जन्ति त्वामध्वरदेवाय त्व इति सोऽनुवादो ऽमाध्वर्यौः स्तुतिं कर्तुम् अतस्तत्स्वरूपं तेन च कर्मणाऽसङ्गतित्वात्। अरथार्था एते विधायन्ते। अरथार्थत्वं च मन्त्रस्यानसामर्थ्यात् आरितं ज्ञातमदृष्टार्थाय भवति। यथा प्रततं ज्ञातम्। ननु विधिशब्दादेव स्तुतिर्भवति। सत्यं विधेः शब्दादपि सामर्थ्याद्भवति। मन्त्रादपि भवति। मन्त्रस्यानसामर्थ्यात् मन्त्रेण कर्तव्या। ज्ञततेषु च कर्मसु ऋतिसन्तानेनार्थ इत्यनेकस्यापि क्रियमाणानुवादिनो मन्त्रस्यैकस्मिन्नेव प्रयोगे स भवति क्रियमाणानुवादित्वाद्वीप्सायां समुच्चयः।

समुच्चयं च दर्शयति ॥ ३० ॥ (उद्धा०)

वि.प्रथममामन्त्राह ज्योतिषतीरनुब्रूयादिति। अनेकक्रियाणि चैतद्भवति प्रथमा उत्तमेति। तस्मात् समुच्चयः।

इति श्रीमत्पार्थसारथिमिश्रकृतौ मीमांसाभाष्ये रत्नप्रभायाञ्च तृतीयः पादः।

अथ द्वादशाध्यायस्य चतुर्थः पादः ।

अपवदद्रव्याधिकरणम् ।

अप्राप्तकर्मयुक्ताः स्तुत्याशीरभिधानाश्च याज्यानुवाक्यासु समुच्चयः स्यादाशीः पृथक्त्वात् ॥ १ ॥

(पू० मि०)

वैष्णवीमनूच्य वाग्यत्तया सारस्वतीमनूच्य वाग्यत्तया गार्हस्त्यमनूच्य वाग्यत्तयेति स्तुतयः । अग्निर्मूर्धा दिवः इति आग्नेयः । आयुर्दाम्न अस्यायुर्मे देहीति विज्ञानादेवोऽसि त्वेषोऽसीति । अथ जप इति कः शब्दार्थः जप व्यक्तायां वाचीति । जप्यत इति जपः । यद्येवमग्निर्मूर्धादिव इति । अयमपि जप्यते । सत्यमयमपि जपः स्तुतिरपि त्विष्यते । अयं तु जप एव केवलः इतरैः स्तुत्यादिभिः समुच्चार्यमाणः एतस्मिन् जपे अकर्मसंयुक्ताः स्तुत्याशीरभिधानाश्चेति केवलाः जपाः प्रतीयन्ते । यथा ब्राह्मणाः परिव्राजकाः ब्रह्मचारिणश्च निर्गच्छन्तीति उक्ते केवलब्राह्मण्या ब्राह्मशब्देनोच्यते तद्वत् । ननु इदं विष्णुर्विचक्रमे इति स्तुतिरियं न खलु नामास्ति शब्दो नापि किञ्चित् स्तोतव्यमस्ति । न च विष्णुः न च विष्णुना स्तुतेन कश्चिदर्थोऽस्ति न स्तुतो विष्णुः कश्चिदङ्गीक्रियते । नापि स्तुतिः कर्तव्या चोदितवचनमात्रन्तु चोदितं वैष्णवीमनूच्येत तत्र कर्तव्यं वचनं अपनमिति समानार्थौ यथा-

लक्षणत्वाभावं चाचष्टे इति अर्थते। तेन यत्र प्रकरणादौ मन्त्रस्य क्रियते न तु श्रूयते नामाख्याते स जपः यत्र तु नामाख्याभिधानाभ्यां च को विशेषः। अपि वचनमात्रं मन्त्रस्य अभिधानेन तु जपतः सतो असतो वा गुणो नातिदिश्यते। एषोऽस्ति लेषोऽस्तीति न तत्र तत्रैकार्थत्वादिकमर्थं प्राप्ते उच्यते समुच्चयः कुतः आद्यौ पृथक्त्वात् स्तुतिपृथक्त्वात् अभिधानपृथक्त्वात् च न ह्येदं विष्णुरिति योऽर्थोऽभिधीयते स एव पश्यमानः सरस्वतीत्यनेन। एवं सर्वत्र। तस्मान्नानार्था एते अत एषां समुच्चयः स्यात्।

समुच्चयं च दर्शयति ॥ २ ॥ (हे०)

शास्त्रानुवचनयोक्तिः प्रथमामन्त्राइति विहृत्तमामन्त्राइति। समुच्चये च सति प्रथमा च विधीयते न एकस्मै। तस्मादपि समुच्चयः। यजमाने स्थितिप्राधिक्यं निर्देशः। एकस्मिं च मन्त्रे चितयमपि सम्भवति स्तुतिरभिधानं जपश्च। यथा इदं विष्णुर्विचक्रमे इति यदि विष्णुरभिधीयते ततः स्तुतिः अथान्यस्मै वृत्तान्त आख्यायते ततोऽभिधानम् अथानन्तरबोध्यते ततो जपः।

शास्त्रानुवाक्यासु विकल्पाधिकरणम्।

शास्त्रानुवाक्यासु तु विकल्पः स्याद्वैवतीपञ्चवार्थत्वात् ॥ १ ॥ (मि०)

पैङ्गलाधिकरणे [illegible] शास्त्रानुवाक्यासु [illegible] इति

कम् पर्व का [illegible]
स्तिनः परिपातु [illegible]
विकल्प इति विकल्पः [illegible]
विकल्पः [illegible]
गुणभूता देवता वाज्यानुवाक्यायां [illegible]
लक्ष्यते। सकृदुपक्रमभेद न तत्रोपपद्यते। [illegible]
कर्मणि उपसंक्रमणकार्यं कार्यमिति द्वितीयवत् [illegible]
नुवाक्याद्यं प्रयोगान्तरार्थं भवति तत्काङ्क्षाविकल्पः।

लिङ्गदर्शनाच्च ॥ ४ ॥ (वि०)

लिङ्गं वेदमन्त्रं दर्शयति। यिं चिद्वं भवति यत्किञ्चा-
क्रतुर्वै देवानां वाज्यानुवाक्यां एकधा प्रजापतिरुक्ति यज-
यत्यन्यया यजति तिस्रः कार्या इति पिटकवतो वाज्या-
नुवाक्यालक्षविधानस्य यदि वाक्ये तत्रोक्तविलक्षणत्वं दर्श-
यति। तस्मा न सर्वाणि वह यत्रानुपात्ति प्रजापा तु वा-
नुषं न क्रियते नैकैकमेव पिटकदेवतं तत् हि वह यत्रानी
याज्यानुवाक्यायोः कर्मभेदात् तत्काङ्क्षादि विकल्पः। यत्र
तयोरेव मिथः काङ्क्षाविकल्पो न भवति एवार्थत्वात्
प्राप्नोति। अन्यतरस्यापि हि देवतोपक्रमः सिध्यति।
उच्यते तस्माच्छया पुरोनुवाक्यो इति पुरोऽनुवाक इति पुरो-
नुवाक्या वायेविक पूर्वमन्त्रो वाज्यामेकं भवति। तत्र
यथे वैतानुवाक्यायां। तस्माद् वक्तुमः। यद्यपि वाक्ये देवता
उपक्रमभेदात्तथापि [illegible]
[illegible]

क्रयेषु त्वविकल्पः स्यादेकार्थत्वात् ॥ ५ ॥ (पू०)

क्रीणातिक्रयकार्याणि द्रव्याणि समाम्नातानि क्रयेण क्रीणाति हिरण्येन क्रीणाति द्रव्येण यवादीनि। तेषु क्रयेषु विकल्पः स्यात्। सर्वाणि हि क्रयस्य साधनत्वेन निरपेक्षाणि विधीयन्ते यथा व्रीहिषवौ यागेषु तथा क्रयेण क्रीणाति हिरण्येन क्रीणाति द्रव्येण क्रीणाति तस्मात्क्रयेषु विकल्पः।

समुच्चयो वा प्रयोगद्रव्यसमवायात् ॥६॥ (सि०)

आयन्द्रव्यं आवर्त्तयति। न चैवमस्ति विकल्प इति किन्तु समुच्चयः कस्मात् प्रयोगे द्रव्यसमवायात्। क्रयस्य प्रयोगो ऽधिकृत्यापि द्रव्यस्य यत्नेन क्रयः क्रियते। तत्र यस्मिन्नुत्पन्ने यागसमनं क्रियते तद्बहुभिः सुकरतरं भवति। तस्य तस्य द्रव्यस्यावश्यमापेक्षिकत्वं सर्वत्रोपदर्शितं न प्रयोगसमवायमनुपश्यन्ति। यदि न विरुद्धाक्षेपात्रि क्रीणातीति समुच्चयेनार्थं कर्तुं शक्यन्ति न विकल्पेत्। विकल्पेनापि तस्यार्थस्य कर्तुं शक्यत्वात्। तस्मात्समुच्चयः।

यत्तु क्रयवत्त्वं [illegible] (पू०)

[illegible]

स्यात्।

कस्मात् विकल्पः

सत्यमे न

प्रदोषवत्

अग्नीषोमीये यदी पुरोडाशकपालमवद्यति प्राणो वै पुरोडाश इति। यत्कपालमिति विचारः प्रभवति। किमुपवपनमन्त्रकृतार्थं कपालं वा यज्ञार्थकर्मोपयुक्तं ततो विकल्पः। कथं प्राप्तिपूर्वकः ततः समुच्चयः किं पुनरत्र युक्तमर्थवत्त्वेन कपालं भव्यसमुदायत्वे भूतं भव्यायेष्टयर्थत्वात् भवति प्रकृतं कर्म तदेकेनार्थवत्त्वात् सिध्यतीति वक्तव्यमेवमत्रापि विकल्पो भवति। एवं प्राप्ते उच्यते। (पू०)

संस्कारे च तत्प्रधानत्वात् ॥ ८ ॥ (सि०)

संस्कारोऽयं प्रतिपत्तिनिमित्तः। कुतः। तत्प्रधानत्वात्। अग्नीषोमीयार्थः प्रयुक्तत्वात् तच्छेषाः प्रतिपत्तिसंस्कारोऽस्मात् कुतः प्रतिपत्तिनिमित्तो मोक्ष्यं इत्यर्थः। यत्कर्मकरणेऽपि इत्यादिना सो प्रतिपत्तावपि हि प्रतिपत्तिसंस्कारः तस्मात् वैमिलिकेऽपि यद्यपि प्रतिपत्तिसंस्कारः तथापि प्रधानत्वात् पुरोडाशकपालं कर्म प्रति कपालं पवित्रवत् नियमेन यत्र यत्कपालेन प्रतिपत्तिः क्रियते तत्र तदवश्यं वक्तव्यम्।

संख्यासु तु विकल्पः स्यात् श्रुतिप्रतिषेधात्

॥ ९ ॥ (सि०)

आधाने दक्षिणाविधयः। एका देया षट् देया द्वादश देया इत्येवमादयस्तेषां समुच्चयो विकल्पो वा इति विचारणम् तन्त्राङ्गभूयस्त्वाय सर्वाङ्गग्राहिणा प्रयोगवचनेन समुच्चये प्राप्ते उच्यते। संख्यासु तु विकल्पः स्यात् कुतः श्रुतिविप्रतिषेधादेका देयेत्येकसंख्या परिच्छिन्नं द्रव्यं परिक्रयसाधनं श्रूयते तथा षड्देयेति षट्संख्यापरिच्छिन्नं यद्येका च षट्सु समुच्चीयेत संख्यान्तरप्राप्तसंख्योत्पद्यते। तत्परिच्छिन्नेन द्रव्येण परिक्रयवतः स्यात् तत्रैकश्रुतेः षड्श्रुतेश्च विप्रतिषेधः स्यात्। ननु नैवात्र परिक्रयः श्रूयते किं तर्हि दानम् एका देया षट्देया इति श्रूयते दानं नाम्नीयस्य परस्वत्वापादनं तत्र परस्वत्वात् स्यादित्येवमर्थः स्ववानसौ तस्यार्त्विज्यं तेन चास्य दातुरर्थः एवं दृष्टार्थौ भवति। अथ दानमात्रं श्रूयते ततोऽदृष्टं कल्पयितव्यम्। परिक्रय एवैकादीनां अर्थवत्त्वं यतः समभिः परिक्रीणीते न तेनैकया बहुभिः परिक्रीतो भवति। न हि ते एकैत्यामनन्ति न षड्डिति किं तर्हि समेति स एष श्रुतिविप्रतिषेधः। तस्माद् विकल्पः संख्यासु।

जाघनी विकल्पाधिकरणम् ।

द्रव्यविकारात्तु पूर्ववदर्थकर्म स्याद् तथा विकल्पेन नियमप्रधानत्वात् ॥ १० ॥ (१पू०)

जाघन्यां पत्नीः संयाजयन्तीति श्रूयते । तत्र पशुगुणेषु विचारो भवति । किं जाघन्यादीनां समुच्चय उत विकल्प इति अत्रापि पूर्व एव न्यायः यद्यर्थकर्म ततो विकल्पः अथ प्रतिपत्तिस्ततः समुच्चय इति किं प्राप्तं द्रव्यविकाराच्च पूर्ववदर्थकर्म स्यात् । पूर्ववदेतत् कर्म यज्जघन्या पत्नी संयाजनं दर्शपूर्णमासपूर्वकं चोदकपरम्परया पशुगुणप्राप्तदर्शपूर्णमासयोश्चैतदर्थकर्म न हि तत्र काचिच्छेषभूता जाघन्यस्ति यस्याः प्रतिपत्तिः स्यात् । लौकिकास्तु तत्राज्येन सह विकल्पश्चोदकेनाग्नीषोमीयः पशुः प्राप्तः तत्रापि श्रूयते जाघन्या पत्नीः संयाजयन्तीति सा श्रुतिः विकल्पे प्राप्ते नियमार्था भवति । यथाप्राप्तयोश्च नियमः गुणभूता च प्राप्ता तस्मादग्नीषोमीये गुणभूता जाघनी कर्मप्रधानं यथा अग्नीषोमीये तथा पशुगुणेषु तस्मात्तत्राप्यर्थकर्मणि वैकार्थानां जाघन्यादीनां समुच्चयो न युक्तः तस्माद् विकल्पः ।

द्रव्यत्वेऽपि समुच्चयोद्रव्यकर्मनिष्पत्तेः प्रतिपशुकर्मभेदादेवं सति यथाप्रकृति ॥ ११ ॥ (पू०)

यद्यपि जाघनी गुणभूता कर्मणि एवमपि समुच्चयो युक्तः

कुतः द्रव्यस्य कर्मनिष्पत्तेः जाघनी द्रव्यं कर्मणा विग्रहेण निष्पद्यमिति। तत्र प्रयोजनाभावो भवति। इदं च श्रूयते जाघन्या पत्नीः संयाजयन्तीति तदेवं विज्ञायते इदमस्य प्रयोजनं पत्न्युषि च प्रतिपत्तुकर्मभेदस्तस्य तस्य पत्नीः कर्मनिष्पत्तिः। जाघनी द्रव्यमतस्तयापि तत् पत्नीं संयाजार्थमेव कर्त्तव्यम्। एवं सति यथाप्रकृति कृतं भवति तस्मादर्थकर्मण्यपि समुच्चय एव।

कपालेऽपि तथेति चेत् ॥ १२ ॥ (आ०)

इति चेत्यश्यसि कर्मनिष्पत्तित्वाज्जाघनीनां समुच्चय इति तेन तर्हि कपालेऽपि समुच्चयः प्राप्नोति पुरोडाश कपालेन तुषानुपवपतीति तदपि कर्मणा प्रयुज्यते। तस्यापि तुषोपवपनं प्रयोजनं भवितुमर्हति। तथा पुरोडाशगणे तस्य तस्य पुरोडाशस्य कपालेन तुषोपवपनं कर्त्तव्यं वक्तव्यो वा विशेषः।

न कर्मणः परार्थत्वात् ॥ १३ ॥ (आ०नि०)

नैतदेवं कुतः कर्मणः परार्थत्वात् परार्थत्वं कपालानां प्रयोगकर्म पुरोडाशश्रपणार्थं तदर्थमुपात्तं कपाले तुषोपवपनमप्यन्वासन्स्यति तद्यथा। काष्ठान्याहर्तुं प्रस्थिते पुरुषे शाकाहरणमप्युपाधिः क्रियते। शाकमप्याहरेदिति तस्य गमनं शाकार्थमपि भवति कथं पुनर्ज्ञायते पुरोडाशार्थे कपाले तुषोपवपनमन्वासन्स्यते। तेन तदुभयार्थमिति उलोऽत्र न्यायो भविष्यति सङ्ख्य तन्निमित्तत्वादिति। न चेत् तुषोपवपनार्थो कपालानामुत्पत्ति

र्नावश्यं सर्वैस्तूष्णीमवपनं कर्त्तव्यम् अथवा उभयोरपि प्रतिषेधो यस्मात् कर्मणः परार्थत्वादिति कपाले व्याख्यातं जाघन्यामपि कर्मणा परार्थत्वं हृदयादीनां निष्पत्त्यर्थं विशसनकर्म च जाघन्याः । अपिच हृदयादिभिरवदानेयेष्टुं पशोरालब्धव्यविशसनकर्मापि तदर्थमेव तस्मान्न जाघन्या निष्पत्त्यर्थं विशसनं नचेत्तदेवं नैवात्र प्रयोजनाकाङ्क्षा कुतः सम्बन्धः हृदयादीन्यनुनिष्पन्ना जाघनी सा पत्नीसंयाजनिर्वृत्त्यर्थमुपविष्टा एकया च तया ते निर्वर्त्स्यन्ते । तस्मात्पशुगुणे जाघनीनां विकल्पः ।

प्रतिपत्तिस्तु शेषत्वात् ॥ १४ ॥ (२पू०)

भवेद्विकल्पो यद्यर्थकर्म स्यात् प्रतिपत्तिस्त्वेषा कस्माच्छेषत्वात् पशुना निर्वर्तिते यागे शेषभूता जाघनी निष्पद्योत्पन्ना न क्वचिन्निक्षेपार्हा तस्या निक्षेपः पत्नीसंयाजेषु क्रियते न जाघनी विधीयते न पत्नीसंयाजा उभये विहितः सम्बन्धो न विहितः । स विधीयते तत्र च जाघन्याः प्राधान्यं सूत्रं न गुणभावः गुणभावेऽस्य निकञ्च गुणभावः स्यात् । तत्र को दोषः । अग्नीषोमीयं पशुमालभत इत्येषा चोदना बाध्येत नानादेवतोऽयं दा भवति । एकदेशोऽस्याग्नीषोमीयः एकदेशः पत्नीयाजदेवतानामिति तस्मात्प्रतिपत्तिः । प्रतिपत्तौ स्यैव पशोर्जाघनी न प्रतिपाद्यते तस्यैव तेन संस्कारेण र्मनं ज्ञातकादपि समुच्चयः ।

श्रुतेऽपि पूर्ववत् स्यात् ॥ १५ ॥ (पू०)

श्रुते चह दध्यवद्यमित्यत्रापि प्रतिपत्तिः स्यात् कुतः पूर्ववत् स्यात्। अन्यपूर्वकं श्रुतं दधि चेन्द्रायीत्यत्र तस्यार्थान्तरगमनं विष्णुपिविष्टं तस्मात् तस्याप्युत्पत्तौ येन संयुक्तं तत्र तदर्थं श्रुतिहेतुत्वात्तस्यार्थान्तर गमने शेषत्वात् प्रतिपत्तिः स्यादित्यनेन न्यायेन प्रतिपत्तिः प्राप्नोति। वक्तव्यो वा विशेषः।

विकल्पोऽन्वर्थकर्मनियमप्रधानत्वात् शेषे च कर्मकार्यसमवायात्तस्मात्तेनार्थकर्म स्यात् ॥ १६ ॥ (सि०)

सूत्रे द्वयोः सूत्रयोः परिहारउच्यते प्रतिपत्तिस्तु शेषत्वादिति च श्रुते च पूर्ववत् स्यादिति च। यत्तावदुच्यते जाघन्याः प्रतिपत्तिरिति। तत्र ब्रूमः। विकल्पः प्रतिपत्तौ आघन्या आज्येन सह पक्षौ च तथैव विकल्पे प्राप्ते नियमप्रधाना पुनः श्रुतिः जाघन्याः पक्षौ संयाजयन्तीति आज्यस्य निवर्त्तकत्वात्कृतार्था भवति। जाघन्या अर्थकर्म न वारयति। वस्तुशेषत्वादिति अशेषस्यापि वचनादेकस्य गुणाभावो भवति यथा प्रस्तरस्य यच्च श्रुतस्यान्यार्थं उत्पन्नस्यान्यत्र गमनं प्रतिपत्तिरिति तदप्ययुक्तम्। कुतः? शेषे च कर्मकार्यसमवायात्। य उपयुक्तः शेषस्तस्मिन् कर्मकार्यं समवैति किं पुनस्तत्र स्यात्। न हि कर्म वा क्रियते न चैतच्छ्रुतं दधि वा यच्चिदुपयुक्तं तस्मै आत्मीयं

नैव भवेदिवंपेक्षमाणेन आधानीयेन पुनिरुक्तमर्थकर्म स्यात् न प्रतिपत्तिः ।

उखाग्निनिरूपणाधिकरणम् ।

उखायां काम्यनित्यसमुच्चयो नियोगा मदर्शनात् ॥१७॥ (पू०)

अस्त्यग्नावुखाग्निः सन्नाधेनाग्निं जनयतीति तं कृत्य श्रूयते । तृचायात ज्वलतो ब्रह्मवर्चसकामस्या यान्वादध्यात् । भ्राट्टादन्नाद्यकामस्याक्त्यान्वादध्यात् । यतादृष्टिकामस्येति तत्र विचार्यते किं काम्यस्य त्यस्य वा अग्नेः समुच्चयः । अथवा-काम्येन नित्योऽग्निः क्रियत इति तत्रोच्यते । उखायां काम्यनित्ययोरन्योन्यं समुच्चयः कृतः । एवं सर्वाङ्गोपसंहारी प्रयोगवचनो ग्रहीष्यते । ननु नैमित्तिकं तु प्रकृत्यो तद्विकारः योगविशेषादित्यनेन न्यायेन काम्योऽग्निर्नित्यस्य कारको भविष्यति । न भविष्यति किं कारणं नियोगा मदर्शनात् । अग्नेर्निर्वापने अयं कामः श्रूयते भ्राट्टान्वादध्यात् ब्रह्मवर्चसकामस्य ह्यग्निर्होमार्थो भवतीति य चेदाङ्गत्वाभिधानात् फलं भविष्यति होमस्तु यथा समुच्चय एव सन्निधानाच्च अग्नेः समुच्चयः असति वा कृतेषु कर्म स्यात् यदि च काम्येन नित्योऽग्निर्विधियेत स्व स्यात् । तस्मिं श्चासत्यसंस्कृतेषु भ्राट्टादिषु कर्म स्यात् । था तस्य सर्वार्थता वाध्यते तस्मादपि समुच्चयः ।

तस्य च देवतार्थत्वात् ॥१८॥ (हे०)

अपि चान्यन्याधाने तद्देवतापरिग्रहणं यदि सोऽग्निरुत्सृज्येत ततो देवता अपरिगृहीता भवेयुः। अन्यन्याधाने न अग्निर्धार्येत तदधताऽग्निधारणात् देवता परिगृहः।

विकारो वा नित्यस्यार्थः कार्म्येण तदुक्तहेतुः ॥ १९ ॥ (सि०)

नैमित्तिकं तु प्रकृते तद्विकार इति। सामान्येनैतदुक्तं यदाहवनीये जुहोतीति वृष्टिकामो वैद्युतादिति विशेषेण तेन सामान्यं बाध्येत किं कारणं स्वार्थये वृत्तिर्विशेषस्य सामान्यस्य ततोऽन्यत्रापि वृत्तिसम्भवात्। विशेषस्य चान्यपरिच्छिन्नस्य एकावयवित्वादसम्भवे विषयाभावात् प्रसङ्गादुपदेशवैयर्थ्यं मा भूदिति। अथ यदुक्तं नियोगे कामदर्शनादिति तच्च ब्रूमः। भ्राष्ट्रादाहृत्यान्वाधध्यादिति नित्यस्यैव होमार्थस्यान्वाधानस्यायं विशेषकामसंयोगः। भ्रष्ट्रादाहृत्यान्वाधेयकामस्येति आदध्यादिति पुनः श्रुतिः। यदन्वाधाने कामश्रुतिः स्यादाधानं विधीयेत नाधीयमानं कामस्य साधनत्वेन युज्यते। तस्मिंश्च विधीयमाने विशेषस्य चेत्यनेकार्थत्वात् वाक्यं भिद्येत तस्मान्न नियोगे कामश्रुतिः। किं तर्हि होमायैवार्थं नित्यनियोगः। अग्निविशेषविधानार्थमनूद्यते। यावदुक्तं स्यात् वैद्युतमग्निं होमार्थं

र्यादिति तावदेवं एव चेन्नैमित्तिकः तस्मिन् तस्मिन् र्ये नित्यमग्निं करोतीत्युपपन्नम्।

वचनादसंस्कृतेषु कर्म स्यादिति ॥ १९ ॥ (सि०)

तत्र ब्रूमः। वचनादसंस्कृतेषु कर्म स्यादिति किमिदं न कुर्यात्। नास्ति वचनस्यातिभारः। यथा पदे-ष्वेतोक्ति।

संसर्गे चापि दोषः स्यात् ॥ २० ॥ (आ०)

अपि च यदि समुच्चयः स्यात् प्राधान्येन सह संसर्गः-शात्। वैहारिकस्य तु तत्र दोषः श्रूयते। अग्नये शुच-ष्टाकपालं निर्वपेत्पश्वाग्निः प्रधानेन सह संसर्ग। ग्रह्येत शुचित्वर एष योऽग्नेर्यः प्रदातव्यः।

वचनादिति चेदथेतरस्मिन्नुत्सर्गा परिग्रहः कर्मणाः कृतत्वात् ॥ २१ ॥ (आ०नि०)

आह नैष दोषः। वचनात् संसर्गो न वाचनिके क्रिया-गणे दोष उच्यते। अथेतरस्मिन्। इतरस्मिन्नपि पर्व वाचनिके असंस्कृतेषु दोषः। एवमुभयत्र वाचनिकत्वात् दोषाभावे सति नैमित्तिकत्वात् विकार आशीयते न समु-दयः। उत्सर्गोऽपि नित्यस्याग्नेर्वत्सापरिग्रहो न विरुद्धः कर्मणः कृतत्वादन्यत्राधानेन देवताः परिगृह्यन्ते। ना-म्नेना एवं श्रूयते। यः पूर्वेद्युरग्निं यक्ष्यति स वै श्वो-भूते देवता अभियजत इति तच्च कृतमग्नेर्यच्च तेन परि-[illegible] अस्यविरोधः।

स आहवनीयः स्यादाहुतिसंयोगात् ॥२२॥(पू०)

यत्रासौ वैहारिकोऽग्निः स आहवनीयः स्यात्। कुतः आहुति संयोगात्। एतत् हूयते यस्मिन् स आहवनीयः हूयते चास्मिन्नित्ये तस्मादयमप्याहवनीयः।

अन्यो वोद्धृत्याहरणात् तस्मिंस्तु संस्कारकर्मशिष्टत्वात् ॥ २३ ॥ (सि०)

अन्यो वा आहवनीयात् स्यादाहवनीयः कस्मात्। उद्धृत्याहरणात्। लौकिकोऽयमुद्धृत्य हूयते भ्राष्ट्रादाहरेत्। प्रायास्वादाहरेदिति। आहवनीयशब्दश्च संस्कारनिमित्तः संस्कारेषु तत्सद्भावात् अभावाच्च प्राङ् तेभ्यः यत्राहुति संयोगादिति सिद्धे आहवनीयत्वे आहुत्यो विधीयन्ते यदाऽहवनीये जुहोतीति न तेनासौ विधानात्। कृतं तद्भवति। तस्मादाऽहवनीयः प्रयोजनमाहवनीयधर्मा भवः। तस्मिन् संस्कारकर्मशिष्टत्वात् तस्मिन् वैहारिकेऽग्नौ आधानिकाः संस्काराः कर्तव्याः शिष्टत्वात् सर्वकर्मार्थाहिते आधानस्य सर्वयोगित्वात्। यदि न क्रियेरन् कर्म तेनाङ्गेन हीनमकलं स्यात्।

स्थानात्तु परिलुप्येरन् ॥ २४ ॥ (सि०)

परिलुप्येरन् आधानिकाः संस्काराः कस्मात् स्थानात् तस्य संस्कृतस्याग्नेः स्थानेऽयमसंस्कृतः श्रुतः स वैहारिकत्वात् तस्य निवर्तकः स चेद्विहितः किमर्थं संस्काराः परि-

यन्ते। न संस्कृतः स्यादित्येवमर्थन्ते क्रियेरन्। असंस्कृते न चार्थः तस्मात् लुप्येरन्।

उक्ताग्ने र्नित्यधारणाभावाधिकरणम्।

नित्यधारणे विकल्पो न ह्यकस्मात् प्रतिषेधः स्यात् ॥ २५ ॥ (पू०)

तस्मिन्नेवोक्ष्ये चिन्ता किमयं नित्यं धार्यो न वा थ वा नैव धार्यते इति तत्रोच्यते नित्यधारणे विकल्पः ार्यो वा न वा कुतः नह्यकस्मात् प्रतिषेधः स्यात् धारणात् प्रतिषेधः तस्य भवति। प्रतिसमिधीत आहव्यमस्मै नयतीति श्रुतिर्धारणप्रसङ्गे च प्रतिषेध्यार्थत्वात् भवति । पथा गन्तव्यं भोक्तव्यमिति सति गमनप्रसङ्गभोजनप्रसङ्गे च भवति। न च श्रुतिमन्तरेण प्रसङ्ग उपपद्यत इति नित्यसाधारणस्य विधायिका श्रुतिरनुमीयते तया ाप्तिः। प्रतिषेधेन निवृत्तिः तस्माद् विकल्पः।

नित्यधारणाद्वा प्रतिषेधो गतश्रियः ॥२६॥ (सि०)

यदि कदाचित् प्रत्यक्षया श्रुत्या प्रसङ्गो न स्यात्। तोऽर्थादनुमीयेत। अस्ति तु नित्यधारणस्य प्रसक्तिका-तश्रियः श्रुतिः। नित्यहुत आहवनीयो गतश्रिय इति ाहवनीयस्थानापन्नत्वादुख्यस्यापि नित्यधारणं प्रसक्तं ात् प्रतिषेधार्थेयं श्रुतिः तस्मान्न श्रुत्यन्तरस्यानुमानं वति। अतो नित्यधारणस्याविधानात् कार्याभा-ाधारणमेव स्यात्।

सत्राङ्गानयोः एतेनकृतत्वं सर्व्वेषां कर्त्रधिकरणम्।

परार्थान्येकः प्रतियन्तिवत्सत्राङ्गानयोर्यज-मानगमे ऽनियमोऽविशेषात् ॥ २६ ॥ (पू०)

यानि परार्थानि कर्म्माणि यथा सत्रे यजमानो ग्रावा-मित यजमानसन्निधावुद्गरी भवति। तान्येको यज-मानः कुर्य्याच्च सर्वे तस्य हेतोः परार्थत्वादेव न तत्कर्म्मणा यजमानस्य कश्चिदुपकारः क्रियते तस्य न स्वोपकाराय सर्वे कुर्युः। यजमानेन तु तत्कर्म्म क्रियते। तदेकेनैव कृतमिति द्वितीयानां प्रवृत्तौ हेतुर्नास्ति तस्मादेकः कुर्य्यात्।

सत्रे कस्यानियमो यः कश्चिदेकः कुर्य्यात्। कुतः अविशेषात्। मात्रशब्दकृतोवाऽर्थकृतो विशे यद्भवति तस्मादनियमः। अङ्गीने मुख्यस्याभावादेवमवस्थितम्।

मुख्यो वा विप्रतिषेधात् ॥२७॥ (सि०)

सत्रे तु मुख्यः कुर्यात् गृहपतिः कुतः। विप्रति-षेधात् तस्य कुर्वतो विप्रतिषेधः। न हि तेनार्त्विजः पदार्थाः कर्त्तव्याः। ऋत्विजां तु स्वपदार्थसन्निपाते विप्र-तिषेधः स्यात्। एवं हि गृहपतेरर्थवत्त्वं क्रत्वर्थानि यज-मानानि।

सत्रे यजमानकर्म्मणा सर्वेषां कर्त्तव्यताधिकरणम्।

सत्रे गृहपतिरर्थयोगाद्धोत्रवत् आरनाय वचनाच्च ॥ २८ ॥ (पू०)

अत्र यानि यजमानानि संस्कारार्थानि कर्माणि तान्यपि किं सर्वे गृहपतिनैव कर्त्तव्यानि उत सर्वैरित्युच्यते। गृहपतिना कर्तव्यानि कुतः। असंयोगादेवं गृहपतिरिति समाख्याया अन्वर्थेनासंयोगो न भवति अन्वर्था भविष्यतीत्यर्थः। कथं ज्ञात्वा तल्लोच्यते। इहानेन गृहशब्देन कर्मोच्यते न शालेति। शालायामभिधीयमानायामविशेषः स्यात्। सर्वे हि ते शालायाः पतयः ननु च कर्मणोऽपि ते सर्व एव पतयः सत्यमेवं समाख्यानात् प्रकर्षावगतिर्विज्ञायते यथा देवदत्तो मथुरायां ब्राह्मण इति। प्रकर्षेण कर्मभूयस्त्वाद्वा स्यात् फलभूयस्त्वाद्वा। तत्र कर्मभूयस्त्वयोपपद्यते न इतरेषां बहुतरं कर्म फलभूयस्त्वन्तु युज्यते यजमानसंस्काराणां तस्याधिक्यात्। तस्माद् गृहपतिसमाख्याया अर्थवत्वात् पुरुषार्थानां गृहपतिः कर्त्तेति हौत्रवत् तथथा हौत्रमिति समाख्यायाः अर्थवत्त्वाद्धोता हौत्रस्य कर्त्ता भवत्येवमिहापि आत्मायत्वचनाच्च आत्मार्थेऽयं कर्म गृहपतेः फलभूयस्त्वे भवति। यो वै सत्रे बहूनां यजमानानां गृहपतिः स सत्रस्य प्रत्येता स हि भूयिष्ठाय ऋत्विग्भ्य इतीति तथेति तस्मादेव कारणात्।

सर्वेवा तदर्थत्वात् ॥ २९ ॥ (२९)

सर्वे वा यजमानाः पुरुषार्थानि कुर्युः। न गृहपतिरेव कुर्यात्। तदर्थत्वात् सर्वार्थमेव हि कर्म अविशेषेण हि श्रुतं द्वादशाहमूत्विक्कामा उपेयुरिति यस्त्वेषां संस्कारैर्युज्यते। तस्य गुणहीनमफलं कर्म भवेदिति तस्माविशेषेण

श्रुतिर्बाधेत ब्रह्मपतिरिति समाख्यासामान्यात्। यथा ब्रह्मपतिः। स्वं वर्म न करोत्यन्यो तस्य कर्मकारः अयमेवमप्यापीत्यनेन सामान्येन स्वामित्वप्रकर्षः फलप्रकर्षाभावात्।

नन्वेवं स्वार्थमेव यजमानाः क्रत्वर्थं परिहापयन्तीत्युच्यते।

विप्रतिषेधे परम् ॥ ३० ॥ (हे०)

यत्र क्रत्वर्थेन पुरुषार्थत्वाद् विप्रतिषेधः। तत्र स्वार्थं करिष्यति विप्रतिषेधे तु परकीयं क्रत्वर्थं, किं कारणं क्रत्वर्थं ह्यक्रियमाणे क्रतुरेव न संपद्यते पुरुषार्थे तु हीने पुरुषो विगुणः अङ्गगुणविरोधे च तादर्थ्यादिति क्रत्वर्थो बलवान्। तस्मात् कर्तव्यः।

हीने परार्थत्वात् ॥ ३१ ॥ (हे०वै०)

यत्तु हीनवदिति हीने परार्थः पुरुषः न कर्म पुरुषार्थं तद्धीनेन केनचित् कर्तव्यं न सर्वैः। तत्र समाख्या नियामिका स्यात्। इह पुनर्ब्रह्मपतिरिति समाख्यानिहत्तिं शक्नोति कर्तुं अतोऽन्यथापि युज्यते। अयुज्यमानाऽपि कामममनर्थिका स्यात्। नैव निवर्तयितुं शक्नुयात्। निवर्तकस्य वचनस्याभावात्।

वचनं परम् ॥ ३२ ॥ (हे०)

यत्र दर्शनमुपदिष्टं सत्रस्थ प्रत्नेना इति। न तद्दर्शनं किं तर्हि वचनं तत्फलभूयस्त्वप्राप्तेः। प्राप्तिपूर्वकं हि दर्शनं भवति।

प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात् ॥ ३३ ॥ (पू०)

ऋत्विक्त्वं सर्ववर्णानां ब्राह्मणराजन्यवैश्यानां स्यात्। कुतः प्रभुत्वात्। प्रभवन्ति सर्वे यज्ञं वक्तुं कर्तुं सर्वेऽध्वर्यवस्तो विद्वांसश्च न ह्यविद्वान् विहितोऽसौ करणाय कारणं सर्वेषां कर्मप्रदर्शनार्थं ब्राह्मण इत्युक्तम्।

स्मृतेर्वा स्याद् ब्राह्मणानाम् ॥ ३४ ॥ (सि०)

ब्राह्मणानामेवार्त्विज्यं स्यात् नेतरयोर्वर्णयोः कुतः स्मृतेः एवं शिष्टाः स्मरन्ति। याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव इत्युपावा इति स्मृतिश्च प्रमाणमित्युक्तम्। अपि च कारणायद्वये प्रयुक्तानि प्रतीयेरन् तस्माद् ब्राह्मणा एव यायजीयुः।

फलचमसविधानाच्चेतरेषाम् ॥ ३४ ॥ (हे०)

इतरेषां राजन्यवैश्यानां फलचमसौ विधीयेते। यदि राजन्य वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषीत न्यग्रोधवल्लरीराहृत्यताः संपिष्य दध्नाभृष्य वा भक्षं भक्षं प्रयच्छेत्र सोममिति। यदि क्षीरे सति तत्र दीयते तत्र यदि क्षीराभावो विज्ञायते यदि वा भोक्तुः क्षीराभागित्वमिष्यते सोमे विभक्षयिषिते फलानि दीयन्ते तत्रापि सोमाभावे वा यदि वा भोक्तुरसोमपत्वं विज्ञायते तत्र क्षीरवत्सविहितः तस्मात्र सोमाभावो

शेषभक्षसोमपानं विज्ञायते न वाऽसोमपाभ्यां शक्यत आर्त्विज्यं कर्तुं नियमात् सोमभक्षस्य तस्माच्च राजन्यवैश्ययोरार्त्विज्यम्।

क्षान्नाव्येष्वेवं प्रतिषेधः सोमपीथहेतुत्वात् ॥३५॥ (हे०)

अपि च सान्नाय्ये भक्षे राजन्यवैश्ययोः प्रतिषेधं तु सोमपीथहेतुमाह न राजन्यो न वैश्यो वा सान्नाय्यं वा पिबेत्। असोमपीथो शेष इति ब्रुवन् सोमपीथाभावे राजन्यवैश्यानामार्त्विजनाभावं दर्शयति।

चतुर्धाकरणे च निर्देशात् ॥ ३६ ॥ (हे०)

दर्शपूर्णमासयोश्च पुरोडाशस्य चतुर्धाकरणे ब्राह्मणा एव निर्दिश्यन्ते ब्राह्मणानामेवेदं हविः सो नां सोमपीथिनां नेह ब्राह्मणस्यास्तीति शेषभक्षणार्थं चतुर्धाकरणमित्युक्तं शेषभक्षार्त्विजः। यदि राजन्यवैश्ययोरप्यार्त्विज्यमस्ति न ब्राह्मणानामेवेदं हविः स्यात्। राजन्यवैश्ययोरपि पूर्वे स्यात् तवेदमवधारणमसमर्थं भवेत्।

अन्वाहार्य्ये च दर्शनात् ॥ ३७ ॥ (हे०)

दर्शपूर्णमासिक्यां चान्वाहार्यदक्षिणायां ब्राह्मणा एव दृश्यन्ते। त एते वै देवा अद्भुतादो यद्ब्राह्मणा यदन्वाहार्यमाहरन्तीति तानेव तेन प्रीणातीति दक्षिणा च ऋत्विग्भ्यो दीयते तस्माद्ब्राह्मणानामार्त्विज्यम्। यस्मा-

इत्थं लक्षणा स्मृतिः तान्येतानि दर्शनान्युपोद्बलयन्ति
तस्मादार्लिङ्ग्यं ब्राह्मणानामेव स्वाध्यायस्तस्योर्ध्वबोधितिः ।

इति भाष्याभट्टवरस्वामिनः कृतौ मीमांसा-
भाष्ये द्वादशस्याध्यायस्य चतुर्थः पादः ।

मीमांसाभाष्यञ्च सम्पूर्णम् ।

शाके वाणाम्बरक्षितिमिते वर्षे द्विजन्मना ।
सभाष्यं जैमिनेः सूत्रं जीवानन्देन संस्कृतम् ॥